THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY

OU_180821

UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY

Call No. S 954 S 81k Accession No. S 1286 .

Author सेन, म. स.

Title ओरछा नरेश . 1960 .

This book should be returned on or before the date last marked below

KALHANAS RAJATARANGINI

OR

CHRONICLE OF THE KINGS OF KASHMIR

EDITED BY

M. A. STEIN, PH. D.,

PRINCIPAL, ORIENTAL COLLEGE, LAHORE.

VOL. I

SANSKRIT TEXT WITH CRITICAL NOTES.



सोखण्डिताश्मप्राकारं प्रासादान्तर्व्यधत्त च ।
मार्तण्डस्यादृभुतं दाता द्राक्षास्फीतं च पत्तनम् ॥

Rajatarangini, iv. 192.

MUNSHI RAM MANOHAR LAL

ORIENTAL BOOKSELLERS & PUBLISHERS

Nai Sarak, DELHI-6.

First Edition 1892
Second Reprint Edition 1960

Price Rs. 75-00

PAGES 1 TO 296 PRINTED AT JAYYED PRESS DELHI & PAGES i TO XX AT RAMA KRISHNA PRESS DELHI & PUBLISHED BY SHRI MANOHARLAL JAIN PROP. M/S MUNSHIRAM MANOHARLAL, PUBLISHERS, NAI SARAK, DELHI-6 (INDIA)

TO

HIS HIGHNESS

MAHARAJA PARTAB SINGH, G.C.S.I.

MAHARAJA OF KASHMIR AND JAMMU,

IN

THIS EDITION OF THE EARLIEST EXTANT NARRATIVE

OF THE HISTORY OF KASHMIR

IS RESPECTFULLY

DEDICATED

BY

M. A. STEIN.

भुजवनतरुच्छायां येषां निषेव्य महौजसां जलधिरशना मेदिन्यासीदसावकुतोभया ।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥

Kalhana's Rajatarangini, i. 46.



PREFACE

THE plan of the present Edition of *Kalhaṇa's Rājataraṅgiṇî* first suggested itself to me in the summer of 1888 when a visit to Kashmir had directed my interest towards the antiquities and the history of the Valley.

The *Rājataraṅgiṇî* is our oldest written authority for the history of the various dynasties which ruled Kashmir from the earliest period down to the time of the author who began to write his Chronicle in the *Śaka* year 1070 (A. D. 1148). Although it has for this reason been the object of much attention and research on the part of Sanskṛtists, an elaborate statement is scarcely needed to justify the present enterprise to those who have had occasion to consult the *Rājataraṅgiṇî* in its published Editions for the purposes of historical or philological research.

When Professor Wilson published in 1825 the first account of Kalhaṇa's work and an abstract of its first six cantos, he had to rely for his text on three incomplete *Devanāgarî* MSS which were so deficient that "a close translation, even if desirable, would have been impracticable."[1] The *editio princeps*, which appeared ten years later at Calcutta under the auspices of the Bengal Asiatic Society,[2] was based principally, as Mr. Troyer states, on a Devanāgarî transcript from a Kashmirian MS. which had been prepared for Mr. Moorcroft during that traveller's stay at Srînagar in 1823. The fact that this copy, as we now can prove, was prepared from the *codex* which must be considered as the *archetypus* of all existing Kashmirian MSS., reflects no little credit on the care and judgment with which that energetic but ill-fated traveller endeavoured to serve on this occasion the cause of Sanskṛit philology. But the numerous corruptions which have rendered the text of the Calcutta Edition unintelligible in many passages, and which can be shown to have originated mostly from mistakes in the transcription, prove that this copy shared all the defects which are inherent to Devanāgarî transcripts made in Kashmir from *Śāradā* MSS. Frequently, too, the difficulties which the Calcutta Paṇḍits evidently encountered in interpreting the text in consequence of their want of familiarity with the details of Kashmir topography and traditions, seem to have induced them to alter the text in an unscrupulous manner.

Mr. Troyer's edition, which, together with a translation, was published by the *Société Asiatique* at Paris in 1840, was avowedly prepared from the same materials as the editio princeps,[3] and has not been carried beyond the first six cantos. Besides correcting numerous misprints of the Calcutta Edition, Mr. Troyer's text shows an improvement by taking more carefully into account, in a certain number of passages, the reading of Mr. Moorcroft's

1. "*Essay on the Hindu History of Cashmir*," Asiatic Researches, Vol. XV, p. 5.

2. Published in 1835, together with the *Rājataraṅgiṇîs* of *Jonarāja* and *Śrîvara* and the *Rājāvalipatākā* of *Prājyabhaṭṭa* which bring down the narrative to the time of Akbar, under the title: "*The Rājataraṅgiṇi, a History of Cashmir*".

3. The two Colebrooke MSS., which Mr. Troyer consulted at the East India House (see *Preface*, p. v), are described by him as very inferior to Mr. Moorcroft's copy, and are apparently identical with those which Professor Wilson had at his disposal.

copy. Of Mr. Troyer's translation of the Rājataraṅgiṇī which was completed in 1852, it may, perhaps, be said without injustice that it has proved useful chiefly by bringing conspicuously before the eyes of Sanskṛtists the great defects of the text upon which it was based, and the insufficiency of the materials then available to European scholars for the interpretation of the work.

These defects did not escape the notice of scholars like Professor Lassen and General Cunningham who endeavoured to use Kalhaṇa's work for the purposes of historical and chronological research, no effort, however, seems to have been made to obtain better materials till Professor Buhler's tour in search for Sanskṛit MSS. in Kashmir in 1875. Amongst the many results which rewarded Professor Bühler's brilliant researches in Kashmir, not the least important was that he established the absolute superiority of the Kashmir MSS. of the Rājataraṅgiṇī written in the Śāradā character, over th se in Devanāgarī. The acquintance gained with the genuine text of the Rājataraṅgiṇī by the collation of a good, though modern, Śāradā copy, and the discovery of valuable fresh material for its explanation in other Kashmirian works like the *Nīlamatapurāna*, and the various *Māhatmyas*, enabled Professor Buhler to trace out with admirable lucidity the work yet to be done for the Rājataraṅgiṇī[1] Professor Buhler had clearly recognized the fact that all Śāradā MSS. known to exist at present in Kashmir are derived from a single Manuscript called by him the *codex archetypus*. But he had not been able to obtain more than a glimpse of this ancient MS. from the owner, *Pandit Keśavarām*, in whose family it had come down as an heirloom.

It had been my chief aim since my first visit to Kashmir to utilize the opportunities offered by a prolonged stay in the Valley for the acquisition of such materials as might enable me to undertake the task of preparing a critical Edition of the Rājataraṅgiṇī, and to contribute towards the interpretation of the work. As regards the text of the Rājataraṅgiṇī I had to content myself in 1888 with obtaining for collation a Śāradā paper MS. in possession of *Pandit Rāzdān Balabhadra*, copied in the first quarter of this century, which had already served Professor Buhler for the same purpose, and another MS., copied about the same time from the codex archetypus and now the property of *Pandit Govind Kaul*. The careful collation of the above-named two MSS., which was completed in the Cold Season of 1888-89, revealed, in numerous passages; considerable discrepancies between them, notwithstanding their evidently common origin. This convinced me still more of the necessity of securing the *codex archetypus* itself for the purpose of my Edition.

On Paṇdit Keśavarām's death which took place after Professor Buhler's visit, the *codex archetypus* had been divided among three of the Paṇdit's heirs, and this circumstance had made access to the MS. still more difficult than in 1875. It was, therefore, not till I had made repeated endevours during my second visit to Śrīnagar in 1889 that the whole of the MS. was entrusted to me by the owners for the purposes of the present Edition. My success was chiefly due to the kind interest shown in the matter by *Pandit Sūraj Kaul*, C I E., Member of the Kashmir State Council, and his son *Pandit Hari Krishna Kaul*, M A., then my pupil, and now a promising young officer in the Statutory Civil

1. *Detailed Report on a Tour in search of Sanskrit MSS in Kashmir* (Extra Number of the Journal of the Bombay Branch of the Royal Asiatic Society, 1877), p, 52 *seqq*

Service of the Punjab. Their timely aid has made it possible to secure the contents of this venerable codex against the risks to which its worn decaying leaves have so long been exposed. Both gentlemen have thus well deserved the thanks of all interested in the ancient history of Kashmir.

The *codex archetypus* contains all the eight cantos of Kalhaṇa's poem, and consisted originally of 328 folia of age-worn country paper. One leaf in the middle (fol 167) and unfortunately also the leaf at the end (fol. 328) have been lost, probably when the above-mentioned partition between Pt. Keśavarām's heirs was made The leaves, which vary in their dimensions, measure on the average about $9\frac{1}{2}$" by $6\frac{1}{2}$"; they are written, as is the case in most Kashmir MSS., whether of birch-bark or paper, in lines running parallel to the narrower side The number of lines to the page varies from 15 to 20. The leaves, of which two always form one sheet, are placed in forms or "*samchayas*" of different thickness, containing from 2 to 6 sheets. These forms are found in the first half of the work, up to fol 166, bound up after the fashion of European books. The second part appears never to have been bound, and most of the sheets are now cut up into loose leaves.

No date is given in the colophons attached to the end of the several *taraṅgas*, but fortunately the writer of the codex, *Pandit Rājanaka Ratnakantha*, has recorded his name in the colophons of *taraṅgas* iii., vi. and vii.,[1] and from this entry the age of the MS. can be ascertained with a fair degree of precision. A birch-back MS. of the *Kāvyaprakāśa-saṁketa*, written by the same Rājānaka, Ratnakaṇtha, is dated Saka 1570, corresponding to A.D. 1648.[2] Other MSS. from his hand, which I purchased in Kashmir, show later dates; a MS. of *Rayamukuta's* Commentary on the *Amarakośa*[3] and a MS. of *Trilochanadā-a's Kātantrapañchikā*[4] were written by Rājānaka Ratnakaṇtha Saka 1577 (A. D. 1655) and Saka 1595 (A. D. 1673), respectively. Rājānaka Ratnakaṇtha has, however, taken care to let us know about his person and time not only in the MSS. he copied, but also in such works as he composed. In a commentary to the *Haravijayakāvya*, named the *Laghupañchikā*, of which a copy written by his own hand and extending to the end of the Ist Sarga is now in my possession, he calls himself the son of *Rājānaka Śaṁkarakantha*, of the *Dhāumyāyana gotra*, and states the year of composition as Saka 1603 (A. D. 1681).[5]

The details here given enable us to identify our Rājānaka Ratnakaṇtha with the author of the well-known commentary on *Jagaddhara's Kusumāñjali*, called likewise *Laghupañchikā*, which has been printed in the *Kāvyamālā*, and of the commentary, called *Śishyahitā*, on the *Yudhishṭhiravijayakāvya* which has been noticed in Professor Buhler's

1. See colophon of *taraṅgas* iii. and vii.: लिखितश्चैष मया राजानकरत्नकण्ठेन ; and colophon of *taraṅga* vi.: लिखितश्चैष राजानकरत्नकण्ठेन.
2. The MS. then in possession of *Pandit Dāmodar*, Head Pandit of H H the Mahārāja's School, Srīnagar. The colophon of the Ist *ullāsa* runs : काव्यप्रकाशसकेतो ग्रन्थाकारकृतो मया । अलेखिरत्नकण्ठेन शाके खागाहसंभते (१५७०).
3. See colophon of *kaṇḍa* ii. . लिखितश्चैष मया राजानकरत्नकण्ठेन स० ३१ (*i e Laukika Samvat* 4731) शाक. १५७७ श्राश्वति ५ कण्ठवाटविषये (*Kishtvār*) "लिखितोयं ग्रथ".
4. See colophon to *Nāmaprakarana*, Pada ii . लिखितश्चैष मया राजानकरत्नकण्ठेन सं ४९ (*Laukika Samvat* 4749) शाके १५९५.
5. See the introduction to the *Laghupañchikā* त्रिनभोष्टि १६०३ मिते शाके धौम्यायनकुलोद्भव । काश्मीरदेशवास्तव्यो रत्नकण्ठाभिधः सुधीः ॥ विवरिचन्मंण्डनीरत्नाकरमहाकवे । गभीरवितते काव्ये करोति लघुपञ्जिकाम् ॥, and the colophon at the end of the first *sarga* : इति श्रीमहाकवे राजानकरत्नकरस्य कृतौ हरविजयाख्ये महाकाव्ये श्रीशारदाचरणरज पवित्रस्थनवास्तव्यराजानकश्रीशकरकण्ठात्मजराजानकरत्नकण्ठकृतायां लघुपञ्जिकायां प्रथम सर्गः । लिखितश्चैष मया राजानकरत्नकण्ठेन सं ५७ शाके १६०३.

Kashmir Report[1] In the introduction to the first named commentary[2] which was composed in Saka 1602 (A. D. 1680), the same statements are made regarding the author's descent and residence as those given in the above note from the commentary to the *Haravijaya-kāvya*. The commentary to the *Yudhishṭhiravijayakāvya*, as will be seen from the extracts given below,[3] can also be ascribed with certainty to our Rājānaka Ratnakaṇṭha. He wrote this work Saka 1593 (A. D. 1671), "when Aurangzeb (*Avaraṅgaśāhi*) ruled the Earth" The dates recorded above of works composed on MSS. written by Rājānaka Ratnakaṇṭha, range from A. D 1648 to A D 1681, and we are, therefore, justified in assuming that the codex of the Rājataraṅgiṇī was also written by him some time about this period.

From the evidence of the numerous MSS by his hand which are still extant in Kashmir and which are on account of the marked peculiarity of the writing well known to the Paṇḍits, it appears that Rājānaka Ratnakaṇṭha, although an accurate copyist, must have been a very fast writer. He evidently copied MSS. chiefly for his own use and took little care about the legibility of his copies. His hand-writing with its cursive and peculiar characters, therefore, presents unusual difficulties even to the practised reader of Śāradā MSS. A reference to the facsimile of two pages from Rājānaka Ratnakaṇṭha's codex, prefixed to this Edition, will fully illustrate this remark. Taking into account the difficulties which even intelligent copyists must have frequently encountered in making out this puzzling hand-writing in passages where the meaning was obscured by the unfamiliar character of the subject or the redundant rhetoric of Kalhaṇa's style, we need not be astonished at the large number of corruptions and blunders evidently committed by the scribes who prepared Mr. Moorcroft's Devanāgarī copy, which also occur, though to a smaller extent, in all Śāradā transcripts of the *archetypus* I have examined.

The deficient form of the text presented by the previous editions must thus, to a considerable extent, be attributed to the peculiar hand-writing of Rājānaka Ratnakaṇṭha. But for this we are more than compensated by the fact that the writer of this codex was not a mere copyist, but a scholar of considerable attainments who, we have every reason to believe, has copied his original MS. with great care and accuracy. The text of Rājānaka Ratnakaṇṭha in the first six cantos and in the greater portion of the seventh is remarkably free from corruptions and mistakes And a closer examination of the MS itself proves that its immunity from defects of this kind is not the result of unscrupulous restoring on the part of its learned writer as might otherwise be suspected.[5] Rājānaka Ratnakaṇṭha

1. My attention was first called to these two works by the entries in Professor Aufrecht's excellent *Catalogus Catalogorum*, *s. v.* रत्नकण्ठ .

2 See introductory verses to the *Stutikusumāñjalivṛtikā* in *Kavyamālā* Edition, p 1

3 See introduction to the *Yudhishṭhiravijayakāvyaṭīkā*, in Dr Rājendralālā Mitra's "*Notices of Sanskṛit MSS*," No 2441 · रामाक्ष्णि शशाङ्के १५९३ प्रमिते वर्षे शकेन्द्राणा । अवरङ्गशाहिभुवे शासति सति मेदिनीचक्रं ॥ धर्मविजयाख्ये सुगभीरे निबन्धेऽस्मिन् । टीका शिष्यहितैषा विधीयते रत्नकण्ठेन ॥ In a MS of the *Yudhishṭhira-vijayakāvya* which I inspected in the Library once belonging to *Paṇḍit Rādhākṛishṇa* of Lahore, the *ṭika* of Rājānaka Ratnakaṇṭha closes as follows—सर्वज्ञ सविभूति. सर्वत्र. सर्वमङ्गलोपेत । तस्याजनि तनुजन्मा शङ्कर इति भूतले ख्यात ॥ अस्ति मदगुरुकुलपात्र रत्नकण्ठ इति तस्य तनूजा. । भास्करस्तुतिरहस्यममेत येन रत्नशतक निरमायि ॥ गङ्गाधरस्य पाठार्थं स्वशिष्यस्योपयोगिनी । टीकैषा विहिता सज्जनानन्ददायिनी ॥ The *Ratnaśataka* which Ratnakantha in the above colophon claims to have written, is still known in Kashmir, and is a composition showing considerable skill, the MS I possess of it, has lost the last leaf and does not, therefore, furnish any *data* regarding the author.

4 Compare the remark made by Professor Buhler on the notions still recently prevailing on this subject among Kashmirian Pandit *Kashmir Report*, p 33

has indicated carefully in the above-named portion of the text, by dots and by leaving empty spaces, the *lacunae* which he must have found in his original. They vary in extent from one *akshara* to several verses, and can all easily be explained by the peeling or breaking off of the birchbark leaves on which the original MS. of Rājānaka Ratnakaṇṭha was, in all probability, written. These *lacunae* are now filled up by a later hand, evidently from collation of another MS. independent of Ratnakaṇṭha's original The fact that Ratnakaṇṭha had allowed the *lacunae* to remain in his copy even where, from the nature of the context, it would have been easy to supplement the missing letters, is sufficient to set at rest any doubts as to the manner in which he has reproduced the text of his original.

Unfortunately, the text Ratnakaṇṭha copied, must have been in a far less satisfactory condition in the remaining part of the work, which comprises roughly the last third of canto vii. and the whole of canto viii. Not only do we meet here much more frequently with *lacunae*, now rarely supplemented by the later hand previously mentioned, but misspellings or wrong forms, and undoubtedly corrupt passages are found here in increasing numbers, as we proceed towards the conclusion of the work. As we have no MS. older than Rājānaka Ratnakaṇṭha's codex to refer to, it would be unsafe to make any assertions regarding this difference in the preservation of the several cantos. But it may be useful to point out that the diminished interest with which the last portions of the poem seem to have been read and which probably caused them to be copied less frequently, the greater obscurity of Kalhaṇa's relation where it deals with events of contemporary history, and the greater risk of injury to which the leaves at the end of birch-bark volumes have always been exposed, are all circumstances which could well account for the deficiencies of the text in this part.

The MS from which Ratnakaṇṭha copied his text, and which for the sake of convenience may here be marked as O, appears to have been an old one. The numerous lacunae, which Ratnakaṇṭha was obliged to leave in his text, were, as stated above, in all probability due to portions of the birch-bark having peeled off in O. But a more conclusive proof is furnished by the following observation. Among the numerous various readings which, as will be shown below have been recorded in the *codex archetypus* (to be designated thereafter as A) there are only five in Ratnakaṇṭha's own handwriting (marked A_1 in the Edition), they are found Rājatar. iii 122 ; viii. 777 ; viii. ; 794 ; viii. 3139 and viii 1084. In the first four cases it is evident from the nature of the *variae lectiones*, that they are due only to the indistinctness with which the respective Śāradā letters and ligatures had been written in Ratnakaṇṭha's original, and which had induced him to record in each case the two possible readings. In the fifth case, however, Rājatar. viii. 1084, where A_1 has given the name of one of King Sussala's companions in arms as तेजो in the text and as भोजो in the margin, this explanation holds good only if we assume that the original MS. was written in an older form of Śāradā writing than we meet with in any existing MSS ; in the latter the *aksharas* ते and भो are quite different and not to be mistaken for each other. In that older form of Śāradā writing, however, which is known to me only from inscriptions,[1] vowel *e* is designated by a short vertical stroke before the consonant, not by a horizontal stroke above, and there ते and भो show almost identical forms. This explanation would

1. The latest among the Śārdā inscriptions known to me which show the form of the vowel sign *e* described above, and which can be dated, belongs to the time of king *Rājadeva* (A D 1213—1236) It was found by me, in 1889, at *Byabrôr* (the ancient *Vijayeśvara*), in possession of *Lakshman Bhôyū*, a Purohita of that place.

also account for the wrong form भोजो written by A_1 in viii. 2695 instead of तेजो.[1] It would, of course, be possible to argue that Ratnakaṇṭha found the above *variae lectiones* already in O or copied them from another MS. But certain features of the codex archetypus, to be noticed thereafter, render both these suppositions improbable.

Through the whole of Ratnakaṇṭha's MS., but especially in taraṅgas i.—vi. and in the first half of the seventh, we find very numerous glosses, various readings and corrections marked by different hands which add, in no small degree, to the critical value of the codex. Leaving aside certain explanatory notes written in the margin by hands which are not met with elsewhere (i. 56 ; iv. 103), the bulk of these later additions and corrections in Ratnakaṇṭha's codex can be traced back to four different hands. Two of these designated in the Edition A_2 and A_3, respectively, are of particular importance for the criticism of the text.

To A_2 we owe, apart from a series of important corrections and various readings in the text, a considerable number of valuable glosses which have proved most useful in ascertaining the details of the historical topography of Kashmir and which also throw a welcome light on many other obscure points in Kalhaṇa's narrative. There is good reason to assume that A_2 is the oldest among the annotators of the codex archetypus and probably a contemporary of Rājānaka Ratnakaṇṭha himself. A gloss on the word नीवि, v. 145, which Ratnakaṇṭha had left unfinished in the middle of a word, has been completed by A_2. The conclusion to be drawn from this circumstance is made more certain by a reference to the readings recorded in iv. 503, which prove that A_2 must have made its revision of the codex before the other old annotator marked A_3. Here A_1 had written originally अकुर्वन्निगुणा-माज्ञां; this had been corrected into आकुर्वन्नि° by A_2 who explained his own reading by a marginal gloss. A_3 who restores the original reading of A_1 and explains it by an interlinear note, must necessarily have had the correction of A_2 before his eyes The same relation exists between the readings of A_1 and the two annotators in iv. 688 The faded appearance which the writing of A_2 shows in many places, tallies with the above conclusion as to the priority of this annotator.

Although A_2 refers in several notes expressly to separate MS authority[2] it till appears to me very doubtful whether A_2 had actually used for his revision any MS. apart from Ratnakaṇṭha's original. The numerous lacunae throughout the whole work, which Ratnakaṇṭha had indicated by dots or empty space, have either been filled in by A_3 (not by A_2) or have remained as before. It seems scarcely possible that A_2, who had bestowed so much trouble on the correction of the text of the codex and on the explanation of its contents, should have been unable to supplement any Ratnakaṇṭha's lacunae in taraṅgas i—vii. if he could have referred to another independent MS. We are thus led to assume, as the easiest explanation, that the above quoted reference to another MS., as well as the corrections made by A_2 in the text, resulted from a careful collation of Ratnakaṇṭha's copy with its original O. While Ratnakaṇṭha was copying the text of O A_2 appears to have revised what the former had written, and to have added from the original the marginal notes and various readings which Ratnakaṇṭha had omitted to copy.[3] No direct evidence is available

1. Compare the note to viii. 2695 in the Edition
2. See i 287 इत्यपि पाठ , ii 103 इत्यन्यादर्शे, iv. 501 इत्यपि पाठो रम्य..
3. Notes by the hand of Ratnakaṇṭha are found only in very few places (see iii. 180, 198, 226 276; iv. 18; viii. 2628), they refer exclusively to points of grammar and construction, and their peculiar wording shows that they are Ratnakaṇṭha's own memoranda jotted down in the course of coyping, not notes reproduced from O.

regarding the origin of the glosses and explanatory notes written by A_3. But if we take into account that many of the glosses contain information on Kashmir antiquities which it would have been very difficult for any Pandit of the 17th century to obtain directly,[1] we shall be inclined to look to O as the probable source of these notes and glosses.

Reference has already been made to the annotator A_3 who has filled up most of the lacunae, which A_1 had left in the text of cantos i.—vii., and who has, besides, recorded in the codex a considerable number of various readings and explanatory notes. In several instances his hand has also supplied words and whole verses which A_1 had omitted without indicating a lacuna. A careful examination of the text thus supplied by A_3 in lacunae and elsewhere will show that the additions of A_3 are derived from a genuine recension of Kalhaṇa's text, and cannot be due to conjecture. To exclude the latter assumption it is sufficient to point to passages like iii 332; v 153; vii 125, 299, where the matter supplemented by A_3 contains historical data which were certainly beyond the reach of any modern emendator. We are thus fully justified in assuming that A_3 has used, for the purpose of revising Ratnakaṇṭha's text, a manuscript which was independent of O. To this MS. we must also trace back the very numerous *variae lectiones* which A_3 has indicated either by writing them in the margin or by correcting the text of A_1.

Besides the various readings we find in several notes written by A_3 particular reference made to readings of another MS.[2] It is probable that in these instances A_2 had found the various readings marked as such in the MS. which he collated. The numerous notes written by A_3 between the lines or in the margin of Ratnakaṇṭha's text, are frequently very useful for the interpretation of Rājatarangiṇī, and appear, for reasons similar to those adduced above regarding the glosses of A_2, to have been obtained from an older source. Whereas the glosses of A_2 deal pre-eminently with topographical and historical points, those of A_3 relate more to the general explanation of the text. I have not been able to obtain any information as to the existence of the MS. which A_3 collated, or to discover any traces of its use in other Kashmirian copies, and I am afraid, it must, therefore, be considered as lost. Under these circumstances it is difficult to form a definite opinion as to the relative value of the text recension which this MS. represented, especially as we cannot test the accuracy and extent of the collation made by A_3. Readings of A_3, which set right evident defects of Ratnakaṇṭha's text, are frequent enough, but on the other hand, in numerous cases, they appear to be *lectiores leviores* of no consequence.

We derive much less help for the reconstruction of the text of the Rājatarāṅgiṇī from the annotations and additions of A_3 in the last two cantos than in the preceding part of the work. The corrections and various readings of A_3 are not as numerous in the seventh taraṅga, as before, and become of distinctly rare occurrence in the eight. On the other hand, lacunae of A_1 which A_3 has omitted to fill in, make their first appearance in the seventh canto and increase in an aggravating fashion towards the end of the work.

Why the revision of A_3 should have been so much less thorough in this part of the text than in the preceding one, cannot in the absence of the original MS. from which A_3 obtained its corrections, be stated with certainty. As we meet with occasional supplements

1. Compare, *e. g.*, the glosses of a A_2 on topographical points i. 96, 168, 302, v. 39, 144; on details of the ancient Hindu administration: iv, 691: v. 389, on obsolete customs iv. 710.

2. See iv. 498, 646; vii. 248, 264, इत्यन्यादर्शः; v. 478. इत्यादर्शान्तरे पाठः.

by A_3 as far down as vii.3153, it cannot be assumed that in the original of A_3 the eighth canto was entirely missing.

Besides the two old annotators A_2 and A_3 who on account of the materials they used, possess independent critical value, we find in the codex archetypus additions from two other hands which cannot claim such importance. A_4 who writes in a small and modern hand (see the note at the foot of fol 103 *reverse*, reproduced in the facsimile) has added a number of notes and glosses which assist us but little in the interpretation Glosses like the one to v. 150, in which *Takkadeśa*,[1] the country neighbouring on *Gūrjara* (*Gujrāt* in the Punjab) is identified with *Skarḍo*, or Little Thibet, cannot inspire with confidence in the judgement of the glossator or the reliability of his information. There is nothing to show that A_4 copied any of his glosses from an older MS., nor have any of them been reproduced in the Sāradā MS. R described below which was copied from the archetypus in Laukika Saṁvat 99, *i. e.*, A.D. 1823. As this MS. gives all the other notes and glosses to be found in A we may safely conclude that the additions of A_4 have been made subsequent to that date, probably by some member of Paṇḍit Keśavarām's family.

Another modern hand, marked A_5 in the Edition, has re-written certain portion of the last seven folia of the codex archetypus which had become difficult to read on account of the worn state of the original leaves. As these supplements of A_5 show in several instances mistakes which are not found in the Sāradā transcripts described below, it is evident that they are of a very recent date.

A diligent search has been made on my behalf by my Kashmirian friends since 1888 with a view of discovering if possible an old MS. of the Rājataraṅgiṇī which might prove independent of A ; but these endeavours have produced no better result than Professor Bühler's efforts in 1875 The remaining critical materials referred to in the present Edition require, therefore, but a short notice.

All Kashmir MSS of the Rājataraṅgiṇī which I have seen or of which I have been able to obtain information, are known to be recent transcripts from Ratnakaṇṭha's codex prepared either directly or with the help of another copy.

Among these copies of two MSS. mentioned above as belonging to *Paṇḍit Rāzdān Balabhadra* and *Paṇḍit Govind Kaul* of Śrînagar, may be considered the earliest as well as the most reliable ; and accordingly only these two MSS. have been consulted wherever a reference to later copies was necessary on account of the present defective state of the archetypus.

The MS. of Paṇḍit Rāzdān Balabhadra, marked R in the Edition, forms a Volume of 353 folia, carefully written on modern paper. The colophon[2] states that it was written by one *Bhatta Govardhana*, of the *Yaksha* family, in the Laukika year 99, the figures for the century being omitted as usual in dates of that Era. Sons of a copyist of this name are still living in Srînagar, and as the paper and writing is certainly not more than a 100 years old, there can be no doubt that the year meant is Laukika Saṁvat 4899 or A. D. 1823. *Bhatta Govardhanas's* copy is well written but by no means free from misreadings and blunders. In copying the scribe has followed indifferently either the text of Ratnakaṇṭha or the

1. See Cunningham *Ancient Geography*, p. 149 ; *Siyuki* (transl, by Beal) i. 165 *seqq*.

2 लिखिता चेषा मया यक्षजात्यन्वितभट्टगोवर्धनाभिधेन द्विजातिना काष्ठूलवासिना ताशावनविषय *Kāthul* and *Tāshāvan* are names of parts of Srinagar सवत् ९९ का वर्ति ८ परे ९ एषा समाप्तिमगमत् ॥

various readings of A_2 and A_3. This has been the case also in the other copies made from A, and hence the frequent discrepancies between these transcripts to which allusion has already been made. *Bhatta Govardhana* has copied also the glosses and notes of A_2 and A_3. A later hand has revised the MS from A correcting mistakes and adding in many places the variae lectiones indicated in A. The lacunae of the last two cantos have been filled in by a different hand in accordance with the emendations of the Calcutta Edition.

The other MS. copied from the archetypus and now in possession of Pandit Govind Kaul (marked G) closely resembles in its appearance the copy R. The name of the copyist is not given nor the date when it was written. But the similarity of the writing makes it probable that it was copied by the same scribe early in the present century. None of the glosses and notes found in the archetypus are copied in G, but in many instances the various readings of A_2 or A_3 have been followed by the scribe or marked by him in the margin. The MS. has been revised by several later hands which have entered other variae lections from A and have marked besides numerous corrections in cantos vii. and viii. Most of the corrections are taken from the Calcutta Edition; others are of different origin and of greater value for conjectural criticism. Many of the happiest emendations marked *secunda manu* in G are from the hand of the present owner of the MS, Pandit Govind Kaul, to whose learning and critical acumen they amply testify.

We know from Mr. Troyer's statement[1] that the editio princeps of the Rājataraṅgiṇī was printed with the help of a copy which Mr. Moorcroft had forwarded from Kashmir to the Asiatic Society of Bengal Professor Buhler has already pointed out that according to the tradition of the Kashmir Pandits Mr. Moorcroft's copy was transcribed from the codex archetypus. This tradition is fully confirmed by the versified colophon found at the end of the Calcutta Edition after the *Rājataraṅgiṇīsamgraha*[2]

Here we read that "*Śrīmurkarāphaka Sāhibha*" obtained the Annals of the Kings of Kashmir including Kalhana's Rājataraṅgiṇī, from the learned *Śivarāma* who is praised for having preserved in his house the only copy of the work in Kashmir. Pandit Śivarāma, commonly called *Śivopadhyāya*, was the grandfather of Pandit Keśavarāma in whose possession our codex archetypus was found by Professor Buhler.

I have not had an opportunity of inspecting Mr. Moorcroft's copy, but an examination of the Calcutta Edition shows clearly that most of the corruptions in the first six cantos are caused by faulty transcriptions of the Śāradā characters in A, for which Ratnakantha's peculiar handwriting must be held largely responsible.

Other deviations from A are due to corrections which the editors have wrongly introduced in their text. This has been frequently the case in passages in which Kalhaṇa

1. Troyer, Rajatarangini, Tom I., iv

2. श्रीमत्कोम्पानिभूपस्य प्रियः श्रीमुर्कराफक॰। साहिभनामा मन्त्री यो जीयात्संवत्सर शतम् ॥ श्री मुर्कराफको मन्त्री प्राप्तकश्मीरमण्डले। राज्ये श्रीरणजित्सिंहभूपतेः प्रियदर्शनः ॥ श्रीमन्त्रिकेश्वरप्रेम्णा प्राप्ता राजतरङ्गिणी। मुर्कराफकधीरेण गृहाच्छ्रीशिवस्वामिनः ॥ श्रीमच्छ्रीशिवरामस्य गृहे राजावली शुभा। कश्मीरमण्डले नित्य वर्तते नान्य सद्मनि ॥ श्रीमद्विबुधेन्द्रशिवोपाध्याय नमो नम ॥ येनोपाध्यायेन पञ्चसहस्रवर्षाणा महाप्रभावसहिता राजावली स्वगृहे पानिता प्रयत्नेन श्रीविभोदयया चेति भद्रम् ॥ वर्तते च गृहे यस्य शुभा राजतरङ्गिणी। स जीवन्मुक्त एव स्यानमृतः स्वर्गमवाप्नुयात् ॥ सवत् १८८० ॥ for श्रीमन्त्रिकेश्वर' above read श्रीमन्त्रिकेश्वर॰; Mr. Moorcroft obtained his copy through the intercession of some member of the *Trika* family to which *Shivarāma* and his descendants to the present day have been attached as hereditary "*gurus*" and which has held for several generations past an influential position in Kashmir.

refers to details of Kashmir topography and similar topics, which the Calcutta Pandits naturally found it difficult to explain.[1]

For such corrections the last two cantos with their frequently defective text afforded a large scope. The editors have invariably filled up the lacunae of A even where they extended to several *pādas*, and have frequently altered the text near such lacunae in an unscrupulous manner so as to suit the supposed context. No critical value can, therefore, be attached to the readings of the editio princeps apart from that which they may claim as conjectural emendations.

In now remains for me to indicate shortly the lines which I have followed in preparing the text of the present Edition from the materials furnished by the codex archetypus. I have endeavoured to show above that besides the text which Ratnakaṇṭha copied from some now lost codex, only the readings of one other independent MS. (similary lost) have been preserved for us in the corrections and additions of A_3. Under these circumstances Ratnakaṇṭha's copy, as revised by A_2 from the same original, was the only possible basis of the present Edition. From this I have departed in favor of A_3 only where the readings of the latter hand appeared to me distinctly preferable and to represent a closer approach to Kalhaṇa's original. In every such case the text of A_1 has been carefully indicated in the footnotes This has also been done in every instance where the text of A_1 had been corrected by A_2. Whenever the readings of A_1 appeared to me superior or equal to the variations of A_3, and accordingly were retained in the text, the readings of A_3 have been recorded in the notes. All words or letters which A_3 has supplied either where A_1 had marked a lacuna, or elsewhere, have been distinctly noted. Wherever the relative value of the readings cannot be settled by reference to grammar or dictionary, I must reserve a statement of the reasons which guided me in the selection, for the exegetical notes of the second Volume. I am aware that in such case I may have frequently erred, but I trust that the care which has been taken to record in all cases both the readings of A_1 and of the later annotators, will render such errors of less consequence.

I have naturally felt much more serious doubts and apprehensions in dealing with passages where the text actually found in A left me only the choice of accepting readings which were undoubtedly corrupt, or of deviating from the authority of our only MS. Attention has already been called to the fact that blunders of copying and evident corruptions which are of very rare occurrence in the first six cantos, make their appearance more frequently in the seventh canto. These corruptions increase in number and extent in the eight taraṅga, especially towards its end, where they create serious obstacles to the interpretation of the work. The majority of the mistakes found in A is of such a nature that if we are allowed to take it for granted that Kalhaṇa was as careful to conform to the rules of grammar and prosody in the last two as in the preceding six cantos, we can indicate with perfect certainty the needed corrections. But in other passages the obscurity of the context and the defective state of whole verses make amendations much more hazardous.

I have considered it part of my duty as an editor to aid towards the interpretation of the work by indicating such emendations as appeared to me indispensable. Wherever this was done by placing the corrected reading in the text, attention has been called to the

1 See for local names thus metamorphosed in the Calcutta Edition, *e g.*, i. 102, 173; iii. 10; v 232; vii.1081.

emendation and a reference given to the reading of A which was carefully noted below. In other more doubtful cases where I was unable to find a satisfactory emendation, I had to content myself with marking the passage as corrupt in the notes and showing the corrections, if any, to be found in the Editions or later MSS. Wherever an emendation was based upon the evidence of parallel passages in Kalhana's Rājatarangiṇī, the latter have been quoted in the critical notes. Where the reasons for an emendation could not be given in this concise form, they will be set forth in the second Volume. It is scarcely necessary, perhaps, to mention that in all cases where corrupt passages had to be restored, close attention has been paid to the palaeographical features of the Sāradā characters, as the text of A must be traced back through MSS. which, including Kalhaṇa's original copy, have all been written in these characters.

I have endeavoured to keep constantly before my eyes the dangers with which any attempt at emendation is beset in the case of so difficult a text as the Rājatarangiṇī and have accordingly tried to exrcise the greatest caution. This may have led me sometimes to accept the text of A as correct where a closer examination may prove it to be defective; but I hope that those who are competent to judge will more readily pardon such shortcomings than errors in the opposite direction. For the same reasons I have obstained from suggesting emendations for passages in which the *lacunae* of A_1 have not been filled up by A_2, except where only a few *aksharas* are missing and can be restored from the nature of the context or by reference to related passages with a reasonable degree of certainty.

I am too well aware of the many and serious difficulties which the eight taraṅga presents, not to feel that its text, as printed in the present Edition, stands still in need of further searching revision. I should have willingly undertaken the labor involved in this, but for the delay in publication which, from the limited amount of leisure at my disposal, would have been in that case inevitable. As most of what is of interest in Kalhaṇa's work is contained in the preceding cantos the text of which is on the whole in a fair state of preservation, I did not feel justified in postponing the issue of the present Edition.

The complete restoration of Kalhaṇa's text in the eight taraṅga is an end which if at all attainable with our present materials, would require continued application for many years. I have spared no trouble in recording as carefully as I could, the readings actually found in our only MS., and I hope that the materials thus furnished will enable others, specially qualified for the task, to free the text from its present blemishes more thoroughly than I have been able to do

While endeavouring to acquaint the reader with the exact state of the text as found in A, I have not considered it necessary to reproduce all purely orthographical peculiarities of that codex. The orthography of A agrees on the whole with that followed in the old Sāradā MSS., but Ratnakaṇṭha is by no means so consistent in certain particulars as the writers of many birch-bark MSS of an earlier date.

Thus the two spirants *Jihvāmūlīya* and *Upadhmanīya*[1] (*kh* and *ph*) are only occasionally used in place of the *visarga*, and instead of the final *s* being assimilated before an initial sibilant which is the rule in old Śāradā MSS., we find it in A often written as

1. See Professor Bühlers *Kashmir Report*, p. 32,

visarga. In view of such inconsistencies I have thought it best to follow in regard to details of *saṁdhi* the uniform practice adopted in European Editions. But whenever a reading of A had to be shown for critical purposes in the notes I have printed there the form actually found in the MS The sign of *avagraha* (ऽ) is employed by Ratnakaṇṭha not in the manner of the printed texts, but in order to mark in doubtful cases the division of parts of compounds. I have for this reason, in accordance with the system followed, *e. g.*, in the Bombay Sanskrit Series, refrained from using in the Edition the avagraha as a sign to mark the elision of an initial *a* A uses the *anusvāra* sign to indicate assimilated final *m* in external combination, but does not employ it regularly. I have adhered also in this respect to the uniform rule followed in the Editions of the Bombay Sanskrit Series.

As regards the orthography of individual words I had occassion to depart from A only in a small number of cases. We find the letters *b* and *v* used in A as in other Kashmirian MSS , in words which are more correctly spelt with *v* and *b*, respectively. A list of such words is given below.[1] Several words show almost regularly a duplication of consonants which is not justified by their etymology.[2] I have followed in all the above cases the spelling adopted in the St. Petersburg Dictionaries. This I have done also with regard to a few other words in which the spelling of A differs from that adopted by European Editors[3] ; in such isolated cases, however, the discrepancies of spelling have been marked in the footnotes.

It will be clear from the remarks made above that it would have served no useful critical purpose if I had burdened the footnotes with a list of all the variations and mistakes which occur in the printed Editions of the Rājataraṇgini. Their readings have, therefore, been referred to only where the text of A is defective or doubtful. On the other hand I have thought it necessary to record in the notes on glosses and explanatory notes written by A_2 or A_3. Many of the glosses are of importance for the interpretation of the Rājataraṇgini and careful reference to them will bear good results in the interesting work of indentifying the ancient sites mentioned in Kalhaṇa's narrative. They enable us to check and verify the present oral tradition of the Kashmirian Pandits on this and kindred subjects, and their duplication in a complete form has, therefore, been considered essential. These glosses and notes go back evidently to different sources, and I have, therefore, not thought it advisable to correct the occasional mistakes of grammar and spelling which are found in them. Of the annotations by A_4 which have been shown to be of recent origin, I have reproduced only the few which appeared to me to contribute to the interpretation of the text.

The system of distinguishing the names of persons, tribes, localities, &c., by heavier type will, I hope, facilitate reference to the text and occasionally prove useful also for its interpretation. That it has not always been easy to carry out this plan will be readily understood by those who know the difficulties which arise in the explanation of the Rājataraṇgini from Kalhaṇa's references to obscure details of the ancient topography and ethnography of Kashmir. In showing certain words like *Mahāsarit*, *Dhakka*, *Dāmara*,

1. A writes अरबिन्द, तीव्र, व्रीडा, व्रीहि and again उल्वण, वलीव, निवर्हण, पिवन्त, वलक्ष, वालिश, वाष्प, शवल.

2. Thus we find in A क्षेत्र, गृद्ध, चित्र, बद्धयता, व्यावृत्य instead of क्षेत्र, गृध्र, चित्र, बध्यता, व्यावृत्य of our Editions.

3. Thus A always writes जरद्ध, फाल्गुण, रुप्य, वदन्य, विमर्ष, स्कन्द for जरठ फाल्गुण, रूप्य, वदान्य, विमर्श, स्कन्ध— Here it may also be noted that in Ratnakantha's handwriting the ligatures ष्ठ and ष्ट which are very much alike all Sāradā MSS., cannot be distinguished.

Divira, as proper names, it was necessary to assume what has yet to be proved in the second Volume.[1]

A visit which I paid to Europe during the Summer of 1890, enabled me to submit the materials I had collected, to Prof Bühler who granted me his valuable advice in all questions connected with the proposed Edition. It was chiefly due to the continued help and encouragement of this scholar who has done, perhaps, more than any living Sanskritist to lay open the true sources of ancient Indian History, that I was able on my return to India in the Autumn of 1890 to take up without further delay the preparation of the text for the present Edition.

Among those who have assisted me in carrying out this task, I must mention in the first place *Pandit Govind Kaul* of Srinagar, whose help in connection with the Rājatarañgini I was fortunate enough to secure during my first visit to Kashmir. Pandit Govind Kaul accompained me to Lahore in 1888, and has since rendered me very valuable assistance by communicating the oral traditions of the Kashmirian Pandits as well as the results of his own researches on many points connected with Kalhana's narrative and with the ancient topography of the country. Pandit Govind Kaul's spirit of scientific enquiry and his thorough acquaintance with the history and geography of his country which attracted already in 1875 the notice of Professor Bühler[2], have enabled him to find new explanations for many difficult passages of the Rājatarañgini. These explanations which will be duly noticed in the second Volume, have frequently influenced me in the selection of readings for my text. I owe to Pandit Govind Kaul a careful collation of the MSS. R G, which was made before I obtained the use of the archetypus. Pandit Govind Kaul's aid has also facilitated my collating the archetypus for the first half of the text, and when his subsequent absence from Lahore prevented him from assisting me further in this task, he still continued to render valuable help in connection with the reading of proofs. I have received equally useful assistance for the second half of the text from a younger Kashmirian scholar, *Pandit Mukundarām*, who also prepared under my directions provisional indices to the Rājatarañgini of which I have availed myself with advantage when revising the text of cantos vii and viii. I am indebted to both scholars for much information on Kashmirian topics without which a correct comprehension of Kalhaṇa's text is unattainable, and I gladly take this opportunity to thank them publicly for the unflagging zeal and industry which they have shown in collecting it I trust that the services they have thus rendered to all students of the Chronicle of Kashmir will meet with due recognition in their own country.

If I have left it to the last to mention my friend *Pandit Dāmodar*, Head Pandit of His Highness the Mahārāja's Pāthaśālā at Śrinagar, it is merely because the distance at which we were placed from each other, did not allow me to appeal as frequently as I wished, to his wide learning in matters relating to the text of Kalhaṇa. Pandit Dāmodar possesses a very intimate acquaintance with all that the Sanskrit poets of Kashmir have produced, and is thus, perhaps, better qualified than anybody else to expound the intrica-

1. Here I may mention that for convenience of reference the terms नगर and पुर where they stand for श्रीनगर and प्रवरपुर, and a few other abbreviations of this kind have been treated as proper names.

2. See Professor Bühler's *Kashmir Report*, p. 27.

cies of Kalhaṇa's style. He has always been most ready to help me in collecting MSS. of texts bearing on the Rājatarañgini.[1]

Ever since I first visited the Vale of Kashmir and formed the plan of editing the Chronicle of its earliest rulers, I have enjoyed every facility and help for my work which its present Government could afford me It has therefore, been a source of sincere satisfaction to me to be permitted to dedicate this Edition to His Highness MAHARAJA PARTAB SINGH, G.C.S I., as a slight mark of my deep gratitude and respect.

I must record my sincere thanks to His Highness RAJA AMAR SINGH K.C S.I., Prime Minister of the State, who has helped me on all occasions and who by encouraging every effort directed towards the preservation of the monuments of the ancient culture and literature of Kashmir, worthily continues the best traditions of the rule of His Highness the late Mahārāja Ranbir Singh Under the presidency of His Highness Rāja Amar Singh, the Kashmir State Council sanctioned a liberal grant towards the publication of the Rājatarañgini. This has made it possible for me to bring out the present Edition in a form which, I hope, will not be found unworthy of the distinguished patronage it has received. By a further grant which the State Council was pleased to sanction at the proposal of His Highness Rāja Amar Singh, I was enabled to undertake during the Summer vacation of 1891 an archaeological tour in the Eastern part of the valley of the Kashmir and in the adjoining alpine districts, and to collect, partly by means of excavations, fresh materials for the study of the antiquities of the country. These I hope to utilize in the second Volume of the present work.

My thanks are due to Colonel W F. Prideaux, BO S C , Resident in Kashmir, for having recommended my work for the patronage of the State Council. Himself a scholar deeply interested in the History and Geography of the East, he has never failed to accord me his generous support and aid in all matters affecting the progress of my researches in Kashmir.

The late Lieutenant-Governor of the Punjab, Sir James Lyall, G C I E., K C S.I., at the recommendation of the Director of Public Instruction, J. Sime, Esq., LL.D., was pleased to aid this publication by a liberal subscription for which I offer my grateful acknowledgment.

For the drawing reproduced in the *Vignette* of the title page, I am indebted to my friend Fred H. Andrews, Esq., Vice-Principal of the Lahore School of Arts, who gave me his valuable help during part of last year's archaeological tour in Kashmir. Mr. Andrews' drawing shows the temple of *Mārtaṇḍ*, famous in the Annals of Kashmir, as we saw it in its present state of ruin

I must lastly thank the Superintendent of the Education Society's Press for his ready assistance in all matters relating to the typography of the Volume. It will be due largely to his care if the number of misprints is not found so large as might have been anticipated from the difficulties under which the reading of the proofs had sometimes to be carried on.

1. At the time that these pages are passing through the press news reaches me that this most learned and amiable of all Kashmirian scholars has fallen a victim to the epidemic now raging in the Valley By the death of Pandit Damodar who is scholarly acquirements and poetic gifts was *facile princeps* among the Pandits of Srinagar, Sanskrit learning in Kashmir has suffered a service loss. My lamented friend had set himself the task of continuing the Rajtarangini from the time of Akbar to the present date, and from what I had seen of the parts composed I may say that had he been spared to complete it, his work would have shown that Kalhana could have found for generations past no worthier successor

I hope to give in the second Volume of this Edition exegetical notes on the text of the Rājataraṅgiṇi with a running commentary on those points of Kalhaṇa's narrative which are of interest for the history, archaeology and topography of Kashmir. It will also contain an introduction to the work, complete indices and, if possible, a map showing the ancient geography of the country as ascertained from the Rājataraṅgiṇi and other Kashmirian texts. The second Volume will be published as soon as the scanty leisure I can spare from teaching and office duties will permit me to complete the arrangement of the materials which I have collected during the last four year.

M. A. STEIN

SENATE HALL,
LAHORE :
June 7th, 1892.

LIST OF ABBREVIATIONS

A = *Rājānaka Ratnakantha's codex.*

A_1 = *Rājānka Ratankantha's own handwriting.*

A_2, A_3, A_4, A_5 = *Later annotators of Rājānaka Ratankantha's codex* (see Preface, pp.x.—xii.).

R = *MS. of P. Razdān Balabhadra.*

G = *MS. of P. Govind Kaul.*

C = *Calcutta Edition, 1835.*

P = *Paris Edition, 1840.*

Edd. = *Calcutta and Paris Editions.*

corr. = *corrected.*

cf. = *compare.*

N B.—The figures preceded by C., *shown at the foot of the pages, refer to the verse numbers as marked on the margin of the Calcutta Edition.*

राजतरङ्गिणी।

॥ प्रथमस्तरङ्गः ॥

ॐ स्वस्ति ॥ श्रीगणेशाय नमः ॥

भूषाभोगिफणारत्नरोचिःसिचयचारवे। नमः प्रलीनमुक्ताय हरकल्पमहीरुहे ॥१॥
भालं वह्निशिखाङ्कितं दधदधिश्रोत्रं वहन्संभृतक्रीडत्कुण्डलिजृम्भितं जलधिजंच्छायाच्छकण्ठच्छविः।
वक्षो बिभ्रदहीनकञ्चुकचितं वद्धाङ्गनार्धस्य वो भागः पुंगवलक्ष्मणोस्तु यशसे वामेथ वा दक्षिणः ॥२॥
वन्द्यः कोपि द्युधास्यन्दास्कन्दी स सुकवेर्गुणः। येनायांति यशःकायः स्थैर्यं स्वस्य परस्य च ॥३॥
कोन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः। कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः ॥४॥
न पश्येत्सर्वसंवेद्यान्भावान्प्रतिभया यदि। तदन्यद्दिव्यदृष्टित्वे किमिव ज्ञापकं कवेः ॥५॥ ५
कथादैर्घ्यानुरोधेन वैचित्र्येप्यप्रपञ्चिते। तदत्र किंचिदस्न्येव वस्तु यदीतये सताम् ॥६॥
श्राव्यः स एव गुणवान्नागद्वेषबहिष्कृता। भूतार्थकथने यस्य स्थेयस्येव सरस्वती ॥७॥
पूर्वैर्बद्धं कथावस्तु मयि भूयो निबध्नति। प्रयोजनमनाकर्ण्य वैमुख्यं नोचितं सताम् ॥८॥
दृष्टं दृष्टं नृपोदन्तं बद्ध्वा प्रमयमीयुषाम्। अर्वाक्कालभवैर्वार्ता यत्प्रबन्धेषु पूर्यते ॥९॥
दाक्ष्यं कियदिह तस्मादस्मिन्भूतार्थवर्णने। सर्वप्रकारं स्खलिते योजनाय समोद्यमः ॥१०॥ युगलकम् ॥ 10
विस्तीर्णाः प्रथमे ग्रन्थाः स्मृत्यै संक्षिपतो वचः। सुव्रतस्य प्रबन्धेन छिन्ना राजकथाश्रयाः ॥११॥
या प्रथामगमत्तैति सापि वाच्यप्रकाशने। पाटवं दुष्टवैदुष्यतीव्रा सुव्रतभारती ॥१२॥
केनाप्यनवधानेन कविकर्मणि सर्त्यपि। अंशोपि नास्ति निर्दोषः क्षेमेन्द्रस्य नृपावली ॥१३॥
दृग्गोचरं पूर्वसूरिग्रन्था राजकथाश्रयाः। मम स्वेकादश गता मतं नीलमुनेरपि ॥१४॥
दृष्टैश्च पूर्वभूमर्तृप्रतिष्ठावस्तुशासनैः। प्रशस्तिपट्टैः शास्त्रैश्च शान्तोशेषभ्रमक्रमः ॥१५॥ 15
ह्राषञ्चाशतमाब्दायभ्रंशाद्याब्दास्मरन्नृपान्। तेभ्यो नीलमताद्दृष्टं गोनन्दादिचतुष्टयम् ॥१६॥
बद्धा द्वादशभिर्मन्थसहस्रैः पार्थिवावलिः। प्राङ्महाभ्रतिना येन हेलाराजह्वि जन्मना ॥१७॥

---

१. [1]) The *aksharas* गिफ written at the end of the first line in A, have been destroyed in binding, G and Edd read as above; R भूषाहीनफणा°, afterwards corrected as above —[2]) A_2 gloss वस्त्र.—[3]) हर being effaced at the end of the second line, has been supplemented by A_4. २. [1]) A_4 gloss अग्निज्वाला कुङ्कुम च.—[2]) These three *aksharas* being faintly visible in the handwriting of A, have been repeated by A_4.—[3]) A_1 gloss सर्प कुण्डल च.—[4]) A_2 gloss विषं, A_4 gloss विषं शङ्कुच.—[5]) A_1 कञ्चुकि°; F smeared over. ३ [1]) Thus corrected by A_1 or later hand from येन: G and R येना°. ४. [1]) The *aksharas* जाप effaced in A. ७. [1]) A_3 gloss दृढा १६. [1]) A_2 gloss कवय· १७. [1]) Thus corrected by A_1 from A_1 °ऐर्या नृपावलिः, पार्थिवावलि also in G R.—[2]) To this word, marked by brackets in A, seems to refer a much effaced gloss or *varia lectio* written by A_2 or A_1 in the margin, looking like कङ्का (?). [3]) The *akshara* ला written at the beginning of a line has become unreadable, हेलाराजह्वि repeated in margin by A_4

तन्मतं पूर्वमिहिरो दृष्ट्वाशोकादिपूर्वगान्[1]। अष्टौ लवादीनृपतीन्स्वस्मिन्मन्ये न्यदर्शयत् ॥१८॥ युगलकम् ॥
येऽप्यशोकादयः पञ्च श्रीच्छविल्लाकरोऽब्रवीत्[1]। तान्द्वापञ्चाशतो मध्याच्छ्लोकस्तस्य तथा ह्ययम् ॥१९॥
आशोकादभिमन्योर्ये प्रोक्ताः पञ्च महीभुजः। ते द्वापञ्चाशतौ मध्यादेव लब्धाः पुरातनैः ॥२०॥
इयं नृपाणामुल्लासे ह्रासे वा देशकालयोः। भैषज्यभूतसंवादिकथा युक्तोपयुज्यते ॥२१॥
संक्रान्तप्राक्तनानन्तव्यवहारः सुचेतसः। कस्येदृशो न संदर्भो यदि वा हृदयंगमः ॥२२॥
क्षणभङ्गिनि जन्तूनां स्फुरिते परिचिन्तिते। मूर्धाभिषेकः शान्तस्य रसस्यात्र विचार्यताम् ॥२३॥
तदमन्दरसस्यन्दसुन्दरेयं निपीयताम्। श्रोत्रशुक्तिपुटैः स्पष्टमङ्क राजतरङ्गिणी ॥२४॥
पुरा सतीसरः कल्पारम्भात्प्रभृति भूरभूत्। कुक्षौ हिमाद्रेर्णोभिः पूर्णा मन्वन्तराणि षट् ॥२५॥
अथ वैवस्वतीयेऽस्मिन्प्राप्ते मन्वन्तरे सुरान्। दुरिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा ॥२६॥
कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम्। निर्ममे तत्सरो भूमौ कश्मीरा इति मण्डलम् ॥२७॥युगलकम्॥
उद्यद्वैतस्तनिःष्यन्ददण्डकुण्डातपत्रिणा। यत्सर्वनागाधीशेन नीलेनं परिपाल्यते ॥२८॥
गुहोन्मुखी नागमुखापीतभूरिपया रुचिम्। गौरी यत्र वितस्तात्वं यात्याप्युज्झति नोचिताम् ॥२९॥
शाद्वपद्ममुखैर्नगैर्नागरत्नावभासिभिः। नगरं धनदस्येव निधिभिर्यत्रिवेष्ट्यते ॥३०॥
यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम्। प्रसारितभुजं पृष्ठे शैलप्राकारलीलया ॥३१॥
भुक्तिमुक्तिफलप्राप्तिः काष्ठंरूपमुमापतिम्। पापसूदननीर्यान्तर्यत्र संस्पृशतां भवेत् ॥३२॥
संध्यादेवी जले यस्मिन्धत्ते निःसलिते गिरौ। दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः ॥३३॥
स्वयंभूर्यत्र हुतभुग्भूत्वा गर्भात्समुन्मिषन्। जुहतां प्रतिगृह्णाति ज्वालाभुजवनैर्हविः ॥३४॥
देवी भेडगिरेः शृङ्गे गङ्गोद्भेदशुचौ स्वयम्। सरोन्तर्दृश्यते यत्र हंसरूपा सरस्वती ॥३५॥
नन्दिक्षेत्रे हराभासप्रासादे शुचरार्पितः। अद्यापि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः ॥३६॥
आलोक्य शारदां देवीं यत्र संप्राप्यते क्षणात्। तरङ्गिणी मधुमती वाणी च कविसेविता ॥३७॥

---

१८ [1]) पूर्व of A_1 has been struck out and पश्च written above by A_2, पश्च also in G R.—[2]) Thus A_1 some of the letters having become faint, A_1 (?) has written in margin पूर्वजान , A_2 adds the gloss अशोकादीनां पूर्वजान १९ [1]) च्छ corrected by A_1, original reading, smeared over, perhaps श्च २० [1]) A_2 marginal gloss अभिमन्योः सकाशात् अशोकात् आ अशोकमभिव्याप्य ये पञ्च राजानः उक्ताः —[2]) Thus A , G R Edd. read °शतौ २२ [1]) सु of A_1 corrected by a later hand into स्व, G R read सु २८. [1]) A °निष्यन्द° — [2]) A_2 gloss in margin विरीविप्रवस्थितेन नीलनागेन विरीनाग इति प्रसिद्धेन, A_4 interlinear gloss विरनागस्थितेन. २९. [1]) The following gloss has been written in margin by A_2 in red ink and partly retraced by the same hand in black ink Words shown in brackets, having now become illegible in A, have been restored from copy in R गुहोन्मुखी कु[मारसम्मुखी कन्दराभि]मुखी च नागमुखापीतभूरिपया [नागमुखेन गजव-दनेन भापीतं भूरि]पय दुग्धं यस्या सा। नागानां मुखेन भापीतं भूरि पयो यस्या यया वा गौरी पार्वती वि[स्तार्य] वातापि उच्चिना रुचिम् इच्छा भोज्झति न त्यजति स्वरू[पं चि से .]दिकां नात्य[जदि]त्यर्थ गौरीस्वोचितां रुचिं गुहोन्मु[खीस्था]दिकां वि[स्तार्य पि न त्यजति त[त्रा]पि तत्करण ... ३२ [1]) A_2 adds between the lines the gloss कपटेश्वरे and in margin कीटिहिरमाने कोटलाडा-ख्यविषये. ३३ [1]) A_2 gloss भृङ्गनामविषये देवलग्रामसमीपस्थले —[2]) Thus A_1, corrected by A_1 into वत्ते which has been copied in G and R.—[3]) A_4 gloss (smeared over) नीलगिरे इति प्रसिद्धे ३४. [1]) A_2 gloss क्रमरा[ज्ये] स्वैम दति प्रसिद्ध. A_4 adds क्रमराज क्रमराजाख्ये विषये.— [2]) भु supplied between the lines by A_1. ३५ [1]) A_2 marginal gloss डीरा भादू इति प्रसिद्धा.—[2]) A_2 gloss हंसवागीश्वरी. ३६. [1]) A_2 gloss नरनाममामे. ३७. [1]) A_2 marginal gloss श्रीशैले हरेम् इति प्रसिद्धे स्थाने दर्शेशार्थवर्तिनि.

चक्रभृद्विजयेशादिकेशवेशाननभूषिते । तिलांशोपि न यत्रास्ति पृथ्व्यास्तीर्थैर्बहिष्कृतः ॥३८॥
विजीयते पुण्यबलैर्बलैर्यत्तु न शस्त्रिणाम् । परलोकात्ततो भीतिर्यस्मिन्निवसतां परम् ॥३९॥
सोष्मस्नानगृहाः शीते स्वस्थतीरास्पदा रये । यादोविरहिता यत्र निम्नगा निरुपद्रवाः ॥४०॥ 40
असन्तापार्हतां जानन्यत्र पित्रा विनिर्मिते । गौरवादिव तिग्मांशुर्धत्ते ग्रीष्मेप्यनीश्वराम् ॥४१॥
विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः । द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ॥४२॥
त्रिलोक्यां रत्नसूः श्राध्या तस्यां धनपतेर्गिरि । तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥४३॥
तत्र कौरवकौन्तेयसमकालभवान्कलौ । आ गोनन्दार्त्स्मरन्ति स्म न द्वापञ्चाशतं नृपान् ॥४४॥
तस्मिन्काले ध्रुवं तेषां कुकृतैः काश्यपीभुजाम् । कर्तारः कीर्तिकायस्य नाभूवन्कवितेजसः ॥४५॥ 45
भुजत्रयंतरुच्छायां येषां निषेद्य महीजसां जलधिरशना मेदिन्यासीदसाधकुतोभया ।
स्मृतिमपि न ते यान्ति क्षमापा विना यदनुग्रहं प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥४६॥
येष्वासन्नेभकुम्भशायिनपदा येपि श्रियं लेभिरे येषामप्यवसन्पुरा युवतयो गेहेष्वहश्चन्द्रिकाः ।
तांल्लोकोयमवैति लोकतिलकान्स्वप्नेप्यजातानिव भ्रातः सत्कविकृत्य किं स्तुतिशतैरन्धं जगत्त्वां विना ॥४७॥
अष्टषष्ट्यधिकामद्दशतद्वात्रिंशति नृपाः । अपीपलंस्ते कश्मीरान्गोनन्दाद्यौः कलौ युगे ॥४८॥
भारतं द्वापरान्तेभूद्वार्तयेति विमोहिताः । केचिदेनां मृषा तेषां कालसंख्यां प्रचक्रिरे ॥४९॥ युग्मम् ॥
लब्धाधिपत्यसंख्यानां वर्षासंख्याय भूभुजाम् । भुक्तकालास्कलेः शेषो नास्त्येवं तद्विवर्जितान् ॥५०॥ 50
शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले । कलेर्गतेषु वर्षाणामभूवन्कुरुपाण्डवाः ॥५१॥
लौकिकेब्दे चतुर्विंशे शाकालस्य सांप्रतम् । समत्र्याब्यधिकं यातं सहस्रं परिवत्सराः ॥५२॥
प्रायस्तृतीयगोनन्दादारभ्य शरदां तदा । हे सहस्रे गते त्रिंशदधिकं च शतत्रयम् ॥५३॥
वर्षाणां द्वादशती षष्टिः षड्भिश्च संयुता । भूभुजां कालसंख्यायां तद्वापञ्चाशतो मता ॥५४॥
कक्षाद्वृक्षं शतेनाब्दैर्यास्तु चित्रशिखण्डिषु । तत्सारे संहिताकारैरेवं दत्तोत्र निर्णयः ॥५५॥ 55

---

३८ [1])A_2 gloss चक्रभृत् केशव चक्रधर इति प्रसिद्ध विजयेश ईशान विश्वधाता इति प्रसिद्ध . ३९ [1]) Thus corrected by A_1 from A_1 मुख्य , G and R read पुण्य°, the latter with the *v l* मोक्ष° ४० [1]) Thus emended in G; A R सुस्थ°. ४१ [1]) A_1 असन्तापहतां, corrected in-margin by A_2 as above —[2]) A_2 gloss कदर्थेन ४२. [1])A_2 adds a gloss in margin which has partially become effaced; words in brackets supplemented from copy in R · [विद्या]विकं द्रा[क्षापर्य]न्तं इत्येतद्[द्रव्यजातं त्रिदिवैपि] दुर्लभ [स]त यत्र कश्मरीमण्डले सामान्य साधारणमस्ति सर्वज्ञनोपनोरयं सुलभमिति यावत् विद्याविकं भवुपम अत्युत्कृष्टं यत्रैवास्ति त्रिदिवेपि दुर्लभत्वा[द्]न्यत्र साधारणं नास्तीति व्याख्याकारजेन । यत्रासामान्य-मिति पाठान्तर यद्यपि सङ्गच्छत इव तथापि नैतत्समीचीनम् । छन्दोभङ्गापापात् भवुद्युतौ हि सर्वपादेषु पञ्चमा[क्षरस्य] लघुतयैव सर्वत्र दर्शनात् । यदुक्तं पञ्च[मं लघु सर्वत्र इत्यादि]. ४३. [1]) G has the reading भू in margin. ४४. [1]) A_1 had आनन्दात्, गो supplemented by A_1, A_2 adds a gloss in margin which has become partially effaced (words in brackets from R) आ गोनन्दात् दर्त्यागोनन्दात आ तृतीय[गो]नन्दं व[र्ज]यित्वा आदिगोनन्दमा[र]भ्य [अन्ये क]वयो न स्मरन्ति स्म अस्माभि .....]. ४५ [1]) Thus A_1, corrected by a later hand into कुकृत्यै which reading is found also into G and R.—[2]) A_2 gloss रात्रां. ४६ [1]) A has भुजतनवन, with figures indicating transposition, written by an old hand, G and R read as above. ४७ [1]) A_1 writes द्वारा above पद्वा, द्वारा smeared over by later hand.—[2]) A_2 in margin सर्वोच्य?, R सर्वो by another hand. ४८. [1]) A_1 gloss अन्यमत युग्मनाह.—[2]) A_2 gloss द्वापञ्चाशतिसङ्ख्या ४९ [1]) A_2 gloss युद्धं —[2])A_1 wrote first °खां but altered thereafter ख्य as above ५१ [1]) A_2 marginal gloss त्रिपञ्चाशदधिके वर्षशतषट्के कलियुगस्य गते इत्यर्थ. ५२. [1]) A_2 marginal gloss अथ जयसिंहसमये. ५३ [1]) A_2 तथा ५५ [1]) A_1 उचारे; corrected by A_2 into तचारे and explained by marginal gloss तेषां चारे. (The mistake of A_1 is due to the resemblance of Śāradā त and उ).

अंसन्मघास्तु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः शाककालस्तस्य राज्यस्य ॥५६॥
कश्मीरेन्द्रः स गोनन्दो वेल्लद्वल्लादुगूलया। दिशा कैलासहासिन्या प्रतापी पर्युपास्यत ॥५७॥
विहाय देहं शेषाहेर्विषाश्लेषभयादिव। भूर्गारुत्मतरत्राङ्के भेजे तस्य भुजे स्थितिम् ॥५८॥
साहायकार्थमानूतो जरासंधेन बन्धुना। स संरुरोध कंसारेर्मथुरां पृथुभिर्बलैः ॥५९॥
तेनोपकूलं कालिन्द्याः स्कन्धावारं निबध्नता। यादवीहसितैः[1] सार्धं योधानां मीलितं यशः ॥६०॥
एकदा सर्वतो भग्नाः स्वसेनास्त्रातुमुद्यतः। तं संरुरोध योद्धारं संगरे लाङ्गलध्वजः ॥६१॥
तयोस्तुल्यौजसोर्युद्धे चिराय करवर्तिनी। मल्लौ विजयसंदेहे किं जयस्रंजयश्रियः ॥६२॥
अथ शस्त्रक्षतैरङ्गैरालिलिङ्ग रणाङ्गने। भुवं काश्मीरिको[2] राजा यादवस्तु जयश्रियम् ॥६३॥
गतिं प्रवीरसुलभां तस्मिन्सुक्षत्रिये गते। श्रीमान्दामोदरो नाम तत्सूनुरभूत क्षितिम् ॥६४॥
भोगयोगोर्जितं राज्यं प्राप्तवानपि भूपतिः। ध्यायन्पितृवधं मानी नोपलेभे स निर्वृतिम् ॥६५॥
अथोपसिन्धु गान्धारैः सज्ञे कन्यास्वयंवरे। निमन्त्र्य शुभावानीतान्वृष्णीन्दर्पोष्णदोर्द्रुमः ॥६६॥
ततस्तस्यातिसंरम्भात्तानदूरस्थितान्प्रति। यावाभूद्भुजिनीवाजिरेणुर्यस्तनभस्तला ॥६७॥
तदाहवे विवाहोत्का निघ्नतिं[3] स्म पतिंवरा। आसीत्तु सुपुरन्ध्रीणां गान्धारेषु स्वयंवरः ॥६८॥
तदाक्रान्तासुहृच्चक्रः स चक्रायुधसंगरे। चक्रधाराध्वना धीरश्चक्रवर्ती दिवं ययौ ॥६९॥
अन्तर्वत्नीं तस्य पत्नीं तदा यदुकुलोद्वहः। राज्ये यशोवतीं[4] नाम द्विजैः कृष्णोऽभ्यषेचयत् ॥७०॥
तस्मिन्काले स्वसचिवान्सासूयान्विन्यवीवरत्। इमं पौराणिकं श्लोकमुदीर्य मधुसूदनः ॥७१॥
कश्मीराः पार्वतीं तत्र राजा ज्ञेयो हरांशजः। नावज्ञेयः स दुष्टोपि विदुषां भूतिमिच्छता ॥७२॥
पुंसां निर्गीरवा भोज्ये इव याः स्त्रीजने दृशः। प्रजानां मातरं तास्तामपश्यन्देवतामिव ॥७३॥
अथ वैजनने मासि सा देवी[5] दिव्यलक्षणम्। निर्दग्धस्यान्वयतरोरङ्कुरं सुषुवे सुतम् ॥७४॥
तस्य राज्याभिषेकादिविधिभिः सह संभृताः। द्विजेन्द्रैर्नरवर्त्यन्त जातकर्मादिकाः क्रियाः ॥७५॥
स नरेन्द्रश्रिया सार्धं लब्धवान्बालभूपतिः। नाम गोनन्द इत्येवं नम्रा पैतामहं क्रमात् ॥७६॥
आस्तां बालस्य संनद्धे द्वे धात्र्यौ तस्य वृद्धये। एकां पयःप्रस्रविणी[6] सर्वसंपत्प्रसूः परां ॥७७॥

---

५६ [1]) See *Bṛhat Saṃhitā* XIII. 3.—A_2 marginal gloss रत्नकोशाख्ये ज्योतिर्ग्रन्थे एषा आर्या। यत्सारमानीय रत्नमाला विहिता श्रीपतिना.—In A a later hand, not met with elsewhere, adds in margin a gloss which has faded in parts (words in brackets supplied from R) · भासन्मघास्विति एकैकस्मिन्विण्ये शतं शतं चरन्ति वर्षाणामिति वचनात् तस्समये मघास्वत्स्थानात्सप्तर्षीणां कश्मीरेष्वनिमसिद्धलौकिकसवत्सरपरिज्ञानार्थमेतदुक्तमन्यथान्येषीहानीसम् । षट्द्विकेति तस्य राज्यस्य युधिष्ठिरराज्यस्य च शककाल पूर्वोक्त शतेषु षट्सु सार्धैरित्यादिक त्रिपञ्चाशधिकषटशत[रूप स] षट्द्विकपञ्चद्वियुतः २५२६ एत[द्]ता वर्षवृन्देन युत गोगैकगुण[तुल्यो भवति ३१७९ अयं शककालो वर्तमानशककालो भवति इत्यध्याहार] गणितव्यवहारार्थं लौकिकः शककाल शालिवाहनीय भवति इत्यर्थ ३१७९ एतावत्परिमिते कलौगताब्दवृन्दे याते शालिवाहनोभूदित्यर्थ तदुक्तं ब्रह्मसिद्धान्ते । कल्पपरार्धं मनव षट् तस्याब्दाश्चयुगं त्रि[युगं त्रि]घनम् त्रीणि कृतादीनि पुनर्गोगैकगु[णा शक]नृपान्तेब्दा इति ६० [2]) A_1 writes in place of the last three *akshara*s as ... , A_2 has filled up the lacuna with हसितै , striking out य. ६२ [1]) Thus $A_{1;}$ A_2 reads वरप्रस्रग्°; G and R follow A_1. ६३ [1]) Thus corrected by A_2 from °रकों. ६६ [2]) Thus corrected by A_2 from A_1 भुभुवा°. ६८. [1]) Doubtful. Thus A_1, A_2 reads विघ्नते, also copied in R ; G has विघ्नति ६९. [1]) Thus A_1; A_2 तथा°.—[2]) Thus corrected by A_2; A_1 reads °चक्र सचक्रा°. ७०. [1]) Thus A_1, A_2 यशोमती. ७१. [1]) Thus corrected by A_2 from A_1 स्वसिवा°.—[2]) A_2 gloss शमयामास. ७२ [1]) Thus corrected by A_2 from A_1 °रा,° पर्वती.—[2]) A later hand (perhaps A_2) in margin ज्ञेयद्विजवांशज .—[3]) A_2 in margin स्वात्मनो. ७४. [1]) A_2 gloss यशोवती. ७७. [1]) A_2 gloss उपमाता.—[2]) A_2 reads प्रसविनी —[3]) A_2 has the marginal gloss भूमि: below which यशोवती is written, perhaps, by the same hand.

तस्याबन्ध्यप्रसादत्वं रक्षन्तः पितृमन्त्रिणः । पार्श्वगेभ्यो ददुर्वित्तमनिमित्तस्थितेष्वपि ॥७८॥
अनुद्धानतिदन्तस्तस्याख्यक्तं शिशोर्वचः । कृतागसमिवात्मानममन्यान्धिकारिणः ॥७९॥
पितुः सिंहासनं तेन क्रामता बालभूभुजा । नोत्कण्ठा पादपीठस्य लम्बमानाङ्घ्रिणा हता ॥८०॥
न चामरमहल्लोलकाकपक्षं नृपासने । विधाय मन्त्रिणोशृण्वन्प्रजानां धर्मसंशयम् ॥८१॥
इति काश्मीरिको राजा वर्तमानः स शैशवे । साहायकाय समरे न निन्ये कुरुपाण्डवैः ॥८२॥
आम्नायभङ्गान्निर्नष्टनामकृत्यास्ततः परम् । पञ्चत्रिंशन्महीपाला मग्ना विस्मृतिसागरे ॥८३॥
अथाभवद्भवो नाम भूपालो भूमिभूषणम् । वेल्लयशोदुगुलायाः प्रीतिपात्रं जयश्रियः ॥८४॥
यस्य सेनानिनादेन जगदौन्निद्र्यदायिना । निन्यिरे वैरिणश्चित्रं दीर्घनिद्राविधेयताम् ॥८५॥
तेन षोडशभिर्लक्षैर्विहीनामश्मवेश्मनाम् । कोटिं निष्पाद्य नगरं लोलोरं निरमीयत ॥८६॥
दत्त्वापहारं लेदर्यां लेवारं द्विजपर्षदे । स शमनिन्द्यशौर्यश्रीरारुरोह महाभुजः ॥८७॥
कुशेशयाक्षस्तत्पुत्रः प्रतापकुशलः कुशः । कुरुहारापहारस्य दानाभूत्तदनन्तरम् ॥८८॥
ततस्तस्य सुतः प्राप रिपुनागकुलान्तकः । धुर्यः शौर्याभ्रयः श्रीमान्खगेन्द्रः पार्थिवेन्द्रताम् ॥८९॥
स खागिखोनमुषयोः कर्ता मुख्यापहारयोः । हरहाससितैः कृत्स्नैः क्रीतांल्लोकान्कमाश्रयौ ॥९०॥
अनर्घमहिमा दीर्घमधवत्तावहिष्कृतः । अथ साश्वर्यचर्योभूत्सुरेन्द्रस्तत्सुतो नृपः ॥९१॥
शतमन्युः शान्तमन्योर्गोत्रभिद्गोत्ररक्षिणः । लेभे यस्यं सुरेन्द्रस्य सुरेन्द्रो नोपमानताम् ॥९२॥
दर्वद्दशान्तिके कृत्वा सोरकाख्यं स पत्तनम् । श्रीमान्विहारं विदधे नरेन्द्रैर्भवनाभिधम् ॥९३॥
तेन स्वमण्डलेखण्डयशसा पुण्यकर्मणा । विहारः सुकृतोदारो निर्मितः सौरसंभिधः ॥९४॥
तस्मिन्निःसंततौ राज्ञि प्रशान्तेन्यकुलोद्भवः । बभार गोधरो नाम समुधरवरा धराम् ॥९५॥
गोधराहस्तिशालाख्यमंहारमुदारधीः । स प्रदाय द्विजन्मभ्यः पुण्यकर्मा दिवं ययौ ॥९६॥
तस्य सूनुः सुवर्णाख्यस्ततोभूत्स्वर्णदोर्थिनाम् । सुवर्णमणिकुल्यायाः करालं यः प्रवर्तकः ॥९७॥
तत्सूनुर्जनकों नाम प्रजानां जनकोपमः । विहारमपहारं च जालोराख्यं च निर्ममे ॥९८॥
शचीनरस्तस्य सूनुः क्षितिं क्षितिशचीपतिः । ततः श्रीमान्श्रमाशीलो ररक्षाक्षतशासनः ॥९९॥
राजापहारयोः कर्ता शमाङ्गासाङ्गनारयोः । सोभूदुपुत्रः सुत्रामविष्टरार्धसमाश्रयी ॥१००॥

---

७९ [1]) A_3 अङ्गुमनु .—[2]) A_3 gloss मन्त्रिण ८३. [1]) A_3 adds the following notes in the margin द्वापञ्चाशत्प्रभृति यान् अस्माकं पञ्चत्रिंशन्नृपा विस्मृता अन्येषां तु द्वापञ्चाशति नृपा । यत्पुनरुक्तं भागीनन्दास्मभरस्मिन् स्म न द्वापञ्चाशत नृपातिति ॥ and द्वापञ्चाशतो मध्यात्सप्तदश नृपा अस्माभिर्वर्णिता । पञ्चत्रिंशत्नृपास्तु हन्तविषय न प्राप्ता । तत्र भोगीनन्दाख्य बालभोनन्दान्ता चत्वारः पूर्व वर्णिता । लवनृपादारभ्य शचीनरान्ता भट्टौ वर्णिता । तत अधावदशोकाख्य इत्यादिना अशोकादारभ्य अभिमन्युपर्यन्त पञ्च नृपा वर्णयिष्यते (sic) । एवं सप्तदश नृपा मध्यान्तरान्तरीक्ष्य वर्णिता । अवशिष्टा पञ्चत्रिंशद्विस्मृता एव ॥ एव सर्वे द्वापञ्चाशति नृपाः ॥ ८६. [1]) A_3 marginal gloss चतुरशीतिसहस्रगृह नगरमित्यर्थः.—[2]) A gloss below this word has been smeared over with yellow paint, it appears to be लोल्ह (*Lolah!*). ८८. [1]) Thus corrected by A_4 from A_1 °शाख्यं°, °याख्यं° also in G and R.—[2]) An old gloss, apparently गरुड (?), has been smeared over with yellow paint; A_4 adds कुलद ९२ [1]) Thus corrected by A_3 from A_1 तस्य —[2]) A_1 in margin न सुरेन्द्र समानताम ९४ [1]) A_3 reads सोर°. ९६. [1]) A_2 has the glosses गोधर and अस्तीहिल ९७. [1]) A_2 gloss in margin स्वर्णमय नाडो, smeared over and repeated between the lines by A_4.—[2]) A_2 gloss भार्यवने. १०० [1]) This word has been left out by A_1 and supplied by A_2.—[2]) A_4 writes the glosses भाङ्गस and आह over older glosses, apparently by A_2, which have been smeared over with yellow paint, the older glosses which can be traced only in single letters, seem to have been identical with those written above them by A_4. R has the glosses भाङ्गस and आह (sic) A_1 puts a small *danda* after शमाङ्गासा, indicating the division of words.

प्रपौत्रः शाकुनेस्तस्य भूपतेः प्रपितृव्यजः। अथावहदशोकाख्यः सत्यसंधो वसुंधराम् ॥१०१॥
यः शान्तबृजिनो राजा प्रपन्नो जिनशासनम्। शुष्कलेत्रवितस्तात्रौ तस्तार स्तूपमण्डलैः[2] ॥१०२॥
धर्मारण्यविहारान्तर्वितस्तात्रपुरेऽभवत्। यत्कृतं चैत्यमुत्सेधावधिप्राग्यक्षमेक्षणम् ॥१०३॥
स षण्णवत्या गेहानां लक्षैर्लक्ष्मीसमुज्ज्वलैः। गरीयसीं पुरीं श्रीमांश्चक्रे श्रीनगरीं नृपः ॥१०४॥
जीर्णं श्रीविजयेशस्य विनिवार्य सुधामयम्। निष्कल्मषेणादममयः प्राकारो[2] येन कारितः ॥१०५॥
सभायां विजयेशस्य समीपे च विनिर्ममे। शान्तावसादः[2] प्रासादावशोकेश्वरसंज्ञितौ ॥१०६॥
म्लेच्छैः संच्छादिते देशे स तदुच्छित्तये नृपः। तपःसंतोषिताङ्गेभ्यो भूतेशात्सुकृती श्रुतम् ॥१०७॥
सोथ भूभुज्जलौकोभूज्जलोकसुरनायकः। यो यशःसुधया शुद्धं व्यधाद्ब्रह्माण्डमण्डलम् ॥१०८॥
यस्य दिव्यप्रभावस्य कथाः भुतिपथं गताः। आश्चर्याचार्यतां[1] यान्ति नियतं शुषदामपि ॥१०९॥
कोटिवेधिनि[2] सिद्धे हि स रसे हाटकार्पणैः। आसीत्सुधिरनां[3] हर्तुं हेमाण्डस्य ध्रुवं क्षमः ॥११०॥
संस्तम्भ्याम्भः प्रविष्टेन तेन नागसरोन्तरम्। तारुण्यं फणिकन्यानां निन्ये संभोगभव्यताम् ॥१११॥
तत्कालप्रबलप्रेङ्खबौद्धवादिसमूहजित्। अवधूतोभवत्सिद्धस्तस्य ज्ञानोपदेशकृत् ॥११२॥
विजयेश्वरनन्दीशक्षेत्रज्येष्ठेशपूजने। तस्य सत्यगिरो राज्ञः प्रतिज्ञा सर्वदाभवत् ॥११३॥
यामे यामे स्थितैरैर्धावनं प्रतिषिद्धवान्। स्वेनावहत्तं सततं नागः कोपि सुहृत्तया ॥११४॥
स रुद्धवसुधाम्लेच्छान्निर्वास्यात्रवविक्रमः। जिगाय जैत्रयात्राभिर्मेहीमर्णवमेखलाम् ॥११५॥
ते यत्रोज्झटितास्तेन म्लेच्छाश्छादितमण्डलाः। स्थानमुज्झटडिम्बं तज्जनैरद्यापि गद्यते ॥११६॥
जित्वोर्वीं कन्यकुब्जाद्यां तत्रस्थं सं न्यवेशयत्। धातुर्वण्यै निजे देशे धर्म्यांश्च व्यवहारिणः ॥११७॥
यथावद्वृद्धिमाप्ते[1] व्यवहारधनाविधिः। सामान्यदेशराज्यं तावदस्मिन्हि मण्डले ॥११८॥
धर्माध्यक्षो धनाध्यक्षः कोशाध्यक्षश्चमूपतिः। दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोभवन् ॥११९॥ युगलकम् ॥
कर्मस्थानानि धर्म्याणि तेनाष्टादश कुर्वता। ततः प्रभृति भूपेन कृता यौधिष्ठिरी स्थितिः ॥१२०॥
स विक्रमप्रभावाभ्यां समुपार्जितया श्रिया। विदधे वारवालादीनमहारानुदमधीः ॥१२१॥
द्वारादिषु प्रदेशेषु प्रभावोमाण्युदमया। ईशानदेव्या तत्पत्न्या मातृचक्राणि चक्रिरे ॥१२२॥

---

१०२. [1]) A_3 writes the gloss द्वयलेत्रो between the lines and adds in margin: शुष्कलेत्रश्च वि[त]स्ता[त्र]श्च तौ शुष्कलेत्रवितस्तात्रौ। द्वितीया द्विपचनमेतत्. G adds to the gloss द्वयलेत्र another: उत्तरहिल.—[2]) A_3 gloss वौधविहारे. १०३ [1]) A_2 gloss विधवत्रो, another gloss in margin smeared over with yellow paint and illegible. १०५. [1]) A_3 gloss सौधम.—[2]) A_3 reads प्रासादो —[3]) A_1 had first written निर्मित (?) and then erased it. १०६ [1]) A_3 gloss भालस्थं. १०८. [1]) G gloss इन्द्रः.—[2]) Thus corrected by A_3 from A_1 भ्रद्धया. १०९ [1]) A_3 reads भाश्चर्यचर्यतां —[2]) Thus corrected by A_2 from A_1 निश्चयं. —[3]) Emended, A R G शुस°. ११०. [1]) A_3 adds a marginal note, the last line of which has become faded, this has been copied by a different hand below and is shown in brackets: सिद्धे रसे कोटिवेधिनि सति। हाटकार्पणे स्वर्णदाने कृत्वा स राजा ब्रह्माण्डस्य सुधिरतां शून्यतां हर्तुं दूरीकर्तुं [शक्तोभूत्तेन ब्रह्माण्डस्यापि पूरणं सभयेतिति भाव].—[2]) A_3 reads °वेधिनि.—[3]) A_1 reads सुरिक्तां —[4]) Thus corrected by A_3 from A_1 कर्तुं; thus also in R and G —[5]) A_3 reads in margin ब्रह्माण्डस्य. ११६. [1]) The *akshara* व has been effaced in A at the beginning of a line and supplied by A_4 at the end of the preceding one, G and R also यत्रो°.—[2]) A_3 gloss निकार्षिता. ११७. [1]) A_3 reads °कुब्जाद्यो.—[2]) A_1 had सं°; corrected into स which is found also G and R. ११८ [1]) Thus corrected by later hand from A_1 °प्राप्त; G and R read as above.—[2]) A_3 reads °राज्यं ११९. [1]) A_3 reads वनवाला°. R has the gloss वारवलो १२२. [1]) The faded gloss of A_3 [द्व]स्विशालादिषु has been repeated in margin by A_4.

भुवनन्दिपुराणः स व्यासान्तेवासिनो नृपः। सेवनं सोदरादीनां नन्दीशस्पर्धया व्यधात् ॥१२३॥
प्रतिष्ठां ज्येष्ठरुद्रस्य श्रीनगर्यां वितन्वता। तेन नन्दीशसंस्पर्धा न मेने सोदरं विना ॥१२४॥
विस्मारितो नित्यकृत्यं कार्यव्यग्रतयैकदा। विदूरसोदरजलाशयनालाभदुर्मनाः ॥१२५॥ 125
अपश्यन्निर्जलास्थानादकस्मादुत्थितं पयः। स सोदराविसंवादिं वर्णास्वादादिभिर्गुणैः ॥१२६॥युगलकम् ॥
प्रादुर्भूते ततस्तस्मिंस्तीर्थे कृतनिमज्जनः। स नन्दिरुद्रस्पर्धायां मानी पर्यापिमासदत् ॥१२७॥
तेन जातुं परीक्षार्थं निक्षिप्तः सोदरान्तरे। सपिधानानकः स्वर्णभृङ्गारः द्वधिरोदरः ॥१२८॥
दिनद्वयेन सार्धेन श्रीनगर्युद्भवाम्भसः। उन्मग्नः स महीभर्तुस्तस्य चिच्छेद संशयम् ॥१२९॥
नूनं नन्दीश एवासौ भोक्तुं भोगानवातरत्। दृष्टादृष्टक्रियासिद्धिर्न भवेन्नादृगन्यथा ॥१३०॥
राज्ञस्तस्य कदाचिच्चु व्रजतो विजयेश्वरम्। ययाचे कापिदवला भोजनं मागमध्वगा ॥१३१॥
यथेष्टमंशनं दातुं ततोनेन प्रतिश्रुते। व्यवृणोद्दिकृता भूत्वा सा नृमांसाभ्यां स्पृहाम् ॥१३२॥
स तस्यैहिसाविरतस्तस्यै मांसं स्वविग्रहात्। अनुज्ञां प्रददौ भोक्तुं यदा सैवं तदाब्रवीत् ॥१३३॥
बोधिसत्त्वोसि भूपाल कोपि सत्त्वोर्जितव्रतः। कारुण्यं प्राणिषु दृढं यस्येदृक्के महात्मनः ॥१३४॥
बौद्धभाषामजानानो माहेश्वरतया नृपः। को बोधिसत्त्वो यं भद्रे मां वेत्सीति जगाद ताम् ॥१३५॥ 135
पुनर्बभाषे सा भूपं श्रोतव्यं मत्प्रयोजनम्। अहं क्षुत्पापिता बौद्धैः क्रोधाद्विप्रकृतैस्त्वया ॥१३६॥
लोकालोकाद्रिपार्श्वस्थास्तामस्यः कृत्तिका वयम्। बोधिसत्त्वैकशरणाः कारुन्यत्तमसः क्षयम् ॥१३७॥
लोके भगवतो लोकनाथादारभ्य केचन। ये जन्तवो गतक्लेशा बोधिसत्त्वानयेहि तान् ॥१३८॥
सागसेपि न कुप्यन्ति क्षमया चोपकुर्वते। बोधिं स्वस्यैव नेष्यन्ति ते विश्वंभरणोद्यताः ॥१३९॥
विदारतूर्यनिर्घोषैरुच्चिद्रः प्रेरितः खलैः। पुरा भवान्ध्वधारक्रोधाद्विहारोद्दलनं यतः ॥१४०॥ 140
महाशाक्यः स नृपतिर्न शक्यो बाधितुं त्वया। तस्मिन्नृष्टे तु कल्याणि भविता ते तमःक्षयः ॥१४१॥
अस्मद्गिरा प्रेरणीयो विहारकरणाय सः। दत्त्वा स्वहेमसंभारं त्वया मलिनितः खलैः ॥१४२॥
तस्मिन्कृते न जायेत विहारच्छेदवैशसम्। तस्यं तत्प्रेरकाणां च प्रायश्चित्तं कृतं भवेत् ॥१४३॥
कुद्धैर्बौद्धैरनुध्याता त्वद्वधार्थं प्रधाविता। अनुशिष्टा समाहूय बोधिसत्त्वैस्तदेत्यहम् ॥१४४॥ कुलकम् ॥
तस्मात्सत्त्वातिरेकस्त्वं मिथादेवं परीक्षितः। क्षीणपापाथ संवृत्ता स्वस्ति ते साधयाम्यहम् ॥१४५॥ 145
कृतप्रतिश्रवे रात्रि विहारकृतये पुनः। प्रहर्षोत्फुल्लनयना कृत्यादेवी तिरोदधे ॥१४६॥
अथ कृत्याश्रमे कृत्वा विहारं वसुधाधिपः। तत्रैव क्षीणतमसं कृत्यादेवीमसंधयत् ॥१४७॥
विधाय सोदमंप्रासादं नन्दिक्षेत्रे क्षमापतिः। भूतेशाय क्षमां कोशैः पूजां रत्नमयीं ददौ ॥१४८॥

---

१२६. [1]) A_3 gloss सदृश G has the marginal gloss सोदरपद्म गगरिवल. १२८ [1]) A_4 reads तत्र This various reading is not found in G and R.—[2]) A_3 gloss रिक्त १३२ [1]) Thus A_1, also G and R. In A the various reading यथेच्छतं is indicated between the lines, perhaps by A_1 १३३.[a-2]) Thus corrected by A_3 from A_1 दातुं. G and R read मांस. १३७ [1]) A_3 reads तपस. १३९. [2]) A_3 कृपवा. -[3]) A_1 हितं.—[3]) A_3 नेच्छन्ति.—[4]) A_3 विश्वेश्वर°. १४०. [1]) A_3 marginal gloss तद्वा बोधिसत्त्वैरहनित्यनुशिष्टा इत्यनेन वक्ष्यमाणेन संबन्ध. १४१. [1]) Thus corr by later hand from A_1 °शक्य, A_3 °सत्त्व G and R have both °शाक्य and °सत्त्व. १४२. [1]) A_3 gloss राजा.— [2]) A_3 gloss मलिनः कृत. १४३. [1]) A_3 gloss राज्ञ. १४४. [1]) A_3 बोधाय (?) in margin; struck out १४५. [1]) A_3 gloss सत्त्वाधिक्य.— [2]) A_3 जाता G reads °पापोद्यसंवृत्त.— [3]) A_3 gloss विधु गत्यायु. १४६. [1]) A_3 तत १४७. [1]) A_2 °सन्धयत्. G has both readings, R only that of A_2. १४८. [1]) A_2 as above, A_1 सोम्य°.— [2]) Thus A_1; A_2 सम.

चीरमोचनतीर्थान्तर्गणराजं तपस्यता । ब्रह्मासननिविष्टेन ध्याननिःस्पन्दमूर्तिना ॥१४९॥
राज्ञा कनकवाहिन्याः सुचिरात्पुण्यकर्मणा । नन्दीशस्पर्शनोत्कण्ठा तेनसीयत कुण्डताम् ॥१५०॥
हृदोदयासृक्चमीतक्षणे नर्मितुमुत्थितम् । प्रदरो ज्येष्ठरुद्राय स्वांबरोधवधूशतम् ॥१५१॥
भुक्त्वैश्वर्यं स पर्यन्ते प्रविष्टश्चीरमोचनम् । पत्न्या समं ययौ राजा सायुज्यं गिरिजापतेः ॥१५२॥
अथाशोककुलोत्पन्नो यज्ञान्याभिजनोऽभवः । भूमिं दामोदरो नाम जुगोप जगतीपतिः ॥१५३॥
कद्रुद्या जाज्वलितस्योर्वीमाहेश्वराशिखामजेः । अप्यापि भूयते यस्य प्रभावो भुवनाद्भुतः ॥१५४॥
हरप्रसादपात्रेण सचरित्रानुरागिणा । बबन्ध सुखिना सख्यं येन वैभवणः स्वयम् ॥१५५॥
कुबेर इव यो राज्ञामग्र्यः स्वाज्ञाविधायिनः । आदिश्य गुह्यकान्दीर्घं गुहसेतुमबन्धयत् ॥१५६॥
सूदे दामोदरीये यत्तस्यासीत्स्वकृतं पुरम् । सेतुना तेन तत्रैच्छत्कर्तुं सोम्भःप्रतारणम् ॥१५७॥
हितं लोकोत्तरं किंचिच्चिकीर्षोरुन्नतात्मनः । रोहन्ति हा भिक्षमस्यूह्य मितपुण्यतया नृणाम् ॥१५८॥
स हि कारयितुं यक्षैर्यतने स्म स्वमण्डले । दीर्घानहममयान्सेतूंल्लोकविप्लवशान्तये ॥१५९॥
तपोविभूतयोचिन्त्या हि जानामुमतेजसाम् । तादृशामपि ये कुर्युः प्रभावस्य विपर्ययम् ॥१६०॥
दायादादिबलैर्नष्टा तृष्टा भूयः समुत्थिता । श्रीर्विप्रावज्ञया राज्ञामपुनःसंभवा पुनः ॥१६१॥
भाद्रार्थमुत्थितः स्नातुं हिजैः कैश्चिद्बुभुक्षितैः । प्राक्स्नानाद्भोजनं राजा स कदाचिदयाच्यत ॥१६२॥
वियासुना वितस्तान्तर्यदा तेनाबधीरितम् । तदा प्रभावात्तं तस्य तां धुनीमभतो व्यधुः ॥१६३॥
सेयं वितस्ता दृष्ट्वैनां भोजयास्मान्स तैरिति । उक्तोपि मायाविहितामज्ञासीत्सरिदाहतिम् ॥१६४॥
भोज्यं ददामि नाज्ञातो विप्राः सर्पत सांप्रतम । तेनेत्युक्तास्तमशपंस्ततः सर्पो भवेति ते ॥१६५॥
अशेषमेकदैवाह्ना श्रुत्वा रामायणं तव । शापस्य शान्तिर्भवितेत्यूचिरे ते प्रसादिताः ॥१६६॥
स दामोदरमुदान्तधीर्नूरमुदन्यया । शापोष्णंश्वासधूमेन जनैरद्यापि लक्ष्यते ॥१६७॥
अथाभवन्स्वनामाङ्कपुरत्रयविधायिनः । हुष्कजुष्ककनिष्काख्यास्त्रयस्तस्यैव पार्थिवाः ॥१६८॥
स विहारस्य निर्माता जुष्को जुष्कपुरस्य यः । जयस्वामिपुरस्यापि शुद्धधीः संविधायकः ॥१६९॥
ते तुरुष्कान्वयोद्भूता अपि पुण्याश्रया नृपाः । शुष्कलेत्रादिदेशेषु मठचैत्यादि चक्रिरे ॥१७०॥
प्राज्ये राज्यक्षणे तेषां प्रायः कद्रमिमण्डलम् । भोज्यमास्ने स्म बौद्धानां प्रव्रज्योज्जिततेजसाम् ॥१७१॥
तदा भगवतः शाक्यसिंहस्य परिनिर्वृतेः । अस्मिन्महीलोकधात्री सार्धं वर्षशतं ययौ ॥१७२॥
बोधिसत्त्वश्च देशेस्मिन्नेको भूमीश्वरोभवत् । स च नागार्जुनः श्रीमान्बहुदर्द्वनैसंश्रयी ॥१७३॥
अथ निष्कण्टको राजा कण्टकोत्सारणहरदः । अभीर्बभूवाभिमन्युः शतमन्युरिवापरः ॥१७४॥

---

१५० [1]) G has the v. l स्पर्धनो° in margin — [2]) Thus A_3, A_1 कुण्डताम्. १५१ [1]) A_3 सोदरोष्ण°. १५३. [1]) A_3 gloss कुलं १५४. [1]) Thus A_3, A_1 अस्यापि. १५५. [1]) Thus A_3, A_1 °प्रासादमार्जेन १५६. [2]) A_3 gloss गुह्यसुरो इति भाषया. १५७. [1]) A_3 gloss शान्तुर ओडर. १६०. [1]) Thus corr. by A_3 from A_1 °तत्रधिन्त्या.— [2]) A_3 gloss रामोद्दरनृपस्तृशानां. १६१ [1]) A_3 °बलाजहा. १६३. [1]) [2]) A_3 glosses ब्राह्मण°, नदी, चक्षुः १६४. [1]) A_3 स्नुद्दै° —[2]) A_3 gloss राजा — [3]) A_3 gloss मायया १६५ [1]) A_3 gloss ब्राह्मण १६६ [1]) Thus A_1; A_3 च in margin. G and R follow A_3. १६७. [1]) A_3 gloss नृपया.—[2]) A_3 शोषोष्ण°. १६८. [1]) A_3 glosses above these names डुक्कोरो, जोकोरो, कानेस्पुर. १६९. [1]) A_3 gloss जोकारस्य —[2]) A_3 gloss जिहामपुर १७०. [1]) A_3 पुण्याशया —[2]) A_3 gloss द्रखलेखो.—[3]) A_3 °चैत्यानि. १७१ [1]) A_3 gloss व्रतं नाम १७३. [1]) Thus corr by A_3 from A_2 मूर्धेश्वरो —[2]) A_3 वसन् [3]) Thus corr. by A_3 from A_1 °हैन्वन; A_3 gloss हवेन ग्रामः १७४ [1]) A_3 gloss कण्डोल·

ख्यनामाङ्कः शशाङ्कशेखरं विरचय्य सः । पराभ्यर्चविभवं श्रीमानभिमन्युपुरं व्यधात् ॥१७५॥ 175
चन्द्राचार्यादिभिर्लब्धा देशात्तस्मात्तदागमम् । प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम् ॥१७६॥
तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः । नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः ॥१७७॥
ते वादिनः पराजित्य वादेन निखिलान्बुधान् । क्रियां नीलपुराणोक्तामच्छिन्द्युरागमार्हिषः ॥१७८॥
मण्डले त्रिपुताधारे विच्छिन्नबलिकर्मभिः । नागैर्जनक्षयभयक्रे प्रभूतहिमवर्षिभिः ॥१७९॥
हिमान्यां बौद्धबाधाय पतन्त्यां प्रतिवत्सरम् । शीते दार्वाभिसारादौ[1] षण्मासान्पार्थिवोवसत ॥१८०॥ 180
तदा प्रभावः कोप्यासीद्बलिहोमविधायिनः । नानश्यन्यद्वशाद्विप्रा बौद्धाश्च निधनं गताः ॥१८१॥
नीलमुद्दिश्य देशस्य रक्षितारमहीश्वरम् । काश्यपश्चन्द्रदेवाख्यस्तपस्तेपे[2] ततो द्विजः ॥१८२॥
तस्य प्रत्यक्षतां यातो नीलस्तुहिनविग्रहम् । न्यवारयज्जगादापि स्वपुराणविधिं पुनः ॥१८३॥
आद्येन चन्द्रदेवेन शमितो वक्षविग्रहः । द्वितीयेन तु देशेस्मिन्दुःसहो भिक्षुविग्रहः ॥१८४॥
राजा तृतीयो गोनन्दः प्राप्तो राज्ये[3] तदन्तरे । यात्रायागादिं[4] नागानां प्रावर्तयत पूर्ववत् ॥१८५॥ 185
राज्ञा प्रवर्तिते तेन पुनर्नीलोदिते विधौ । भिक्षवो हिमदोषाश्च सर्वतः प्रशमं ययुः ॥१८६॥
काले काले प्रजापुण्यैः संभवन्ति महीभुजः । यैर्मण्डलस्य क्रियते दूरोत्सन्नस्य योजनम् ॥१८७॥
ये प्रजापीडनपरास्ते विनश्यन्ति सान्वयाः । नष्टं तु ये योजयेयुस्तेषां वंशानुगाः श्रियः ॥१८८॥
इत्येतत्प्रतिवृत्तान्तं देशोस्मिन्वीक्ष्य लक्षणम् । भाविनां भूमिपालानां प्राज्ञैर्ज्ञेयं शुभाशुभम् ॥१८९॥
नवीकृतवनो देशः तस्यं वंद्यैरियं मही । सिद्धैः प्रवरसेनाद्यैरिरं भुक्ता सुकर्मभिः ॥१९०॥ 190
गोनन्दान्वयिनामाद्यः स रघूणां रघुर्यथा । नृपतिः काश्यपीं वर्षाण्यष्टाविंशतिमन्वशात् ॥१९१॥
वर्षषष्टिं सषण्मासैः षड्भिर्वर्षैर्विवर्जिताम् । विभीषणाभिधोरक्षस्तिस्रोतिं गोनन्दनन्दनः ॥१९२॥
इन्द्रजिद्रावणावास्तां पितापुत्रौ नृपौ क्रमात् । पञ्चविंशत्सहार्धाश्च वर्षास्तिस्रश्चयोयेयुः ॥१९३॥
बिन्दुरेखाच्छवियस्य वृष्टा भाव्यर्थशंसिनी । स रावणस्यं पूजार्थं[2] लिङ्गं भाति वटेश्वरः ॥१९४॥
चतुःशालामठस्यान्तःकृतायादाथि भूभुजा । वटेश्वराय निखिलं तेन कश्मीरमण्डलम् ॥१९५॥ 195
पञ्चविंशतमब्दानां क्ष्मां बुभोज महाभुजः । रावणक्षोणिभृत्सूनुः सार्धामन्यो विभीषणः ॥१९६॥
किंनरापरनामाथ किंनरैर्गीतविक्रमः । विभीषणस्य पुत्रोभून्नरनामा नराधिपः ॥१९७॥
सदाचारोपि स नृपः प्रजाभाग्यविपर्ययैः । व्यधाद्विषयदोषेण महानर्थपरंपराम् ॥१९८॥
विहारे निवसन्नेकः किंनरग्रामवासिनि । तस्य योगबलात्कोपि श्रमणोपाहरत्स्त्रियाम् ॥१९९॥
विहाराणां सहस्राणि तत्कोपाग्निर्ददाह सः । अजिघत्सच्च तद्ग्रामान्हिंसैर्मध्यमठाश्रयैः ॥२००॥ 200
क्रुद्धापणं राजपथैर्नीयानोज्ज्वलनिग्रहम् । स्फोतपुष्पफलोद्यानं स्वर्गस्येवाभिधान्तरम् ॥२०१॥

---

१७५. [1]) A, seems to have read °कुः ; corr. as above by A_2.— [2]) A_2 reads शशाङ्कार्ध°. १७६. [1]) A_1 originally as above; A_1 or a later hand has altered this to °देशं तस्मात्, but A_2 has restored the first reading. G and B have °देशं in text and °देशात् in margin.— [3]) A_2 gloss चन्द्रव्याकरणं. १८०. [1]) A_2 gloss भेम्भेद् शनगले देशे. १८१. [1]) A_2 °धायिनाम् १८२. [1]) A_1 ततस्तेपे ; corr. by A_2 as above. १८४. [1]) A_1 बौद्धवि°. १८५. [1]) A_1 as above; a later hand corr. तृतीयगोनन्द° प्राप्तराज्यस्तद°.— [2]) A_2 gloss तीर्थेषु. १८८. [1]) A_2 नश्येयुः सहान्वयाः. १८९. [1]) Thus A_2; A_1 देवे. १९०. [1])A_2 gloss गोनन्दस्य. १९४. [1]) A_2 gloss राज्ञः.— [2])A_2 पूजार्हे. १९९. [1]) A_2 gloss कांगीर भाषः प्रसिद्धः.—[2]) A_2 gloss बौद्धः.

दिग्जयोपार्जितैर्धिक्कैर्जितविघ्नेशपत्तनम्। वितस्तापुलिने तेन नगरं निरमीयत ॥२०२॥ युगलकम्॥
तत्रैकस्मिन्किलोद्याने स्वच्छस्वादुजलाञ्चितम्। आसीत्सुश्रवसो नाम्नो नागस्य वसतिः सरः ॥२०३॥
कदाचित्तस्य दूराध्वक्लान्तो मध्यंदिने[1] युवा। छायार्थी तस्सरःकक्षं विशाखाख्योविशद्विजः ॥२०४॥
205 सच्छायपादपतले समीरैः शमितक्लमः। शनैर्जलमुपस्पृश्य भोक्तुं सक्तून्मनक्त्रमे ॥२०५॥
तान्पाणौ गृह्णतैवाथ तेन तीरविहारिभिः। पूर्वमाकर्णितो हंसैः शुश्रुवे नूपुरध्वनिः ॥२०६॥
निर्गते[2] मज्जरीकुञ्जादपश्यत्पुरतस्ततः। कन्ये नीलनिचोलिन्यौ स केविद्धारुलोचने ॥२०७॥
कर्णिकापद्मरागाढ्यनाललीलायितस्पृशा। मनोज्ञधवलापाङ्गे तनीयोञ्जनरेखया ॥२०८॥
हारिनेत्राश्वलैर्मन्दमारुतान्दोलनाकुलैः। सनाथांसयुगे रूपपताकापल्लवैरिव ॥२०९॥ तिलकम् ॥
210 ते शशाङ्कानने दृष्ट्वा शनैरभ्यर्णमागते। विरराजाशनारम्भान्मुदुर्व्रीडाजडीकृतः ॥२१०॥
भुञ्जाने कच्छगुच्छानां शिम्बीरंम्बुजलोचने। ते पुनर्दृष्टवानग्रे किंविद्यापारितेक्षणः ॥२११॥
आकृतेर्ही भिगीदृश्या भोज्यमेतदिति द्विजः। ध्यायन्कूपाद्रैः संमान्य सं ते सक्तूनभोजयत् ॥२१२॥
उपनिन्ये च संगृह्य पुटकैश्चटसीकृतैः[3]। तयोः पानाय पानीयं सरसः स्वच्छशीतलम् ॥२१३॥
आचान्ते[4] शुचितां प्राप्ते कृतासनपरिग्रहे। ततश्च बीजयन्पर्णतालवृन्तैरभाषत ॥२१४॥
215 भवत्यौ पूर्वसुकृतैः कैश्चित्संप्राप्तदर्शनः। चापलाद्विप्रलब्धास्मृमिच्छत्यर्थं जनः ॥२१५॥
कल्याणिनीभ्यां कतमा पुण्या जातिः परिष्कृता। कुत्र वा क्लान्तमेतादृग्विरसं येन भुज्यते ॥२१६॥
एका तमूचे विदुषावास्य सुश्रवसः सुते। स्वादुभोक्तव्यमप्राप्ते किमीदृग्भोपभुज्यते ॥२१७॥
पित्रा विद्याधरेन्द्राय प्रदातुं परिकल्पिता। इरावत्यहमेषा च चन्द्रलेखा यवीयसी ॥२१८॥
पुनर्हिजोभ्यधादेवं नैष्किंचन्यं किमस्ति वः। ताभ्यामवादि तातोत्र हेतुं वेत्ति स पृच्छ्यताम् ॥२१९॥
220 ज्यैष्ठेन कृष्णद्वादश्यां यात्रायै तक्षकस्य तम्। आगतं चूडयां तोयस्यन्दिन्या शास्यति ध्रुवम् ॥२२०॥
ब्रह्मस्यावामपि तदा तदभ्यर्णकृतस्थिती। इत्युक्त्वा फणिकन्ये ते क्षणादास्तां तिरोहिते ॥२२१॥
क्रमात्प्रवृत्ते सोथ नटचारणसंकुलः। प्रेक्षिलोकसमाकीर्णस्तत्र यात्रामहोत्सवः ॥२२२॥
द्विजोपि कौतुकाकृष्टःपर्यटन्क्रमशस्तया। कन्योक्तचिह्नज्ञानस्थ नागस्यान्तिकमाययौ ॥२२३॥
पार्श्वस्थिताभ्यां कन्याभ्यां पूर्वमाख्येदितोथ सः। द्विजन्मने व्याजहार स्वागतं नागनायकः ॥२२४॥
225 ततः कथान्तरे क्वापि पृष्टः कारणमापदाम्। जगाद तं द्विजन्मानं निःश्वस्य श्वसनाशनः ॥२२५॥
अभिमानवतां ब्रह्मन्युक्तायुक्तविवेकिनाम्। युज्यतेवश्यभोग्यानां दुःखानामप्रकाशनम् ॥२२६॥
परदुःखं समाकर्ण्य स्वभावसुजनो जनः। उपकारासमर्थस्त्वात्प्राप्नोति हृदयव्यथाम् ॥२२७॥

---

२०२. [1]) A_3 gloss कुतेर. २०४ [1]) A_3 gloss मध्याह्ने. २०६ [1]) A_2 सरोजल°. २०७. [2]) A_2 gloss द्विजचमम २०८. [1]) A_2 gloss कर्णिकायां कर्णाभरणे. २०९. [1]) A_3 gloss अशुक. २११. [1]) [2]) A_3 glosses कक्ष्यधान्ये, ब्रिम इति भाषया. २१२. [1]) A_3 gloss विम॰ २१३. [1]) Thus corr from A_1 °घटसीकृतै by A_4 which adds the note चटसीकृतैः जलाहरणभाण्डतया विरचितै पुटकै पत्रपुटै. सज्जीकृत्य सम्यग्गृहीत्वा पानीयं चोपनिन्ये। चटस कुम्भाद्यभावे कृत्रिमपुष्कलोत्पेपणभाण्डम्। इति विवरणकारा। चटसीकृतपत्रपुटै जलानयनवर्णनाऽन्यत्रापि कृता। यथा कौसल्यां प्रति सुमंत्रो रामवनगमनवृत्तं आचष्टे। विहितशयनेनेक्ष्वाकोरमोघहृदयेन कालितकलशीकार्य कुम्भीचैश्चटसीकृतैः। अथ विरचित॰ किञ्चिदम्लानप्रभोद्रि सुतेन ते परिसरसरिज्जम्बूकुञ्जे निकेतपरिग्रह इति ॥.—[3]) Thus corr. by A_3 from A_1 °चांस्कृतम्. २१४. [1]) A_3 gloss चमु आचने. २१७. [1]) This verse is supplied in margin by a hand resembling A_1, found in G R Edd.— [2]) A_1 gloss किञ्चित्. २२०. [1]) Emended; A R G ज्येष्ठे.—[2]) Thus corr. by A_1 from चूलया. २२२ [1]) A_3 gloss प्रेक्षक. २२४ [1]) A_3 °वेदितावं २२५. [1]) A_3 gloss नागः २२७. [1])A_3 वदा.

वृत्तिं त्वां वह मन्यते हृदि शुचं धत्तेनुकम्पोक्तिभिर्व्यक्तं निन्दति योग्यतां मितमतिः कुर्वन्स्तुतीरात्मनः।
गर्ह्योपायनिवेदनं कथयति स्थास्नुं वदन्व्यापदं भुक्त्वा दुःखमरुंतुदां वितनुते पीडां जनः प्राकृतः ॥२२८॥
अत एव विवेकिनां वाचदायुः स्वमानसे। जीर्णानि सुखदुःखानि दृढस्वन्ते चितानलः ॥२२९॥
कः स्वभावगभीराणां लक्षयेद्धृदिरापदम्। बालापत्येन भृत्येन यदि सा न प्रकाश्यते ॥२३०॥ 230
तदस्मिन्नेतयोर्बाल्याद्दस्तुनि व्यक्तिमागते। तवाग्रे गोपनं साधो न ममाप्युपपद्यते ॥२३१॥
स्वयाप्यस्मद्धितार्थायं निसर्गसरलात्मना। ईषत्प्रयासः कल्याणिन्क्रियतां यदि शक्यते ॥२३२॥
योयं तरुतले मुण्डथूडालो दृश्यते व्रती। अमुना सस्यपालेन कान्दिशीकाः कृता वयम् ॥२३३॥
अभुक्ते मान्त्रिकैरन्ने नवे नागेन भुज्यते। अयं नास्ति च तस्येन समयेन हता वयम् ॥२३४॥
क्षेत्राणि रक्षत्येतस्मिन्वृद्धापि फलसंपदम्। भोक्तुं नैव समर्थाः स्मः प्रेता इव सरिज्जलम् ॥२३५॥ 235
तथा कुरु यथा भद्रयेत्समयादेष नैष्ठिकः। योग्यां प्रतिक्रियां विद्मो वयमप्युपकर्तृषु ॥२३६॥
स तथेति ततो नागमुक्त्वा यत्नपरो द्विजः। अचिन्तयद्विवाराग्रं सस्यपालस्य वञ्चनाम् ॥२३७॥
गूढं तस्य बहिःक्षेत्रकुटीगर्भकृतस्थितेः। पच्यमानान्नभाण्डान्तर्नवान्नं न्यक्षिपत्ततः ॥२३८॥
भुञ्जान एव तत्तस्मिन्क्षणादेव जहार सः। अहीन्द्रः करकासारवर्षी स्फीतां फलश्रियम् ॥२३९॥
तं च व्युत्क्रान्तदारिद्र्यः सरसोभ्यर्णमागतम्। कृतोपकारमन्येद्युर्नत्वा जीर्णामनयद्द्विजम् ॥२४०॥ 240
स तत्र पितुरादेशात्कन्याभ्यां विहितार्हणः। अमर्त्यसुलभैर्भोगैरतोष्यत दिने दिने ॥२४१॥
कालेन सर्वानामन्त्र्य स्वां भुवं गन्तुमुद्यतः। प्रतिभुवरं नागं चन्द्रलेखामयाचत ॥२४२॥
संबन्धायोग्यमपि तं कृतज्ञस्त्ववशंवदः। संविभेजे स भुजगः कन्यया च धनेन च ॥२४३॥
एवं नागवराग्राभ्यस्तस्य द्विजन्मनः। महान्नरपुरे कालस्तौस्तौर्नित्योरसवैर्ययौ ॥२४४॥
भुजगेन्द्रतनूजापि तं पतिं पतिदेवता। अनोघवत्परार्थ्यैः शीलाचाराद्विर्गुणैः ॥२४५॥ 245
तस्यां कदाचित्सौधाग्रस्थितायां प्राङ्नादृद्धिः। भ्रातापायोज्झितं धान्यं बुभुजे विहरन्द्वयः ॥२४६॥
तं वारयितुमाहूता भृत्या नासन्गृहे यदा। शिश्नानमश्नुमश्नीरा सा तदावातरत्स्वयम् ॥२४७॥
एकहस्तधृतावेगलस्तशीर्षांशुकान्तया। तया पाणिसरोजेन धाविस्वा सोथ ताडितः ॥२४८॥
भोज्यमुत्सृज्य यातस्य फणिस्त्रीस्पर्शतस्ततः। सौवर्णी पाणिमुद्वाङ्के तुरगस्योदपद्यत ॥२४९॥
तस्मिन्काले नृपो राजा चारैस्तां चारुलोचनाम्। भुक्त्वा द्विजवधूं तस्थौ प्रागेवाङ्कुरितस्मरः ॥२५०॥ 250
तस्य धात्र्यन्तमुन्मत्तमन्तःकरणवारणम्। बलाच्चियमितुं नासीदपवादभयाङ्कुशः ॥२५१॥
तस्मिन्नुद्वृत्तरागाग्निविप्लवे भूपतेः पुनः। उवाह हयवृत्तान्तो दृप्तवातानुकारिताम् ॥२५२॥
चक्रे पर्यस्तमर्यादः सरलाङ्कुलिशोभिना। स काञ्चनकराङ्केन शशाङ्केनेव वारिधिः ॥२५३॥
व्रीडानिगडनिर्मुक्तौ दूतैराकूतशंसिभिः। तामुपच्छन्दयन्स्वेच्छं सुन्दरीमुदवेजयत् ॥२५४॥
सर्वोपायैरसाध्यां च विप्रस्तत्पतिरप्यसौ। तेनायाच्यत लुब्धेन रागान्धानां कुतस्त्रपा ॥२५५॥ 255

---

२२८. [1]) Thus corr. by A, from A, °भते .— [2]) Thus corr. by A, from A, स्नुतेरा° —[3]) A, पुन., A, gloss नीचो जन. २३२. [1]) A, °ङ्कितात्मने. २३४. [1]) A, भुनक्ते मान्त्रिकैरन्ने नवे. २३७. [1]) Thus A, A, °राची. २३८. [1]) Thus A, a later hand alters this into नवान्नान्यक्षिपत्, found also in G and R. २४९. [1]) Thus A,; A, °मुद्वाङ्के.

अथ निर्मर्त्सनां तस्मादपि प्राप्नवतासकृत् । हठेन हर्तुं तां राज्ञा समादिश्यन्त सैनिकाः ॥२५६॥
तैर्गृहाभे कृतास्कन्दो निर्गत्यान्येन वर्त्मना । नागार्यो नागभवनं सजानिः प्राविशद्भिजः ॥२५७॥
ताभ्यामभ्येत्य वृत्तान्ते ततस्तस्मिन्निवेदिते । क्रोधान्धः सरसस्तस्मादुज्जगाम फणीश्वरः ॥२५८॥
उद्गर्जज्जिह्मजीमूतजनितध्वान्तसंततिः । स घोराशनिवर्षेण ददाह सपुरं नृपम् ॥२५९॥
दग्धप्राण्यङ्गविगलद्वसास्रक्क्लेदवाहिनी । मयूरचन्द्रकाङ्केव वितस्ता समपद्यत ॥२६०॥
शरणाय प्रविष्टानां भयाच्चक्रधरान्तिकम् । मुहूर्ताच्छिरदह्यन्त सहस्राणि शरीरिणाम् ॥२६१॥
मधुकैटभयोर्मेदः प्रागुर्वोरिव चक्रिणम् । दग्धानां प्राणिनां तत्तत्सर्वाङ्गमसृशत् ॥२६२॥
स्वसा सुश्रवसो नागी रमण्याख्याद्रिगह्वरात् । साहायकायादमराशीन्समादाय तदाययौ ॥२६३॥
सा योजनाधिके शेषे मार्गस्यारात्सहोदरम् । कृतकार्यं निशम्यादमवर्षं यामेषु तज्जही ॥२६४॥
योजनानि ततः पञ्च जाता मामधरा खिला । सा रमण्याटवीन्यग्रोधास्तिं स्थूलशिलाबिलाम् ॥२६५॥
घोरं जनक्षयं कृत्वा प्रातः सानुशयोप्यहिः । लोकापवादनिर्विण्णः स्थानमुत्सृज्य तत्ययौ ॥२६६॥
दुग्धाब्धिधवलं तेन सरो दूरगिरौ कृतम् । अमरेश्वरयात्रायां जनैरद्यापि दृश्यते ॥२६७॥
श्वशुरानुमहाजागीभूतस्यापि द्विजन्मनः । जामातृसर इत्यन्यत्तत्र च प्रथितं सरः ॥२६८॥
प्रजानां पालनभ्रंशाज्जिःशङ्कक्षयकारिणः । अकस्मादन्तकाः केचित्संभवन्ति तथाविधाः ॥२६९॥
अद्यापि तत्पुरं दग्धं श्वभ्रीभूतं च तत्सरः । उपचक्रधरं दृष्ट्वा कथेयं स्मर्यते जनैः ॥२७०॥
राज्ञां रागः कियान्नाम दोषः स्वल्पवृशां मते । तत्तस्य तेन संवृत्तं यन्नाभूत्कापि कस्यचित् ॥२७१॥
सतीदैवतविप्राणामप्येकस्य प्रकोपतः । श्रुतो हि प्रतिवृत्तान्ते त्रैलोक्यस्यापि विप्लवः ॥२७२॥
चत्वारिंशतमब्दान्स मासैश्चोनां त्रिभिः समाम् । भुवं भुक्त्वा शिनिवृषां दुर्नयेन क्षयं ययौ ॥२७३॥
अप्यल्पकालसंदृष्टप्राकाराट्टालमण्डलम् । तत्किंनरपुरं लेभे गन्धर्वनगरोपमाम् ॥२७४॥
एकस्तु तनयस्तस्य वैचित्र्यात्कर्मणां गतेः । स्वधात्र्या विजयक्षेत्रं नीतः प्राणैर्न हत्यजे ॥२७५॥
राजा सिद्धाभिधः सोथ तथा निःशेषितं जनम् । नवीचकार जलदो दावदग्धमिवाचलम् ॥२७६॥
इति वृत्तं महाश्चर्यं तस्य पित्र्यं महामनेः । संसारासारताज्ञाने प्राप पुण्योपदेशताम् ॥२७७॥
भोगयोगेन मालिन्यं नेतुं मध्यगतोपि सः । न शक्यते स्म पङ्केन प्रतिमेन्दुरिवामलः ॥२७८॥
दर्पज्वरोष्णभूपालमध्ये निर्ध्यायतोनिशम् । बुधासूतिकलामौलिं तस्यैवोल्लाघतोथयौ ॥२७९॥
गणितं गुणिना तेन मणींस्तृणमिवोज्झता । खण्डेन्दुमण्डनार्चायां मण्डनत्वमखण्डितम् ॥२८०॥
राज्ञस्तस्यैव राजश्रीः परलोकानुगाभवत् । यस्तामयोजयद्भूतों धर्मेणाव्यभिचारिणा ॥२८१॥
षष्टिमब्दान्यशास्योर्वीमासज्ञानुचरान्वितः । आरुरोह सदेहोसौ लोकाञ्शशिशिखामणेः ॥२८२॥

---

२५६. [1]) A_3 gloss तस्याः भर्तुः.—[2]) A_3 gloss चन्द्रलेखां. २६२. [1]) A_3 तं तु तदा २६३. [1]) A_3 gloss रमण्या नागी २६४. [1]) Thus A_2, A_1 °राम्नोहरम. २६५ [1]) A_3 gloss रमण्याटवी रमेभाद्रे इति प्रसिद्ध .— [2]) A, originally °प्यस्थि, altered by later hand as above G and R °प्यस्ति. २६७. [1]) A_3 adds the note अमरेश्वरयात्रायां प्रागुदिष्टोयं नाग सुश्रवा इत्याख्य सुश्रम नाग इति भाषया प्रसिद्धः तस्यैवोपरि [निक]टस्थले जामा[तृ]नाग इति भाषया प्रसिद्ध स विप्रोक्तनामा ब्राह्मण एव निजश्वशुरानुग्रहेण नागीभूतो नाग इत्यर्थः. The *akshara*s in brackets are effaced in A and have been supplied here from R. २६९. [1]) A G R निशाङ्क° — [2]) A_3 glosses राजानः, नरनामसदृशाः.. २७१ [1]) A_3 राज्ञो.—[2]) Emended, A G.R कियन्नाम. २७३ [1]) A_3 gloss इन्द्रः. २७४. [1]) A_3 अत्यल्प°. २८१. [1]) Thus A_1, A_2 धर्मेण व्य°.

भूत्वा नरं समाश्रित्य प्रययुः शोचनीयताम् । तत्सुतं तु समालम्ब्य प्रभुं भुवनवन्दिताम् ॥२८३॥
यात्याश्रितः किल समाश्रयणीयलभ्यां निन्द्यां गतिं जगति सर्वजनार्चितां वा ।
गच्छत्यधस्तृणगुणः श्रितकूपयन्त्रः पुष्पाश्रयी सुरशिरोभुवि रूढिमेति ॥२८४॥
सिद्धः सिद्धः सदेहोयमिति शब्दं सुरा दिवि । प्रायोषयंस्तादयन्तः षटदं सप्त वासरान् ॥२८५॥ 285
उत्पलाक्ष इति ख्यातिं पेशलाक्षतया गतः । तत्सूनुर्स्त्रिंशतं सार्धां वर्षाणामन्वशान्महीम् ॥२८६॥
तस्य सूनुर्हिरण्याक्षः स्वनामाङ्कं पुरं व्यधात् । क्ष्मां सप्तविंशतिं वर्षाण्सप्त मासांश्च भुक्तवान् ॥२८७॥
हिरण्यकुल इत्यस्य हिरण्योत्सकृदात्मजः । षष्टिं षष्टिं वसुकुलस्तत्सूनुरभवत्समाः ॥२८८॥
अथ म्लेच्छगणाकीर्णे मण्डले चण्डचेष्टितः । तस्यात्मजेभून्मिहिरकुलः कालोपमो नृपः ॥२८९॥
दक्षिणां सान्तकामाशां स्पर्धया जेतुमुद्यता । यन्मिषादुत्तरहरिद्भारान्यमित्रान्तकम् ॥२९०॥ 290
सांनिध्यं यस्य सैन्यान्तर्हन्यमानाशनोत्सुकान् । अजानन्गृध्रकाकादीन्दृष्ट्वामे भावतो जनाः ॥२९१॥
दिवारात्रं हतप्राणिसहस्रपरिवारितः । योभूद्भूपालवेतालो विलासभवनेष्वपि ॥२९२॥
बालेषु करुणा स्त्रीषु घृणा वृद्धेषु गौरवम् । न बभूव नृशंसस्य यस्य घोराकृतेर्व्रतः ॥२९३॥
स जातु देवीं संवीनसिंहलांशुककञ्चुकाम् । हैमणादाङ्कितकुचां दृष्ट्वा जज्वाल मन्युना ॥२९४॥
सिंहलेषु नरेन्द्राङ्गिमुद्राङ्कः क्रियते पटः । इति कञ्चुकिना पृष्टेनोक्तो यात्रामदात्ततः ॥२९५॥ 295
तत्सेनाकुम्भिदानाम्भोनिस्रगाकृतसंगमः । यमुनालिङ्गनप्रीतिं प्रपेदे दक्षिणार्णवः ॥२९६॥
स सिंहलेन्द्रेण समं संरम्भादुदपाटयत् । चिरेण चरणस्पृष्टप्रियालोकनजां रुषम् ॥२९७॥
दूरात्तसैन्यमालोक्य लङ्कासैन्यैर्निशाचराः । भूयोपि राघवोद्योगमाशङ्क्य प्रचकम्पिरे ॥२९८॥
स तत्रान्यं नृपं हत्वा तीव्रशक्तिरुपाहरत् । पटं यमुपदेवाख्यं मार्ताण्डप्रतिमाङ्कितम् ॥२९९॥
व्यावृत्य चोलकर्णाटलाटार्दीश्च नरेश्वरान् । सिन्धुरानिव गन्धेभो गन्धेनैव व्यदारयत् ॥३००॥ 300
तस्मिन्प्रयाते प्राप्तेभ्यः शशंसुस्तत्पराभवम् । नगर्यो नरनाथेभ्यस्त्रुट्यद्दाडिममेखलाः ॥३०१॥
कादमीरं हारमासाद्य श्रथश्रष्टस्य दन्तिनः । श्रुत्वा स त्रासजं घोषं तोषरोमाञ्चितोभवत् ॥३०२॥
तदाकर्णनसंरम्भे सहर्षोथ विरुद्धधीः । शतमन्यद्गजेन्द्राणां हठेन निरलोठयत् ॥३०३॥
स्पर्शोद्भवानि यथा वाचं कीर्तनं पापिनां तथा । संदूषयेदतो नोक्ता तस्यान्यापि नृशंसता ॥३०४॥
को वेत्त्यद्भुतचेष्टानां कृत्यं प्राकृतचेतसाम् । धर्मं सुकृतसंप्राप्तिहेतोः सोपि यदाददे ॥३०५॥ 305
श्रीनगर्यां हि दुर्बुद्धिर्विदधे मिहिरेश्वरम् । होलडायां स मिहिरपुराख्यं पृथुपत्तनम् ॥३०६॥
अमहाराज्ञगृहिरे गान्धारा ब्राह्मणास्ततः । समानशीलास्तस्यैव भुवं तेपि द्विजाधमाः ॥३०७॥

---

२८३ [1]) Thus corr. by A_2 from A, °बन्धताम् २८५. [1]) Thus A_2; A, प्रोद्घोषयन्ताड°. २८६. [1]) Thus corr by later hand from A, पेशलाक्षितया. २८७ [1]) A, gloss रण्डेल, with note स्वनामाङ्कपुरप्रणीरिस्वपि पाठ —[2]) A समार्कि°. २९२. [1]) A, gloss हन्यमानानां लोकाना वशदानं । अदन । तथोत्सुका.. २९४. [1]) A, gloss सिङ्गलद्वीप. २९७. [1]) Thus corr. by A_1 from हजम २९९ [1]) Thus corr. by A_2 from A, °शक्तिरपा°. ३०२. [1]) A_2 gloss तदारभ्य हस्तिनश्च इति प्रसिद्ध· प्रवेशवर्त्म येन आयातो मिहिरकुल. ३०५. [1]) A_2 वेत्त्युद्भुत°. ३०६ [1]) Emended, A होलाळायां. Cf. viii. 1228. viii. 733. 1432 (*C.*). 2909 (*C.*). 3216 (*C.*).

मेघागमः फणिभुजं प्रथितान्धकारः प्रीणाति हंसममलो जलदात्ययश्च ।
प्रीतेः समानरुचितैव भवेन्नितान्तं[2] दातुः प्रतिग्रहकृतश्च परस्परस्य ॥३०८॥
स वर्षसप्तर्तिं भुक्त्वा भुवं भूलोकभैरवः । भूरिरोगार्दितवपुः प्राविशज्जातवेदसम् ॥३०९॥
सोयं त्रिकोटिहा मुक्तो यः स्वात्मन्यपि निर्घृणः । देहत्यागेस्य गगनादुच्चचारेति भारती ॥३१०॥
हत्युचुर्ये मते तेषां स एव परिहारदः। खण्डयन्त्रीतघृणतामग्रहारादिकर्मभिः ॥३११॥
आक्रान्ते दारदैर्भिट्टैर्म्लेच्छैरशुचिकर्मभिः । विनष्टधर्मे देशेस्मिन्पुण्याचारप्रवर्तनम् ॥३१२॥
आर्यदेश्यान्स संस्थाप्य व्यतनोद्दारुणं तपः । संकल्प्य स्ववपुर्दाहं प्रायश्चित्तक्रियां व्यधात् ॥३१३॥
अत एवाग्रहाराणां सहस्रं प्रत्यपादयत् । गान्धारदेशजातेभ्यो द्विजेभ्यो विजयेश्वरे ॥३१४॥
क्षुरखड्गासिधेन्वादिपूर्णेयःफलके तदा । वह्निप्रदीप्ते सहसा पर्यन्ते स्वां तनुं जहौ ॥३१५॥
इत्येतस्मिञ्जनाम्नाये केचिदन्यभिचारिणि । प्राहुः पुरुषसिंहस्य क्रौर्यं तस्याविगर्हितम् ॥३१६॥ कुलकम् ॥
ये नागेन रुषा प्रुष्टे नगरे प्राभवन्खशाः । तेषां नाशाय वृत्तान्तं पूर्वोक्तं जगदुः परे ॥३१७॥
अवतारयतस्तस्य चन्द्रकुल्याभिधां नदीम् । अशक्योन्मूलना मध्ये शिलाभूद्विघ्नकारिणी ॥३१८॥
ततः कृततपाः स्वप्ने देवैरुक्तः स भूपतिः । यक्षः शिलायां बलवान्ब्रह्मचार्यत्र तिष्ठति ॥३१९॥
साध्वी स्पृशति चेदेनां निरोद्धुं न स शक्नुयात् । ततोपरेद्युः स्वप्नोक्तं शिलायां तेन कारितम् ॥३२०॥
तासु तासु कुलस्त्रीषु व्यर्थयत्नास्वथाचलत् । चन्द्रवत्याख्यया स्पृष्टा कुलाल्या सा महाशिला ॥३२१॥
कोटित्रयं नरपतिः क्रुद्धस्तेनागसा ततः । सपतिभ्रातृपुत्राणामवधीत्कुलयोषिताम् ॥३२२॥
इयं चान्यमते ख्याति: प्रथते तथ्यतः पुनः । अभक्ष्या सनिमित्तापि प्राणिहिंसा गरीयसी ॥३२३॥
एवं क्षुद्रोपि यद्राजा संभूय न हतो जनैः । तत्कर्म कारयद्भिस्तैर्वतैरेव रक्षितः ॥३२४॥
प्रजापुण्योदयैस्तीव्रैश्चिरात्तस्मिन्क्षयं गते । बक्कस्तत्वभवः पौरैः सदाचारोभ्यधिच्यत ॥३२५॥
तत्रापि पूर्वसंस्कारादुर्कत्रासं दधे जनः । श्मशानविहिते लीलावेश्मनीव नृपास्पदे ॥३२६॥
अतिसंतापदाज्ज्ञातः स जनाह्लादकोभवत् । जलौघो जलदश्यामात्तपात्ययदिनादिव ॥३२७॥
लोकान्तरादिवायातं मेने धर्मं तदा जनः । अभयं च परावृत्तं प्रवासाद्दहनादिव ॥३२८॥
स बक्केशं बक्कश्वभ्रे बक्कवत्यापगां तथा । कृत्वा पुरं पराध्यैश्रीर्लवणोत्साभिधं व्यधात् ॥३२९॥
तत्र त्रिषष्टिवर्षाणां सत्रयोदशवासरा । अस्यवाद्यत भूपेन तेन पृथ्वीं प्रशासता ॥३३०॥
अथ योगेश्वरी काचिद्दृष्टाख्या रजनीमुखे । कृत्वा कान्ताकृतिं काम्यामुपतस्थे विशां पतिम् ॥३३१॥
तया मनोहरैस्तैस्तैर्वचनैर्लपितस्मृतिः । स यागोत्सवमाहात्म्यं द्रष्टुं हृष्टो न्यमन्यत ॥३३२॥
पुत्रपौत्रशतोपेतः प्रातस्तत्र ततो गतः । चक्रवर्ती तया निन्ये देवीचक्रोपहारताम् ॥३३३॥
कर्मणा तेन सिद्धाया व्योमाक्रमणसूचकम् । जानुमुद्राङ्कयं तस्या दृश्यत्वापि दृश्यते ॥३३४॥

---

३०८ [1]) Edd add before this verse the following verses, not found in A G R भगिनीवर्गसम्भोगनिर्लज्जाम्लेच्छवंशजाः । स्नुषासङ्गतिसक्ताश्च बारहा सन्ति पापिन ॥ वस्तुभावैस्तथा भाहा भार्याविक्रयकारिणः । परोपभोगितास्तेषां निर्लज्जास्तहि योषित ॥—[2]) A, °त्रिमित्त.—[3]) Thus A_1, A, °ग्रहहतश्च. ३२०. [1]) Thus corr. by A, from A_1, न च. ३२५. [1]) Emended; A R G एकस्त°. ३२६ [1]) G उत्काजास. ३३२. [1]) Thas corr by A, from A_1 °हरैस्तैर्व°.

देवः शानकपालेशो मातृचक्रं शिला च सा । खरीमठेषु तद्वार्तास्मृतिमप्यपि यच्छति ॥३३५॥ 335
देव्या कुलतरोः कन्दः क्षितिनन्दोदधेशितः । ततस्तस्य सुतस्त्रिशद्वत्सरानन्वशान्महीम् ॥३३६॥
द्वापञ्चाशतमब्दान्क्ष्मां द्वौ च मासौ तदात्मजः । अपासीद्वसुनन्दाख्यः प्रख्यातस्मरशास्त्रकृत् ॥३३७॥
नरः षष्टिं तस्य सुनुस्तावतीक्षश्च तत्सुतः । वर्षानभूद्विभुर्धर्मं योक्षवालमकारयत् ॥३३८॥
जुगोप गोपादित्योथ क्ष्मां सह्रीपां तदात्मजः । वर्णाश्रमप्रत्यवेक्षादर्शितादियुगोदयः ॥३३९॥
सत्वालखागिकाहाडिग्रामंस्कन्दपुरांभिधान् । शमाद्रासंमुखांश्चाष्टमहारान्यः प्रत्यपादयत् ॥३४०॥ 340
ज्येष्ठश्वरं प्रतिष्ठाप्य गोपाद्रावार्यदेशजाः । गोपामहारान्कृतिना येन स्वीकारिता द्विजाः ॥३४१॥
भूक्षीरवाटिकायां[1] यो निर्वास्य लशुनाशिनः । खासटायां[2] व्यधाद्विप्राजिजाचारविवर्जितान् ॥३४२॥
अन्यांश्चानीय देशेभ्यः पुण्येभ्यो वश्यिकादिषु । पावनानमहारेषु ब्राह्मणान्स न्यरोपयत् ॥३४३॥
उत्तमो लोकपालोयमिति लक्ष्म प्रशस्तिषु । यः प्राप्तवान्विना यज्ञं चक्षमे न पशुक्षयम् ॥३४४॥
सषड्दिनां[3] वर्षषष्टिं पालयित्वा स मेदिनीम् । भोक्तुं पुण्यपरीपाकं लोकान्सुकृतिनामगात् ॥३४५॥ 345
गोकर्णस्तत्सुतः क्षोणीं गोकर्णेश्वरकृद्वपे । अष्टपञ्चाशतं वर्षाण्यित्रिंशत्यब्दां विर्वाजितान् ॥३४६॥
सूनुर्नरेन्द्रादित्यस्य खिद्दिलान्याभिधोभवत् । भूतेश्वरप्रतिष्ठानामक्षयिण्याश्च कारकः ॥३४७॥
दिव्यानुग्रहभागुग्राभिधो यस्य गुरुर्व्यधात् । उग्रेशां मातृचक्रं च प्रभावोदयविग्रहः ॥३४८॥
भूत्वा षट्त्रिंशतं वर्षाण्यशतं चाह्नां विभुर्भुवः । स दीर्घैरनघांश्लोकानासदत्सुकृतैः कृती ॥३४९॥
युधिष्ठिराभिधानोभूदथ राजा तदात्मजः । यः सूक्ष्माक्षतया लोकैः कथितोन्धयुधिष्ठिरः ॥३५०॥ 350
तेन क्रमागतं राज्य सावधानेन शासता । अनुजग्मे मितं कालं पूर्वभूपालपद्धतिः ॥३५१॥
काले कियत्यपि ततो यात्यभाग्यवशादसौ । सिषेवे श्रीमदक्षीशो यत्किंचनविधायिताम् ॥३५२॥
नान्वग्रहीदनुग्राह्यान्न संजग्राह धीमतः । न प्रवृत्तोपचाराणां प्रागिवासीत्प्रियंकरः ॥३५३॥
दुर्विद्यपर्षदा सार्कं निर्विशेषं सभाजितैः । परिजह्रे स दुर्जातो जातनैजोचयैर्बुधैः ॥३५४॥
सर्वत्र समदृष्टित्वं गुणोयं खलु योगिनः । अकीर्तिहेतुः स महान्दोषस्तु पृथिवीपतेः ॥३५५॥ 355
नयद्भिर्गुणतां दोषान्दोषतां च गुणान्विटैः । स लुप्तमतिभश्चक्रे शनकैः स्त्रीजितोपमः ॥३५६॥
वाङ्मर्मच्छेदिनी दीर्घे नर्म शश्वत्कथा विटैः । अनीश्वरोचिता तस्य क्रीडापि भयदाभवत् ॥३५७॥
पुरो मिथ्या गुणग्राही परोक्षं दोषदर्शकः । असुस्थिरादरो भूभृत्सोभूद्भृत्योनुजीविनाम् ॥३५८॥
मनागनवधानेन स्खलनस्तस्य भूपतेः । इत्थं राज्यस्थितिरगादचिरेण विसूत्रताम् ॥३५९॥
उपेक्षितस्य निर्व्याजैरयनन्ताजितात्मनः । अथ लब्धबलास्तस्य नाशाय द्रोहिमन्त्रिणः ॥३६०॥ 360

---

३३९. [1]) Thus corr by A_3 from A_1 प्रत्यवीक्षा°. ३४०. [1]) A_2 gloss आडंग्राम —. [2]) A_2 gloss खन्वांर.— [3]) A_2 शमाजासा, with gloss प्रसिद्ध जासन्. ३४२. [1]) A_2 gloss गोपकार इति प्रसिद्धस्थले. ३४२. [1]) A_2 gloss भुछवेवाडू इति नाथया प्रसिद्धस्थले.— [2]) A_2 gloss सोदरबले —. [3]) Emended, A B व्यधाद्वि°, C व्यधाद्वि° ३४३. [1]) A_2 gloss वश्यियामाविषु ३४५. [1]) A_2 सषण्मासा. ३४७. [1]) Thus corr from A_1 °न्याश्च by A_3 which adds the glosses अविच्छिन्नमन्त्रज्ञानमक्षयिणी धर्मभक्तमिति च प्रसिद्धा, and अक्षयिण्या इति पार्वतीयदेशाशी कडमीरांपकण्डवर्तिनि अलधीण्या इति प्रसिद्धा यासु (A_3 यस्यां) सदाक्षीण भूरिब्राह्मण-भोजन विनीर्यते Of a third gloss by A_2 which has been smeared over with ink, only the following can be read. उद्यापनं यज्ञमित्यक्षयि------ —. [2]) Thus corr. by A_3 from A_2 कारस. ३५०. [1]) Thus A_3; A_1 सूक्ष्माक्षितया ३५४. [1]) Thus A_3, A_1 °जिह्रे. ३६०. [1]) A_2 gloss मन्त्रिणि.

प्रभोः संकोचिताशैस्तैश्चरद्भिर्निरवग्रहम् । राज्यं जिहीर्षवो भूपाधिक्रिरे भूम्यनन्नराः ॥३६१॥
तदनुप्राणिताः सर्वे ते ते नानादिगाश्रयाः । आसन्राज्यामिषं प्राप्तुं द्रविणा इव ससंभ्रमाः ॥३६२॥
अथोत्पन्नभयो राजा न शशाक निजस्थितिम् । व्यवस्थापयितुं यन्त्रच्युतां कारुः शिलामिव ॥३६३॥
चिरं क्षुण्णे क्षमाभर्तुस्तस्मिन्राज्ये विसंस्थुले । उपायोस्य स्थितेर्हेतुर्नैकः कश्चन पप्रथे ॥३६४॥
दृष्टदोषान्स्थितिं प्राप्तो हन्यादस्मानसंशयम् । विचिन्त्येति न सामास्य जगृहुर्निजमन्त्रिणः ॥३६५॥
अथ निरुरुधुस्ते संनद्धा बलैर्नृपमन्दिरं व्यवहितजनाक्रन्दं भेरीरवैरतिभैरवैः ।
मदकरिघटाकेतुच्छायानिरुद्धरविप्रभा भवनवलभीः संतन्वन्तो दिवापि तमोवृताः ॥३६६॥
तैर्गन्तुं स्वभुवो निवारितरणैर्दत्तेवकाशो[1] ततस्त्यक्तश्रीर्नगरान्तरात्स नृपतिस्तात्पर्यतो निर्ययौ ।
आजानेयरजोडुराजललनाप्रस्थानसंदर्शनक्षुभ्यत्पौरजनाकुलाजकणिकाकीर्णेन राजाध्वना ॥३६७॥
राज्याच्युतस्य बहुशः परिवाररामाकोशादि तस्य रिपवो व्रजतोपजह्रुः ।
उर्वीरुहो विगलितस्वं नगेन्द्रभृङ्गाद्वलीफलादि रभसादिव गण्डशैलाः ॥३६८॥
रम्यैः शैलपथैर्व्रजञ्श्रमवशाच्छायां श्रितः शाखिनामासीनप्रचलायितेन सुमहद्दुःखं विससार सः ।
दूरात्पामरपुत्कृतैः श्रुतिपथप्राप्तैः प्रबुद्धस्वभूद्दृष्टो निर्झरवारिभिः सह मनःक्षोभे निमज्जन्निव ॥३६९॥
नानावीरुत्तृणपरिमलैरुपगन्धा वनोर्वीरम्भःक्षोभप्रतिहतशिलाः पिच्छिलाश्चाद्रिकुल्याः ।
क्रान्त्वा भ्रान्तैर्बिसकिसलयच्छायमुरधाङ्गलेखैरभ्युत्सङ्गं निहिननुभिर्मूर्छित तस्य दारैः ॥३७०॥
पर्यन्ताद्रितटाद्विलोक्य सुचिरं दूरीभवन्मण्डलं द्रागामन्त्रयितुं जहर्षुं नृपतेर्दारेषु पुष्पाञ्जलीन् ।
क्षोणीपृष्ठविकीर्णपक्षतिनमत्तुण्डं स्वनीडस्थितैः सावेगं गिरिकन्दरासु पततां वृन्दैरपि क्रन्दितम् ॥३७१॥
स्तनयुगतलनद्धस्तमूर्धांशुकानां श्रिकवलनविलोलं वीक्ष्य दूरात्स्वदेशम् ।
अवहत रुदतीनां मौलिविन्यस्तहस्तं पथि नृपवनितानामंशुभिर्निर्झराम्भः ॥३७२॥
प्रीतिस्थैर्यैरुचितवचनाक्षिप्तया शोकशान्त्या निर्व्याजाज्ञाग्रहणगुरुभिस्तैश्च तैश्चोपचारैः ।
तस्य स्नेहादुपगतवतो राज्यविभ्रंशदुःखं मन्दीचक्रुः स्वभुवि सुजना भूपतेर्भूमिपालाः ॥३७३॥

इति काश्मीरिकमहामात्यश्रीचण्डकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां प्रथमस्तरङ्गः ॥
चतुर्दशाधिकं वर्षसहस्रं नव वासराः । मासाश्च विगता ह्यस्मिन्नेकविंशतिरंगजसु ॥

---

३६२. [1]) A, had written च after ते ते; struck out. A, तदनुप्राणिता वैरिनृपा नाना° ३६३ [1]) A, gloss यन्त्रवत् इति सेनाया गुह्यादौ प्रसिद्धम. ३६४. [1]) Thus corr. by A, from A, कस्य न ३६५ [1]) Thus corr. by A, from A, प्राप्तान्ह°. ३६७. [1]) A, gloss धर्मद्वारे. ३६८ [1]) Thus corr. by A, A, °रामा-कोश°.—[2]) Thus corr. by A, from A, °द्विजहु —[3]) A, विचलितस्य. ३६९. [1]) G has sec. manu the v. l आसीन प्रलयायिनेन —[2]) Thus A, A, gives the v. l. महत् for मन between the lines and another v. l पुन in margin. ३७०. [1]) A, आत्युत्सङ्गं. ३७१. [1]) Thus A, A, पर्यस्मा°.—[2]) A, क्षिप्तसु. ३७२. [1]) A, बलमबलानां, with gloss अबलानां बलं कर्ल —[2]) A, gloss कर्म. Colophon [1]) A, adds before this the note रा ३८ ॥ मं ॥ ३७३ ॥.—[2]) A, चतुर्दशा°.—[3]) Thus A, ; A, °लष्टाविंशति रा°.

॥ द्वितीयस्तरङ्गः ॥

विहितमजगोशृङ्गायाभ्यां धनुर्घटितं तथा नरकरटिनोर्दंष्टाभ्यां गणं परिगृह्णतः ।
विविधघटनावाक्षभ्यानां निषेधरुचितां विभोर्जयति ललनापुंभागाभ्यां शरीरविनिर्मितिः ॥१॥
भूयोराज्यार्जनोद्योगस्तेनात्यजत भूभुजा । जरसा शर्मिवाण्या च कर्णमूलमवाप्तया ॥२॥
अनयद्विनयोदात्तः समं स्वविषयेण तान् । विषयान्वाशिनामग्र्यः स तान्पञ्चापि विस्मृतिम् ॥३॥
धात्रात्राज्येच्छया दुर्गागलिकायां[1] स्वमन्त्रिभिः । कालेन स्थापितो बद्धैरत्यभ्यधायि तु कैरपि ॥४॥
अथ प्रतापादित्याख्यस्तैरानीय दिगन्तरात् । विक्रमादित्यभूभर्तुर्ज्ञातिरभ्यषिच्यत ॥५॥
शकारिर्विक्रमादित्य इति स भ्रममाभिनैः । अन्यैरत्रान्ययालेखि विसंवादि[2] कदर्थितम् ॥६॥
इदं स्वभेदविधुरं हर्षादीनां धराभुजाम् । कंचित्कालमभूद्भोज्यं ततः प्रभृति मण्डलम् ॥७॥
असपूर्वापि तेनोर्वी सपूर्वेव मरीभुजा । लालिता हृदयज्ञेन पत्या नववधूरिव ॥८॥
भुक्त्वा द्वात्रिंशतं वर्षान्भुवं तस्मिन्दिवं गते । जलौकास्तत्सुतो भूमेर्भूषणं समपद्यत ॥९॥
पितुरेव समं कालं वृद्धिहेतोः स दिद्युते । विधुवत्पूर्णशीतांशुरिव शीतेतरार्चिषः ॥१०॥
अथ वाक्पुष्टया सार्धं देव्या दिव्यप्रभावया । भुवं तत्प्रभवो भुञ्जन्तुञ्जिनोरञ्जयत्प्रजाः ॥११॥
दंपतिभ्यामियं ताभ्यामभूयत वसुंधरा । गङ्गाभृगाङ्कखण्डाभ्यां जटाभूरिव धूर्जटेः ॥१२॥
मण्डलं साध्वधत्तां तौ नानावर्णमनोरमम् । शतह्रदापयोवाहौ माहेन्द्रमिव कार्मुकम् ॥१३॥
चक्राते च महाभागौ विश्रमाभरणं भुवः । तुङ्गैश्चारु हरावासं कनिकांख्यं च पत्तनम् ॥१४॥
क्वचिन्मण्डवराज्यान्तःस्थाने चण्डातपोज्ज्वले[3] । तत्प्रभावेण फलितं वृक्षैस्तत्क्षणरोपितैः ॥१५॥
नाटचं सर्वजनप्रेक्ष्यं यश्चक्रे स महाकविः । द्वैपायनमुनेर्नेदं शास्तत्काले चन्द्रकोभवत् ॥१६॥
तयोः प्रभावमाहात्म्यजिज्ञासार्थमिवोद्यता । प्रजासु दुःसहा जातु व्यापद्दैवी[4] व्यजृम्भत ॥१७॥
पाकोन्मुखशरच्छालिच्छन्नकेदारमण्डले । मासि भाद्रपदेकस्मात्पपात तुहिनं महत् ॥१८॥
तस्मिन्विश्वक्षयोद्युक्तकालाट्टहसितोपमे । न्यमज्जञ्शालयः साकं प्रजानां जीविताशया ॥१९॥
अथासीत्क्षुत्परिक्षामजनप्रेतकुलाकुलः । प्राकारो[5] निरयस्येव घोरो दुर्भिक्षविप्लवः ॥२०॥
पत्नीप्रीतिं सुतस्नेहं पितृदाक्षिण्यमातुरः । कुक्षिंभरिः क्षुदुन्मत्तो विससारात्मविक्रयी जनः ॥२१॥

---

१ [1]) Thus corr. by A, from A$_1$ °गो भूद्रा°.—[2]) Thus corr. by A$_3$ from A$_1$ प्रतिगृह्यत.—[3]) A$_4$ gloss अभ्यस्ता
२ [1]) A$_2$ gloss जितेन्द्रियाणां. ४. [1]) A$_2$ gloss दुरुच्यन. ६ [1]) A$_1$ स इति भ्रम°, R G follow this reading and write °दित्य.—[2]) A$_2$ विसवादक°. १४ [1]) A$_2$ gloss कैश. १५ [1]) A$_3$ °तपोज्वले १६. [1]) Thus A$_3$, also R G. A$_1$ °क्वे.
१७ [1]) A$_2$ gloss दैवे: कृतत्वादेवानां संबन्धिनी दैवी ३० [1]) Thus A$_1$, altered by A, into प्रकारो

क्षुत्तापाद्यस्मरज्ञज्ञामभिमानं कुलोचितम् । अशनाहंक्रियाग्रातो लोकों लक्ष्मीकटाक्षितः ॥२२॥
क्षामं कण्ठगतप्राणं याचमानं सुतं पिता । पुत्रो वा पितरं त्यक्त्वा चकार स्वस्य पोषणम् ॥२३॥
स्वास्थ्यस्थिशेषे बीभत्से स्वदेहेहंक्रियावताम् । अभूद्भोज्यार्थिनां युद्धं प्रेतानामिव देहिनाम् ॥२४॥
रूक्षाभिभाषी क्षुत्क्षामो घोरो दिक्ष्वक्षिणी क्षिपन् । एक एको जगज्जीवैरियेष स्वात्मपोषणम् ॥२५॥
तस्मिन्महाभये घोरे प्राणिनामतिदुःसहे । ददृशे लोकनाथस्य तस्यैव करुणार्द्रता ॥२६॥
निवारितप्रतीहारः स रत्नौषधिशौभिना । दर्शनेनैव दीनानामलक्ष्मीक्लममच्छिनत् ॥२७॥
सपत्नीको निजैः कोशैः संचयैर्मन्त्रिणामपि । क्रीतात्मः स दिवारात्रं प्राणिनः समजीवयत् ॥२८॥
भटवीषु श्मशानेषु रथ्यास्ववसथेषु च । क्षुत्क्षामः क्षमाभुजा तेन नहि कश्चिदुपैक्ष्यत ॥२९॥
ततो निःशेषितधनः क्षीणाशां वीक्ष्य मेदिनीम् । क्षपायामेकदा देवीमेवमूचे स दुःखितः ॥३०॥
देव्यस्मदपचारेण ध्रुवं केनापि दुस्तरा । जाता निरपराधानां जनानां व्यापदीदृशी ॥३१॥
धिङ्मामधन्यं यस्यामे लोकोयं शोकपीडितः । पश्यन्नशरणामुर्वीमनुग्रासो विपद्यते ॥३२॥
प्रजा निःशरणा एता अन्योन्यं बान्धवोज्झिताः । अरक्षतो भयेभ्यस्मिन्किं कार्यं जीवितेन मे ॥ ३३ ॥
यथा कथंचिल्लोकोयं दिनान्येतानि यावतः । मयातिवाहितः सर्वो न च कोपि व्यपद्यत ॥३४॥
अतिक्रान्तप्रभावेयं कालदौरात्म्यपीडिता । निष्किंचनाश्च संजाता पृथिवी गतगौरवा ॥३५॥
तदिमाः सर्वतो ममा दारुणे व्यसनार्णवे । उपायः कतमस्तावत्समुद्धर्तुं क्षमः प्रजाः ॥३६॥
निरालोकों हि लोकोयं दुर्दिनग्रस्तभास्करः । कालरात्रिकुलैर्विश्वकपरीत इव वर्तते ॥३७॥
हिमसंघातदुर्लङ्घ्यक्षितिभृद्बुद्धनिर्गमाः । बद्धद्वारकुलायस्थखगबह्विशा जनाः ॥३८॥
भूराश्च मतिमन्तश्च विद्यावन्तश्च जन्तवः । कालदौरात्म्यतः पश्य जाता निहतयोग्यताः ॥३९॥
आशाः काञ्चनपुष्पकुट्मलकुलच्छन्ना न काः क्ष्मातले सौजन्यापूतवर्षाभिस्तिलकिताः सेव्यैर्न किं मण्डलम् ।
पन्थानः सुचिरोपचाररुचिरैर्व्याप्ता न कैः संस्तुतैस्तेषामेव वसन्ति निर्धनगुणाः कालेन ये मोहिताः ॥४०॥
तदेष गलितोपायो जुहोमि ज्वलने तनुम् । ननु ब्रूहि समर्थोस्मि प्रजानां नाशमीदृशम् ॥४१॥
धन्यास्ते पृथिवीपालाः सुखं ये निशि शेरते । पौरान्पुत्रानिव पुरः सर्वतो वीक्ष्य निर्धनान् ॥४२॥
इत्युक्ता करुणाविष्टो मुखमाच्छाद्य वाससा । निपत्य तल्पे निःशब्दं रुरोद पृथिवीपतिः ॥४३॥
निवातस्तिमितैर्दीपैरुद्भ्रीवैः कौतुकादिव । वीक्षमाणाय तं देवी जगाद जगतीभुजम् ॥४४॥
राजन्प्रजानां कुकृतैः कोयं मतिविपर्ययः । येनेतर इव स्वैरमधीरोचितमीहसे ॥४५॥
यशसाध्यानि दुःखानि क्षेतुं न प्रभविष्णुना । तन्महीपाल महतां महत्त्वस्य किमङ्गनम् ॥४६॥
कः शक्रः कतमः स्रष्टा वराकः कतमो यमः । सत्यव्रतानां भूपानां कर्तुं शासनलङ्घनम् ॥४७॥
पत्नी भक्तिर्वनं क्षीणामद्रोहो मन्त्रिणां व्रतम् । प्रजानुपालनेनन्यकर्मता भूभृतां व्रतम् ॥४८॥

---

२२ [1]) A, लोकोऽलक्ष्मी° २९ [1]) Thus corr by A_2 from A, उपेक्ष्यते ३० [1]) Thus corr by A, from A_1 सु° ३८ [1]) A, हिमसंपातदुर्लक्षि° —[2]) A_2 gloss नीड ४० [1]) A, प्रचुरो° —[2]) A, संस्तुतैरेषा°, with gloss एषा भूरसमिमशाणीनाम निर्धनगुणा ये भूराश्चा अत्र अस्मिन्नेव देशे वसन्ति देशान्तर न गच्छन्ति ते कालेन मोहिता —[3]) A_2 ते ४३ [1]) Thus corr by A, from A_1 °शङ्क

उत्तिष्ठ वतिनामध्य क्व विपर्येति मद्वचः । प्रजापाल प्रजानां ते नास्त्येव भुक्तकं भयम् ॥४९॥
इति संरम्भतः प्रोक्ते तयानुध्याय देवताः । प्रतिगेहं गतप्राणः कपोतनिवहोपतत् ॥५०॥ 50
प्रातस्तन्नृपतिर्वीक्ष्य व्यरंसीन्मरणोद्यमात् । प्रजाश्च प्रत्यहं प्रीतिः कपोतैर्जीवितं दधुः ॥५१॥
वस्त्वन्तरं किमपि तत्साध्वी नूनं ससर्ज सा । जनतानीवितावाप्त्यै न कपोतास्तु तेभवन् ॥५२॥
नादृशां नहि निर्व्याजप्राणिकारुण्यशालिनाम् । हिंसया धर्मचर्यायाः शक्यं क्षपि कलङ्कनम् ॥५३॥
अभवन्निर्मलं व्योम देवीकृत्यैः सह क्रमात् । साकं भूपालशोकेन दुर्भिक्षं च शमं ययौ ॥५४॥
सा भूनिर्विभवोदयममहारं द्विजन्मनाम् । सती कर्तामुषं चक्रे रामुषं चापकल्मषा ॥५५॥ 55
वर्षैः षट्त्रिंशता शान्ते पत्यौ विरहजो ज्वरः । तत्यजे ज्वलनज्वालानलिनप्रच्छदा तया ॥५६॥
सा यत्र शुचिचारित्रा विपत्रं पतिमन्वगात् । स्थानं जनैस्तद्वाक्पुष्टाटवीत्यद्यापि गद्यते ॥५७॥
चारुचारित्रया तत्र तया सत्रेवनारिते । नानापथागतानाथसार्थैरद्यापि भुज्यते ॥५८॥
आभ्यामभ्यधिकं कर्तुं शक्तिः कस्येति निश्चितम् । विचिन्त्यारोचकी धाता नापत्यं निर्ममे तयोः ॥५९॥
वेधाः परां धुरमुपैति परीक्षकाणामिक्षोः फलप्रजननेन कृतश्रमो यः ।
विस्मारितोद्धुरसुधारसयोग्यतां तत्तस्मादुदेत्यं किमिवाभ्यधिकं विदध्यात् ॥६०॥ 60
दीर्घदुर्दिवनष्टाकं राष्ट्रमान्मापचारतः । ज्ञात्वा राज्यप्रिसाहेहं सा चकारेति केचन ॥६१॥
ततोन्यकुलजो राजा विजयोद्भावभूत्समाः । पत्तनेन परीतं यश्चकार विजयेश्वरम् ॥६२॥
सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः । क्षमामाजानुभुजो राजा बुभोजाथ पृथुप्रथः ॥६३॥
अलोलकीर्तिकल्लोलदुगूलवलनोज्ज्वलाम् । बभार यद्भुजस्तम्भो जयश्रीशालभञ्जिकाम् ॥६४॥
तस्याभूदद्भुतोदन्तभवभक्तिविभूषितः । राज्ञः संधिमनिर्नाम मन्त्री मतिमतां वरः ॥६५॥ 65
नास्त्युपायः स संसारे कोपि योपोहितुं क्षम· । भूपालमत्तकरिणोभेपां चपलकर्णताम् ॥६६॥
अत्यद्भुतमतिः शङ्खः सोयमुल्लेखि यद्दिटैः । तस्मिन्धीसचिवे द्वेषस्तेनामात्यत भूभुजा ॥६७॥ युग्मम् ॥
निवारितप्रवेशोथ मकोपस्तमहेतुकम् । निनाय हृतसर्वस्वं यावदायुर्दरिद्रताम् ॥६८॥
तस्य भूपतिविद्वेषधीष्मोष्मपरिशोषिणः । आप्यायं राजपुरुषा वार्तयापि न चक्रिरे ॥६९॥
गिरं गभीरो गृह्णाति क्षमाभृद्यावत्तदप्रगाः । उक्तानुवादिनस्तावद्यच्चं प्रतिरवा इव ॥७०॥ 70
स तु राजविरुद्धत्ववदारिद्र्याभ्यां न विव्यथे । गतप्रत्यूहया प्रीतः प्राप्तया सरसेवया ॥७१॥
अथ भाव्यर्थमाहात्म्यात्पथे प्रतिमन्दिरम् । राज्यं संधिमनेर्भावीत्यश्रुतापि सरस्वती ॥७२॥
नाचोदिता वाक्चरतीत्याप्तेभ्यः श्रुतवानृपः । ततः संभूतसंत्रासः कारावेश्मनि तं न्यधात् ॥७३॥

---

५० [1]) A, देव्या ५२ [1]) A, पतन. ५५. [1]) A, gloss कैमाह. —[2]) A, gloss रामाह. ६० [1]) Thus A, A, योग्यतान्तत, G योग्यतान्तात explained by योग्यतयान्तो गृहीत and subsequently corrected into योग्यता तु —[2]) A, gloss उत्पादयित्वा ६४ [1]) G आलोल° —[2]) Thus corr. by A, from A, °ल्लां' —[3]) A, gloss दुगूलिकाम ६५ [1]) A, °शालो ६८ [1]) A, कोपान्तम ७२. [1]) Thus corr by A, from A, नयम', A, had explained in margin the original reading by a note which has been struck out राज्य सन्धिमना (sic) भाव्यर्थभुतापि सरस्वती एव नवमन्दिर पथे सन्धिमतेर्वराकस्य विषमपूर्वकृत्यपरिपोषकरूपत्वान्नवम-न्दिररूप तन्मात्रभुनवाक् श्रवणमभूदित्यर्थ येन च तदुपरि राजानीव क्रूरचेष्टोभूदिति भाव ७३ [1]) Thus corr by A, from A, सद्भूत° —[2]) Thus corr by A, from A, व्यधात

तत्र तस्योपनिगडैः पीडिताङ्गैर्विशुष्यतः । पूर्णोभूद्दशमो वर्षो भूपतेर्थायुषोवधिः ॥७४॥
निष्पुत्रः स महीपालो मुमूर्षुर्दीहमादधे । रोगोत्थया पीडया च चिन्तया च तदीयया ॥७५॥
ऊष्मायमाणो विद्वेषवह्निना ज्वलतानिशम् । न विना तद्दधं मेने भवितव्यप्रतिक्रियाम् ॥७६॥
भाव्यर्थस्यार्बुधाः कुर्युरुपायं स्थगनाय यम् । स एवापावृतं द्वारं ज्ञेयं दैवेन कल्पितम् ॥७७॥
दग्धाङ्गारकदम्बके विलुठतः स्तोकोन्मिषत्तेजसो वेधा वह्निकणस्य शक्तिमतुलामाधातुकामो हठात् ।
तन्निर्वापणमिच्छतः प्रतनुते पुंसः समीपस्थिते संतापद्रुतभूरिसर्परिपि घटे पानीयकुम्भभ्रमम् ॥७८॥
अथ राजाज्ञया क्रूरैर्वेधकर्माधिकारिभिः । निशि संधिमतिः शूले समारोप्य विपादितः ॥७९॥
प्रोतशूले श्रुते तस्मिञ्शोकशङ्कुर्महीपतेः । निरगाद्रोगभग्नस्य पूर्वं पश्चात्तु जीवितम् ॥८०॥
सप्तत्रिंशतिवर्षेषु यातेष्वस्मिन्निरन्वये । प्रशान्तभूमिपालाभूत्कतिचिद्दिवसानि भूः ॥८१॥
अथ संधिमतिं बुद्ध्वा तथा व्यापादितं गुरोः । ईशानाख्यस्य हृदयं विवशं वशिनोप्यभूत् ॥८२॥
शिरीष इव संसारे सुखोच्छेद्ये मनीषिणाम् । हन्तानृशंस्यं तद्भूयन्तमिवैकमवशिष्यते ॥८३॥
स इमशानभुवं प्रायादनायस्येव शुष्यतः । कर्तुं विनयिनस्तस्य स्वोचितामन्तसत्क्रियाम् ॥८४॥
तं चास्थिशेषमद्राक्षीत्कृष्यमाणं बलाद्भृकैः । शूलमूलावबद्धास्थिखण्डावष्टंभनिश्चलम् ॥८५॥
समीरणसमाकीर्णमुण्डरन्ध्रापनिर्गतैः । ध्वनिनैरनुशोचन्तमिवावस्थां तथाविधाम् ॥८६॥
हा वत्स द्रष्टुमीदृक्ते जीवाम्यद्येति वादिना । तस्याकृष्यत शूलान्तःप्रोतं तेनाथ कीकसम् ॥८७॥
वेष्टिताङ्गैः शिरःशीर्णैस्तत्कचैर्धूलिधूसरैः । अनैषीत्तं स कङ्कालं वारयन्भषतो वृकान् ॥८८॥
उचितां सत्क्रियां कर्तुं ततस्तस्य समुद्यतः । भाले विधातुलिखितं श्लोकमेतमवाचयत् ॥८९॥
यावज्जीवं दरिद्रत्वं दश वर्षाणि बन्धनम् । शूलस्य पृष्ठे मरणं पुनां राज्यं भविष्यति ॥९०॥
पादत्रयस्य दृष्टार्थः श्लोकस्यासीत्स योगवित् । द्रष्टव्ये तुर्यपादार्थप्रत्यये कौतुकान्वितः ॥९१॥
अचिन्तयच्च संभ्रान्तः कथमेतद्भविष्यति । उवाच च विधेः शक्तिमचिन्त्यां कलयंश्चिरम् ॥९२॥
तत्तत्कर्मव्यतिकरकृतः पारतन्त्र्यानुरोधान्सज्ञाः सर्वे व्यवसितहठोन्मूलनाय प्रयत्नात् ।
चित्रं तत्राप्युदयति विधेः शक्तिरत्यद्भुतेयं यन्माहात्म्याद्विविधघटनासिद्धयो निर्विरोधाः ॥९३॥
मणिपुरपुरे पार्थं निहतं ममजीवयत् । फणिकन्याप्रभावेण सर्वाश्चर्यनिधिर्विधिः ॥९४॥
द्रोणपुत्रास्त्रनिर्दग्धं मातुर्गर्भे परीक्षितम् । जीवयन्कृष्णमाहात्म्याद्धाता धुर्योधिकारिणाम् ॥९५॥
कच्च भस्मीकृतं दैत्यैर्नागांस्तार्क्ष्येण भक्षितान् । पुनर्जीवयितुं को वा दैवादन्यः प्रगल्भते ॥९६॥
इत्युक्ता भाविनोर्थस्य द्रष्टुं सिद्धिं समुद्यतः । तत्रैव बद्धवसतिः कङ्कालं स ररक्ष तम् ॥९७॥
अथार्धरात्रे निर्भिद्रस्तथैवाद्भुतचिन्तया । धृपाधिवासमीशानो ध्रातवान्दिव्यमेकदा ॥९८॥
उच्चण्डलाडनादण्डोद्दृष्टघण्टौघटांकृतैः । चण्डैर्डमरुनिर्घोषैर्घर्घरं श्रुतवान्ध्वनिम् ॥९९॥

---

९७ 1) Thus corr. by later hand from A, °र्थस्य बुधा . ७८. 1) Another hand alters this to °स्थिते . ८६ 1) A, °समापूर्णमु° with gloss शिर. over मुण्ड ९०. 1) Thus A, A, पुनराज्यं ९१. 1) Thus corr. by later hand from A, °दृष्टार्थे — 2) A, gloss चतुर्थ —3) Thus corr by later hand from A, °पादार्थे ९२. 1) Thus corr by A, from A, कार्यमे°. ९९. 1) A, gloss लाडना अन्तर्गता शलाका भाण्डु इति भाषया —2) A, °डमरुघोषैश्च.

उद्घाटिततमोरिः स ततः पितृवनावनौ । ददर्श योगिनीस्तेजःपरिवेषान्तरस्थिताः ॥१००॥ 100
तासां संभ्रममालक्ष्य कङ्कालं चापवाहितम् । ईशानस्तां श्मशानोर्वीं धृतासिश्चकितो ययौ ॥१०१॥
अथापश्यत्तरुच्छन्नः शायिनं मण्डलान्तरे । संधीयमानसर्वाङ्गं कङ्कालं योगिनीगणैः ॥१०२॥
उक्षसङ्गरसंभोगवाञ्छा मद्यपदेवताः । वीरालाभास्तमन्विष्य कङ्कालं तमपाहरन् ॥१०३॥
एकमेकं स्वमङ्गं च विनिधाय क्षणादथ । कुतोप्यानीय पुंलक्ष्मं पूर्णाङ्गं तं प्रचक्रिरे ॥१०४॥
अथ पूर्यष्टकं भ्राम्यदनाक्रान्तान्यविग्रहम् । योगेनाकृष्य योगेश्वरस्तत्र संधिमतेन्यधुः ॥१०५॥ 105
ततः सुप्तोत्थित इव प्रसन्नदिव्यविलेपनः । समभुञ्जत ताभिः स यथेच्छं चक्रनायकः ॥१०६॥
ईशानस्तस्य देवीनां वितीर्णाद्वाहतिं पुनः । क्षपायां क्षीयमाणायां चकितः पर्यशङ्कत ॥१०७॥
नरंस्तद्रक्षया धीरः स च तत्स्थानमाययौ । तच्च योगेश्वरीचक्रं क्षिप्रमन्तरधीयत ॥१०८॥
अथाभूयत वाक्तासां माभूदीशान भीस्तव । नास्त्यस्मत्स्थानिरस्मार्क वृते चास्मिन्न वञ्चना ॥१०९॥
अस्मद्वराद्दिव्यवपुःसंधितः संधिमानसौ । आर्यत्वादार्यराजश्च ख्यातो भुवि भविष्यति ॥११०॥ 110
ततो दिव्याम्बरः स्रग्वी दिव्यभूषणभूषितः । ववन्दे संधिमान्प्रह्वः प्राग्पूर्वस्मृतिगुरुम् ॥१११॥
ईशानोपि तमालिङ्ग्य स्वयेष्वपि सुदुर्लभम् । भूमिकामाललम्बे कामिति को वक्तुमर्हति ॥११२॥
असारं च विचित्रं च संसारं ध्यायतोर्मिथः । विवेकविशदा तत्र प्रावर्तत तयोः कथा ॥११३॥
अथ वार्तां विदित्वेमां कुतोपि नगरौकसः । सवालवृद्धाः सामात्यास्तमे देशमाययुः ॥११४॥
पूर्वाकृतिविसंवादाद्भमो नायं स इत्यथ । तेनाच्छिद्यत संवादिनिखिलाम्पृच्छता वचः ॥११५॥ 115
अर्थनां शासितुं राष्ट्रं पौराणामपराजकम् । सोन्वमन्यत कृच्छ्रेण निःस्पृहः शासनाद्गुरोः ॥११६॥
प्राप्त्योपवनोपान्तं तं दिव्याकृतिशोभिनम् । सतूर्यं स्वापयामासुरभिषेकाम्बुभिर्द्विजाः ॥११७॥
नवराजोचिताचारे न स शिक्षामपैक्षत । दृष्टकर्मा समस्तास्तु निस्तुषाः प्रक्रिया व्यधात् ॥११८॥
स राजोचितनेपथ्यः पौराशीर्घोषशोभिनीम् । सौधोन्मिषल्लाजवर्षां समैक्षत पुरीम् ॥११९॥
तस्मिन्चिरजसि प्राज्यमाक्रामति नृपासनम् । आचक्राम प्रजा व्यापच्च देवी न च मानुषी ॥१२०॥ 120
अहरन्हृदयं तस्य शृङ्गारहितविभ्रमाः । नितम्बिन्यो वनभुवः शमिनो न तु योषितः ॥१२१॥
वनपसूनसंपर्कपुण्यगन्धैस्तपस्विनाम् । कर्पूरधूपसुरभिः करैः स्पृष्टः स पिप्रिये ॥१२२॥
भूतेशवर्धमानेशविजयेशानपश्यतः । नियमो राजकार्येषु तस्याभूत्पतिवासरम् ॥१२३॥
हरायतनसोपानक्षालनाम्भःकणाश्चितैः । संस्पृष्टः पवनैः सोभूदानन्दास्पन्दविग्रहः ॥१२४॥
पूर्वपूजापनयने निगडेश्वरसुन्दरः । तेनैव द्रष्टुमज्ञाषि क्षपितो विजयेश्वरः ॥१२५॥ 125
लिङ्गपीठलुठत्स्थानकुम्भाम्भःक्षोभमभूर्वनिः । शयानस्याप्यभूतस्य वल्गतो वल्गकीद्विषः ॥१२६॥

---

१०० [1]) A, gloss तनोरि चाद् इति भाषया. १०३ [1]) Thus corr. by A_3 from A, मध्यमवें°, A_2 in margin मद्यमवेन ना इत्य-ध्यवर्षी.—[2]) Thus corr by A_3 from A, तनुपाहरन् १०४ [1]) Thus corr. by later hand from A, तनो.—[2]) Thus corr by A_3 from A, पुंलिङ्ग° १०५. [1]) Thus corr. by A_3 from भाम्यन्मना°.—[2]) A_3 योगिन्यः १०६ [1]) न supplied by A_3. १०७. [1]) Thus corr. by A_3 from A, ईशानतस्त्व. ११०. [1]) A_3 राजा. ११९. [1]) Thus corr by A_3 from A, सतैन्या. १२२. [1]) A, gloss शृङ्गेषु अरहित न स्वल्क वीनां पक्षिणां भ्रम भ्रमर्ण वाभिः सा —[2]) A_3 gloss शान्तस्त्व. १२५ [1]) Thus corr. by A_3 from A, निजड°

तापसैर्मस्मरुद्राक्षजटाजूटाङ्किते र्वभौ । तस्य माहेश्वरी पर्षदिव भूमिपतेः सभा ॥१२७॥
शिवलिङ्गसहस्रस्य प्रतिष्ठाकर्मणि प्रभोः । प्रतिज्ञा प्रत्यहं तस्य नाभूद्विघटिता क्वचित् ॥१२८॥
प्रमादात्तदनिष्पत्तौ शिलामुत्कीर्य कल्पिता । सहस्रलिङ्गी तद्वृत्तैः सर्वतोऽपि दृश्यते ॥१२९॥
तानु तानु स वापीषु लिङ्गव्याजादरोपयत् । स्वपुण्यपुण्डरीकाणां जन्मनेक्षपरंपराम् ॥१३०॥
स्थाने स्थाने जलान्तश्च बहुसंख्यैर्निवेशितैः । अनयन्नर्मदाभङ्गि शिवलिङ्गैस्तरङ्गिणीः ॥१३१॥
प्रतिलिङ्गं महामात्राः प्रत्यपाद्यन्त तेन ये । पर्षदामथ तद्भोगः कालेनान्तर्षिमागतः ॥१३२॥
भक्तरोत्स महाहर्म्यैर्महालिङ्गैर्महावृषैः । महात्रिशूलैर्महतीं महामाहेश्वरो महीम् ॥१३३॥
कृत्वा संधीश्वरं देहसंधानपितुकानने । ईशानस्य गुरोर्नाम्ना व्यधादीशेश्वरं हरम् ॥१३४॥
येदां च भीमांदर्वी च देशांश्चान्यान्पदेपदे । स मठप्रतिमालिङ्गैर्हर्म्यैर्मन्ये महार्घताम् ॥१३५॥
स्वयंभूभिश्च तीर्थैश्च पूतं भक्तिविभूषितैः । स एव भोक्तुमज्ञासीत्प्राज्ञः काश्मीरमण्डलम् ॥१३६॥
स्नातस्य निर्झराम्भोभिः पुष्पलिङ्गार्चनोत्सवै । राज्ञस्तस्य वनेवींषु मासः पञ्चाक्रमे ययौ ॥१३७॥
स चातिरम्यः काश्मीरो ग्रीष्मस्त्रिदिवदुर्लभः । हिमलिङ्गार्चनैः प्रायाद्वनान्तषु कृतार्थताम् ॥१३८॥
फुल्लाब्जपण्डरुद्दाशाः प्राप्य पुष्करिणीतटीः । लक्ष्मीसखः स खण्डेन्दुचूडध्यानपरोऽभवत् ॥१३९॥
नीलोत्पलवतीर्वापीरगस्त्योदयनिर्विषाः । अवगाह्य हरार्चाभिः शरदं निर्विवेश सः ॥१४०॥
सार्धं तपोधनैस्तैस्तैर्भजनो जागरोत्सवान् । तस्याभूवन्भुवो भर्तुरमोघा माघरात्रयः ॥१४१॥
अत्यद्भुतं राज्यलाभमित्थं सफलयन्कृती । पञ्चाशतं त्रिवर्षोनामत्यक्रामत्स वत्सरान् ॥१४२॥
शमव्यसनिनस्तस्य राज्यकार्याण्यपश्यतः । तस्मिन्काले प्रकृतयो विरागं प्रतिपेदिरे ॥१४३॥
अन्वैष्यन नृपस्ताभिः कश्चिद्राज्याय भुभुजे । राजपुत्रो जिगीषुश्च श्रीमान्यौधिष्ठिरे कुले ॥१४४॥
जुगोप गोपादित्याख्यं कश्मीरेन्द्रजिगीषया । युधिष्ठिरप्रपौत्रं हि गान्धाराधिपतिस्तदा ॥१४५॥
वसन्तप्राप्तसाम्राज्यः स तत्र ननयं क्रमात् । अवाप लक्षणैर्दिव्यैरमोघं मेघवाहनम् ॥१४६॥
स तत्र पितुरादेशाद्वैष्णवान्वयजन्मनः । राष्ट्रं प्राग्ज्योतिषेन्द्रस्य ययौ कन्यास्वयंवरे ॥१४७॥
तत्र तं वारुणं छत्रं छायया राजसंनिधौ । भेजे वरस्रजा राजकन्यका चामृतप्रभा ॥१४८॥
तेन तस्य निमित्तेन वृद्धिमागामिनीं जनाः । अजानन्नम्बुवाहस्य पाश्चात्येनेव वायुना ॥१४९॥
राज्ञा हि नरकेणेतद्वरुणादुण्णवारणम् । आनीतमकरोच्छायां न विना चक्रवर्तिनम् ॥१५०॥
तमन्तिकं पितुः प्राप्तं पद्मया लक्ष्म्या च संश्रितम् । भुवा निमन्त्रयामासुर्मन्त्रिणो वंशयोग्यया ॥१५१॥
अथार्यराजो विज्ञाय स्वराज्यं भेदजर्जरम् । प्रतिचक्रे न शक्तोपि तस्थौ तु त्यक्तुमुत्सुकः ॥१५२॥
अचिन्तयच्च सत्यं मे संप्रीतो भूतभावनः । सिद्धिविघ्नानमून्दीर्घानपाकर्तुं समुद्यतः ॥१५३॥
कृत्ये वस्तुनि निष्पाद्ये श्रमान्कौसीद्यमाभयन् । प्रायुपीवाध्वगो दिष्ट्या मोहितोस्मि न निद्रया ॥१५४॥
स्वकालं त्यजता लक्ष्मीं विरक्तां बन्धकीमिव । हठनिर्वासनव्रीडा दिष्ट्या नासादिता मया ॥१५५॥

---

१३० ¹) Thus corr by A_1 from A_1 °पुण्डरीकाभ्रज° १३४ ²) The *aksharas* श्वर supplied by A_2 in space left by A_1.— ³) A_1 gloss ईशाभ्रदु इति प्रसिद्धस्थले १३६ ¹) A_2 विशेषत —²) Thus A_2, A_1 प्राज्य°.—³) Thus corr. by later hand from A_1 काश्मीर° १३९ ¹) Thus corr by later hand from A_1 चूडाध्या°. १४५ ¹) Thus corr by A_1 from °ख्याख्य. १४६ ¹) Thus A_2, A_1 वसन्तप्राप्तसा°. १५० ¹) A_2 युवा १५२. ¹) A_2 glosses आलस्यम् and ——न कर्म कौसीद्य.—²) Thus corr by A_2 from A_1 °श्रयम १५५ ¹) Thus A_1; A_2 स्वकुलं.—²) Thus corr by A_2 from A_1 सरक्तास

दौःस्थ्यस्येव मे राज्यरङ्गस्मिन्वत्सगतश्चिरम् । निर्ग्रहमपि वैरस्यं दिष्ट्या न प्रेक्षका गताः ॥१५६॥
दिष्ट्या सदैव वैमुख्यमुचैरुद्वेगयन्भिश्रयः । त्यागक्षणे न भीतोस्मि विकत्थन इवाहवे ॥१५७॥
इति संचिन्तयन्नेतः सर्वत्यागोन्मुखो नृपः । मनोराज्यानि कुर्वाणो दरिद्र इव पिप्रिये ॥१५८॥
अन्येद्युः प्रकृतीः सर्वाः संनिपत्य सभान्तरे । ताभ्यः प्रत्यर्पयन्यासमिव राज्यं सुरक्षितम् ॥१५९॥
लज्जितं स्वेच्छया तस्मै प्रयत्नेनापि नाशकत् । तं स्वीकारयितुं कश्चित्फणीन्द्रमिव कञ्चुकम् ॥१६०॥ 160
अर्चालिङ्गमुपादाय सोथ प्रायादुदङ्मुखः । पौत्रवासा निरुष्णीषः पद्मामेव प्रजेश्वरः ॥१६१॥
तस्य पादार्पितदृशो व्रजतो मौनिनः प्रभोः । पन्थानं जगृहुः पौरा निःशब्दस्खलदश्रवः ॥१६२॥
स क्वित्क्वित्तगव्यूतिरुपविश्य तरोरधः । जनमेकैकमुद्वाष्पं न्यवर्तयत सान्त्वयन् ॥१६३॥
पथि शिखरिणां मूले मूले विलम्ब्य जहज्जनान्मितपरिकरो गच्छन्भूर्ध्वं क्रमात्समदृश्यत ।
वहनवसुधाः संपूर्योर्वैर्व्रजन्स निजात्पदाच्चव इव विनिर्यातः स्तोकैः कृतानुगमो जलैः ॥१६४॥
निःशेषं निकटास्त लोकमटवीमध्ये निरुन्धन्पदं शोकावेशसवाष्पगद्गदपदं संमान्य चोत्सार्य च ।
भूर्जत्वक्परिरोधमर्मरमरुद्विद्राणसिद्धाध्वगश्रेणीमौलिमणिप्रभोज्ज्वलगुहागेहं जगाहे वनम् ॥१६५॥ 165
अथ वनसरसीतटद्रुमाधः पुटकघटोदरसंभृताम्बुपूराम् ।
वमतिमकृत वासरावसाने शुचितरुपल्लवकल्पितोचितल्पाम् ॥१६६॥
शृङ्गासक्तासितातपाः शवलितच्छायाभुवः शाद्वलैरुत्फुल्लामलमल्लिकातलमिलत्सुप्रव्रजस्त्रीजनाः ।
सध्वाना वनपालधेनुरणितोन्मिश्रैः पपाताम्बुभिः श्रान्तं वृक्षपयागतास्तमनयन्विद्राम्बुराद्रयः ॥१६७॥
वनकरिरसितैः पदे पदे स प्रतिभटतां पटहध्वनेर्दधानैः ।
अमनत रटितैश्च कर्करेटोः परिगलितां गमनोन्मुखस्त्रियामाम ॥१६८॥
अन्येद्युर्विधिवदुपास्य पूर्वसंध्यामासन्ने नलिनसरस्यपास्तनिद्रः ।
क्ष्मापालः परिचितसोदराम्बुतीर्थं नन्दीशाभ्युपनिमयार्थं भृतभर्तुः ॥१६९॥
नन्दिक्षेत्रे त्रिभुवनगुरोः सोपतस्तत्र यावत्तस्थौ तावत्स्वयमभिमतावग्रहे जायते स्म ।
भस्मस्मेरः सुघटितजटाजूटबन्धोक्षसूत्री रुद्राक्षाङ्को जरदमुनिभिः सस्पृहं वीक्ष्यमाणः ॥१७०॥ 170
भ्राम्यद्भ्रीकण्ठदत्तस्वजनितमहासत्रिकायो भिक्षहेतोर्भिक्षावानोद्यतासु प्रतिमुनिनिलयं सप्तमागारपंक्तिषु ।
वृक्षैर्भिक्षाकपाले शुचिफलकुसुमश्रेणिभिः पूर्यमाणे मान्यो वैराग्ययोगेष्वनुपनतपरप्रार्थनालाघवोभूत् ॥१७१॥

६ ॥ १७१ ॥ आदितः ४३ ॥ ग्र ५४३ ॥

इति श्रीकाटमौरिकमहामात्यश्रीचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्ग्यां द्वितीयस्तरङ्गः ॥

शतद्वये वत्सराणामष्टाभिः परिवर्जिते । अस्मिन्नुदितो व्याख्याता षट्प्रख्यातगुणा नृपाः ॥

---

१५६ [1]) Thus A_1, the v. l. of A_2 निर्ग्रहमपि has been struck out again; G R निर्ग्रहमपि १६० [2]) Thus corr. by later hand from A_1 तं च १६४ [3]) Thus corr. by A_1 from A_2 स्तोकानुगमो १६५. [4]) Thus A_2, A_3 निरुद्धपद — [5]) Thus corr. by later hand from A_1 भूर्जत्वक्° — [6]) Thus corr. by A_1 from A_2 मर्जर° — [7]) The *akshara* लि supplied by A_3 in space left by A_1. — [8]) The gloss नीमजोरो, written by A_1 at the foot of the page, probably refers to this word १६९ [9]) Thus corr. by A_2 from A_1 शाद्वलैरुत्फुल्लामल°, the latter reading repeated in margin by A_3 — [10]) Thus G sec. m. and P, A R C °वार्तरणु° — [11]) A_3 gloss पर्वता १६८ [12]) A_3 वनहरि — [13]) Thus corr. by later hand from A_1 °वनैर्व — १७० [14]) A_1 °यानावत्त, supplemented as above by A_1 १७१ [15]) A_1 भाग्यच्छ्री. — [16]) Thus corr. by A_1 from A_2 योग्या [17]) A_1 writes °व्यनुपतन°, with figures indicating transposition.

॥ तृतीयस्तरङ्गः ॥

मुञ्चेभानिनमस्यं कुम्भकुहरे मुक्ताः कुचामोदिताः किं भालज्वलनेन कज्जलमतः स्त्रीकार्यमक्ष्णोः कृते ।
संधाने त्रपुरर्धयोः प्रतिबदन्नेवं निषेधेष्यहेः कर्तव्ये प्रिययोत्तरानुसरणोद्युक्तो हरः पातु वः ॥१॥
अथोल्लसत्प्रभुप्राघमानिन्युर्मेघवाहनम् । गान्धारविषयं गत्वा सचिवाधिष्ठिताः प्रजाः ॥२॥
रक्तपद्मस्य भूभर्तुः पश्चाल्लोकानुरञ्जनम् । तस्याज्ञायि जनैर्धीतक्षौमक्षालनसंनिभम् ॥३॥
स पुनर्बोधिसत्त्वानामपि सत्त्वानुकम्पिनाम् । चर्यामुदात्तचरितैरत्यशेत महाशयः ॥४॥
तस्याभिषेक एवाज्ञां धारयन्तोधिकारिणः । सर्वत्रोमारमर्यादापटहानुदघोषयन् ॥५॥
कल्याणिना प्राणिवधे तेन राष्ट्राच्चिवारिते । निष्पापां प्रापिता वृत्तिं स्वकोशास्तौनिकादयः ॥६॥
तस्य राज्ये जिनस्येव मारविद्वेषिणः प्रभोः । क्रतौ घृतपशुः पिष्टपशुर्भूतबलावभूत् ॥७॥
स मेघवननामानमप्रहारं विनिर्ममे । मयुष्टग्रामकृत्पुण्यज्येष्ठं मेघमठं तदा ॥८॥
भोगाय देवर्यभिक्षूणां वल्लभास्यामृतप्रभा । विहारमुच्चैरमृतभवनाख्यमकारयत् ॥९॥
देशैकदेशाल्लोर्नाम्नः प्राप्तस्तस्याः पितुर्गुरुः । स्तुत्यां तद्भाषया प्रोक्तो लोस्तोन्यास्तूपकार्यकृत् ॥१०॥
चक्रे नडवने राज्ञो यूकदेव्यभिधा वधूः । विहारमद्भुताकारं सपत्नीस्पर्धयोद्यता ॥११॥
अर्धे यद्भिक्षवः शिक्षाचारास्तत्रार्पितास्तया । अर्धे गार्हस्थ्यगर्ह्याश्च सस्त्रीपुत्रपशुस्त्रियः ॥१२॥
अथेन्द्रदेवीभवनमिन्द्रदेव्यभिधा व्यधात् । विहारं सेचनःशालं स्तूपं भूपप्रियापरा ॥१३॥
अन्याभिः खादनासम्मानमुखाभिर्निजाख्यया । देवीभिस्तस्य महिता विहारा बहवः कृताः ॥१४॥
अर्वाक्कालोद्भवस्यापि राज्यकालोस्य भूपतेः । न्यकृतादिनृपोदन्तैर्वृत्तान्तैरद्भुतोभवत् ॥१५॥
स बहिर्विहरञ्जातु भूभृद्भीतैरुदीरितम् । चौरश्चौरोयमित्यारादशृणोत्क्रन्दितध्वनिम् ॥१६॥
कः कोत्र बध्यतां चौर इत्युक्ते तेन सक्रुधा । शशामाक्रन्दितध्वानो न च चौरो व्यभाव्यत ॥१७॥
पुनर्द्वित्रैर्दिनैस्तस्य निर्गतस्यामतस्ततः । अभवत्तभयार्थिन्यो दित्रा दिव्यप्रभाः स्त्रियः ॥१८॥
ताः संश्रुतेप्सितास्तेन रुद्धाश्चेन कृपालुना । अभ्यधायन्त सीमन्तपुच्छिताञ्जलयो वचः ॥१९॥
देव दिव्यप्रभावेण भुवने भवता धृते । अपरस्माद्भयं जातु कस्य स्यात्करुणानिधे ॥२०॥
तदानीं तोयदा भूत्वा छादयन्तो नभस्तलम् । अकाण्डकज्जलापातशङ्किभिः कार्षकैर्मृषा ॥२१॥
पक्वशालिवनस्फीतिरक्षाक्षुभितमानसैः । नागास्त्वत्कापसंरम्भभूमिनां गमिताः श्रमो ॥२२॥

---

२. [1]) A_2 gloss इभस्य ५ [1]) A_2 gloss अमार अहिंसा. ८. [1]) A_3 °जवेशो.—[2]) A_3 तथा. ९ [1]) Thus A_3, A_1 चैत्य°. १० [1]) Thus A_1, corr. by later hand into देवदैव°.—[2]) A_2 स्तूपा. ११ [1]) A_2 तूप°. १४. [1]) A_3 gloss नृपत्नीनि. २२. [1]) A °स्फाति°.—[2]) A_2 भूमि ते.

तेस्माकं पतयश्चौरश्चौर इत्यातेभाषितम् । भुक्त्वा देवेन बध्यन्तामित्यवादि यदा क्रुधा ॥२३॥
तदा त्वदाज्ञामात्रेण न्यपतन्पाशवेष्टिताः । प्रसादः क्रियतां तेषामस्मत्करुणयाधुना ॥२४॥ चक्रलकम् ॥
तदाकर्ण्यावदद्राजा प्रसादविशदाननः । सर्वे ते बन्धनान्नागास्त्यज्यन्तामिति सस्मितः ॥२५॥ 25
तया तस्याज्ञया राज्ञो नागा विधुतबन्धनाः । प्रणम्य चरणौ तूर्णं प्रययुः सपरिग्रहाः ॥२६॥
अथ याहयितुं भूपानाज्ञां हिंसानिवृत्तये । स दिग्जयाय निर्व्याजधर्मचर्यो विनिर्ययौ ॥२७॥
अभूदभीतजनतावेक्षणश्लाघ्यविक्रमः । स्पृहणीयो जनस्यापि तदीयविजयोद्यमः ॥२८॥
प्रभावविजितान्कृत्वा सोहिंसादीक्षितान्नृपान् । अर्णसां पत्युरभ्यर्णमवापावर्णवर्जितः ॥२९॥
तत्र तालीवनच्छायासुखविश्रान्तसैनिकः । युक्तिं द्वीपान्तराक्रान्तौ क्षणमन्तर्व्यचिन्तयत् ॥३०॥ 30
अथ वेलावनोपान्तात्तेनार्ताक्रन्दितध्वनिः । मेघवाहनराज्येपि हतोहमिति शुश्रुवे ॥३१॥
तमायःशङ्कुनेवान्तर्व्रणितः स द्रुतं ततः । संचारिणातपत्रेण सत्रा तां वसुधामगात् ॥३२॥
अपश्यदथ केनापि चण्डिकायतनाग्रतः । नरं शबरसेनान्या हन्यमानमधोमुखम् ॥३३॥
अनात्मज्ञ धिगेतत्ते कुकर्मेति महीभुजा । तर्जितः स भयादेवं शबरस्तं व्यजिज्ञपत् ॥३४॥
शिशुर्मुमूर्षुर्मे राजन्नयं रोगार्दितः सुतः । कर्मैतदेवतेरुक्तमस्य श्रेयोलवावहम् ॥३५॥ 35
उपहारनिरोधेन सद्य एवं विपद्यते । बन्धुवर्गमशेषं च विद्धचेतज्जीवजीवितम् ॥३६॥
अरण्यगहनाल्लब्धमनायं देव रक्षसि । बहुलोकाभयं बालं कथमेतमुपेक्षसे ॥३७॥
अथाभ्यधान्मदात्मा स वचोभिः शबरस्य तैः । वध्यस्य दृष्टिपातैश्च विक्लवैर्विवशीकृतः ॥३८॥
किरात कातरो मा भूः स्वयं संरक्ष्यते मया । बहुबन्धुस्तव सुतो वध्योप्ययमबान्धवः ॥३९॥
उपहारीकरोम्येष चण्डिकायै स्वविग्रहम् । मयि प्रहर निःशङ्कं जीवत्वेतज्जनद्वयम् ॥४०॥ 40
तदद्भुतमहासत्त्वचित्तोदात्तत्वविस्मितः । उन्मिषद्रोमहर्षस्तं ततः स शबरोभ्यधात् ॥४१॥
अतिकारुण्यमिषतस्तवायं पृथिवीपते । कश्चिन्मतिविपर्यासप्रकारो हृदि रोहति ॥४२॥
त्रैलोक्यजीवितेनापि यो रक्ष्यो हेलयैव तम् । पृथिवीभोगसुभगं कथं कायमुपेक्षसे ॥४३॥
न मानं न यशो नार्याश्च दाराश्च बान्धवान् । न धर्मं न सुतान्भूपा रक्षन्ति प्राणतृष्णया ॥४४॥
तत्प्रसीद प्रजानाथ मा वध्येस्मिन्कृपां कृथाः । शिशुश्चैष प्रजाश्चैता जीवन्तु त्वयि जीवति ॥४५॥ 45
उपाजिहीर्षुरात्मानं दन्तयोतार्षदम्बरैः । अर्नयच्चिव चामुण्डामथोवाच स पार्थिवः ॥४६॥
सदाचारसुधास्वादे के भवन्तो वनौकसः । जाह्नवीमज्जनमीति न जानन्ति मरुस्थिताः ॥४७॥
क्षुधापायेन कायेन क्रीणतः कीर्तिमव्ययाम् । ममाभीष्टं प्रमार्ष्टुं ते मूढ रूढोयमाग्रहः ॥४८॥
मा बोचः किंचिदपरं प्रहर्तुं चेदृगा तव । न किं निजः कृपाणो मे शक्तः प्रक्रान्तसिद्धये ॥४९॥
इत्युक्त्वा स स्वयं देहमुपहर्तुं समुद्यतः । खण्डनाय स्वमुण्डस्य विकोशं शस्त्रमादधे ॥५०॥ 50
ततः प्रहर्तुकामस्य तस्य शुकुसुमैः शिरः । करश्च दिव्यस्रपुषा रुद्धः केनाप्यजायत ॥५१॥

---

३० [1]) Thus corr. by later hand from A_1 [2]) A . ३३ [1]) A R G here and elsewhere शबर°. ३६ [1]) A_1एष ४८ [1]) Thus corr by later hand from A_1 भीष्टं

अथापश्यत्तथाभूतः कंचिद्दिव्याकृतिं पुरः । न चण्डिकां न तं वध्यं न किरातं न शारकम् ॥५२॥
स तं दिव्यस्तदावादीन्मां त्वं सत्त्ववशीकृतम् । विद्धि मध्यमलोकेन्दो वरुणं करुणानिधे ॥५३॥
यदेतत्त्वामुपास्तेद्य छत्रं तन्मत्पुरात्पुरा । महाबलोहरद्वीपः पुराणश्चशुरस्तव ॥५४॥
रसातलैकतिलकं माहात्म्यवदिदं विना । उपद्रवाः प्राणहराः पौराणां नः पदे पदे ॥५५॥
तदिदं प्रागुकामेन त्वदौदार्यं परीक्षितुम् । कारुण्यमय मायेयं निरमायि मयेदृशी ॥५६॥
त्वदादिर्यो व्यधाज्जन्तून्व्यसून्वमुकुलात्मजः । प्रायश्चित्तमभारेण चरसीव तदेनसः ॥५७॥
भयस्पृहाजनकयोर्धरणीधारणोचिते । शेषदेहे विशोद्वारफणारत्नौघयोरिव ॥५८॥
तमःप्रकाशावहयोस्तेजःक्रान्तदिगन्तरे । उषर्बुधे धूमजालज्वालापल्लवयोरिव ॥५९॥
क्रमाप्यायक्रियाभाजो रुद्धतेजस्विमण्डले । प्रावृट्शरदयोरुच्छन्नेह्नि संतापसारयोरिव ॥६०॥
द्वयोरालोकितं चित्रं जन्मैकस्मिन्महाकुले । तस्य त्रिकोटिहन्तुश्च तवाहिंसस्य च प्रभोः ॥६१॥ चक्रलकम् ॥
नम्रः सम्राडथैवं स वदतो यादसां प्रभोः । चकार पूजां स्तोत्रेण छत्रेण च कृताञ्जलिः ॥६२॥
तं च स प्रतिगृह्णन्तं प्रणयादुष्णवारणम् । जगाद गुणिनामग्र्यो वरुणं धरणीधरः ॥६३॥
कल्पद्रुमाश्च सन्तश्च नार्हन्ति समशीर्षिकाम् । अर्थिनां प्रार्थिताः पूर्वं फलन्त्यन्ये स्वयं यतः ॥६४॥
अत्रालम्बिष्यत छत्रं कथं नः पुण्यपण्यताम् । तत्प्रार्थयिष्यते न चेदार्तोपकृतये भवान् ॥६५॥
वदान्यः संविभाग्येभ्यः पूर्णं कुर्यादनुग्रहम् । छाययाप्याययन्वद्यात्फलान्यपि महीरुहः ॥६६॥
तदेवं विहितोदात्तसंविभागाभिचोदितः । जनोयं भगवन्किंचिद्वरं प्रार्थयते परम् ॥६७॥
वशीकृतेयं पृथिवी कृत्स्ना भवदनुग्रहात् । जेतुं द्वीपान्कथ्यतां तु युक्तिः पाथोधिलङ्घने ॥६८॥
इत्यर्थमानोकथयद्भूमिपालं जलेश्वरः । तितीर्षौ भवति स्तम्भं नीयतेम्भो मयास्तुधेः ॥६९॥
ततो महान्प्रसादोयमित्युक्ते पृथिवीभुजा । तिरोबभूव भगवान्वरुणः सोष्णवारणः ॥७०॥
अन्येद्युर्विस्मयस्मेरैर्बलैः सीमन्तयञ्जलम् । प्रभावस्तम्भितक्षोभं प्रेक्षितार स वारिधिम् ॥७१॥
गुणरत्नाकरः शैलं स रत्नाकरशेखरम् । नानारत्नाकरं सैन्यैरारुरोहाथ रोहणम् ॥७२॥
तत्र तालीतरुवनच्छायाध्यासितसैनिकम् । प्रीत्या लङ्काधिराजस्तमुपतस्थे विभीषणः ॥७३॥
समागमः स शुशुभे नरराक्षसराजयोः । वन्दिनादाभुतान्योन्यंप्रथमालापसंभ्रमः ॥७४॥
अथ रक्षःपतिर्लङ्कां नीत्वालंकरणं क्षितेः । अमर्त्यसुलभाभिस्तं विभूतिभिरुपाचरत् ॥७५॥
यदासीत्पिशिताशा इत्यन्वर्थं नाम रक्षसाम् । तदा तदाज्ञाग्रहणे प्रापि तद्बुद्धिशब्दताम् ॥७६॥
रक्षःशिरःप्रतिच्छन्दैः स्थिरप्रणतिसूचकैः । सनाथशिखरान्प्रादात्तस्मै रक्षःपतिर्ध्वजान् ॥७७॥
पाराद्वारिनिधेः प्राप्ताः कदमीरेष्वधुनापि ये । राज्ञां यावासु निर्यान्ति ख्याताः पारध्वजाः पुरः ॥७८॥
इत्यमाराक्षसकुलं प्राणिहिंसां निषिध्य सः । स्वमण्डलं प्रति कृती न्यवर्तत नराधिपः ॥७९॥

---

५७ [1]) The *akṣharas* न्वसून्वमुकु and मारेण चरसीव तवेनस supplied by A_4 in spaces left by A_1 ५८ [1]) भवस्पृहाजन supplied by A_3, as above ६५. [1]) त supplied by A_3. ६६. [1]) Emended, A R G वदन्य.—[2]) A_1 gloss अर्थिभ्य.—[3]) Thus corr. by A_3 from A_1 दध्यात्. ६७. [1]) Thus corr. by A_3 from A_1 तदयं ७१. [1]) Thus A_1, A_2 जले. ७५. [1]) त्वा supplied by A_3.—[2]) न्योन्य supplied by A_3 in space left by A_1. ७७. [1]) A_1 gloss प्रतिमापि

ततः प्रभृति तस्याज्ञा सार्वभौमस्य भूपतेः । हिंसाविरतिरूपा सा न कैश्चिदुदलङ्घत ॥८०॥ 80
क्षुद्रैरुग्रादिभिर्नाप्तु सिंहाद्यैर्गहने न च । न श्येनप्रमुखैर्व्योम्नि तद्राज्ये जन्तवो हताः ॥८१॥
अतिक्रामति कालेथ कोपि शोकाकुलो द्विजः । पुत्रं गर्दातमादाय द्वारि चक्रन्द भूपतेः ॥८२॥
दुर्गया प्रार्थितं राजन्पश्वाहारं विनैष मे । अनन्यसंततेः सूनुर्जरैणाथ विपद्यते ॥८३॥
यद्यहिंसाग्रहेणेमं क्षितिपाल न रक्षसि । एतद्विपत्तौ तत्कोन्यो निमित्तं प्रतिभाति मे ॥८४॥
निर्णयो वर्णगुरुणा स्वयैवैष प्रदीयताम् । ब्राह्मणस्य पशोर्वा स्यात्प्राणानां कियदन्तरम् ॥८५॥ 85
तपःस्थानपि ये जघ्नुर्ब्राह्मणप्राणलब्धये । हा मातस्तेधुना भूमे प्रजापालास्तिरोहिताः ॥८६॥
इति ब्रुवति साक्षेपं शोकरूक्षाक्षरं द्विजे । आपन्नार्तिहरो राजा चिरमेवं व्यचिन्तयत् ॥८७॥
न वध्याः प्राणिन इति प्राङ्मया समयः कृतः । विशार्थमपि किं कुर्यां स पतिज्ञातविप्लवम् ॥८८॥
निमित्तीकृत्य मामत्र विपद्येत द्विजो यदि । तत्राप्यत्यन्तपापीयानर्थः संकल्पविप्लवः ॥८९॥
नैति मे संशयभ्रान्तमेकपक्षावलम्बनम् । संमेदावर्तपतितं प्रस्खलनमिव मानसम् ॥ ९०॥ 90
तत्स्वदेहोपहारेण दुर्गां तोषयता मया । प्रतिज्ञया समं न्याय्यं रक्षितुं जीवितं द्वयोः ॥९१॥
इति संचिन्त्य सुचिरं देहदानोद्यतो नृपः । श्वः प्रियं तव कर्तास्मीत्युक्त्वा विप्रं व्यसर्जयत् ॥९२॥
क्षपायां क्षमापतिमथ स्वमुपाहर्तुमुद्यतम् । निषिध्य दुर्गा व्यधित प्रकृतिस्थं द्विजन्मजम् ॥९३॥
हत्याद्यायतनस्यापि चरितं तस्य भूपतेः । पृथग्जनेष्वसंभाव्यं वर्णयन्तस्त्वपामहे ॥९४॥
अथवा रचनानिर्विशेषमार्षेण वर्त्मना । प्रस्थिता नानुरुन्धन्ति श्रोतृचित्तानुवर्तनम् ॥९५॥ 95
तस्मिन्नस्तंगते भुक्ता क्ष्मां चतुस्त्रिंशतं समाः । अनादिरियमाजोषं निरालोकमभूज्जगत् ॥९६॥
अथ क्षमाभृद्रक्ष क्षमां श्रेष्ठसेनस्तदात्मजः । आहुः प्रवरसेनं यं तुङ्गीनं चाऽऽसा जनाः ॥९७॥
दोःस्तम्भसंभृतामक्तो कृपाणमणिदर्पणे । संक्रान्तेवोन्मुखी यस्य भुवनश्रीर्व्यभाव्यत ॥९८॥
समातृचक्रं निर्माय यः पूर्वं प्रवरेश्वरम् । पुण्याः पुराणाधिष्ठाने प्रतिष्ठा विविधा व्यधात् ॥९९॥
गृहाद्भ्रमनिव क्षोणीं गणयन्वशवर्तिनीम् । विगर्तोर्वी ग्रामसंघे प्रवरज्ञाय यो ददौ ॥१००॥ 100
ईशो नृपाणां निःशेषक्ष्माक्षेत्रारकुटुम्बिनाम् । स ममास्त्विशनं भूभृदनिस्त्रिंशाशयोभवत् ॥१०१॥
हिरण्यतोरमाणाख्यौ व्यधत्तामथ तत्सुतौ । साम्राज्ययुवराजत्वभाजने रज्झनं क्षितेः ॥१०२॥
बलाहतानां प्राचुर्ये विनिवार्यासमञ्जसम् । तोरमाणेन दीव्यारः स्वाहताः सप्रवार्तनाः ॥१०३॥
मामवज्ञाय राज्ञेव कस्मादेतेन वल्गितम् । इति तं पूर्वजो राजा क्रोधनो बन्धने व्यधात् ॥१०४॥
चिरंस्थितित्यक्तशुचस्तत्र तस्याञ्जनाभिधा । ऐक्ष्वाकस्यात्मजा राज्ञी वज्रेन्द्रस्यास्त पुंवेणी ॥१०५॥ 105
आसन्नप्रसवा भर्त्रा सा त्रपार्तेन बोधिना । सुतं प्रविष्टा प्रासोष्ट कुलालनिलये क्वचित् ॥१०६॥
स कुम्भकारगेहिन्या काक्येव पिकशावकः । पुत्रीकृतो राजपुत्रः पर्याप्तं पर्यवर्धत ॥१०७॥

८०—८१ [1]—[1]) These two verses have been supplied in margin by A_3. 83 [1]) A, राजन्नुपहार ८८. [1]) A_3 प्राग्यो-स्मि समकल्पयम्. ९५. [1]) This verse is supplied by A_3 in margin.—[2]) A, gloss जना १००. [1]) Thus A_3, A_1 "सप्तये १०३ [1]) Thus A; G R Edd बाला°.—[4]) A_3 gloss सुवर्णमया रजतताम्रमयाश्च —[5]) A_3 gloss स्वाहता स्वनामाक्षरमुद्राकृतेन आहता सप्रवार्तना व्यवहारविषया कृता १०४. [1]) A, gloss तोरमाणेन. १०६ [1]) A_3 gloss त्रपार्तेन सलज्जेन

जनयित्र्याः कुलाल्याश्च रक्षित्र्या विदितोभवत् । रत्नसूतेर्भुजंग्याश्च प्रच्छन्न इव शेवधिः ॥१०८॥
गोत्रः प्रवरसेनस्य गिरा मातुर्नृपात्मजः । पैतामहेन नाम्नैव कुलाल्या ख्यापितोभवत् ॥१०९॥
वर्धमानः स संपर्के न सेहे सहवासिनाम् । तेजस्विमैत्रीरसिकः शिशुः पद्म इवाम्भसाम् ॥११०॥
न कुलीनैश्च शूरैश्च विद्याविद्भिश्च दारकैः । अन्वीतमेव ददृशुः क्रीडन्तं विस्मयाज्जनाः ॥१११॥
स्ववृन्दस्यात्युदारौजा राजा चक्रे स दारकैः । मृगेन्द्रशावः क्रीडद्भिर्वने बालमृगैरिव ॥११२॥
सचिवैर्जेतुजमाह वशीचक्रे च सोर्भकान् । अराजोचितमाचारं नैव कंचिदसेवत ॥११३॥
भाण्डादि कर्तुं मृत्पिण्डं कुम्भकारैः समर्पितम् । स्वीकृत्य चक्रिरे तेन शिवलिङ्गपरंपराः ॥११४॥
तथा साध्वर्थचर्यः स क्रीडञ्ज्ञातु व्यलोकयत । मातुलेन जयेन्द्रेण सादरं चाभ्यनन्दत ॥११५॥
आवेद्यमानं शिशुभिस्तं जयेन्द्रोयमित्यसौ । भूपालवत्सावहेलं पश्यन्नभ्यमहीदिव ॥११६॥
सभाद्य सत्त्वावष्टम्भात्तभसामान्यवंशजम् । सादृश्याद्भगिनीभर्तुर्भागिनेयमशङ्कत ॥११७॥
सत्वरस्तत्त्वज्ञासारसेनानुससार तम् । प्राप्तस्तद्दृहमौत्सुक्यात्स्वसारं च व्यलोकयत् ॥११८॥
सा स चान्योन्यमुन्मन्यू पश्यन्ती भ्रातरौ चिरात् । निःश्वासद्विगुणोष्माणि मुहुरश्रूण्यमुञ्चताम् ॥११९॥
कुलाल्या दारको मातः कावेताविति पृष्टवान् । अकथ्यतेत्यं वत्सैषा मातार्य मातुलश्च ते ॥१२०॥
पितुर्बन्धेन सक्रोधं तं कालापेक्षयाक्षमम् । शिक्षयित्वा जयेन्द्रोथ कार्यदेशाय निर्ययौ ॥१२१॥
उत्पिञ्ज्रोत्पादनासज्जे तस्मिन्भ्रात्रा यदृच्छया । बन्धात्यक्तो नृतरणिस्नोरमाणोस्तमाययौ ॥१२२॥
निःशार्य मरणोद्योगं मातुर्निर्वेदखेदितः । ययौ प्रवरसेनोथ तीर्थैस्तुक्याद्विगन्तरम् ॥१२३॥
रक्षित्वा दशमासोनाः क्ष्मामेकत्रिंशतं समाः । तस्मिन्क्षणे हिरण्योपि शान्तिं निःसंततिर्ययौ ॥१२४॥
तत्रानेहस्युज्जयिन्यां श्रीमान्हर्षापराभिधः । एकच्छत्रधरक्रवर्ती विक्रमादित्य इत्यभूत् ॥१२५॥
भूपमद्भुतसौभाग्यं श्रीर्बद्धरभसाभजत् । विहाय हरिबाहुंश्च चतुरः सागरांश्च यम् ॥१२६॥
लक्ष्मीं कृत्वोपकरणं गुणे येन प्रवर्धिते । श्रीमत्सु गुणिनोथापि तिष्ठन्त्युद्धुरकन्धराः ॥१२७॥
म्लेच्छोच्छेदाय वसुधां हरेरंशतरिष्यतः । शकान्विनाश्य येनादौ कार्यभारो लघूकृतः ॥१२८॥
नानादिगन्तराख्यातं गुणवस्तुलभं नृपम् । तं कवितीर्तृगुह्याख्यः सर्वास्थानस्थमासदत् ॥१२९॥
स गम्भीरस्य भूभर्तुरनुभावं महाद्भुतम् । विविधास्थानसवृद्धस्तस्याभ्यूह्य व्यचिन्तयत् ॥१३०॥
सोयमासादितः पुण्यैः क्षोणिपालो गुणप्रियः । परभागोपलम्भाय पूर्वैरुष्य महीभुजः ॥१३१॥
यस्मिन्नाजनि तत्त्वज्ञैः सूरिभिः संभृतश्रुतैः । नाऽऽलिर्दयिते जातु मानाय च गुणाय च ॥१३२॥
भद्रचामुष्मिन्विदधती स्वाभिप्रायप्रकाशनम् । वैदग्ध्यवन्ध्यतां नैति बुद्धिः कुलवधूरिव ॥१३३॥
खिलीकृतखलालापे युक्तायुक्तविवेकरि । नायाति सेव्यमानेस्मिन्स्वगुणोनर्घकारिताम् ॥१३४॥
अनाप्तबद्धिः सावद्यदुर्विद्यसमशीर्षिकाम् । जीवन्मरणमस्यामे गुणिभिर्नानुभूयते ॥१३५॥

---

१०८ ') A_2 gloss भूमे ११२ ') A_2 gloss अतिशयेन उदार ओज यस्य ११३. ') Thus corr by later hand from A किंचिद् ११६ ') A_1 gloss प्रवरसेन, १२२ ') Thus A_1 A_2 has given a *varia lectio* in margin of which only उत्पिञ्ज्रोद्भास is legible (उत्पिञ्ज्रोद्भासनासज्जे ?) A_1 उत्पिञ्ज्रोत्पादने सज्जे, with gloss द्वन्द्वयुद्धस्य कालाहले सज्जे सति १२७. ') G Edd. गुणो येन प्रवर्धते १२८. ') A_2 gloss ककिनाम १२९ ') G *sec manu* and Edd सभास्थां १३२ ') A_2 अस्मिन्ना°

संभावनानुसारेण प्रवृत्तोस्माद्विवेकिनः । शोच्यते नाज्ञितोच्छ्वासं प्रीतिदायो महाशयैः ॥१३६॥
गृह्णन्यथागुणं स्वान्तमुचितप्रतिपत्तिभिः । अन्तरज्ञः समस्तानामयमुत्साहवर्धनः ॥१३७॥
सेवया दृष्टकष्टस्य दाक्षिण्योत्पादने श्रमः । अस्य यो न स भृत्यानां हिमाद्रौ हिमविक्रयः ॥१३८॥
मिथ्याख्यातगुणो नाम्नो नामात्यः कलहप्रियः । असत्यसंधः स्येयो वा नास्थानेस्य महीपतेः ॥१३९॥
अश्लीलालापिनोन्योन्यं नर्मोक्त्या मर्मभेदिनः । अन्यप्रवेशासहनाः संहता नास्य सेवकाः ॥१४०॥ 140
छन्दानुवर्तिनामेष निजविज्ञानवन्दिनाम् । सर्वज्ञमन्यतान्धानां मुखप्रेक्षी न पार्थिवः ॥१४१॥
अनेन सह संजातः संलापो विपुलोदयः । लभ्यते नान्तराच्छेत्तुं दुर्जातैर्जातु दुर्जनैः ॥१४२॥
सर्वदोषोज्झितं सेव्यं नृपमेवमिमं मम । समासादयतः पुण्यैरदूरे स्वार्थसिद्धयः ॥१४३॥
गम्भीरश्च गुणज्ञश्च स्थिरबुद्धिश्च पार्थिवः । एष क्लेशभयं त्यक्त्वा निषेव्यः प्रतिभाति मे ॥१४४॥
न चास्माद्धनमादाय रञ्जितादन्यराजवत् । भ्राम्यतो भूतलेमुष्मिन्सेव्योन्यः प्रतिभाति मे ॥१४५॥ 145
इति संचिन्त्य सुहृदं स नवामिव तां सभाम् । नारदञ्जयञ्च चास्ते स्म गुणिगोष्ठीषु मध्यगः ॥१४६॥
मृदुपूर्वं गुणानेवं दर्शयन्तं विशांपतिः । विशिष्टयोग्यतालाभ्यै विवेदाराधनोन्मुखम् ॥१४७॥
अचिन्तयच्च नायं स्याद्गुणिमात्रं महाशयः । उदात्तं सत्क्रियार्हत्वं वदत्यस्य गभीरता ॥१४८॥
इति सचिन्त्य राज्ञापि ज्ञातुं तस्यान्तरं मतेः । नाक्रियन्त परीक्षार्थं यथावल्लाभसत्क्रियाः ॥१४९॥
स तेनानुपचारेण तमुदात्ताशयं नृपम् । स्वीकर्तारं विदन्धीमान्सिषेवे प्रीतिभाजितः ॥१५०॥ 150
क्रमोपचीयमानेन सेवाभ्यासेन धीमतः । तस्य नेङ्गेमगमस्त्रकाय इव पार्थिवः ॥१५१॥
नातीव स्वल्पया स्थित्या नातीवाप्यथ दीर्घया । शरन्निशाक्षणेनेव राज्ञो निन्ये प्रसन्नताम् ॥१५२॥
नर्मभिर्गर्भचेष्टानां ह्रीःस्थानां विक्रियाक्रमैः । मिथ्यास्तवैर्विटानां च न स क्षोभमनीयत ॥१५३॥
प्रसन्नालापसंपात्री छायामह इवाचलः । प्रतिस्पर्धीव च क्रुध्यन्नाज्ञायामभृत्यभोः ॥१५४॥
वीक्षणं राजदासीनां राजदृष्टैः सहासनम् । राज्ञाये च कथां नीचैः कालविज्ञाचचार सः ॥१५५॥ 155
स्वभावाद्राजपुरुषैः सजनैं राजनिन्दकैः । नास्मार्त्प्रभोरुपालम्भो लेभे पैशुन्यजीविभिः ॥१५६॥
वदद्भिरादरात्स्थैर्यं वैफल्याद्यन्वहं प्रभोः । निन्ये नोत्साहदौर्थित्यं सेवोत्साहासहिष्णुभिः ॥१५७॥
अन्यात्कर्षानपि वदन्यत्नेन निरायहः । स्ववित्तायोनकः सोभूत्सभ्यानां हृदयंगमः ॥१५८॥
एवं स सेवमानस्तमुद्योगेन बलीयसा । अनिर्विण्णो मातृगुप्तः षड्तूनत्यवाहयत् ॥१५९॥
अथ तं कृशसर्वाङ्गं धूमरं जीर्णवाससम् । बर्हिर्जातु विनिर्यातो राजा वीक्ष्य व्यचिन्तयत् ॥१६०॥ 160
वैदेशिको निःशरणो गुणवान्बान्धवोज्झितः । दार्ढ्यं जिज्ञासुना कष्टं सोयमायासितो मया ॥१६१॥
कोस्याभयः किमशनं कानि प्रावरणानि वा । इत्यैश्वर्यविमूढेन मया हन्त न चिन्तितम् ॥१६२॥
वसन्तेनेव न मया शोभयाप्यापि योजितः । शीतवातातपैः शुष्यन्सोयं पुरुषपादपः ॥१६३॥

---

१३६ [1]) संभावनानुसा supplied by A_3 in space left by A_1 १३७. [1]) A_1 gloss प्रतिपत्ति सत्कार सत्क्रिया पूजन मानमिति यावत्. १३९ [1]) Thus corr by A_3 from A_1 भाम्यते १४६. [1]) Thus corr by A_3 from A_1 नारज्ञत्र [2]) A_1 gloss राजा चन्द्रापि —[3]) A_1 gloss मातृगुप्तेन. १५५ [1]) A_1 gloss राज्ञश्चर्षि. १५६ [1]) A_1 gloss मातृगुप्तान १५९ [1]) Thus corr by A_3 from A_1 अनिर्विण्ण.

अस्य स्थानस्य मैवज्यं निर्विण्णस्य विनोदनम् । भ्रान्तस्य वा क्रमच्छेदं को विदध्यादसंपदः ॥१६४॥
165 नास्मै चिन्तामणिं दध्यां नामृतं वा निषेवितः । मया यदयमेतावद्व्यामूढेन परीक्ष्यते ॥१६५॥
तदमुष्य गुणित्वस्य तीव्रसेवाश्रमस्य च । प्रतिपत्त्यां कृतमया तावदानृण्यमाप्नुयाम् ॥१६६॥
इति चिन्तयतस्तस्य राज्ञस्तं सेवकं प्रति । स्वप्नसादोचिता कांचित्स्वयमाविरभांत्रैव सत्क्रिया ॥१६७॥
ततः प्रावर्तत स्फारनीहारशबलत्वबाहिभिः । दहन्निवाङ्गं प्रालेयपवमानैर्हिमागमः ॥१६८॥
ससंभ्रान्तमिवत्रस्तैस्तीव्रशीतवशीकृताः । आशाश्चक्राशिरे नीलनिचोलाच्छादिता इव ॥१६९॥
170 शीतार्त्या द्रुमणावैर्वेदहनोष्माभिलाषतः । द्रुतं यातीव जलधिं दिनानि लघुतां ययुः ॥१७०॥
अथ दीपोज्ज्वले धाम्नि लसद्दीप्रहसन्तिकें । कदाचिन्नृपतिर्देवादर्धरात्रे व्यबुध्यत ॥१७१॥
स हेमन्तानिलैर्भूरिभांकारपरुषैः पुरः । दीपान्यकम्पितानीषत्समविष्टैर्धीसि दृष्टवान् ॥१७२॥
तानुज्ज्वलयितुं भृत्यानन्विष्यन्नभ्यधात्ततः । यामिकेषु बहिः सज्जः को वर्तत इति स्फुटम् ॥१७३॥
सुखसुप्तेषु सर्वेषु बाह्यकक्ष्यान्तरास्ततः । राजन्नयमहं मातृगुप्त इत्यभृणोद्वचः ॥१७४॥
175 प्रविशेति स्वयं राज्ञा दत्तानुज्ञस्ततो गृहम् । लक्ष्मीसांनिध्यरम्यं तदपृष्टोन्वैर्विवेश सः ॥१७५॥
दीपानुज्ज्वलयेत्युक्तो निष्पाद्य चतुरैः पदैः । बहिर्ययाद्वरूचेयं क्षणं तिष्ठेति भूभुजा ॥१७६॥
स भयद्विगुणीभूतशीतकम्पः प्रभोः पुरः । किं स्विदुक्तीति विमृषन्नातिदूरेभ्युपाविशत् ॥१७७॥
अथ पप्रच्छ भूपालः कियत्यस्ति निशेति तम् । सोभ्यधादहेव यामिन्या यामः सार्धोवशिष्यते ॥१७८॥
ततो भूभृदुवाचैनं कथं सम्यङ्निशाक्षणः । त्वयावधारितो निद्रा कथं नाभूच्च ते निशि ॥१७९॥
180 अथ कृत्वा क्षणाच्छ्लोकमेतं तं स व्यजिज्ञपत् । अवस्थावेदनादाशां दैन्यं वा त्यक्तुमुद्यतः ॥१८०॥
शीतेनोद्वृषितस्य मापशिमिवच्चिन्तार्णवे मज्जतः शान्ताग्निं स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा काप्यवमानितेव दयिता संत्यज्य दूरं गता सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥१८१॥
तदाकर्ण्य महीपालः साधुवादैः परिभ्रमम् । अभिनन्द्य कवीन्द्रं तं पूर्वस्थानं व्यसर्जयत् ॥१८२॥
अचिन्तयच्च धिङ्मां यः सगुणास्त्रिखलचेतसः । दुःखोत्तप्तं वचः भृण्वन्नेवमेवाधुना स्थितः ॥१८३॥
निरर्थकान्साधुवादानन्यस्येव विदन्मम । भयमज्ञातहृदयो दुःखमास्ते ध्रुवं बहिः ॥१८४॥
185 चिरं चिन्तयतो यस्मात्सदृशीमस्य सत्क्रियाम् । देयं महाहमप्यापि न किंचित्प्रतिभाति मे ॥१८५॥
अथ वास्यैव सूक्तेन स्मारितोस्म्यधुना यथा । वर्तते राजरहितं काम्यं करभारमण्डलम् ॥१८६॥
पात्रायास्मै मही तस्मात्सा मया प्रतिपाद्यते । अवधार्य महीपालान्महनोप्यर्थनापरान् ॥१८७॥
इति निश्चित्य चतुरं क्षपायामेव पार्थिवः । गूढं व्यसर्जयद्वृतान्काश्मीरीः प्रकृतीः प्रति ॥१८८॥
आदिदेश च तान्यो वो दर्शयेच्छासनं मम । मातृगुप्ताभिधो राज्ये निःशङ्कं सोभिषिच्यताम् ॥१८९॥
190 अथ दूतेषु यातेषु लेखयित्वा स्वशासनम् । क्ष्मापतिस्तं क्षपाशेषं कृतकृत्योत्यवाहयत् ॥१९०॥

---

१६५ [1]) A_3 gloss अनेन हेतुर्यं. १६६ [2]) A_3 gloss सत्क्रियया १६७ [3]) A_3 gloss चित्तविषय न गता हत्वर्थं. १७१ [4]) A_3 gloss हसन्तिका मन्नामेका १७३ [5]) A_3 gloss रात्रिजागरेषु पुरुषेषु १७५. [6]) A, तत्रवृत्तो १७६. [7]) Thus corr by A_3 from A, °रूचे च १८० [8]) A, gloss अवस्थाया आवेदन तस्मात् १८६ [9]) A, gloss सत्पात्रेभ्यार्पणा. १८८ [10]) A, gloss सचिवान् प्रति

मातृगुप्तस्तु नृपतेः संलापमपि निष्फलम् । ध्यायन्गृहीतनैराश्यस्त्यक्तभार इवाभवत् ॥१९१॥
अन्तर्देश्यौ च कर्तव्यं कृतं शान्तोऽथ संशयः । आशापिशाचिकास्त्यक्तश्चरिष्याम्यधुना सुखम् ॥१९२॥
गतानुगतिकत्वेन लोकयात्रासिन्मम भ्रमः । जनप्रवादास्तेऽप्यत्वं येनास्य ज्ञातवानहम् ॥१९३॥
भुक्त्वामाः पवनं सरीसृपगणाः प्रख्यापिता भोगिनो गायद्भृङ्गनिवारका निगदिता विस्तीर्णकर्णा गजाः ।
यश्चाभ्यन्तरसंभृतोष्मविकृतिः प्रोक्तः शमी स द्रुमो लोकेनेति निरर्गलं प्रलपता सर्वं विपर्यासितम् ॥१९४॥
अथ वा विद्यतेमुष्य न काप्यनभिगम्यता । लक्ष्मीप्रणयिनो येन कृताः प्रणयिनां गृहाः ॥१९५॥ 195
त्यागिनो निष्फलङ्कस्य को दोषोस्य महीपतेः । ममापुण्यं तु तन्निन्द्यं यच्छेदः प्रतिबन्धकम् ॥१९६॥
रत्नोज्ज्वलाः प्रविकिरंल्लहरीः समीरैरधिः क्षिपेत यदि रुद्धतटाभिमुख्यः ।
दोषोर्णिनः स खलु भाग्यविपर्ययाणां दातुर्मनागपि न तस्य तु दातृतायाः ॥१९७॥
उत्तानफलनुन्नानां वरं राजोपजीविनः । न तु तस्त्वामिनंस्तीव्रपरिक्लेशैः फलन्ति ये ॥१९८॥
निष्टन्ति ये पशुपतेः किल पादमूले संप्राप्यते झटिति तैर्नहि भस्मनोन्वत् ।
ये तृक्षमस्य तु समुज्ज्वलजातरूपप्राप्त्या न कानि सुदिनानि सदैव तेषाम् ॥१९९॥
चिन्तयन्नपि पश्यामि न कंचिद्दोषमात्मनः । यातो विरक्तिं यं ज्ञात्वा सेव्यमानोप्ययं नृपः ॥२००॥ 200
अथ वानादृतोन्येन संप्राप्तोन्तिकमायुषः । कः फलेनाभिसंबन्धं गतानुगतिकात्मभोः ॥२०१॥
अन्तर्ये सततं लुठन्त्यगणितास्तानेव पार्थोधरैरात्तानापततस्तरङ्गवलयैरालिङ्ग्य गृह्णसौ ।
व्यक्तं मौक्तिकरत्नानां जलकणान्संप्राप्तयत्यम्बुधिः प्रायोन्येन कृतादरो लघुरपि प्राप्तोर्चयते स्वामिभिः ॥२०२॥
इदं संचिन्तयन्सोभूत्सेतेष्ये तस्मिन्निरादरः । खिन्नस्य हि विपर्येति तत्त्वज्ञस्यापि शेमुषी ॥२०३॥
प्रभातायां विभावर्यामथास्थानस्थितो नृपः । आकार्यतां मातृगुप्त इति क्षत्तारमादिशत् ॥२०४॥
ततः प्रधावितानेकपतीहारप्रवेशितः । प्रविवेश महीभर्तुस्त्यक्ताश इव सोन्तिकम् ॥२०५॥ 205
तस्मै कृतप्रणामाय मुहूर्तादेव पार्थिवः । भ्रूसंज्ञितेन व्यतरल्लेखं लेखाधिकारिणा ॥२०६॥
स्वयं च तमुवाचाङ्क कृत्रिमारान्वेषि किं भवान् । गत्वा तत्राधिकारिभ्य एतच्छासनमर्प्यताम् ॥२०७॥
स शापितोस्मद्देहेन यो लेखं वाचयेत्पथि । संविदेषा प्रयत्नेन विस्मर्तव्या न जातु चित् ॥२०८॥
अविज्ञाताशयो राज्ञस्तामाज्ञां क्लेशशङ्कितः । सोवुद्ध दहनज्वालां न तु रत्नाङ्कुरद्युतिम् ॥२०९॥
यथादेशस्तथेत्युक्त्वा मातृगुप्ते विनिर्गते । निर्गर्वैः पूर्ववद्राजा तस्थावाप्तैः सहात्मपत् ॥२१०॥ 210
अथाङ्कशोचितं क्षाममपाथेयमबान्धवम् । दृष्ट्वा यान्तं मातृगुप्तं निनिन्देति नृपं जनः ॥२११॥
अहो नरेश्वरस्येयं यत्किंचनविधायिता । पृथग्जनोचिते कर्मण्यर्हतो निदधाति यः ॥२१२॥
दुराशया धृतक्लेशं सेवमानमहर्निशम् । ध्रुवं क्लेशार्हमेवैनं ज्ञातवानबुधो नृपः ॥२१३॥
उपायं यं पुरस्कृत्य सेवते सेवकः प्रभुम् । अनन्तरज्ञस्तत्रैव योग्यं तं किल मन्यते ॥२१४॥

१९७ [1]) A, °पर्ययेण. १९८. [1]) A, glosses राजोपजीविन पुरुषा. तस्त्वामिन तेषां स्वामिन कर्तार न वर. २०२ [1]) Thus corr. by later hand from A, लुठन्ति म°.—[2]) Thus A_2; A, °र्ध्वते. २०४ [1]) A, gloss ज्ञास्यं. २०८ [1]) A, gloss विस्मा. २११ [1]) Thus corr. by later hand from A, अथ क्षे° २१२ [1]) A, gloss पूज्यान्. २१४ [1]) Doubtful emendation; on account of an ink blot only the following is legible in the handwriting of A, उपाव---हृत्य. A, reads उपावनं पुरस्कृत्य, this reading is found also in R. G and Edd read उपाय त.

सुखार्थी नागरिप्रतिभयशमात्पन्नुत सुखं जहौ शेषस्तल्पीकृततनु निषेद्युषारुरिपुम् ।
यतस्तेनाभ्मिन्नधिगतवता क्लेशसहतां श्रमादाधि न्यस्तं निरवधि धराभारवहनम् ॥२१५॥
अथमेतद्गृहीतेषु गुणवत्सु गुणाधिकम् । आत्मानं गुणवान्पश्यन्नास्थयैनमशिश्रियत् ॥२१६॥
अनन्तरजः कोन्योस्माद्गुणान्दर्शयतेधिकान् । अस्मै गुणवते पूजां यश्चकार किलेदृशीम् ॥२१७॥
यो नानोद्युतिमत्पदार्थरसिकोसाम्येपि शक्रायुधे सप्रेमा स विलोक्य वर्हमिह मे किं किं न कुर्यात्प्रियम् ।
इत्याविष्कृतवर्हराजि नटते यो वर्हिणोम्भोलवाज्ञान्यन्मुञ्चति तं विहाय जलदं कोन्योस्ति शून्याशयः ॥२१८॥
गच्छतो मातृगुप्तस्य निर्दैन्यस्यैव वर्त्मसु । नाभूद्व्याप्यर्थमाहात्म्याद्विकल्पः कोपि चेतसि ॥२१९॥
अहंपूर्विकयोद्यद्भिर्निमित्तैः शुभशंसिभिः । स वितीर्णकरालम्भ इव न भ्रममाददे ॥२२०॥
अपश्यत्स फणाकोटौ खञ्जरीटमहेः पथि । स्वप्ने प्रासादमारुह्य स्वं चोल्लङ्घितसागरम् ॥२२१॥
अचिन्तयच्च शास्त्रज्ञो निमित्तैः शुभशंसिभिः । एतैर्भूमर्तुरादेशो ध्रुवं मे स्याच्छुभावहः ॥२२२॥
फलं मम तनीयोपि कदमीरेषु भवेद्यदि । अनर्घदेशमाहात्म्यात्किं किं नातिशयेत तत् ॥२२३॥
अकृच्छ्रलङ्घ्योः पन्थानो बह्वभ्यर्हितथयो गृहाः । उपानमन्गच्छतोस्य सत्क्रियाश्च पदे पदे ॥२२४॥
इत्थं विलङ्घिताध्वा स लोलानोकहशाद्वलम् । मङ्क्षल्यदधिपात्राभं ददर्शाग्रे हिमाचलम् ॥२२५॥
मरुत्स्यन्दसुभग-गङ्गाशीकरवाहिनः । प्रत्युद्ययुस्तं मरुतः पाल्यायाः संस्तुता भुवः ॥२२६॥
कमवर्नाभिधाने स प्रदेशे प्राप्तवांस्ततः । ढक्कं काम्बुवनामानं योद्य पूरपुरे स्थितः ॥२२७॥
नानाजनपदाकीर्णे स्थाने तत्राथ शुश्रुवान् । काश्मीरिकान्महामात्यान्स्थितान्केनापि हेतुना ॥२२८॥
ततोपनीतपाम्वेषः प्रावृतो धवलांशुकैः । स जगामान्तिकं तेषां दातुं नृपतिशासनम् ॥२२९॥
त प्रयान्तं समुद्यद्भिः शकुनैः सूचितोदयम् । पान्थाः केप्यन्वयुर्द्रष्टुं निमित्तानां फलोद्गमम् ॥२३०॥
श्रुत्वाथ विक्रमादित्यदूतः प्राप्त इति द्रुतम् । द्वारस्थाः काश्मीरमन्त्रिभ्यस्तमासन्नं न्यवेदयन् ॥२३१॥
आगच्छत प्रविशतेत्युच्यमानोथ सर्वतः । स तान्समस्तसामन्तानासमादानिवारितः ॥२३२॥
यथाप्रधान सचिवैर्वेदितोचितसत्क्रियः । ततः परार्ध्यमध्यास्त तत्रिदशीतमासनम् ॥२३३॥
कृताहूतैरथामात्यैराज्ञां पृष्टो महीभृजः । शनैस्तच्छासनं तेभ्यो लज्जमान इवार्पयत् ॥२३४॥
तेभिवन्द्य प्रभोर्लेख्यमुपांशु मिलितास्ततः । उन्मुच्य वाचयित्वैतमवोचन्विनयान्विताः ॥२३५॥
मातृगुप्त इति श्राव्यं भवतामेव नाम किम् । एवमेवैनदित्यूचे सोपि तान्विहितस्मितः ॥२३६॥
कः कोत्र संनिधातृणामित्यभूयत वाक्ततः । राज्याभिषेकसंभारो दृश्यते स्म च संभृतः ॥२३७॥
ततः कलकलोत्तालभूरिलोकसमाकुलः । प्रदेशः क्षणमात्रेण सोभूत्क्षुभ्यन्निवार्णवः ॥२३८॥
अथ प्रादुरभूत्सौवर्णभद्रपीठप्रतिष्ठितः । सन्निपत्य प्रकृतिभिर्मातृगुप्तोभ्यषिच्यत ॥२३९॥
तस्य त्रिस्यतटव्युदबक्षसः परिनर्तुत् । सशब्दमभिषेकाम्बु रेवास्रोतं इवाबभौ ॥२४०॥
अथ स्नातानुलिप्ताङ्गं सर्वाङ्गामुक्तभूषणम् । व्यजिज्ञपंस्तं राजानं क्रान्तराजासनं प्रजाः ॥२४१॥

---

२१७ [1]) A, gloss मुख्यपुरुष २१८ [1]) A, विलोक्य जलदमित्यन्वादर्शे २२५ [1]) Thus A_1, corr by A_1 into °नौकह", as also in G R २२६ [1]) A, gloss पाल्यायाः इति प्रभुनिवेशना तेनेदमर्थ्यं २३५ [1]) A, gloss परैनं भूयत यत्तत्पुरायु पारिकांसिनम A_3 adds मन्त्रकरणे २४० [1]) Thus A_3, A_1 खेद. corr by later hand into °स्रव

अर्थितेन स्वयं त्रातुं विक्रमादित्यभूभुजा । निर्दिष्टः स्वसमानस्त्वं शाधि नः पृथिवीमिमाम् ॥२४२॥
मण्डलानि विलम्भ्यन्ते येनानेन प्रतिक्षणम् । मा मंस्था मण्डलं राजन्विलम्बं तदिदं परैः ॥२४३॥
कर्मभिः स्वैरचाप्रस्य जन्मनः पितरौ यथा । राज्ञां तथान्ये राज्यस्य प्रवृत्तावेव कारणम् ॥२४४॥
इत्थं स्थितेपरं कंचित्स्वदीयोस्मीति शंसता । न नेया भवता राजन्वंयमात्मा च लाघवम् ॥२४५॥ 245
इति तैस्तथ्यमुक्तोपि संस्मरन्स्वामिसत्क्रियाम् । मातृगुप्तो महीपालः क्षणमासीत्कृतस्मितः ॥२४६॥
दानेन सुदिनं कुर्वन्नश्वराज्योर्जितेन सः । तत्रैव मङ्गलोदयं तदहो निरवर्तयत् ॥२४७॥
पुरप्रवेशायान्येद्युरर्थ्यमानोथ मन्त्रिभिः । अद्भुतपाभृतं दूतं राज्यदातुर्व्यसर्जयत् ॥२४८॥
देशौचित्यानुसारेण स्पर्धामिव च तां विदन् । स्वामिनो मनसि ह्रीतः सागसं स्वममन्यत ॥२४९॥
अथाहूयापरान्भृत्यान्वक्तुं सेवास्मृतिं प्रभोः । अल्पार्घाण्यपि सान्मयानि प्राहिणोत्पाभृतानि सः ॥२५०॥ 250
श्लक्षणामान्यान्गुणांस्तस्य स्मरन्पर्यश्रुलोचनः । स्वयं लिखित्वा श्लोकं च स्वकमेकं व्यसर्जयत् ॥२५१॥
नाकारमुद्वहसि नैव त्रिकत्थसे त्वं दिस्सां न सूचयसि मुञ्चसि सत्फलानि ।
निःशब्दवर्षणमिवाम्बुधरस्य राजन्संलक्ष्यते फलत एव तवं प्रसादः ॥२५२॥
ततः प्रविश्य नगरं सैन्यैः पिहितदिक्तटैः । क्रमागतामिव महीं यथावत्पर्यपालयत् ॥२५३॥
त्यागे वा पौरुषे वापि तस्यौचित्योन्नतात्मनः । क्ष्माभुजस्तर्कुकस्येव नाभूत्परिमितेच्छता ॥२५४॥
यष्टुं यज्ञान्भृतोद्योगस्त्यागी विततदक्षिणान् । पशुबन्धमनुध्याय करुणाकूणितोभवत् ॥२५५॥ 255
भमारमादिशेशाथ यावद्राज्यं स्वमण्डले । चूर्णीकृत्य सुवर्णादि प्रदरी च करम्भकम् ॥२५६॥
करम्भके क्रीयमाणे मातृगुप्तेन भूभुजा । वैतृष्ण्यमुन्मिषत्तोषो न को नाम न्यषेवत ॥२५७॥
गुणी च दृष्टकष्टश्च वदान्यश्च स पार्थिवः । विक्रमादित्यतोप्यासीदभिगम्यः शुभार्थिनाम् ॥२५८॥
विवेचकतया तस्य श्लाघया सुरभीकृताः । लक्ष्मीविलासाः क्ष्माभर्तुरशोभन्त मनीषिषु ॥२५९॥
हयग्रीववधं मेण्ठस्तदधे दर्शयन्नवम् । भासमाप्ति ततो नाप्तस्साध्वसाधिषि वा वचः ॥२६०॥ 260
अथ ग्रथयितुं तस्मिन्पुस्तकं प्रस्तुते न्यधात् । लावण्यनिर्याणभिया तदधः स्वर्णभाजनम् ॥२६१॥
अन्तरज्ञतया तस्य तादृश्या कृतसत्कृतिः । भर्तृमेण्ठः कविर्मेने पुनरुक्तं श्रियेर्पणम् ॥२६२॥
स मातृगुप्तस्त्वाख्यां निर्ममे मधुसूदनम् । कालेनादत्त यद्ग्रामान्मम्मः स्वसुरसद्मने ॥२६३॥
इत्यासादितराज्यस्य शासतः क्ष्मां क्षमापतेः । त्रिमासोना ययुस्तस्य सैकाहाः पञ्च वत्सराः ॥२६४॥
कृतार्थतां तीर्थनीयैराज्ञानेयोनयन्पितॄन् । जातं तादृशमश्रौषीत्स्वस्मिन्देशे पराक्रमम् ॥२६५॥ 265
पितृशोकार्द्रता तस्य क्रोधेनान्तरधीयत । तरोरिवार्कतापेन नैशाम्बुलवसिक्तता ॥२६६॥
श्रीपर्वते पाशुपतव्रतिवेषस्तनागतम् । आचख्यावश्वपादाख्यः सिद्धः कन्दाशनं ददत् ॥२६७॥

---

२४३ ¹) ²) A_1 indicates the vv. *ll* त्रितीयन्ते and विदत्त. २४५. ¹) Thus A_3, A_4 राजा २४६ ¹) Thus corr. by later hand from A_1 °गुप्तम्, G R as above २४७ ¹) A_1 gloss अत्यवाहयत. २५० ¹) Thus A_1, A_4 स्वात्म्यानि, also G R Edd स्वाम्यानि २५२ ¹) तव supplied by A_3 २५४. ¹) Thus corr by later hand from A_1 चिन्त्यौ° —²) A_1 gloss याचकर्षत्व २५५ ¹) Thus A, G R °कूजितो. Edd °कूजितो. २५८ ¹) Emended A R G वदन्यश्च २६० ¹) A_1 gloss काव्यं २६१ ¹) A_1 राजाथ. २६३. ¹) A_1 gloss स्वदेवगृहाय. २६५. ¹) A_1 gloss प्रवरसेन —²) A_1 परानवम २६७ ¹) A_1 gloss प्रवरसेन

जन्मान्तरे लब्धसिद्धिस्त्वामस्युपरि साधकम् । वाञ्छामपूर्च्छं राज्यार्थमभिलाषस्तु नभवत् ॥२६८॥
सयत्नं तव कर्तुं तन्मनोरथमनन्यथा । अथ मामित्यमादिक्षत्सप्तागरमणशेखरः ॥२६९॥
गणोय मामकः सिद्धो यस्तत्रोपरि साधकः । जन्मान्तरेऽस्य राज्येच्छां कुर्यामहमनन्यथा ॥२७०॥
भावं भवस्तद्व्रतो भगवान्दत्तदर्शनः । साफल्यं नेष्यतीत्येवमभिधाय तिरोदधे ॥२७१॥
साम्राज्येच्छोः समामेकां तत्र तस्यं तपस्यतः । लब्धस्मृतेः[2] सिद्धगिरा प्रदर्शे दर्शनं शिवः ॥२७२॥
व्रतिवेषं तमादिष्टवाञ्छितार्थसमर्पणम् । स जगत्सिर्जयोत्सिक्तं नरेन्द्रत्वमयाचत ॥२७३॥
उपेक्ष्य मोक्षं किं क्षमाभृद्भोगानिच्छसि भङ्गुरान् । इति जिज्ञासुना भावं शंभुना सोऽभ्यधीयत ॥२७४॥
स तं बभाषे शंभुं त्वां बुद्धा व्याजतपोधनम् । अभ्यधामिदमद्धा त्वं न स देवो जगद्गुरुः ॥२७५॥
महान्तो ह्यर्थिताः स्वल्पं फलन्त्यल्पेतरस्त्वयम् । उदन्वयां वदान्योदाद्युग्धाब्धिं सं पयोर्थिने ॥२७६॥
अस्य वैकल्पकैवल्यलाभनिश्चलचेतसः । नो वेत्स्यभिजनस्याभिभूतिं[1] मर्मव्यथावहाम् ॥२७७॥
जगत्परिवृढः प्रौढप्रीतिस्तं सफलार्थनम्[2] । कृत्वा प्रादुष्कृतवपुस्ततो भूयोऽभ्यभाषत ॥२७८॥
मज्जनो राज्यसौख्येषु सायुज्यांवाप्तिदूतिकाम् । महाज्ञयाश्वघादस्ते संज्ञां काले करिष्यति ॥२७९॥
इत्युक्तान्तर्हिते देवे स कृतव्रतपारणः । आगच्छदश्वघादं तमापृच्छ्याभिमतं भुवम् ॥२८०॥
ततो विदितवृत्तान्तो मातृगुप्ताभिधेयनात् । निषिध्य सचिवांयातानमात्यानब्रवीदृषः ॥२८१॥
विक्रमादित्यमुत्सिक्तमुच्छेत्तुं यतते मनः । मातृगुप्तं प्रति न नो रोषेणाऽस्ति मनः ॥२८२॥
अप्रियैरपि निष्पिष्टैः किं स्यात्क्लेशासहिष्णुभिः । ये तदुन्मूलने शक्ता जिगीषा तेषु शोभते ॥२८३॥
यान्यञ्जान्युदयं द्विषन्ति शशिनः कोन्यस्ततोसंमतस्तस्मिर्माथिकरीन्द्रदन्तदलने यत्नाम कोयं नयः ।
सामर्थ्यप्रथनाय चित्रमसमैः स्पर्धी विधूयोत्सवा ये तेषु प्रभवन्ति तद्र जहति व्यक्तं प्ररूढा रुषः ॥२८४॥
त्रिगर्तानां भुवं जित्वा स व्रजन्नथ भूपतिः । विक्रमादित्यमभूणोत्कालधर्ममुपागतम् ॥२८५॥
तस्मिन्नहनि भुभर्त्रा शोकाग्निःश्वसतानिशम् । नाक्षायि नाशि नास्त्वापि स्थितेनावननाननम ॥२८६॥
अन्येद्युर्भुवमुत्सृज्य कट्मीरेभ्यो विनिर्गतम् । भुभाव मातृगुप्तं स नातिदूरे कृतस्थितिम् ॥२८७॥
कैश्चिन्निर्वासितो मा स्विन्मदीयैरिति शङ्कितः । ययौ प्रवरसेनोस्य पार्श्वं मितपरिच्छदः ॥२८८॥
कृताईणं सुखासीन ततः पप्रच्छ तं शनैः । विनयावनतो राजा राज्यत्यागस्य कारणम् ॥२८९॥
बभाषे तं क्षणं स्थित्वा सं निःश्वस्यं विहस्य च । गतः स सुकृती[1] राजन्येन भूमिभुजो वयम् ॥२९०॥
यावन्मूर्धि रवेः पादास्तावद्द्योतयते दिशः । द्योतते नान्यथा किंचिद्भावैव तपनोपलः ॥२९१॥

---

२६८ [1]) मस्मु supplied by A_3 in space left by A_1. २६९ [1]) A_1 glosses आदिदेश and ईश्वर.. २७१ [1]) A_1 gloss अभ्यधात २७२ [1]) A_1 gloss प्रवरसेनस्य —[2]) Thus A_1, corr. by later hand into °स्मृतेः, as found also in R. २७६ [1]) A_1 gloss स्वल्पमर्थिता बहु फलन्ति महान्त —[2]) A_1 gloss उदन्वया पिपासया.—[3]) Emended A R G वदन्यो.—[4]) A_1 gloss शिव २७७ [1]) A_1 gloss पराभव २७८ [1]) A_1 gloss प्रभु —[2]) Thus corr. by A_2 from A_1 स फलार्थिनम् २७९ [1]) Thus A_1, corr. by later hand into सायुज्या°. २८० [1]) A_1 भगच्छ°. २८१ [1]) त supplied by A_1 in space left by A_1.—[2]) A_1 gloss निकट. २८४ [1]) A_1 gloss तेऽग्र —[2]) A_1 gloss नीचे २८६ [1]) Emended, A निश्वस° २८९ [1]) A_1 gloss प्रवरसेन २९० [1]) A_1 gloss मातृगुप्त —[2]) Thus corr. by later hand from A_1 निश्वस्य —[3]) A_1 gloss विक्रमादित्य २९१ [1]) Thus A_1, corr by A_2 into द्योतयेच्चान्यथा किं न which reading is found also in G R Edd.—[2]) A_1 gloss सूर्यकान्त

अथ राजान्यधात्केन राजन्नपकृतं तव । यत्त्वत्यर्पचिकीर्षायै नमीशमनुशोचसि ॥२९२॥
मातृगुप्तस्तनोवादीत्कोपस्मितसिताधरः । अस्मानुस्सहते कश्चिन्नापकर्तुं बलाधिकः ॥२९३॥
नयता गण्यतामस्मानन्तरज्ञेन तेन हि । न भस्मनि हुतं सर्पिर्नीम्नं वा सस्यमुषरे ॥२९४॥
उपकारं स्मरन्तस्तु कृतज्ञत्वव्रतोद्यताः । पदवीमुपकर्तॄणां यान्ति निश्चेतना अपि ॥२९५॥ 295
निर्वाणमनुनिर्वाति तपनं तपनोपलः । इन्दुमिन्दुमणिः किं च शुष्यन्तमनुशुष्यति ॥२९६॥
पुण्यां वाराणसीं गत्वा तस्माच्छम्भुमुखोन्मुखः । इच्छामि सर्वसंन्यासं कर्तुं द्विजनोचितम् ॥२९७॥
मणिर्वापमिवेशं तमन्तरेणान्धकारिताम् । बिभेमि ब्रह्मुमप्युर्वीं भोगयोगे कथैव का ॥२९८॥
इत्यौचित्यनिधेस्तस्य वाणीमाकर्ण्य विस्मितः । धीरः प्रवरसेनोपि व्याजहारोचितं वचः ॥२९९॥
सत्यं विश्वंभरा देवी भूपते रत्नसूरियम् । उत्पत्त्या द्योतते धर्म्यैः कृतज्ञैर्या भवादृशैः ॥३००॥ 300
अन्तरज्ञतया श्लाघ्यः कोन्यस्तस्मान्महीभुजः । इत्थं जडे जगत्येकस्त्वां यथावद्विवेद यः ॥३०१॥
चिरं खलु खिलीभूताः कृतज्ञत्वस्य वीथयः । धीर त्वयैव न त्वासु संचारो यदि दर्श्यते ॥३०२॥
पाकधेन्न शुभस्य मेथ तदसौ प्रागेव नाहात्किमु स्वार्थधेन्न मयास्य किं न भजते दीनान्स्वबन्धूनयम् ।
मत्तो रन्ध्रदृशोस्य भीर्यदि न तद्बुध्यः किमेष त्यजेदित्यन्तः पुरुषाधमः कलयति प्रायः कृतोपक्रियः ॥३०३॥
अत्युदात्तगुणेष्वेषा कृतपुण्यैः प्ररोपिता । शतशाखीभवत्येव यावन्मात्रापि सत्क्रिया ॥३०४॥
तत्त्वं गुणवतामग्र्यस्तत्त्वज्ञैश्चाभिनन्दितः । परीक्षितो मणिरिव व्यक्तं बहुमतः सताम् ॥३०५॥ 305
तस्मादनुगृहाणास्मान्मा स्म त्याक्षीर्नरेन्द्रताम् । ममापि ख्यातिमायातु गुणवत्पक्षपातिता ॥३०६॥
पूर्वं तेनाथ चरमं मयापि प्रतिपादिताम् । भवान्प्रतिप्रणयिनीं विदधातु पुनर्भुवम् ॥३०७॥
अथ्याजौदार्यचर्यस्य श्रुत्वेति नृपतेर्वचः । कृतस्मितो मातृगुप्तः शनैर्वचनमब्रवीत् ॥३०८॥
यान्यक्षराण्यन्तरेण वाच्यं वक्तुं न पार्यते । का गतिस्तदुपादाने मर्यादोल्लङ्घनं विना ॥३०९॥
अतः परमयं किंचिदेव मयोच्यते । अथ्याजार्जवमप्येतदार्यत्वमवधीर्यते ॥३१०॥ 310
सर्वः स्मरति सर्वस्य प्रागवस्थासु लाघवम् । आत्मैव वेत्ति माहात्म्यं वर्तमाने क्षणे पुनः ॥३११॥
पूर्वावस्था मदीया ते त्वदीया या च मे हृदि । ताभ्यां विमोहितावावां न विद्मोन्योन्यमाशयम् ॥३१२॥
राजा भूत्वा कथं मादृक्पतितृहातु संपदः । कथमेकपदे सर्वमौचित्यं परिमार्जतु ॥३१३॥
असाधारणमौदार्यमाहात्म्यं तस्य भूपतेः । भोगमात्रकृते मादृक्किं साधारणतां नयेत् ॥३१४॥
अपि च स्पृहयालुः स्यां भोगेभ्यो यदि भूपते । म्रियमाणेभिमाने मे केन ते विनिवारिताः ॥३१५॥ 315
यन्ममोपकृतं तेन तद्दिना प्रत्युपक्रियाम् । जीर्णमेवाधुनाङ्गेषु प्रभवत्येव निश्चयः ॥३१६॥
या गतिर्भूभुजोमुष्य मया तामनुगच्छता । पात्रापात्रविवेक्तृत्वख्यातिर्नेया प्रकाश्यताम् ॥३१७॥
एतावत्येव कर्तव्ये यातेस्मिन्कीर्तिशेषताम् । भोगमात्रपरित्यागाद्विदध्यां सत्यसंश्रवाम् ॥३१८॥

२९३ [1]) Thus corr. by later hand from A_1 यत्त्वत्यर्पः २९४ [1]) A_3 gloss तेन हर्षवेन २९५ [1]) A_3 °दर्शीकृता [2]) A_3 gloss विक्रमादित्य ३०१ [1]) A_3 gloss हर्षवेनात ३०२ [1]) A_3 gloss वीर्यादु —[2]) दर्श्यते supplied by A_3 in space left by A_1 ३०७ [1]) Thus A_1, A_3 °न्यातिप्र°. ३०९ [1]) Thus corr. by A_3 from A_1 यान्यक्षरा° ३१०. [1]) This verse has been omitted by A_1 and supplied in margin by A_1, found in R G. ३१५ [1]) A_3 gloss ते भोगा इत्यर्थ ३१८. [1]) A_3 gloss विक्रमादित्ये

इत्युक्त्वा विरते तस्मिञ्जगाद जगतीपतिः । त्वदीया न मया स्पृश्यास्त्वयि जीवति संपदः ॥३१९॥
अथ वाराणसीं गत्वा कृतकापायसंग्रहः । सर्वं संन्यस्य सुकृती मातृगुप्तोऽभवद्यतिः ॥३२०॥
राजा प्रवरसेनोऽपि काश्मीरोत्पत्तिमञ्जसा । निखिलां मातृगुप्ताय प्राहिणोद्बृहनिश्चयः ॥३२१॥
स हठापतितां लक्ष्मीं भिक्षाभुक्पतिपादयन् । सर्वार्थिभ्यः कृती वर्षान्दश प्राणानधारयत् ॥३२२॥
अन्योन्य साभिमानानामन्योन्यौचित्यशालिनाम् । त्रयाणामपि वृत्तान्त एष त्रिपथगापयः ॥३२३॥
राजा प्रवरसेनोऽथ नमयन्नवनीधरान् । अकृच्छ्रलङ्घाः ककुभो वृद्धस्य यशसो व्यधात् ॥३२४॥
पीताब्धिर्लङ्घितोर्वीभृत्कुम्भयोनिरिवानयत् । तस्य प्रतापः प्रभवन्भुवनानि प्रसत्तताम् ॥३२५॥
भुज्यत्तमालपत्त्राणि शीर्णताडीदलानि च । तत्सेनार्णवतीराणि चक्रेरिस्त्रीमुखानि च ॥३२६॥
स गङ्गालिङ्गिताङ्गस्य पूर्वेवारिनिधेर्व्यधात् । सैन्येभमदनिष्पन्दैः कालिन्दीसंगमश्रियम् ॥३२७॥
रोधस्यपरपाथोधेः कटकैः स्पृष्टदिक्तटैः । चकारोत्पाट्य सौराष्ट्रानसौ राष्ट्रविपाटनम् ॥३२८॥
यशोर्थिनः पार्थिवेषु द्वेषरागबहिष्कृतः । ववृधे धर्मविजयस्तस्य क्षितिशतक्रतोः ॥३२९॥
वैरिनिर्वासितं पित्र्ये विक्रमादित्यनं न्यधात् । राज्ये प्रतापशीलं स शीलादित्यापराभिधम् ॥३३०॥
सिंहासनं स्ववंश्यानां तेनाहितहृतं ततः । विक्रमादित्यवसतेरानीतं स्वपुरे पुनः ॥३३१॥
हेतुनुदीर्य विविधानमन्त्रानं पराजयम् । सप्त वाराञ्स तत्याज जित्वा मुम्मुर्निभुभुजम् ॥३३२॥
धाष्टर्चोदथाष्टमे वारे हेतुमाख्यातुमुद्यतम् । धिक्पशून्वध्यतां सोऽयमित्युचे नृपतिः क्रुधा ॥३३३॥
अवध्योहं पशुत्वेन वीरेत्युक्ताभयोत्सुकः । मध्येसभं ननर्तास्य सोनुकुर्वन्ककलापिनम् ॥३३४॥
नृत्तं केकां च शिखिनो दृष्ट्वास्मै ददिवं नृपः । भयेन समं प्रादात्तालावचरणोचितम् ॥३३५॥
वसतोस्य दिशो जित्वा नमुः पैतामहे पुरे । कर्तुं पुरं स्वनामाङ्कं प्रथते स्म मनोरथः ॥३३६॥
रात्रौ क्षेत्रं च लग्नं च दिव्यं ज्ञातुमथैकदा । स वीरो वीरचर्यायां निर्ययौ पार्थिवार्यमा ॥३३७॥
गच्छतः क्ष्मापतेस्तस्य मौलिरत्नार्यबिम्बितः । बभार तारापकरो रक्षःसर्षपविभ्रमम् ॥३३८॥
अथानन्तचितालोकस्पष्टभीमतटद्रुमाम् । श्मशानप्रान्ततटिनीं पर्यटन्नाससाद सः ॥३३९॥
ततस्तस्य सरित्पारे मुक्तसंरावमपतः । ऊर्ध्ववाह महद्भूतं प्रादुरासीन्महौजसः ॥३४०॥
नृपतिस्तस्य कृपाणैर्न्यक्षद्भिः कपिशीकृतः । उल्काज्योतिःकृतालेपः कुलाद्रिरिव दिद्युते ॥३४१॥
नमय प्रतिशब्देन घोरेणापूरयन्दिशः । अत्रासं ज्ञिहसत्तुभैरुवाच क्षणदाचरः ॥३४२॥
संत्यज्य विक्रमादित्यं सत्त्वोद्रिक्तं च भूभृकम् । त्वां च भूपाल पर्याप्तं पैर्यमन्यत्र दुर्लभम् ॥३४३॥
वसुधाधिपते वाञ्छासिद्धिस्तव विधीयते । सेतुमेतं समुत्तीर्य पार्श्वमागम्यतां मम ॥३४४॥
इत्युदीर्य निजं जानुं रक्षः पारात्पसारयत् । तन्महासरितो वारि सेतुसीमन्तितं व्यधात् ॥३४५॥
अङ्केन रक्षःकायस्य ज्ञात्वा सेतुं प्रकल्पितम् । वीरः प्रवरसेनोऽथ विकोशां क्षुरिकां दधे ॥३४६॥

---

३२३ [1]) A_1 gloss त्रयाणां विक्रमादित्यमातृगुप्तप्रवरसेनानाम ३२५ [1]) A_1 gloss जलान्यपि ३३२ [1]) A_3 gloss प्रवरसेन —[2]) Doubtful emendation मुम्मु has been supplied by A_3 in space left by A_1; A_2 has marked a different division of the words, जित्वाऽमु। मुनिम्मुञ्जम, which is also indicated by the interlinear gloss of A_3 मुनयश्चील. C reads मुम्मुनिं। For the name मुम्मुनि see iv. 167, v 516, vm. 2180 (C).—३३५ [1]) A_3 gloss शिखिनमुद्दा —[2]) Thus A_1, A_2 तालार्धचरणो° ३३८ [1]) Thus A_2, A_3 °ब्राद्र° ३४५ [1]) Thus apparently A_1, A_2 °यन

स तयोत्कृत्य तन्मांसं कृतसोपानपद्धतिः । अतरत्यत्र तत्स्थानं क्षुरिकावलं उच्यते ॥३४७॥
पार्श्वस्थं तं लग्नमुक्ता प्रातर्मन्त्रूचपातनम् । दृष्ट्वा पुरं विधेहीति वदद्भूतं तिरोदधे ॥३४८॥
देव्या शारिकयाद्देन यक्षेणाधिष्ठिते च सः । यामे शारिटंकपदयन्त्रूत्रं वेतालपानितम् ॥३४९॥
भक्त्या प्रतिश्रां प्राक्तस्मिन्नियौ प्रवरेश्वरम् । जयस्वामी स्वयं पीठे भित्त्वा यन्त्रमुपाविशत् ॥३५०॥
वेतालवेदितं लग्नं जानतो जगतीभुजा । स्थपतेः स जयाख्यस्य नाम्ना प्रख्यापितोभवत् ॥३५१॥
नगरापातिलोभ्याय भक्त्या तस्य विनायकः । प्रत्यङ्मुखः प्राङ्मुखतां भीमस्वामी स्वयं ययौ ॥३५२॥
सद्भावभ्यधिका देव्यस्तेन श्रीशब्दलाञ्छिताः । पञ्च यत्नजनेनेह पुरे तस्मिंश्चवेशिताः ॥३५३॥
वितस्तायां स भूपालो बृहत्सेतुमकारयत् । ख्याता ततः प्रभृत्येव तादृग्रीसेतुकल्पना ॥३५४॥
श्रीजयेन्द्रविहारस्य बृहद्बृहस्य च व्यधात् । मातलः स नरेन्द्रस्य जयेन्द्रो विनिवेशनम् ॥३५५॥ 355
बुभोज सिंहलादीयो द्वीपान्स सचिवोत्करात् । मोराकनामा मोराकभवनं भुवनाद्भुतम् ॥३५६॥
पञ्चिंशद्बृहल्लक्षाणि पुरे तत्पथे पुरा । यस्यास्तां वर्धनस्वामी विश्वकर्मा च सीमयोः ॥३५७॥
दक्षिणस्मिन्नेव पारे वितस्तायाः पुरा किल । निर्मितं तेन नगरं विभक्तैर्युक्तमापणैः ॥३५८॥
ते तत्राश्लिष्टाः सौधा यानध्यारूढ दृश्यते । वृष्टिस्त्रियं निदाघान्ते चैत्रे चोत्कुसुमं जगत् ॥३५९॥
तद्विना नगरं कुत्र पवित्राः सुलभा भुवि । सुभगाः सिन्धुसंभेदाः क्रीडावसथवीथियु ॥३६०॥ 360
दृष्टः क्रीडानगोन्यत्र न मत्तेनगरं क्वचित् । यतः सर्वौकसां लक्ष्मीः संलक्ष्या सुपथादिव ॥३६१॥
वैतस्त वारि वास्तव्यैर्वृक्षवल्लिनशार्करम् । धीमोवेद्धि स्वदेशानामत्र तत्तोन्यत्र लभ्यते ॥३६२॥
प्रतिदेवगृहं कोशास्तेन तस्मिन्नर्पिता नृपैः । सहस्रशः शक्यते यैः क्रेतुं भूः सागराम्बरा ॥३६३॥
पुरे निवसतस्तस्मिंस्तस्य राजप्रजाभुज । शनैः साम्राज्यलाभस्य षष्टिः संवत्सरा ययुः ॥३६४॥
ललाटे भूलमद्राङ्के जगाभुक्ताः शिरोरुहाः । तस्य शंभुध्वमासङ्गिगङ्गाम्भोविभ्रम कभुः ॥३६५॥
अथाश्रुपातदेनशाननिदेशात्तत्क्षणागतः । कादर्मारिको जयन्ताख्यो द्विजन्मायोजि पार्श्वगः ॥३६६॥
भ्रान्तोस्म्यत्र न मन्येन्य नान्यस्माद्देशनिर्मिमत भवेत् । राजे प्रवरसेनाय लेख एष प्रदर्श्यताम् ॥३६७॥
इत्युक्तार्पितलेखोसावसमर्थः पथः पृथून् । गन्तुं प्रस्थानविघ्नोस्मि सद्यस्तेनेत्यगदत ॥३६८॥
स्नात्वा तावत्त्व स्पृष्टो द्विजः कापालिना मया । उल्केति तेन क्षिप्तोसावासन्ने दीर्घिकाजले ॥३६९॥
उन्मीलितेक्षणोद्राक्षीत्स्वं स्वदेशादथोत्थितम् । तस्यूपधार्यने राज्ञो भृत्यान्व्यसाज्जलाहृतौ ॥३७०॥ 370
स्वमावेदयितुं नक्षा नीयमाने नृपान्तिकम् । अदृश्यक्षिप्तोक्षिप्तेव स स्नानकलशे ततः ॥३७१॥
प्रवरेशो स्नापयता स्वप्नं तत्कलशात्पुनः । राज्ञा लेखं वाचयित्वा जयन्तः प्रापितोन्तिकम् ॥३७२॥
कृत कृत्यं महत्तं भोगा भुक्ता त्वयो गतम् । किमन्यत्कारणीयं ते एहि गच्छ शिवालयम् ॥३७३॥
ततस्तं वृत्तसंकेतः संतोष्याभिमतार्पणात् । भित्त्वा तमसमप्रासाद जगाहे विमलं नभः ॥३७४॥
जनैः स ददृशे गच्छन्कैलासतिलकां दिशम् । विशदे घटयन्त्योसि द्वितीयतपनोदयम् ॥३७५॥ 375

---

३४७. [1]) Thus corr by A, from A, भाल, G बाल ३४९ [1]) Thus corr by later hand from A, [illegible]तं —[2]) A, gloss झारट ३५१ [1]) स्य supplied by A, ३५२ [1]) Thus corr. by A, from A, तया ३५५ [1]) A gloss स्थापनम् ३६० [1]) A, °वैत्रत्तु ३६६ [1]) Thus corr by A, from A, °निर्दे

जयन्तेनाद्भुतोदन्तहेतुनाप्य संपदः । स्वनामाङ्कावतारादिकर्मभिर्निर्मलाः कृताः ॥३७६॥
एव स भुवनैश्वर्य भुक्त्वा भूमिभृतां वरः । अनेनैव शरीरेण भेजे भूतपतेः सभाम् ॥३७७॥
प्रासादे प्रवरेऽस्य सिद्धिक्षेत्रे क्षमापतेः । स्वर्गद्वारमतिभटं द्वारमद्यापि लक्ष्यते ॥३७८॥
तस्य रत्नप्रभादिव्यां जातो राजा युधिष्ठिरः । अपासीच्चत्वमासीनाः क्षमां चत्वारिंशतं समाः ॥३७९॥
सर्वरत्नजयस्कन्दगुप्तशब्दाङ्किताभिधाः । आसन्विहारचैत्यादिकृत्यैस्तत्सचिवा वराः ॥३८०॥
भवच्छेदाभिधं ग्रामं स्तुत्यं चैत्यादिसिद्धिभिः । यो व्यधास्तोस्य वज्रेन्द्रोप्यासीन्मन्त्री जयेन्द्रजः ॥३८१॥
दिक्कामिनीमुखोत्कीर्णकीर्तिचन्दनचित्रकाः । आसन्कुमारसेनाद्यास्तस्यान्येप्यम्यमन्त्रिणः ॥३८२॥
पद्मावत्यां सुतस्तस्य नरेन्द्रादित्य इत्यभूत् । लःखणापरनामा यो नरेन्द्रस्वामिनं व्यधात् ॥३८३॥
वज्रेन्द्रतनयौ वज्रकनकौ यस्य मन्त्रिणौ । अभूतां सुकृतोदन्तौ राज्ञी च विमलप्रभा ॥३८४॥
स विधायाधिकरणं लिखितस्थितये निजम् । द्यां त्रयोदशभिर्वर्षैरारुरोह महाभुजः ॥३८५॥
तस्यानुजो धरणिभृद्गणादित्यस्ततोभवत् । तुञ्जीनापरनामानं यं जनाः प्राहुरञ्जसा ॥३८६॥
जगद्विलक्षणं यस्य शङ्खमुद्राङ्कितं शिरः । अपूर्वशर्वरीशान्तलीनभानुश्रियं दधे ॥३८७॥
त्रिपुकण्डाटवीप्वासीद्यस्य धाराधरः पतन् । तद्भूनेत्रकुण्डेस्तु जलाधिक्यमधार्यत ॥३८८॥
अपूर्वो यत्प्रतापाग्निः प्रविश्योर्वीं द्विषां न्यधात् । नारीनेत्रेषु नीरोर्मीन्मन्दिरेषु तृणाङ्कुरान् ॥३८९॥
यस्य पाणिप्रणयितां कृपाणे समुपागते । कबन्धेभ्यः परो नृत्तं न व्यधत्त द्विषद्बलैः ॥३९०॥
तस्याभ्यर्थोद्यमाहात्म्या देवी दिव्याकृतेः प्रिया । विष्णुशक्तिः क्षितिं प्राप्ता रणारम्भाभिधाभवत् ॥३९१॥
स हि जन्मान्तरे पूर्वं शूलकारोभवत्किल । कदापि प्राप निर्वेदं सर्वस्वं क्रीतवैरिणः ॥३९२॥
देहत्यागोद्यतोप्यासीत्स्वाप्यं किंचिदिचिन्तयन् । न पर्यन्तेप्युपेक्षन्ते कितवाः स्वार्थसाधनम् ॥३९३॥
अवन्ध्यदर्शनां विन्ध्ये देवीं भ्रमरवासिनीम् । ब्रह्मैवेच्छन्नराकाङ्क्षी निस्पृहेपेक्षः स्वजीवितं ॥३९४॥
भ्रमरैः शङ्कुपुच्छाग्रैः खण्ड्यमानस्य देहिनः । तदास्पदं हि विशतां दुर्लङ्घ्या पञ्चयोजनी ॥३९५॥
स वज्रशङ्कुपुच्छानां धीमांस्तेषां प्रतिक्रियाम् । देहेवश्यपरित्याज्ये मन्वानोभूदधुष्कराम् ॥३९६॥
प्रागयोवर्मणा देहं ततो महिषचर्मणा । तेन छादयता दत्तो मूलेपोथ सगोमयः ॥३९७॥
अथ भानुकरोच्छुष्कमूलेपाश्लेडिताङ्गकः । स लोष्ट इव संचारी प्रतस्थे कुरनिश्चयः ॥३९८॥
सरलां सरणिं त्यक्त्वा जीवितस्पृहया समम् । गुहां तेन ततः सान्द्रतमोभीमां व्यगाहत ॥३९९॥
अथोदतिष्ठन्नर्तेभ्यो घोरा भ्रमरमण्डलाः । पक्षशब्दैः श्रुतिं घ्नन्तो मृत्युतूर्यरवैरिव ॥४००॥
ते तमुच्छुष्कमूलेपरेणुव्रणितलोचनाः । सहसा नाक्रमन्ते स्म प्रहरन्तोपि बाधितुम् ॥४०१॥
रेणुभिर्येन्धितदृशस्ते न्यवर्तन्त षट्पदाः । तेखण्डयंस्तु मूलेपं न्यपतन्ये नवा नवाः ॥४०२॥
तैः खण्ड्यमानमुच्चण्डैर्व्रजतो योजनत्रयीम् । क्रमान्मृत्कवचं तस्य पथि संक्षयमाययौ ॥४०३॥
ततो मुहुः प्रहरतां तेषां महिषचर्मणि । घोरश्चटचटाघोषः प्रादुरासीद्भयंकरः ॥४०४॥

---

३७७ [1]) Thus A_3, A_1 त्यक्त्वा ३७८ [1]) A_3 च्छित्र ३७२ [1]) Thus corr by A_2 from A_1 चतुर्विंशति ३८१ [1]) **A**, gloss औछो ३८३ [1]) A_1 ल × खणा°. ३९०. [1]) A_1 indicates a *varia lectio* in the marginal note अन्यत कबन्धेभ्य पर नृत्त न व्यधत्त द्विषद्बलम्; over the last word the gloss कर्ते by the same hand.

चतुर्थयोजनस्यार्धमतिक्रम्य विवेद सः । रणत्कारैर्हिरेफांस्तानथोवर्मनिपातिनः ॥४०५॥ 405
धावंस्ततोतिवेगेन खण्ड्यमानेन पट्पदैः । स शस्त्रवर्मणामोचि चित्तं धैर्येण नो पुनः ॥४०६॥
गव्यूतिमात्रमासन्ने देवीधामनि धैर्यवान् । धुन्वन्करास्यां मधुपान्धावति स्म स धीरधीः ॥४०७॥
अथ स्वास्थ्यशेषाङ्गो लूनमांसः षडङ्घ्रिभिः । कराभ्यामक्षिणी रक्षन्देव्यायतनमासदत् ॥४०८॥
प्रशान्ते भृङ्गसंपाते प्रकाशमवलोकयन् । स देव्याः पादयोरग्रे पपातोद्भान्तजीवितः ॥४०९॥
स्तोकावशेषप्राणं तं देव्याश्वासयितुं ततः । अभिरामं वपुः कृत्वा पस्पर्शाङ्केषु पाणिना ॥४१०॥ 410
दिव्येन पाणिस्पर्शेन तेन पीयूषवर्षिणा । स क्षिप्रासादितस्वास्थ्यो दिक्षु चिक्षेप चक्षुषी ॥४११॥
प्रविष्टमात्रः प्रैक्षिष्ट सिंहविष्टरसीम्नि याम् । घोराकारां स तां देवीं तदाद्राक्षीन्न तां पुनः ॥४१२॥
ददर्श पुनरुद्यानलतावासे विलासिनीम् । स्थितां पुष्करिणीतीरे श्यामां पुष्करलोचनाम् ॥४१३॥
गृहीतहारमुक्तार्धां बद्धां पीनस्तनाञ्जलिम् । महार्हैः कान्तिकुसुमैर्यौवनेनार्चितां क्षणम् ॥४१४॥
यावत्काहारिणीं पादौ दधतीं कृच्छ्रचारिणीं । स्तनच्छत्रमुखं द्रष्टुं तपस्यन्तीवितान्वहम् ॥४१५॥ 415
भास्वद्बिम्बाधरां कृष्णकेशीं सितकराननाम् । हरिमध्यां शिवाकारां सर्वदेवमयीमिव ॥४१६॥
तां विभाव्यानवद्याङ्गीं निर्मिते यौवनेऽर्जिताम् । निन्येवारितवामेन स कामेन विधेयताम् ॥४१७॥
दधतीं रूपमाधुर्यपूरच्छन्नामधृष्यताम् । अप्सराः प्रत्यभात्तस्य सा हि चित्ते न देवता ॥४१८॥
कृपामृदुरवादीत्तं व्यथितोसि चिरं पथि । मुहुः सोम्य समाश्वस्य प्रार्थ्यतामुचितो वरः ॥४१९॥
स तां बभाषे शान्तो मे भवत्या दर्शनाच्छमः । अदेवी किं तु भवती वरं दातुं कथं क्षमा ॥४२०॥ 420
देवी जगाद तं भद्र कोयं ते मनसि भ्रमः । देवी वा स्यामदेवी वा वरीतुं त्वां तु शक्नुयाम् ॥४२१॥
इति सोभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् । दूरमुत्क्रान्तमर्यादः संगमं तामयाचत ॥ ४२२॥
तमभ्यधात्सा दुर्बुद्धे कोयं तेनुचितो विधिः । प्रार्थयस्वेतरद्यन्मात्साहं भ्रमरवामिनी ॥४२३॥
देवीं तां जानतोप्यस्य नाभूद्वहितं मनः । निरुद्धा वासनाः केन जन्मान्तरनिबन्धनाः ॥४२४॥
स तामुवाच सत्यां नेहेवि त्वां गिरमिच्छसि । प्रमाणीकुरु मद्वाणीमहमन्यत्र कामये ॥४२५॥ 425
पूर्वमेव हि जन्तूनां योधिवासो निनीयते । तिलानामिव तेषां स पर्यन्तेपि न शीर्यते ॥४२६॥
देवी वा भव कान्ता वा भीमा वा शोभनापि वा । यादृशीं पूर्वमद्राक्षं तादृश्येवावभासि मे ॥४२७॥
तमित्थं कथयन्तं सा ज्ञात्वा निश्चलनिश्चयम् । एवं जन्मान्तरे भावीत्यभ्यधादनुरोधतः ॥४२८॥
उत्सहन्ते हि संस्पष्टुं न दिव्यां मर्त्यधार्मिणः । तद्गच्छ कुरुसंकल्पेत्युक्ता सान्तर्दधे ततः ॥४२९॥
अभूत्यजन्मा भूयासं तया देव्येति चिन्तयन् । प्रयागवटशाखायादहासीत्स वपुस्ततः ॥४३०॥ 430
सोजायत रणादित्यो रणारम्भा न सा भुवि । मर्त्यभावेपि या नैव जहौ जन्मान्तरस्मृतिम् ॥४३१॥
रतिसेनाभिधश्चोलराजः सज्जोधिपूजने । तां तरङ्गान्तरालेभे रत्नराजिमिवोज्ज्वलाम् ॥४३२॥

---

४०६. [1]) A, चित्तं. ४१२. [1]) Thus A, , A, G पुर , R and Edd read पुन ४१४. [1]) Thus A, , altered by A, to °मुक्तार्धान्बद्धां A, reads in margin गृहीतहारमुक्तार्धां बद्धपीनस्तनाञ्जलिम, with gloss मुक्ता एवार्धा G and R follow A, ४१७. [1]) A, writes s after निन्ये. ४१८ [1]) This division of the words is indicated by A, . ४२५. [1]) Thus corr. by later hand from A, सत्यं ; सत्यां also in G and R ४२९. [1]) A, देव्यां.

आ बाल्याद्यक्तदिव्योक्ति तामलंकृतयौवनाम् । दिव्यार्हां पृथिवीशेभ्यो नार्थिभ्योपि ददौ नृपः ॥४३३॥
रणादित्यनृपामात्ये दुरत्यायाते तथैव तम् । प्रत्याख्यानेच्छुमाचख्यौ सैव तद्वरणं वरम् ॥४३४॥
तदर्थमेव कांधतस्योत्पत्ति तां ततः पिता । द्रुतं कुलूतभूभर्तुः सुहृदः प्राहिणोद्बहून् ॥४३५॥
पत्रहृद् विषकृद् तं देश गत्वा व्यधत्त ताम् । परिणीय रणादित्यः शुद्धान्तस्याधिदेवताम् ॥४३६॥
मर्त्यसस्पर्शभीरुः सा महादेवी भवन्त्यपि । तं मायया मोहयन्ती न पस्पर्श कदाचन ॥४३७॥
व्यधान्मायामयीं राज्ञस्तल्पे स्वसदृशीं स्त्रियम् । स्वयं सा भ्रमरीरूपा निर्जगाम बहिर्मिशि ॥४३८॥
स नाम्ना स्वस्य देव्याश्च कृत्वा सुरगृहद्वयम् । माहेश्वरः शैललिङ्गे कारयामास कारुभिः ॥४३९॥
अ. प्रतिष्ठाप्रसङ्गेथ सज्जे तस्मिंस्तयोर्द्वयम् । देशान्तरागतः कश्चिद्रूपयामास दैववित् ॥४४०॥
स दृष्ट्वा तत्र शुभ्रत्वयोर्घटितलिङ्गयोः । अदमखण्डैः समण्डूकैर्वभाषे गर्ममावृतम् ॥४४१॥
किंकर्तव्यतया मूढं प्रतिष्ठाविघ्नविह्वलम् । दिव्यदृष्टिः स्वयं देवी ततो राजानमब्रवीत् ॥४४२॥
राजन्गिरिसुतेड्वाहे पौरोहित्यं पुरा भजन् । स्वमर्चादेवमादत्त पूजाभाण्डाद्यजापतिः ॥४४३॥
तां विष्णोः प्रतिमां वीक्ष्य पूजितां तेन धूर्जटिः । शून्यामिव तदा मेने शक्तिरूपां विना शिवम् ॥४४४॥
निर्मान्वैर्दैवकितानि रत्नान्यथ सुरासुरैः । पिण्डीकृत्य स्वयं चक्रे लिङ्गं भुवनवन्दितम् ॥४४५॥
तां विष्णुप्रतिमां तत्र लिङ्गमीशानपूजितम् । स्वयं प्रजासृजः पूज्यं कालेनादत्त रावणः ॥४४६॥
तेनाप्यभ्यर्च्यमानं तल्लङ्कायामभवच्चिरम् । देवद्वयं रावणान्ते नीतमासीच्च वानरैः ॥४४७॥
तिर्यक्तया ते कपयो मुग्धा हिमनगैकसः । शान्तौत्सुक्याः शनैर्देवौ न्यधुरुत्तरमानसे ॥४४८॥
प्रागेव सरसस्तस्मात्कुशलैः शिल्पिभिर्मया । लावुकूनौ प्रातरत्र प्राप्तौ द्रक्ष्यस्यसंशयम् ॥४४९॥
तयोः प्रतिष्ठा क्रियतामित्युक्त्वा पृथिवीभुजम् । देवी प्रयाता शुद्धान्तं सिद्धान्सस्मार खेचरान् ॥४५०॥
ते ध्यातमात्राः संप्राप्ता देव्यादेशेन पार्थसः । उद्धृत्य नृपतेर्धाम्नि देवौ हरिहरौ न्यधुः ॥४५१॥
दिव्यैः प्रसूनैः सवीतौ हरनारायणौ जनः । प्रातर्नृपगृहे दृष्ट्वा परं विस्मयमाययौ ॥४५२॥
सज्जे प्रतिष्ठालग्नेथ माहेश्वरतया नृपः । रणेश्वरप्रतिष्ठायां पूर्वं यावत्समुद्यतः ॥४५३॥
रणारम्भानुभावेन तावदेवाद्भुतावहः । स्वयं पीठे रणस्वामी भित्त्वा यन्त्रमुपाविशत् ॥४५४॥
कर्तुं प्रभावजिज्ञासां राज्ञां दत्तधनस्ततः । स स्वयंभूः स्वयं भक्तांस्तान्यामानदापयत् ॥४५५॥
कुम्भदासतया ख्यातः सिद्धो ब्रह्माभिधो वसन् । परिज्ञाय तयोर्देव्या प्रतिष्ठाकर्म कारितः ॥४५६॥
स वृत्तप्रत्यभिज्ञः सन्प्रतिष्ठाप्य रणेश्वरम् । व्योम्ना व्रजन्स्वस्वामिप्रतिष्ठां गूढमादधे ॥४५७॥
जनास्त्वलक्षयन्यत्स स्वयं पीठमवातरत् । इति केषामपि हृदि प्रवादोऽपि वर्तते ॥४५८॥
सां ब्रह्मप्रतिमां सिद्ध देवी ब्रह्मविदां वरम् । अकारयत्तमुद्दिश्य पराध्यं ब्रह्ममण्डपम् ॥४५९॥
रणारम्भास्वामिदेवौ दंपतिभ्यां व्यधीयत । मठः पाशुपतानां च ताभ्यां प्रद्युम्नसूर्धनि ॥४६०॥

४४० ¹) A, gloss शिवलिङ्गद्वयम ४४३ ¹) Thus A_3, A_4 °पत्र ४५१. ¹)²) Thus corr. by later hand from A_1 तं. °मात्र. पायस ²) Thus A_2, A_4 व्यधु ४५३ ¹) Thus A_1, A_3 °लिङ्गे. ४५५ ¹) Thus corr. by A_3 from A_1 राज्ञा — ²) Thus A_3, A_4 संकेत्या ४५६ ¹) A, gloss हरिहरौ ४५८ ¹) Thus A_3, A_4 प्रवधो ४५९ ¹) Thus corr. by later hand from A_1 स — ²) Thus corr by A_1 from A_1 पराख्य —²) Thus A_3, A_4 °सन्नमम ४६० ¹) A, gloss प्रद्युम्नसूर्धनि शार्ङ्गकार्मिरे

आरोग्यशाला निरघाप्युल्लाघत्वाय रोगिणाम् । तेन सेनामुखीदेवीभयशान्त्यै च कारिता ॥४६१॥
ख्यातिं रणपुरस्वामिसंज्ञया सर्वतो गतम् । स सिंहरोस्सिकाग्रामे मार्तण्डं प्रत्यपादयत् ॥४६२॥
अमृतप्रभया तस्य राज्ञः पत्न्यान्यया कृतः । दक्षिणेस्मिन्रणेशस्य पार्श्वे देवोमृतेश्वरः ॥४६३॥
मेघवाहनभूभर्तृपत्न्या भिन्नाख्यया कृते । त्रिहारेपि तया बुद्धबिम्बं साधु निवेशितम् ॥४६४॥
राज्ञे देव्यसुरक्ताय सानुक्रोशाय सैकदा । पातालसिद्धिदं मन्त्रं ददौ हाटकेश्वरम् ॥४६५॥ 465
मा भून्मोघास्य मत्प्राप्तिरिति मत्वा तयार्पितम् । असाधयत्स तं प्राप्य वशान्तं वत्सरान्बहून् ॥४६६॥
कूर्मवष्टिकापथे कष्टं तपो नन्दिशिलां गतः । भूगिभिर्वत्सरैर्मन्त्रसिद्धेः प्रणयितां ययौ ॥४६७॥
स्वयैश्च सिद्धिलिंगैश्च जाताभङ्गुरनिश्चयः । चन्द्रभागाजलं भित्त्वा नमुचेः प्राविशद्बिलम् ॥४६८॥
बिलेपावृतनतां याते दिवसान्येकविंशतिम् । प्रविश्य पौरान्प्राग्निये दैत्यस्त्रीभोगभोगिताम् ॥४६९॥
एवं स भूपतिर्भुक्त्वा भुवं वर्षशतत्रयम् । निर्वाणक्षाण्यनिर्व्यूढि पातालैश्वर्यमासदत् ॥४७०॥ 470
सानुगे नृपतौ याते दैनेयदयितान्तिकम् । देवी सा वैष्णवी शक्तिः श्वेतद्वीपमगाहत ॥४७१॥
राजवंशेष्वनेकेषु राज्ञोर्वंशद्वये परम् । द्वयोरेवात्र निर्व्यूढि प्रजावात्सल्यमागतम् ॥४७२॥
रणादित्यस्य गोनन्दवंशे रामस्य सार्धवं । लोकान्तरसुखस्यापि ययोरंशभुजः प्रजाः ॥४७३॥
विक्रमाक्रान्तविश्वस्य विक्रमेभ्यरकृत्सुतः । तस्यासीद्विक्रमादित्यस्त्रिविक्रमपराक्रमः ॥४७४॥
राजा ब्रह्मगलूनाभ्यां सचिवाभ्यां समं महीम् । सोपासीद्वासवसमो द्वात्रिंशद्वारिंशतिं समाः ॥४७५॥ 475
चक्रे ब्रह्मगटं ब्रह्मा गलूनो लूनदुष्कृतः । रत्नावल्याख्यया वध्वा विहारं निरमापयत् ॥४७६॥
राज्ञोनन्तरजस्तस्य राजाभूत्तदनन्तरम् । तापितारातिभूपालो बालादित्यो बलोर्जितः ॥४७७॥
लक्षणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् । यत्प्रतापो रिपुस्त्रीणां सनेत्राम्भोभजन्मुखम् ॥४७८॥
आसन्यैरिमनोगाधबोधदण्डा इवाहताः । यस्याद्यापि जयस्तम्भाः सन्ति ते पूर्ववारिधेः ॥४७९॥
प्रभावाङ्कैन वङ्कालाञ्छित्वा येन व्यधीयत । कायस्थैरिकनिवासाय कालम्ब्याख्यो जनाश्रयः ॥४८०॥ 480
कङ्कमारेषु धनोदयमयहारं द्विजन्मनाम् । राजा मडवराज्ये यो भेडराख्यमकारयत् ॥४८१॥
त्रिशां विपाटितारिष्टमरिष्टोत्सादनं व्यधात् । वल्लभा यस्य बिम्बोष्ठी बिम्बा बिम्बेश्वरं हरम् ॥४८२॥
भ्रातरो मन्त्रिणस्तस्य त्रयो मडसुरौकसोः । सेनोश कारका आसन्खड्गशत्रुन्नमालवाः ॥४८३॥
बभूव तस्य भूमर्तुर्भुवनाद्भुतविभ्रमा । तनयानङ्गलेखाख्या भृङ्गारोदधिकौमुदी ॥४८४॥
तां वीक्ष्य लक्षणोपेतां मृगाक्षीं पितुरन्तिके । अमोघप्रत्ययो व्यक्तं व्याजहारेति दैववित् ॥४८५॥ 485
भविता तव जामाता जगतीभोगभाजनम् । स्वदन्तमेत्र साम्राज्यं गोनन्दान्वयजन्मनाम् ॥४८६॥
सुतासंतानसाम्राज्यमनिच्छन्नथ पार्थिवः । दैवं पुरुषकारेण जेतुमासीत्कृतोद्यमः ॥४८७॥

---

४६६ [1]) Thus A, R G वशान्त ; Edd. वसन्त. ४६७ [1]) Thus A.; A_1 तनों ४६८ [1]) Thus corr. by later hand from A_1 चान्द्र° ४७० [1]) Thus corr. by A, from A_1 भूत्वा - °) Thus A_2, A_1 लिंगरम् ४७३. [1]) A_1 gloss वशे —[2]) A_2 gloss वयो रामरणादित्ययो ४७५ [1]) Emended, A R G °गलूरा° ४८० [1]) The words from कालम्ब्याख्यो to कारका in verse 483 have been supplied by A_1 at a later date and in a smaller handwriting, partly in space left for this purpose, partly in margin. ४८१ [1]) Thus corr. by A_2 from A_1 भेरडा°. ४८२. [1]) A_2 gloss रहासाने ४८३. [1]) See note to verse 480 above

अराजान्वयिने दत्ता नेयं साम्राज्यहारिणी । मत्वेति प्रददौ कन्यां न कस्मैचन भूभुजे ॥४८८॥
हेतुं स रूपतामात्रं कृत्वा जामातरं नृपः । अथाश्वघासकायस्थं चक्रे दुर्लभवर्धनम् ॥४८९॥
मातुः कार्कोटनागेन सुप्तायाः समीयुषा । राज्यायैव हि संजातो राज्ञा नाज्ञायि तेन सः ॥४९०॥
निश्चिन्वते हि ज्ञमन्या यमेवायोग्यमापदात् । जिगीषयेव तत्रैव निदधाति विधिः शुभम् ॥४९१॥
मात्सर्येण जहद्धैर्यान्विसदृशे धूमध्वजे योग्यतां ज्ञात्वा स्वां निदधच्चिरं दिनपतिर्हास्यः प्रज्ञान्ध्युन्मुखः ।
दैवं वेत्ति न यः शिखी तु परतो नामास्तु तत्संभवाः स्युर्दीपा अपि यद्वशेन जगतस्तिग्मांशुविस्मारकाः ॥४९२॥
धिया भाग्यानुगामिन्या चेष्टमानो नयोचितम् । अभूत्सर्वस्य चक्षुष्यः स तु दुर्लभवर्धनः ॥४९३॥
प्रज्ञया द्योतमानं तं प्रज्ञादित्य इति प्रथाम् । कौवीरभाग्यस्वाम्यं च शनकैः श्वशुरोनयत् ॥४९४॥
पितोः प्रेयस्तयाकृत्तां तारुण्यादिमदेन च । राजपुत्री यथावत्तु गणयामास नैव तम् ॥४९५॥
स्त्रैरिणीसंगमो भोगा युवानोमे पितुर्गृहम् । पत्युर्मृदुत्वमित्यस्याः किं नाभूच्छीलविघ्नकृत् ॥४९६॥
सा नित्यदर्शनाभ्यासाच्छनकैर्विशता मनः । अनङ्गलेखा खट्वेन संप्रायुज्यत मन्त्रिणा ॥४९७॥
ऊनप्रेमसुखाभ्यासनष्टह्रीभीतिसंभ्रमा । धार्ष्ट्यं दिनाहिनं यान्ती ततस्तन्मयतां ययौ ॥४९८॥
स मन्त्री दानमानाभ्यां वशीकृतपरिच्छदः । अन्तःपुरे यथाकामं विजहार तया सह ॥४९९॥
उपलेभे च शनकैस्तस्यास्तं शीलविप्लवम् । विरागलिङ्गैरुच्चद्भिर्धीमान्दुर्लभवर्धनः ॥५००॥
सखीमध्ये रहः स्मेरा विवर्णा भर्तृदर्शने । अकाण्ड एव प्रोत्थाय पश्यन्ती सस्मितं पथः ॥५०१॥
पत्युः कोपे कृतावज्ञा भ्रुनेत्रविनुकाञ्चनैः । तदप्रियं भाषमाणे सस्मितं न्यस्तलोचना ॥५०२॥
तत्तुल्यगुणनिर्वर्ण्णा तद्विपक्षस्तुतौ रता । रिरंसां तस्य संलक्ष्य सखीभिर्बद्धसंकथा ॥५०३॥
तच्चुम्बने भुग्नकण्ठी तदाश्लेषसहाङ्गका । तत्संभोगे त्यक्तहर्षा तत्तल्ये व्याजनिद्रिता ॥५०४॥
भवेद्धि प्रायशो योषित्प्रेमविक्रीतचेतना । निवेदयन्ती दौःशील्यपिशाचावेशवैकृतम् ॥५०५॥ कुलकम् ॥
निगूढदारदौरात्म्यचिन्ताक्रशवपुस्ततः । शुद्धान्तमविशज्जातु निशि दुर्लभवर्धनः ॥५०६॥
सोपश्यत्सुरतक्लान्तिसुलभस्वापनिःसहाम् । दुर्जारभर्तुरङ्केषु प्रत्युप्तामिव वल्लभाम् ॥५०७॥
श्वासैरगलितावेगैः कम्पयद्भिः कुचाङ्कुरौ । निवेदयन्तीं तत्कालमेव निर्वृतिं रतेः ॥५०८॥
अन्यस्यापि कुधो हेतुं पुनरप्यक्षमावहाम् । तां तथावस्थितां वीक्ष्य स प्रजज्वाल मन्युना ॥५०९॥
प्रजिहीर्षुः स रोषेण विमर्शेन निवारितः । प्रहत्येव प्रहत्येव निवृत्तं स्वममन्यत ॥५१०॥
ततस्तथाविधः क्षुभ्यत्प्रकोपावेशसागरः । विचारवेलया तस्य बलाच्छममनीयत ॥५११॥
नमस्तस्मै ततः कोन्यो गण्यते वह्निनां धुरि । जीर्यन्ते येन पर्याप्ता ईर्ष्याविषविषूचिकाः ॥५१२॥
सोचिन्तयदहो कष्टाभेष्टारागानुगा इमाः । विचारवन्ध्याः क्षिप्यन्ते क्षिप्रं याभिरधो नराः ॥५१३॥

---

४८८. [1]) A, gloss न्यूनकुलोद्वहाय दत्ता. ४८९. [1]) कृत्वा जामा supplied by A, in space left by A,. ४९०. [1]) Thus corr by A, from A, समेयुषा.—[2]) Thus corr. by A, from A, सा. ४९२ [1]) Emended; A R G जहन्म°—[2]) Thus A,, A, स.—[3]) A, gloss दूरे इत्यर्थ ४९५ [1]) A, gloss उज्झितमर्यादा. ४९७ [1]) Emended, A सप्रयु°. ४९९ [1]) A, समम ५००. [1]) The text from मान्दुर्लभवर्धन to the end of verse 507 below has been supplied by A, partly in space left by A,, partly in margin. ५०४. [1]) Emended with Edd, A °निद्रता. ५०७. [1]) A, दुर्जात°, with v. l. as above.—[2]) See note to verse 500 above. ५०८. [1]) Thus corr. by A, from A, °न्ती ५१३. [1]) Thus corrected by A, from A, कष्टा अंष्टा°.

खीति नामेन्द्रियार्थोयमिन्द्रियार्था यथा परे । नथैव सर्वसामान्या वशिनामत्र काः कुधः ॥५१४॥
निसर्गतरला नारीः को नियन्त्रयितुं क्षमः । नियन्त्रणेन किं वा स्यात्तस्तां स्मरणोचितम् ॥५१५॥ 515
यः श्रुतेरिव संघर्षं एकार्थाभिनिविष्टयोः । रागिणोर्यदि मानः स कोवमानस्ततः परः ॥५१६॥
ममकारो मृगाक्षीषु क इवायं सचेतसाम् । स्वदेहेनुपपन्नोपि यः सोन्यत्र कथं मतः ॥५१७॥
उद्वेगोत्पादनादेषा वध्या चेन्प्रतिभाति मे । रागस्तद्विस्मृतः कस्मान्मूलमुद्वेगशालिनः ॥५१८॥
सप्रपातालनिक्षिप्तमूलो रागमहीरुहः । भूमिभूतमनुत्पाद्य द्वेषमुन्मूल्यते कथम् ॥५१९॥
द्वेषो नामैष दुर्धर्षो जितो येन विवेकिना । क्षणार्धेनैव रागस्य तेन नामापि नाशितम् ॥५२०॥ 520
वीक्ष्यैतद्विध्या दृष्ट्वा रागिणां वाच्यमौषधम् । ईर्ष्या जेया ततो रागः स्वयमाशाः पलायते ॥५२१॥
इति ध्यात्वालिखद्वर्णान्खड्गस्यांशुकपल्लवे । वध्योपि न हतो यस्त्वं स्मर्तव्यं तत्तवेत्यसौ ॥५२२॥
जनैरलक्ष्यमाणेथ याते दुर्लभवर्धने । त्यक्तनिद्रः स मन्त्री तंदृष्ट्वा वर्णानवाचयत् ॥५२३॥
वाक्षिण्यात्प्राणदस्यास्य खड्गः स मनसा तदा । विसस्मारानङ्गलेखां दध्यौ तु प्रत्युपक्रियाम् ॥५२४॥
नस्योपकर्तुरुचितं प्रतिकारमिच्छोश्चिन्ताविशत्र तु मनः स्मरबाणपंक्तिः ।
दृग्गोचरे परिचयप्रणयं प्रपेदे निर्निद्रता न तु कदाचन राजपुत्री ॥५२५॥ 525
भुक्त्वा सप्तत्रिंशतिमब्दान्स चतुर्भिर्मासैरेन्ध्यां मूर्धनि रत्नं नृपतीनाम् ।
तस्मिन्काले लोकमवापोज्ज्वलकृत्यो बालादित्यो बालशशाङ्कांकितमौलेः ॥५२६॥
पूर्वं विपन्ननयेभिजनस्य शेषे गोनन्दसंततिरजायत तत्र शान्ते ।
प्रारब्धन्तिभुग्नलिनाथ हठप्रविष्टतोयौघपाटितबिसा नलिनीव दीना ॥५२७॥
अथ शिथिलितमुख्यामात्यवैमत्यवित्रः कनकघटविमुक्तैः पात्रनं तीर्थतोयैः ।
कथमपि स कृतज्ञो राजजामातुरुच्चैर्व्यधित विधिवदिष्टं मूर्धि राज्याभिषेकम् ॥५२८॥
कार्कोटप्रभवः प्रभुः स मुकुटप्रत्युप्तमुक्ताकणद्योतश्रेणिकणाङ्कुराङ्कितबृहद्बाहुर्महीमुद्वहन् ।
ज्ञातिप्रीतिसतोषशेषफणभृत्संफुल्लदृक्पल्लवन्यासावर्जकहाटकाङ्गपटलस्रग्धामशोभोभवत् ॥५२९॥
अथ विगलिता गोनन्दोर्वीभुजोभिजनाच्छुचेरतिशुचिनि भुः कार्कोटाहेः कुले व्यधित स्थितिम् ।
चिरपरिचितात्स्वर्गाभोगाध्वनः पतन श्रिता त्रिभुवनगुरोः शंभोर्मौलाविवामरनिम्नगा ॥५३०॥ 530

१० ॥ ५३६ ॥ आदित्य ५३ ॥ ग्रं १०६९॥

इति श्रीकाश्मीरिकमहामात्यश्रीचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां तृतीयस्तरङ्गः ॥[1]

---

५२६. [1]) A_3 gloss विरोध.. ५२२. [1]) Thus corr. by A_3 from A_1 न्यस्तस्था . ५२३ [1]) मन्त्री त supplied by A_3 in space left by A_1. ५२४. [1]) तदा त्रि supplied by A_3 in space left by A_1. ५२६ [1]) Thus A_1, altered by A. to समार्चि° — [2]) A_3 gloss ऊनामित्यर्थः. ५२७. [1]) A_3 gloss तस्मिन् ५२८. [1]) A_3 gloss खड्ग. ५२९. [1]) Thus corr by A_3 from A_1 कर्कोट° *Colophon.* [1]) A_1 adds here लिखितश्चैष मया राजानकरत्नकण्ठेन

॥ चतुर्थस्तरङ्गः ॥

तद्दीतव्यतिरेकमद्रितनयादेहेन मिश्रीभवन्निष्पत्यूहमिह व्यपोहतु वपुः स्थाणोरभद्राणि वः ।
वेष्णा भोगिवधूशरीरकुटिलश्यामत्विषा वेष्टिता जूटाहेरपि यत्र भाति दयितामूर्त्येव पृक्ता तनुः ॥१॥
स मही राजकन्यां च प्राप्तवानेकतः कुलात् । रत्नानां च सुतानां च राजाभूद्राजनं शनैः ॥२॥
पतिगोपितदौःशील्या तुल्यसौभाग्यगौरवा । अनङ्गभवनं चक्रे विहारं नृपतिप्रिया ॥३॥
शिशुरेवायुषोत्पत्यं दैवज्ञोक्तं विचिन्तयन् । राज्ञः सुतो मल्हणाख्यो मल्हणस्वामिनं व्यधात् ॥४॥
पारेविशोककोटादौ प्रदत्तप्रतिपत्तिना । अदीयत द्विजेन्द्रेभ्यश्चन्द्रयामः क्षमाभुजा ॥५॥
श्रीनगर्यां प्रतिष्ठाप्य दुर्लभस्वामिनं हरिम् । षट्त्रिंशता स वर्षाणां क्षमावृषास्तमुपायत्रौ ॥६॥
अनङ्गदेव्यां संभूतस्तस्य दुर्लभकः सुतः । शशास वासवसमस्तनो वसुमतीं कृती ॥७॥
मातामहस्य यो मात्रा दौहित्रस्तनयीकृतः । प्रतापादित्य इत्याख्यां तत्कुलानुगुणां दधे ॥८॥
औडेनेडबिडात्याप्रभिया यन्मन्त्रिणा कृताः । अयहारा हनुमता पुण्यानुमतसंपदा ॥९॥
प्रतापपितापारातिः प्रतापपुरपत्तनम् । मधवन्नगरस्पर्धि दीर्घबाहुर्व्यधत्त सः ॥१०॥
नानादिगन्तरायातत्तत्क्रयिकसंकुले । नोणाभिधोवसत्तस्य देशे रौहीतको वणिक् ॥११॥
रौहीतदेशे जातानां निवेशार्यं द्विजन्मनाम् । महागुणो नोणमठं पुण्यज्येष्ठं चकार सः ॥१२॥
स जातु राजभवने राज्ञा प्रीत्या निमन्त्रितः । अर्चितोभवदेकाहमुपचारैर्नृपोचितैः ॥१३॥
प्रातः सुखासिकां प्रेम्णा पृष्टोथ पृथिवीभुजा । शीर्षव्यथामकथयत्यज्जातां दीपकज्वलैः ॥१४॥
ततः क्रमेण नृपतिस्तेन जातु कृतार्थनः । वसंस्तदास्पदेद्राक्षीत्क्षपायां मणिदीपकान् ॥१५॥
विलासिन्या लक्ष्म्या च तादृक्या तस्य विस्मितः । अथ द्विजाग्यहान्यासीत्तत्रैव स कृताहणः ॥१६॥
एकदा तेन तत्कान्ता व्यलोकि ललिताकृतिः । श्रीनरेन्द्रप्रभा नाम हर्म्ये हिमकरानना ॥१७॥
उरोजपूर्णकुम्भाढ्या सदूर्वाहितविभ्रमा । मूर्तिमन्मङ्गलमिव स्मरस्यं च गृहस्य च ॥१८॥
हर्म्यस्य निर्जनतया स निःशङ्कविहारिणीम् । तां विलोक्यानवद्याङ्गीमभिलाषेण पस्पृशे ॥१९॥
सापि दर्शितमालीभिः किंचित्साचीकृताननां । अपदयत्काद्दयपीकान्तं श्रोत्रविश्रान्तया दृशा ॥२०॥
प्राग्जन्मप्रेमबन्धाढ्या निदेशाद्वा मनोभुवः । सपक्षपातं सा तस्य दृष्टवैव विवशं मनः ॥२१॥
क्षणादलब्धस्पर्शोपि तां सौभाग्यसुधामयीम् । मज्जानमपि संस्पृश्य स्थितामिव विवेद सः ॥२२॥

---

१० [1]) A_3, gloss तापर १२ [1]) A_3, gloss स्थितये. १४ [1]) Thus corr by A_3 from A_1 प्रज्ञाना. १५ [1]) Thus corr by A_3; A_1 seems to have read कृतानन १८. [1]) A_1 gloss सन्तौ च तावुरू सदूरू साभ्या आहितो विभ्रमो यया —[2]) च स्मरस्य supplied by A_1 in space left by A_1 २१ [1]) Thus corr. by A_3 from A_1 निर्देशाद्वा २२ [1]) Thus corr. by later hand from A_1 मज्जानमपि

हर्म्यस्तम्भच्छन्नगात्री क्षणं भूत्वा जगाम सा । व्यावर्त्य वक्त्रं पश्यन्ती पार्थिवं तं मुहुर्मुहुः ॥२३॥
गृहीतहृदयस्तन्व्यास्तावनैव महीपतिः । स चिन्ताजिह्मनयनो राजधानीं शनैर्ययौ ॥२४॥
तत्र तस्य तदाकारध्यानावहितचक्षुषः । सममन्तःपुरप्रीत्या प्रपेदे तानवं तनुः ॥२५॥ 25
अचिन्तयत्स धिक्कष्टं रूढोयमशुभावहः । अस्मिन्मे मानसोद्याने रागनामा विषद्रुमः ॥२६॥
अहो नु सुभगा रागवृत्तिश्चित्तं विजित्य या । विवेकादीन्व्यधाद्दूरे सुहृदः परिपन्थकान् ॥२७॥
भाव्यं कौलीनभीतेन येन भूमिभृता सता । तस्य मे दुःसहः कोयं सदाचारविपर्ययः ॥२८॥
यत्र दारापहरणं राजैव कुरुते विशाम् । परः को नाम तत्रास्तु शासिता नीत्यतिक्रमे ॥२९॥
विमृष्यन्निति भूपालो विस्मर्तुमभवत्क्षमः । न पद्धतिं साधुसेव्यां न च तां दीर्घलोचनाम् ॥३०॥ 30
नमथ प्रथिनास्त्वास्थं नदीयोमरणं वणिक् । स जनाज्ञातवृत्तान्तः सुजनो विजनेब्रवीत् ॥३१॥
इमामवस्थां प्राप्तोसि किं धर्मेण निरुध्यसे । न प्राणसंशये जन्तोरकृत्यं नाम किंचन ॥३२॥
यन्मनागपि प्रतीक्ष्यन्ते विबुधैर्धर्मसंशये । तेषामपीदृशे कृत्ये भूयते संयमव्ययः ॥३३॥
यशोनुरोधादुचितं नापि देहमुपेक्षितुम् । स्वकीर्तिं परासूनां कीर्णां कर्णरसायना ॥३४॥
माभून्मदनुरोधस्ते त्वय्यियर्थे हि पार्थिव । प्राणा अपि न मे गण्या इन्द्रियार्थेषु का कथा ॥३५॥ 35
एवमुक्तेपि नादत्से तां चेत्तत्सा सुरास्पदात् । गृहीतां ननैकीभूत्वा नृत्तज्ञत्वान्मयार्पिता ॥३६॥
तेनेति ब्रयमाणः स वलिना च मनोभुवा । प्राग्लज्जामथ जग्राह कथंचित्तां सुलोचनाम् ॥३७॥
कृत्यैरुदात्तैः सापास्तताद्दक्नारित्वलाघवा । नरेन्द्रमहिषी चक्रे श्रीनरेन्द्रेश्वरं हरम् ॥३८॥
क्रमेण च प्रजापुण्यैश्चन्द्रापीडाभिधं सुतम् । प्रासोष्ट पार्थिववधूर्निधानमिव मेदिनी ॥३९॥
तस्याभिनन्दमालिन्यं स्वच्छैरच्छेदि तद्गुणैः । ज्ञाणादमकषणैः काण्यर्यमाकरोत्थ मणेरिव ॥४०॥ 40
धूमाद्गाढमलीमसाच्छुचि पयः सूते घनस्योद्गमो लौहस्यातिशितस्य जातिरचलात्कुण्ठाश्मसालामयात् ।
किंचात्यन्तजडाज्जलाद्युतिमतो ज्वालाध्वजस्योद्भवो जन्मावन्ध्यनुकारिणो न महतां सत्यं स्वभावाः क्वचित् ॥४१॥
तारापीडोपि तनयः क्रमात्तस्यामजायत । अवित्रिमुक्तापीडनामा मुक्तापीडोपि भूपतेः ॥४२॥
वज्रादित्यादयादित्यललितादित्यसंज्ञकाः । प्रतापादित्यजाः ख्याताश्चन्द्रापीडादयोपि ते ॥४३॥
वर्षान्पञ्चाशतं भुक्त्वा भुवं दुर्लभभूपतिः । पुण्यनिःश्रेणिभिः पुण्यामारुरोह दिवं शनैः ॥४४॥
राजचूडामणिः श्रीमांश्चन्द्रापीडस्ततोभवत् । पीडितेन्दुत्विषा कीर्त्या कॅल· पीडां चकार यः ॥४५॥ 45
एकपादाकृतिर्धर्मः समस्येवोज्झितो नृपैः । शुद्धश्लोककृता येन पादैः संयोजितस्त्रिभिः ॥४६॥
यं क्षमाविक्रममुखाः परस्परविरोधिनः । सिषेविरे गुणास्तुल्यं दिव्योद्यानमिवर्तवः ॥४७॥
स्थाने स्थाने यदीया श्रीस्तुल्यमाप्यायय॰न्त्यभूत् । द्रुमानुद्यानकुल्येव निखिलाननुजीविनः ॥४८॥
दोषांस्त्यक्त्वान्यभूपेषु यं भुक्ता श्रीरशिश्रियत् । मार्गाद्विचोषकालुष्यं क्षिप्त्वा सिन्धुरिवार्णवम् ॥४९॥

२८. [1]) चार supplied by A, in space left by A, २९. [1]) सिता supplied by A, in space left by A, ३०. [1]) पार्थो supplied by A, in space left by A, ३४. [1]) Thus corr by A, from A, °दुर्वत्त—[2]) Thus corr by A, from A, कीर्णक° ३६. [1]) A, तत्रा —[2]) A, gloss देवगृहात ४०. [1]) A, gloss कुलवांश —[2]) Thus corr by A, from A, ककर्ण ४५. [1]) Thus corr. by A, from धूमोद्गा° —[2]) Thus corr by A, from A, °ध्वलस्यो° —[3]) Thus A, with A, gloss भूमि R G Edd. wrongly जन्मावन्ध्य°

कार्यज्ञो यो न तच्चक्रे यत्फलेभूद्विविप्रधीः । परं समाचरन्स्तुत्यं स्तूयमानस्त्वपां दधे ॥५०॥
व्यनीयत न योमात्यैर्विनयं तान्स्वशिक्षयन् । वयं न भिद्यते कैश्चिद्भिन्नत्यन्यान्मणींस्तु तत् ॥५१॥
यस्यांधर्ममयादासीत्सत्याज्यो धर्मसंशये । निजोपि पक्षः कुलिशत्रासादिव गरुत्मतः ॥५२॥
न्याय्य दर्शयता वर्त्म तेन राज्ञा प्रवर्तिताः । स्थितयो वीतमन्देहा भास्वतेव दिनक्रियाः ॥५३॥
नियन्त्रितां यद्गणितिस्तदुणोदीरणादियम् । अतिप्रसङ्गभङ्गात्तन्नेयत्तावाप्तितः पुनः ॥५४॥
तस्य त्रिभुवनस्वामिप्रासादारम्भकर्मणि । चर्मकृत्कोपि न प्रादात्कुटीं क्षेत्रोपयोगिनीम् ॥५५॥
शश्वत्प्रतिश्रुतार्थानां नवकर्माधिकारिणाम् । नैसर्गिकाप्रहयस्तः सत्रापातं न चक्षमे ॥५६॥
विज्ञापितोथ तैरेत्य तमर्थं पृथिवीपतिः । तानेव सागसो मेने चर्मकारं न तं पुनः ॥५७॥
सोभ्यधात्तान्धिगेतेषामपेक्षापूर्वकारिताम् । प्रागेव वैरपृष्ट्वा तं प्रविष्टं नवकर्मणि ॥५८॥
नियम्यतां विनिर्माणं यद्वान्यत्र विधीयताम् । परभूम्यपहारेण भुकृतं कः कलङ्कयेत् ॥५९॥
ये द्रष्टारः सदसतां ते धर्मविगुणाः क्रियाः । वयमेव विदध्मश्चेद्यातु न्यायेन कोध्वना ॥६०॥
इत्युक्तवति भूपाके प्रेषितो मन्त्रिपर्षदा । पार्श्वात्पादकृतंस्तस्य दूतः प्राप्तो व्यजिज्ञपत् ॥६१॥
इच्छति स्वामिनं द्रष्टुं स च ब्रूते न चेन्मम । युक्तः प्रवेश आस्थाने बाह्यान्यवसरेस्तु तत् ॥६२॥
अन्येद्युरथ भूपेन स बहिर्दत्तदर्शनः । पुण्यकर्मणि नो विद्मः किं त्वमेवेत्यपृच्छयत ॥६३॥
प्रतिभाति गृहं तच्चेद्रम्यं तत्र ततोधिकम् । तदर्प्यतां धनं यावि मूर्येवं चाप्यधीयत ॥६४॥
तूष्णीं स्थितं ततो भूपं चर्मकारो व्यजिज्ञपत् । दन्तांशुभिर्वेस्तत्सत्त्वमानं ज्ञातुमिवोद्यतः ॥६५॥
राजन्विज्ञाप्यते[1] किंचिद्यदस्माभिर्यथाशयम् । न स्थेयमत्रलिप्तेन तत्र द्रष्टा सता त्वया ॥६६॥
नाहमूनः शुनो नासिं काकुत्स्थात्पार्थिवः पृथुः । क्षुभ्यन्तीवाद्य तत्सभ्याः संलोपेस्मिन्किमावयोः ॥६७॥
जातस्य जन्तोः संसारे भङ्गुरः कायकञ्चुकः । अहंताममतारूढ्याभ्यां शङ्कुभ्यामेव बध्यते ॥६८॥
कङ्कुण्या इव दक्षारादिशोभिनां भवतां यथा । निर्विकल्पनानामस्माकं स्वदेहेहक्रिया तथा ॥६९॥
देवस्य राजधान्येषा यादृशी सौधहासिनी । कुटी घटमुखानद्धतमोरिस्तादृशी मम ॥७०॥
आ जन्मनः साक्षिणीयं मातेव सुखदुःखयोः । मटिका लोठ्यमानाथ नेक्षितुं क्षम्यते मया ॥७१॥
नृणां यद्देहमहरणे दुःखमाख्यातुमीश्वरः । तद्दिमानच्युतोमर्त्यो राज्यभ्रष्टोथ पार्थिवः ॥७२॥
एवमप्येत्य मद्देहं सा चेद्देवेन याच्यते । सदाचारानुरोधेन दातु तदुचितं मम ॥७३॥
इति तेनोत्तरे दत्ते भूभृद्दत्वा तदास्पदम् । कुटीं जग्राह वित्तेन नाभिमानः शुभार्थिनाम् ॥७४॥
अथाचचर्मकारस्तं तत्र स व्यञ्जिताञ्जलिः । राजन्धर्मानुरोधेन परवत्ता तवोचिता ॥७५॥
अत्रिग्रहेण धर्मेण पाण्डुसूनोः पुरा यथा । धार्मिकत्वं तथा तेद्य मयास्पृश्येन वीक्षितम् ॥७६॥
स्वस्ति तुभ्यं चिरं स्थेया धर्म्या वृत्तान्तपद्धतीः । दर्शयत्तीदृशीः शुद्धाः श्रद्धया धर्मचारिणाम् ॥७७॥

---

५० [1]) Thus A., A_1 चिरस्तुत्य. ५१ [1]) Thus A_3, A_1 मान्यैर्वि G R add follow A_3.—[2]) A_3 gloss रत्नैः. ५२. [1]) Thus corr by A. from A_1 वस्य धी —[2]) Thus A_3 A_1 °त्मना ५३ [1]) A_1 gloss सन्देहा नाम राजसविशेषाश्च. ५४ [1]) A_1 gloss अस्मानि ६१ [1]) A_1 gloss चर्मकारस्य ६६ [1]) A_3 विज्ञप्यसे —[2]) Thus corr by A, from यथाशयम् ६७. [1]) A_3 नासि ७३. [1]) A_3 उपेत्य.—[1]) Thus corr by later hand from A, देव म , A_3 gloss वृषेण ७५ [1]) A_1 तत.. ७६. [1]) A, मयाऽस्पृश्येन , A_3 gloss अधमेन

एवं निष्कलमषाचारः स चक्रे पावनीं भुवम् । राजा त्रिभुवनस्वामिकेशवस्य प्रतिष्ठया ॥७८॥
कृत्यैः प्रकाशदेव्याख्या प्रकाशाकाशकान्तिभिः । प्रकाशिकाविहारस्य तत्पत्नी कारयिष्यभूत् ॥७९॥
गुरुर्मिहिरदत्ताख्यस्तस्योदात्तगुणोऽभवत् । विश्वंभरस्यं गम्भीरस्वामिनामो[1] विधायकः ॥८०॥ 80
सर्वाधिकरणस्थैर्यौच्छेत्ता छलितकाभिधः । नगराधिकृतस्तस्य छलितस्वामिनं व्यधात् ॥८१॥
कदाचन सभासीनं पृष्टा धर्माविकारिभिः । प्रायोपविष्टा राजानं ब्राह्मणी काचिदब्रवीत् ॥८२॥
त्वयि प्रशासति महीमहो गर्हानिबर्हणे । सुखमुग्रस्य मे पत्युर्वृत्तं केनापि जीवितम् ॥८३॥
एषैव महती लज्जा सदाचारस्य भूपतेः । यदकालभवो मृत्युस्तस्य संस्पृशति प्रजाः ॥८४॥
कलिकालबलार्ज्जेस्वादृशैरपि दृश्यते । पापात्पापतरंमुष्मिन्दोषे कथमुदास्यते ॥८५॥ 85
चिन्तयन्त्यपि नावैमि मर्तुः कंचिद्विरोधिनम् । निर्दोषस्य हि तस्यासन्सर्वतः शीतला दिशः ॥८६॥
अनसूयो निरुत्सेकः प्रियवाग्गुणवत्सलः । पूर्वाभिभाषी निर्लोभो न विद्वेष्यो हि कस्यचित् ॥८७॥
तस्य तुल्यवया बाल्यात्प्रभृत्यध्ययनेधमः । माक्षिकस्वामिवास्तव्यो विप्रः शङ्कुरोभिचारवित् ॥८८॥
गुणदारिद्र्यनिर्विण्णैः क्षुद्रैः कौशलशालिनाम् । प्रसिद्धिस्पर्धया वन्ध्यैर्बाध्यन्तेसूयया सदः ॥८९॥
नाशुभ्रलेखो दुःशीलो नाद्रोही नित्यशङ्कितः । नावाचालो मृषाभाषी नाकायस्थः कृतघ्नधीः ॥९०॥ 90
नादातृगृहजो लुब्धो नानीर्ष्यो नित्यदुःखितः । नार्ज्जितः सर्वहार्यो नावृद्धः स्त्रिग्धभाषितः ॥९१॥
नानन्यजः पितृद्वेषी नारागी निरपत्रपः । नाक्षुद्रविद्यः पापीयानिति भूतार्थसंग्रहः ॥९२॥ तिलकम् ॥
इत्युक्तवत्यां ब्राह्मण्यां तच्छङ्कावसतिं द्विजम् । आनीय परिभुज्यैनंन्यभ्यधाद्भूमुपाधिपः ॥९३॥
भूयो ब्राह्मण्यवादीत्तं स्यात्स्वार्थोदविघ्नया । निःसंभ्रमः स्तम्भयितुं दैवं दिव्यक्रियामयम् ॥९४॥
म्लायद्वक्त्रं हवावादीत्तनस्तां[2] मेदिनीपतिः । अदृष्टदोषे किं कुर्मो वयमत्राधिकारिणः ॥९५॥ 95
नान्यस्मिन्नपि दण्डस्य प्रसङ्गोनिश्चितागमि । किं पुनर्ब्राह्मणे दण्डो यो द्वेषिभि वध विना ॥९६॥
उल्लेखति विरते तस्मिन्द्विजजायाब्रवीत्पुनः । चतस्रः क्षणदाः क्षीणा राजन्नत्रास्य मे[3] ॥९७॥
नान्वगां परिणेतारं हन्तुः प्रतिचिकीर्षया । तत्रावेहितदण्डेस्मिन्मय्यनाम्यनशूनेरमून् ॥९८॥
तथा स्थितायां ब्राह्मण्यां कृतप्रायोपवेशनः । स्वयं त्रिभुवनस्वामिपादानुद्दिश्य सोभवत् ॥९९॥
त्रिरात्रोपोषितं तत्र राजानं रजनीक्षये । स्वप्नेस्वप्नोत्तमोवोचत्सत्योक्ति सत्यवाहनः । १००॥ 100
ईदृङ् युज्यते राजन्सत्यस्यान्वेषणं कलौ । निशीथे[4] कस्य सामर्थ्ये कर्तुं दिवि विकर्तनम् ॥१०१॥
भवच्छत्रयंनुरोधेन सकृदेतत्प्रवर्त्यते । मत्प्रासादाङ्गनमुष्मिन्शालिचूर्णैः विकीर्यताम् ॥१०२॥
प्रदक्षिणं कुर्वतोस्य त्रिरत्र यदि दृश्यते । ब्रह्महत्यापादमुद्रा पादमुद्रानुयायिनी ॥१०३॥

८० [1]) A_3 gloss नारायणस्य —[2]) A_2 gloss गम्भीरसङ्गम ८३ [1]) A_1 *caria lectio* मत्पत्नु ८५ [1]) A_3 gloss अकालमरण ८७. [1]) A_3 gloss निरहङ्कार ८९ [1]) A_3 gloss रहिते ९५ [1]) Thus corr by later hand from A_1 तं ९६ [1]) A_3 gloss भूदाशौ —[2]) A_3 gloss सति ९७ [1]) Thus A_3, A_1 राजन्नपि न शम्यते १८. [1]) A_3 gloss नन्तरि १०० [1]) A_3 glosses नारायणः and सत्यस्तु गरुडे ध्रुवे १०१. [1]) Thus corr. by A_3 from A_1 निशीथे —[2]) A_3 gloss सूर्ये १०२. [1]) A_3 भवच्छत्रय° —[2]) A_3 gloss पिष्टम १०३ [1]) A later hand, not met with elsewhere adds in margm of A the following note ब्रह्महत्या इति । य. काश्चिद्ब्रह्महत्या करोति तस्य ब्रह्महत्या मूर्तिमती अदृष्टा वा अनुगामिनी भवति । दुहितर्गारश्छेदेन महादेवत्व । इत्यभिप्रायवानाह ब्रह्महत्यादि विकीर्णे शालिचूर्णे प्रासादाङ्गने त्रि परिक्रम्य यदि ब्रह्महत्याया. कृत्याविशेषस्य पादमुद्रा चरणस्थापनमुद्रायुगल अस्य वधकस्य पादमुद्रानुगामिनी दृश्यते । ब्रह्महत्याचरणमुद्रा वधकद्विजपादद्वयमुद्रा च यद्यनुभवविषयीभवति तर्हि एष एव द्विजो वधक. तर्हि शालिचूर्णोक्तेन ने पादचारोदश्य कार्यायतस्य. तेनानुमान । अनेनैव वधः कृत यत पादमुद्राद्वय भधिक जात । एवं ब्रह्महत्याचरणमुद्रा युगच्छतीति स्वय भगवता उपाय सूचित —[2]) A_3 gloss द्विजमस्तिष्क

तदेष वधको कृत्वा सदृशं दण्डमर्हति । राज्ञावेष विधिः कार्यो द्विजे पापहृदर्यमा ॥१०४॥
अथ तत्कारयित्वा स दृष्टदोषे द्विजन्मनि । दण्डं दण्डधरश्चक्रे द्विजत्वाद्धर्वार्जितम् ॥१०५॥
महीमधोना भर्तृत्वे तस्मिन्विहितशासने । ततो द्विजन्मजाया सा कृताशीरभ्यधादिदम् ॥१०६॥
इयत्यवनिभृत्सर्गे गूढपापानुशासनम् । कार्तवीर्यस्य वा दृष्टं तव वा पृथिवीपते ॥१०७॥
दण्डधारे त्वयि क्ष्माप क्षितिमेतां प्रशासति । को वैरक्षेहयोः पारमनासाद्यावसीदति ॥१०८॥
इत्थं कृतयुगध्येयैर्धर्म्यवृत्तान्तवस्तुभिः । स्वल्पोपि राज्यकालोस्य पर्याप्तैः पर्यपूर्यत ॥१०९॥
स्रष्टुर्विष्टरपाथोजसंसर्गेण निरर्गलः । निर्विडं जडिमा जाने व्यधत्त धिषि संनिधिम् ॥११०॥
विभक्तवर्णशोभस्य तस्यासावन्यथा कथम् । माहेन्द्रस्येव धनुषो विदधे दृष्टनष्टताम् ॥१११॥
कारयित्वाभिचारं तं निग्रहोग्ररुषं द्विजम् । तं यशःशेषतामीशं तारापीडोनुनोनयत् ॥११२॥
दुष्कर्मदुर्भगान्भोगान्भोक्तुं पापा गुणोज्झितम् । मूत्रन्ति कण्टकान्प्राप्तुं करभा इव केतकम् ॥११३॥
ततः प्रभृति भूपानां राज्येच्छूनां गुरून्प्रति । दुष्टाः प्रवृत्ता राज्येस्मिन्नभिचारादिकाः क्रियाः ॥११४॥
श्रीचन्द्रापीडदेवस्य तत्क्षमित्वमपधिमम् । संस्मर्यमाणं कुरुते न कस्योत्पुलकं वपुः ॥११५॥
मुमूर्षुर्यत्स लब्धापि तं कृत्यांधायिनं द्विजम् । वराकेन्यप्रयुक्तेस्मिन्को दोष इति नावधीत् ॥११६॥
विस्मृतः स कृतक्ष्माभृत्पङ्क्तिमध्येथ वेधसा । दत्त्वा काकपदं नूनं न्यस्तः कलिनृपावली ॥११७॥
अष्टौ वर्षान्साष्टमासाननुगृह्येति मेदिनीम् । प्रविवेश वशी स्वर्गमनिर्वा च सतां मनः ॥११८॥
भ्रातृद्रोहान्नसुहृदां प्रतापेन भयावहः । उवाह तारापीडः स चण्डः क्ष्मामण्डलं ततः ॥११९॥
पूर्णपात्रप्रतिभटं द्विषां लुण्ठयता यशः । शिशोः प्रतापस्योत्पत्तौ कबन्धा येन नर्तिताः ॥१२०॥
तस्यातिदुष्टचेष्टस्य लक्ष्मीर्दीप्तापि सर्वतः । अभूदुद्वेगजननी श्मशानाग्नेरिव द्युतिः ॥१२१॥
मन्त्रैः प्रभावसंनिध्यं देवानां क्रियते द्विजैः । मत्वेति देवद्वेषी स द्विजानां दण्डमत्यजत् ॥१२२॥
मासं षड्भिर्दिनैरूनं चतस्रश्च समा भुवि । स प्राभवद्गुरुद्रोहपरोहस्सुकृतात्ययः ॥१२३॥
अथ गृहाभिचारेण विहितायुःक्षयो द्विजैः । स भ्रातुः सदृशीं शान्तिं प्रपेदे न पुनर्गतिम् ॥१२४॥
योयं परापकरणाय सृजन्त्युपायं तेनैव तस्य नियमेन भवेद्विनाशः ।
धूमं प्रसौति नयनान्धकरं यमग्निर्भूत्वाम्बुदः स शमयेदसलिलैस्त्वमेव ॥१२५॥
राजा श्रीललितादित्यः सार्वभौमस्ततोभवत् । प्रादेशिकेश्वरस्रष्टुर्विषेर्बुद्धेरगोचरः ॥१२६॥
प्रतापांशुच्छटाकूटैः पटवाससधर्मभिः । जम्बुद्वीपाद्विपेन्द्रस्य येनातन्यत मण्डनम् ॥१२७॥
नयाञ्चलिषु बद्धेषु राजभिर्विजयोद्यमे । पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः ॥१२८॥
विनिःसरज्जनतया भयाद्भर्भानिवासुचन् । द्विषां वसतयो यस्य निशम्यास्कन्ददुन्दुभिम् ॥१२९॥

---

१११. [1]) A, gloss ब्रह्मा जाडय विना —[2]) A, gloss भावो वृद्धः पश्चात्व. ११३. [1]) A, gloss उच्चाटना. ११७ [1]) A, gloss चन्द्रापीड कृतयुगराजपङ्क्तिमध्ये —[2]) A, gloss काकपदं काकढेखा । इति भाषया लिखितेयं +. ११८. [1]) A, स्वर्गं विषद (°विषाद) ११९ [1]) A, भ्रातृद्रोहासुसुहृदा —[2]) Thus corr by A, from A, उवाच.— [1]) Thus A, . A, मण्डली. १२०. [1]) A, gloss सदश १२२ [1]) A, gloss अभिषविन्यर्थ १२३. [1]) Thus corr. by A, from A, मासं.—[2]) A, gloss पुण्यनाश १२४ [1]) The text from here to नयनान्धकर यम in following verse has been supplied by A, in space left by A,. १२५ [1]) See note to preceding verse.

विलोलतिलकान्तैर्यः सनेत्राम्भोभिराननैः । निशापाङ्गालेदानानि द्विषां नारीरकारयत् ॥१३०॥ 130
क्षिति प्रदक्षिणयन्नेत्रैरिव महीपतेः । जिगीषोः प्रायशस्तस्य यात्रास्वेव वशं ययौ ॥१३१॥
कर पूर्वदिशो गृह्णन्प्रतापालसनिधौ । अन्तर्वेद्यां महाराजः स्वकीर्त्युष्णीषभृद्भवौ ॥१३२॥
[अन्यानां यत्र कुब्जत्व व्याधाद्याधिपुरे मरुत् । तत्रैव शंसनीय. स पुंसां चक्रे भयस्पृशाम् ॥१३३॥
यशोवर्मादित्यान्या· क्षणात्कुर्वन्विशोषणम् । नृपतिर्ललितादित्यः प्रतापादित्यतां ययौ ॥१३४॥
मतिमान्कन्यकुब्जेन्द्रः प्रत्यभात्कृत्यवेदिनाम् । दीप्त यल्लालितादित्यं पृथ्वं दक्षान्यवेक्षत ॥१३५॥ 135
तत्सहायास्तेनाप्यासन्निकाममभिमानिनः । कुसुमाकरनेत्युद्यैः सुरभिश्चन्दनानिलैः ॥१३६॥
श्रीयशोवर्मणः संधौ सांधिविग्रहिको न यत् । नयं नियमनालेखे मित्रशर्मास्य चक्रमे ॥१३७॥
सोभूत्सधिर्यशोवर्मललितादित्ययोरिति । लिखितेनादिनिर्देशादर्हत्वं विदन्नभोः ॥१३८॥ युगलकम् ॥
सुदीर्घविग्रहाशान्तैः सेनानीभिरसंयितां । औचित्यापेक्षतां तस्य क्षितिभृद्दृहमन्यत ॥१३९॥
प्रीतः पञ्चमहाशब्दभाजनं तं व्यधत्त सः । यशोवर्मनृपं तं तु समुलमुदपाटयत् ॥१४०॥ 140
अष्टादशानामुपरि प्राक्सिद्धानां तदुद्भवैः । कर्मस्थानैः स्थितिः प्राप्ता ततः प्रभृति पञ्चभिः ॥१४१॥
महाप्रतीहारपीठां स महासंधिविग्रह· । महाश्वशालापि महाभाण्डागाराश्च पञ्चमः ॥१४२॥
महामाधनभागधेयेत्था यैरभिधाः श्रिता· । ज्ञाह्निमुख्या येष्वभवन्नध्यक्षाः पृथिवीभुजः ॥१४३॥
कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः । जितो ययौ यशोवर्मा तदुणस्तुतिवन्दिताम् ॥१४४॥
किमन्यत्कन्यकुब्जोर्वी यमुनापारतोस्थ सा । अभूदाकालिकातीरे गृहप्राङ्गनवद्वने ॥१४५॥ 145
यशोवर्माणमुल्लङ्घ्य हिमाद्रिमिव जाह्नवी । सुखेन प्राविशत्तस्य वाहिनी पूर्वसागरम् ॥१४६॥
पड्यद्विर्तन्मत्तयूथां सेर्ष्याधोरणभर्त्सनैः । तन्मातङ्गैः कलिङ्गेभ्यः कथंचित्प्रस्थितं पथि ॥१४७॥
आकृष्टलक्ष्मीपर्यङ्कदन्तिसङ्ख्यादिवागताः । अशिश्रयंस्तं निःशेषा दन्तिनो गौडमण्डलात् ॥१४८॥
कटकेभघटाहस्तकृतवीचिकचग्रहः । अदृश्यतापगैन्तस्थ गृहीतः पूर्ववारिधिः ॥१४९॥
वनराजिश्यामलेन दिशं वैवस्वतादिताम् । स प्रतस्थेथिंतीरेण तत्कृपाणेन तु द्विषः ॥१५०॥ 150
तस्योर्ध्वजूटाः कर्णाटा· कृतप्रणतयोनयन् । सुवर्णकेतकीस्थल्का प्रतापमवनंसताम् ॥१५१॥
तस्मिन्प्रयाते रट्टाख्या कर्णाटी चटुलेक्षणा । अपासीसूपतिर्भूत्वा पृथुश्रीर्दीक्षणापथम् ॥१५२॥
विन्ध्याद्रिमार्गाः पर्याप्ता निष्पर्यन्तप्रभावया । दर्शयंत्र तया देव्या कृता निहतकण्टकाः ॥१५३॥
ललितादित्यपादाब्जनखदर्पणमण्डले । स्वमूर्ति वीक्ष्य संक्रान्तां प्रणता सापि तिष्ठिये ॥१५४॥

---

१३० [1]) Thus corr by A_2 from A_1 °कारयत्. १३२ [1]) A_2 gloss प्रयागतेशे गङ्गायमुनयोरन्तरालभूमिरन्तर्वेदि. १३३ [1]) A_1 gloss कुब्जत्व १३४ [1]) A_1 प्रत्यादित्यता १३८ [1]) A_2 gloss स मित्रशर्मा.—[2]) युगलकम् added by A_2 १३९ [1]) Thus corr by later hand from A_1 °तम —[2]) Thus A G R, Edd °पेक्षिता. १४० [1]) A_1 has left before this verse a blank space for four lines, writing in the middle न किंचिल्लिख्यते १४३ [1]) Thus A G R perhaps to be emended to धी· Cf. मनोवर्मीसारपीठाधिकार iv 485 १४५ [1]) Thus corr by later hand from A_1 कान्य· —[2]) तान्य sic and कान्ति supplied by A_2 in spaces left by A_1.—[3]) Thus A_1, A_2 अभूदशालि, altered by later hand to अभूत्शालि· १४९ [1]) — [2]) Three words have been written twice by A_1, at the end of fol 62 (he c struck out a,am) and at the head of fol 63 १५० [1]) A_1 gives the notes यमचिह्नितां दक्षिणां दिशं and तस्य राज्ञ पृथापत्न्य न्द्रेण न पुनर्दिशो रिपवो वैवस्वता इव दिशं प्रतारिरे इत्यर्थ १५२ [1]) इ supplied by A_2 in space left by A_1.—[2]) A_1 पृथुश्रीर्दि°, corr by later hand into श्री·

155 नार्तीतरुतलाचान्तनारिकेरद्रुरोमयैः । कावेरीतीरपत्रैस्तैस्तोयाधारः कृममत्यजन् ॥१५५॥
चन्दनाद्रिस्खलद्वारकन्दैर्वासभ्रश्यदहिच्छलात् । श्रीखण्डद्रुमशोः पण्डान्मण्डलाग्रा इवापतन् ॥१५६॥
उत्तराद्रिमसिद्धेर्व पदं क्षिप्त्वा हरिष्वविग्रतः । स कुल्यायः इवाम्भोधेः क्षिप्रं चक्रे गतागतम् ॥१५७॥
ततोऽम्बरीषनिर्घोषैरुद्गीतनयमङ्गलः । प्रतस्थे पश्चिमामाशां जिगीषुर्णामपश्चिमः ॥१५८॥
आक्रम्यं क्रमुकान्सद्यः कौङ्कणान्सद्य तापयन् । तुरगानिव तिग्मांशोः प्रतापस्तस्य पप्रथे ॥१५९॥
160 पश्चिमाध्वेमरुद्यन्तवीचेरावर्विभेत्यन्यभूत् । द्वारका तस्य सैन्यानां प्रवेशौत्सुक्यदायिनी ॥१६०॥
विन्ध्याद्रिस्तद्बलक्षुण्णधातुरेण्वावृतांम्बरः । प्रत्यभात्सयक्तमर्यादः कोपतप्त इवोच्चमन् ॥१६१॥
विशता दशनश्रेण्यन्तस्यावन्तिषु दन्तिनाम् । महाकालकिरीटेन्दुद्युत्कया खण्डिताः परम् ॥१६२॥
सर्वसादिप्रमालोक्य जितयायांस्ततो नृपान् । स प्राविशत्कुबिरस्तीर्णमपथेनोत्तरापथम् ॥१६३॥
राजभिस्तस्य तत्रोर्वैः संग्रामोभूत्पदे पदे । कुलाद्रिभिरिवेन्द्रस्य पक्षच्छेदोद्यतैरुहैः ॥१६४॥
165 काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः । ध्वान्तच्छलात्तद्गिरुद्धैर्निरुद्धा महिवैरिव ॥१६५॥
तु खाराः शिखरश्रेणीर्यान्तः सैन्यस्य वाजिनः । कुण्टभावं तदुत्कण्ठां निर्युद्धेष्वा हयाननान् ॥१६६॥
श्रीन्वारान्समरे जित्वा जितं मेने स मुम्मुनिम् । सकृज्जयमरेर्वीरा मन्यन्ते हि घृणाक्षरम् ॥१६७॥
चिन्ता न दृष्टा भौद्दानां वक्त्रे प्रकृतिपाण्डुरे । वनौकसामिव क्रोधः स्वभावकपिले मुखे ॥१६८॥
तस्य प्रतापो दरदां न सेहेनारतं मधु । दरीणामोषधिज्योतिः प्रत्यूषार्क इवोदितः ॥१६९॥
170 कस्तूरीमृगसंस्पर्शी धूतकुङ्कुमकेसरः । सैन्यसीमन्तिनीरतस्य संचस्कारोत्तरानिलः ॥१७०॥
भूम्ये प्राज्योतिषपुरं निर्जित्यानं ददर्श सः । धूपधूमं वनगुप्तान्कालागुरुसवानात्परम् ॥१७१॥
मरीचिकावितीर्णार्णोविभ्रमे वालुकाम्बुधौ । तद्गजेन्द्रा महाग्राहसमूहसमतां ययुः ॥१७२॥
तयोधाग्विगलद्दैर्यान्स्लीराज्ये स्त्रीजनोकरोत् । तुह्यौ स्तनौ पुरस्कृत्य न तु कुम्भौ कवाटिनाम् ॥१७३॥
स्त्रीराज्यदेव्यास्तस्यापि वीक्ष्य कम्पादिविक्रियाम् । संग्रामममिलाषं वा निधिकाय न कश्चन ॥१७४॥
175 उत्तरा. कुरुवोविक्षंस्तद्भयाज्जन्मपादपान् । उत्सान्तकसत्रासाद्विलानीव महोरगाः ॥१७५॥
जयार्जितधन सोथ प्रविवेश स्वमण्डलम् । सिंहेभगौक्तिकापूर्णपाणिः सिंह इवाचलम् ॥१७६॥
जालंधरं लोहरं च मण्डलानीतराणि च । प्रसादीकृत्य विदधे राजत्वं सोनुजीविनाम् ॥१७७॥
प्रणामयन्व्यजनार्थं नाना लिङ्गानि पार्थिवाः । उपेण शाण्डिल्येन वहन्त्यद्यापि निर्मदाः ॥१७८॥
बन्धमुद्वाम्भिधानाय पश्चाद्धाङ् तमाज्ञया । तुरुष्का दधते व्यक्तं मूर्धानं चार्धमुण्डितम् ॥१७९॥
180 क्षितिभृद्वाहिनीरत्यानां निर्यक्तजापनाय सः । पुच्छ महीतलस्पर्शी चक्रे कौपीनवाससि ॥१८०॥
न तत्पुरं न स यामो न सा भिन्दुर्भ सौणवः । न स हीयेन्ति यत्रासौ प्रतिष्ठां न विनिर्ममे ॥१८१॥

---

१५५ ¹) Thus A, A₁ रसालेषु १५६ ¹) A, gloss मलयात् —²) A, gloss प्रसभमवलंबनमास्कन्द्य. —³) A, gloss श्रीखण्डद्रुमा चन्दनद्रुमा एव द्विरूपण्डा भुजसमूहा यस्य स तथाविधात —⁴) A, gloss स्खद्भ्यः १५७. ¹) A, gloss उत्तरापथे भवमानः उत्तराद्रिमान ये ह्यागस्या मध्ये सन्ति, to this gloss A, has added उदयदल इति नाम्ना १५९ ¹) Thus A₁, A, क्रमुक द्यानान्ती° —²) Thus A₁, A, सिन्धाभु १६१ ¹) Thus corr by A, from A, °णुत्वना. १६६ ¹) A, न × खारा, A, G R पुरतवास —²) Thus corr by later hand from A, °भावा —³) Thus A₁, A, नवाम् १६९ ¹) Thus A, misread दुस्सविम in G R and Rdd A₁ gloss भुमेन स्थान् Cf iii 332, v 516, viii 2180 (C) १८८ ¹) Thus A, corr by later hand into भौदाना —²) A, gloss वानराणा

क्वचिन्नेशसमुचितं क्वचिच्च समयानुगम् । बाहुल्येन प्रतिष्ठानां स मानी नाम संदधे ॥१८२॥
सुनिश्चितपुरं चक्रे दिग्जये कृतनिश्चयः । सगर्वो दर्पितपुरं कृतवान्कृतकेशवम् ॥१८३॥
फलं गृह्णन्फलपुरं पर्णीत्सं पर्णमाददत् । क्रीडाराजविहारं च क्रीडन्राजा विनिर्ममे ॥१८४॥
एकंमूर्धे नयद्वत्समधः कर्षत्तथापरम् । बद्धा व्यधाच्छिरालम्बं स्त्रीराज्ये नृहरिं च सः ॥१८५॥ 185
दिगन्तरस्थे भूपाले तस्मिंस्तत्कर्मकुर्वति । पुरं विधाय तन्नाम्ना तत्कोपफलमन्वभूत् ॥१८६॥
ललिताख्यं पुरे तस्मिन्नादित्याय स भूपतिः । सभामां कन्यकुब्जोर्वीमभिमानोज्जितो ददौ ॥१८७॥
तेन हुष्कपुरे श्रीमान्मुक्तस्वामी व्यधीयत । बृहद्विहारो भूपेन सत्सूपथ महात्मना ॥१८८॥
एकां कोटिं गृहीत्वा स दिग्जयाय विनिर्गतः । भूतेशाय ददौ शुद्धयै कोटीरेकादशागतः ॥१८९॥
स तत्र ज्येष्ठरुद्रस्य शिलाप्रासादयोजनम् । भूमिग्रामंप्रधानं च विदधे वसुधाधिपः ॥१९०॥ 190
चक्रे चक्रधरे तेन वितस्ताम्भःप्रतारणम् । विनिर्मायारघट्टालीस्तांस्तान्मामान्प्रयच्छता ॥१९१॥
सोखण्डिताद्रमप्राकारं प्रासादान्तर्यधत्त च । मार्तण्डस्याद्भुतं दाता द्राक्षासक्षीतं च पत्तनम् ॥१९२॥
लोकपुण्ये पुरं कृत्वा नानोपकरणावलीम् । प्रतिपादितवाञ्छिष्णुर्धीमैः साकं स विष्णवे ॥१९३॥
ततः परं परीहासशीलो भूलोकवासवः । विहसद्वासवावासं परिहासपुरं व्यधात् ॥१९४॥
विरेजे राजतो देवः श्रीपरीहासकेशवः । लिप्तो रत्नाकरस्यापे मुक्ताज्योतिर्भरैरिव ॥१९५॥ 195
नाभीनलिनकिञ्जल्कपुञ्जेनेवानुरञ्जितः । अचर्कांस्काञ्चनमयः श्रीमुक्ताकेशवो हरिः ॥१९६॥
महावराहः शुशुभे काञ्चनं कवचं दधत् । पातालं तिमिरं हन्तुं वहन्निव रविः प्रभाः ॥१९७॥
गोवर्धनधरो देवो राजतस्तेन कारितः । यो गोकुलपथःपूरैरिव पाण्डुरतां दधे ॥१९८॥
चतुष्पञ्चाशतं हस्तान्त्रोपयित्वा महाँशिलाम् । ध्वजापे दितिजारातेस्ताक्ष्यैस्तेन निवेशितः ॥१९९॥
चक्रे बृहच्चतुःशालाबृहच्चैत्यबृहज्जिनैः । राजा राजविहारं स विरजाः सततोर्जितम् ॥२००॥ 200
तोलकानां सहस्राणि चतुर्भिरधिकानि सः । अशीतिं निदधे हेम्नो मुक्ताकेशवविग्रहे ॥२०१॥
तावन्त्येव सहस्राणि पलानां रजतस्य च । संधाय शुद्धयैधक्ते श्रीपरीहासकेशवम् ॥२०२॥
रीतिग्रस्यसहस्रैस्तु तेन तावद्भिरेव सः । व्योमव्यापिवपुः श्रीमान्बृहद्बुद्धो व्यधीयत ॥२०३॥
चतुःशालां च चैत्यं च तावता तावता व्यधात् । धनेनैवेति तस्यासन्पञ्च निर्मितयः समाः ॥२०४॥
राजतान्कापि सौवर्णान्कापि देवान्विनिर्ममे । पार्श्वेषु मुख्यदेवानां पार्षदो धनदोपमः ॥२०५॥ 205
कियन्ति तत्र रत्नानि धामान्परिकरांस्तथा । स प्रादादिति कः शक्तः परिच्छेत्तुमियत्तया ॥२०६॥
अवरोधैरमात्यैश्च सेवकैश्च नरेश्वरैः । तत्र प्रतिष्ठाः शतशो विहिता भुवनाद्भुताः ॥२०७॥

---

१८२ [1]) Thus corr. by A_3 from A_1 मुनी. १८३. [1]) A_3 सपर्णो.—[2]) A_3 कृतपी १८४ [1]) A_1 क्रीडाराजवि°. १८५. [1]) Thus corr by A_3 from A_1 बुद्धा. १८६. [1]) A_1 पुरनिर्माणाधिकारी —[2]) स्को and न्न supplied by A_3. १८७. [1]) A_3 gloss ललितपुर १९० [1]) Thus corr. by later hand from A_1 भूमिग्रामे १९२. [1]) Thus A_3; A_1 °धरस्तेन. १९३. [1]) Thus corr. by A_3 from A_1 पुरं —[2]) Thus A_3, A_1 जिष्णुधामे १९४ [1]) Thus corr by later hand from A_1 °पारं.—[2]) Over हासपुरं A_1 has written लपुर (for परिसपुर) १९६ [1]) A_3 अकचन, with gloss कच्च सीसिवन्धनयो.. १९७. [1]) Thus corr. by A_3 from A_1 हर्तुं —[2]) Thus G *sec manu*, A रविप्रभा १९९ [1]) Thus corr by later hand from A_1 हस्ताद्रों २०१ [1]) The words from चतुर्भिर° to सहस्राणि in the following verse have been omitted by A_1 and supplied by A_3 in margin. २०५ [1]) Thus A_1. A_3 पार्षदो. २०६. [1]) Thus A_3. A_1 °कर तथा.

राज्ञी कमलवत्यस्य कमलाहृदकारणी । राजत विपुलाकार कमलाकेशव व्यधात् ॥२०८॥
अमात्यो मित्रशर्मापि चक्रे मित्रेश्वरं हरम् । श्रीकण्यस्वामिनं चक्रे लाटः कण्याभिधो नृपः ॥२०९॥
श्रीमान्कण्यविहारेपि तेनैव विदधेद्भुतः । भिक्षुः सर्वज्ञमित्रोभूत्क्रमाद्यत्र जिनोपमः ॥२१०॥
तुरुष्कारध्रुकुणश्चक्रे स चङ्कुणविहारकृत । भूपचित्तोन्नतं स्तूपं जिनान्हेममयांस्तथा ॥२११॥
ईशानदेव्या तत्पत्न्या खातास्तु प्रतिपादितम् । सुधारसमिव स्वच्छमारोग्यायि रोगिणाम् ॥२१२॥
ललितादित्यभूभर्तुर्वल्लभा चक्रमर्दिका । सहस्राण्योकसां सप्त तत्र चक्रपुरं व्यधात् ॥२१३॥
आचार्यो भप्पटो नाम विदधे भप्पटेश्वरम् । अन्यैपि रक्कुटेशाद्या बहवो बहुभिः कृताः ॥२१४॥
अधिष्ठानान्तरेप्यत्र चङ्कुणेनाध्यमन्त्रिणा । सचैत्यः सुकृतोदारो विहारो निरमीयत ॥ २१५॥
सिषगीज्ञानचन्द्राख्यः स्थालध्रुकुणमन्त्रिणः । विहारमकरोल्लब्ध्वा लक्षकानुपबृंहितम् ॥ २१६॥
एव हेममयीमुर्वी स कुर्वन्नुर्वरापतिः । गुणैरौदार्यशौर्याद्यैर्मैत्र्यवानमलङ्घयन् ॥२१७॥
हेलयापि विनिर्यान्ती वक्त्राद्दुमनीपतेः । न कदाचन तस्याज्ञा देवैरप्युदलङ्घयत ॥२१८॥
तथाहि पूर्वपार्थोधेस्तटे सकटको वसन् । आनीयन्तां कपित्थानीत्यादिदेश स जातु चित् ॥२१९॥
किङ्कर्तव्यतयान्येषु पुरोगेषु स्थितेष्वथ । उपानयत्कपित्थानि दिव्यः कोपि पुमान्पुरः ॥२२०॥
अयादुपायनं गृह्णन्कुनसंज्ञो भुवा प्रभोः । कस्य त्वमिति पप्रच्छ प्रतीहारः प्रसह्य तम् ॥२२१॥
सोभ्यधात्त कपित्थानि दत्त्वा राज्ञः प्रियाण्यहम् । प्रहितोद्य मंहदिन्द्रेण नन्दनोद्यानपालकः ॥२२२॥
रहो महेन्द्रसंदिष्टं वक्तव्यं किंचिदस्ति मे । इति श्रुत्वा प्रतीहारः सभां चक्रे स निर्जनाम् ॥२२३॥
ततो दिव्यः पुमानूचे शक्रस्त्वां वक्ति भूपते । क्षन्तव्यं पथमप्येतत्सौजन्यात्रिष्ठुरं वचः ॥२२४॥
तुर्ये युगेपि भूपाल दिक्पाला भवि ते वयम् । विभुमो यत्पणम्याज्ञां भुयतां तत्र कारणम् ॥२२५॥
पुरा यामगृहस्थस्य कस्यचित्पृथुसंपदः । जन्मान्तरे कर्मकरो हालिकोभूद्वान्किल ॥२२६॥
एकदा तस्य ते योक्ष्मे वाहयित्वा महावृषान् । श्रान्तस्य निर्जलेरण्ये क्षीणप्रायमभूद्वहः ॥२२७॥
ततः स्वामिगृहात्क्षुत्तृड्खिन्नस्य भवतोन्तिकम् । वारिकुम्भीमपूप च गृहीत्वा कश्चिदाययौ ॥२२८॥
निर्पीतपाणिपादस्त्वं भोक्तुं संप्रस्तुतस्ततः । विप्रं कण्डगतप्राणमपश्यः पुरतोतिथिम् ॥२२९॥
न त्वामवोचन्मा भुङ्क्ष्वं दुर्भिक्षोपहतस्य मे । कण्ठे प्रियामैवः प्राणा वर्तन्ते भोजन विना ॥२३०॥
वारितः पार्श्वगेनापि तस्मै त्वं प्रीतिपूर्वकम् । पूपार्धं वारिकुम्भीं च प्रादाः प्रियमुदीरयन् ॥२३१॥
पात्रे प्रसन्नचित्तस्य काले दानेन तेन ते । अखण्डितानामाज्ञानां शतमासीत्त्रिविष्टपे ॥२३२॥
तेन वारिप्रदानेन वाञ्छामात्रेपि दर्शिते । प्रादुर्भवन्ति सुस्वादा नद्यो मरुपथेष्वपि ॥२३३॥
सत्क्षेत्रप्रतिपादितैः प्रियवचोबद्धालवालावलिर्निर्दोषेण मनःप्रसादपयसा निष्पन्नसेकक्रियः ।
दातुस्तत्तदभीप्सितं किल फलन्कालेतिबालोप्यसौ राजन्दानमहीरुहो विजयते फल्पद्रुमादीनपि ॥२३४॥

२०८ [1]) Thus A_1, A_3 कमलदेव्या· २११ [1]) A_1 तु×खार· २१२. [1]) Thus corr by A_3 from A_1 सुधासरविव. २१३. [1]) Thus A_1, A_3 वल्लभादित्य G R copy both readings, Edd. follow A_3 २१४ [1]) Emended with Edd., A भपटो —[2]) Thus A_1, A_3 कर्कटेशा· २१५. [1]) Thus corr. by A_3 from A_1 उर्वरी· २२० [1]) A_1, A_3 [2]) Thus corr by A_3 from A_1 [3]) Thus corr. by later hand from A_1 प्राप्ते. २३० [1]) Thus A_3, A_1 मुङ्क्ष्वा (for मुङ्क्ष्वा ?) २३४ [1]) A_1 [2]) A_1 —

अल्पावशेषास्तास्त्वय्य सन्त्याज्यास्तव भूपते । वचोलङ्घ्य क्षपयतो यत्र तत्राविचारतः ॥२३५॥ 235
अपि चेतरभूपालसुलभं महतः सतः । कस्माद्विचारशून्यत्वं तत्रापि हृदि रोहति ॥२३६॥
दिनानि कतिचिद्यानि कृशमीरिषु घनागमे । जायन्ते तानि पूर्वाब्धौ फलानि शिशिरे कुतः ॥२३७॥
त्रिगाहंस दिशं यां यां तत्र तत्रैव तत्पतेः । त्वदाज्ञाग्रहणे यत्नः पूर्वदानप्रभावतः ॥२३८॥
आशां श्रितस्य महेन्द्रीमाज्ञा स्वल्पापि तेधुना । गृहीता कथमप्येषा शक्रेणाभग्नशक्तिना ॥२३९॥
विना प्रयोजनं मुख्यं तस्मादाज्ञास्त्वया क्वचित् । नैवमेव पुनर्देया विरलाः सन्ति ता यतः ॥२४०॥ 240
इत्युक्तान्तर्हिते तस्मिन्भूपालो विपुलाशयः । चिन्तयन्दानमाहात्म्यं परं विस्मयमाययौ ॥२४१॥
ततः प्रभृति तादृक्षयोग्यार्थप्राप्तिलालसः । परिहासपुरे चक्रे स्थिरां गुर्वीं स पार्वणीम् ॥२४२॥
सहस्रभक्तमित्येवं प्रख्यातायां सदक्षिणम् । लक्षमेकोत्तरं भक्तपात्राणां यत्र दीयते ॥२४३॥
अभिप्रायेण तेनैव पत्तनान्यूषरेषु सः । चक्रे यवेषु तृष्णार्तः कश्चिज्जातु पिबेदपः ॥२४४॥
संजग्राह स देशेभ्यस्तांस्तानन्तरविद्वरान् । विकचान्सुमनःस्तोमान्पादपेभ्य इवानिलः ॥२४५॥ 245
तेन कङ्कणवर्षस्य रससिद्धस्य सोदरः । चङ्कणो नाम भुःखार्यदेशान्नीनो गुणोत्तमः ॥२४६॥
स रसेन समानत्वन्कोशे बहुसुवर्णताम् । पद्माकर इवाब्जस्य भूभृतोभूच्छुभावहः ॥२४७॥
रुद्धः पञ्चनदं जातु दुस्तरैः सिन्धुसंगमैः । तटे स्तम्भितसैन्योभूद्राजा चिन्तापरः क्षणम् ॥२४८॥
ततोम्बुतरणोपायं तस्मिन्पृच्छति मन्त्रिणः । अगाधेम्भसि रोधःस्थश्चङ्कणो मणिमक्षिपत् ॥२४९॥
तत्प्रभावाद्विधाभूतं सरित्तीरं समेनिकः । उत्तीर्णो नृपतिस्तूर्णं परं पारं समासदत् ॥२५०॥ 250
मणिमन्येन मणिना चङ्कणोप्याचकर्ष तम् । सलिलं प्रागवस्थं न क्षणेन सस्तामभूत् ॥२५१॥
परिभाव्याद्भुतं तस्य प्रशंसामुखराननः । प्रणयाच्चङ्कणं राजा मणियुग्ममयाचत ॥२५२॥
स तमाह स्म विहसन्कर्मैषो कुरुतो मणी । योग्यौ मत्पाणिगावेव किं स्यात्स्वीकरणेन वः ॥२५३॥
सामान्येष्वेव लभते सोत्कर्षं वस्तु संगतम् । महत्सु तस्य का शोभा विविधोत्कृष्टवस्तुषु ॥२५४॥
प्रस्यन्दनं शशिमणेर्गणयन्ति नावश्यावस्थितो जलनिधेः पुलिनैकदेशे ।
सं स्वीक्रियेत यदि तेन ततस्तदास्य स्यन्दः स्फुरन्नपि न तत्सलिले विभाव्यः ॥२५५॥ 255
इत्युक्ता विरते तस्मिन्राजा सस्मितमब्रवीत् । संभावयसि किं रत्नमाभ्यामभ्यधिकं मम ॥२५६॥
अतोधिकतरं यद्वा किंचित्त्वं मम पश्यसि । तदादाय प्रयच्छेदं निष्क्रयेण मणिद्वयम् ॥२५७॥
ततो महान्प्रसादोयमित्युक्ता चङ्कणोब्रवीत् । स्वायत्ते स्वामिनो रत्ने मय्यमिष्टे तु दीयताम् ॥२५८॥
गजस्कन्धेधिरोप्यैतन्मार्गंधर्म्यो यदाहृतम् । दत्त्वा सुगतबिम्बं तज्जनोयमनुगृह्यताम् ॥२५९॥
सलिलोत्तरणोपायो मणी दैवेन गृह्यताम् । संसारोत्तरणोपायः सुगतो मय्यमर्प्यताम् ॥२६०॥ 260

---

२३६ 1) Thus A_3, A_1 चेतसि भूपाल सु° २३८ 1) A_1 gloss तद्विपालस्य २४० 1) Thus A_3, A_1 ज्ञाता त्वया २४६ 1) A भु × खार्यः.—2) Thus corr. by A_1 from A_1 °देशानीतो २४८ 1) Thus A_1, A_3 स्तम्भित°. २५२ 1) A_1 प्रतिभाव्या° २५४ 1) A_3 °स्कृष्टभूमिषु २५५. 1) A_3 gloss चन्द्रकान्तस्य —2) A_3 gloss शशिमणि —3) A_3 gloss जलनिधेरा.— 1) Thus corr. by A_3 from A_1 स्यन्द — 1) Thus corr. by A_1 from A_1 वभाव्य २५७ 1) Thus A_3, A_1 ततो —2) Thus A_1, A_3 in margin कोशे स्वं. २५९ 1) A_3 gloss चुम्ब २६०. 1) A_3 gloss मणी एव संसारतरणोपाय इत्यारोपः। अत एव गृह्यतामित्येकवचनान्त क्रियापदम् मणी एव संसारतरणोपायत्वेन्वय गृह्यतामित्यन्वय

इति तेनार्थितो युक्त्या जिनबिम्बं ददौ नृपः । वाग्मिनां कस्य सामर्थ्यं परिपन्थयितुं वचः ॥२६१॥
स्वविहारेण भगवान्स तेन विनिवेशितः । कपिशाभिः सकाषाय इव यो भाति कान्तिभिः ॥२६२॥
दृश्यमेवापि कष्टेरायसैः परिवेष्टितः । गजस्कन्धनिबद्धस्य सूनकौ यस्य विष्टरः ॥२६३॥
अभिप्रायानुसारेण प्रकटीकुरुते प्रियम् । अहो महाप्रभावाणां भूपतीनां वसुंधरा ॥२६४॥
अशिक्षितं कदाचित्स स्वयं दमयितुं हयम् । निनायारण्यमेकाकी हयविद्याविशारदः ॥२६५॥
दूरान्निर्मानुषे तत्र ललनां ललितामृतिम् । एकां ददर्श गायन्तीं नृत्यन्तीमपरामपि ॥२६६॥
क्षणाच्च ते समालोक्य गीतनृत्ते मृगीदृशौ । प्रणम्य किंचिदुच्चक्रन्यायवोऽयमयन्नयम् ॥२६७॥
तुरगं तं समारुह्य त्वरागच्छद्दिशे दिशे । दृष्ट्वा तयोस्तं ते कान्ते गत्वापृच्छन्सविस्मयः ॥२६८॥
तमूचतुस्ते तरुण्यावां देवगृहाश्रिते । यः शूरवर्धमानोयं ग्रामस्तत्रावयोर्गृहम् ॥२६९॥
इत्युक्त्वा वीणभुजा मातृणामुपदेशतः । ग्रामस्कुलेन नियते नृत्तमेवं विधीयते ॥२७०॥
रूढिं परम्परायातां सेयमामहे स्थिता । आवामन्योऽपि वा नात्र निमित्तं ज्ञातुमीश्वरः ॥२७१॥
एवं वचस्तयोः श्रुत्वा नृपोन्येद्युः सविस्मयः । तदुक्तयां मेदिनीं कुर्वन्कालभिन्नैरदारयत् ॥२७२॥
दूरं निर्गतमुद्भिस्तैरथाद्राक्षीन्निवेदितम् । नृपतिः पिहितद्वारं जीर्णं देवगृहद्वयम् ॥२७३॥
उद्घाटितकपर्दिन्यौ पीतोत्कीर्णैर्निवेदितौ । अपश्यत्कैशवौ तत्र रामलक्ष्मणनामिनौ ॥२७४॥
परिहासमहेशः पार्श्वे पृथक्कृत्वा शिलागृहम् । स रामस्वामिनः श्रीमान्प्रतिष्ठाकर्म निर्ममे ॥२७५॥
देवोपि लक्ष्मणस्वामी तथैवाभ्यर्च्य पार्थिवम् । चक्रमर्दिकया चक्रेश्वरपार्श्वे निवेशितः ॥२७६॥
दिग्जये पुरुषः कश्चिद्भल्लयष्टिनियन्त्रः । अंसे न्यक्षिपदात्मानं गजारूढस्य भूभुजः ॥२७७॥
तं कुन्तपाणिप्राणादित्रणैः शोणितवर्षिणम् । त्राणार्थिनं कारुणिकः स्वोदन्तं पृष्टवानृपः ॥२७८॥
स तस्मै निकृतामिन्धुसविधस्थस्य भूपतेः । पल्यातमूचे सचिवमात्मानं हितकारिणम् ॥२७९॥
प्रणतिर्लल्लिनाद्यैन्यनृपतेः क्रियतामिति । हितं कथयतः स्वस्य नियतं च ततो नृपात् ॥२८०॥ सुखम् ॥
प्रतिजज्ञे च भूपेन ततस्तत्स्वामिनियन्त्रः । रूढप्रयोगदंडारैः स चाकार्यत सत्कृतैः ॥२८१॥
ततो विश्वासपात्रं तं स मन्त्री कृतसत्क्रियः । कदाचिदेवमवदद्विजनं जगतीसुतम् ॥२८२॥
एवविधस्य लाभस्य सत्यन्यपरिरक्षणम् । तत्र वैरविशुद्ध्याशा विडम्बयति मामियम् ॥२८३॥
बाधीर्जेतारमुत्पत्तिं दत्त्वा दत्त्वाय च सुखाय च । कृतकृत्यो ध्रुवं जर्यामवमानहतानसून् ॥२८४॥
अपकृत्यापि किं शौरेरकं तस्मिन्नितम् । गम्भीरं प्रतिनिघ्नेव निनादं ननदो गिरिः ॥२८५॥
इतो मासैस्त्रिभिर्गम्या भू प्राप्या त्वरितं कथम् । यदा वा प्राप्यते वैरी तदा तत्रैव किं वसेत् ॥२८६॥
मासाभिलङ्घ्य पन्थानं तस्मादुपदिशामि ते । गृहीत्वा सं जलं गम्यश्चमूनां किं तु निर्जलः ॥२८७॥
तद्गमिष्ये वनचरो भूत्वा न वक्ष्यन्ति त्वदागमम् । सामात्यान्तःपुरो राजा ज्ञास्यतेनेन गृह्यते ॥२८८॥

---

२६१ 1) Thus corr. by A_3 from A_1 यस्य. २६३ 1) Thus emended with Edd., A_1 °स्कन्ध° —2) Thus A_1, A_3 सूयकर्षेत्य २६० 1)2) A, glosses अस्मत्कुलजेन and ईश्वरगृहं २७२ 1) Thus corr. by A_1 from नदुत्की, A_3 °कार.—2) Thus A_3, A_4 कुब्जा २७३ 1) Thus A_1, altered by later hand to दूरतः २७५ 1) A_1 gloss अर्चारं. २७९ 1) Thus corr. by A_3 from A_1 माख्यात २८० 1) A_1 gloss ललितादित्याय प्रणाम कुर्वति सदुक्त स्तितनदित श्रुत्वा तेन राजा मम कर्णनासार्थवेधका कृत्ता, २८२ 1) Thus A_1 A_3 स्जेन २८४ 1) Thus A_1, A_3 जर्याव 2) २८७ 1) A_1 gloss पन्था

इत्युक्त्वा सोऽकरोत्तस्य प्रवेशं वालुकार्णवे । पक्षे क्षीणे च कटको निस्तोयः समपद्यत ॥२८९॥
तत्राप्यहानि त्रिंशाणि वह्निनेवाभवद्भृशः । तृष्णार्तं वीक्ष्य सैन्यं च मन्त्रिणं तमभाषत ॥२९०॥ 290
उक्तकालाधिका यावद्वासरा गमिताः पथि । मुमूर्षु तृष्णया सैन्यं तदध्वा शिष्यते कियान् ॥२९१॥
ततो विहस्य सोवादीज्जिगीषो शेषमध्वनः । किं पृच्छत्यरिराड्भूस्य यमराड्भूस्य वा भवान् ॥२९२॥
त्वं हि स्वामिहितायैव समुपेक्ष्य स्वजीवितम् । मृत्युवक्त्रं सकटको मया युक्तया प्रवेशितः ॥२९३॥
नेदं मरुमहीमात्रं भीमोयं वालुकार्णवः । नाम्भोत्र लभ्यते क्वापि कस्त्राता तेत्र भूपते ॥२९४॥
भुक्त्वेति पृतना कृत्स्ना समभूद्गीतसौष्ठवा । करकाभ्रेशितफला स्तम्भशेषेव शालिभूः ॥२९५॥ 295
संत्यक्तजीविताशानां भीरूणां क्रन्दितध्वनिम् । भुजमुद्यम्य शमयंस्ततो नृपतिरब्रवीत् ॥२९६॥
भ्रमान्त्य तव कृत्येन प्रीताः स्वामिहितैषिणः । मरावप्यत्र शीतार्ता इव रोमाञ्चिता वयम् ॥२९७॥
अंभश्चसारे मयि तु व्यक्तमेवंविधोपि ते । प्रयासः कुण्डतां यातो लोहे वज्रमणाविव ॥२९८॥
मणिभ्रमाद्बिंकणं गृह्णन्दग्धा इवाङ्गुलीः । त्वं मिथ्यावयवांछूनानद्य शोचिष्यसि ध्रुवम् ॥२९९॥
निर्देशेनैव मे पश्य पयः सूतेद्य मेदिनी । रसितेनाम्बुवाहस्य रत्नं वैडूर्यभूरिव ॥३००॥ 300
इत्युक्त्वा सोम्बु निष्कृष्टुं कुन्तेनोर्वीं व्यदारयत् । उज्जिहीर्षुर्विलस्ताम्भः शूलेनेव त्रिलोचनः ॥३०१॥
अथोज्जगाम पातालल्क्ष्मीलीलास्मितच्छविः । रसातलात्सरित्साकं सैन्यानां जीविताशया ॥३०२॥
तस्य सेनाचराणां सा क्रमं चिच्छेद वाहिनी । वृथाव्ययीकृताङ्गस्य मन्त्रिणस्तस्य चेष्टितम् ॥३०३॥
लूनाङ्गोमङ्गलाशंसी स मन्त्री विफलभ्रमः । स्वस्य भर्तुर्विवेशाद्रौ नगरीमन्तकस्ततः ॥३०४॥
राज्ञापि कुटिलाचारो निगृह्य स महीपतिः । निजस्य मन्त्रिणस्तस्य तुल्यावस्थो व्यधीयत ॥३०५॥ 305
यथोपयोगं तेनैव स्थाने स्थाने प्रवर्तिताः । अद्यापि कुन्तवाहिन्यः प्रवहन्त्युत्तरापथे ॥३०६॥
सहस्रशः संभवन्त्योप्यपरे भुवनाद्भुताः । अतिप्रसङ्गभङ्गेन तद्वृत्तान्ता न दर्शिताः ॥३०७॥
यत्रि-शब्दजला घनाडम्बरपरुषे देशेतिघोरारवा यच्छाः समये पयोदमलिने कालुष्यसंदूषिताः ।
दृश्यन्ते कुलनिम्नगा अपि परं दिग्देशकालाविमौ तत्सस्य महतामपि स्वसदृशाचारप्रवृत्तिप्रभौ ॥३०८॥
कलेर्वायं प्रभावः स्याच्चरनाथासनस्य वा । यत्सोपि भीमकलुषाः प्रथ्वीः समदर्शयत् ॥३०९॥ युग्मम् ॥
अवरोधसखो राजा पारिहासपुरे स्थितः । स जातु मदिराक्षीभिः सचिवानेवमन्वशात् ॥३१०॥ 310
कृत प्रवरसेनेन यदेतत्प्रवरं पुरम् । तच्चिरंहथ मन्यध्वे मत्पुरस्येव चेच्छ्रियम् ॥३११॥
घोरामलद्विताज्ञस्य श्रुत्वेत्याज्ञां महीपतेः । गत्वाश्वंघासकूटानि तेदहन्वातुलानके ॥३१२॥
हर्म्याग्राद्वीक्षमाणास्तद्वह्निज्वालोज्ज्वलाननः । उल्कामुख इवाभूत्स हर्षोद्वसितोत्कटः ॥३१३॥
क्षेत्रादिवैकृतवतः प्रतिभासतेन्यो मिथ्यैव चित्रमधिको विशदात्मनोपि ।
चन्द्रादि पश्यति पुरो द्विगुणं प्रकृत्या तेजोमयं तिमिरदोषहतं हि चक्षुः ॥३१४॥

---

२९५ ¹) A_3 gloss वृक्षवर्षण २९८ ¹) Thus corr by A_3, A_1 मेघोक्तियोपि तु —²) Thus A_1, A_1 प्रयोग २९९. ¹) Thus corr by A_3 from A_1 वज्रकण ३०० ¹) Thus Edd. and G *sec. manu*, A R and G *prima manu* दिनैनैव. ३०४. ¹) A_4 gloss ललिनादित्य एव यम ३०८ ¹) Thus corr by A_2 from A_1 चिरंहथ. A_1 gives विशि देशः दिग्देश स च कालश्च नौ ३११ ¹) Thus A_1, A_1 मत्पुरस्येव ३१२ ¹) Thus corr by A, from A_1 गत्वाश्वघास

315 मैवं चेदेकमपि तत्पुरं प्रवरभूपतेः । असंख्यपुरनिर्माता स विधेदाधिकं कुतः ॥३१५॥ युग्मम् ॥
क्षीणक्षेत्र्योथ निर्ध्याय नगरश्रोषकिल्विषम् । उष्णनिःश्वासदुहृदा पस्पर्शेनुशयाग्निना ॥३१६॥
तत्कुर्वतेन्तःसुषिरां गूढं येनातनुक्षयम् । दह्यन्ते जीर्णतरवः कोटरस्थानला इव ॥३१७॥
प्रातस्तमथ शोचन्तं सदुःखं वीक्ष्य मन्त्रिणः । चिन्तानिवर्तनायोचुः पुरश्रोषं मृषैव तत् ॥३१८॥
श्रुतेप्यनष्टे नगरे निःशोकोभून्महीपतिः । स्वप्नान्तर्हारिते पुत्रे प्रबुद्धोम इव स्थिते ॥३१९॥
320 कार्यं न जातु नश्वाक्यं यत्क्षीणेन मयोच्यते । तान्युक्तकारिणोमात्यान्प्रशंसन्निति सोब्रवीत् ॥३२०॥
प्रियमनुचितं क्षमापण्यस्त्रीक्षणप्रभुरीश्वरो रमयति यतो धिक्तान्भृत्यान्स्ववृत्तिसुखार्थिनः ।
नृपमपथगं पान्ति प्राणानुपेक्ष्य निजानपि प्रसभमिह ये तैः पूतेयं महात्मभिरुर्वरी ॥३२१॥
अतीन्द्रमपि माहात्म्यं राज्ञस्तस्याधितिष्ठतः । अयमन्योपि दोर्वोभुदितरक्षितिपोचितः ॥३२२॥
दत्त्वापि यत्स मध्यस्थं श्रीपरीहासकेशवम् । जघान तीक्ष्णपुरुषैस्त्रिग्राम्यां गौडपार्थिवम् ॥३२३॥
गौडोपजीविनामासीत्सत्त्वमत्यद्भुतं तदा । जहुर्ये जीवितं धीराः परोक्षस्य प्रभोः कृते ॥३२४॥
325 शारदादर्शनमिषात्कृमीरान्संप्रविश्य ते । मध्यस्थदेवावसथं संहताः समवेष्टयन् ॥३२५॥
दिगन्तरस्थे भूपाले प्रविवेक्षुनवेक्ष्य तान् । परिहासहरिं चक्रुः पूजकाः पिहितारणिम् ॥३२६॥
ते रामस्वामिनं प्राप्य राजतं विक्रमोर्जिताः । परिहासहरिश्रान्त्या चक्रुरुत्पाद्य रेणुशः ॥३२७॥
तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्वतः । नगराद्विर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥३२८॥
श्यामला रक्तमंसिक्तास्तेपतन्चिह्नता भुवि । अञ्जनाद्रिदृषत्खण्डा धातुस्यन्दोज्ज्वला इव ॥३२९॥
330 तदीयरुधिरासारैः समभूदुज्ज्वलीकृता । स्वामिभक्तिरसामान्या धन्या चेयं वसुंधरा ॥३३०॥
वचाद्यचक्षुतं भयं विरमति श्रीः पद्मरागाद्भवेज्ज्ञानाकारमपि प्रशाम्यति विषं गारुत्मतादृदमनः ।
एकैकं क्रियते प्रभावनियमात्कर्मेति रत्नैः परं पुंरत्नैः पुनरप्रमेयमहिमोद्भेदैर्न किं साध्यते ॥३३१॥
क्व दीर्घकालल्लुचोध्वा शान्ते भक्तिः क्व च प्रभौ । विधातुरप्यसाध्यं तद्यद्वैदैर्विधितं तदा ॥३३२॥
लोकोत्तरंस्वामिभक्तिप्रभावाणि पदे पदे । तादृशानि तदाभूवन्भृत्यरत्नानि भूभृताम् ॥३३३॥
राज्ञः प्रियो रक्षितोभूद्रौडराक्षसविप्लवे । रामस्वाम्युपहारेण श्रीपरीहासकेशवः ॥३३४॥
335 अद्यापि वृद्धयते भृत्यं रामस्वामिपुरास्पदम् । ब्रह्माण्डं गौडवीराणां सनाथं यशसा पुनः ॥३३५॥
एवं नानाविधोदन्तैर्वीसराः क्षमापतेर्ययुः । विरलाः स्वपुरे तस्य भूयांसस्तु दिगन्तरे ॥३३६॥
अनन्याक्रान्तपृथिवीसमालोकनकौतुकी । अपारं प्रविवेशाथ पुनरेवोत्तरापथम् ॥३३७॥
कर्तुं प्रभावजिज्ञासां प्रहितैर्धनदादिभिः । नैर्ऋतैः सह वृत्तान्तास्तस्य ते ते तदाभवन् ॥३३८॥
नाद्यापि या भुवो दृष्टा जाने भानुकरैरपि । राज्ञस्तस्य बभूवाज्ञा तत्र स्वैरविहारिणी ॥३३९॥
340 चिरमज्ञातवृत्तान्तैर्मन्त्रिभिः प्रहितस्ततः । प्रत्यावृत्तस्तस्य पार्श्वीकृतस्तानेवमुक्तवान् ॥३४०॥

---

३१७ [1]) A, gloss अन्तश्छिद्रा. —[2]) A, gloss मध्ये एव —[3]) A, gloss क्रियाविशेषणम् —[4]) A, gloss कर्मकर्तरि लकार स्वयमेव दह्यन्ते। अन्तश्छिद्रा पुरुषास्तत्कार्यं कुर्वते। यत कार्येण अननुक्षय यथा भवति तथा स्वयमेव दह्यन्ते। यथा कोटरस्थाग्रवल्लरव स्वयमेव गूढं अन्तरेव दह्यन्ते ॥. ३३१. [1]) Thus corr by A, from A, कर्मोति°.—[2]) Thus corr. by A, from A, परम° ३३३. [1]) र supplied by A, ३३७ [1]) Thus corr. by A, from A, अनन्यक्रा° ३३९ [1]) A, नासु.

इत्यादिशति वः स्वामी कोयं मोहो भवादृशाम् । क्षमामिमां मे प्रविष्टस्य प्रतीक्षध्वे यदागमम् ॥३४१॥
नवं नवं प्रतिदिनं संत्यज्य विजयार्जनम् । स्वराट्टं संप्रविष्टस्य किं कार्यं मम पश्यत ॥३४२॥
विनिर्गतानां स्वभुवः सन्तां सलिलाकरः । न निर्व्याजंजिगीषूणां दृश्यते ह्यवधिः क्वचित् ॥३४३॥'
तस्मादाचारसारं वो वक्ष्ये स्वविषयोचितम् । राज्यं तदनुसारेण निर्विघ्नं कुरुतानघाः ॥३४४॥
अवश्यैः सर्वदा रक्ष्यः स्वभेदः प्रभविष्णुभिः । चार्वाकाणामिवैषां हि भयं न परलोकतः ॥३४५॥ 345
अपराधं विनाप्यत्र दण्ड्या गह्वरवासिनः । ते हि संभूतचित्ताः स्युर्दुर्भेद्या दुर्गसंश्रयाः ॥३४६॥
वर्षोपभोग्यान्यन्नानि क्षेत्रभूसंमिता वृषाः । साम्यानां नातिरिच्यन्ते यथा कार्यं तथामकुः ॥३४७॥
अधिकीभूतचित्ता हि वत्सरेणैव ते भृशम् । भवेयुर्डामराः क्रूरा नृपाज्ञातिक्रमक्षमाः ॥३४८॥
वस्त्रं स्त्रियः कुथा भोज्यमलंकारा हया गृहाः । आसाद्यन्ते यदा जातु यामीर्नैगरोचिताः ॥३४९॥
मद्गुणाप्युपेक्ष्यन्ते संरक्ष्याणि यदा नृपैः । यदा चानन्तरज्ञत्वं तेषां भृत्येषु दृश्यते ॥३५०॥ 850
प्रदेशादेकतो रूढा यदा वृत्तिश्च शस्त्रिणाम् । अन्योन्योद्वाहसंबन्धैः कायस्थाः संहता यदि ॥३५१॥
कर्मस्थानानि वीक्षन्ते क्षमापाः कायस्थवद्यदा । तदा निःसंशयं ज्ञेयः प्रजाभाग्यविपर्ययः ॥३५२॥ चक्रलकम्॥
चेष्टानुसारेणेङ्गीय गूढमाशयसंविदम् । मयोक्तं हृदये कार्यमन्तरं राजवीजिनाम् ॥३५३॥
पत्यामत्ति मदकरटिनो दानगन्धेन वायुर्गर्जोद्भूतिं प्रकटितरुचिश्चञ्चलैर्वाम्बुदस्य ।
चेष्टा स्पष्टं वदति मतिमन्नैपुणान्नेयतत्त्वा जन्तोर्जन्मान्तरपरिचितां निश्चलां चित्तवृत्तिम् ॥३५४॥
पुत्रः कुवलयादित्यो वज्रादित्यश्च मे समौ । मित्रशीला तयोर्भ्रात्रोर्धर्मिमातुरयोः पुनः ॥३५५॥ 355
ज्यायान्राज्येभिषिक्तव्यः स च स्याद्बलवान्यदा । तस्याज्ञातिक्रमः कार्यो भवद्भिर्नियमात्तदा ॥३५६॥
उत्सृजञ्जीवितं वापि राज्यं वापि स पार्थिवः । शोचनीयो न केनापि स्मरतेदं वचो मम ॥३५७॥
कार्यः कनीयाञ्च नृपः प्रमादात्क्रियते यदि । नोल्लङ्घनीया तस्याज्ञा रक्ष्यश्च विषमोपि सः ॥३५८॥
पौत्रेषु मे कनीयान्यो जयापीडोस्ति बालकः । पितामहसमो भूया इति वाच्यः स सर्वदा ॥३५९॥
भर्तुर्गृहीतनैराश्याः साभिप्रायां प्रणम्य ताम् । भानुर्युः पश्चिमामाशां ते बाष्पार्पकणत्यजः ॥३६०॥ 360
उवाच चक्रुणो जातु संनिपत्याखिलाः प्रजाः । बाष्पैः पतिवियोगार्पितप्रां सिञ्चन्वसुंधराम् ॥३६१॥
राज्ये कुवलयापीडो राजपुत्रोभिषिच्यताम् । सुगृहीताभिधो राजा गतः स सुकृती दिवम् ॥३६२॥
ससृजे यस्य कृतिनो दैवतैः कोशवृद्धये । रससिद्धिरकस्मान्मे यस्मात्मास्तमुपागता ॥३६३॥
दूरस्थोपि हि भूभृत्स भाग्यशक्त्या कयाचन । कार्याणि घटयत्यासीद्दूरेष्टान्यपि हेलया ॥३६४॥
अम्भोजानि घनाघनव्यवहितान्युल्लासयत्यंशुमान्दूरस्थोपि पयोधरोत्तिशिशिरस्पर्शं करोत्यातपम् ।
शक्तिः कापि परिस्फुरन्ति महतां स्वैरं दविष्ठान्यहो यन्माहात्म्यवशेन यान्ति घटनां कार्याणि नियन्त्रणामं ॥३६५॥ 365
सैकादशदिनान्सप्त मासान्षट्त्रिंशतं समाः । एवमाहाद्य स महीं प्रजाचन्द्रोस्तमाययौ ॥३६६॥

---

३४१. [1]) The words from **प्रतीक्षध्वे** to **सम्प्रविष्टस्य** in the following verse have been omitted by A_1 and supplied in margin by A_2 ३४३ [1]) Thus corr by later hand from A_1 **निर्व्याज** ३४६. [1]) Thus A_1, altered by later hand to दुर्भेद्य which is found in J G ३५४ [1]) A_2 gloss **करटी हस्ती** ३५६ [1]) A_2 gloss **कुवलयापीड**.—[2]) Emended, A **°चिक्रत्य** ३६५ [1]) Thus corr by A_2 from A_1 **°यन्त्रणम**

तुषारवर्षैर्बहुलैस्तमकाण्डानिपातिभिः । आर्याणकाभिधे देशे विपन्नं केचिदूचिरे ॥३६७॥
राजप्रश्नां प्रतिष्ठां स रक्षितुं चिरसंचिताम् । संकटे क्वापि दहनं प्राविक्षदिति केचन ॥३६८॥
केषांचित्तु मते भूभृद्वीयस्युत्तरापथे । सोमत्यसुलभां भूमिं प्रविष्टः कटकान्वितः ॥३६९॥
अत्यद्भुतानि कृत्यानि श्रुतान्यस्य यथा किल । विपत्तिरपि भूभर्तुस्तथैवात्यद्भुता श्रुता ॥३७०॥
यानोस्तं शुभणिः पयोधिसलिलं कैश्चित्प्रविष्टापरैः संप्राप्तो दहनं गतः किल परैर्लोकान्तरं कीर्त्यते ।
जायन्ते महतामहो निरुपमप्रस्थानहेत्वाकिनां निःसामान्यमहत्त्वयोगपिशुना वार्ता विपत्तावपि ॥३७१॥
ततः कुवलयापीडो भेजे कुवलयेशताम् । जातः क्रमलदेव्या यः श्रीमाञ्शक्र इवादितेः ॥३७२॥
त्यागेन चक्रे विशदां योनुरक्तां नृपश्रियम् । महोरगस्त्वचमिव स्वभावमलिनामपि ॥३७३॥
भ्राता तुल्यप्रभावेण केचित्कालं हतप्रभः । स हुताशोष्मणाक्रान्तः प्रदीप इव नारुचत् ॥३७४॥
भृङ्गैरिवानुगैर्नानलोभात्पर्यायवृत्तिभिः । श्रीर्द्वयोस्थाभूत्तयोरन्तर्मत्तेभकटयोरिव ॥३७५॥
अथोभयधनादायिभृत्यचक्रिक्रयां समम् । राजा कुवलयापीडो बभञ्जानुजमञ्जसा ॥३७६॥
राज्यं निष्कण्टकं कृत्वा ततः प्राप्तबलो नृपः । दिग्जयायोद्यतक्रान्तिः सेभूत्सेभूतसाधनः ॥३७७॥
एकस्तस्मिन्क्षणे मन्त्री तस्याज्ञामुदलङ्घयत् । स्मरन्वा तत्पितुर्वाचं भजन्वा दर्पविक्रियाम् ॥३७८॥
प्राप्तायामथ यामिन्यां तल्पे कोपाकुलो नृपः । तमाज्ञातिक्रमं ध्यायन्न निद्रां क्षणमप्यगात् ॥३७९॥
एत्य कृतागसं हन्तुं सम्पूर्णस्य तदाभ्रयात् । बहवः प्रत्यभामन्त वध्यास्तस्योद्यतक्रुधः ॥३८०॥
विचारशैलमथिता तस्य चित्तमहोदधेः । प्रकोपकालकूटस्य पश्चाच्छमसुधोदगात् ॥३८१॥
ध्यधौ सोथ गतक्रोधः प्रवृद्धः प्राणिसंक्षयः । एतावान्कस्य नु कृते कर्तव्यः प्रत्यभान्मम ॥३८२॥
अकार्याण्यपि पर्याप्य कृत्वापि वृजिनार्जनम् । विधीयते हितं यस्य स देहः कस्य सुस्थिरः ॥३८३॥
कृतघ्नस्यास्य कायस्य हेतोरगलितस्मृतेः । हन्तव्याः कस्य पन्थानः प्रतिभान्त्यनपायिनः ॥३८४॥
विहन्ति जन्तवो हन्त पच्यमानस्य नात्मनः । भवस्यां कालसूदेन कृतां तां तां क्षणे क्षणे ॥३८५॥
स्थः पद्मद्विरकारणस्मितसिते पाथोजकोशाकृति श्मश्रूद्वेदकशेरमस्य रसवादुत्तप्तनाभ्रप्रभम् ।
प्रातर्जीर्णवलक्षकेशविकृतं वृद्धाजशीर्षोपमं वक्त्रं नः परिहस्यते ध्रुवमिदं भूतैश्चिरस्थायुभिः ॥३८६॥
इत्याद्यनित्यताचिन्तादत्तशान्तिसुखादरः । राज्यं संत्यज्य स वनं पुष्पप्रस्थवणं ययौ ॥३८७॥
गच्छ भद्र वनायैव तपस्याधीयतां मनः । सापायाः क्षणभङ्गिन्य एवंप्राया विभूतयः ॥३८८॥
तेन संत्यजता राज्यं लिखितेन निजासने । वैराग्यवासनोत्सेकः श्लोकेनानेन सूचितः ॥३८९॥
अभ्रभ्रशमसवेगलब्धसिद्धिर्नराधिपः । श्रीपर्वतादावद्यापि भव्यानामेति दृक्पथम् ॥३९०॥
तथा याते प्रभोः पुत्रे मित्रशर्मा शुचान्वितः । वितस्तासिन्धुसंभेदे सभार्यो जीवितं जहौ ॥३९१॥
राज्यं समां समासाद्यौ कृत्वा स वसुधाधिपः । निःश्रेयसाग्निनिःश्रेणीं सुधीः सिद्धिं समासदत् ॥३९२॥

---

३६४ ¹) Thus A_1, A_3 °प्रश्न ३७१ ¹) Thus corr by A. from A_1 परो° ३७२. ¹) Thus corr. by A_2 from A_1 भुव-लये°; A_2 adds the gloss को भूमे वलय कुवलय ३७६ ¹) A चक्रि° ३८० ¹) This and the following verse have been omitted by A_1 and supplied in margin by A_3 ३८३ ¹) A, देहं तत्कस्य सस्थिरम् ३८६. ¹) Thus A_3, A_1 श्मश्रूद्वोध ३८७ ¹) A, gloss नैचिचारण्यं ३९२ ¹) A_4 gloss मन्त्री

वज्रादित्यो बप्पियको ललितादित्य इत्यपि । ख्यातोऽथ भूभृदभवत्तन्माता चक्रमर्दिका ॥३९३॥
स क्रूरचरितो भ्रातुः प्रजाह्लादविधायिनः । सुधांशोरिव दुर्वासा नूनं विसदृशोऽभवत् ॥३९४॥
परिहासपुरास्थित्यां नानोपकरणावलीम् । स जहार दुराचारो भूभृल्लोभवशंवदः ॥३९५॥ 395
रागिणो भूमिपालस्य भृत्यस्योन्तःपुरस्त्रियः । बीजाश्वस्येव वडवास्तास्ताः समभवन्प्रियाः ॥३९६॥
विक्रयेण प्रयच्छन्स म्लेच्छेभ्यः पुरुषान्बहून् । म्लेच्छोचितां व्यवहृतिं प्रावर्तयत मण्डले ॥३९७॥
सप्ताब्दान्वसुधां भुक्त्वा सोतिसंभोगजन्मना । जगाम संक्षयं क्ष्माभृत्क्षयरोगेण किल्बिषी ॥३९८॥
तस्मान्मञ्जरिकादेव्यां जातो राजा व्रजान्तकः । ततः पृथिव्यापीडोऽभूत्समासाश्चतुरः समाः ॥३९९॥
जातो मम्माभिधानायां बप्पियास्तत्र वासरान् । संग्रामापीडनामाथ तमुत्पाद्याभवन्नृपः ॥४००॥ 400
भ्रातरौ तौ समासाद्य राज्यं नैत्र व्यराजत । हेमन्तशिशिरावाप्य चण्डांशोरिव मण्डलम् ॥४०१॥
शान्तेथ संग्रामापीडे कनीयान्बप्पियात्मजः । राजा श्रीमाञ्जयापीडः प्राप राज्यं ततः क्रमात् ॥४०२॥
पितामहसमो भूयादित्यमात्यवचः स्मरन् । जिगीषुः संभृतबलो दिग्जयाय स निर्ययौ ॥४०३॥
स्वदेशादेव नयविद्भिः नीतैः समं नृपैः । वृद्धान्पप्रच्छ निर्गच्छन्कश्मीरद्वारगोचरान् ॥४०४॥
पितामहस्य नः सैन्यं कियच्चिरं गच्छतोभवत् । इति ब्रूताथ यात्रासु यूयं संख्यातसैनिकाः ॥४०५॥ 405
कृतस्मितास्तमूचुस्ते किं प्रश्नेनामुना प्रभो । वस्तु कश्चिदतिक्रान्तं नानुकर्तुं क्षमोधुना ॥४०६॥
कर्णीरथानां तस्यासीत्सप्तपादं लक्षमीशितुः । अशीतिस्तु सहस्राणि देवस्याथ जयोद्यमे ॥४०७॥
तदाकर्ण्य जयापीडो बहु मेने न निर्जयम् । क्षिप्रं क्षितेः संकुचन्त्याः कालस्य बलवत्तया ॥४०८॥
जिगीषोः क्ष्माभुजस्तस्य भावमालोक्य तादृशम् । दध्युर्भावज्ञतां वृद्धा ललितादित्यभूपतेः ॥४०९॥
तस्य दूरप्रयातस्य स्थालो जज्ञाभिधे बलात् । द्रोहिणाक्रम्य कश्मीरान्स्वयं भेजे नृपासनम् ॥४१०॥ 410
दिने दिने राजसैन्यास्त्वदेशस्मारिणस्ततः । सैनिकाः संन्यवर्तन्त स्वामिभक्तिपराङ्मुखाः ॥४११॥
मख्यापयिष्यन्स्त्वामेत्र शक्तिं परिकरं विना । निधिकाय जयापीडो युक्तां कांचित्तु संविदम् ॥४१२॥
अमङ्गुरास्तेभिमानास्तस्यैवासन्मनस्विनः । अस्यवर्तत वैरेव वैधात्रीरपि वामनाः ॥४१३॥
स विसृज्य भुवं स्वां स्वां भूषणीननुयायिकान् । प्रयागमगमत्सैन्यैः परिमेयैर्नरैः समम् ॥४१४॥
तत्रावशिष्टानुचित्य वाजिनः स मनोजवान् । द्विजेभ्यो लक्षमेकोनं प्रददौ भूरिदक्षिणम् ॥४१५॥ 415
संपूर्णमन्यो लक्षं यः प्रदधादत्र वाजिनाम् । तन्मुद्रयेयं मन्मुद्रा विनिवार्येत्युदीर्य च ॥४१६॥
श्रीजयापीडदेवस्येत्यक्षरैरुपलक्षिताम् । दिग्देशगामिनो मुद्रां गाङ्गस्य पयसो ददौ ॥४१७॥
तन्मुद्राङ्कं पयः पीत्वा गाङ्गमप्यापि निर्मलम् । चित्ते प्रवर्धते तापो भूपानामभिमानिनाम् ॥४१८॥
स्वदेशगमनानुज्ञां सैन्यस्याप्रमुखेन सः । दत्त्वा निशायामेकाकी निर्ययौ कटकान्तरात् ॥४१९॥
मण्डलेषु नरेन्द्राणां पयोदानामिवार्यमा । गौडराजाश्रयं गुप्तं जयन्ताख्येन भूभुजा ॥४२०॥ 420
प्रविवेश क्रमेणाथ नगरं पौण्ड्रवर्धनम् । यस्मिन्सौराज्यरम्याभिः प्रीतैः पौरविभूतिभिः ॥४२१॥

---

३९३. [1]) A, ललितापीड. ३९४. [1]) A, दूर. ४०० [1]) Thus A, R G, A, दत्तस्तान ४१९ [1]) Thus A, A, स्वा न्यवर्तन्त ४१९ [1]) Thus corr by A, from A, [c]प्रसुखोथ स —[a]) Thus corr. by A, from A, कृत्वा (?) ४२१. [1]) Thus corr. by A, from A, तस्मि[c] and प्रीति.

लास्यं स द्रष्टुमविशत्कार्तिकेयनिकेतनम् । भरतानुगमालक्ष्यनृत्तगीतादिशास्त्रवित् ॥४२२॥
ततो देवगृहद्वाराशिलामध्यास्त स क्षणम् ।[1] ..... ॥४२३॥
तेजोविशेषचकितैर्जनैः परिहृतान्तिकम् । नर्तकीं क्रमलां नाम कान्तिमन्तं ददर्श तम् ॥४२४॥
असामान्याकृतेः पुंसः सा ददर्श सविस्मया । अंसपृष्ठेन धावन्तं करे तस्यान्तरान्तरा ॥४२५॥
अचिन्तयत्ततो गूढं चरक्षेष भवेच्छुभम् । राजा वा राजपुत्रो वा लोकोत्तरकुलोद्भवः ॥४२६॥
एवं महीतुमभ्यासः पृष्ठस्थाः पर्णवीटिकाः । अंसपृष्ठेन येनायं लसत्पाणिः प्रतिक्षणम् ॥४२७॥
लोलभोक्त्रपुटो मदोत्कमधूपापातात्ययेऽपि द्विपः सिंहांसत्यपि पृष्ठतः करिकुले व्यावृत्य विप्रेक्षिता ।
मेघान्मुख्यशमेष्यशान्तवदनोद्गीर्णस्वरो बर्हिणश्चेष्टानां विरमेच्च हेतुविगमेष्यभ्यासदीर्घा स्थितिः ॥४२८॥
इत्यन्तश्चिन्तयन्ती सा कृत्वा संक्रान्तसंविदम् । सखीमभिन्नहृदयां विससर्ज तदन्तिकम् ॥४२९॥
प्राग्वत्पृष्ठं गते पाणौ पूगखण्डांस्तयार्पितान् । वक्त्रेक्षिपज्जयापीडः परिवृत्य ददर्श ताम् ॥४३०॥
भ्रूसंज्ञयासि कस्य त्वं पृष्टाया इति सुभ्रुवः । ददत्या वीटिकास्तस्या वृत्तान्तमुपलब्धवान् ॥४३१॥
तया जनितदाक्षिण्यस्तैस्तैर्मधुरभाषितैः । सख्याः समाप्रनृत्ताया निन्ये सं वसतिं शनैः ॥४३२॥
अभाग्यदेशशालापा तया तं सा विलासिनी । उपाचरत्परार्थ्यैश्चैः सोप्यभूद्विस्मितो यथा ॥४३३॥
ततः शशाङ्कधवले संजाते रजनीमुखे । पाणिनालम्ब्य भूपालं शय्यात्वेदम विवेश सा ॥४३४॥
ततः काञ्चनपर्यङ्कशायी मैरेयमत्तया । तयार्थितोपि शिथिलं विदधे नाधरांशुकम् ॥४३५॥
प्रवेशयन्निव बृहद्वक्षस्तां सत्रपां ततः । दीर्घबाहुः समाश्लिष्य स शनैरिदमब्रवीत् ॥४३६॥
न त्वं पद्मपलाशाक्षि नमे हृदयहारिणी । किं तु कालानुरोधोयं सापराधं करोति माम् ॥४३७॥
दासस्तवायं कल्याणि गुणैः क्रीतोस्म्यकृत्रिमैः । अचिराज्ज्ञातवृत्तान्ता भुवं वक्ष्यिष्यसेऽप्यसि ॥४३८॥
कार्यशेषमनिष्पाद्य सङ्गं मानिनि कंचन । अभोगे कृतसंकल्पं क्षुद्यानां त्वमवेहि माम् ॥४३९॥
तामेवमुक्त्वा पर्यङ्कं साङ्गुलीयेन पाणिना । वादयन्निव निःश्वस्य श्लोकमेतं पपाठ सः ॥४४०॥
असमाप्रजिगीषस्य स्त्रीचिन्ता का मनस्विनः । अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः ॥४४१॥
श्लोकेनात्मगतं तेन पठितेन महीभुजा । सा कलाकुशलाज्ञासीन्महान्तं कंचिदेव तम् ॥४४२॥
गन्तुकामं च तं प्रातर्नृपं प्रणयिनी बलात् । अर्थयित्वा चिरं कालमप्रस्थानमयाचत ॥४४३॥
एकदा वन्दितुं संध्यां प्रयातः सरितस्तटम् । चिरायातो गृहं तस्या ददर्श भुशविह्वलम् ॥४४४॥
किमेतदिति पृष्टाथ तमूचे सा शुचिस्मिता । सिंहोत्र द्रुमशाखात्रो निपत्याहन्ति देहिनः ॥४४५॥
नरनागाश्वसंहारः कृतस्तेन दिने दिने । व्ययथभूवं चिरायाते तद्भयेन समाकुला ॥४४६॥
राजानो राजपुत्रा वा तद्भयेन विसूत्रिताः । गृहेभ्यो नात्र निर्यान्ति प्रवृत्ते क्षणदाक्षणे ॥४४७॥
तामिति ब्रुवतीं[2] मुग्धां निषिध्य च विहस्य च । व्रीड इव तां रात्रिं जयापीडोन्यवाहयत् ॥४४८॥

---

४२२ [1]) द्रष्टु supplied by A_3 in space left by A_1 —[2]) A_1 glosses भरतानुगमालक्ष्यनृत्तगीतशास्त्रसहृदं ज्ञात्वा. ४२३ [1]) Here two padas seem to be wanting ४२५ [1]) Thus A_1; A_3 °पृष्ठेन ४२७ [1]) A_3 नून —[2]) Emended, A गृहीतुं°.—[3]) A, धावत्पां°. ४२८ [1]) Thus corr. by A_3 from A_1 सिंह. ४३१ [1]) Thus corr. by A_3 from A_1 दत्वन्त्या. ४३२. [1]) Thus corr. by A_3 from A_1 स्व ४४० [1]) A_3 कथयन्निव ४४१ [1]) Thus A_3; A_1 जगच्चित्रं ४४३ [1]) A_3 मित ४४४. [1]) A_3 स रजहस —[2]) Thus A_1, altered by later hand to °ङ्गलाम. ४४८ [1]) Thus corr. by later hand from A_1 ब्रुवतां.

अपरेद्युर्दिनापाये निर्गतो नगरान्तरात् । सिंहागमप्रतीक्षोभून्महावटतरोरधः ॥४४९॥
अदृश्यत ततो दूरादुत्फुल्लबकुलच्छविः । अट्टहासः कृतान्तस्य संचारीव मृगाधिपः ॥४५०॥ 450
अध्वनान्येन यान्तं तमथ मन्थरगामिनम् । राजसिंहो नदन्सिंहं समाह्वयत हेलया ॥४५१॥
स्तब्धश्रोत्रो व्यात्तवक्त्रः कर्म्मकूर्चः प्रदीप्तदृक् । उदस्तपूर्वकायस्तं सगर्जः समुपाद्रवत् ॥४५२॥
तस्य न्यस्याननविले कफोणिं पततः क्षुधा । क्षिप्रकारी जयापीडो वक्षः क्षुरिकयाभिनत् ॥४५३॥
शोणितं जग्धगन्धेभसिन्दूराभं विमुञ्चता । एकप्रहारभिन्नेन तेनात्यज्यत जीवितम् ॥४५४॥
आमुक्तव्रणपङ्क. स कफोणिमथ गोपयन् । प्रविश्य नर्तकीवेश्म निशि सुप्त्वा पूर्ववत् ॥४५५॥ 455
प्रभातायां विभावर्यां श्रुत्वा सिंहं हतं नृपः । प्रहृष्टः कौतुकाद्रष्टुं जयन्तो निर्ययौ स्वयम् ॥४५६॥
स दृष्ट्वा तं महाकायमेकप्रहृतिसंहृतम् । साश्चर्यो निश्चयान्मेने प्रहर्तारममानुषम् ॥४५७॥
तस्य दन्तान्तराक्षिप्तं केयूरं पार्श्वगार्पितम् । श्रीजयापीडनामाङ्कं ददर्शाथ सविस्मयः ॥४५८॥
स्यात्कुतोत्र सं भूपाल इति ब्रुवति पार्थिवे । जयापीडागमाशङ्कि पुरमासीज्जयाकुलम् ॥४५९॥
ततः पौरान्विमृश्यैवं जयन्तः क्षितिपोऽब्रवीत् । प्रहर्षावसरे मूढाः कस्माद्वो भयसंभवः ॥४६०॥ 460
श्रूयते हि जयापीडो राजा भुजबलोर्जितः । केनापि हेतुना भ्राम्यन्नेकाकीव दिगन्तरे ॥४६१॥
राजपुत्रः कलट इत्युक्ता कल्याणदेव्यसौ । तस्मै नियमिता दातुं निष्पुत्रेण सता मया ॥४६२॥
सोन्वेष्यश्चेत्स्वयं प्राप्तस्तत्राहरणेच्छया । रत्नद्वीपं प्रतिष्ठासोनिधानासादनं गृहात् ॥४६३॥
अस्मिन्नेव पुरे तेन भाव्यं भुवनशासिना । ब्रूयादेनं समान्वेष्य योस्मै दद्यामभीप्सितम् ॥४६४॥
वाचि सप्रत्ययाः पौरा भूपतेः सत्यवादिनः । अन्विष्य कमलावासवर्तिनं तं न्यवेदयन् ॥४६५॥ 465
सामात्यान्तःपुरोभ्येत्य प्रयत्नेन प्रसाद्य तम् । ततः स्ववेश्म नृपतिर्निनाय निहितोत्सवः ॥४६६॥
कल्याणदेव्यास्तेनाथ कल्याणाभिनिवेशिना । राजलक्ष्म्या व्यपास्ताया इव सोजिघदत्करम् ॥४६७॥
व्यधाद्विनापि सामर्थी तत्र शक्तिं प्रकाशयन् । पप्रच्छ गौडाधिपाञ्ज्ञित्वा भ्रभुरं तदधीश्वरम् ॥४६८॥
गनशेषं प्रभुत्यक्तं सैन्यं संवाहयन्स्थितः । मित्रशर्मात्मजो देवशर्मामात्यस्तमाययौ ॥४६९॥
निजदेशं प्रति ततः स प्रतस्थे तदर्थितः । अभे जयश्रियं कुर्वन्पथान्तेथ सुलोचने ॥४७०॥ 470
सिंहासनं जितादाजौ कन्यकुब्जमहीभुजः । स राज्यकुर्दं राजा जहारोदारपौरुषः ॥४७१॥
तस्मिन्प्रविष्टे स्वभुवं स्फूर्जदूर्जितविक्रमे । सैन्यैः समं समित्सज्जैर्जज्ञो योद्धुं विनिर्ययौ ॥४७२॥
शुष्कलेत्राभिधे ग्रामे तेन सार्धं सुतारुणः । जयापीडस्य संग्रामः सुबहूनि दिनान्यभूत् ॥४७३॥
अनुरक्तप्रजो राजा जज्ञराज्यासहिष्णुभिः । युधि सोन्वीयमानोभूद्भाम्याटविकमण्डलैः ॥४७४॥
श्रीदेवो मामचण्डालः प्राप्तो मास्यैः समं युधि । कोत्र जज्ञ इति भ्राम्यन्योधान्पप्रच्छ सर्वतः ॥४७५॥ 475
तृष्णार्तं स्वर्णभृङ्गारास्पिबन्तं वारि तस्य ते । रणमध्ये हयारूढं तं दूरात्समदर्शयन् ॥४७६॥

---

४५१ ¹) Thus corr by A_3 from A_1 °सिंहं. ४५२ ¹) Thus corr. by A_3 from A_1 कम्प°. ४५३ ¹) A_1 gloss खञ्जर. ४५४ ¹) A_2 gloss दृष्टान्तोक्तम् ४५५. ¹) A_2 gloss संविधासा ४५९ ¹) A_2 gloss प्रकृत कथासम्बन्धं स्मारयति गनशर्मेति ४७०. ¹) A_1 gloss कमलानर्तकी कल्याणदेवी च. ४७१. ¹) Thus A_1, A_2 °शाली ४७४ ¹) Thus A_2, A_3 सोन्विष्यमाना

भ्रमयन्क्षेपणीयं स क्षिप्त्वाऽमानं तदानने । सोयं हतो मया जज्ञ इत्यमोघक्रियोनदत् ॥४७७॥
साहायकाय राज्ञेहं यामीत्युक्त्वार्थितार्शनः । मातुर्हसन्त्या जज्ञस्य प्रतिज्ञायायथौ वधम् ॥४७८॥
अश्मसंरुग्णभीमास्यं मुमूर्षुं पतितं हयात् । विवेष्टमानं मेदिन्यां जज्ञं त्यक्ता ययुर्निजाः ॥४७९॥
स समर्थोहितापातचिन्तासततदुःस्थितः । द्रोहार्जितेन राज्येन त्रिभिर्वर्षैर्व्ययुज्यत ॥४८०॥
न्यासापहारात्प्रणिजां वेश्यानां कामिवञ्चनात् । द्रोहाच्चोपनतां राज्ञामस्थिरा एव संपदः ॥४८१॥
हते जज्ञे जयापीडः प्रत्यावृत्य निजां श्रियम् । जयाह दोष्णा भूभारं कृत्येन च सतां मनः ॥४८२॥
प्रपेदे यत्र कल्याणं स विरोधिवधाद्नृपः । देशे कल्याणपुरकृत्तत्र कल्याणदेव्यभूत् ॥४८३॥
राजा मल्हाणपुरंकृत्वके विपुलंकेशवम् । कमला सा स्वनाम्नापि कमलाख्यं पुरं व्यधात् ॥४८४॥
महाप्रतीहारपीठाधिकारं प्रतिपद्य सः । कल्याणदेवीदाक्षिण्याद्दकरोद्धिकोत्तिम् ॥४८५॥
उत्पत्तिभूमौ देशेस्मिन्दूरदूरतिरोहितां । कश्यपेन वितस्तेव तेन विद्यावतारिता ॥४८६॥
वनोमूर्खोयमित्येव कस्मैचिद्वदते स्फुटम् । सर्वज्ञानान्ददत्तके सर्वान्विद्याभियोगिनः ॥४८७॥
देशान्तरादागमय्य व्याचक्षाणान्क्षमापतिः । प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥४८८॥
क्षीराभिधाच्छब्दविद्योपाध्यायात्सभूतभुतः । बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥४८९॥
भूपतेरात्मना स्पर्धां चक्षमे न स कस्यचित् । आत्मनस्तु बुधैः स्पर्धां शुद्धधीर्बह्मन्यत ॥४९०॥
तावत्पण्डितशब्देभूद्राजशब्दादपि प्रथा । तैस्तैर्दोषैर्न तु म्लानिं कालान्तरवरायसौ ॥४९१॥
नृपतौ विद्वदायत्ते राजसांमुख्यकादिभिः । गृहा बभूवुर्विदुषां व्याप्ताः सेवागतैर्नृपैः ॥४९२॥
समग्रहीत्तथा राजा सोन्विष्य निखिलान्बुधान् । विद्वद्भिक्षमभवद्यथान्यनृपमण्डले ॥४९३॥
अध्यक्षो भक्तशालायां शुक्रदन्तस्य मन्त्रिणः । विद्वत्तया थक्रियाख्यस्तेन स्वीकृत्य वर्धितः ॥४९४॥
विद्वान्दीनारलक्षेण प्रत्यहं कृतवेतनः । भट्टोभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः ॥४९५॥
स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम् । कविं कविं बलिरिव पुरं धीसविधं व्यधात् ॥४९६॥
मनोरथः शङ्खदन्तश्चटकः संधिमांस्तथा । बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥४९७॥
स स्वप्ने पश्चिमाशायां लक्ष्यचुदयं रवेः । देशे धर्मोत्तराचार्यं प्रविष्टं साध्वमन्यत ॥४९८॥
सचेताः संस्तवव्यक्तविचक्षणस्तो बभूव सः । भावानां भुज्यमानानामास्वादान्तरविभूषः ॥४९९॥
अपश्यद्भिर्महास्वादान्भावान्स्वादुविवेकिभेः । किं ज्ञेयमशनादन्यत्क्षमापैरन्धैरिवोक्षभिः ॥५००॥

---

४७८ [1]) A_2 indicates by asterisks and the marginal note मण्डले साहायकाय, a different reading in which this verse followed after verse 474.—[2]) Thus A_3, A_4 हितापात. ४७९. [1]) Thus A_1, A_3 °संरोध°. ४८० [1]) Thus A_3, A_4 द्रोहाज्जनित. ४८१. [1]) Thus corr. by A_3 from A_4 °द्रोपहता. ४८४. [1]) A_1 gloss मलरो इति भाषया.—[2]) Doubtful: thus A_2, A_4 विरल्के°; A_3 मरलकेशवम —[3]) Thus corr. by A_3 from A_4 स्वा.—[4]) A_2 gloss कलमपुरं ४८५. [1]) Thus corr. by A_3 from A_4 °देवाधि° Cf. महाप्रतीहारपीडा iv. 142.—[2]) Thus A_1; A_2 °देवीं and °जनाम. ४८६. [3]) Thus G R Edd., A हिनी. ४८७. [1]) वेत्तारा supplied by A_3 in space left by A_4. ४८८. [1]) A_3 gloss प्रापत्य.—[2]) Thus A_1; A_2 °पक्षाप°, ४८९. [1]) A_2 gloss क्षीरस्वामिन ४९२. [1]) Thus corr by A_1 from राज्य° ४९४. [1]) Thus corr. by later hand from A_4 थाकया°. ४९५. [1]) A_3 gloss महोद्भट आलङ्कारिक. ४९६ [1]) A_4 °कारणम —[2]) A_3 gloss भुक्तं° ४९८ [1]) Thus A_3, A_4 सुस्वप्न.—[2]) Thus according to marginal note of A_3 देशे धर्मोत्तराचार्यमित्यन्वयार्थे; A_1 देशे धर्मोत्तराचार्ये. ५००. [1]) Thus corr by A_1 from A_4 °न्धैरि°

आरूढस्य चितां कृतानुमरणोद्योगप्रियालिङ्गनं[1] पुण्ड्रेक्षुद्रवपानमुल्बणमहामोहप्रलुप्तस्मृतेः ।
वीतासोरवतंसमाल्यवलयामोदश्च यादृग्भवेद्भावानां सुभगः स्वभावमहिमा निश्चेतसस्तादृशः ॥५०१॥
मन्त्रविक्रमयोस्तस्य हृयोर्दर्पणयोरिव । एकैव बिम्बिता मूर्तिः सहस्रगुणतां ययौ ॥५०२॥
आकुर्वन्विगुणामाज्ञां लङ्केन्द्रान्त्पञ्च राक्षसान् । तेनानयेति जगदे दूतो जातु पुरः स्थितः ॥५०३॥
सांधिवियहिकः सोथ गच्छन्पोताच्युतोम्बुधौ । प्राप पारं तिमिग्रासं तिमिमुत्पाट्य निर्गतः ॥५०४॥
प्रियमर्त्यो रामभक्त्या नृशालेखदायिनम् । स्वदेशमनयद्वासौ रक्षोभिस्तं विभीषणः ॥५०५॥ 505
दूतं विसृष्टैः पूरयित्वा सरोगार्घं च राक्षसैः । चक्रे जयपुरं कोहं विविष्टपसमं नृपः ॥५०६॥
बुद्ध्वयं महाकारं विहारं च विधाय सः । नगरान्तर्जयादेवीं पुण्यकर्मा स निर्ममे ॥५०७॥
तत्पुरे चतुरात्मा च द्रोणशायी च केशवः । विष्णुलोकस्थितिं त्यक्त्वा ध्रुवं वधाति संनिधिम् ॥५०८॥
अन्यत्कर्मान्तरं किंचित्कारयित्वा स राक्षसान् । व्यधात्कारुभिरेवाम्भ इति शंसन्ति केचन ॥५०९॥
स हि स्वप्ने जलान्तर्मे कुरु द्वारवतीमिति । उक्तः कंसारिणा चक्रे विनिर्माणं तथाविधम् ॥५१०॥ 510
श्रीद्वारवत्यधिष्ठानं वाह्यां कोहं तथा ह्यसौ । अभ्यंतरं जयपुरं वूतेशाप्यखिलो जनः ॥५११॥
मन्त्री पञ्चमहाशब्दभाजनं जगतीभुजः । तस्मिञ्जयपुरे कोहे जयदत्तो व्यधान्मठम् ॥५१२॥
राजक्षत्तुः प्रमोदस्य जामाता मथुरापतेः । आचामिधो व्यरचयच्छुचिराचेभ्रं हरम् ॥५१३॥
पुनः संभृतसामग्र्यो दिग्जयाय विनिर्ययौ । बलैर्जलधिवेलाद्रीन्द्राधयन्नलघुद्विषैः ॥५१४॥
संप्रविष्टापि पूर्वाग्धिमविच्छिद्या हिमाचले । भगीरथस्य गङ्गेव रेजे तस्यानुगा चमूः ॥५१५॥ 515
सार्धं प्रचण्डैश्चण्डालैरटन्तः कटकाद्वहिः । तस्यासन्यामिका रात्रौ मुम्मुनिप्रमुखा नृपाः ॥५१६॥
नामान्यद्विनयादित्य इति पश्यापयन्नृपः । पूर्वाशां विनयादित्यपुरेणालंकृतां व्यधात् ॥५१७॥
अत्युत्सेकेन महसां साहसाध्यवसायिनाम् । भीतारोहति संदेहं महतामपि भूभृताम् ॥५१८॥
भीमसेनाभिधानस्य स दुर्गं पूर्वदिक्पतेः । निःशब्दो व्रतिभिः सार्धं व्रतिलिङ्गी विवेश यत् ॥५१९॥
तं रन्ध्रान्वेषिणं तत्र परिज्ञाय चिरस्थितः । भ्राता जज्ञस्य सिङ्गाख्यो गत्वा राज्ञे न्यवेदयत् ॥५२०॥ 520
भूपतिः[1] भीमसेनोथ राजाकस्माद्वबन्ध तम् । ननुपाजगरो भीममिव भीमपराक्रमम् ॥५२१॥
तस्मिन्वीरे तथा बद्धे धुर्ये पुरुषकारिणाम् । पौरुषद्वेषिणा जाने दैवेनोन्नमितं शिरः ॥५२२॥
जयापीडस्त्वसंमूढो व्यसनेप्यतिदारुणे । तांस्तान्संचिन्त्यसासीदुपायानुदयोन्मुखः ॥५२३॥
अत्रान्तरे नरपतेः पौराणामतिदुस्तरा । लूतामयकृता व्यापदुदपद्यत मण्डले ॥५२४॥

---

५०१. [1]) A_2 note in margin आरूढस्येत्यादिस्थाने पण्डस्योन्मदबालपङ्कजमुखीपीनस्तनालिङ्गनमित्यपि पाठो रम्य. ५०३. [1]) The original reading of A_1, अकुर्वन्नि[2], has been corrected into आंकुर्वन्नि[2] by a later hand, probably A_2. A_2 explains the latter reading by the gloss विगुणामपि आज्ञामाकुर्वन् आं अङ्गीकारे. A_3 gives the interlinear note अकुर्वन्नित्यगुणामित्यन्वयार्थो, and explains this reading in margin दूत किं कुर्वन् आज्ञां राजसम्बन्धिनीं विगुणा निष्फला अकुर्वन् न विरचयन मानयन्नाज्ञामित्यर्थः.—[2]) Thus corr. by A_2 from A_1 लङ्केन्द्रान्पञ्च ५०४ [1]) Thus corr by later hand from A_1 [2]मकरं ५०७. [1]) दुद्द supplied by A_1 in space left by A_1, found also in G R; C पुरः ५१२. [1]) Thus A R G, C राज्ञय —[2]) A gloss अन्तर्कोट इति भाषया. ५१३ [1]) Thus corr. by A_2 from A_1 मथुरा[2]. ५१५ [1]) Thus corr. by A_2 from A_1 [2]हि ५२८. [1]) Thus A_3, A_1 सहसा.—[2]) Thus corr. by A_2 from A_1 सहसाध्यवसायिनाम्, A_3 gloss साहसेन विनाहितानपेक्षेण क्रमेणा अभ्यवसायो येषां. ५२९ [1]) Thus A_3, A_1 [2]भूपतेः ५२२. [1]) Thus corr by A_2 from A_1 [2]पतिर्भीम ५२४ [1]) A_2 gloss उच्छूनो रक्तवर्ण पिटकाकृतिर्विस्तृत सञ्चारी च स्यचि रोगविशेष लूतामय लोन् इति प्रसिद्ध.

आमयः स्पर्शसंचारी[1] तत्र व्यापादकश्च सः । देशदोषादतो जन्तुर्लूताव्याप्तो विवर्ज्यते ॥५२५॥
तदाकर्ण्य जयापीडो जातोपायप्रयुक्तधीः । स्वभृत्येनोपयुक्तानि द्रव्याण्यानीतवान्नहः ॥५२६॥
तैः पित्तोद्रेचकैर्भुक्तैश्चैलप्तित्तोवहज्ज्वरम् । वचावृक्षपयश्चाङ्के क्षिप्त्वा सर्पिटकोभवत् ॥५२७॥
तं लूताव्याप्तमाकर्ण्य विपक्षो रक्षिणां मुखात् । विपत्स्यते ध्रुवमिति ध्यात्वा देशाद्बहिर्ययौ[2] ॥५२८॥
एवं स्वमतिमाहात्म्यात्संतीर्णो विपदर्णवात् । व्याप्तव्योमामहीदुर्गं यशश्च परिपन्थिनः ॥५२९॥
यः सर्वकालमबुधैः परिहस्यमानो मूलाङ्कुराद्यपि न जातु पुरस्करोति ।
व्यापत्तु शाखविटपी स फलं प्रसूय पुंसः किलैकपद एव लुनात्यलक्ष्मीम् ॥५३०॥
तमिच्छदभिसंधातुं विद्याविक्रमसंयुतः । मायाव्यरमुड्डिर्नाम राजा नेपालपालकः ॥५३१॥
भक्तप्रणतिसंस्तस्यं प्रविष्टस्य स्वमण्डलम् । अमार्गस्थदूरमध्यान् ससैन्योपससार सः ॥५३२॥
जिगीषोस्तस्य तु तथा तत्तत्पार्थिवनिर्जयैः । पृथक्पयत्नानिर्वर्त्यो नाभूत्तदनुसारिणः ॥५३३॥
मग्नं क्वापि क्वचिद्दुरयं प्रविदेशं स वैरिणम् । ध्येयैनः कपोतं कक्ष्यान्तरिवान्विष्यञ्जगाम सः ॥५३४॥
ततो निःशेषितापाये तस्मिन्कुर्वन्स दिग्जयम् । आसन्नाब्धेस्तटे सिन्धो[3]ः समुपावेशयद्बलम् ॥५३५॥
प्रतस्थे दिवसैर्द्वित्रैरथ पूर्वार्णवोन्मुखः । कर्षन्वेलानिलस्पर्शोत्सृष्टध्वजपटाधमूः ॥५३६॥
ततस्तस्मिन्सरित्पारे दक्षिणस्मिन्क्षमापतेः । तस्थावरमुड्डिः सैन्यं स्वच्छत्राङ्कं प्रकाशयन् ॥५३७॥
भूरिभेरीरवोद्गारि प्रबलं वीक्ष्य तद्बलम् । प्रजज्वाल जयापीडः पीतसर्पिरिवानलः ॥५३८॥
स जानुदघ्नं निर्विघ्नं पश्यन्तमे सरिज्जलम् । अपूर्वत्वादभूभिज्ञः क्षुद्धस्तर्तुं व्यगाहत ॥५३९॥
मध्यं प्राप्ते नृपे पूर्णा वेलया वर्धमानया । अकालेभूदगाधाम्भाः सार्णवाभ्यर्णगा सरित् ॥५४०॥
नरनागाश्वबहुलं तथा सैन्यं महीपतेः । प्रवृद्धया प्लाव्यमानं क्षणात्संक्षयमाययौ ॥५४१॥
नृपतिर्वीचिसंमर्दभ्रंशिताभरणांशुकः । बाहुभ्यां लहरीश्छिन्दन्नुच्चैर्दूरमनीयत ॥५४२॥
एकस्य करुणाक्रन्दैः सैन्यस्यान्यस्य गर्जितैः । सरित्तरङ्गघोषेण बभूवुस्तुमुला दिशः ॥५४३॥
क्षिप्रकारी सदृतिभिः संनद्धैः सरितोन्तरात् । स चाकृष्य जयापीडं बबन्ध विहितोत्सवः ॥५४४॥
दैवस्याम्बुमुचश्च नास्ति नियमः कोप्यानुकूल्यं प्रति व्यज्ञ्जन्यः प्रियमुत्कटं घटयते जन्तोः क्षणादप्रियम् ।
क्षिप्रं दीर्घनिदाघवासरविपत्संतापनिर्वापणं प्रादुष्कृत्य वनस्पतेः प्रकुरुते विद्युद्विसर्गं च यः ॥५४५॥
स कालगण्डिकाशीराभयास्युषाश्मवेदमनि । निचिक्षेप जयापीडमाप्तानां[4] रक्षिणां करे ॥५४६॥
तथा काश्मीरिको राजा निममो व्यसने पुनः । स किंकर्तव्यतामूढः शुचा गूढमदह्यत ॥५४७॥
कलावत्तु शशाङ्कोपि तेजस्विष्वर्यमापि तम् । न ददर्श यथा धीमान्स्ररक्ष तथा नृपः ॥५४८॥
अपश्यच्चिर्गतः[5] किंचिदालोकन्यस्तलोचनः । आसन्नां तटिनीमासीदुपायांश्च स चिन्तयन् ॥५४९॥

---

५२५. [1]) Thus corr. by A_1 from सर्वसं°. ५२८. [2]) A_4 gloss भारुण्डिः.—[3]) A_4 gloss जयापीडस्य.—[4]) Thus A_1, A_3 अगा स्सु°, G R have both readings. ५३३. [3]) A_4 gloss जयापीडस्य. ५३४. [4]) A_3 gloss ध्येयेन. कपोत भक्षयतीति प्रसिद्धि — [5]) Emended ; A G R °न्ध्येय° ५३५. [5]) A_2 gloss सरित:. ५३७. [6]) Thus corr. by A_3 from A_1 तस्थावुरमुड़ें. ५३९ [7]) Thu corr. by A_3 from A_1 स्तत. ५४२. [8]) Thus corr. by A_3 from A_1 °मर्म°. ५४४. [9]) A_2 gloss कृतिः जलोत्तरणार्थं भाहा इति प्रसिद्धा ५४६. [10]) Thus corr. by A_3 from A_1 °पीड सम्मानां ५४९. [11]) Thus corr. by later hand from A_1 निर्गत.—[12]) A gloss आलोक्यतेनेनेत्यालोक वातायनं । तस्मिन् न्यस्ते लोचने येन स .

अवस्थावेदकास्तत्र ग्रथिताः पृथिवीभुजा । आर्द्रान्तःकरणैः श्लोकाः स्मर्यन्तेद्यापि सूरिभिः ॥५५०॥ 550
तथा तस्मिन्स्थिते मानी देवशर्मैव मन्त्रिषु । चिन्तयन्स्वामिसंमाननिशं पर्यतप्यत ॥५५१॥
भर्तुः स्वदेहत्यागेन स हित कर्तुमुद्यतः । दूतैरसमुडेश्चक्रे प्रियवाग्भिः प्रलोभनम् ॥५५२॥
जयापीडश्रिया सार्कं राज्यं कदमीरमण्डले । दास्यामि तुभ्यमित्यस्य दूतैः स श्रावितोभवत ॥५५३॥
प्राप्तेषु प्रतिदूतेषु पूर्णायामथ संधिदि । गृहीतकटको मन्त्री नेपालविषयं ययौ ॥५५४॥
स कालगण्डिकासिन्धोरर्वाचि कटकं तटे । स्थापयित्वा परं पारं ययौ मितपरिच्छदः ॥५५५॥ 555
सामन्तैरयमायातैस्तां सभां संप्रवेशितम् । सत्कृत्यारमुडिः प्रह्वं न्यवेशयत विष्टरे ॥५५६॥
अध्वश्रान्त इति क्षिप्रं प्रतिमुक्तः क्षमाभुजा । तस्मिन्नुष्टापनारस्तन्निनायावसथे दिनम् ॥५५७॥
स चारमुडिभूभुग्भ्य पीतकोशौ परस्परम् । आसतां निजैनेन्येषुः कर्तव्यकृतनिश्चयौ ॥५५८॥
नृपमूचेथ सचिवो जयापीडार्जितं धनम् । अस्ति सैन्ये तदाप्तानां तस्य वा विदितं च तत् ॥५५९॥
दानेन भविता मोक्षस्तवेत्युक्ता विमोहयन् । तस्मात्तं प्रभुमिच्छामि क्व वस्तु न्यस्तमित्यहम् ॥५६०॥ 560
अत एव मया सैन्ये संहतं न प्रवेशितम् । यदेतन्मध्यगाः शक्या न बन्दुं न्यासधारिणः ॥५६१॥
तस्मादेकैकमाहूय तेषु बद्धेषु सैनिकाः । कोपमज्ञातहृदया न यास्यन्ति विवक्षवः ॥५६२॥
एवं विमोहितात्तस्मात्प्राज्ञोनुज्ञां स लब्धवान् । बद्धस्य प्रययौ पार्श्वं जयापीडमहीभुजः ॥५६३॥
तदालोकनजं शोकं गोपयन्नैर्यसागरः । गृहं तन्निर्जनं कृत्वा क्षिप्रं पप्रच्छ तं नृपम् ॥५६४॥
अपि त्वया निजं तेजो भित्तिभूतं न दारितम् । तस्मिन्हि सति सिध्यन्ति साहसालेख्यकल्पनाः॥५६५॥ 565
स तं बभाषे निःशस्त्रो मन्त्रिन्नेवं व्यवस्थितः । अद्भुतं कर्म किं कुर्या प्रियमाणेन तेजसा ॥५६६॥
मन्त्री तमूचे तेजश्चेद्राजन निसृतं तव । जानीहि तत्क्षणेनैव लक्षितं विपदं गतम् ॥५६७॥
अपि त्रातायनादस्मात्पतित्वा निस्गाम्यसि । पारं गन्तुं समर्थोसि सैन्यं यत्र निजं तव ॥५६८॥
राजा जगाद तं नास्मात्पतिन्दोत्थीयतेमसः । विना दूतिं दृतिभात्र दूरपातात्क्रीर्यते ॥५६९॥
तस्मान्नायमुपायोत्र न च नाम विमानितः । बहु मन्ये तनुत्यागमनिर्मथ्यापकारिणम् ॥५७०॥ 570
ततो निश्चित्य सोमाख्यस्तमवादीन्महीपते । बहिः केनाप्युपायेन बहेस्त्वं नालिकादयम् ॥५७१॥
पवित्रदैवकाकिनैवाथ द्रष्टव्यः संभृतो मया । सरिदुत्तरणोपायः सोनुष्ठेयोप्यशङ्कितम् ॥५७२॥
श्रुत्वेति निर्गतो गत्वा पार्श्वक्षालनवेदम सः । सविलम्बं बहिर्वेलां तदुक्तामत्यवाहयत् ॥५७३॥
एकाकी संपविष्टोथ तं ददर्श च्युतं क्षितौ । विपन्नं गलमुद्वृत्य दृढया चेलचीरया ॥५७४॥

---

५५० [1]) A_1 gloss बन्धनवेदमनि. ५५१ [1]) Thus corr by later hand from A_1 °न्तिस्थो ५५२ [2]) न supplied by A_2. -[2]) Emended, A_1 °रमुडेश्चक्रे, changed by later hand to °मुडेश्चक्रे. -[3]) Thus corr by later hand from A_1 °भिर्विलोभनम ५५६ [1]) Thus corr by A_2 from A_1 °ड ५५७ [1]) Thus A_1, A_2 प्रांतलिप. ५५८ [1]) A_2 gloss पीतकोशौ कृतप्रतिकारित्यर्थं. to द्रौहिका° A_2 adds the note शपथ ५६१ [1]) Thus corr by A_2 from A_1 यदि तन्म ; A_2 gloss एतन्मध्यगा सहतसैन्यमध्यगा इत्यर्थं.—[2]) Thus corr, by A_2 from A_1 बन्धु ५६३ [1]) Thus A_2, A_1 प्राज्ञोप्याज्ञा ; R G follow A_2 ५६४ [1]) Thus corr by A_2 from A_1 सर्वम° ५७१ [1]) Thus corr by A_2 from A_1 इति —[2]) Thus corr by later hand from A_1 वहस्त्व, A_2 gloss वहे गमयेत्यर्थं.—[3]) A_2 gloss घटिकाद्वयमित्यर्थं ५७३ [1]) Thus corr by A_2 from A_1 पाद° —[2]) A_2 gloss घटिकाद्वयरूपां.

संधो व्यापादिततनुः श्वासापूरितविग्रहः । अभेद्योहं तव कृतिर्मीमांरुद्ध तरापणम् ॥५७५॥
आरोढुरूर्ध्वबन्धाय स्वोर्वोरुष्णीषपट्टिकां । बद्धा मया तां प्रविश्य क्षिप्तमेव पताम्भसि ॥५७६॥
नखनिर्भिन्नगात्राल्लिखितामिति संविदम् । दृष्ट्वा चावानयत्कण्ठनिबद्धांशुकपल्लवे ॥५७७॥ तिलकम् ॥
विस्मयक्लेदयोः पश्चात्पूर्वं स सरितस्ततः । प्रवाहे पतितो राजा परं पारं समासदत् ॥५७८॥
प्राप्तसैन्यः प्रविश्याथ क्षणेनैव निनाय सः । तमशेषं सभूपालं नेपालविषयं क्षयम् ॥५७९॥
रक्षिणोपि न यावत्तमानन्दान्धनाच्युतम् । तावदेव कथाशेषं विषयं तं चकार सः ॥५८०॥
नृत्यत्कबन्धः स्वर्गस्त्रीमुक्तलक्तकपूर्यघोषवान् । भूपतेर्बन्धनान्मोक्षे बभूव समरोत्सवः ॥५८१॥
दावज्वालोल्बणभुवो गिरयो निदाघे यत्रैव दूरमितरे परिवर्जनीयाः ।
तत्रैव संभवति सान्द्रहिमद्रवार्द्रशित्रं तुषारशिखरी नितरां निषेव्यः ॥५८२॥
जज्ञाजादीनां क्षणे यत्र जन्म स्वामिद्रुहामभूत् । तत्रैव मन्त्रिणश्चित्रं कृतिनो देवशर्मणः ॥५८३॥
नाभूद्धि सदृशः सूनुः स पितुर्मित्रशर्मणः । तमोमयो भास्वतस्यं भानोरिव शनैश्चरः ॥५८४॥
रक्षारत्नोपमे तस्मिन्सचिवेस्तमुपागते । प्राप्तामपि श्रियं मेने नृपतिर्हारितामिव ॥५८५॥
तस्य दिग्विजयस्यान्ते मानस्लानिर्विनिर्ययौ । मानसात्पृथिवीभर्तुर्नामात्योपक्रिया पुनः ॥५८६॥
चित्रं जितवतस्तस्य स्त्रीराज्ये मण्डले महत् । इन्द्रियग्रामविजयं बहुमन्यन्त भूभुजः ॥५८७॥
कर्णश्रीपटमाबध्य स्त्रीराज्यान्निर्जिताद्भुतम् । धर्माधिकरणाख्यं च कर्मस्थानं विनिर्ममे ॥५८८॥
द्वितीयं चलगज्झाख्यं कर्मस्थानमपि व्यधात् । उपयुक्त प्रयाणेषु गच्छे दूरस्थिते निजे ॥५८९॥
किमन्यच्चङ्गजावासनिवासिन्या जयश्रियः । चत्वारोम्बुधयोभूवन्विलासमणिदर्पणाः ॥५९०॥
पुनः प्रविश्य कटकीरान्स भूपैः परिवारितः । विराय बुभुजे राजा विजयोपार्जितां श्रियम् ॥५९१॥
तं कदाचिदुपे स्वप्ने सर्वाशाविनियोजितम् । पुमान्दिव्याकृतिः कोपि व्याजहार कृताञ्जलिः ॥५९२॥
सुखं त्वद्विषये राजन्वसन्नस्मि सबान्धवः । नागेन्द्रोहं महापद्मनामा त्वां शरणं श्रितः ॥५९३॥
द्राविडो मान्त्रिकः कश्चिन्मामितो नेतुमुद्यतः । जलाकाङ्क्षिणि वित्तेन विक्रेतुं मरुमण्डले ॥५९४॥
तस्माच्चेत्पासि मां तत्त्वं स्वर्णधातुसुतं गिरिम् । स्वदेशे दर्शयिष्यामि स्फीतोपकृतिकाङ्क्षिणः ॥५९५॥
राजा स्वप्ने निशम्येति दिक्षु संप्रेरितैश्चरैः । कुतोपि प्राप्तमानीय तं पप्रच्छ चिकीर्षितम् ॥५९६॥
दत्ताभयः स नागोक्तं यथावत्सर्वमुक्तवान् । सविस्मयेन भूमर्त्रा स्वयं भूयोप्यपृच्छ्यत ॥५९७॥
भूरियोजनविस्तीर्णात्सरसोभ्यन्तराच्चया । नागः प्रभावोत्कृष्टः स निष्क्रष्टुं शक्यते कथम् ॥५९८॥
स तं व्यजिज्ञपद्राजन्चिन्त्या मन्त्रशक्तयः । ताभिर्दिदृक्षसे क्षिप्रमस्यार्थश्चैव त्रिलोक्यताम् ॥५९९॥
अथानुगम्यमानः स राज्ञा प्राप्तः सरोन्तिकम् । अभिमन्त्र्योज्झितैर्वारिबद्धाशोशोषयज्जलम् ॥६००॥

---

५७५ [1]) A, gloss संधो व्यापादिततनुरित्यादि पताम्भसीत्यन्ता शिक्षा राज्ञः कृते नरयनिर्भिन्नस्वशरीरस्फोटेन लिखिता सेन कृतज्ञेन मंत्रिवरेण स्वकीयकण्ठनिबद्धे वस्त्रखण्डे — [2]) A, gloss अत एव कृतिर्वाक्यार्थ —) A_1 originally कृतेर्मी°, to this reading refers the gloss of A_2 कृते सकाशाद्व्यनेनाहमित्यर्थ On altering the reading to कृतिर्मी°, A_2 has struck out the first gloss and added a fresh one अत्रभवतो कृतिरस्मि —[3]) A gloss मा कृतिरूप ५७६ [1]) Thus corr. by later I and from A_1 °बन्धाय —[2]) A_2 gloss उष्णीषपट्टिका वेष्टनाच्चलद्वयपट्टिकेत्यर्थः. ५८३ [1]) Thus corr by later hand from A_1 क्षण. ५८४ [1]) Thus A R G, C नाभूद्धिसदृश —[2]) Thus A_1, A_2 भास्वरस्य ५९६ [1]) Thus A_1, A_2 °प्रेषितैश्च°

राजापदयत्ततः पङ्क्तौ लुठन्तं मानुषाननम् । वितस्तिदेहयमुरगं भूरिहस्तोरगान्वितम् ॥६०१॥
मन्त्रसंकोचितं राजन्गृह्याम्यमुमिति ब्रुवन् । मा मंहीरिति भूपेन सोभिधायं न्यषिध्यत ॥६०२॥
नूर्णं राजाज्ञया तेन[1] मन्त्रवीर्येण संवृते । सरोभूत्पागवस्थं तत्पुनर्व्याप्तदिगन्तरम् ॥६०३॥
द्राविडं द्रविणं दत्त्वा विसृज्याचिन्तयन्नृपः । दशाक्षाण्यसौ नागः कथं स्वर्णाकरं गिरिम् ॥६०४॥
ध्यायन्तमेव तं स्वप्ने ततः प्रोवाच पन्नगः । केनोपकारेण गिरिः स्वर्णसूस्तव दर्श्यते ॥६०५॥ 605
स्वदेशोयं विदेशोयमिति बुद्धेः प्रवर्तकः । अन्वयव्यतिरेकाभ्यां स्थित्यभ्यास· शरीरिणाम् ॥६०६॥
शरणं त्वामहमगामवमानभयात्पुनः । शरण्येन सता तत्तु भवतैव प्रदर्शितम् ॥६०७॥
उदन्वानिव योक्षोभ्यो ज्ञायते संश्रितैः प्रभुः । का ह्रीस्तस्योन्या सोन्यैर्यस्येषामपेभिभूयते ॥६०८॥
याभिरन्याभिभूताभिरीक्षितस्त्वातुमक्षमः । तासां केनाभिमानेन स्त्रीणां द्रक्ष्याम्यहं मुखम् ॥६०९॥
यैकारणंसधर्माणो व्यानुद्रस्य भवाम ते । विद्रम्भ्यमानाः क्रीडायै ते वयं प्राकृता इव ॥६१०॥ 610
अथ वा श्रीमदान्धानामपेक्षापूर्वकारिणाम् । यत्किंचनविधायित्वं पार्थिवानां किमद्भुतम् ॥६११॥
मन्यन्ते क्ष्माभुजः क्रीडामुच्चतानां विमाननाम् । यावज्जीवं तु सध्वासं मरणं तां विदन्ति ते ॥६१२॥
उपेक्ष्यंपक्षे भूपानां मानः स्वार्थस्य सिद्धये । स तु प्राणानुपेक्ष्यापि प्राप्यपक्षे मनस्विनाम् ॥६१३॥
महतो यैवमन्यन्ते घटन्ते च विमानितैः । मनःस्वरूपाभिज्ञत्वं तेषां केनानुमीयते ॥६१४॥
भवन्त इव तत्रापि न वयं व्यर्थदर्शनाः । ताम्रधातुरसस्यन्दी दर्श्यते तद्गिरिस्तव ॥६१५॥ 615
इत्युक्त्वा संविदं तस्मै स्वप्न एव स तां ददौ । यथा प्रबुद्धः प्रत्यूषे प्राप ताम्राकरं गिरिम् ॥६१६॥
स तस्मात्क्रमराज्यस्थात्ताम्रमाकृष्य निर्ममे । शतं दीनारकोटीनामेकोनं स्वाभिधाङ्कितम् ॥६१७॥
पूर्णं कोटिशतं कुर्याद्यः स मां निर्जयेदिति । दर्पभङ्गाय भूपानां समयं स्थापयन्नृपः ॥६१८॥
समस्या इव स क्ष्माभृत्सार्वशैर्वैचेष्टितैः । चिक्षेप तुल्यनिर्माणकुण्डत्वायेति भूभृताम् ॥६१९॥
अथाकस्मान्महीपालः प्रजाभाग्यविपर्ययैः । त्यक्ता पैतामहं मार्गं ययौ पित्र्येण सोध्वना ॥६२०॥ 620
किं दिग्जयादिभिः क्लेशैः स्वदेशादर्जयंतां धनम् । इत्यर्थ्यमानः कायस्थैः स्वमण्डलमदण्डयत् ॥६२१॥
शिवदासादिभिर्लुब्धैर्धनस्थानाधिकारिभिः । प्रवित्तर्धितवित्तेच्छः सोभूल्लोभवशंवदः ॥६२२॥
काश्मीरिकाणामुत्पत्तिं निजाज्ञाव्यवधायकम् । कायस्थवक्त्रप्रेक्षित्वं ततः प्रभृति भूभृताम् ॥६२३॥
मन्त्रस्तस्य महीभर्तुर्योभूत्तत्तन्नृपप्रहे । वास्तव्यबन्धचिन्तायां स एव स्थैर्यमाययौ ॥६२४॥
यत्सतां प्रशमाधायि पापस्योपादिदेश तत् । जयापीडस्य पाण्डित्यं प्रजापीडनशौण्डताम् ॥६२५॥ 625
स सौदास इवानेकलोकप्राणापहारकृत् । अस्तुत्यकृत्यसौहित्यं स्वप्नेपि न समाययौ ॥६२६॥
कुर्मः किंचिदपमेतदेव हृदये कृत्वेति कौतूहलास्त्वैरिण्यः क्षितिपाश्च धिक्चपलतां क्रौर्यं च कुर्युः सकृत् ।
पापाक्रान्तधियो भवन्त्यथ तथा नान्त्यान्स्पृशन्त्योपि ना दूयन्ते न च ते यथा स्वपितरौ ग्रस्तोपि शान्तव्रताः ॥६२७॥

---

६०२ [1]) Emended, A सांध्यधाय ६०३ [1]) Thus corr. by A_2 from A_1 यासे. ६०४ [1]) Thus corr by A_2 from A_1 °भूनये ६१० [1]) A_1 वेऽकारण° ६१२ [1]) Thus corr by later hand from A_1 विमानिनाम ६१३ [1]) A_2 gloss त्याज्य ६१७. [1]) Thus A_1, A_2 शीघ्रार° ६२२ [1]) Thus corr by A_2 from A_1 °कारारिभि. ६२३ [1]) Thus corr by A_2 from A_1 काश्मीरका°

लोभाभ्यासात्तथा क्रौर्यं स ययौ वत्सरत्रयम् । सह कार्षकभागेन यथाहार्योज्झदत्फलम् ॥६२८॥
तुष्यत्वभ्रस्तधीर्भूभृत्स्वल्पवित्तलवप्रदान् । सर्वस्वहारिणो मेने कायस्थान्हितकारिणः ॥६२९॥
सामुद्रास्तिमयो नृणाश्च सदृशा एके हतादंम्भसः स्वस्मादेव कणान्वनस्य जहतो जानन्ति ये दातृताम् ।
सर्वस्मात्स्फुटलुण्ठिताद्विवरतो नेशान्किलान्येपि ये दुष्कायस्थकुलस्य हन्त कलयन्त्यन्तर्हिताधायिताम् ॥६३०॥
सर्वकालं ब्राह्मणानामहो धैर्यमकुण्ठितम् । निर्लिंशस्य बभूवुर्ये तस्यापि परिपन्थिनः ॥ ६३१ ॥
देशान्तरं प्रयातेभ्यो ये शेषास्ते व्यरंसिषुः । विक्रोशन्तो न मरणाद्धरणाच्चापि पार्थिवैः ॥६३२॥
विप्राणां शतमेकोनमेकाहेन विपद्यते । निवेद्यमेतदित्यूचे क्रौर्याक्रान्तोथ पार्थिवः ॥६३३॥
विपर्यस्तचरित्रस्य तस्य क्रूरस्य भूपतेः । एवं स्तुतिविपर्यासः काव्येष्वपि बुधैः कृतः ॥६३४॥
नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः । श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥६३५॥
भाष्यव्याख्याक्षणे श्लोकैर्वैचक्षण्यहतैः कृतः । सोयं तस्य विपर्यासो बुधैरेवं प्रवर्तितः ॥६३६॥
कृतत्रिपेःपसर्गस्य भूतनिष्ठाविधायिनः । श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥६३७॥
तूलमूल्यापहर्ता च चन्द्रभागातटे स्थितः । विप्राणां शतमेकोनमभृणोत्तज्जले मृतम् ॥६३८॥
ततोयहारहरणादेव प्रविरतोभवत् । वास्तव्यानां हतां भूमिं न तु निःशेषतो जहौ ॥६३९॥
अथ विज्ञप्तिसमये तूलमूल्यौकसो द्विजाः । चुक्रुशुर्जातु तस्याग्रे प्रतीहारकराहताः ॥६४०॥
मनुमान्धातृशमाद्या बभूवुः प्रवरा नृपाः । अन्यभावि तदप्येषि ब्राह्मणैर्न विमानना ॥६४१॥
सेन्द्रं स्वर्गं मशैलां क्ष्मां सनागेन्द्रं रसातलम् । निर्दग्धुं हि क्षणेनैव विप्राः शक्ताः प्रकोपिताः ॥६४२॥
तदाकर्ण्यास्त सामन्तत्यक्तपृष्ठः क्षमापतिः । उल्लासितैकभ्रूलेखो दर्पाद्वचनमब्रवीत् ॥६४३॥
भिक्षाकणभुजां कोयं शठानां वो मदज्वरः । येनैवंय इव ब्रूथ प्रभावख्यापकं वचः ॥६४४॥
भीमभूभङ्गभीतेषु तेषु तूष्णीं स्थितेष्वथ । इंङ्गिलाख्यस्तमाह स्म व्रजते नोनिधिर्द्विजः ॥६४५॥
राजन्युगानुरूप्येण भावाभावानुवर्तिनः । शासितुस्तेनुसारेण न कस्मादृषयो वयम् ॥६४६॥
आह स्म विश्वामित्रो वा वसिष्ठो वा तपोनिधिः । त्वमगस्त्योथ वा किं स्या इति दर्पेण तं नृपः ॥६४७॥
ज्वलन्निव ततः स्फूर्जन्नेजोदुष्प्रेक्ष्यविग्रहः । स फणीवोत्फणस्तास्यन्कोपान्नृपतिमब्रवीत् ॥६४८॥
भवान्यत्र हरिश्चन्द्रस्त्रिशङ्कुर्नहुषोपि वा । विश्वामित्रमुखेभ्योहं तत्रैको भवितुं क्षमः ॥६४९॥
विहस्योवाच त राजा विश्वामित्रादिकोपतः । हरिश्चन्द्रादयो नष्टास्त्वयि क्रुद्धे तु किं भवेत् ॥६५०॥
पाणिना ताडयत्सुर्वी ततः क्रुद्धोभ्यधाद्विजः । मयि क्रुद्धे क्षणादेव ब्रह्मदण्डः पतेन्न किम् ॥६५१॥
तच्छ्रुत्वा विहसन्राजा कोपाद्ब्राह्मणमब्रवीत् । पतत्तु ब्रह्मदण्डोसौ किमद्यापि विलम्बते ॥६५२॥
नन्वयं पतितो जाल्मेत्यथ विप्रेण भाषिते । राज्ञः कनकदण्डोङ्के वितानस्खलितोपतत् ॥६५३॥

---

६३० 1) Thus A_1, A_2 हतान् —2) Thus A_1, A_2 °नान्वि°. ६३३. 1) Thus A_1, A_2 °काले चेद्वि° ६३६ 2) Thus A_1, A_2 श्लोकै वै°.—3) Thus corr. by A_1 from A_1 विपर्यासे —4) Thus corr. by A_2 from A_1 विवर्तितः · ६३७ 1) A_2 gloss निष्ठाशब्द इह नाशवाची ६३८. 1) Thus corr by A_2 from A_1 तूलमूला° ६४०. 1) Thus A_2, A_1 तूलमूली°. A_2 gloss तूलमूलाख्यो ग्राम ६४४ 1) Thus corr. by A_2 from A_1 °व्यापक. ६४५ 1) Thus corr. by A_2 from A_1 तूष्णी —2) Thus corr. by A_2 from A_1 इङ्गिला°. ६४६ 1) A_2 विप्रा भूपानुवर्तिन इत्यन्वार्षं. ६४८ 1) Thus A_1, A_2 दुष्प्रेक्ष्° ६४९ 1) A_2 gloss भवान्यत्रेति विश्वामित्रशापात्त्रिशङ्को भष्ट स्वपदात् वसिष्ठशापाच्चिशङ्कुर्भष्ट अगस्त्यशापाच्च नहुषो भष्ट इति तद्दृष्टान्तोत्र उक्त .

कृतव्रणः स तेनाङ्के विमर्दक्षिप्तविग्रहः । कीर्यमाणक्रिमिकुलः ककचैश्चारिनैरभूत् ॥६५४॥
अनुभाव्य व्ययां भाविनिरयक्लेशवार्णिकाम् । गणरात्रेण तं प्राणाः काङ्क्षितापगमा जहुः ॥६५५॥ 655
ब्रह्मदण्डकृतं दण्डं भुक्त्वा दण्डधराधिपः । अकाण्डदण्डखण्डाय ययौ दण्डधरान्तिकम् ॥६५६॥
तस्यानियतचित्तस्य त्रिंशतं परिवत्सरान् । एवं प्रतापिनः सैकान्भूभोगो भूपतेरभूत् ॥६५७॥
तथा भूभुन्मतस्या द्रविणकलुषाम्भःकृततृषः स्थितिं स्वामुज्झन्तो विदधति कुमार्गानुसरणम् ।
क्रियन्ते कार्तान्तानुगविकृतकैवर्तनिवहैर्यथा ह्येतेकस्मात्स्थिरनिरयजालप्रणयिनः ॥६५८॥
कृतपापं तमुद्दिश्य विपन्नममृतप्रभा । मृतोद्धाराय तन्माता व्यधत्तामृतकेशवम् ॥६५९॥
ललितापीडनामाभूत्ततो वसुमतीपतिः । देव्यां दुर्गाभिधायां यो जयापीडादजायत ॥६६०॥ 660
बभूव रागिणो राज्ये राज्यकार्याण्यपश्यतः । यस्य वाराङ्गनाभोज्यं राज्यं दुर्नयदूषितम् ॥६६१॥
दुष्कृतेनार्जितं वित्तं पित्रा निरयभागिना । यश्चारणादिषु न्यस्यन्ननुरूपं व्ययं व्यधात् ॥६६२॥
बन्धकीबन्धुभावेन प्राप्तराजगृहाश्रयाः । ते पैंश्चलीयविद्यानामन्तरङ्गं व्यधुर्विटाः ॥६६३॥
केशान्त्रीदानच्छिन्नान्वक्षस्तन्नखलाञ्छितम् । वपुषो मण्डनां मेने किरीटकटकोज्झितः ॥६६४॥
यो यो वेश्याकथाभिज्ञो यो यो नर्मविचक्षणः । स स तत्प्रियतां लेभे न शूरो न च पण्डितः ॥६६५॥ 665
अतृप्तः स्त्रीभिरल्पाभिरुग्रागः स पार्थिवः । जडं मेने जयापीडं स्त्रीराज्यान्निर्गतं जितात् ॥६६६॥
दिङ्निर्जयव्यसनिनः पूर्वभूपाऽजहास सः । गणिकाभोगसुखितः स्वसामयिकमध्यगः ॥६६७॥
संकोचकारिणो वृद्धान्मौक्त्ययेद्रेऽय वारयन् । तस्माद्विटजनो लेभे संप्रीतात्पारितोषकम् ॥६६८॥
अदृष्टेष्ट इव स्पष्टपरिहासविचक्षणः । सोलज्जयन्मन्त्रिवृद्धानास्थाने गणिकासखः ॥६६९॥
बन्धकीपादमुद्राङ्कं चारु प्रावरणादि सः । गौरवार्हान्दुराचारः सचिवान्पर्यधापयत् ॥६७०॥ 670
मानी मनोरथो मन्त्री परं परिजहार तम् । अशक्नुवन्यमयितुं मध्यपातपराङ्मुखः ॥६७१॥
कुकृत्यं योगराहित्यं वैधुर्यं द्रोहवृत्तिता । ..... दुर्वृत्तस्य प्रभोरन्यत्परिहाराच्च भेषजम् ॥६७२॥
सुवर्णपार्श्वं विप्रेभ्यो ददत्फलपुटं तथा । भूभुत्स लोचनोत्सं च ह्रादशाब्दानभुङ्निभुः ॥६७३॥
कल्याणदेव्यां सजातो जयापीडमहीभुजः । संग्रामापीडनामाथ बभूव भुवनेश्वरः ॥६७४॥
पृथिव्यापीड इत्यन्यन्नाम बिभ्रत्स भूपतिः । समाप्तिं सप्तभिर्वर्षैः साम्राज्यस्य समासदत् ॥६७५॥ 675
श्रीचिप्पटजयापीडो बृहस्पत्यपराभिधः । ललितापीडजो राजा शिशुदेवयस्तनोभवत् ॥६७६॥
रागग्रहगृहीतस्य ललितापीडभूपतेः । वेश्यायां कल्यपाल्यां यो जयादेव्यामजायत ॥६७७॥
उप्पाख्यस्याखुवग्रामकल्यपालस्य तां सुताम् । रूपलुब्धोवरुद्धात्वंमनैषीत्स हि भूपतिः ॥६७८॥
पद्मोत्पलककल्याणमम्मधर्मैः स मानुनैः । बालकैः पाल्यमानोभूत्पृथिवीभोगभागिभिः ॥६७९॥

---

६५४ [1]) Thus corr by A_3 from A_1 विसर्प°. ६५८. [1]) Thus corr by A_2 from A_1 क्षिप्तैः. ६६२ [1]) A_1 seems to have read यद्या°, corrected by A_2 ६६५. [1]) Thus corr by A_3 from A_1 °कथाविज्ञो. ६७१. [1]) Thus corr. by A_3 from A_1 नन् ६७२. [1])Thus corr. by A_3 from A_1 योगवाहित्व.—[2]) Here seems to be a *lacuna* in the text ६७३. [1]) A_2 gloss सुनपात् — [2]) A_2 gloss परिहासपुरसमीपे. ६७८. [1]) A_1 gloss कल्य सुरां पालयतीति कल्यपाल कलवाल इति भाषया.—[2]) Thus corr by $A_{1,1}$, two aksharas of $A_{1,1}$ corresponding to रुद्धा, are illegible on account of an ink blot. A_3 gloss अवरुद्धा उरद्धा इति भाषया ६७९. [1]) Thus A_1; A_2 °धर्म्मै..

तस्य पञ्च महाशब्दाङ्क्यायानुत्पलकोमहीत् । अन्ये जगृहिरेन्यानि कर्मस्थानानि मातुलाः ॥६८०॥
आयत्तीकृतसाम्राज्यैर्भ्रातृभिर्वन्दिताज्ञया । भुभुज्जनन्या विदधे जयादेव्या जयेश्वरः ॥६८१॥
राज्ञा कृपणविज्ञैर्यत्पवित्रैर्दुष्यते धनम् । अचिराद्भीयते शान्तिमपूर्वैः कैश्चिदेव तत् ॥६८२॥
जयापीडस्य यत्किंचित्सूनुना हि व्ययीकृतम् । सूनुस्यालैरशेषं तत्तैः क्रमेण हृतं वसु ॥६८३॥
भगिनीभगमौभाग्यसंभवैर्विभवैः कृताः । तेभङ्गुराणां भोगानां भोक्तारो भाग्यभागिनः । ६८४॥
निरङ्कुशं चेष्टमानाः शनकैस्त्यक्तशौशवात् । ते स्वस्रीयास्तृपाज्ञाशमकुलीनाः शशङ्किरे ॥६८५॥
अथाभिचारक्रियया मिथः संमन्त्र्य पापिभिः । राज्येच्छया तैः स्वस्रीयः स्वामी च स नृपो हतः ॥६८६॥
भुक्तक्षितौ द्वादशाब्दांस्तस्मिन्व्यापादिते तथा । नैच्छन्नेकस्य ते राज्यं परस्परमहंकृताः ॥६८७॥
तेषामाक्रान्तदेशानां[1] नाममात्रमहीपतीन् । तांस्तान्कर्तुममात्यान्वैरोधेन्योन्यमुद्यतौ ॥६८८॥
अथ मेघावलीदेव्यां जातो वप्पियमूपतेः । ज्येष्ठोप्यनाङ्किकतया योभूद्राज्यवितर्जितः ॥६८९॥
सोयं त्रिभुवनापीडो जयादेव्यामजीजनत् । राजानमजितापीडं तं बलादुत्पलो व्यधात् ॥६९०॥ युग्मम्[2] ॥
शैडादिगणनास्थाननिष्यन्दोत्थाचुपाय ते । पञ्चमाद्गणनास्थानादशनाच्छादने ददुः ॥६९१॥
एकसंभाषणाख्येदं यात्स्वन्येषु दिने दिने । पञ्च तुल्यमुखास्तेच्छुःस्थो राजा तदाश्रितः ॥६९२॥
ते राजन्यजितापीडे राज्योत्पत्त्यपहारिणः । पुरदेवगृहादीनां प्रतिष्ठाकर्म चक्रिरे ॥६९३॥
सापत्न्यास्ते बुभुजिरे राज्यं स्वामित्रिवर्जितम् । निर्जने महिषं शान्तं मिथः सेर्ष्या वृका इव ॥६९४॥
उत्पलेनोत्पलस्वामी तथोत्पलपुरं कृतम् । पद्मस्य पद्मस्वाम्यास्ते कृतिः पद्मपुरं तथा ॥६९५॥
वधूर्व्यधत्त पद्मस्य गुणादेवी गुणोज्ज्वला । मठमेकमधिष्ठाने द्वितीयं विजयेश्वरे ॥६९६॥
धर्मो धर्मोद्यमी हेतुर्धर्मस्वामिविनिर्मितेः । कल्याणवर्मा सत्कर्मा कल्याणस्वामिकेशवे ॥६९७॥
दीनाराणां सहस्राणि पञ्चोपकरणं कृती । एकैकस्याः सुधीर्धेनोः कृत्वा मम्मो महाधनः ॥६९८॥
पञ्चाशीतिसहस्राणि गवां दत्त्वा प्रकल्पयन् । कुम्भप्रतिष्ठासंभारं यो मम्मस्वामिनं व्यधात् ॥६९९॥
तस्यैकस्यैव सामर्थ्यां कः संख्यां कर्तुमर्हति । भ्रातॄणां किं पुनस्तेषां सर्वेषां भूरिसंपदाम् ॥७००॥
द्रोहार्जितास्तु वा लक्ष्मीः सुकृतोपार्जितथ वा । सर्वेषां स्पृहणीयैव तेषां दातृतया तया ॥७०१॥
कृता देवगृहास्तैर्ये तत्पार्श्वेन्यसुरास्पदैः । दिङ्मातङ्गसमीपस्थकलभौपम्यमाश्रितम् ॥७०२॥
एकोननवने वर्षे स्वस्रीये शान्तिमागते । निर्विघ्नभोगास्तेभूवन्यङ्क्रिशाश्वात्यथावधि ॥७०३॥
अथ मम्मोत्पलकयोरुदभूद्दारुणो रणः । रुद्धपत्राह्व यत्रासीद्वितस्ता सुभटैर्हतैः ॥७०४॥
कविर्बुधमनःसिन्धुशशाङ्कः शङ्कुकाभिधः । यमुद्दिश्याकरोत्काव्यं भुवनाभ्युदयाभिधम् ॥७०५॥

---

६८० [1]) A_2 gloss कर्मस्थानानि कारस्थान इति प्रसिद्धानि. ६८१. [1]) A_1 glosses ललितापीडेन and पद्मोत्पलकाविभिः ६८८ [1]) Thus corr. by A_1 from A_1 °देशाना —[2]) A_1 wrote °ससामान्याहि°. A_2 altered this to °ससम्मत्या, A_3 has struck out the reading of A_2 and has written above °ससामान्यान्वि° —[2]) Thus corr. by A_3 from A_1 °मायत्तौ ६९० [1]) युग्मम added by A_3. ६९१ [1]) Thus corr. by a later hand from A_1 देडा°, R Edd शेडा°, G देडा° Cf. vin 578 (*C.*) —[2]) A_2 gives the marginal note शालस्थूलं नामेत्यणक मिथान नवपामादि एषा चतुर्णां सम्बन्धी एकोत्पत्तिप्रवेश स पञ्चमगणनास्थान मिति लोकाम्नाय ६९२. [1]) Thus A_1, A_2 °पुत्यान्यै° ६९९ [1]) To this verse seems to refer the gloss of A_2 मलुनाया ७०२ [1]) A_2 gloss श्रीशङ्कुकाभिध प्रसिद्ध भालङ्कारिक यस्य मत रसनिरूपण काव्यप्रकाश चतुर्थोल्लासे श्रीमम्मटाचार्येण निरूपितम.

मम्मसूनुर्यशोवर्मा संग्रामाग्ये व्यपाहरत् । स यत्र तेजः शूराणां नक्षत्राणामिवार्यमा ॥७०६॥
अथोत्पाटचाजितापीडं संग्रामापीडसंभवः । अनङ्गापीडनामाभूत्कृतो मम्मादिभिर्नृपः ॥७०७॥
मम्मोत्साहासहिष्णुत्वात्संभृतामर्षवैकृतः । तस्य राज्यं द्विषन्नासीत्सुखवर्मोत्पलात्मजः ॥७०८॥
वर्षत्रयेणोत्पलके ततः प्रमथमागते । स चकारोत्पलापीडमजितापीडजं नृपम् ॥७०९॥
तेषामाश्वयुजीराजंसकृशानां महीभुजाम् । भूत्वापि भृत्याः कृतिनो विभूतिं केपि लेभिरे ॥७१०॥ 710
सांधिविग्रहिकस्तस्य रत्नो नाम विभूतिभाक् । तस्मिन्कालेपि यथके रत्नस्वामिसुरास्पदम् ॥७११॥
भेजुर्दार्वाभिसारादीन्देशानुत्तम्य भूपताम् । विमलाभा यामभुजो नराद्या व्यवहारिणः ॥७१२॥
राज्ञां कार्कोटवंश्यानां क्षीणप्रायमभूत्कुलम् । वंशस्तूत्पलकुल्यानां भुवि वैपुल्यमाययौ ॥७१३॥
सामर्थ्योपनतप्रायपार्थिवत्वो व्यपद्यत । विद्वेषात्सुखवर्माथ भुक्ताख्येन स्वबन्धुना ॥७१४॥
ततः शूरामिधो मन्त्री सुखवर्मात्मजेकरोत् । राज्ययोग्योयमित्यास्थां सगुणेवन्तिवर्मणि ॥७१५॥ 715
एकत्रिंशे स वर्षेथ प्रजाविप्लवशान्तये । विनिवार्योत्पलापीडं तमेव नृपति व्यधात् ॥७१६॥
यत्कृते विफलक्लेशा आसन्पितृपितामहाः । पौत्रेण हेलया प्राप्ता सा सिद्धिः पुण्यकर्मणा ॥७१७॥
कुम्भाः पयोनिधिपयोहरणप्रवृत्ता नित्यं वहन्ति किल ये विफलश्रमत्वम् ।
चित्रं क्षणादिह तदेकसमुद्भवेन संदर्शिता निखिलवारिधिपानलीला ॥७१८॥
अभूत तदनुं मूर्धि राजलक्ष्मीघटितकटाक्षकृतादिपट्टबन्धे ।
कनकघटमुखात्तवाभिषेकं झटिति पतन्तमवन्तिवर्मदेवः ॥७१९॥
संग्रामाबुपदेष्टुमिन्दुपनाबुक्तं स्ववंशोद्भवैर्भूपालैर्नवराज्यतन्त्रमित्र स श्रोत्रद्वये धारयन् ।
राजा मण्डनकुण्डलद्वयमिषात्स्वच्छातपत्रच्छलाल्लक्ष्मीविष्टरपुण्डरीकपटिनच्छायोदयो दिद्युते ॥७२०॥ 720

[1]इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां चतुर्थस्तरङ्गः ॥
समाशतद्वये षष्टियुते मासेषु षट्सु च । निर्देशहेतु कार्कोटवंशे समुदशाभवन् ॥

---

७०९ [1]) A_4 gloss सुखवर्मा ७१० [1]) Thus corr. by A_1 from "युजे मासस", A_2 gloss आश्वयुजे मासि चश्वर्यार्थे वे निर्गच्छन्ति ने हेयारया इति प्रसिद्धास्तत्सदृशाना —[2]) Thus A_3, A_4 कठिना. ७१६. [1]) A_4 gloss अवन्तिवर्मणम् ७१९ [1]) Thus corr by A_1 from A_2 तदुरु ७२० [1]) Thus A_1, A_3 "तपनौ युक्त *Colophon.* [1]) A_3 inserts before this the following note: रा २७ म ७१६ आश्वि. राजान ७० मे २७८९

॥ पञ्चमस्तरङ्गः ॥

काव्येषु रुचिः कचेषु फणिनां पुंस्कोकिलस्येव ते गोभिः कण्ठतटस्य हृष्यति पुरो दृक्पक्ष्म चक्षुःश्रुतेः ।
सर्पानेभिनवे मिथो भगवतोर्जिह्वाप्रथक्स्पन्दिनीं भिन्नार्था सदृशाक्षरामपि वदन्त्येवं गिरं पातु वः ॥१॥
अर्वाग्दन्तवसा साध्वज्य प्राप्य पाटितकण्टकः । चकार चरितैश्चित्रं सतां कण्टकितं वपुः ॥२॥
आसतां क्षितिपामात्यौ तौ द्वावपि परस्परम् । आज्ञादानेन परिवृढौ भृत्यावाज्ञापरिग्रहे ॥३॥
कृतज्ञः क्षान्तिमान्क्ष्माभृन्मन्त्री भक्तः स्मयोज्झितः । अभङ्गुरोयं संयोगः सुकृतैर्जातु हृश्यते ॥४॥
विवेक्ता प्राप्तराज्यः स क्ष्माभृद्वीक्ष्य नृपश्रियम् । अविलुप्तस्मृतिर्धीमानन्तरेवमचिन्तयत् ॥५॥
गोभुजां वल्लभा लक्ष्मीर्मातङ्गोत्सङ्गलालिता । सेयं स्पृहां समुत्पाद्य दृषत्यत्युन्नतात्मनः ॥६॥
स नास्ति कश्चित्पथमं यः पदद्वयीमनुकूलताम् । संताप्यते न चरमं नीचमीत्येव नानया ॥७॥
चपलाभिः प्रवृद्धेयं स्वर्वेश्याभिः सहाम्बुधौ । तदेकचारिणीवृत्तमनया शिक्षितं कुतः ॥८॥
निःस्नेहा नान्वगात्कांश्चित्सुचिरं संस्तुताप्यसौ । परलोकाध्वगान्भूमानपथेयानबान्धवान् ॥९॥
हेममोजनभाण्डादि भाण्डागारे यदर्जितम् । कस्मादस्य न नाथास्ते लोकान्तरगता नृपाः ॥१०॥
अन्योच्छिष्टेषु पात्रेषु भुक्तेतेषु महीभुजः । कस्मान्न लज्जामवहञ्शौचचिन्तां न वा वधूः ॥११॥
स्थूलेषु राजतस्थालकपालेष्वबलोकितैः । प्रेतभूपालनामाङ्कैः शङ्का कस्य न जायते ॥१२॥
कृष्टाः प्रविष्टे ये कालपाशे कण्ठान्मुमूर्षताम् । अशस्ता अपवित्राश्च ते हाराः कस्य हारिणः ॥१३॥
संदूष्य बाष्पैर्दुःखोष्णैस्यक्तान्पूर्वैर्मुमूर्षुभिः । स्पृशक्षेतानलंकाराञ्च कः संकोचमाप्नुयात् ॥१४॥
या वारिराशिसलिलान्तरसंनिधानसंसेवयापि सततं मलिनैव लक्ष्मीः ।
पात्रेषु रोरशिखिभागिषु सा विमुक्ता वैमल्यमेति हरिणीव हुताशशौचा ॥१५॥

---

१ [1]) A, gloss• काव्येषु इति। एतेषु मूर्खाभिधेयेषु फणिनां सर्पाणां कचेषु बन्धनेषु ते कापि रुचि कश्चिदप्यभिलाषोस्ति। जटाभूट-कङ्कादिबन्धनार्थमत्यन्तं सर्पानभिलषसीति देवीवचनम। बन्धनस्थानानां कण्ठप्रकोष्ठकङ्कादीनां बहुत्वाद्बन्धानामपि बहुत्वचनम। एतेषु कचेषु केशेषु फणिना सम्बन्धिनी अर्थान्मोहकारिणी कापि रुचिर्नैवेत्यनीत्या क्षान्तिस्तदाप्ति तव केशानामजगराणामिव दर्शनानीव मोहो जायते इति महासत्त्ववचनम। पुरःकोकिलस्येव तव कण्ठतटस्य गीतिभिर्यत्ते चक्षुःश्रुते सर्पस्य दृक नेत्र हृष्यति मोदते। कोकिलस्तस्मिन तव कण्ठबन्धे श्रुत्वा सर्पस्य दूरहर्षं सर्पाणा चक्षुरव श्रवणस्थानीयमित्यतो दृक हृष्यतीत्युक्तम्। गीतप्रियो हि सर्पः। यदुक्तम्।शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गीतरस फणी। साहित्यामृतसारस्य शङ्करो वेत्ति वा न वेत्ति ॥ इति महादेववचनम ॥ देवीवचन तु। तव कण्ठतटस्य को-किलस्यैव करे पुरोवे नेत्रं हृष्यति। गीतं किल्ले।कोकिलतुल्यवर्णकण्ठतटनेत्रदर्शनेन सर्पस्य दृग्हर्षं दृष्टिप्रकास कोकिलरुत श्रुत्वा सर्पाणी नेत्रविकासो जायते गीतसमये तु सकोच इति लौकिका ॥ —[2]) Thus A_1; A_2° स्पर्पिनी ३. [3]) Thus corr. by A_1 from A_2 °धाने. ७ [4]) Thus corr. by later hand from A_1 °कूल्यवास १० [5]) n supplied by A_2 १५. [6]) A_1 gloss रोर हारिण.— [7]) A_1 °शौचे altered by later hand to °शौचा, A_2 glosses अग्निशौचाना मृगाणां अग्निना लोमशुद्धि अग्निशौचवसुनवत्. and हुताशेनाग्निना शौच शुद्धिर्यस्या सा हुताशशौचा। हरिणी मृगी इव यथा सा अग्नौ प्रक्षिप्तदेहा सती शुद्धलोमा भवति तद्वत

इति निर्धार्य नृपतिर्नीत्वा स्वर्णादिं चूर्णताम् । निजैरच्छलिभिः प्रादाद्विजन्मभ्यः करम्भकम् ॥१६॥
साधु भूपेति वक्तव्ये हर्षाच्चिगौरवं द्विजः । साध्ववन्तिजिति वदन्नेकः प्रापाञ्जलिन्वहून् ॥१७॥
लक्ष्मीं कृत्वार्थिसात्कृत्स्नां कृतिनावन्तिवर्मणा । विभूतिश्चामरच्छत्रमात्रशेषा व्यधीयत ॥१८॥
अनन्तसंपत्संपन्नभूरिगोव्रजनिष्क्रये । राजश्रीर्दुर्जरा तस्य नवत्वे भुभुजोभवत् ॥१९॥
विप्रकृतान्समरे भ्रातॄन्भ्रातृव्यांश्च विजित्य सः । चकार भूरिभिर्वीरै राज्यं विगतकण्टकम् ॥२०॥
राज्यं निष्पाद्य निर्विघ्नमथ वात्सल्यपेशलः । विभज्य बन्धुभृत्येषु बुभुजे पार्थिवः श्रियम् ॥२१॥
भ्राता ह्रैमातुरस्तेन भूरवर्माभिधः सुधीः । ज्ञातिप्रियेण वितते यौवराज्येभ्यषिच्यत ॥२२॥
खाधूयांहस्तिकर्णाख्यावपहारौ प्रदाय यः । भूरवर्मस्वामिनं च गोकुलं च विनिर्ममे ॥२३॥
संपूर्णः पूर्णमहिमामन्यैर्माहात्म्यमन्दिरम् । पञ्चहस्तार्पदश्चक्रे मठं सुकृतकर्मठः ॥२४॥
भ्राता व्यधत्त नृपतेरपरः समराभिधः । केशवं चतुरात्मानं समरस्वामिनं तथा ॥२५॥
द्वौ भूगवरजौ धीरविज्ञप्यावौ निजाख्यया । व्यधत्तां विबुधावासौ द्वावन्यौ गणनापती ॥२६॥
भूत्वा वातूलतांच्छत्रप्रभावानुभवौ भुवि । गतौ सविग्रहावेव हरावासाध्यसभ्यताम् ॥२७॥ युग्मम् ॥
राजद्वौवारिकः श्रीमाञ्श्रूरस्यासीन्महोदयः । महोदयस्वामिनौ यः प्रतिष्ठां समपादयत् ॥२८॥
रामटाख्यमुपाध्यायं ख्यातव्याकरणभ्रमम् । व्याख्यातृपदकं चक्रे स तस्मिन्सुरमन्दिरे ॥२९॥
अमात्येन महीभर्तुः श्रीप्रभाकरवर्मणा । कृतं प्रभाकरस्वामिनाम्नो विष्णोर्निकेतनम् ॥३०॥
आयातेन शुकैः सार्धं दत्ता गूढभुकेन यः । मुक्ताः प्राप्य प्रतिष्ठायां चक्रे ख्यातां शुकावलीम् ॥३१॥
विच्छिन्नप्रसरा विद्या भूयः श्रूरेण मन्त्रिणा । सत्कृत्य विदुषः सभ्यान्देशेस्मिन्नवतारिता ॥३२॥
युग्मैः क्षितिभुजां योग्यैरुह्यमाना महर्द्धयः । बुधाः प्रवृद्धसत्कारा विविशुर्भुवनं सभाम् ॥३३॥
मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः । प्रथां रत्नाकरश्चागात्साम्राज्येवन्तिवर्मणः ॥३४॥
आस्थाने कृतमन्दारो वन्दी श्रूरस्य मन्त्रिणः । संकल्पस्मृतिमाधातुमिमामार्यां सदापठत् ॥३५॥
अयमवसर उपकृतये प्रकृतिचला यावदस्ति संपदियम् । विपदि सदाभ्युदयिन्यां पुनरुपकर्तुं कुतोवसरः ॥३६॥
कृतः सुरेश्वरीक्षेत्रे बहुगेहविधायिना । शिवयोर्मिश्रयोस्तेन प्रासादः सोव्ययस्थितिः ॥३७॥
श्रूरेश्वरं प्रतिष्ठाप्य स्ववेश्मेव समुन्नतम् । चक्रे श्रूरमठं धीमान्स भोगाय तपस्विनाम् ॥३८॥
स्वकृते पत्तनवरे तेन श्रूरपुराभिधे । क्रमवर्तिमदेशस्थो ढक्कोभूद्विनिवेशितः ॥३९॥
सुरेश्वरीप्राङ्गनतश्चक्रे भूतेश्वरं हरम् । मठं श्रूरमठान्तश्च श्रूरजो रत्नवर्धनः ॥४०॥
काव्यदेव्यभिधा श्रूरवधूः शुद्धान्वया व्यधात् । सदाशिवं सुरेश्वर्यौ काव्यदेवीश्वराभिधम् ॥४१॥

---

१६ [1]) A_2 gloss आविशब्देन मौक्तिकादि परिग्रह —[2]) A_2 glosses हम्बल and करम्भं व्यामिश्रं खिचडू इति भाषया २३ [1]) A_2 gloss शुभखोहा —[2]) A_2 gloss व्याघ्राश्रमं वागसामे.—[3]) A, विधाय २४ [1]) Thus A_1; A, संपूर्णपुण्यमहिमा — [2]) Thus A_1; A, मन्त्रमा° —[3]) A_2 gloss पाञ्चाल २५ [1]) A_2 gloss शाल्यानपाने समरभोग २७ [1]) सू written above the line by A_2; corresponding letter of A_1 smeared over A_2 gloss इमौ वातूलतुल्यतांवाप्ते स्वस्य तद्भावमिव विधाय लोकविषये गो पितनिजप्रभावाविस्मर्थं —[2]) Thus corr. by A, from A, सुरौ २८ [1]) A_2 gloss मडवाश्रमं ३१. [1]) सार्धं supplied by A, in space left by A_1. —[2]) Thus corr by later hand from A, खवानभुक्ता° ३४ [1]) A_2 gloss आनन्दवर्धन काव्यालङ्कारव्यक्तिमन्थकार.. —[2]) A_2 gloss रत्नाकर हरविजयकार ३६. [1]) Thus corr by A, from A_1 समाभ्यु° ३८ [1]) A_2 gloss भूपुरं ३९ [1]) A_2 gloss कायेलनकोहस्थ —[2]) A_2 gloss द्रङ्ग

निर्मत्सरोवन्तिवर्मा सोदरेभ्योनपायिनीम् । भूराय च सपत्नाय नृपतिप्रक्रियां ददौ ॥४२॥
छन्दानुवर्ती भूपालो दैवतस्येव मन्त्रिणः । आ बाल्याद्वैष्णवोप्यासीच्छैवतामुपदर्शयन् ॥४३॥
क्षेत्रे विन्ध्येकसाराख्ये मृतानामपवर्गदे । भूरिभोगास्पदं राज्ञां तेनावन्तिपुरं कृतम् ॥४४॥
अवन्तिस्वामिनं तत्र प्राप्याज्याधिगमात्कृती । विधाय प्राग्रसाम्राज्यश्रकेवन्तीश्वरं तदा ॥४५॥
त्रिपुरेश्वरभूतेशाविजयेशेषु भूभुता । स्नानद्रोण्या रुप्यमय्या तेन पीठत्रयं कृतम् ॥४६॥
भूरस्यापि नरेन्द्रं तं ध्यायतः स्वाधिदैवतम् । तस्मिन्यार्थमुपेक्ष्योभूद्भर्गः प्राणाः स्तुतेपि वा ॥४७॥
तथा चार्चयितुं जातु यातो भूतेश्वरं नृपः । विभवानुगुणे स्वस्मिन्पूजोपकरणेर्पिते ॥४८॥
ददर्श पीठे देवस्य पूजकैरुपपादितम् । वन्यमुत्पलशाकाख्यं तिक्तशाकमवस्थितम् ॥४९॥
तत्रस्थाः क्ष्माभुजा पृष्टास्तन्निवेदनकारणम् । व्याजिज्ञपन्क्षितिन्यस्तजानुमाञ्जलयस्ततः ॥५०॥
डामरो धन्वनामास्ति लहरे[1] विषये बली । भूरस्य मन्त्रिणो देव सेवको यः स्तुतोपमः ॥५१॥
हतेषु तेन ग्रामेषु निरवग्रहशक्तिना । निवेद्यमेतदेवास्मै भूतेशाय निवेद्यते ॥५२॥
अकाण्डभूलजनितां पार्थिवः कथयन्व्यथाम् । श्रुतमश्रुतवत्कृत्वा त्यक्तपूजोथ निर्ययौ ॥५३॥
पूजां संत्यज्य गमनं भूरं चाकस्मिकं प्रभोः । सहेतुकं विदञ्भूरो वृत्तान्तान्वेषकोभवत् ॥५४॥
ज्ञाततत्त्वस्ततस्तूर्णं भूतेशाभ्यर्णवर्तिनः । क्रुद्धः समातृचक्रस्य भैरवस्याविशद्गृहम् ॥५५॥
निषिद्धजनबाहुल्याद्भूत्वा विरलपार्श्वगः । प्राहिणोद्भन्यमानेतुं ततो दूतान्पुनः पुनः ॥५६॥
स क्षितिं पत्तिपृतनासंमर्देन प्रकम्पयन् । अप्रकम्पतनुः प्राप क्रूरः शूलान्तिकं शनैः[2] ॥५७॥
तस्य प्रविष्टमात्रस्य शाखिनः भूरचोदिताः । मुण्डं सजीवितस्यैव चिच्छिदुर्भैरवा मतः ॥५८॥
आसन्ने सरसि क्षिप्त्वा रुधिरोद्गारि तद्वपुः । क्ष्मापतेः क्षालितामर्षो धीरः भूरो निर्ययौ ॥५९॥
तस्य श्रुत्वा शिरश्छिन्नं स्वपुत्रस्येव मन्त्रिणा । क्षीणमन्युः क्षितिपतिः सवैलक्ष्य इवाभवत् ॥६०॥
भूरोथ पृष्टकुशलो निर्व्यथोस्मीति भाषिणम् । उत्थाप्य तत्पात्तं देवं पूजाशेषमकारयत् ॥६१॥
इत्थं समस्तकृत्येषु भावज्ञः स महीपतेः । अनुल्लंघ्य हितं तस्याप्राणांस्त्यक्ताप्यसाधयत् ॥६२॥
परस्परमनुत्पन्नमन्युकालुष्यदूषणौ । न दृष्टौ न श्रुतौ वान्यौ तादृशौ राजमन्त्रिणौ ॥६३॥
श्रीमेघवाहनस्येव साम्राज्येवन्तिवर्मणः । अशेषप्राणिनामासीदमारो दश वत्सरान् ॥६४॥
जलं जहद्भिः शिशिरं तटानेल्याकुलोर्मिभिः । तत्कालं सेवितः पृष्ठे पाटीनैः शरदातपः ॥६५॥
अनुग्रहाय लोकानां भट्टश्रीकल्लटादयः । अवन्तिवर्मणः काले सिद्धा भुवमवातरन् ॥६६॥
चरित्रे बहुवक्तव्ये येषामेकस्य पावनः । अयं प्रासङ्गिकः कश्चिद्वृत्तान्तो वर्णयिष्यते ॥६७॥
देशः प्रबलतोयोयं महापद्मसरोजलैः । कूलिनीभिश्च शबलः स्वल्पोत्पत्तिः सदाभवत् ॥६८॥
ललितादित्यभूभर्तुरुद्योगेन बलीयसा । किंचिदाकृष्टसलिलः प्रापोत्पत्तिं मनाक्ततः ॥६९॥

---

४४. [1]) A, gloss विन्ध्येकसाराख्ये भारसो इति यावत्.—[2]) Thus corr by later hand from A_1 राज्ञा ४८. [1]) Thus corr by later hand from A_1 ज्ञाता. ५२ [1]) A_2 gloss लार इति प्रसिद्धे राष्ट्रे. ५५ [1]) A_2 separates स from the following and gives the gloss भूर to स. ५६ [1]) Thus A_1, A_2 बाहुल्यो भूत्वा ५७ [1]) Thus A_2, A_1 पुर. ६०. [1]) Thus corr by A_2 from A_1 क्षण°

जयापीडे क्रमाद्याते स्वल्पवीर्येषु राजसु । सलिलोपप्लवैरासीत्पुनरेवावृता क्षितिः ॥७०॥ 70
दीनाराणां दशशती पञ्चाशत्यधिकाभवत् । धान्यखारीक्रये हेतुर्दैशे दुर्भिक्षविक्षते ॥७१॥
अवन्तिवर्मणः पुण्यैर्जन्तुर्ज्ञीवयितुं ततः । स्वयमन्नपतिः श्रीमान्मुख्यः क्षितिमवातरत् ॥७२॥
यस्याविज्ञातसंभूतेस्तुर्ये कालेपि निश्चितम् । अयोनिजस्वं कृतिनश्चरितैर्भुवनाद्भुतैः ॥७३॥
पुरा रथ्यारजःपुञ्जं संमार्जन्ती पिधानवत् । सुख्याभिधाना चण्डाली मृद्भाण्डं प्राप नूतनम् ॥७४॥
तस्मिन्पिधानमुद्घृत्य सापश्यन्मध्यशायिनम् । बालं कमलपत्राक्षं धयन्तं स्वकराङ्गुलीः ॥७५॥ 75
मात्रा कयापि त्यक्तोसौ क्षुन्दरो मन्दभाग्यया । अयेति चिन्तयन्त्यासीत्सा स्नेहात्पस्नुतस्तनी ॥७६॥
अदूषयन्त्या स्पर्शेन भाव्याः शूद्रस्त्रियो गृहे । तया विहितवृत्तिः स शिशुर्वृद्धिमनीयत ॥७७॥
स सुख्यनामा मतिमान्प्रवृद्धः शिक्षिताक्षरः । कस्याप्यासीद्बृहपतेरर्भकाध्यापको गृहे ॥७८॥
व्रतस्नानादिनियमैस्तं सतां हृदयंगमम् । गोष्ठीषु विशदप्रज्ञं विदग्धाः पर्यवारयन् ॥७९॥
तेषां कथाश्वस्थासु निन्दतां जलविप्लवम् । धीरस्ति मे निरर्थस्तु किं कुर्यामिति सोब्रवीत् ॥८०॥ 80
उन्मत्तस्येव वदतस्तस्य तच्चियमाद्वचः । निशम्य भूभृद्वारेभ्यश्चिरमासीत्सविस्मयः ॥८१॥
ततस्तमानीय नृपः किं ब्रूष इति पृष्टवान । धीरस्तीत्यादि राजामेप्यवोचत्सोप्यसंभ्रमः ॥८२॥
वातूलोसाविति निजैरुक्तोप्यथ महीपतिः । धियं दिदृक्षुर्विदधे तस्यायत्तं निजं धनम् ॥८३॥
कोशागारिद्वारभाण्डानि बहून्यादाय हेलया । ययौ मण्डपराज्यं स नावमारुह्य रंहसा ॥८४॥
यामे तत्र प्रवृद्धाम्बुनिमग्ने नन्दकाभिधे । एकं निक्षिप्य दीनारभाण्डं व्यावर्तत द्रुतम् ॥८५॥ 85
सत्यं वातूल एवासौ सभ्येष्वपि वदत्स्वपि । वार्तां निशम्य तां राजा तच्चिक्षाम्बेषकोभवत् ॥८६॥
क्रमराज्यं स संप्राप्य देशे यक्षदराभिधे । अञ्जलिभ्यां निधिक्षेप दीनारान्सालिलान्तरे ॥८७॥
यत्र तीरद्वयालम्बिशैलनिर्लुठिताः शिलाः । चक्रुर्विततस्तां निष्पीड्य पथः प्रतिपथोन्मुखम् ॥८८॥
दुर्भिक्षोपहता ग्राम्या दीनारान्वेषिणस्तदा । शिलाः प्रवाहादुद्धृत्य विततस्तां समशोधयन् ॥८९॥
एवं दिनानि द्वित्राणि पयो युक्त्या विकृष्य तत् । विततस्तामेकतः स्थानात्कर्मकृद्भिरबन्धयत् ॥९०॥ 90
पाषाणसेतुबन्धेन सुख्येनाद्भुतकर्मणा । सम्राहमभवद्बद्धा निखिला नीलजा सरित् ॥९१॥
अधः प्रवाहं संशोध्य लुठदश्मप्रतिक्रियाम् । कृत्वा बद्धैः शिलाबन्धैः सेतुबन्धमपाटयत् ॥९२॥
चिरकालनिरोधेन सोत्कण्ठेवाम्बुधिं प्रति । ततः प्रावर्तत जवाद्गन्तुं सागरगामिनी ॥९३॥
जम्बालाङ्का स्फुरन्मीना भूर्बभौ सलिलोज्झिता । व्यक्तकाण्यां सनक्षत्रा निर्मेघेव नभःस्थली ॥९४॥
यत्र यत्र विवेदौघवेधं सलिलविप्लवे । तत्र तत्र विततस्तायाः प्रवाहाद्भूतनान्व्यधात् ॥९५॥ 95
मूलस्रोतोव्यनिष्ठद्यूनभूरिस्रोता बभौ सरित् । एकभोगाभयानेकफणेवासितपन्नगी ॥९६॥
वामेन सिन्धुस्त्रिग्राम्या वितस्ता दक्षिणेन तु । यान्त्यौ ये समगंसातां प्रावैन्यस्वामिनोन्तिके ॥९७॥
वर्तनेयं महानद्योः कल्पापायेप्यनत्ययः । संगमो नगरोपान्ते स सुख्योपक्रमस्तयोः ॥९८॥

---

७१. [1]) Thus A_1, A_2 पञ्चाशदधि?.—[2]) Thus corr. by A_2 from A_1 °खारे. ७३. [1]) A_1, gloss चतुर्थे युगे. ७५ [1]) Thus A_1; A_2 पूयानि?. ७७ [1]) Thus corr. by later hand from A_1 °न्नया. ८२. [1]) Thus corr. by A_2 from A_1 °सम्भव. ८७ [1]) A_1 gloss धारगलाख्ये ९७. [1]) समगं supplied by A_2 in space left by A_1.

अथाप्यांस्ता फलपुरपरिहासपुरस्थितौ । विष्णुस्वामी संगमस्थ वैन्यस्वामी च तीरयोः ॥९९॥
सुन्दरीभवनाभ्यर्णप्राप्तस्याचमनस्य तु । योगशायी हृषीकेशः सुप्तस्याभ्यर्चितस्तटे ॥१००॥
दृश्यन्तेद्यापि सरितां पूर्वस्रोतस्तटोद्भवाः । निषादाकृष्टनौरज्जुरेखाङ्का जीर्णपादपाः ॥१०१॥
स्फुरत्तरङ्गनिहतः स नदीमार्गमजिघ्रहत् । तास्ताः स्वेच्छानुसारेण मान्त्रिकः पन्नगीरिव ॥१०२॥
बद्ध्वा शैलमयान्सेतूंस्त्रिनस्तां सप्तयोजनीम् । महापद्मसरोवारि स चकार नियन्त्रितम् ॥१०३॥
महापद्मसरःकुण्डाद्वितस्ता येन योजिता । जवाश्विर्याति[1] कोदण्डयन्त्रादिषुरिवाध्वना ॥१०४॥
उद्वृत्य सलिलादुर्वीमेवमादिवराहवत् । अनेकजनसंकीर्णान्ग्रामान्नानाविधान्व्यधात् ॥१०५॥
पालीभिरम्भः संरोध्य यान्कुण्डसकृशान्व्यधात् । कुण्डलानीति सर्वान्नसमृद्धान्ब्रुवते जनाः ॥१०६॥
उत्खातकीलनिबद्धाश्वयोधापि शरत्कृशाः । श्यञ्चन्ति जलगन्धेभबन्धनस्तम्भसंनिभान् ॥१०७॥
द्वीचारभाण्डनौन्क्षीत्स यदगाधजलान्तरे । नन्दके निर्गतजले स्थलान्तान्तदलभ्यत ॥१०८॥
अदेवमातृकान्ग्रामान्परीक्ष्य विविधाः क्षितीः । संविभेजे विभक्तेन नादेयेन स वारिणा ॥१०९॥
असिञ्चच्च जलैर्ग्रामान्ग्रामान्मृदमुपाहताम् । या यावता क्षणेनागाच्छोषं तां तावता हृदि ॥११०॥
कालेन मत्वा सेकार्हां प्रतिग्राम जलमुनेः । परिमाणं विभागं च परिकल्प्य निरत्ययम् ॥१११॥
चकार चानूत्पाद्यापि सिन्धुभिः सर्वतो दिशः । सत्फलोदारकेदारसंपन्नविभ्रमाः ॥११२॥ तिलकम् ॥
न कश्यपेनोपकृतं न यत्संकर्षणेन वा । हेलया मण्डलेमुष्मिंस्तत्सुप्तेन हुकर्मणा ॥११३॥
भूमेर्जलादुद्धरणं द्विजक्षेत्रे तथार्पणम् । सेतुबन्धोद्भमभिस्तोये यमनं कालियस्य च ॥११४॥
चतुर्षु सिद्धमिति यद्विष्णोः सत्कर्मजन्मसु । सुप्तस्य तत्पुण्यराशेरेकस्मिन्नेव जन्मनि ॥११५॥ युग्मम् ॥
यस्मिन्महासुभिक्षेषु दीनाराणां शतद्वयी । धान्यखारेः[2] प्राप्तिहेतुरा सर्गादभवत्पुरा ॥११६॥
ततः प्रभृति तत्रैव चित्रं कश्मीरमण्डले । षट्त्रिंशतां धान्यखारैर्दीनारैरुदितः क्रयः ॥११७॥
निर्गतायां महापद्मसलिलात्स्वर्गसंनिभम् । वितस्तायास्तटे चक्रे स्वनामाङ्कं स पत्तनम् ॥११८॥
स्वकृता स्थापिता तेन सरसि व्याप्रदिक्तटे । आसंसारं स्थितामारंमर्यादा क्षपपक्षिणाम् ॥११९॥
सुप्त्याकुण्डलनामानं ग्रामं कृत्वा द्विजातिसात् । सुप्त्यामुद्दिश्य तत्रासा सुप्त्यासेतुं स निर्ममे ॥१२०॥
तेनोद्धृतासु सलिलाद्भूषु ग्रामाः सहस्रशः । अवन्तिवर्ममुखैर्जयस्थलंमुखाः कृताः ॥१२१॥
ईदृशैर्धर्म्यवृत्तान्तै पवर्तितकृतोदयः । अवन्तिदेवः पार्तिस्म मान्धातेव वसुंधराम् ॥१२२॥
प्राणप्रयाणसोद्योगरोगयस्तस्ततो ययौ । क्षेत्रं स त्रिपुरेशाद्रिनिषज्येष्टेश्वराश्रितम् ॥१२३॥
आत्मनस्तत्र निक्षिप्य विपत्तिं चिरगोपिताम् । प्राणान्ते प्राञ्जलिः शूरो वैष्णवत्वमदर्शयत् ॥१२४॥
तेनान्ते भगवद्गीताः शृण्वता भावितात्मना । ध्यायता वैष्णवं धाम निरमुच्यत जीवितम् ॥१२५॥

---

९९ [1]) Emended; A_1 **अभ्यच्या°**, altered by later hand to **अभ्यर्च्या°**. १०१. [1]) Thus G and Edd., A °**ङ्क** . १०४ [1]) Thus G and Edd.; A °**र्यान्ति** १०८ [1]) Emended, A °**भाण्डानौ°**. ११२. [1]) Supplied by A_2 ११५. [1]) Thus corr. by A_2 from A_1 **यस्मिन्** —[2]) **युग्मम्** supplied by A_2 ११६. [1]) Thus corr. by A_1 from **खारी**. ११७ [1]) A_2 gloss **द्वादशदीनाराणां बाहगन्धे इति कश्मीरदेशभाषया परिगणने षट्त्रिंशद्दीनारा त्रिंबाहगन्ध इति ज्ञेया** ११८ [1]) Thus corr. by A_2 from A_1 निर्गता या.—[2]) A_2 gloss **सुप्त्यपुराख्यम्**. ११९. [1]) Thus corr. by A_1 from A_1 **स्थिरासार°** १२० [1]) Thus corr. by later hand from A_1 **सुप्त्यकु°** —[2]) Emended, A **सप्त्या°** —[3]) Thus corr by later hand from A_1 **सप्त्या°**. १२१. [1]) A_2 gloss **जियन्**

आषाढशुक्लपक्षस्य तृतीयस्यां क्षमापतिः । वर्षे एकोनषष्ठे स क्षमावृषास्तमुपाययौ ॥१२६॥
तस्मिन्प्रशान्ते प्रत्येकं विभवोच्छिन्नचेतसाम् । तुल्यमुत्पलवंदयानां राज्येच्छा भुयसामभूत् ॥१२७॥
ततश्चक्रे प्रतीहारः प्रयत्नाद्वप्रवर्धनः । नृपं शंकरवर्माणमवन्तिपतेः सुतम् ॥१२८॥
कर्णपो विन्नपामात्यस्तनूजं शूरवर्मणः[1] । तद्देवान्सुखवर्माख्यं यौवराज्येऽथयोजयत् ॥१२९॥
अतस्तयोरभूद्वैरं क्षितीशयुवराजयोः । यस्मिन्क्षणे क्षणे राज्यमासीद्दोलामिवाश्रयत् ॥१३०॥ 130
शिवशक्त्यादयो वीराः स्वामिकार्योज्झितासवः । यत्राभुवन्स्वसत्त्वस्य परीक्षाक्षणलाभिनः ॥१३१॥
कुर्वतां स्वामिशत्रूणां दानमानप्रतिश्रयम् । सत्त्वैकाश्रयाच्च ते यस्मादानुकूल्यमशिश्रयन् ॥१३२॥
पिण्डस्पृहां परित्यज्यात्मकृताः शिक्षिताः क्वचित् । तावन्न वीततमसः श्रुवृत्तिमनुजीविनः ॥१३३॥
कथंचिदथ निर्जित्य युवराजं महौजसम् । प्राज्यः स्वविजयोंकारश्चक्रे शंकरवर्मणा ॥१३४॥
सम्राट्समरवर्माथोर्वितीर्णसमरोसकृत् । कीर्तिं श्रिया प्रणयिनीं लब्धयाविविवेद सः ॥१३५॥ 135
अथ निर्जित्य दायादोद्धरूत्वा लक्ष्मीं क्षितीश्वरः । जिष्णुर्दिग्विजयं कर्तुं श्रीमानासीन्महोद्यमः ॥१३६॥
तस्य कालबलादेशे प्रक्षीणजनसंपदि । लक्षाणि नव पत्तीनां द्वारान्निष्क्रामतोऽभवन् ॥१३७॥
स्वपुरस्योपकण्ठेऽपि योभूत्कुण्ठितशासनः । स एव रत्नोत्सेषु राज्ञामाज्ञां न्यवेशयत् ॥१३८॥
गच्छन्नायविच्छेदसंप्रदायः ककुभ्जये । स्वप्रज्ञया समुचीतो राज्ञा शंकरवर्मणा ॥१३९॥
तत्सेना नरनाथानां पृतनाभिः पदे पदे । कुलापगेव कुल्याभिर्विशन्तीभिरवर्धत ॥१४०॥ 140
दार्वाभिमारंगजेन वश्यतां समुपाश्रितः । अद्रिद्रोण्यो न वार्तिन्यस्तत्सेनानादमादधुः ॥१४१॥
जनोल्बणैरिरिणैर्गृह्यन्हरिणप क्षणात् । अनासादितदुर्गं स चक्रे दुर्गान्तरान्तिथिम् ॥१४२॥
लक्षाणि नव पत्तीनां वारणानां शतत्रयी । लक्षं च वाजिनामासीदस्य सेनापुरःसरम् ॥१४३॥
स गुर्जरेजयव्यय स्वपराभवशङ्कितम् । त्रैगर्तं पृथिवीचन्द्रं निन्ये तमसि हास्यताम् ॥१४४॥
पुत्र भुवनचन्द्राख्यं नीवि प्रागेव दत्तवान् । स यथाभूत्यगतिं कर्तुं तस्याभ्यर्णमुपागतः ॥१४५॥ 145
अथ तत्कटकं श्राम्यद्भिल्लमण्डलनायकम् । वीक्ष्य समुच्छ्रयमायान्त महार्णवमिवोल्बणम् ॥१४६॥
समागमक्षणे यस्माच्छङ्कमानः स्वबन्धनम् । पलाय्य पयसो दुर्गं निर्वाणौ नोदि तूष्णिम ॥१४७॥ [illegible]
यमप्रतिमसौन्दर्यमराण्याहुः पुराविदः । तमेवाद्राक्षुरुत्तस्था नृपाः कालमिवोल्बणम् ॥१४८॥
उज्ज्वालालक्षणस्य सख्ये गुर्जरभूभुजः । बद्धमूला क्षणालक्ष्मी भूय दीर्घामिवाश्रयत् ॥१४९॥
तस्मै दत्त्वा टक्कदेशं विनयादङ्कशीमिव । स्वशरीरमिवापासीन्महाटक गुर्जराधिपः ॥१५०॥
इतं भोजाधिराजेन स साम्राज्यमदापयत् । प्रतीहारतया भूत्यभूते चक्रियचक्रान्वये ॥१५१॥

---

१२६ [1]) Thus corr. by A_1 from A_1 वेन: १३० [2]) Thus V, A_1 वाप्रश्य [3]) V gloss अनाकलनात् १३४ [1]) A_1 gloss सुखवर्माणम. १३७ [2]) Thus A, altered by later hand to विस्फेज १४१ [3]) A_1 gloss दुर्गाधिकार ज्ञान गत्ती इति भाषया [4]) A_1 gloss नरवाहनसाक्षा [5]) A, भाम्यता [6]) A_1 gloss हार्वाभिमारंगजस्य सेना १४४ [7]) V gloss गुर्जरेति अत्र गुर्जर लघुगोत्रेश्वरात इति प्रसिद्धं देश [8]) A, gloss त्रिगर्तो नगरकाड़ा नरपति १४५ [9]) A, gloss [illegible] the gloss नीवि (नेय इति देशभाषया प्र. which V continues with सिद्धु य सर्वानिनी) स्नुषत्व तस्याहंकारि कृत्वस्य राज्ञ प्रतीत्यर्थ समर्पयेत ॥ १४९ [10]) ति supplied by A_3 in space left by A_1 १५० [11]) A_1 gloss तक्कदेश चंद्रिकाटक प्रकाश्य नाम भुट्टेशाहूर वर्तमानो योजनविंशतिकेन

दरत्नुरुडकाधिपयोर्यः केसरिवराहयोः । हिमवद्विन्ध्ययोरासीदार्यावर्त इवान्तरे ॥१५२॥
उदभाण्डपुरे तस्थुर्यदीये निर्भया नृपाः । पक्षच्छेदभयात्रस्ता महार्णव इवाद्रयः ॥१५३॥
नक्षत्रेष्विव भूपेषु नभसीवोत्तरापथे । यस्यैव विपुला ख्यातिर्मार्तण्डस्येव मण्डलम् ॥१५४॥
स श्रीमांल्लक्ष्मियः शाहिरत्नखानाभयः क्षुधा । निराकरिष्णोः[3] साम्राज्यात्तस्य सेवां न लब्धवान् ॥१५५॥
एवं दिग्विजयं कृत्वा प्राप्तः सं निजमण्डलम् । प्रदेशे पञ्चसत्राख्ये स्वनाम्ना विदधे पुरम् ॥१५६॥
तस्यं श्रीस्वामिराजस्य तनयोर्दक्षपथप्रभोः । पूर्णिमेव क्षपाबन्धोः सुगन्धाख्याभवत्प्रिया ॥१५७॥
तया समं पुरवरे सुरराजोपमो नृपः । तस्मिञ्शंकरगौरीशसुगन्धेशौ विनिर्ममे ॥१५८॥
द्विजस्तयोर्नायकाख्यो गौरीशाष्टरसद्मनोः । चातुर्विद्यः कृतस्तेन वाग्देवीकुलमन्दिरम् ॥१५९॥
परकाव्येन कवयः परब्रह्मेण चेश्वराः । निर्लोठितेन स्वकृतिं पुण्यन्त्यथनेन क्षणे ॥१६०॥
स्वल्पसस्वो नरपतिः स्वपुरख्यापनाय सः । सारापहारमकरोत्परिहासपुरस्य यत् ॥१६१॥
ख्यातिहेतुः पद्मवानं पशूनां क्रयविक्रयौ । इत्यादि यत्पत्तनेस्ति तत्तस्मिन्हि पुरेभवत् ॥१६२॥
राज्यप्रदेन नृपते रत्नवर्धनमन्त्रिणा । श्रीरत्नवर्धनेशाख्यो व्यधीयत सदाशिवः ॥१६३॥
चित्रं नरपतिप्राः पूतमूर्तयः कीर्तिनिर्झरैः । भवन्ति व्यसनासक्तिपांसुस्नानमलीमसाः ॥१६४॥
अथ क्रमेण नृपतिर्लोभाभ्यासेन भूयसा । आधीयमानचित्तोभूत्प्रजापीडनपण्डितः ॥१६५॥
भारध्वैर्व्यसनैर्भुक्षा क्षीणकोशः क्षणे क्षणे । देवादीनां स सर्वस्वं जहारायासयुक्तिभिः ॥१६६॥
कर्मस्थाने पुरगृहयामादिधनहारिणा । तेनाढ्यपतिभागाख्यगृहकृत्याभिधे कृते ॥१६७॥
धृपचन्दनतैलादिविक्रियोत्थं समाददे । द्रविणं देवदेवेभ्यः क्रयमूल्यंकलाच्छलात् ॥१६८॥
प्रत्यवेक्षां मुवे दत्त्वा विभक्तैरधिकारिभिः । चतुःषष्टि सुरगृहान्सुमोषेतरदच्छसा ॥१६९॥
ग्रामान्देवगृहग्राह्यान्राजा प्रतिकरेण सः । स्वयं स्वीकृत्य चोत्पत्तिं क्रमां कार्षक इव व्यधात् ॥१७०॥
तुलां कृत्वा त्रिभागोनां वर्षदेयां स पर्षदे । भुक्तिकम्बलमूल्यादिदम्भादभ्यधिकं ददौ ॥१७१॥
दिगन्तरस्थो ग्रामीणानुद्दभाराननागतान् । तद्देशार्घैर्भारमूल्यं वर्षमेकमदण्डयत् ॥१७२॥
वर्षपरस्मिन्निखिलान्भारमूल्यं निरागसः । तत्रैव संख्यया ग्राम्यान्प्रतिग्राममदण्डयत् ॥१७३॥
इत्येषा रूढभारोढिः प्रथमं तेन पातिता । दारिद्र्यदूती ग्रामाणां या त्रयोदशधा स्थिता ॥१७४॥
स्कन्धकग्रामकायस्थग्रासवृत्त्यादिसंग्रहैः । अन्यैश्च विविधायासैर्व्यधाद्ग्रामान्स निर्धनान् ॥१७५॥
तुलापहारोपचयग्रामदण्डादिसंग्रहैः । इत्येष तेन संवाहो गृहकृत्ये प्रवर्तितः ॥१७६॥
व्यधत्त पञ्च दिविरान्स तस्मिन्भिन्नकर्मणि । षष्ठं तथा गञ्जवरं शाकचं लवटाभिधम् ॥१७७॥

---

१५३ [1]) This verse is added in margin by A_3, found in G R १५४. [1]) A_1 विपुलख्याति मा°; A_3 has altered this to विपुला ख्यातिर्मा°, but has subsequently restored the reading of A_1. G follows A_1, R reads as A_3 १५६ [1]) Thus corr by A_3, A_1 °क्षलिय.—[2]) Thus corr by A_1 from °रिष्णु, R G °रिष्णो°. १५६ [1]) A_3 gloss शङ्करवर्मा.—[2]) A_3 gloss शङ्करपोर. १५७ [1]) A_3 gloss शङ्करवर्मण —[2]) A_3 gloss कन्या. १५८ [1]) Emended, A गौरेशा° १६५ [1]) Thus corr. by A_1 from A_1 अपेयमान° १६८ [1]) Thus A_1; A_3 °नचेला° —[2]) Thus corr by later hand from A_1 °मूल्ये.—[3]) A_3 gloss कलालाभ १६९ [1]) Thus A_3; A_1 सुमोचेत°. १७१ [1]) Thus A_1, A_3 भुक्त° —[2]) दम्भा supplied by A_3 in space left by A_1. १७७ [1]) Thus A_1. Cf vi 130, vii. 111, 119, misread त्रिविरान्स in R G Edd.

आत्मनो निरयं मूढः सोऽकृत्येष्वप्रक्रियाम् । भाविनामकरोद्राज्ञां पापी यद्वां नियोगिनाम् ॥१७८॥
निमित्तं मण्डलेष्वस्मिन्सविधानामनादरे । राज्ञां प्रतापहानौ च नान्यः शंकरवर्मणः ॥१७९॥
मुख्येन गुणिनां राज्ञा धनहान्या प्रतापहाः । मूर्खेण येन कायस्था दास्याः पुत्राः प्रवर्तिताः ॥१८०॥ 180
तथा कायस्थभोज्या भूर्जाता तत्पत्यवेक्षया । यथा संजायतेवर्णं हरणादिव भूभुजाम् ॥१८१॥
तस्मिन्घोरे प्रजादुःखे कृपार्द्रः पृथिवीपतिम् । पुत्रो गोपालवर्माख्यः कदाचिदिदमब्रवीत् ॥१८२॥
प्रदातुस्तात भवतः पूर्वं न्यासीकृतः स्थितः । वरो यः सत्यसंधस्य सोधुना प्रार्थ्यते मया ॥१८३॥
कायस्थप्रेरणादेतैर्देवेनाद्य प्रवर्तितैः । आयासैः श्वासशेषैव प्राणवृत्तिः शरीरिणाम् ॥१८४॥
न च नामास्ति तातस्य कश्चिल्लोकद्वयोचिता । मनागपि हितप्राप्तिरेतया जनपीडया ॥१८५॥ 185
अदृष्टविषयां वार्ता गहनां वित्तृणोति कः । दृष्टेप्यनिष्टादन्यद्य कर्मणानेन दृश्यते ॥१८६॥
एकतो व्याधिदुर्भिक्षप्रमुखा विपदोखिलाः । प्रजानामेकतस्त्वेका लुब्धता वसुधापतेः ॥१८७॥
भुभुजोभ्यस्तलोभस्य श्रीः कैश्चिन्नाभिनन्द्यते । अकालकुसुमस्येव फलसंभावनोज्झिता ॥१८८॥
दानं च सूनृता सूक्तिर्यैश्वर्यसंवननं प्रभोः । लोभः पूर्वं तयोरेव विनाशाय महोद्यमः ॥१८९॥
प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः । स्मृतिशेषां करोत्येव लोभश्च पृथिवीभुजाम् ॥१९०॥ 190
दायादा व्ययभीरुतापरिहतारब्धैर्भवन्त्युद्यता भृत्याः प्रत्युपकारकातरमतेः कुर्युर्न केपि प्रियम् ।
राशीभूतधनस्य जीवितहनौ शश्वत्तेरन्निजा भुभर्तुः क्रियते द्विषेव रभसाल्लोभेन किं नाप्रियम् ॥१९१॥
राजसवाहनामायं नवायासो जनाद्भुतम् । तदेष लोभप्रभवः प्रजानाथ निवार्यताम् ॥१९२॥
श्रुत्वेति राजपुत्रस्य सौजन्येनोज्ज्वलं वचः । स्मितधौताधरो राजा शनैर्वचनमब्रवीत् ॥१९३॥
तवाकृत्यविसंवादि वचः सौजन्यपेशलम् । स्मारयत्यद्य मामेतच्चित्तवृत्तिं पुरातनीम् ॥१९४॥
कुमारभावे पूर्वं मे तवेवाद्रान्तरात्मनः । प्रजावत्सलता वत्स पर्याप्ता पर्यवर्धत ॥१९५॥ 195
सोहं धर्मे महद्धर्म शीते दत्त्वाच्छमंभुकम् । पदातिरपपादत्रः पित्रा संचारितोभवम् ॥१९६॥
मृगव्यादौ हयैः सार्धमटन्तं कण्टकक्षतम् । अन्तर्बाष्पं मां विलोक्य तमसूयिपुरागताः ॥१९७॥
स तानुवाच सामान्यो भुक्त्वाहं राज्यमाप्रवान् । काले काले सेवकानां जाने सेवापरिश्रमम् ॥१९८॥
ईदृक्दुःखमयं भुक्त्वा ज्ञास्यत्यन्यव्ययां ध्रुवम् । प्राप्तैश्वर्यो भवेन्मूढो गर्भेश्वरतयान्यथा ॥१९९॥
उपायैरीदृशैर्योहं कृतः पित्रा सुशिक्षितः । तेनापि प्राप्तराज्येन मयैवं पीडिताः प्रजाः ॥२००॥ 200
गर्भेश्वरत्वयां जातः शरीरी विस्मरेद्यथा । प्राप्तराज्यस्तथा राजा नियतं पूर्वचिन्तनम् ॥२०१॥
त्वयैव तस्मादेकोद्य वरो मह्यं प्रदीयताम् । प्राप्तराज्यः प्रजापीडां मा कार्षीस्त्वमतोधिकाम् ॥२०२॥
सासूयमिति तेनोक्तः कृतान्योन्यस्मितैर्वृतैः । राजप्रैर्वीक्षितश्चासीत्कुमारो क्षीणतानतः ॥२०३॥
त्यागभीरुतया तस्मिन्गुणिसङ्गपराङ्मुखे । आसेवन्तावरा वृत्तीः कवयो भङ्गटादयः ॥२०४॥
निर्वेतनाः सुकवयो भारिकी लवटस्त्वभूत् । प्रसादात्तस्य दीनारसहस्रद्वयवेतनः ॥२०५॥ 205

---

१७८ [1]) Thus A, *varia lectio* in R G पापीयस्त्वा —[2]) Thus corr by A_3 from A_1 विनियोगि°. १८१ [1]) A_2 gloss भयवशः. १९६. [1]) Thus A_2, A_3 °दस्वोश्रम° १९७ [1]) Thus corr. by A_3 from A_1 °दस्त. २००. [1]) Thus corr. by A_3 from A_1 °क्षिता. २०१. [1]) A_3 °चिन्तितम्.

कल्यपालकुले जन्म तत्तेनैव प्रमाणितम् । क्षीवोचितापभ्रंशोक्तेर्देवी वाग्यस्य नाभवत् ॥२०६॥
वेष्टितश्मश्रुरुष्णीषो घाणस्थाप्ये प्रवेशिनी । ध्यानैकाग्र्या दृगित्यासीत्सुखराजस्य मन्त्रिणः ॥२०७॥
योगमायोचितो वेषो दुर्नयासेविनः प्रभोः । छद्मानुवृत्त्या स प्राप नटस्येव विडम्बनाम् ॥२०८॥ युग्मम्॥
सोनुगैः सह निर्व्रीहं जघान द्रोहशङ्कया । भूरं दार्वाभिमारेशं शर्वयी नरवाहनम् ॥२०९॥
प्रजाभिशापे पतिते नृपस्योन्मार्गवर्तिनः । त्रिंशद्दिशाः सुतास्तस्य व्यपद्यन्तामयं विना ॥२१०॥
वंशः श्रीर्जीवितं दारा नामापि पृथिवीभुजाम् । क्षणादेव क्षयं याति प्रजाविप्रियकारिणाम् ॥२११॥
इत्युक्तं वक्ष्यते चायं व्यक्तमेतत्तु चिन्त्यताम् । प्रनष्टं तस्य नामापि यथा कूरेण कर्मणा ॥२१२॥
नासा पत्तनमित्येव प्रख्यातं स्वपुरं कृतम् । कस्यान्यस्याभिधाध्वंसि यथा शंकरवर्मणः ॥२१३॥
स्वस्रीयः सुखराजस्य तेन द्वारापिः कृतः । वीरानकाभिधे स्थाने प्रमादात्तमदङ्कथम् ॥२१४॥
तत्कोपात्स स्वयं राजा दत्तयाचो मदोर्जितः । वीरानकं समुन्मूल्य प्रविवेशोत्तरापथम् ॥२१५॥
सिन्धुकुलाभ्रयान्देशाञ्जित्वा भूरिभयानुरैः । कृतानतिर्महीपालैः प्रत्यावृत्तोभवत्ततः ॥२१६॥
उरशां विजनस्तस्य वास्तव्यैरौरशैः समम् । निकेतनेतोः सेन्यानामकस्मादुदभूत्कलिः ॥२१७॥
गिरिभृङ्गाग्रिमारूढेन धर्पकेन निपातितः । वेगवाही शरस्तस्य प्रमादवविशद्बलम् ॥२१८॥
मुमूर्षुगात्रान्कटके सरक्ष्य नयतेति सः । उक्ता कर्णीरथारूढः स्थानात्तस्माद्विनिर्ययौ ॥२१९॥
क्रीनदर्शनसामर्थ्यं परिज्ञाय शनैर्गिरा । क्रन्दन्त्या वपुरालिङ्ग्य स्थितायाः क्षामभाषितैः ॥२२०॥
पुत्रं गोपालवर्माख्यं न्यासीकृत्य च रक्षितुम् । शिष्टुदेश्यं महादेव्याः सुगन्धाया भवान्यवम् ॥२२१॥
फाल्गुणे कृष्णसप्तम्यां वत्सरे सप्तमब्दगे । उत्सायमानविशिखो मार्ग एव व्यपद्यत ॥२२२॥ तिलकम् ॥
सुखराजात्मजः सैन्यं रक्षन्तः परभीभुवः । वृत्तान्तैर्गोपयन्तस्तं यान्त एवाभवन्पथि ॥२२३॥
न यन्त्रसूत्रणे मर्मा नसनोत्तम्भनावहैः । पतिप्राणां प्रजानां सामन्तानामकारयन् ॥२२४॥
पट्टिदेशेऽभिषेक्तुं स्थानं प्राप्ते वोल्यामकाभिधे । चक्रिरे गतसंत्रासास्तत्सस्यान्तसत्क्रियाम् ॥२२५॥
तिस्रः सेनन्धवन्यासा राज्ञो राज्ञानमन्वयुः । वेलातिक्तः कृतज्ञश्च जयसिंहाह्वयः कृती ॥२२६॥
तौ लाडो वत्समारभ्य त भृत्यावनुगमतुः । इति पट्टिभिरारूढैः सहसाकियतार्धिसात ॥२२७॥
ततो नृपोप गोपालवर्मा धार्मिकतोज्ज्वलः । सुगन्धया पाल्यमानः सत्यसंधो वसुंधराम् ॥२२८॥
मये लालितकाश्मीरा दुर्वृत्तानां वसन्नपि । अनतिक्रान्तबाल्योपि दुःसंस्काराज्ञ सोग्रहीत् ॥२२९॥
भुजाकनकनीलोर्मैर्वेष्टयेधिकमुन्मदा । सा प्रभाकरदेवाख्यमकीकमत मन्त्रिणम् ॥२३०॥
तया निर्भरसंभोगपीतया स व्यधीयत । सौभाग्यपरभृद्वारमौलिचक्रव्याङ्कितः ॥२३१॥
कोशाध्यक्षेण रागिण्यास्तया लुण्टितसंपदा । उदभाण्डपुरं तेन ग्राहिराज्य व्यलीयत ॥२३२॥

२०७ 1) Thus corr. by A_1 from A_1 'रागस्य. २१०. 1) न supplied by A_3.—2) A_1 writes below this word ७० २१३ 1) A_1 gloss पट्टन २१४ 1) A_1 gloss द्वारविषयात् वीरानक.—2) A_4 gloss सुखराजस्थाय २१५ 1) A_2 gloss उद्र २१९ 1) Thus A_1, A_3 'कन्धान्था' २२० 1) Thus corr. by later hand from A_1 'लिङ्ग्या. २२३. 1) A_1 gloss मन्त्रिण —2) Thus A_1 A_3 वृत्तान्त मा २२५ 1) Thus A R G; A_1 gloss द्वारावलसमीपे द्वारस्था २२६ 1) Emended A R वालाविन्, G वालाविभु. Cf वेलाविन vi 73, 196, 324 २२९ 1) A_2 gloss लालितका पञ्चानन २३२ 1) Thus corr. from A_1 उद्भाण्ड by A_2 which adds the gloss हैमद्र, R G read as A_1 Cf उद्भाण्डपुरे v. 153.—2) Thus A_1 A_3 व्यलीयत, G R follow A_3

आज्ञातिक्रमिणः शाहेः कृत्वा कमलुकाभिधाम् । तोरमाणार्यं स प्रादाद्राज्यं लक्ष्मियमूनवे ॥२३३॥
प्रत्यावृत्तोथ नगरं विवेश विजयोन्नतः । शौर्यभृङ्गारवसती साभिमानः स्वविग्रहे ॥२३४॥
स राजजननीजारः साहंकारो जयार्जनात् । मानक्षतिमधिक्षेपैर्वीराणां व्यधितान्वहम् ॥२३५॥ 235
क्षुद्रेण कामिना वेद्यावेश्मनीव नृपास्पदे । तेनावृते संप्रवेशो नाभूदन्यस्य कस्यचित् ॥२३६॥
शनैर्विज्ञातवार्तस्य धनमानोपहारकृत् । सोभूदक्षिगतोत्यर्थं राज्ञो गोपालवर्मणः ॥२३७॥
विग्रहे यत्र गञ्जेस्मिंस्तत्सर्वं शाहिविग्रहे । गतमित्यब्रवीद्भूपं स कोशगणनोद्यतम् ॥२३८॥
अथ गञ्जाधिपो राजभीतः खार्खोदवेदिनम् । रामदेवाह्वयं बन्धुमभिचारमकारयत् ॥२३९॥
तयाभिचारक्रियया भुक्तभूर्वत्सरद्वयम् । गोपालवर्मनृपतिर्जातदाहो व्यपद्यत ॥२४०॥ 240
व्यक्तीभूतकुकर्मा स राजदण्डभयाकुलः । रामदेवोवधीत्पापः स्वयमेव स्वविग्रहम् ॥२४१॥
रथ्यागृहीतो गोपालवर्मभ्रातार्थ संकटः । बभूव प्राप्तराज्यः स दशभिर्दिवसैर्व्यसुः ॥२४२॥
अथ वंशक्षये वृत्ते राज्ञः शंकरवर्मणः । प्रजाप्रार्थनया राज्यं सुगन्धा विदधे स्वयम् ॥२४३॥
गोपालपुरंगोपालमठगोपालकेशवान् । सा पुरं च स्वनामाङ्कं विदधे धर्मवृद्धये ॥२४४॥
गोपालवर्मणो जाया नन्दानिन्द्याभवन्नन्दामठंकेशवधारिणी ॥२४५॥ 245
अन्तर्वत्न्याः क्षणे तस्मिन्पत्न्या गोपालवर्मणः । जयलक्ष्म्यां ववन्धास्थां श्रभ्रुः संतानकाङ्क्षिणी ॥२४६॥
तस्यां विपन्नापत्यायां प्रसवान्तेनिदुःखिता । साभूदन्वयिने राज्यं कस्मैचिद्दातुमुद्यता ॥२४७॥
तस्मिन्काले महीपालनियहानुग्रहक्षमम् । तत्र तन्निपदानीनां कृतसंहत्यभूत्कुलम् ॥२४८॥
ततः समाश्रितैकाङ्गा स्वयं संवत्सरद्वयम् । सुगन्धा विदधे राज्यं सा मित्रत्वेन तन्निणाम् ॥२४९॥
योग्याय दातुं साम्राज्यं कस्मैचित्सा कितैकदा । मन्त्राय मन्त्रिसामन्तांस्तन्यैकाङ्गानदीकयत् ॥२५०॥ 250
अवन्तिवर्मवंशान्ते नप्तारं शूरवर्मणः । गग्गायाः स्वकुटुम्बिन्याः संजातं सुखवर्मणा ॥२५१॥
अनुग्रतो मे संबन्धिसेहादेवं भवेदिति । राज्ये निर्जितवर्माख्यं कर्तुं तस्या मनोभवत् ॥२५२॥ युग्मम् ॥
तया तदुक्तं विषयव्यसक्तित्वेन जागरात् । रात्रौ दिवाशयतया योप्यनुत्थानदूषितः ॥२५३॥
नाम पङ्गुरिति प्राप राज्ये का तस्य योग्यता । इत्युदीर्यभवन्नन्तो यावत्केचन मन्त्रिणः ॥२५४॥
संहतैर्भद्रनियंतैस्तावन्निर्जितवर्मजः । दशवर्षः कृतो राजा पार्थस्तन्निपदातिभिः ॥२५५॥ तिलकम् ॥ 255
ते गञ्जाधिपवाक्यानां सुगन्धोत्पाटनात्कृतम् । प्रायश्चित्तममन्यन्त मानक्षतिविधायिनाम् ॥२५६॥
सा राजधान्याः साम्राज्यपरिभ्रष्टा विनिर्ययौ । कृतोधिकारा हारस्य पतितैर्बाष्पबिन्दुभिः ॥२५७॥
शरणं प्रत्यभाङ्क्षीत्सो यो यस्तस्याः क्रमागतः । तं नमैक्षिष्ट निर्यान्ती विपदैः सह संगतम् ॥२५८॥
वर्षे एकाशनवंते संभूयैकाङ्गसैनिकाः । गत्वा सुगन्धामानिन्युः पुनर्हृष्टपुरंस्थिताम् ॥२५९॥

---

२३३ [1]) Thus corr by later hand from A_1 °धम् —[2]) Thus A_2, A_1 तोमराणाय २३५. [1]) Thus A_2, A_1 °जननीसङ्गरस्साभिमानो.—[2]) Thus corr by A_3 from A_1 मन °. २३७. [1]) Thus corr. by A_3 from A_1 °मालाप°. २३९. [1]) A_4 gloss प्रभाकर. २४१. [1]) A_2 gloss गोपालवर्मसकुटुम्बोमोता सुगन्धा.—[2]) Thus corr. by A_2 from A_1 पुरम्. २४४. [1]) A_2 gloss गुरीपुरम्. २४५. [1]) A_2 gloss नन्दीमठं २४८. [1]) Thus corr. by A_3 from A_1 विग्रहा°.—[2]) Thus A_2, A_1 तत्र. २५९ [1]) Thus emended; A G R सत्रिव°.—[2]) A_3 *v.l* मन्त्रिणाम्; struck out २५०. [1]) Thus A_3; A_1 °न्तान्दशै° २५४. [1]) A_2 gloss निर्जितवर्मा. २५६. [1]) A_2 gloss कोदरक्षा २५७. [1]) Thus corr. by later hand from A_1 राज्य°.—[2]) Thus A_3; A_1 हता° २५९. [1]) Thus A_1, A_3 एकोन°.—[2]) A_2 gloss वराहमूले.

तामापतन्तीमाकर्ण्य पार्थानुमहका मदात् । चैत्रान्ते तन्त्रिणः सर्वे निर्ययुः समरोन्मुखाः ॥२६०॥
ते जित्वा नवते वर्षे वैशाखे भित्तसंहतीन् । एकाङ्गान्व्यूढसंघातान्बबन्धुस्तां पलायिताम् ॥२६१॥
निष्पालकविहारान्तस्तैर्बद्धा सा व्यपद्यत । अनित्यपतनोच्छ्राया विचित्रा भाग्यवृत्तयः ॥२६२॥
अस्मिन्धनजनक्षैण्यनिमित्तं मण्डलोत्तमे । सर्वतोदिक्मुत्तस्थावयानर्थपरंपरा ॥२६३॥
जनकः पालको भूत्वा पङ्गुर्बालस्य भूपतेः । सामात्योपीडयल्लोकमुत्कोचपहतत्परः ॥२६४॥
भूभुजो यामकायस्था हवान्योन्यविपाटनम् । दत्ताधिकाधिकोत्कोचा विदधुस्तन्त्रिसेवया ॥२६५॥
यद्राजैः कन्यकुब्जाद्या विलब्धास्तत्र मण्डले । तान्त्रिणां हुण्डिकादानाद्भुभुजां जीविकाभवत् ॥२६६॥
विष्णुः पुराणाधिष्ठाने मेरुवर्धनमन्त्रिणां । श्रीमेरुवर्धनस्वामिनामा येन व्यधीयत ॥२६७॥
तदात्मजाः क्षणे तस्मिन्गहनद्रोहचक्रिकाः । चक्रुर्निगूढराज्येच्छाः प्रजायासैर्धनार्जनम् ॥२६८॥ युग्मम् ॥
सार्धं सुगन्धादित्येन गूढं शंकरवर्धनः । तेषां ज्येष्ठो बद्धसख्यो मुमोष नृपमन्दिरम् ॥२६९॥
क्षीणप्रजे क्षणे तस्मिन्सारपात इव क्षते । उदीर्णः प्राविताशेषशरच्छालिरजृम्भत ॥२७०॥
खार्यां सहस्रक्रेयायां दुर्लभे भोजनेभवत् । वर्षे त्रिनवते घोरे दुर्भिक्षेण जनक्षयः ॥२७१॥
शवैश्चिरप्रविष्टाम्बुसंसेकोच्छूनविग्रहैः । वितस्ता सर्वतप्रख्ना दुर्लक्ष्यस्थलिताभवत् ॥२७२॥
विश्वतोस्थिमये जाते नैविद्यास्तिमण्डले । सर्वभूतभयादायि रमशानैक्यमजायत ॥२७३॥
महार्हधान्यसंभारविक्रयप्राप्तसंपदः । मन्त्रिणः क्ष्मापतेः प्रापुस्तान्त्रिणश्च धनाढ्यताम् ॥२७४॥
आधेयः क्ष्माभुजः सोभून्मन्त्री यस्तादृशीः प्रजाः । विक्रीय वाहयन्नासीत्तन्त्रिणां हुण्डिकाधनम् ॥२७५॥
अटव्यां वृष्टिसंपाते वातवर्षैरुपद्रुतम् । बहिः सर्वे जनं पश्यन्कश्चित्प्राप्योष्णमन्दिरः ॥२७६॥
यथा तथा जनं दुःस्थं वीक्ष्य कापुरुषश्चिरम् । राजधानीस्थितः पङ्गुः स्वसुखं बहुमन्यत ॥२७७॥युग्मम्॥
तुल्लीनचन्द्रापीडादिप्रजापालप्रियाः प्रजाः । एवं तस्मिन्क्षणे नीताः संक्षयं राजराक्षसैः ॥२७८॥
प्रापुश्चिरमवस्थानं पार्थिवा न तदा क्वचित् । धारासंपातसंभूता बुद्बुदा इव दुर्दिने ॥२७९॥
पार्थः पितरमुत्पाद्य कदाचित्प्राभवत्स्वयम् । कदाचित्स तमुत्पाद्य तन्त्रिचक्रिक्रयाप्यभूत् ॥२८०॥
अप्रीणयत्पङ्गुवधूवडवामण्डलं युवा । सुगन्धादित्यबीजाभो व्यधार्यविधिसेवया ॥२८१॥
राज्ञ्यां वप्पटदेव्याः स निर्दयैः सुरतोत्सवैः । खण्डयामास कण्डूतिं साप्यस्यार्यैषणां धनैः ॥२८२॥
भगिनीभगसौभाग्यबद्धराज्याः स्वयं ददुः । यां पङ्गवे मनोज्ञाङ्गीं मेरुवर्धनसूनवः ॥२८३॥
सुगन्धादित्यमौत्सुक्यात्सापि देवी मृगावती । स्वयं संबुभुजेभ्यर्थं कान्ता कामितकामिनी ॥२८४॥
पर्यायेणाभवद्भृत्यः स तयोर्भोगवृद्धये । दरिद्रयोषितेरेकं भुक्तिपात्रमिवान्वहम् ॥२८५॥

---

२६४ [1]) A_2 gloss निर्जितवर्मा. २६६. [1]) Thus A_1; altered by later hand to बद्धाश्चे. २६७. [1]) A_2 gloss पाराहत्य इति प्रसिद्धे पाले.—[2]) A_1 gloss पङ्गुश्चासुरेण. २६८. [1]) A_2 gloss निर्जितवर्मजाः तदात्मजा चक्रवर्मा भूरवर्मा। शम्भुवर्धने शंकरवर्धन मेरुवर्धनपुत्रा २६९ [1]) A_2 gloss मन्त्रिणा.—[2]) A_4 सुगन्धादित्येन सह. २७० [1]) Thus corr. by later hand from A_1 उद्भीप , A_4 gloss व्योपी (Kaśmīri). २७१. [1]) A_4 gives the full date *Saptarshi* ३९९३. २७२. [1]) Thus A_1; altered by later hand to दुर्लक्ष° २७३. [1]) आते supplied by A_2 in space left by A_1. २७४ [1]) A_2 महार्घ°. २७५. [1]) Thus A_1; A_2 आहेय २७६ [1]) Thus corr. by A_2 from A_1 वृष्टि°. २८१. [1]) A_2 gloss मन्त्री.—[2]) A_2 gloss व्यधाच मैथुनम् २८२. [1]) A_4 gloss चक्रवर्ममातुः. २८५. [1]) A_4 gloss तयोर्वप्पटदेवीसुगावत्योः पङ्गुपत्न्योः.

पुत्रयो राज्यलाभाय स्पर्धयाभ्यां स्वमन्त्रिणे । दत्ता निधुवनश्रद्धा धनदानैः[1] सदक्षिणा ॥२८६॥
अथ पार्थे समुत्पाद्य तल्पिता पङ्कुराभितः । तन्त्रिभिः सप्तनवते वर्षे पैषेभिषेचितः ॥२८७॥
मासेष्टानवते वर्षे सोभिषिच्य शिशुं सुतम् । चक्रवर्माभिधं राज्ये क्षीणपुण्यो व्यपद्यत ॥२८८॥
पैतृकं वाञ्छतो राज्यं पार्थस्यानुचरा व्यधुः । एकाङ्गैः सह संग्रामं तत्र तन्त्रिपदातयः ॥२८९॥
मातुर्वध्यटदेव्याः स कंचित्कालं शिशुर्नृपः । मातामह्याः क्षिप्रक्रियायाः पाल्यस्त्रासीत्समा दश ॥२९०॥ 290
बान्यादव्यक्तदैः शैल्ये तस्मिंस्तत्पालनं तयोः । निर्दोषमासीदण्डस्थफणिलालनसंनिभम् ॥२९१॥
जातः पङ्कोर्मृगावत्यां नवमेऽब्देथ तन्त्रिभिः । चक्रवर्माणमुत्पाद्य भूरवर्मा नृपः कृतः ॥२९२॥
निःस्नेहा मातुलामात्याः प्रययुः स्वार्थतत्पराः । अदत्त्वा तन्त्रिणां देयं तस्योत्पाटनहेतुताम् ॥२९३॥
अद्वुर्नृपोपि स क्ष्माभृद्भिना भूरिधनार्पणम् । गुणवानिव वेश्यानां तन्त्रिणां नाभवत्प्रियः ॥२९४॥
वर्षे गते तमुत्पाद्य दुष्टोत्पत्तितया नृपम् । बहर्धदं पुनः पार्थं व्यधुतन्त्रिपदातयः ॥२९५॥ 295
अभूत्साम्बवती वेश्या साम्बेश्वरविधायिनी । पार्थप्रिया तन्त्रिचक्रसंयहे ज्ञातचक्रिका ॥२९६॥
कालापेक्षी चक्रवर्मा ततोप्यैच्छद्वधं बहु । एकादशाब्दस्यासाढे कृतो भूयोपि तन्त्रिभिः ॥२९७॥
पार्थादीन्यैः समुत्पाद्य भुक्तं चक्रिकया पुरा । तैस्तैः स्थानैश्च ये तेभ्यो जीवनायुपलेभिरे ॥२९८॥
पिता भ्राता च यैरस्यं राज्यादुत्पाटितोभवत् । संबन्धिभ्योपि यैर्दुग्धं कन्याः दत्त्वेतरेतरम् ॥२९९॥
अकरोद्दृष्टदोषाणां तेषामेव स नष्टधीः । मेरुवर्धनपुत्राणामधिकारसमर्पणम् ॥३००॥ तिलकम् ॥ 300
कृतोक्षपटलाधीशस्तेन शृंकारवर्धनः । गुरुकृत्येष्यसत्कृत्यो दाम्भिकः शृंभुवर्धनः ॥३०१॥
पैषे तस्यैव वर्षस्य धनाभावात्स तन्त्रिणाम् । अदत्तहुण्डिकादेयः पलायिष्ट भयाकुलः ॥३०२॥
स्थिते मडवराज्यान्तस्तस्मिञ्शृंकारवर्धनः । राज्यार्थी तन्त्रिणां दूतं प्राहिणोच्छंभुवर्धनम् ॥३०३॥
आवर्जितैः स निखिलैरधिकोत्कोचचर्यया । वञ्चयित्वापजं राज्ये तैः स्वगेभ्योभ्यषेचयत् ॥३०४॥
नीर्यस्थितः स्वकुलजांस्तिमिरत्ति भुङ्क्ते मौनी बकस्तिमिमुपेत्य वनान्तवासी ।
व्याधो निहन्ति तु बकं प्रभवन्ति ते ते पात्राण्युपर्युपरि वञ्चनवञ्चनायाः ॥३०५॥ 305
भ्रष्टश्रीश्चक्रवर्माथ निशि श्रीढकुत्रासिनः । एकदा डामराख्यस्य संग्रामस्यात्रिंशद्दहम् ॥३०६॥
ज्ञात्वा कान्तिविशेषेण राजानं स कृताञ्जलिः । प्रणम्य ग्राहयामास संभ्रमाज्जिमासनम् ॥३०७॥
राज्यभ्रंशादिवृत्तान्तमुक्त्वा साहायकार्थिनम् । तं विपत्पेशलं प्रष्टो विचिन्त्योवाच डामरः ॥३०८॥
तन्त्रिणां वा तृणानां वा राजन्का गणना रणे । स्वत्सेवनार्थं सामर्थ्यं कस्मिन्न मम कर्मणि ॥३०९॥
प्राग्रोत्साहः पुनर्नूनमस्मानेव हनिष्यसि । विस्मरन्त्युपकारं हि कृतकार्या महीभुजः ॥३१०॥ 310
ऊर्ध्वारोहे य आलम्बहेतुर्भूभृच्छिनत्ति तम् । कुठारिकस्तरुस्कन्धमित्याधोगमनोन्मुखः ॥३११॥
धीर्यैर्यादिप्रकर्षेण येनोपक्रियते नृपः । प्राग्रोदयः स तेनैव शङ्कुं वेश्युपकारिणम् ॥३१२॥

---

२८६. [1]) A, reads धनधान्यै २९०. [1]) Thus corr. by later hand from A, शक्ति°. २९२ [1]) A, gloss मेरुवर्धनपुत्र्या — [2]) Thus A,; A, मन्त्रिभि°. २९६ [1]) A, gloss साम्बेश्वरणप्राप्ते. २९८. [1]) A, gloss अत्र सर्वत्र बलछलेन मेरुवर्धनपुत्रपरामर्शः — [2]) A, पार्थादिभ्य. २९९ [1]) A, gloss पङ्कु.—[2]) A, gloss पार्थ भूरवर्मा वा.—[3]) A, gloss चक्रवर्मण.—[4]) A, gloss मृगावर्मी — [2]) A, gloss पङ्कवे. ३०५ [1]) Emended; A चुच्चु°. ३१०. [1]) Thus corr. by A, from A, °स्यालेव.

अस्मिन्स्थिते विपदमूदिति संचिन्त्य वर्ज्यते । मूढैः परिवृढैरापत्सेवको मङ्गलेच्छुभिः ॥३१३॥
संपदापत्सहायस्य विस्मृतोपक्रिया नृपाः । मध्ये प्रमादस्खलितमुत्पत्तं हंदि कुर्वते ॥३१४॥
आमयार्तैरिपुत्रासक्षुदादौ दृष्टवैकृतान् । लब्धोदया ह्रीभयेन क्षमापा ग्रन्थ्यनुयायिनः ॥३१५॥
राज्ञः सतोपि नाश्वासो यस्येभस्येव कर्णयोः । अविशुद्धप्रकृतयो ध्वनन्ति मधुपा इव ॥३१६॥
दिवसे संनिधानेन पिशुनप्रेरणा प्रभोः । ईर्ष्यालुना स्वैरिणीव रक्षितुं यदि पार्यते ॥३१७॥
राजवज्रन्युपाध्यायो देवी यच्चिक्षयेद्ग्रहः । तत्र प्रजागरः कर्तुमसर्वज्ञैर्न शक्यते ॥३१८॥
कथंचिदद्धि हृदये कुशलैर्विनिवेशिता । शिक्षा गौरखरेणेव राज्ञा विस्मार्यते निशि ॥३१९॥
न के लोभं समुत्पाद्य जिह्वया क्षिप्तदीधया । पिपीलका इव ग्रस्ताः क्ष्मापालैः शून्यकैरिव ॥३२०॥
जानाति हन्तुं हन्तव्यमासन्नं न तु दूरगम् । एको बकः परः सत्यं द्रोहवृत्तिर्महीपतिः ॥३२१॥
न नाम कण्टकाकीर्णः कौटिल्यं लक्ष्यतां नयेत् । कालापेक्षी क्षितिपतिः शरीरमिव जाहकः ॥३२२॥
नमन्नपि हरिर्हन्यादाश्लिष्यन्नपि पन्नगः । विहसन्नपि वेतालः स्तुवन्नपि महीपतिः ॥३२३॥
अद्रोहवृत्त्या तस्मात्त्वं द्रक्ष्यस्यस्मान्सदा यदि । ससैन्यस्ते तदेषोहं प्रातरेव पुरःसरः ॥३२४॥
तदाकर्ण्यान्नवीद्राजा लज्जास्मितसिताधरः । स्वात्मेव यूयं संरक्ष्या मम पूर्वोपकारिणः॥३२५॥
ततो निक्षिप्य चरणं रक्तात्ते मेषचर्मणि । कोशौ चक्रतुरन्योन्यं सखद्वौ नृपडामरौ ॥३२६॥
अथ संघटितासंख्यचण्डडामरमण्डलः । चक्रवर्माकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥३२७॥
तस्मिन्क्षणे पुरस्कृत्य योद्धुं शंकरवर्धनम् । विनिर्ययुः सिताष्टम्यां चैत्रे तन्त्रिप्रदातयः ॥३२८॥
कालानुवृत्तिप्रच्छन्नं तेषां संभावनोज्झितम् । स तत्वरे पुरस्कर्तुं चक्रवर्मा स्वविक्रमम् ॥३२९॥
अथ प्रवृत्ते संग्रामे घोरे पद्मपुराद्रुहिः । जघान प्रेरितहयः पूर्वं शंकरवर्धनम् ॥३३०॥
हते सेनाधिपे तत्र शतधा तन्त्रिवाहिनी । प्रययौ पवनाघातप्रेरिता नौरिवार्णवे ॥३३१॥
पृष्ठानुसरणोद्युक्तो नृपस्तेषामपाहरत् । गतिं तुरगवेगेन शिरःश्रेणिं तथासिना ॥३३२॥
भ्रमतः समरे बभ्रुवीरपद्माञ्चलच्छटाः । चक्रवर्ममृगेन्द्रस्य सटापटलविभ्रमम् ॥३३३॥
किमन्यत्पञ्चषाण्यासन्सहस्राणि रणाङ्गने । पतितानि क्षणादेव हतानां तत्र तन्त्रिणाम् ॥३३४॥
तन्त्रिणो रणसंरम्भपरिश्रान्ताः क्षमातले । गृध्रपक्षकृतच्छाये शायिताश्चक्रवर्मणा ॥३३५॥
विशुद्धवंश्यैर्गुणिभिर्निहते: संश्रितैः समम् । अभूषयद्वीरशय्यां भूरः शंकरवर्धनः ॥३३६॥
उदयं संहता एव संहता एव च क्षयम् । प्रयान्तः स्पृहणीयत्वं तन्त्रिणः कस्य नागमन् ॥३३७॥
माननीयानधृष्यांश्च महावंश्यान्महीपतीन् । अहीनिव खिलीकृत्य भिक्षयन्तः क्षणे क्षणे ॥३३८॥

---

३१६. [1]) A, note न विशुद्धा प्रकृतिर्येषां ते । अविशुद्धप्रकृतय सूचका यस्य राज्ञः कर्णयोर्विषये ध्वनन्ति । तस्य सतोपि साधोरपि स्वय नाश्वास । इभस्येव । यथा हस्तिन कर्णयोर्मलिना मधुपा ध्वनन्ति ॥.—[2]) A, gloss कुटित्वा . ३१९. [1]) A, गोपख°. ३२०. [1]) A, भोग ३२१ [1]) Thus corr by later hand from A, पर ३२२. [1]) Thus A, and R, misread in G and Edd. जार्यक , A, gloss जार्यको पूकमाजारखदाकैरण्डकासु चरति विश्व . ३२६. [1]) A, gloss विश्वमित्यर्थ । उभौ मैत्रीसम्बन्धार्थं रक्तात्ते मेषचर्मणि (gloss भस्त्रायां) परस्परं पादप्रक्षेप कुरुत इति शपथसंपदाय दिव्ये च कोशं पुष्पादिकुट्टलासिविधानयोरिति मङ्ग ३३१. [1]) A, विदर्णा ३३२. [1]) Thus corr. by later hand from A, °सारणो°. ३३३ [1]) A, gloss अधारयन्.—[2]) A, gloss शिरस्त्रबन्धनार्थं दत्तो यो वीरपट्ट डोपट्ट इति प्रसिद्ध तस्य अच्छलच्छटा क्षिप्ते इति प्रसिद्धा ३३६ [1]) Thus A, ; altered by later hand to °हत·

अनवन्क्रीडया व्रीडां मायन्तो जीविकाकृते । प्रागाहितुण्डिकाः क्रूरा इव ये गर्ह्यवृत्तयः ॥३३९॥
ते तन्त्रिणः क्षणाद्दग्धा गूढवैरविषाग्निना । विमाननाविविभेन चक्रवर्ममहाहिना ॥३४०॥ तिलकम् ॥ 340
अथ द्वितीये दिवसे भग्नानामपि तन्त्रिणाम् । वीरः संघटनां यावद्ररकरोच्छंभुवर्धनः ॥३४१॥
तावन्मिलितसामन्तसचिवैकाङ्गलालितः । मैन्यैर्नानापथायातैर्नंदद्भिर्व्याप्तदिक्पथः ॥३४२॥
बलान्मध्येभवाराणां नृत्यतेवाभ्यवाजिना । बल्गाङ्केनोद्दहद्रम्यं शिरस्त्रं वामपाणिना ॥३४३॥
सस्वेदेतरहस्तामवेष्टनोल्लासनस्पृशः । खड्गस्य विम्बितार्कस्य भाभिर्द्योतितकुण्डलः ॥३४४॥
कवचोत्सेपसंरब्धकण्ठायासेन ताम्यता । बद्धभ्रुकुटिवन्धेन वदनेन भयावहः ॥३४५॥ 345
तर्जयन्कृततुंकारांस्तुण्डकांस्तुण्डितापणान् । शिरोक्षिसंशया त्रस्तवास्तव्यकृतसान्त्वनः ॥३४६॥
भेरीरवैः भ्रुतिं भिन्दन्पौराशीर्घोषरोधिभिः । संग्रामजयशोभाङ्कध्वक्रवर्मावितिष्टपुरम् ॥३४७॥ कुलकम् ॥
तस्मिन्सिंहासनं प्राज्यमाक्रामति जयोर्जिते । बद्धा कुतश्चिदान्निये भूभटः शंभुवर्धनम् ॥३४८॥
राज्ञः पुरस्तात्तं शस्त्रपातभीमीलितेक्षणम् । भक्तिं प्रदर्शयन्पापश्चण्डाल इव सोवधीत् ॥३४९॥
उज्झतां धर्ममर्यादां भृत्यानां जनकोपमान् । हन्तुं नरेन्द्रान्द्रोहेण प्रारंभः शंभुवर्धनः ॥३५०॥ 350
प्राप्य निष्कण्टकं राज्यं चक्रवर्मनृपः क्रमात् । अजायत धृतोत्सेको नृशंसविषमक्रियः ॥३५१॥
स्वविक्रमकथास्तोत्रैरोमन्यप्रियताहतः । लोभवद्दिटवन्द्यादिचाटुकारविधेयधीः ॥३५२॥
आत्मानं दैवतमिव स्तुतिमोहितचेतसः । जानतः प्राग्भवस्तस्य विवेकविगुणाः क्रियाः ॥३५३॥
तस्मिन्प्रसङ्गे रंगाख्यः प्रख्यातो डोम्बगायनः । वैदेशिकोभवद्राज्ञा वितीर्णावसरो वहिः ॥३५४॥
प्राप्तान्सचिवसामन्तान्विन्यस्यन्तो यथाक्रमम् । प्रतीहारा नृपस्यापमनयन्त विविक्तताम् ॥३५५॥ 355
विबभौ धवलोष्णीषा सभा दीपप्रभोज्ज्वला । दोषशय्येव मणिभिः कृतालोका फणोद्गवैः ॥३५६॥
कृतावरोधधम्मिल्लमालान्दोलनकेलिभिः । प्रदोषपवनैश्चक्रे शिशिरैर्प्राणतर्पणम् ॥३५७॥
जातगीतदिदृक्षाणां गवाक्षावलयो बभुः । आसवामोदिभिर्वक्त्रैरवरोधमृगीदृशाम् ॥३५८॥
हारकङ्कणकेयूरपारिहार्यादिशोभिना । स्ववृन्देनानुयातोथ प्राविशद्गाम्बगायनः ॥३५९॥
हंसी नागलता चास्य सुते ललितलोचने । चक्रतुः कौतुकोद्दीप्तां सभां चित्रार्पितामिव ॥३६०॥ 360
तयोर्विलासवलितैश्चलिताप्राङ्गविभ्रमैः । द्वितीयपुष्पपकरो व्यकीर्यत सभान्तरे ॥३६१॥
गायनैर्जय जीवेति कृतकोलाहलैरभूत् । सदः सशब्दं कुर्वद्भिस्तत्तत्पुंपगुणग्रहम् ॥३६२॥
भुक्तोत्तरोचितोदञ्चत्पञ्चमस्थानचारिणः । वंशी रागविशेषस्य दत्ते स्थाने ततः शनैः ॥३६३॥
अविकियशिरःकम्पधूनेत्रभ्रमशोभितः । अभिन्न इव गायन्योर्गीतिभ्यनिरजृम्भत ॥३६४॥
अथ ताम्बूलरोमन्थत्यागनिश्चलमूर्तिना । जातं राजकुरङ्गेण प्रमोदास्पन्ददृष्टिना ॥३६५॥ 365
गायन्यौ भावमालक्ष्य तस्य स्निग्धमगायताम् । अधिकोद्रेचिताभिख्यं विलासस्मितविभ्रमैः ॥३६६॥

---

३४४ [1]) Thus A_1; A_2 स वामेतर°. ३४५. [1]) A_2 संरुद्ध°.—[2]) A_2 वक्रभु°. ३४६. [1]) Thus corr. by A_2 from A_1 °कुडधकां°. ३४८ [1]) Thus A_2; A_1 °काम्यति. ३५०. [1]) A_2 °वर्धनात. ३५२. [1]) Thus G Edd., A °स्तस्तवप°. ३५३. [1]) A_1 नात्ने. ३५४ [1]) Thus corr. by later hand from A_1 गावन्त्वीर्गी°. ३५६. [1]) Thus corr. by later hand from A_1 गायन्त्यो.—[2]) A_2 gloss आश्चर्यं.

राज्ञस्तयोश्च संसक्तचित्तयोरितरेतरम् । दृग्व्यापारैः स्वसंवेद्यैः संलाप इव पप्रथे ॥३६७॥
नृपं हारितचित्तं तं विज्ञायैकः प्रियो विटः । ततः प्रसङ्गे प्रोवाच प्रीतिवृद्धिकरं वचः ॥३६८॥
देव गीतमिदं यातं संप्राप्यैते मनोरमे । कर्पूरपारीपतितं मैरेयमिव हारितम् ॥३६९॥
370 गायन्योर्मीलितामेतां रागार्द्रन्तचतुष्किकाम् । अनयोः प्रतिमाव्याजाद्युम्बतीव निशाकरः ॥३७०॥
करन्यस्तकपोलान्तमुद्गायन्त्याविमे ध्रुवम् । कटाक्षैः कुरुतो व्योम्नि वैमानिकविमोहनम् ॥३७१॥
जानत्या स्वाश्रयां चर्चामनयोरेकयावयोः । असूयास्मितगर्भोयं कटाक्षः पश्य पातितः ॥३७२॥
गायन्येकाननमुखी कर्णव्यालोलकुण्डला । विपरीतरतोद्रेककृतारम्भेव शोभते ॥३७३॥
सफलं तस्य तारुण्यमीदृश्यो निर्जने स्त्रियः । औत्सुक्याद्विरहे यस्य गायन्त्येवंविधैः स्वरैः ॥३७४॥
375 उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः । एकसार्थप्रयातेभ्यः कथमेको विवर्ज्यते ॥३७५॥
नेत्रस्य रूपं श्रोत्रस्य ध्वनिं संस्पृशतो न चेत् । तदङ्गस्यान्यकान्ताङ्गं स्पृशतो दुष्कृतं कुतः ॥३७६॥
अभिलाषाङ्कुरः सिक्त इव तैर्वेटभाषितैः । राज्ञः स्वभावलोलस्य शतशाखस्वमाययौ ॥३७७॥
थे[1] विस्तारितवर्णसंकररुचः संदर्श्य गोत्रान्तकृद्बद्धावस्थितिचापलङ्घनमलं पार्श्वे ध्वनन्त्युद्धताः ।
नीयन्ते विपर्यासपातपरतां लब्धोदयैस्तैः क्षणात्सिद्धा वारिधरैरमी च रभसाद्भूपालसिद्धा विटैः ॥३७८॥
वस्तु क्षणादनुपपत्त्युपपत्तियुक्तं कृत्वा जडान्यदि विमोहयितुं समर्थाः ।
न स्युर्विटा अथ कुतर्कपथस्थिताश्च नित्योद्यसेयुं निरयेषु मृगाश्वरेयुः ॥३७९॥
380 संतोष्य हारकेयूरकुण्डलैर्डोम्बमण्डलम् । अमार्गेत्यागराधेयः शुद्धान्तमगमन्नृपः ॥३८०॥
क्लान्तोस्याः क्षितिवल्लभोयमभिधेस्युर्वीपतेरेकतो[2] ब्रूतेसावतिचण्डताण्डवयुतं डोम्बः स्वनामान्यतः ।
मध्ये यत्किमपीति गीतरचना काव्यं यदेतद्विदो[3] यल्लक्ष्मीं क्षपयन्ति तान्धिगधुना कीर्त्यर्थिनः पार्थिवान् ॥३८१॥
वेदग्यानुरागस्य महेन्द्रचापधाम्नो हरिद्वारसरञ्जनस्य[4] । उपाङ्गगीतस्य च हारिणोपि सौन्दर्यमस्थैर्यहतप्रकर्षम् ॥३८२॥
दर्शनाभ्याससंवृद्धचक्षूरागः क्षमापतिः । विना श्वपाककन्ये ते न पुनः प्राप निर्वृतिम् ॥३८३॥
गायन्त्यौ शयनोपान्ते शनैर्विहितचुम्बनम् । नृपं रतिसुखाभिज्ञं तं हठात्ते प्रचक्रतुः ॥३८४॥
385 समागमेन नव्येन तयोर्वैयात्ययोभिना । चक्रे क्षपितसामर्थ्यः स लज्जोद्वहनाक्षमः ॥३८५॥
रत्यन्तसुलभोद्वेदैर्निःसृतैः स्वेदबिन्दुभिः । भाग्योष्मसंक्षयजडं वपुस्तस्य व्यधीयत ॥३८६॥
रागान्धेन कृता हंसी महादेवी महीभुजा । भेजे राजवधूमध्ये वालव्यजनवीजनम् ॥३८७॥

---

३६८. [1]) A, तत्र ३६९. [2]) A, gloss हरति मन इति हारी तस्य भाव. सत्ता तां यातमिति सम्बन्धः. ३७०. [1]) Thus corr. by A, from A, गायन्त्यो.—[2]) Thus A, A, क्रमाद्°.—[3]) A, gloss इन्द्रपङ्क्तिचतुष्टयं. ३७६. [1]) A, gloss दुष्कृतं.—[2]) A, gloss स्वर्गेन्द्रियस्य. ३७८. [1]) A, gloss वारिधरा विटाश्च —[2]) A, gloss वर्णाः नीलपीताद्या ब्राह्मणाद्याश्च.—[3]) A, gloss गोत्रान्तकृति इन्द्रे बद्धा अवस्थितिर्येन स चासौ चापः धनु इन्द्रचाप तस्य लङ्घनं । गोत्रान्तकृद्भिः कुलक्षयकारिभिः पापिभि बद्धा स्थितिर्यस्य । तत चापलं प्रदर्श्य ध्वनन्ति इति च घनं निविडं इति चापलविशेषणं.—[4]) Thus corr. by later hand from गीयन्ते —[4]) A, कूपथाद्°.—[5]) A, तरसा भू°. ३७९. [1]) A, gloss निस्वभूरुवेषु. ३८०. [1]) A, gloss अपाकस्थाने कर्णे. ३८१. [1]) A, gloss अथ क्षितिवल्लभ· राजा अस्या कस्याश्चित्कान्त. अस्यां विषये अयं राजा लग्न इत्यभिधा—कथिनमेकत.—[2]) A, gloss डोम्बनोधारिता उर्वीपते अभिधा नामधेय एकत· इत्वस्ति इति कथमिति कान्तोस्या इति.—[3]) A, gloss उर्वीपति —[4]) A, डाम्बस्य नामा°—[5]) A, मध्येन्वस्किम°.—[6]) A, gloss यत्किमपीति । यत्किञ्चिद्बालजालप्रायं लौकिकं गीतं । तस्य रचना एव कार्य.—[1]) A, gloss एतत् गीतिरचनाकाव्यं विदन्ति एतद्विद .—[2]) A, gloss येषां पार्थिवानां लक्ष्मी यल्लक्ष्मीः तां —[3]) A, gloss अपहरन्ति.

तस्या यैर्भुक्तमुच्छिष्टं ते यथा चक्रवर्मणः । नृपान्तराणामन्येषामप्यभूवन्सभासदः ॥३८८॥
मन्त्रिणामक्षपटलप्रख्यमुख्याधिकारदा । प्रवृद्धिहेतुतां प्राप डोम्बसेवनचन्द्रिका ॥३८९॥
मौखर्यात्सचिवतां केचिच्छ्वपाका न स्वयम् । केचित्स्वकुर्वतीत्यिज्ञा राजकार्याणि मन्त्रिवत् ॥३९०॥ 390
मन्त्रिणस्तस्करा राज्ञी श्वपाकी श्वपचाः प्रियाः । किं न लोकोत्तरमभूद्भूपतेश्चक्रवर्मणः ॥३९१॥
कृतज्ञातार्तवाङ्कानि श्वपाकी स्वांशुकान्यदात् । तदाच्छादनहृष्टेच्छा मन्त्रिणः प्राविशन्सभाम् ॥३९२॥
कैश्चित्क्षितिभुजा वैरमङ्गीकृत्यापि तत्क्षणम् । यैर्नाशि श्वपचोच्छिष्टं तेभूवन्सोमपैः समाः ॥३९३॥
मण्डलेस्मिन्प्रभावोपा न देया व्यवसन्भुवम् । तद्देहमानि तदा नो चेच्छ्वपाकी प्राविशेत्कथम् ॥३९४॥
तां रणस्वामिनं द्रष्टुं तिलद्वादश्यहे गताम् । सामन्तेभ्यः साभिमाना नान्वयुर्डोम्बराः परम् ॥३९५॥ 395
राजकौटुम्ब्यवृत्तानां डोम्बानां निर्गता मुखात् । राज्ञामिवाज्ञा दुर्लङ्घ्या न केनाप्युबलङ्घ्यत ॥३९६॥
राज्ञा प्रदत्ते रङ्काय हेलुग्रामेमहारवत् । लिलेख पट्टोपाध्यायो न यदा दानपङ्क्तकम् ॥३९७॥
तदाक्षपटलं गत्वा रङ्कः कोपात्तमब्रवीत् । रङ्कस्स हेलु दिण्णेति दासीसुत न लिख्यते ॥३९८॥
लिलेख सोथ संत्रासाद्रङ्कभूभङ्गतर्जितः । को न राजनि दुर्वृत्ते भवेद्भीतिव्यतिक्रमः ॥३९९॥
अन्त्यागमनपापस्य पापः पृच्छन्स निष्कृतिम् । विटैर्ह्यस्यावहान्वेष प्रायश्चित्तानि कारितः ॥४००॥ 400
हिमेनैव हिमं शाम्येद्सुकृतेनैव दुष्कृतम् । सोनुशिष्टो विटैरेवं दधत्यामरसारताम् ॥४०१॥
पवित्रास्पर्शतोस्पृश्यास्पर्शपापं जिहीर्षुणा । तेनादूष्यत विप्रस्य वोचिन्मासोपवासिनः ॥४०२॥
ततोपि पापिनोभूवन्केपि तस्मिन्भगे द्विजाः । तस्माद्प्यमहारान्ये जगृहुर्गृहभोजिनः ॥४०३॥
चक्रे चक्रमठं सोपि पापः पाशुपताश्रयम् । तस्मिन्हतेर्धनिष्पत्रं गद्यधूर्यमयोजयत् ॥४०४॥
पूर्वोपकारान्विस्मृत्य ग्रामरान्त निरासनः । नृपतिः श्वपाकामी विश्वस्तांश्चक्रनाथयीत् ॥४०५॥ 405
हन्तुं व्याजेन विश्वस्ताः केचिद्ग्रामरतस्कराः । तस्युस्तस्यान्तिके द्रोहच्छिद्रानेहःप्रतीक्षिणः ॥४०६॥
श्वपाकीशयनावासासज्जावस्करमन्दिरे । शौचस्थितं तं निःशस्त्रं ते रात्रौ प्रापुरेकदा ॥४०७॥
अथ तैः प्राग्रसमयैरकस्मात्तस्य सर्वतः । क्षिप्रं न्यपात्यताशेषशातशस्त्रपरंपरा ॥४०८॥
क्षुप्रस्तटाङ्गदे भ्रष्ट इव निद्रालसेक्षणः । प्रबुद्धः शस्त्रपातैः स व्यमुञ्चद्भैरवान्रवान् ॥४०९॥
निःशस्त्रः शस्त्रमन्विष्यन्क्षरत्क्षतजनिर्झरः । अनुद्रुतोरिभिर्धावन्डम्ब्यावेदम विवेश तत् ॥४१०॥ 410
अप्राप्तेर्हेति क्रन्दन्त्या श्वपाक्यालिङ्गिताङ्गकम् । तस्कुचोत्सङ्गलग्नाङ्गं जघ्नुस्तेनुमविश्य तम् ॥४११॥
स्वैरेव प्रेरिता दारैस्ते तस्य नृपतेः किल । मुमूर्षोर्जानुनी स्वैरं शिलया समचूर्णयन् ॥४१२॥
त्रयोदशाब्दे ज्यैष्ठस्य शुक्लाष्टम्यां क्षपाक्षणे । श्वपाकभोग्यः स श्वेवावस्करे तस्करैर्हतः ॥४१३॥
उन्मत्तावन्तिनामाथ पार्थस्तनुर्दुराशयः । अभ्यषिच्यत वैधेयैः सचिवैः शार्वटाविभिः ॥४१४॥
श्वपाकीकामुके पापे निहते निशि तस्करैः । प्रजानां पाप्मना सोभूत्पापात्पापतरो नृपः ॥४१५॥ 415

३८९. [1]) A_2 gloss गणनार्थं गणनाधिपतिस्थानस्य अक्षपटलस्य अहले इति भाषया नाम चिट्टदेश इति केचित्. ३९२. [2]) A_2 gloss रङ्क. ३९५. [3]) A_2 gloss केवलं. ३९७. [4]) Thus corr. by later hand here and in following verse from A_1 हलु°. [5]) A_2 gloss रङ्कस्य हेलु. दत्ता. ३९९. [6]) Thus corr. by A_2 from A_1 के —. [7]) Thus corr. by A_2 from A_1 भवती°. ४०९. [8]) A_2 धधर्षापरमातरमित्यन्वाहार्षी. ४०४. [9]) Thus corr by A_2 from A_1 °वैरवो°, A_2 gloss मठं. ४१२. [10]) Thus A_1 G R Edd. शिलाया. ४१३. [11]) Thus G Edd.; A श्वेवस्कर.

स्थगिता तत्कथापापस्पर्शभीत्या सरस्वती । कथंचिच्चक्षुरभ्येव सेयं प्रस्थाप्यते मया ॥४१६॥
आसीत्पितृकुले तस्य भक्ष्यं दुर्नयराक्षसः । और्वाभिधस्य हव्याशविशेषस्येव जीवनम् ॥४१७॥
तस्यासंष्टक्राघातसटाटंकारकरोटिकाः । प्राणस्कन्दाविवाधश्चाः सभायां मुख्यमन्त्रिणः ॥४१८॥
तेमात्याधारणत्वेन निर्लज्जास्तमरञ्जयन् । कालान्तरेण तैरेव भूमिपालैर्भविष्यते ॥४१९॥
420 पर्वगुप्तोभवत्तस्य सर्वेभ्योप्यधिकं प्रियः । आस्थाने नर्तनं कुर्वन्नपाकृतकटीपटः ॥४२०॥
आ तन्त्रिविद्रवाद्वृद्धा कीटपायान्महीपतीन् । पर्वगुप्तः सर्वदाभुङ्क्ताज्यावाग्निकृतोद्यमः ॥४२१॥
तदा निगूढराज्येच्छः सख्यं मुख्यैः स मन्त्रिभिः । पीतकोशैः प्रविदधे पञ्चभिर्भूभटादिभिः ॥४२२॥
भूभटः शार्वटश्छोजः कुमुदः सोमृताकरः । पर्वगुप्तेन संबन्धं चक्रिरे कोशपीथिनः ॥४२३॥
गवाक्षासरसि प्राप्तश्रीजलोवागलद्विजः । संग्रामडामरगृहे यो रङ्कः ख्यातपौरुषः ॥४२४॥
425 पदातिमात्रो भूपेन दृष्टशौर्यः स संयुगे । महोदरो महाकायः प्रापितो मुख्यमन्त्रिताम् ॥४२५॥
यादृशी तेन ददृशे देवी श्रीः सरसोन्तरे । तादृग्रङ्कजयादेवीत्यभिधानेन निर्ममे ॥४२६॥
राज्यं निष्कण्टकं कृत्वा धूर्तेनापजिहीर्षुणा । प्रेरितः पर्वगुप्तेन भूभृत्चक्रे कुलक्षयम् ॥४२७॥
तेन लुण्टितसर्वस्वः पार्थस्तस्थौ कलत्रवान् । श्रीजयेन्द्रविहारान्तः श्रमणैर्दत्तभोजनः ॥४२८॥
शिशुत्रशंकरवर्मादीन्भ्रातॄन्द्वाराद्विरोध्य सः । तत्र स्थितानन्यदैरुत्क्रान्तासूनकारयत् ॥४२९॥
430 उद्यन् पितरं हन्तुं मन्त्रिणोनुमतप्रदान् । बद्धपट्टान्व्यधाद्रङ्कनिगडानितरानपि ॥४३०॥
एकदा मन्त्रिसामन्ततन्त्रिकायस्थसैनिकाः । पार्थं तदाज्ञामासाद्य निशायां पर्यवेष्टयन् ॥४३१॥
म्लानक्षीणाम्बरां पत्नीं रुद्धद्वारां निपात्य ते । आलिङ्गन्तमानां क्रन्दद्भिस्तर्णकैरिव दारकैः ॥४३२॥
केशानालम्ब्य कर्षन्तः शर्करोत्पाटिताङ्गकम् । विपन्नं गोकुलाद्यन्तमिव निर्हत्य तं गृहात् ॥४३३॥
क्षुत्क्षामरूक्षं क्रन्दन्तं निनग्नर्नग्नविग्रहम् । चण्डालाः इव निःशस्त्रं कुमुदाद्या नृपप्रियाः ॥४३४॥
435 पितरं निहतं श्रुत्वा राजा सजातकौतुकः । प्रातः स्वसचिवैः सार्धं गत्वा दृष्टोथ दृष्टवान् ॥४३५॥
अत्राङ्गेस्य प्रहारोयं महत्त इति वादिनः । तस्यामे राजपुरुषाः शशंसुर्निजविक्रमम् ॥४३६॥
न्यकृत्य स्वीकृतो राज्ञा तदा तद्रञ्जनोद्यतः । अचूचुदत्पर्वगुप्तो देवगुप्ताभिधं सुतम् ॥४३७॥
पार्थस्य निहतस्याङ्गे सोक्षिपत्क्षुरिकां ततः । रञ्जितो येन भूपालो जातहासोभवच्चिरम् ॥४३८॥
डामरैर्लुण्ठितो देशः प्रणाशे चक्रवर्मणः । उत्थाप्य पापान्कायस्थांस्तेन भूयोपि दण्डितः ॥४३९॥
440 संप्रेरितः कुमन्त्रिभिः शस्त्राभ्यासं चकार सः । पाटयन्क्षुरिकाघातैः कोटवीर्स्तनकोटरम् ॥४४०॥
गर्भिणीनां च जठरं गर्भान्द्रष्टुमपाटयत् । काठिन्यस्य परीक्षार्थमङ्गं कर्मकृतामपि ॥४४१॥
प्रतिग्रहमहाद्वेषाद्याद्या वधभयाद्विजाः । प्रत्यगृह्णन्नहारांस्तस्मादपि नृपाधमात् ॥४४२॥
क्रूरपापानुरूपेण क्षयरोगेण पार्थिवः । ततोनुबाध्यमानोभूदपर्यन्तव्यथातुरः ॥४४३॥
व्यथया तस्य तादृश्या प्रजा एव न केवलम् । तनुषुर्निजभुङ्क्तान्तमहिष्योपि चतुर्दश ॥४४४॥

---

४२६ 1) Thus corr by A, from A, तावद्रङ्क°. ४३२ 1) Thus corr by later hand from A, निपत्य. ४४०. 2) Thus corr. by later hand from A, कौदरी°. ४४२. 1) Thus corr. by later hand from A, द्विज

अथान्तःपुरदासीभिर्यः कृतश्चिदुपाहृतः । क्षितिपालात्यजातोयमिति प्रख्यापितो मृषा ॥४४५॥ 445
तं शिशुं भूरुवर्माख्यं विनिवेश्य नृपासने । हस्ते निक्षिप्य सामन्तसचिवैकाङ्कतन्त्रिणाम् ॥४४६॥
कम्पनाधिपतेर्बद्धद्वेषः कमलवर्धनात् । बिभ्यन्मडबराज्यस्थाद्रामरोस्पाटनक्षमात् ॥४४७॥
आसन्ननिरयप्राप्तिः[1] पितृहा पार्थिवाधमः । शुचौ पञ्चदशाब्दस्य प्रजापुण्यैः क्षयं ययौ ॥४४८॥ चक्रलकम् ॥
पितृघातिसुतो राजा जयस्वामिविरोचनम् । आषाढभुक्लसप्तम्यां शिशुर्बर्हुं विनिर्ययौ ॥४४९॥
नवा विरेजे राजश्रीर्बालस्य पृथिवीपतेः । कृपाणवेणिललिता छत्रत्रामरहासिनी ॥४५०॥ 450
अत्रान्तरे जवायातैश्चारैरावेदितभुतः । सामन्तैर्नगरोपान्तं प्राप्तः कमलवर्धनः ॥४५१॥
एकाङ्कतन्त्रिसामन्तस्यालहारुकसादिभिः । नगरं प्रविशन्भान्तः समं सैन्यैररुध्यत ॥४५२॥
विरुद्धडामरानीकान्युज्झा मार्गेषु निर्गतः । भ्रान्तोप्यसौ वैरिसेनामजयद्विक्रमोर्जितः ॥४५३॥
सहस्रमश्ववाराणां विद्राव्य तुरगैर्मितैः । राजधानीमसरुद्धः प्रविवेश ततः क्षणात् ॥४५४॥
तं लब्धजयमाकर्ण्य सैन्यैरस्यक्तं पलायितैः । एकाकिनं क्षाप्यनयज्जननी शिशुभूपतिम् ॥४५५॥ 455
प्राक्कर्मभिर्मोहिनो वा प्रेरितो वा कुमन्त्रिभिः । नाभूत्सिंहासनारूढो मूढः कमलवर्धनः ॥४५६॥
नदार्नां स्वगृहान्यातो राज्यकामोन्यवासरे । संपट्टयंस्तद्दिनान्सर्वानचूचुददमीनिधिन् ॥४५७॥
प्रौढं शक्तं च कुरुत क्षमापं कंचिन्स्वदेशनम् । सामेव कुर्युः सामर्थ्यादिति मूढः स चिन्तयन् ॥४५८॥
एकाकिनीं गृहः क्षीवां लब्ध्वा दुर्लभयोषितम् । अप्रौढोनुपभुज्यान्यदिने तूर्यार्धयेन यः ॥४५९॥
विभूतिं रभसावाप्तां यश्च संन्यज्य तत्क्षणम् । नीत्या कामयतेन्येषु शौच्यस्ताभ्यां परोस्तिकः ॥४६०॥ युग्मम् ॥ 460
अथोत्पलकुले चित्रे स्थूलकम्बलबाहिनः । अभूद्वीक्षनिभा विप्राः समगंसन गोकुले ॥४६१॥
धूमनिर्दग्धकूर्चानां राज्ञस्तांस्त्रिकीर्षताम् । राज्यव्यवस्थोपन्यासस्तेषां चिरमवर्धत ॥४६२॥
ब्रिमन्येन निधस्तेषां नान्यः कोप्यभ्यविच्यत । कूर्चा[1] भाषणभिक्षुभैः स्वकूर्चश्मश्रुवैनः परम ॥४६३॥
राज्यार्हान्वेषिभिर्विप्रैः प्राहुः स्वस्मृतिकूप्रये । अवार्यतेष्टकाघातैर्मुग्धः कमलवर्धनः ॥४६४॥
पञ्चषाणि दिनान्येय यावत्सम्पूर्णहिजातयः । काहलाकांस्यतालादिवाद्यकोलाहलाकुलम् ॥४६५॥ 465
उत्पताकध्वजच्छत्रशोभि युग्यार्पितासनम् । अशेषं पारिषद्यानां तावत्तत्रामिलद्बलम् ॥४६६॥ युग्मम् ॥
स्वपत्नीं बन्धकीभूतामिवान्यवशवर्तिनीम् । वीक्ष्य राजश्रियं शोचन्नासीत्कमलवर्धनः ॥४६७॥
पितृघातिनपूच्छत्रपुत्रराज्यार्थिनी ततः । प्राहिणोद्राजपुरुषान्पार्थे प्रायोपवेशिनाम ॥४६८॥
पिशाचकपुरग्रामे वीरदेवाभिधस्य यः । कुटुम्बिनः कामदेवनामा सूनुरजायत ॥४६९॥
स शिक्षिताक्षरो लब्ध्वा मेरुवर्धनमन्दिरे । बालाध्यापकतां स्वानशीलादिगुणभूषितः ॥४७०॥ 470
क्रमान्नरस्नाधिकार्यासीदथ तस्यात्मजः शनैः । लेभे नरस्नाधिकारित्वं राज्ञः शंकरवर्मणः ॥४७१॥

---

४४८ [1]) Thus corr. by A_3 from A_1 प्राप्ति. ४४९ [1]) Thus corr. by A_3 from A_1 अषाढे ४५२ [1]) आरे supplied by A_3. ४५७. [1]) Thus A_1, A_2 सपटरद्य ४५९ [1]) G *see mana* अप्रौढो नोपभुङ्क्तेन्यदिने तूर्यार्धयेन य ४६१ [1]) A_3 अर्धी-स्पल°.—[2]) A_3 gloss उत्पली नाम कन्यपाल तेन क्षिप्तः तत्र्यापि स्वर्याय निह्स्याभिचारक्रियया स्वकीयभ्रातु पुत्र अजितापीड राज्ये स्थापित । ततः प्रभृति कन्यपालकुलराज्य । उन्मत्तावन्तिपर्यन्त प्राप्य कन्यपालकुलस्य श्लेछ । अत एवोक्त । उत्पलकुले चित्रले इति । ४६३ [1]) Thus A_1, A_2 रुक्षमा° ४६४ [1]) A_3 प्राप्ते ४६६ [1]) नासनम् supplied by A_3 in space left by A_1

यः प्रभाकरदेवोपि सुगन्धाख्यब्रकामुकः । लक्ष्म्या सरस्वतीद्वेषादेशविप्रवतोथ वा ॥४७२॥
विद्यान्यशास्करो नाम तत्पुत्रोत्यन्तदुर्गतः । सख्या फल्गुणकाख्येन समं देशान्तरं गतः ॥४७३॥
सुस्वप्नदर्शनैः पीडदेव्याशीर्भिश्च हर्षुलः । तस्मिन्पसङ्गे सोत्साहः प्रत्यावृत्तो निजां भुवम् ॥४७४॥
पितृघातिवधूवृत्तैर्यातैर्बोधयितुं द्विजान् । मध्ये गृहीतो वाग्मित्वात्पविवेश तदान्तिकम् ॥४७५॥ कुलकम ॥
दृष्ट्वैव तं दैववशादेकमत्यस्पृशो द्विजाः । ध्वनिं राजायमेवास्त्विस्युच्चकैरुदचारयन् ॥४७६॥
अथाभ्यषिच्यत क्षिप्रं विप्रैरेस्य यशस्करः । क्ष्माधृतिपीढसामर्थ्यः सानुमानिव सोयदैः ॥४७७॥
दग्धं वेणुवनं परस्परमहासंघर्षजेनाग्निना तन्मूलोद्धृतिरम्भसा क्षणधृतोकेकेन संपादिता ।
वात्यावेगविपाटितं विटपिनं प्राग्रं कुतश्चिद्दृढां रूढिं नेतुमहो महाद्रिकुहरे धात्रा न किं सूचितम् ॥४७८॥
भृत्यप्रेरणया वंशं पार्थजः स्वं न चेद्धरेत् । तत्पुत्रोत्पाटनं कुर्यान्न चेत्कमलवर्धनः ॥४७९॥
अनुब्धकुलजातस्यं दरिद्रस्यातः क्षितिम् । तद्यशास्करदेवस्य राज्यप्राप्तिः कथं भवेत् ॥४८०॥
पद्भ्यां व्रजन्शिरनुगो दृदृशे जनेन यस्तत्क्षणं निखिललोकसमानमूर्तिः ।
साम्राज्यरम्यममुमीक्षितुमास्त नारीवृन्दैरजस्तत्रकितो नरनाथमार्गः ॥४८१॥
नृपतिवसति प्रत्यागच्छन्यशास्करभूपतिः पुरमृगदृशामाशीर्मध्ये वचोपि विवक्षितम् ।
स्तिमितवलिताषाङ्गं शृण्वन्निमीलदहंकृतिः कृतपरिकरस्तज्जैर्जज्ञे प्रजापरिपालने ॥४८२॥
प्रतिमितरविदीपोद्भासिभुभ्रातपत्रप्रचयरजतपात्रासुत्रितारात्रिकाभीः ।
अथ मुखरितमाशीर्मङ्गलैरङ्गनानामवनिहरिणधामा राजधामं पपेदे ॥४८३॥

इति श्रीकादमीरिकमहामात्यचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां पञ्चमस्तरङ्गः ।
त्र्यधिकायां सप्ताशीतौ प्राप्तेषु च चतुर्थवंशगत् । कल्यपालाष्टकं रथ्याहतस्त्रीसाचिवा अपि ॥

---

४७२ [1] Thus A$_2$; A, °नां गत ४७७ [1]) A$_3$ gloss क्ष्माया भूमे धृति धारणं तस्मिन् प्रौढं सामर्थ्यं यस्य स ४७८ [1]) is supplied by A$_3$.—[2]) A, दैवेन किं सूचितमित्यादर्शान्तरे पाठ ४८०. [1]) A, gloss नीचकुलोत्पन्नस्य ४८१ [1]) Thus A$_3$; A$_1$ °कीर्ति. ४८३ [1]) A$_3$ glosses अवनी भूमी हरिणधामा चन्द्र· and राजासन

॥ षष्ठस्तरङ्गः ॥

नेदं पर्णसमीरणाशनतपोमाहात्म्यमुग्रोरगौ पश्यैतावत एव संप्रति कृतौ तन्मात्रवृत्ती[1] बहिः ।
प्रेम्णैवार्धमिदं चराचरगुरोः प्रापेयमात्मस्तुतीरेवं देववधूमुखाच्छ्रुतिसुखाः भृण्वन्त्यपर्णावतात् ॥१॥
इच्छन्नलङ्घनीयत्वमथ कक्ष्यां विलङ्घयन् । प्रतीहारान्निजा दूरं वार्यन्तामिति सोन्वशात् ॥२॥
वेत्रिविक्षास्यमानांस्तु तान्कृताञ्जलिरब्रवीत् । राज्यप्रदाश्च पूज्याश्च यूयं नो दैवतैः समाः ॥३॥
राज्यदानाभिमानेन वर्तिष्यत मदोद्धताः । यत्कार्यकालादन्यत्र नागन्तव्यं मदन्तिकम् ॥४॥
तदाकर्ण्याखिलो लोकस्तमधृष्यममन्यत । व्यस्मरत्सहसंवाससंभृतमपि लाघवम् ॥५॥
खिलीभूताः पूर्वराजव्यवस्थाः प्रतिभाबलात् । उज्जीवान्स सुकविः प्राक्तविप्रक्रिया इव ॥६॥
अचौराभूत्तथा भूमिर्यथा रात्रौ वणिक्पथाः । अतिष्ठन्विवृतद्वारा मार्गाश्चाविग्नितध्वगाः ॥७॥
प्रत्यवेक्षापरे तस्मिन्नासीत्सर्वोपहारिणाम् । कृष्यध्यक्षत्वमुत्सृज्य कृत्यं नान्यन्नियोगिनाम् ॥८॥
ग्राम्याः कृषिपराधीना नापश्यन्नाजमन्दिरम् । विप्राः स्वाध्यायसंसक्ता नाकुर्वञ्श्रुवधारणम् ॥९॥
न विप्रगुरवः साम गायन्तो मदिरां पपुः । न तापसाः पुत्रदारपशुधान्यान्यदौकयन् ॥१०॥
न मूर्खगुरवो मत्स्यापूपयागविघायिनः । चक्रिरे स्वकृतैर्मन्त्रैस्तर्कागमपरीक्षणम् ॥११॥
नाद्रियन्त च गेहिन्यो गुरुरक्षेत्यदेवताः । कुर्वाणा भर्तृशीलज्ञनिषेधं मूर्धधूननैः ॥१२॥
कार्तान्तिको भिषक्सभ्यो गुरुर्मन्त्री पुरोहितः । दूतः स्थेयो लेखको वा न तदाभूदपण्डितः ॥१३॥
प्रायोपवेशाधिकृतैर्बोधितेन महीभृता । प्रायोपविष्टो निकटं प्रापितः कश्चिदब्रवीत् ॥१४॥
अहमाढ्योभवं पूर्वं वास्तव्योत्र महीपते । निष्किंचनत्वं शनकैरगच्छं दैवयोगतः ॥१५॥
उत्तमर्णैः पीडितस्य प्रवृद्धस्य तस्य मे । निश्वयीभूतृणं क्रित्वा परिभ्रान्तुं दिगन्तरे ॥१६॥
अथ विक्रीय सर्वस्वमृणं शोधयता मया । महाधनाय वणिजे विक्रीतं निजमन्दिरम् ॥१७॥
भार्यामुद्दिश्य भर्तव्यामेक एव तु वर्जितः । सोपानकूपो विक्रीतान्महतो वेश्मनस्ततः ॥१८॥
निदाघे पुष्पताम्बूलीपर्णाद्यत्रातिशीतले । न्यस्यद्भिर्मालिकैर्दत्तात्सा जीवेद्गाटकादिति ॥१९॥
ततो दिगन्तराद्भान्त्वा विंशत्या वत्सरैरहम् । लब्धोत्पवित्तः संप्राप्तो जन्मभूमिमिमां पुनः ॥२०॥
अन्विष्यता मया साध्वी स्वबधूर्दृष्टेयं सा । विवर्णदेहा जीवन्ती प्रेष्यत्वेनान्यवेश्मसु ॥२१॥
किं दत्तजीविकापि त्वमीदृशीं वृत्तिमाश्रिता । मयेति सा सदुःखेन पृष्टा स्वोदन्तमब्रवीत् ॥२२॥

---

१ [1]) A_3 gloss पर्णतानजीवनौ.—[2]) A gloss एतौ चराचरगुरुणा बत्रि कृतौ इत्यन्वय —[1]) Thus A_1, A_3 °सुखाच्छृण्व° १२ [1]) Thus corr by later hand from A_1 मूर्खा गु°. १३ [1]) A_3 gloss विवादपरिनिर्णेता स्थेय १४. [1]) A_3 gloss मृतावत्र शने प्रायो बाहुल्ये सदृशे त्रिषु इति कोष. १९. [1]) A_3 gloss पोप्पिक्के —[2]) A_1 gloss भाटी इति भाषया । प्रत्यह वेतन भाटी.

सोपानकूपं संप्राप्य त्वयि याते दिगन्तरम् । लगुडैस्ताडयित्वाहं वणिजा तेन वारिता ॥२३॥
तदन्या कान्त मे वृत्तिरित्युक्त्वा विरराम सा । तदाकर्ण्य निमग्नोहमन्तरे शोककोपयोः ॥२४॥
कृतप्रायोपवेशोथ स्थेयैस्तैस्तैः पदे पदे । प्रत्यर्थिनो दत्तजयैः किमप्यस्मि पराजितः ॥२५॥
जडत्वाद्देहि न न्यायं न विक्रीतो मया पुनः । सोपानकूप इत्यस्मिन्नर्थे प्राणा इमे पणः ॥२६॥
सोहं विपद्ये क्षीणार्थो द्वारि शास्तुस्तव ध्रुवम् । वृजिनादस्ति चेद्वीतिर्वस्तु निर्णीयतां स्वयम् ॥२७॥
राजेति तेन विज्ञप्तो दत्त्वा धर्मासनं स्वयम् । संघट्य्याखिलान्स्थेयानासीत्तत्त्वं विचारयन् ॥२८॥
स्थेयास्तमूचुर्बहुशो विचार्यायं पराजितः । शाठ्यादगणयन्न्यायं दण्डो लिखितदूषकः ॥२९॥
सोपानकूपसहितं विक्रीतं गृह्यतामिति । राजा विक्रयपत्रस्थान्स्वयं वर्णानवाचयत् ॥३०॥
ततोधिगतमित्येष सभ्येषु निगदत्स्वपि । अन्तरात्मा जगादेव नृपतेरर्थिनो जयम् ॥३१॥
मुहूर्तमिव संचिन्त्य राजान्याभिरभूधिरम् । कथाभिरतिचित्राभिर्मोहयन्सभ्यमण्डलम् ॥३२॥
कथान्तराले सर्वेभ्यो गृह्णन्नामानि वीक्षितुम् । हसन्प्रत्यर्थिनो हस्तादुपादत्ताङ्गुलीयकम् ॥३३॥
क्षणादेवाखिलैः स्थेयमित्यमेवेति सस्मितम् । वचो ब्रुवाणः प्रययौ पादक्षालनकैतवात् ॥३४॥
अभिज्ञानाय तत्रस्थः स वितीर्याङ्गुलीयकम् । भृत्यमेकं वणिग्वेदम ग्राहिणोत्तत्त्ववाचिकम् ॥३५॥
स वणिग्गणनाध्यक्षं ययौ चेत्साङ्गुलीयकः । यत्राब्दे पत्रमुत्पन्नं गणनापत्रिकां ततः ॥३६॥
निर्णयेद्य तया कृत्यमस्ति भाण्डपतेरिति । श्रुत्वादाद्गणनाध्यक्षस्तां गृहीत्वाङ्गुलीयकः ॥३७॥
दीनाराणां दशशतीं तस्यां भूभृदवाचयत् । व्ययमध्येधिकरणलेखकाय समर्पिताम् ॥३८॥
तस्मै मित्रधनाहार्य बहुभृत्यार्पणाक्षमः । रेफें सकारं वणिजा कारितं निश्चिकाय सः ॥३९॥
सभायां तत्पदर्शयित्वा पृष्ट्वा दत्त्वाभयं च नम् । आनीय लेखकं सभ्यान्संजातप्रत्ययान्व्यधात् ॥४०॥
सभ्यैरभ्यर्च्यमानेन राज्ञा सार्थं वणिग्गृहम् । वितीर्णमर्थिने देशान्त्यर्थी च प्रवासितः ॥४१॥
कृताह्निकं भोक्तुकामं तं दिनान्ते च भूपतिम् । अकालानेदनाद्भिन्नक्षत्ता जातु व्यजिज्ञपत् ॥४२॥
देवः समाप्तकृत्योद्य विज्ञप्तो भ्रातृवः क्षणः । इत्युक्तो दर्शने प्राणत्यागी विप्रो बहिः स्थितः ॥४३॥
दत्तप्रवेशादादेशोथ रुद्धसूदेन भूभुजा । द्विजः प्रविष्टः पृष्टश्च तीव्रार्तीरेदमब्रवीत् ॥४४॥
सुवर्णरूपकशतं भ्रान्त्वा देशान्तरोर्जितम् । गृहीत्वा श्रुतसौराज्यः स्वदेशमहमागतः ॥४५॥
त्वयि राजनि निश्चौरेरध्वभिर्विशतः सुखम् । द्योभवद्भुवर्णात्मे मे दिनान्ते श्राम्यतः स्थितिः ॥४६॥
दीर्घाध्वलङ्घनक्लान्तस्तवाहमकुतोभयः । मार्गाराममरोर्मूले त्रियामामत्यवाहयम् ॥४७॥
वेतनं ग्रन्थिबद्धं तदुत्थास्नोरपतन्मम । अरण्ये समीपस्थे कक्षयोगाढलक्षिते ॥४८॥

---

२८ [1]) Thus A (+has *see manu* the conjectural reading गत्वा ३४ [1]) Thus A_0, A 'दिवा' ३६. [1]) A_2 gloss गणत वनुर इति भाषया वही इति मध्यदेशीया ३८ [1]) A_2 gloss दीनारा द्वार इति कश्मीरभाषया — [2]) A, gloss तत्साम्प्रभौ अर्थिप्रत्यर्थिनावुभौ भूमं कबविक्रय कुरुत । यत्र चावस्तरमानं क्रियते सोधिकरणलेखक । अवस्तरपरिमाणलेखपत्रकारी सराफ इति भाषया ३९ [1]) A_2 gloss अधिकरणलेखकाय दीनारदशशतीदानात — [2]) A_2 gloss गृहविक्रयिणा वणिजा विक्रयपत्रे लिखित । सोपानकूपसहित विक्रीत मूर्मिति । ततस्तेन दुर्बोध वणिजा प्रत्यर्थिना रेफविषये सकार कारित अधिकरणलेखकहस्तत । उत्कोच दीनारदशशत्याख्य दत्त्वा कूपसहित गृह विक्रीतमिति लेखित । ततोनन्तरं राज्ञानुमितं लेखपत्रवाचनार्थं किमर्थं दीनारदशशती । बहुमूल्यत्वादिति । रेफस्य सकार एव कृतोनेन इति ॥ ४१ [1]) A, gloss विज्ञप्तिकराय ४२. [1]) A, gloss हास्य ४४ [1]) Thus corr. by later hand from A, पृष्टश्च ४८ [1]) Thus corr. by A_3 from A_1 'लङ्घि

तस्मिन्दुरवरोहेतिनिर्वक्तुत्वाज्जहद्वपुः । सोहं हारितसर्वस्वः शोचन्नुद्धिरं जनैः ॥४९॥
एकोध्यवसितः कोपि साहसैः पुरुषोब्रवीत् । मह्यं दापितवित्तायं किं ददासीति मां ततः ॥५०॥ 50
तमस्यत्रोचं विवशस्तस्यार्थस्यास्मि कः प्रभुः । तुभ्यं यद्रोचते मह्यं तत्ततो दीयतां त्वया ॥५१॥
अवरुह्याधिरूढोथ रूपकेभ्यो हयं मम । स प्रादात्स्पष्टमेवाष्टानवतिं स्वीचकार तु ॥५२॥
व्यवहारा वचोनिष्ठा एव राज्ञि यशस्करे । निन्दन्व्यवस्थां तां लोकैर्न्यकृतोस्मीति वादिभिः ॥५३॥
उपचारोक्तिसारत्वंच्छलहारितचेतनः । सोहं जहाम्यसुन्द्वारे दुर्व्यवस्थापकस्य ते ॥५४॥
पुंसस्तस्य स राज्ञाथ पृष्टः प्रकृतिनामनी । वदनप्रत्यभिज्ञैव ममास्तीत्यभ्यभाषत ॥५५॥ 55
प्राप्तस्तवेप्सितावाप्तिं करिष्यामीति भूभुजा । प्रतिज्ञाय कथंचित्स स्वपार्श्वे कारितोशनम् ॥५६॥
लवणोत्सौकसां दुताहूतानां स विशां ततः । स्थितमन्तर्द्विजोन्येद्युस्तं राज्ञेदर्शयच्छरम् ॥५७॥
पृष्टः स राज्ञा विप्रेण यथैवोक्तं तथैव तत् । सर्वमूचे वाक्प्रतिष्ठं व्यवहारमुदीरयन् ॥५८॥
सत्यवाक्पारतन्त्र्यस्य वस्तुवृत्तस्य चान्तरम् । अलक्षयन्तः प्रैक्षन्त दोलाकुलधियो धराम् ॥५९॥
धर्मासनस्थो राजाथ रूपकाणामभाषत । तमष्टानवतेः पात्रं विप्रमन्यं हयस्य तु ॥६०॥ 60
अन्योक्तकृच्छ्रगादापि दुःसंचिन्त्या महात्मनः । धर्मस्याधर्ममुद्वृत्तं निहन्तुं धावतो गतिः ॥६१॥
सायं हुताशं प्रविशन्नम्मयं चेन्दुमण्डलम् । स्वतेजसा संविभजन्प्रदीपैर्ज्योत्स्नयाप्यसौ ॥६२॥
तदुत्थाव यथा भानुर्निहन्ति ध्वान्तमुद्धतम् । अनन्यकर्मा धर्मोयं तथाधर्मं व्यपोहति ॥६३॥ युग्मम् ॥
दुःसंलक्ष्यस्तु धर्मोसावधर्मं बाधतेञ्जसा । तिष्ठन्नित्यमधिष्ठाय दाहं काष्ठमिवानलः ॥६४॥
ददाति यद्ववान्दत्तां तदित्याद्युक्तमुज्झतः । तुभ्यं रोचत इत्यादि वचोस्य निसृतं तदा ॥६५॥ 65
रुचितास्य बभूवाष्टानवतिर्लोभिनोस्य ताम् । नादादस्मायरुचितं रूपकाणां हयं ददन् ॥६६॥
इत्यादिसूक्ष्मेक्षिकया धर्माधर्मान्तरं विदन् । प्रत्यवेक्षापरः क्ष्माभृद्व्यधात्कृतयुगोदयम् ॥६७॥
इत्थं जनं स विनयन्हास्योभूज्जिदुर्नयैः । परस्योपदिशन्पथ्यमपथ्याशीव रोगहृत् ॥६८॥
श्रोत्रियेणैव तेनापि मूढम्भःशौचशालिना । डोम्बोच्छिष्टभुजो भृत्याः पार्श्वान्न परिजहिरे ॥६९॥
यथोक्तसंश्रितार्थैरन्योन्यं पृष्टपातिभिः । नगराधिकृतैश्चक्रे चतुर्भिः सोयसंग्रहम् ॥७०॥ 70
लेभिरे निधनं तस्मात्सत्यंकारात्पदातयः । श्रीरणेभ्यश्चपीडामन्यस्तखड्गादपि प्रभोः ॥७१॥
स ज्येष्ठे भ्रातरि मृते तथाभून्मुदितश्चिरम् । तदुपज्ञं यथा प्राज्ञैस्तत्रोत्प्रेक्षि रसार्पणम् ॥७२॥
नीतस्य मण्डलेशत्वं वेलावित्तस्य भूभुजा । देवीः कामयमानस्य चक्रे गजनिमीलिकां ॥७३॥
रागाच्छुद्धान्तकान्तानां मूर्धानमधिरोपिता । लक्ष्मा नामाभवत्तस्य वेश्या वैवश्यकारिणी ॥७४॥

---

५०. [1]) Thus A_1, A_2 °सौ.—[2]) A_2 दापितलब्धाय ५३. [1]) A_2 gloss वचसि वाक्य एव निष्ठा यथा। न तु न्यायविचारणे इति व्यवस्थां निन्दन्. ५४. [1]) Thus corr by later hand from A_1 °सारन्येच्छ°. ५५ [1]) A_2 gloss वदनमेव केवल तदीय विदितं मम न तु नाममकृती इत्यर्थ. ६२ [1]) A_2 gloss भाप्तं ६४ [1]) Thus corr by A_2 from A_1 तिष्ठन्निहम°. ६९. [1]) Thus A_1, A_2 °त्रैव —[2]) Thus corr by A_2 from A_1 °भृत्यान्पा ७० [1]) A_2 gloss हहसभिभि —[2]) Thus corr by A_2 from A_1 सोयस°. ७२. [1]) Thus A_2, A_1 °भुदुदित° —[2]) Thus corr by A_2 from A_1 तदुपज्ञं, Edd ज्ञैर्यथा.—[3]) Emended, \ R G °त्प्रेक्षि —[4]) A_2 gloss भुव. ७३ [1]) A_2 gloss एतन्नामकसचिवस्व, एतन्नामक struck out again.—[2]) A_2 gloss उपक्षा कृता इत्यर्थ.

अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् । इतीव विहितौ धात्रा सुवृत्तौ तद्बहिः कुचौ ॥७५॥
उत्तमाधमसंसक्तौ जानन्सदृशवृत्तिताम् । नारीणां शुचिबाह्यानामङ्गनात्वं व्यधाद्विधिः ॥७६॥
सा लालितापि राज्ञा यद्बलाच्छा ललितलोचना । चण्डालयामिकैनागाद्यामिनीषु समागमम् ॥७७॥ युग्मम् ॥
सुभगंकरणं किंचिच्चण्डालतरुणेभवत् । तं यत्प्रभावविवशा भेजे राजवधूरपि ॥७८॥
सा वा चण्डालकुलजा स वा कार्मणकर्मवित् । अन्यथा संगमः किं स्यादसंभाव्यस्तथाविधः ॥७९॥
सोभूत्तेन प्रकारेण तया सह समागतः । इत्येष लेभे वृत्तान्तः प्रतिभेदं न कुत्रचित् ॥८०॥
केवलं प्रत्यभात्तादृक्षापिनोः प्रेम तत्तयोः । दृग्व्यापारेक्षणात्क्षिप्रं हार्दिनाम्नोधिकारिणः ॥८१॥
तमर्थमथ तत्थेन वीक्ष्य प्रणिधिभिर्नृपः । प्रायश्चित्तानुचरणक्षामः कृष्णाजिनं दधौ ॥८२॥
कुपितोपि स यत्नेनां न्यवधीद्रागमोहितः । तेनैवागात्पुरोभागिवितर्कार्तङ्कपात्रताम् ॥८३॥
डोम्बोच्छिष्टानुगसङ्गादभुचित्वं यशस्करे । संक्रान्तं कुक्षिसंस्पर्शात्कुष्ठं दुःखमिवाभवत् ॥८४॥
सामान्येन सता कैश्चित्सदृशैः शुभकर्मभिः । जन्मान्तरीयैः साम्राज्यं मया प्रापीति चिन्तयन् ॥८५॥
साम्राज्यकामो नृपतिर्भोविष्वपि स जन्मसु । युक्तया प्राक्चिरातङ्कां राज्यलक्ष्मीं द्विजन्मने ॥८६॥
भूभुजा दानशौण्डेन पैतृके स्थण्डिले कृतैः । छात्राणामार्यदेवीयानां तेन विद्यार्थिनां मठः ॥८७॥
मठाधिपत्ये तत्र छत्रचामरहासिनीम् । स नरेन्द्रश्रियं प्रादाद्गुरुन्तःपुरवर्जिताम् ॥८८॥
वितस्तापुलिने राजा नानोपकरणान्वितान् । ब्राह्मणेभ्यः सोपहारान्पञ्चपञ्चाशतं ददौ ॥८९॥
अथ जानोदरव्याधिमज्ञातो नाथमित्यसौ । जानन्संग्रामदेवाख्यं परिवव्रे निजात्मजम् ॥९०॥
समर्प्य सचिवैकाङ्गसामन्तानभ्यषेचयत् । रामदेवात्मजं राज्ये वर्णटं प्रणितुर्व्रतम् ॥९१॥
शक्ये राज्यादपाकर्तुं शिशावनभिषेचिते । निराशाः समपद्यन्त तदा राज्यजिहीर्षवः ॥९२॥
स पर्वगुप्तकौटिल्यप्रयुक्तैरुदयेन्मुखैः । विषाककालसदृशैर्व्याप्तं भङ्गैरिवाभवत् ॥९३॥
राजधानीस्थितस्यापि वर्णटो राज्यदायिनः । आरोग्यवार्तयाप्यासीन्मुमुर्षोरनिरीक्षकः ॥९४॥
ततः सानुशयो राजा तान्यन्यैर्यत मन्त्रिभिः । राज्यं संग्रामदेवाय दातुमाश्वासकारिभिः ॥९५॥
राजाज्ञया निशामेकां बद्धोष्टस्तम्भमण्डपात् । बहिर्दत्तार्गलात्प्रातर्वर्णटो निरवर्त्स्यत ॥९६॥
मयाप्यजागराद्यापि तद्भृत्यानां विवेकिनाम् । आस्थानमण्डपे प्राप पायुक्षालनभूमितां ॥९७॥
एकाहराजपुरुषस्तंदासि विजयेश्वरे । व्रीडाद्देवप्रसादाख्यो राजवीजी समर्पयत् ॥९८॥
अथाभिषिच्य संग्रामदेवं तीव्रीभवद्व्यथः । स राजधान्या निर्गत्य मर्तुं निजमठं ययौ ॥९९॥
धीः केशश्मश्रुवपने शिरःशाटकवर्जनम् । काषायग्रहणोद्वेगः शस्त्रत्यागग्रहश्च यः ॥१००॥
राजभृत्यैः प्रतिज्ञातः स तस्मिन्निश्चितक्षये । जीवत्येव कृतश्रद्धव्यङ्गैः परिवर्जितः ॥१०१॥ युग्मम् ॥

७५ [1]) Thus corr. by A_1, reading of A_1 illegible, A_3 in margin °ङ्गनाख्यां ७७ [1]) A_2 gloss प्रहरजागरूकेण ७९ [1]) A_3 gloss वशीकरण —[2]) Thus corr. by A_3 from A_1 सम्भव. ८१ [1]) Thus corr. by A_1 from A_1 °भार्याङ्. ८३ [1]) A_1 °न्यवधीद्रा° ८६ [1]) Thus A_3, A_1 °कामपि नृपो भा°. ८७ [1]) Thus A_3, A_1 स्थित.—[2]) Thus corr. by A_1 from A_1 'देशानां ८८ [1]) Thus A_3, A_1 नरेन्द्राभिधां. ८९. [1]) A_1 gloss काष्ठलतीर्थविषये यशस्करस्यामद्वारा अभयलिङ्गाह्वाका.. ९० [1]) Thus corr by A_3 from A_1 नृपा° ९३. [1]) Thus corr. by A_3 from A_1 विषाकपाकान्त° ९५ [1]) Thus corr by A_3 from A_1 °दयस्य ९६ [1]) Thus A_1, A_3 निरवास्यत, perhaps to be emended निरवर्त्स्यत. ९८ [1]) A_3 gloss एकाह राजभुनस्य वर्णटस्य पुरुषो भृत्य.

द्वे सहस्रे सुवर्णस्य सार्धे बद्ध्वा पटाञ्चले । यो निर्जगाम राजासौ मुमूर्षुर्भिन्नमन्दिरात् ॥१०२॥
पञ्चभिः पर्वगुप्ताथैर्यौतकं तस्य मन्त्रिभिः । हृतं सजीवितस्यैव विभक्तान्योन्यमप्रतः ॥१०३॥ युग्मम् ॥
विवेष्टमानः शय्यायां व्याधिदग्धान्तरो नृपः । निष्ठन्मडाङ्गनकुटीगर्भे ध्वान्तान्धकारिते ॥१०४॥
अजातसंविड्डशोषे पश्यन्द्रोहपरान्निजान् । प्राणेरहानि द्वित्राणि न यदा निरमुच्यत ॥१०५॥ 105
तदा सुहृद्बन्धुभृत्यवेलाविलैः कृतत्वरैः । जिह्मैर्पुभिश्च साम्राज्यं विषं दत्त्वा विपादितः ॥१०६॥
अवरोधवधूमध्यात्सती तं पतिमन्वगात् । एका त्रैलोक्यैदव्येव स्वप्रभेव विरोचनम् ॥१०७॥
वर्णाश्रमप्रत्यवेक्षाबद्धकक्ष्यः क्षितीश्वरः । चक्राभान्वर्भिर्यं चक्रे मलक्रें द्विजतापसम् ॥१०८॥
कृतत्याचारमालोक्य राजा धर्मवशंवदः । निजग्राह श्रपादेन ललाटतटमङ्कयन् ॥१०९॥
तन्मातुलेन तद्रोग्राहीरनाथेन योगिना । सांधिविग्रहिकेणार्थं स स्वेनैव न्यगृह्यत ॥११०॥ 110
पूर्वाचार्यप्रभावेण स्वमाहात्म्याधिरोपणम् । परख्यापयद्भिर्गुरुभिः श्रद्धयेति यदुच्यते ॥१११॥
तत्रयापित्रैव सम्राहात्स विपन्न इति श्रुतिः । दीक्ष्याव्याहते तस्मिन्नुपपत्तिः कथ भवेत् ॥११२॥
अथामयान्तरेवाभूत्सा वार्तेन्युच्यते यदि । वर्णदाश्चभिशापोपि तदायात्वत्र हेतुताम् ॥११३॥
भुक्तेश्वर्यो नवं समाश्वत्पृथिवीं स हायने । मासि भाद्रपदे कृष्णतृतीयस्यां व्यपद्यत ॥११४॥
पितामही शिशोर्गोप्त्रीं विनिवेश्य नृपासने । मुख्यटाद्यैः समं प्रार्भूत्पर्वगुप्तेर्थ पञ्चभिः ॥११५॥ 115
क्रमान्तसमं पितामहा तान्व्यापोथेतरान्बली । एकः स एवमाक्रान्तः प्रबभूव नृपास्पदे ॥११६॥
स पार्थिवत्वमात्मन्वमिश्रया चेष्टया स्फुरन् । राजा राजानकेनेति मिश्रामेवं श्रियं व्यधात् ॥११७॥
सेवमानः स्वयं बालभूप भोज्यार्पणादिभिः । ऋजूनां प्रत्यभात्पर्वगुप्तो द्रोहवहिष्कृतः ॥११८॥
यान्द्रोहभीरूनभाव्य संविभेजे यशस्करः । तस्य तत्तनयोच्छेदे त एवासन्वयोजकाः ॥११९॥
करभाङ्नरुहापिङ्गे इमश्रुणि क्षितिपालवत् । स ददौ कुडुमालेप वर्णः शाङ्वलविस्तृते ॥१२०॥ 120
बिभ्यदेकाङ्गसंघातात्यकटोत्पाटनाक्षमः । प्रमापणाय प्रायुङ्क्त शिशोः कर्माभिचारिकम् ॥१२१॥
न्याय्यं ते सान्वयस्यास्ति राज्यं चैत्रादिवासरे । अन्यथाचरतो नाशः क्षिप्रं वंशायुषोर्भवेत् ॥१२२॥
इतीमामपि याभिन्यां श्रुत्वान्भूतभारतीम् । अभिचारस्य वन्यत्वं निर्व्यायाधिकशङ्कितः ॥१२३॥
एकाङ्गेभ्यो विभिन्नेभ्यो भिन्यदुद्विग्नसंभ्रमः । उदतामत्तथा चिन्तालुप्तसंविहितानिशम् ॥१२४॥
यथा महाहिमापातनिःसंचारजने दिने । अकस्मात्संभृतबलो राजधानीं निरुद्धवान् ॥१२५॥ 125
विरोधकारिणं बुद्धाभिधेन सह सूनुना । निर्द्रोहमाहवे हत्वा मन्त्रिणं रामवर्धनम् ॥१२६॥

---

१०२. [1]) Thus corr by later hand from A_1 बद्ध्वा १०४ [1]) A_1 gloss, partly effaced चक्र जन . क्रक्षा . चक्रमेल .. वे . १०९ [1]) A_1 gloss अतिक्रान्ताचारम ११० [1]) A_1 gloss चक्रभानुद्विजमालुलेन —[2]) A_1 gloss सान्धिविग्रहिकस्य-क्रान्तमुख्यक सांधिकारी सान्धिविग्रहिकः कटकपाल ११४ [1]) न्न supplied by A_1 in space left by A_1. ११५ [1]) A_1 gloss सद्भावेवस्य — [2]) A_1 gloss प्रमुरभूत. ११६. [1]) Emended with G Edd , A_1 एव साङ्क्रान्ति which A_1 alters to एवमाक्रान्ति. ११७ [1]) Thus A_2, , A_1 स्फुरन् —[2]) A_1 gloss राजा पार्थिव राजानक मन्त्री । राज्ञ अन प्राणन । जीवन धारित्रारक्षणलक्षण। यस्मात्स राजान अनभसप्राणने । राजान एव राजानक । स्वार्थे क यद्वा अत्र लिङ्गात् । क सादृश्य देवदत्त इव देवदत्तक इतिवत् । यथा प्राणन विना देहस्थितिर्नास्ति । तथा धारयित्रे मन्त्रिणं विना पार्थिवाना स्वय कार्याकार्यविवेककौशलातिशयो न सम्भवीति । राजानेकमपेक्षते राजा ॥ यद्वा राज्ञ अन प्राण इव राजानक इत्यर्थ ॥

पित्र्येण वेलावित्तेन प्राभृतार्थमुपाहृताम् । गले पुष्पस्रजं बद्ध्वा पातितं पार्थिवासनात् ॥१२७॥
स तं वक्षाद्विसंग्रामं हतमन्यत्र मन्दिरे । पातयित्वा वितस्तान्तः कण्ठबद्धशिलं निशि ॥१२८॥
चतुर्विंशस्य वर्षस्य दशम्यां कृष्णफाल्गुणे । पापः सखड्गकवचो न्यविक्षत नृपासने ॥१२९॥ चक्रलकम् ॥
पारेविशोकं दिविराज्ञातस्याभिनवाभिधात् । सूनुः संग्रामगुप्तस्य स तदा पार्थिवोऽभवत् ॥१३०॥
केचित्तं प्रत्यवस्थानं ये पुरा प्रतिजज्ञिरे । ते सर्व एव तद्भीताः प्रातरेव प्रणेमिरे ॥१३१॥
पार्थिवैकाङ्गसामन्तमन्त्रिकायस्थतन्त्रिणाम् । तद्भीत्या द्रोहवृत्तीनां द्रोहाद्वैतमदृश्यत ॥१३२॥
एकाङ्गस्य तदास्थाने सुख्याभिजनजन्मनः । प्रमादान्मदनादित्यनाम्नो ढक्का व्यदीर्यत ॥१३३॥
हतांशुकेन भूभर्त्रा कुपितेन खलीकृतः । स निकृत्तकचश्मश्रुस्तपस्वी समपद्यत ॥१३४॥
तादृशस्य पुनस्तस्य सत्पुत्रत्वमीयुषः । अथाप्यभिजने जाता वसन्ति त्रिपुरेश्वरे ॥१३५॥
कुर्वता पर्वगुप्तेन भूभृता द्रविणार्जनम् । प्रापिताः पुनरुत्साहं प्रजारोगा निरोगिणः ॥१३६॥
व्यधत्त स्कन्दभवनविहारवसुधान्तिके । पर्वगुप्तेश्वरं सोपि वृजिनार्जितया श्रिया ॥१३७॥
श्रीयशस्करभूमर्तुश्चुद्धान्तस्य विशुद्धधीः । कौलीनमलुनादेका गौरीव नृपसुन्दरी ॥१३८॥
सुचिराद्भुक्तिप्रीतेः पर्वगुप्तस्य याकरोत् । समागमार्थिनो युक्त्या वञ्चनामुचितं सती ॥१३९॥
इदं यशस्करस्वामिसुरवेश्मार्धनिर्मितम् । त्यक्त्वा पत्युर्विपक्षस्य कृत्वा निर्माणपूरणम् ॥१४०॥
अमोघमस्मिं नियमाद्दिधास्यामि स्वदीप्सितम् । स तु पच्छन्दयत्येवं सुभुवाभिहितस्तया ॥१४१॥
अथ प्रवृद्धगर्वेण तत्स्वल्पैरेव वासरैः । संपूर्णतां सुरगृहं गमितं तेन भूभुजा ॥१४२॥
सा यागज्वलने रात्तलोला पीतसर्पपि । पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ॥१४३॥
उपर्यस्या निरस्तासोः पुष्टाः कुसुमवृष्टयः । तत्काद्विगस्तु न्यपतन्नवर्णमुखरा गिरः ॥१४४॥
सुदीर्घसाहसारम्भचिन्तासंरम्भशोषितः । पर्वगुप्तो बभूवाथ तृष्णामयपथातिथिः ॥१४५॥
व्याध्याधिप्रशमायासैर्जात्वाप्यस्थायिनीं स्थितिम् । मूढाः प्रारूढि नोज्झन्ति द्रोहशीलोभमोहिताः ॥१४६॥
आशङ्क्य तादृङ्निष्ठोपि सोकुण्ठैः प्राक्तनैः शुभैः । कैश्चिन्सुरेश्वरीक्षेत्रे परासुः समपद्यत ॥१४७॥
षड्विंशवत्सरापाढबहुलेह्नि त्रयोदशे । द्रोहार्जितेन नृपतिः स राज्येन व्ययुज्यत ॥१४८॥
अनीन्द्रियायां परलोकवृत्तावित्थैव तीव्राशुभपाकशंसी ।
दृश्येत नाशो यदि नाम नाशु न कः कुकृत्येन यतेत भूत्यै ॥१४९॥
क्षेमगुप्ताभिधानोभूदथ राजा तदात्मजः । आसवासेवनोन्मिक्तविक्तताख्यसंज्वरः ॥१५०॥
सोभूत्स्वभावादुर्वृत्तो नितरां दुर्जनाश्रयात् । कृष्णपक्षशशीव घोरमेवान्ध इव भीतिकृत् ॥१५१॥
स्वतुल्यवेषालंकाराः शतं लालितकाः नृपम् । तं फल्गुणवभूतयो दुराचाराः सिषेविरे ॥१५२॥
द्यूतासवाङ्गनासेवाव्यसनेपि स पार्थिवः । विटनिर्लुण्ठ्यमानोपि नाभूल्लक्ष्मीवहिष्कृतः ॥१५३॥

---

१२७ [1]) Thus corr by A_3 from A_1 'हतम १२९ [1]) चक्रलकम् added by A_1 १३०. [1]) Thus corr by A_3 from A_1 विशोकं —[2]) Thus A_2, A_1 तथा १३१ [1]) Thus A_1; A_2 कैश्चित्तत्प्रत्य° १३२ [1]) Thus A_2, A_1 द्रोहाद्वै° १३८ [1]) A_3 gloss कौलीन लोकनिन्दां —[2]) Thus corr. by A_3 from A_1 °भुनाव° १४०. [1]) Thus corr. by A_3 from A_1 निर्वाण°. १४१ [1]) A_3 gloss अस्मीति निपात अहमित्यर्थे १५२ [1]) Thus A_1, A_3 'वेशा° —[2]) A_3 gloss पवातय.

रागी मधुप्रणयवान्विहिताक्षसक्तिर्यः सख्यमेति मधुपैर्हृतकोशसारैः ।
पद्मे प्रयाति दिनमात्रमपि प्रसक्तिं श्रीस्तत्र चेल्किमिव तच्च कुतूहलाय ॥१५४॥
विटाः प्रविष्टा हृदयं जिष्णुजा वामनादयः । पिशाचस्येव रुचिनामशुचिं तस्य चक्रिरे ॥१५५॥ 155
परोपहासकुशलः परनारीरतिप्रियः । परायत्ताशयस्तस्थौ पार्थिवोनर्थतत्परः ॥१५६॥
क्षीवनं श्मश्रुमालासु गालयः श्रोत्रपालिषु । तेन क्षिप्ताः प्रतीक्ष्याणां करोटीषु च टङ्कराः ॥१५७॥
कटिसंघटनैर्नार्यो मृगव्यज्ञां वनाटनैः । विटाश्चाश्लीलरटनैर्वाल्लभ्यं तस्य लेभिरे ॥१५८॥
पुंश्चलीजालमवैधेयबालकक्रोधपूनिर्भरा । समभूदप्रवेशार्हा राजपर्यन्मनस्विनाम् ॥१५९॥
जिष्णुपुत्रैः क्षेममुप्तक्षमाभृद्यन्त्रपुत्रकः । चारणत्वगुणाकृष्टः किं न धूर्तैरनर्त्यते ॥१६०॥ 160
तस्य कङ्कणवर्षोसीत्यभिधानं विधाय ते । तोषिताश्वासकृच्चक्रुर्दोष्णोः कङ्कणवर्षिताम् ॥१६१॥
निर्दोषदोषाविष्कारे नववस्तुप्रदर्शने । अधृष्यटङ्कराधाने प्रसादः प्राप्ति तैर्नृपात् ॥१६२॥
संलक्ष्यकुत्सकक्ष्यान्ताः कृत्वा निजवधूः पुरः । रागी राजा गृहाजीनो वृते तैर्नर्पनः कृतः ॥१६३॥
संभोगाभग्नसौभाग्यकृतसर्षीः परस्परम् । संभुज्यैतां भवान्वक्तु विशेषमिति चोदितः ॥१६४॥
उपभोगं स्वभार्याणां निर्लज्जैस्तैः स कारितः । का ह्येति च रत्यन्ते पृष्टोभीष्टधनप्रदः ॥१६५॥ युग्मम् ॥ 165
तस्य लालितकेष्वास्तां मृद्वी संभोगगर्हाकने । मात्रोश्चारित्ररक्षित्वाद्विक्षाकौ हरिधूर्जटी ॥१६६॥
नीत्वा नर्मकथाङ्गतां निजवपुर्भुञ्जन्ति मानोज्झति संदृष्य स्वयमङ्गनाः शुचितया त्यक्तं कुलं कुर्वते ।
सौख्यं यन्ति सुदीर्घसेवनसमासक्त्या यदर्थं भ्रमः प्रत्याख्याय तदेव वेद्मि न विटैः किं प्रार्थ्यते सेवया ॥१६७॥
यशस्करस्य भूत्वापि सचिवो भट्टफल्गुणः । तस्याभूदनुजीव्यन्ते धिग्भोगाभ्यासवामनाम् ॥१६८॥
फल्गुणस्वामिमुख्यानां प्रतिष्ठानां विधायिनः । तस्योपदेशो भूभर्त्रा पर्यालास्यमकुण्ठहः ॥१६९॥
गृह्णन्विद्वेषितां हन्तुं टङ्कादि बलात्ततः । वृद्धो रङ्कः कम्पनेशो दुर्गोष्ठीमध्यगोभवत् ॥१७०॥ 170
तीक्ष्णाक्षेपे संप्रविष्टं हन्तुं संग्रामडामरम् । श्रीजयेन्द्रविहारं स निर्घृणो निरदाहयत् ॥१७१॥
सुगतप्रतिमारीति हत्वा दग्धात्ततोखिलात् । जरद्देवगृहेभ्यश्च संगृह्य यावसचयम् ॥१७२॥
सुरप्रतिष्ठया दार्ढ्यं मुहुः स्वयशसो विदन् । नगरापणवीथ्यन्तः क्षेमगौरीश्वरं व्यधात ॥१७३॥
एकः प्रयात्युपरमं द्रविणं तदीयं हत्वापरः प्रसभमुद्वहति प्रमोदम् ।
नो वेत्ति तत्त्वनिधने परकोशगामि धिग्वासनाममममोहकृतान्धकाराम् ॥१७४॥
त्यागिना क्षेममगुप्तेन भुक्तयर्थं खशाभुभुजे । हत्वा विहाराज्जिर्दग्धान्यामाः षट्त्रिंशदर्पिताः ॥१७५॥ 175
दुर्गाणां लोहराद्दीनां शास्ता शतमखोपमः । नृपतिः सिंहराजाख्यस्तस्मै स्वां तनयां ददौ ॥१७६॥
स तस्यां शाङ्गिदौहित्र्यां दिद्दायां सक्तमानसः । दिद्दाक्षेम इति ख्यातिं ययौ लज्जावहां नृपः ॥१७७॥
मातामहेन भूभर्तुर्बध्वास्तस्या व्यधीयत । श्रीभीमशाहिर्नोदात्तप्रासादो भीमकेशवः ॥१७८॥

१५७. [1]) Corr. by A_3 from A_1 °पालय. १५८. [1]) Corr. by A_3 from A_1 °घटनात्र [2]) मृगव्यज्ञा supplied by A_3 in space left by A_1 १६०. [1]) Corr by A_3 from A_1 °नन्त्यन १६५ [1]) युग्मम supplied by A_3 १६६ [1]) Thus corr by A_3, A_1 °रक्षित्वा भिक्षा°. १७०. [2]) Thus A_3; A_1 °त्विद्वेषिता १७२ [1]) Thus A_3, A_1 हत्वा ततो —[2]) Thus A_3, A_1 सद्ग्राह्य १७४ [1]) Thus corr. by A_3 from A_1 कृत्वा १७५ [1]) A_4 gloss सिंहराजाय १७६ [1]) Thus corr, by A_3 from A_1 शतमुख्यो° १७८. [1]) Thus A_3; A_1 श्रीभूमिस्वामिनो°. Cf. *Alberûni's Indica* (trans by Sachau), II 13.

चन्द्रलेखाभिधां कन्यां राज्ञे[1] दत्तवताभवत् । फल्गुणद्वारपतिना समं दिक्षा समत्सरा ॥१७९॥
गुरूपदेशः सुमहान्कुन्तविद्याश्रमस्तथा । तस्य निर्वहणाहर्यार्द्भुजो हास्यतां ययौ ॥१८०॥
अमोघपतनान्प्रांसान्योग्यान्संयामकर्मसु । मृगालमृगयासक्त्या स हि श्राव्यानमन्यत ॥१८१॥
तं वृतं वागुरावाहिडोम्बाटविकपेटकैः । पर्यटन्त श्वभिः सार्धमपश्यन्सततं जनाः ॥१८२॥
तस्य दामोदरारण्यलल्यानशिमिकादिषु । स्थानेषु क्रोष्टुमृगयारसिकस्य वयोगमत् ॥१८३॥
अथ कृष्णचतुर्दश्यां स कुर्वन्मृगयां नृपः । ज्वालामपश्यत्क्रोशन्त्याः शृगाल्या निर्गतां मुखात् ॥१८४॥
तदालोकनसंजातसत्रासाकम्पितस्ततः[2] । लूतामयज्वरेणाभूत्परीतो मृत्युहेतुना ॥१८५॥
मर्तुं ययौ च वाराहक्षेत्रं यत्र विधायकः । श्रीकण्ठक्षेममठयोरासीद्भुष्कपुरान्तिके ॥१८६॥
मसूरविदलाकारलूताक्लिन्नकलेवरः । पौषे चाब्दे चतुस्त्रिंशे नवमेह्नि[3] क्षिते मृतः ॥१८७॥
क्षेमगुप्तात्मजः क्ष्माभृदभिमन्युरभूत्ततः । शिशुर्नित्रिंशधर्मिण्या दिक्षादेव्यानुपालितः ॥१८८॥
संधिविग्रहभुद्धान्तमुख्यकर्माधिकारिणः । निःसाध्वसं राजवधूमवन्ध्यशयनां व्यधुः ॥१८९॥
अभिमन्यौ क्षितिं रक्षत्यकरमादेव दारुणः । तुङ्गेभ्वरापणोपान्तादुज्जगाम हुताशनः ॥१९०॥
वर्धनस्वामिपार्श्वस्थभिक्षुकीपारकावधिः । वेतालसूत्रपातस्थान्स दहाह महागृहान् ॥१९१॥
डोम्बचण्डालसंस्पृष्टभूपसंपर्कदूषितान् । दग्ध्वा महागृहान्वह्निर्भुवः शुद्धिमिवाकरोत् ॥१९२॥
रक्षित्री क्ष्मापतेर्माता स्त्रीस्वभावाद्विमूढधीः । सारासारविचारेण लोलकर्णी न पश्यति ॥१९३॥
राज्ञः सुतापेणाद्बद्धवैरा तस्थौ पुरा यतः । पतिवत्न्येवं सा सार्धं फल्गुणेनाभ्यमन्त्रिणा ॥१९४॥
पत्यौ[1] मृते सपत्नीनां दृष्ट्वानुमरणं[2] ततः । दम्भेनानुममूर्षन्तीमनुमेने स तां द्रुतम् ॥१९५॥
निषिषेधानुबन्धात्तु सानुतापां चितान्तिके । कृपालुर्मरणादेतामममात्यो नरवाहनः ॥१९६॥
अतो निसर्गपिशुनो रक्तस्तां मन्युदूषिताम् । फल्गुणाद्राज्यहरणाशङ्कां राज्ञीमजिघहत् ॥१९७॥
विरागशंसिभिर्लिङ्गैस्तां ज्ञात्वा विषमाशयाम् । समन्युं साखिलामात्यां फल्गुणोप्यास्त शङ्कितः ॥१९८॥
स हि सर्वाधिकारस्थः सर्वस्याक्षिगतोभवत् । दीप्यमानोधिकं मन्त्रशौर्योत्साहादिभिर्गुणैः ॥१९९॥
अस्थीनि क्षेमगुप्तस्य गृहीत्वा जाह्नवीं गते । पुत्रे कर्दमराजाख्ये प्रबलैरन्वितो बलैः ॥२००॥
तत्प्रत्यागमपर्यन्तं पर्णोत्सं स्थातुमुद्यतः । अविश्वसच्चृपगृहे फल्गुणो वैरिशङ्कितः ॥२०१॥
निर्गत्य नगराद्यावत्सभाण्डागारिसैनिकः । काष्ठवाटान्तिकं प्राप्तं तावद्वक्त्रादिचोदितात् ॥२०२॥
आकलय्य द्रुतं दिक्षा संत्यज्य प्रार्थनादिकम् । पृष्ठे प्रत्युत यष्टीकांस्तस्य हन्तुं व्यसर्जयत् ॥२०३॥
नवावमानखिन्नः स मिलितानन्तसैनिकः । प्रत्यावृत्त्य ततो मानी वाराहं क्षेत्रमाययौ ॥२०४॥
श्रुत्वा समेतसैन्यं तं प्रत्यायातं प्रतापिनम् । आस्कन्दशङ्किनी दिक्षा सामात्या समकम्पत ॥२०५॥

---

१७९. [1]) Thus corr by later hand from A_1 राज्ञो. १८० [1]) Thus corr. by A_3 from A_1 °हर्यार्द्भु° १८१. [1]) Thus corr by A_3 from A_1 °प्रतिमान्प्रा°.—[2]) A_3 कुन्तान् —[3]) Thus corr by A_3 from A_1 श्राव्यामम°. १८२. [1]) Thus corr by A_3 from A_1 °ढविटपे°. १८५ [1]) Thus corr. by A_3 from A_1 °तस्थिति. १८७. [1]) Thus corr by A_3 from A_1 नवमेह्ने. १८९. [1]) Thus corr. by A_3 from A_1 मन्त्रिवि° १९४. [1]) A_4 gloss समर्देकैव सभी. १९५ [1]) Thus corr. by A_3 from A_1 पत्न्यौ.—[2]) A_1 °नुसरणं. १९९. [1]) Thus $A_{2,3}$; A_1 तन्त्र° २०२ [1]) Thus corr by later hand from A_1 प्राप्य, A_4 gloss प्राप्त इत्यर्थ.

तस्मिन्क्षेत्रे गतं शान्तं विलप्य स्वामिनं चिरम् । वराहपादसविधे तेनं शस्त्रं समर्पितम् ॥२०६॥
द्रोहसंभावनापापं शस्त्रत्यागेन मन्त्रिणा । स्वस्य संमार्जितं तेन राजमातुश्च साध्वसम् ॥२०७॥
युक्तायुक्तविचारबाह्यमनसः सेवा महद्भैशसं कुर्वेस्मिन्प्रतिकारकर्म गहनद्रोहापवादावहम् ।
येन न्यूनगुणेकृशोपकरणीभावोपि तस्मै परं कोपः कोपि विवेकिनः समुचितः शास्त्राय शस्त्राय वा ॥२०८॥
पर्णोत्समेव शनकैः ससैन्ये फल्गुणे गते । विगताध्यापका बाला इवामोदन्त मन्त्रिणः ॥२०९॥
योगक्षेमौ चिन्तयन्ती क्षेमगुप्तवधूरपि । अनिशं प्रजजागार स्वयं कण्टकपाटने ॥२१०॥ 210
राज्यप्रार्थी पर्वगुप्तो मन्त्रिणौ कोशपीथिनौ । अजिघहत्करौ पूर्वं पुञ्ज्योर्यौ छोजभूभटौ ॥२११॥
तयोः प्रजातौ तनयौ ख्यातौ महिमपाटलौ । अवर्धिषातां यौ राजमन्दिरे राजपुत्रवत् ॥२१२॥
नौ तत्रावस्थितावेव तत्कालं राज्यलालसौ । संमन्त्र्य समगंसातामुहामैर्हिम्मकादिभिः ॥२१३॥
बलिनौ तावबलया राज्यापास्तौ नृपास्पदात् । समन्यू स्वगृहादास्तां यावत्कृतगतागतौ ॥२१४॥
एकतः पृष्ठतः प्रादान्मन्द्रिम्नो निर्गतस्य सा । निर्वासनाय याष्टीकांस्तावत्सकटवैकृता ॥२१५॥ 215
शक्तिसेनाभिधानस्य श्वशुरस्य निवेशनम् । प्रविवेश स तज्ज्ञात्वा तं ते तत्रापि दुद्रुवुः ॥२१६॥
शक्तिसेनेन याष्टीकाः सान्त्विता नाचलन्यदा । तदा भीतस्य जामातुर्यत्कं प्रादास्त संभयम् ॥२१७॥
तं लब्धसंभयं प्राप हिम्मको मुकुलस्तथा । एरमन्तकनामा च परिहासपुराभयः ॥२१८॥
श्रीमानुदयगुप्ताख्योप्यमृताकरनन्दनः । ललितादित्यपुरजा यशोधरमुखा अपि ॥२१९॥
एकैकं ते मिथः सैन्यैर्भुवनक्षोभकारिणः । संभूय चक्रुर्नृराज्यं महिम्नः पक्षमाश्रिताः ॥२२०॥ 220
तस्मिन्महाभये दिद्दापक्षं मन्त्री सबान्धवः । एक एव तु तत्याज नाद्रोग्गो नरवाहनः ॥२२१॥
प्रवर्धमानपृतना योद्धुं बद्धोद्यमास्ततः । पद्मस्वाम्यन्तिकं प्रापुर्दीप्यमानायुधा द्विषः ॥२२२॥
अथ भ्रूरमठे दिद्दा विसृज्यात्मजमाकुला । आपच्छान्तिक्षमांस्तांस्तानुपायान्समचिन्तयत् ॥२२३॥
ललितादित्यपुरजान्द्विजान्स्वर्णेन भूरिणा । तूर्णं स्वीकृत्य विदधे रिपूणां संघभेदनम् ॥२२४॥
एकाक्षेपेखिलैः कोपो विधेय इति वादिभिः । महिम्नः पीतकोशैस्तैः संधिर्दत्त्वा समं कृतः ॥२२५॥ 225
गोष्पदोल्लङ्घने यस्याः शक्तिर्नाज्ञायि केनचित् । वायुपुत्रायितं पद्भ्यां तया संघाश्चिलङ्घने ॥२२६॥
यत्संग्रहो रत्नमहौषधीनां करोति सर्वव्यसनावसानम् ।
त्यागेन तस्यस्य भवेन्नमोस्तु चित्रप्रभावाय धनाय तस्मै ॥२२७॥
उत्कोचकाञ्चनादानेष्वार्यां ध्यायन्त्युपक्रियाम् । दिद्दा यशोधराद्यिभ्यः कम्पनादि समार्पयत् ॥२२८॥
अभिचारं महिम्नश्च कृतवत्या मितैर्दिनैः । मण्डलेखण्डिताज्ञत्वं रण्डायाः समजृम्भत ॥२२९॥
कदाचित्थक्कनाख्यस्य शाहीशस्योपरि क्रुधा । सत्रा स्ववंशजैर्यात्रां कम्पनाधिपतिर्ददौ ॥२३०॥ 230
तत्रेशं निम्नगाशैलदुर्गं प्रविशता जवात् । अखण्डशक्तिना तेन बलादग्राहि थक्कनः ॥२३१॥

---

२०६. [1]) Corr by later hand from A_1 तत्र २११ [1]) Thus corr by later hand from A_1 यो २१३. [1]) Emended, A R G °हिम्मका° २१६ [1]) Thus corr by A_2 from A_1 शक्तिसंज्ञायि°. २१८ [1]) Thus corr by A_2 from A_1 तैर्लब्ध°, A_3 gloss त महिमानं २२०. [1]) Thus A_3, A_1 एकैक त २२७ [1]) Thus corr by A_2 from A_1 नमोस्तु २२८. [1]) Emended, A R G समर्पयत. २२९. [1]) Thus A_3, A_1 विहाया Cf. vi 260 २३०. [1]) Thus corr. by A_1 from °चिडुकना°

स कृतप्रणतेस्तस्य करमादाय भूपतेः । अभिषेकाम्बुभिश्चक्रे शीलतांप्यायनं पुनः ॥२३२॥
लब्धप्रवेशैः समये तस्मिन्नक्कादिभिः खलैः । कम्पनाधिपतौ राज्ञ्या विद्वेषोग्राहि मूढया ॥२३३॥
उर्वीपतेश्च स्फटिकाश्मनश्च शीलोज्झितस्त्रीहृदयस्य चान्तः ।
असंनिधानात्सततस्थितीनामन्योपरागः कुरुते प्रवेशम् ॥२३४॥
स्वचित्तसंवादि वचो वदन्तो धूर्ता वितन्वन्ति मनःप्रवेशम् ।
पृथग्जनानां गणिकावधूनां विटाः प्रभूणामपि गर्भचेटाः ॥२३५॥
द्रोग्धार्यं थक्कनं रक्षन्धनादायीति पैशुनम् । तथ्यमेव तदीयं सा स्वयंवादादमन्यत ॥२३६॥
अथ स्ववसतिं प्राप्ते कम्पनेशे जयोर्जिते । याष्टीकान्व्यसृजद्विद्वा स्फुटं निर्वासनोद्यता ॥२३७॥
तदाक्षेपं समाकर्ण्य स्मरन्तः कोशसंविदम् । ते हिम्मकैरमन्त्राद्याः पूर्ववद्विक्रियां ययुः ॥२३८॥
नरवाहनमुख्यास्तु राज्ञीपक्षं न तत्यजुः । विभेदं पूर्ववत्प्रापदेवं निजबलं पुनः ॥२३९॥
प्रविष्टेषु ततः कोपात्पुरं शुभधरादिषु । भट्टारकामठे दिद्वा भूयः पुत्रं व्यसर्जयत् ॥२४०॥
दत्तार्गले नृपगृहे स्थितां तां दैवमोहिताः । ते तदैव विना पुत्रं विमूढा नोदपाटयन् ॥२४१॥
राज्ञ्याः संजघटे लोकः परस्मिन्नेव वासरे । यद्बलेन तदा स्थैर्यं सा किंचित्समदर्शयत् ॥२४२॥
जयाभट्टारिकापार्श्वाच्चक्षुरमठान्तिकम् । व्याप्य स्थितैर्द्विषत्सैन्यैरथ प्रववृते रणः ॥२४३॥
राजधानीं राजसैन्ये प्रविष्टे त्रासविद्रुते । सिंहद्वारे घटाबन्धमेकाद्वाः समदर्शयन् ॥२४४॥
शरीरनिरपेक्षास्ते मीनं संस्तम्भ्य तद्बल । अधावन्द्विड्दिशां सैन्यं नेतुः केचिच्च शत्रवः ॥२४५॥
तस्मिन्नवसरे राजकुलभट्टः समाययौ । तूर्यघोषैर्द्विषां सैन्यं भिन्दन्नानन्दयन्निजम् ॥२४६॥
तस्मिन्प्राप्ते द्विषां सैन्यं विननाश विनश्वरम् । न द्रोहाविनयं जातु सहन्ते शस्त्रदेवताः ॥२४७॥
त्रोटयत्यायसान्बन्धान्स्फोटयत्युपलानिति । यः ख्यातिमवहत्तथ्यां हिम्मको भीमविक्रमः ॥२४८॥
तत्रासिना राजकुलभट्टदेहार्धपातिना । चर्ममात्रं न तुत्रोट कङ्कटस्थातिसंकटे ॥२४९॥
विलोक्य तदसंभाव्यं सैन्ये दैन्यं समाश्रिते । अधानि हिम्मको योधैरवाद्भिं यशोधरः ॥२५०॥
तथाप्यासीत्स्फुरन्संख्ये य एरमन्तकः क्षणम् । स भमासिश्चुतो बाहाज्जीवमाहमगृह्णत ॥२५१॥
नाजौ तैरेप्यताधातुं यः श्रीमान्राजबान्धवः । जगामोदयगुप्तः स कापि त्यक्त्वा महाहवम् ॥२५२॥
इत्थं लब्धजया राज्ञी तत्क्षणाज्जयमहीद्रुषा । यशोधरं शुभधरं मुकुलं च सबान्धवम् ॥२५३॥
काश्मीरिकाणां यः श्राद्धशुल्कोच्छेत्ता गयान्तरे । सोप्येरमन्तकः शूरः परिहासपुराभयः ॥२५४॥
बद्ध्वा महाशिलां कण्ठे वितस्तास्भसि पातितः । स्वदुर्नयफलं देव्याः प्रकोपेनानुभावितः ॥२५५॥

---

२३२ [1]) A_2 gloss श्री एव लक्ष्मा २३३. [1]) Thus corr. by later hand from A_1 °वेश ; R G as above. २३४ [1]) Thus corr by A_2 from A_1 °न्योन्यराग. २३६ [1]) Thus A_1, A_2 स्वसवासा°. २३८ [1]) A_2 gloss एकाक्षेपेस्थिते कोपो विधेय इत्यवरूपा २३९ [1]) मुख्या supplied by A_1 in space left by A_1 २४१. [1]) Thus corr by A_2 from A_1 नोपपाट° २४५ [1]) Thus corr by A_2 from A_1 अधावद्वि° —[2]) The words from नेतुः to सैन्ये in the following verse are omitted by A_1 and supplied in margin by A_2 २४६ [1]) A_2 °ब्रिजान् २४७ [1]) Thus A_1, A_2 G R विनेश्वरम्. २५८ [1]) Thus corr. by later hand from A_1 तोट°.—[2]) तिमवहत्त supplied by A_2 in space left by A_1. २६०. [1]) Emended with C, A R G °रवद्वम्भि २६१. [1]) Thus A ; R G रेर° २५४. [1]) Thus corr by A_2 from A_1 काद्मीरका° —[2]) Thus corr. by A_2 from A_1 °शुल्कोच्छेना —[3]) Thus corr by A_2 from A_1 गमान्तरे.—[4]) Thus corr. by A_2 from A_1 °हार°

ये सप्तसप्तताद्यर्धादा गोपालनृपात्पुरा । अभिमन्युं यावदासन्षोडशानां महीभुजाम् ॥२५६॥
वर्षषष्टिं प्रतापायुःश्रीहरा द्रोहवृत्तयः । ते क्षिप्रं मन्त्रिणः सर्वे सान्ववायाः सहानुगाः ॥२५७॥
भीमभूभङ्गमात्रेण दिङ्मादेव्या सकोपया । आसन्निःशेषतां नीता दुर्गयेव महाद्वराः ॥२५८॥ तिलकम् ॥
अभवन्विहिता राज्ञा तानुत्पाद्य मदोद्धतान् । रक्षादयः कम्पनादिकर्मस्थानाधिकारिणः ॥२५९॥
इत्थं मन्त्रिप्रकाण्डः स रण्डामाखण्डलोपमाम् । अखण्डमण्डलां चक्रे निर्द्रोहो नरवाहनः ॥२६०॥ 260
राज्ञी कृतज्ञभावेन सापि मन्त्रिसभान्तरे । तमाजुहाव निर्द्रोहं स्वयं राजानकाख्यया ॥२६१॥
हृते सुप्त्वा निष्पन्नभोजनेस्मिन्नभुङ्क्त सा । हृष्टे जहर्ष निर्विण्णे निर्विवेदानुकूल्यतः ॥२६२॥
आरोग्यान्वेषणं शिक्षार्थानां गृहवर्तिनः । सात्मवस्तुविसर्गं च नाकृत्वा तस्य पिप्रिये ॥२६३॥
अभूनां युग्यवाहस्य कुट्यनाम्नः सुतौ पुरा । यौ सिन्धुभुट्यौ तज्ज्यायान्सिन्धुर्लालितकः किल ॥२६४॥
पर्वगुप्तगृहे भुक्त्वा गञ्जाध्यक्षे स्थितं क्रमात् । लब्ध्वा गञ्जाधिकारित्वं तस्या राज्ञाः शनैरभूत् ॥२६५॥ 265
रुद्धा तयैव गञ्जेशो नवायासविधायकः । कर्मस्थानस्य निर्माता सिन्धुगञ्जाभिधस्य यः ॥२६६॥
प्रायशो हतराज्यस्ते वर्तते नरवाहनः । इति नेयमियं राज्ञी सोभ्यधत्त दुराशयः ॥२६७॥
सा तथेत्यब्रवीद्भावज्ञावत्प्रेम्णा स जातुचित् । मन्त्री तां प्रार्थयामास भोक्तुं निजगृहागमम् ॥२६८॥
सा सानुगां तत्र यातां ध्रुवं त्वामेव भन्स्यति । इत्युक्ता सिन्धुनाभृच्छत्तत्कर्तव्यं भयाकुला ॥२६९॥
अनुज्ञैव प्रचलिता राजधानीमलक्षिता । स्त्रीर्धीर्मय्यस्मि जानेति पश्चाद्वार्तां व्यसर्जयत् ॥२७०॥ 270
संप्रवृत्तोपचारायां गतायां तत्पथात्तथा । राज्ञ्यां नाशममात्यस्य प्रीतिः संविच्च सा ययौ ॥२७१॥
तयोस्ततः प्रभून्येव निष्कृष्टस्नेहयोः कृतम् । चाक्रिकैरतिरूक्षस्वं तिलपिण्याकयोरिव ॥२७२॥
कुलिशं सर्वलोहानामम्भसां शैलसेतवः । अभेद्याः प्रतिभाद्यन्ते न किंचिदसतां पुनः ॥२७३॥
ये बालादपि संमूढाः प्राज्ञाः सुरगुरोरपि । तेषां न विद्मः के तावच्चिह्नमाणपरमाणवः ॥२७४॥
विश्वासोज्झितधीः शिशुन्कलयते काकोन्यदीयाञ्चिनाहंसः क्षीरपयोविभागकुशलस्त्रस्त्यसारादृनात् ।
लोकावेक्षणतीक्ष्णधीः खलगिरं जानाति सत्यां नृपो धिग्वैदग्ध्यविमुग्धताव्यतिकरस्पृष्टं विधानं विधेः ॥२७५॥ 275
मूढा चरणहीना सा भुतिबाह्यतया तया । वैधेयविप्रप्रकृतिरिव प्रायाद्विगर्ह्यताम् ॥२७६॥
छद्मेजितस्तया शश्वत्त्या स नरवाहनः । यथा विमाननोत्तप्तः स्वयं तत्याज जीवितम् ॥२७७॥
प्रकुप्यत्यप्रतीकार्ये स्वतेजस्तप्तचेतसाम् । शरणं मरणं त्यक्ता किमिवान्यद्यशोर्थिनाम् ॥२७८॥
शशिहीनेव रजनी सत्यत्यक्तेव भारती । विरराज न राजश्रीर्नरवाहनवर्जिता ॥२७९॥
सा क्रौर्याभ्यासविषमा हन्तुं वितनविक्रमान् । संग्रामडामरद्युतान्सामीप्यधानचिन्तयत् ॥२८०॥ 280
निजमुत्तरघोषं ते तद्भयेन विनिर्गताः । कृत्यकद्वारपत्यादीन्कृतारब्धीन्व्यपादयत् ॥२८१॥
उत्पिञ्जभीतया राज्ञ्या त्यक्ता परिभवत्रपाम् । ते यत्तात्समधद्यन्त मानः स्वार्थार्थिनां कुतः ॥२८२॥

---

२५९. [1]) A_3 gloss स्वनौ सुरागृहे गञ्जा भण्डागारे पुमानयेति कोश —[2]) Thus A R G, perhaps, to be emended with G *sec manu* गञ्जाध्यक्षस्तत्र क्रमात् २६१. [3]) Thus emended according to conjectural reading (*sec manu*) in G, A R G (*prima manu*) नवायामवि°. २६९. [4]) Emended, A_1 वरस्यति, G P वरस्यति, R भरस्यति, C वरस्यति. २७१. [5]) A_2 °वृत्ताप°.—[6]) A_2 तन्मनासथा. २७२. [7]) Thus A_3, A_1 किन्नाव°.

स्थानेभ्यश्चादिभिर्मुख्यैर्डामरैरितरैः समम् । ते भीताः पुरतस्तस्याः पुनरेत्य जजृम्भिरे ॥२८३॥
अथ तद्भीतया राज्ञ्या रक्षे प्रभयमार्गते । आनीतः फल्गुणो भूयो वीरार्थिन्या निजान्तिकम् ॥२८४॥
राजकार्याणि कुर्वाणः स भूयः शस्त्रमग्रहीत् । न्यस्तशस्त्रोऽपि यत्सत्यं दुस्त्यजा भोगवासना ॥२८५॥
महिमा राजपुर्यादिजयिनस्तस्य पश्चिमः । अद्भुतो वृद्धबन्धक्या अवरुद्ध इवाभवत् ॥२८६॥
अभूदुदयराजस्य देवीभ्रातुरतिप्रियः । यः सहायोक्षपटले जयगुप्ताभिधः कुधीः ॥२८७॥
अन्येधिकारिणस्तेन सहिताः क्रूरवृत्तयः । कङ्कमीरेषु व्यधुर्लुण्टिं दुष्कृतैस्तदुपार्जितैः ॥२८८॥
दौःशील्यभाजो मानुष पाप्मभिर्विधुरीकृतः । अभिमन्युः क्षणे तस्मिन्क्षयरोगेण पस्पृशे ॥२८९॥
पण्डितः पुण्डरीकाक्षो विद्वत्पुत्रैरुपस्कृतः । कृतभ्रुतः स वैदुष्यतारुण्याभ्यां विदिद्युते ॥२९०॥
तथा विभुद्वयक्रतेस्तस्य दुष्कृतसंगमः । शोषाधायी शिरीषस्य रविताप इवाभवत् ॥२९१॥
अर्धमानः प्रजाचन्द्रस्तृतीयस्यां स कार्तिके । शुक्रेष्टचत्वारिंशाब्दे प्रस्तो नियतिराहुणा ॥२९२॥
तत्पुत्रो नन्दिगुप्तस्तु बालश्चक्रे निजासने । वृद्धस्तनयशोकस्तु दिद्दाया हृदये पदम् ॥२९३॥
सा शोकपिहितक्रौर्या तस्थौ प्रशमशीतला । रविरश्मशलाकेव ध्वान्तच्छन्नोष्मवैकृता ॥२९४॥
ततः प्रभृत्यद्भुताभिस्तस्या धर्मप्रवृत्तिभिः । कुकर्मभिरुपोढापि लक्ष्मीः प्राप्ता पवित्रताम ॥२९५॥
नगराधिपतिर्भुव्यैः सिन्धुभ्राता शुभाशयः । नदीयधर्मनर्यायां बभूव परिपोषकः ॥२९६॥
सा तेनोत्पादितानर्घजनरागा गतैनसा । ततः प्रभृत्यभूद्देवी सर्वलोकस्य संमता ॥२९७॥
राज्ञः स सचिवः सत्यं दुष्प्रापो लुप्तचण्डिमा । कुर्याद्यः सुखसेव्यत्वं हेमन्त इव भास्वतः ॥२९८॥
सा निर्मात्री विपन्नस्य सूनोः सुकृतवृद्धये । अभिमन्युस्वामिनंभूदभिमन्युपुरस्य च ॥२९९॥
अथ दिद्दापुरोपेतो दिद्दास्वामी तया कृतः । मठश्च मध्यदेशीयलाटशौडोत्रसंभवः ॥३००॥
भर्तुः कङ्कणवर्षस्य पुण्योत्कर्षाभिवृद्धये । चकार कङ्कणपुरं रमणी स्वर्णवर्षिणी ॥३०१॥
श्वेतशैलमयं चान्यं सा दिद्दास्वामिनं व्यधात् । धवलं चरणोद्भूतगङ्गाम्भःप्लवनैरिव ॥३०२॥
चक्रे काश्मीरिकाणां च वैशिकानां समाश्रयः । तयाल्पद्यचतुःशालो विहारश्चारुसंपदा ॥३०३॥
श्रीसिंहस्वामिनं नाम्ना सिंहराजस्य सा पितुः । मठं च विदधे स्थित्यै वैशिकानां द्विजन्मनाम् ॥३०४॥
मठप्रतिष्ठावैकुण्ठनिर्माणाद्यैः स्वकर्मभिः । तयातिपावनश्चक्रे वितस्तासिन्धुसंगमः ॥३०५॥
तेषु तेषु प्रदेशेषु किमुक्तैर्भूरिभिः शुभैः । सा प्रतिष्ठा व्यरचयद्यतुःषष्टिमिते भुतिः ॥ ३०६॥
जीर्णोद्धारकृता देव्या प्रुटप्राकारमण्डलाः । प्रायः सुरगृहाः सर्वे शिलाद्यप्रावृताः कृताः ॥३०७॥
क्रीडानङ्कमणे राज्ञ्याः पङ्क्या विमहवाहिनी । वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥३०८॥
तीर्थासेवनमौनभागपि तिमिः सक्तः स्वकुल्याशने वाताशान्ग्रसते शिखी घनपयोमात्राशनोप्यन्वहम् ।
विश्वस्ताञ्जलचारिणः प्रकटितध्यानोपि भुङ्क्ते बकः सत्कर्माचरणेपि दोषविकृतौ न प्रत्ययः पापिनाम् ॥३०९॥
चर्षणी वर्षमात्रेण शान्तशोका बभूव सा । भोगोत्सुकार्भके तस्मिन्नप्ररि व्यभिचारकृत् ॥३१०॥

---

३९२ [1]) Thus A R G, Edd. कर्षमान, found also *sec manu* in R G. A_2 gloss अर्धवया खण्डाबेम्बश्च. ३००. [1]) Thus A R G. ३०३ [1]) Thus corr by A_3 from A_1 जनाश्र° ३०४. [1]) स्थित्यै omitted by A_1 and supplied in margin by A_2. ३०६. [1]) Thus A_3, A_1 भुता. ३०९ [1]) Thus A_1, A_3 विरतौ ३१० [1]) A_2 gloss चर्षणी असती इत्यर्थ.

वर्षे एकान्नपञ्चाशे नीतः पक्षे सिते क्षयम् । स मार्गशीर्षद्वादश्यामार्गव्यमया तया ॥३११॥
पौत्रस्त्रिभुवनो नाम मार्गशीर्षे सितेऽहनि । पञ्चमेऽप्येकपञ्चाशे वर्षे तद्वत्तया हतः ॥३१२॥
अथ मृत्युपथे राज्यनाम्नि स्वैरं निवेशितः । क्रूरया चरमः पौत्रो भीमगुप्ताभिधस्तया ॥३१३॥
तस्मिन्नवसरे वृद्धः फल्गुर्गोपि व्यपद्यत । निगूढकौर्यदीःशील्या दिक्षा यद्वीरवादभुत् ॥३१४॥
बभूव साध्यं क्षुत्सृष्टदुष्टचेष्टाशतोत्कटा । भ्रष्टक्वत्पटा मत्तदन्तिमूर्तिरिवोत्कटा ॥३१५॥ 315
महाभिजनजातानामपि हा धिङ्निसर्गतः । सरितामिव नारीणां वृत्तिर्नैम्नानुसारिणी ॥३१६॥
स्रोतोधिराज्यमधिगम्य विराजमानास्तिस्रोः प्रसूय कमलाल्पयोनिकेते ।
जाते सरस्यविरतं जलजे प्रसक्ता नार्यो महाभिजनजा अपि नीचभोग्याः ॥३१७॥
खशास्य वह्निवासांख्यपर्णीस्सपामजन्मनः । बाणस्य सुतुस्तुङ्गाख्योविंशन्महिषपालकः ॥३१८॥
प्रविष्टो जातु कङ्कमीरांहिखेहारककर्मणा । सुगन्धिमीहप्रकटनागाह्वयिकपण्मुखैः ॥३१९॥
पञ्चभिर्भ्रातृभिः सार्धं सांधिविग्रहिकान्तिकैः । देव्या दृग्गोचरं यातो हृदयावनैकोभवत् ॥३२०॥ तिलकम्॥ 320
रहःप्रवेशितो दूत्या स भाव्यर्थबलाद्युवा । संभुक्तभूरिजाराया अपि तस्याः प्रियोभवत् ॥३२१॥
तुङ्गानुरागिणी राज्ञी पापा लज्जोज्झिता ततः । रसदानेन वैमुख्यभाजं भृत्यमघातयत् ॥३२२॥
धिङ्निर्विचारान्कृपणीन्येषां विषमचेतसाम् । फलशून्या स्तुतिस्तेषु दोषे प्राणधनक्षयः ॥३२३॥
रङ्कजो देवकलंगो वेलाविक्तः कृतस्तया । भृत्याधिकारे कौटिल्यमाचरन्निखिलो विटः ॥३२४॥
येपि कर्दमराजाया वीरा द्वारादिनायकाः । तेपि कौटिल्यसंभजनन्येषां गणनैव का ॥३२५॥
चतुष्पञ्चानि वर्षाणि निश्चक्रुपुरे शिशुः । भीमगुप्ताभवत्यावत्किंचित्सौढीभवन्मतिः ॥३२६॥
राज्यव्यवस्था यावच्च पितामह्याश्च वृत्तयः । दुःस्थिताः प्रत्यभासन्त संस्थाप्यान्तस्य चेतसि ॥३२७॥
अद्रशीलविहीनाया निर्घृणाया निसर्गतः । तावच्चेयधियस्तस्याः स चिन्त्यः समपद्यत ॥३२८॥
अभिमन्युंवधुस्तं हि चक्रे गुढप्रवेशितम् । महाभिजनजं पुत्रं तस्मात्सोभूत्तथाविधः ॥३२९॥
सा देवकलशेनाथ दत्तमन्त्रा विशङ्किता । त्रपोज्झिता स्पष्टमेव भीमगुप्तमबन्धयत् ॥३३०॥
निगूढे नन्दिगुप्तादिद्रोहे लोकस्य योभवत् । संदेहः स तया तेन व्यक्तकृत्येन वारितः ॥३३१॥
ताभिस्ताभिर्यातनाभिर्भीमगुप्तं निपात्य सा । षट्पञ्चाशेभवद्वर्षे स्वयं क्रान्तनृपासना ॥३३२॥
प्रवृद्धरागया राज्ञ्या दत्तोद्रेको दिने दिने । सर्वाधिकारी तुङ्गोथ बभूवाधरितोखिलः ॥३३३॥
सभ्रातृकेन तुंङ्गेन मीलिताः पूर्वमन्त्रिणः । राज्यविभ्रमपातुमयतन्त विरागिणः ॥३३४॥
तेथ संमन्त्र्य कङ्कमीरानानिन्युः क्रूरपौरुषम् । उर्वं विग्रहराजाख्यं दिक्षाभ्रातुः सुतं नृपम् ॥३३५॥ 335
मुख्यामहारान्स प्राप्तो विधातुं राज्यविप्लवम् । धीमान्पायोपवेशार्थं द्रुतं प्रावेशयद्विजान् ॥३३६॥
विहितैक्येषु विप्रेषु लोकः सर्वोपि विप्लुतः । अन्विष्येयान्वहं तुङ्गं तत्र तत्र जिघांसया ॥३३७॥

---

३११ [1]) Thus A_1, A_2 एकोनप° ३१२. [1]) Thus corr by later hand from A_1 मागशीर्ष. ३१५ [1]) बभूव साध्य supplied by A_3 in space left by A_1 ३१७ [2]) A_4 gloss बावोल माम ३१९ [1]) ख supplied by A_3 in space left by A_1 ३२० [1]) Corr. by A_3 from A_1 सन्धि°.—[2]) Thus A_1; A_3 °कान्तेर. ३२५ [1]) Thus corr by A_4 from A_1 कौटिल्य° ३२९ [1]) Thus corr. by A_3 from A_1 अभिमन्यव°. ३३३. [1]) धरि supplied by A_3 in space left by A_1. ३३६ [1]) A_3 gloss प्राय भोजनत्याग —[2]) Thus A_1, A_3 प्रायोजयद्वि°

कस्मिंश्चित्पिहितद्वारे तुङ्गं प्रच्छाद्य वेश्मनि । दिनानि कतिचिद्दिद्वा तस्थावास्कन्दशङ्किनी ॥३३८॥
तया स्वर्णप्रदानेन सुमनोमन्त्रकादयः । ब्राह्मणाः समगृह्यन्त ततः प्रायो न्यवर्तत ॥३३९॥
एव तस्मिन्महाक्षेपे तया दानेन वारिते । ययौ विग्रहराजः स भग्नशक्तिर्यथागतम् ॥३४०॥
अथ दार्व्य समासाद्य तुङ्गाद्याः प्रभविष्णवः । शनैः कर्दमराजादीञ्जघ्नुर्विहितविग्रहान् ॥३४१॥
सुलक्षणो रक्षसूनुस्तथान्ये मुख्यमन्त्रिणः । रुष्टैर्निर्वासिता देशात्तुष्टैस्तैः संप्रवेशिताः ॥३४२॥
प्रवर्धमानवैरेण गूढदूतैर्विसर्जितैः । प्रायं विग्रहराजेन ब्राह्मणाः कारिताः पुनः ॥३४३॥
उत्कोचादित्सया विप्रा भूयः प्रायविधायिनः । लब्धस्यैर्येण तुङ्गेन संनिपत्यापहस्तिताः ॥३४४॥
तेषां मध्ये वसन्गूढमादित्याख्यः पलायितः । हतो विग्रहराजस्य प्रियः कटकवारिकः ॥३४५॥
शस्त्रक्षतः प्रतीहारो वत्सराजाभिधः पुनः । न्यङ्कोतकादिभिर्धावन्क्षीवमाहत्य गृह्यत ॥३४६॥
ते स्वर्णमाहिणो विप्राः सुमनोमन्त्रकादयः । सर्वेपि बद्धास्तुङ्गेन कारागारे प्रवेशिताः ॥३४७॥
अथ फल्गुणनाशेन कृमे राजपुरीपतौ । तां प्रत्यारुरुधिरभवत्कुध्यतां सर्वमन्त्रिणाम् ॥३४८॥
निपत्य संकटे वीरः पृथ्वीपालाभिधस्ततः । चक्रे राजपुरीराजः काश्मीरिकाबलक्षयम् ॥३४९॥
शिपाटको हंसराजो विपत्तौ तत्र मन्त्रिणौ । चन्द्राद्यैर्दुर्गतिर्दृष्टा मरणं यत्र भेषजम् ॥३५०॥
अथान्येन पथाकस्मात्तुङ्गः सार्धं सहोदरैः । कृत्स्नां राजपुरीं वीरः प्रविश्य सहसादहत् ॥३५१॥
ननाश तेनोपायेन पृथ्वीपालः स पार्थिवः । शेषाणां मन्त्रिणां सैन्यं प्राप मुक्तिं च संकटात् ॥३५२॥
अबलः सन्स भूपालस्तुङ्गाय प्रददौ करम् । एवं कृतं तदा तेन नष्टस्यार्थस्य योजनम् ॥३५३॥
प्रविशन्नगरं तुङ्गस्ततः स्वीकृतकम्पनः । चकार डामरप्रामसंहारं सिंहविक्रमः ॥३५४॥
दिद्दाप्युदयराजस्य भ्रातुः पुत्रं परीक्षितम् । चक्रे संग्रामराजाख्यं युवराजमशङ्किता ॥३५५॥
सा हि सर्वाङ्गिशुभ्रायान्पुरो भ्रातृसुतान्स्थितान् । परीक्षितुं मुमोचामे पालेवतफलावलिम् ॥३५६॥
शक्तः कियन्ति कः प्राप्तुं फलान्यत्रेतिवादिनी । साभवद्राजपुत्राणां तेषां कलहकारणम् ॥३५७॥
गृहीतालपफलांल्लघ्रप्रहारांस्तान्ददर्श च । संग्रामराजं स्वस्वल्पफलभाजमवीक्षतम् ॥३५८॥
अनन्तफलसंप्राप्तावक्षतत्वे च कारणम् । सविस्मयं तया पृष्टः स तामेवं तदाब्रवीत् ॥३५९॥
अन्योन्यकलहव्यग्रानेतान्कृत्वा पृथग्वसन् । समवापं फलान्यस्मिन्न चाभूवं परिक्षतः ॥३६०॥
व्यसनं संप्रवेद्यान्यास्थितानामप्रमादिनाम् । न काः क्लेशविहीनानां घटन्ते स्वार्थसिद्धयः ॥३६१॥
भुक्त्वेति तस्य सा वाक्यमप्रमत्तत्वदूतिकाम् । भीरुर्नारीस्वभावेन राज्येमन्यत योग्यताम् ॥३६२॥
शूरस्य लभ्यं शौर्येण भीरोर्भीरुतया यथा । कार्यं हि प्रतिभान्यन्तर्न भवेच्च तदन्यथा ॥३६३॥
काष्ठं वह्नुज्झितमपि भवेच्छीतशान्त्यै कपीनां लोष्टां शुद्धयै सलिलमनलश्चाग्निशौचैणकानाम् ।
जन्तोर्भावा विदधति यथा भाविनः कार्यसिद्धिं तत्त्वं तेषां क्वचन सहजं वस्तुतो नास्ति किंचित् ॥३६४॥

---

३५० [1]) Thus A_3, A_1 °दुर्गति दृष्टा.—[2]) Thus corr. by later hand from A_1 मैव'. ३५३. [1]) नष्टस्या supplied by A_3 in space left by A_1 ३५८ [1]) राजं omitted by A_1 and supplied by A_3. ३६१. [1]) Thus corr by A_3; A_1 व्यसने संप्रविदश्या'—[2]) Thus corr by A_3 from A_1 विहीना. ३६४. [1]) A_3 gloss अग्निशौचा मृगा अग्निमभन्ति विषमूषका विषं च न विपद्यन्ते जीविता - - - - -. [2]) A_3 यथाभावन.

तस्यामेकादशीरात्र्यन्शुक्लभाद्राष्टमीदिने । देव्यां दिवं प्रयातायां युवराजोभवन्नृपः ॥३६५॥ 365
स्त्रीसंबन्धेन भूपालवरवर्यानां भुवनाद्भुतः । तृतीयः परिवर्तोयं वर्ततेमुत्र मण्डले ॥३६६॥
निर्नष्टकण्टककुले वसुसंपदाढ्ये श्रीसांतवाहकुलभाप महीतलेस्मिन् ।
दावाग्निदग्धकुतरौ जलदाम्बुसिक्ते चूतप्ररोह इव केलिवने प्रवृद्धिम् ॥३६७॥
अथ स मृदुतयान्तर्गूढधैर्यानुभावः सुखमवनिमशेषां देवि सग्रामराजः ।
बिसकुलनिमशोभानिह्नुतप्राणसारः फणकुलं उरगाणामींशितेव न्यधत्त ॥३६८॥

इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसुनोः कल्हणस्य कृतौ राजतरङ्गिण्यां षष्ठस्तरङ्गः ॥
अत्र वर्षचतुःषष्टौ मासेष्वर्धे दिनेषु च । अष्टस्वभूवन्भूपाला दश भूभोगभोगिनः ॥

---

३६५. [1]) Thus corr. by later hand from A, °वशा°. ३६७. [1]) Thus corr by A, from A, निष्पत्रक°.—[2]) Thus corr by A, from A, सालवा°, R G as above.—[3]) A, प्ररुढिम् ३६८ [1]) Thus, corr. by A, from A, फलकुल. *Colophon.* [1]) A, inserts here the note: रा० १० श्लो ३६९ ॥ आदितः रा० ९९ ग्रन्थ २६६३ ॥. —[2]) A, adds here. लिखितश्चैष राजानकरत्नकण्ठेन.—[3]) A, भागिन.

॥ सप्तमस्तरङ्गः ॥

मातुस्तेजनि निर्मले[1] पितृकुले श्लाघ्या तनुर्वैधसा त्वं संध्याहितसंनिधिर्मम जपारक्तेधरे खेलसि ।
संध्यावन्दनसाध्यसूयगिरिजास्तुत्येदृशैर्वाक्कलैर्यः संध्यामपि वन्दते स्म स जगत्त्रीणातु गौरीश्वरः ॥ १॥
क्षमां[2] क्षमापतिर्विभ्रन्मनसा च भुजेन च । गाम्भीर्येण च शक्त्या च सोजयद्वाहिनीपतीन् ॥२॥
जज्ञे राज्ञीक्षये भङ्गो यैस्तुङ्गस्य तदाखिलैः । दिनश्रीविगमे संध्याप्रसङ्गस्येव रागिणः ॥३॥
तत्तत्पतिभटाटोपत्रोटनात्त्यत्युतस्य तैः । उदयो दद्दशे शश्वद्रवेः को वेत्ति वेधसः ॥४॥ युग्मम् ॥
नृपेण ज्ञातज्ञानेयः शूरः शक्तिसमन्वितः । सर्वाधिकारयोग्योगात्तदा चन्द्राकरः क्षयम् ॥५॥
अन्ये भीमतिकाग्रामदिविरस्योरुसंपदः । पुण्याकरस्य तनयाः शूराः शान्तिं प्रपेदिरे ॥६॥
समर्थमन्त्रिविरहादनिच्छन्नपि वेधसा । निन्ये गत्यन्तरत्यक्तस्तुङ्गपक्षं क्षमापतिः ॥७॥
संग्रामराजनुङ्गादीन्देवी कोशमपाययत् । मुमूर्षन्ती पुरा स्थातुमद्रोहेणेतरेतरम् ॥८॥
क्लेशासहो महीपालस्ततः कार्यवशादपि । तुङ्गन्यस्तप्रजाकार्यो भोगाभ्यासालसोभवत् ॥९॥
पर्याप्तं तस्य भीरुत्वं कियदन्यत्प्रकाश्यताम् । असमैर्यैर्नसंबन्धैरक्षमे यशसः क्षतिम् ॥१०॥
साहायकार्थी यत्पादाच्छौर्यादिमति सुताम् । दिङ्मातङ्गपतिपत्ये प्रेमनाम्ने स लोठिक्काम् ॥११॥
क्व लोकोद्दहनोद्युक्तभूभृद्योग्या नृपात्मजा । प्रतिपद्दहजलक्रिञ्चपाणिः क्वाल्पमना द्विजः ॥१२॥
अथ तुङ्गादिभङ्गाय प्रायं ब्राह्मणमन्त्रिणः । परिव्राससुरं विप्रपरिषद्यानकारयत् ॥१३॥
विप्रमन्त्रिमनैक्येन कृतो राज्ञः स विप्लवः । दुःसहः पक्षमानाग्निसमागमसमोभवत् ॥१४॥
राज्ञोऽप्युत्पाटने सद्यैः कथंचित्पार्थितैर्दृढैः । मतिः क्षान्तिचरुप्राये[3] तुङ्गनिःसारणे कृता ॥१५॥
राज्ञां तुङ्गादिभिर्दत्तावत्तेभ्यः प्रतिभुनम् । अन्यत्प्रार्थयितुं लप्तास्तावत्ते शत्रवोदयः ॥१६॥
तुङ्गास्कन्देन विप्रोरुं यो मृतस्तद्गृहे[4] वयम् । तं निर्दहाम इत्युक्ता शवः कोप्यरघट्टनः ॥१७॥
नैरुद्धृत्य यदानीतः शवैस्तुङ्गगृहान्यति । केशहोमाश्च विहितास्था कृत्योत्थापिताभवत् ॥१८॥
तया प्रतीपपाताग्न्या निःशौचानां द्विजन्मनाम् । अकस्माच्चिरगाच्छस्त्रं विनाशायोत्थिते कलौ ॥१९॥ तिलकम्॥
ततः पलायिता विप्रा यस्तेषां मन्त्रदोभवत् । निगूढं राजकुलशास्तद्वेश्म प्राविशन्भयात् ॥२०॥
स व्यक्तीभूतकौटिल्यः संग्रामं सुचिरं व्यधात् । अपद्वारैस्तु ते विप्राः पलाय्य स्वगृहान्ययुः ॥२१॥

---

१ [1]) A, निर्मिते २ [1]) A, gloss शुद्ध क्षान्ति च —[2]) A, gloss संनावर्तन समुद्राश्च. ५. [1]) मा supplied by A,. ८ [1]) A, gloss कांशं । द्विप्य । अपाययत अकारयत् । पीतकोशान कृतवती इत्यर्थः १५ [1]) Thus corr by A, from A, प्रार्थिनो —[2]) A, °प्रार्थेस्तु° १६ [1]) Thus corr by A, from A, राज्ञस्तु° —[2]) A, gloss नि सारणं. १७ [1]) यं supplied by A, —[2]) A, gloss तुङ्ग गृहे

त्रिजिते राजकलशे समकार्या द्विजातयः । मन्त्रिणः श्रीधरसुताः सम्प्रागत्य व्यधुर्मृधम् ॥२२॥
ते कृत्वा सुमहत्कर्म समाप्ति समरे गताः । निर्मिथ मण्डलं सप्त सप्तसप्तेर्बुतं ययुः ॥२३॥
जितः सुगन्धिसीहेन तेषु शान्तेषु संयुगे । बद्ध्वाथ राजकलशस्तुङ्गेनानायितो गृहम् ॥२४॥
नीयमानोधिरोप्याशु स्कन्धं मार्गेषु विक्षतः । तुङ्गस्य युग्यवाहैः स नतितोपकृतायुधः ॥२५॥ 25
अन्योपि भूतिकलशो नाम मन्त्री विनिर्जितः । सुतेन राजकाख्येन सह भूरमठं ययौ ॥२६॥
क्रमात्सुगन्धिसीहाद्यैर्मुक्तः करुणया ततः । सपुत्रः सोत्रमानाप्रितप्तो देशान्तरं ययौ ॥२७॥
परिह्रासपुरादेवं जातो यो देशविप्लवः । स दैवयोगात्तुङ्गस्य शुभाय प्रत्युताभवत् ॥२८॥
ततः प्रसादिते राज्ञि गुणदेवेन मन्त्रिणा । आययौ भूतिकलशः कृतगङ्गानिमज्जनः ॥२९॥
पुनर्नृपगृहे तस्मिन्किंचिद्ध्वपदे शनैः । तुङ्गं निहन्तुं राज्ञैनं गूढं दूताः प्रयोजिताः ॥३०॥ 30
ज्ञातवार्तेन तुङ्गेन तस्मिन्नर्थे प्रकाशिते । सपुत्रो भूतिकलशो राज्ञा निर्वासितः पुनः ॥३१॥
अवष्टब्धं मनाग्लेभे चन्द्राकारसुतः शनैः । यो मध्यामन्तकः सोपि तस्मिन्काले व्यपद्यत ॥३२॥
भुक्त्वा किंचिन्नक्षणं भूभृत्कन्यासंभोगभाजनम् । राजोपकारकुच्छ्रीमान्प्रेमापि ममयं ययौ ॥३३॥
त्रिपेदिरेन्ये गङ्गाद्याः सर्वेपि नृपतिप्रियाः । अवाशिष्यत भोगाय तुङ्गः सभ्रातृकः परम् ॥३४॥
इति यो यो हि वृत्तान्तस्तस्य नाशाय शङ्कितः । स स दैवानुकूल्येन प्रत्युतोद्रेचकोभवत् ॥३५॥ 35
कालक्रमजुषितसंश्रयभुः स्वमूलमात्राश्रयी तटतरुः सरितोम्बुपूरैः ।
यैः शङ्कचते निपतनीति त्रितीर्णमूद्भिर्मैरेव तस्य हि भवेत्स्थितिभूमिदार्ढ्यम् ॥३६॥
नीत्युज्ज्वलं व्यवहरन्प्रजाराधनतत्परः । प्राक्पुण्यसंक्षयात्तुङ्गः शनैस्त्वासीत्स्खलन्मतिः ॥३७॥
यस्त्वभाग्यापहाराय हीनजन्मानमादधे । साहायकाय कायस्थं क्षुद्रं भद्रश्रवाभिधम् ॥३८॥
त्रिर्द्वांणिज्यं सौनिकत्वं काष्ठविक्रयितादि च । आरामिकस्य यस्यासीत्कृत्यं वंशक्रमोचितम् ॥३९॥
कम्बलोद्वृत्तपृष्ठोथ भोजनार्थमवालगत् । भस्त्रामयीभाण्डवाही यश्च पश्वाश्रियोगिनाम् ॥४०॥ 40
अनन्तराजकार्यादिचिन्ताभ्रान्तो विधाय तम् । तुङ्गः सहायं नाबुद्ध संसर्गाद्भाग्यसंक्षयम् ॥४१॥
धार्मिकं तेन धर्मार्कं विनिवार्यार्यचेतसम् । गृहकृत्याधिकारे स दुष्कृती विनियोजितः ॥४२॥
देवगोब्राह्मणानायातिथिराजोपजीविनाम् । अकालमृत्युर्विदधे वृत्तिच्छेदं स दुर्मतिः ॥४३॥
शास्त्राजीवोपि पुण्यानि क्रूरः कापालिको निजान् । भद्रेश्वरस्तु पापोभूत्तिजानामपि जीवहृत् ॥४४॥
तुङ्गेन चैत्रे सर्वत्र कृते भद्रेश्वरे प्रभौ । सुगन्धिसीहः प्रययावाषाढे मासि संक्षयम् ॥४५॥ 45
परलोकं गते तस्मिन्सर्वभारसहेनुजे । तुङ्गश्चिन्नोत्तमाङ्गत्वं सदैन्योमन्यतात्मनः ॥४६॥
श्रीत्रिलोचनपालस्य शाहेः साहायकार्थिनः । देशं ततो मार्गशीर्षे मासि तं व्यसृजन्नृपः ॥४७॥
राजपुत्रमहामात्यसामन्तादिनिरन्तरम् । सैन्यं तमन्वगाद्भूरि भुवनक्षोभनक्षमम् ॥४८॥

---

२४ [1]) A_4 gloss तुङ्गानुजेन. २५. [1]) A_3 gloss वृत्तिकर ३७. [1]) Thus emended with C, A R G °सीदत्यल°. ३९ [1]) A_3 gloss गोमयविक्रयित्व —[2]) Thus corr. by A_4 from A_1 °क्रयिकादि. ४० [1]) The first half of this verse has been omitted by A_1 and supplied by A_3 in margin. ४२ [1]) Thus corr by A_3 from A_1 °कारी ४३. [1]) A_4 gloss तुरुष्कसमरे —[2]) A_1 gloss तुङ्गं.

अथागतेन सम्भृतः शाहिना कृतसत्क्रियः । पञ्चषाणि दिनान्यासीत्तद्देशे स यदोन्मदः ॥४९॥
पजागरचरन्यासशस्त्राभ्यासादिवासनाः । अभियोगोचिताः शाहिरेवंपश्यंस्तं तदाब्रवीत् ॥५०॥ युग्मम् ॥
तुरुष्कसमरे यावत्र यूयं कृतबुद्धयः । आलस्यविवशास्तावत्स्थितास्मिन्गिरेस्तटे ॥५१॥
एवं त्रिलोचनेनोक्तं सोग्रहीन्न हितं वचः । तस्थौ परं समं सैन्यैरुत्सेकादाहवोत्सुकः ॥५२॥
हम्मीरिणं तदा सैन्यं जिज्ञासार्थं विसर्जितम् । तौषीपारे मितप्रायैस्तत्तस्तीर्त्वावधीद्बलैः ॥५३॥
ततस्तमाहितोत्सेकमपि शाहिः पुनः पुनः । जगादाहवतत्त्वज्ञः पूर्वोक्तामेव संविदम् ॥५४॥
स तस्य नाग्रहीद्वाक्यं रणौत्सुक्यवशंवदः । प्रत्यासन्नविनाशानामुपदेशो निरर्थकः ॥५५॥
ततस्ततः स्वयं कोपात्तुरुष्कानीकनायकः । सर्वाभिसारेणागच्छच्छलाहवविशारदः ॥५६॥
अथ तुङ्गस्य कटकः सहसा भङ्गमाययौ । शाहिसैन्यं परं संख्ये ददृशे विचरत्क्षणम् ॥५७॥
शाहिसैन्ये गतेष्वासीज्जयसिंहः स्फुरत्रणे । श्रीवर्धनश्च सांग्रामिविभ्रमार्कश्च डामरः ॥५८॥
घोरे तुरंगतुमुले प्रहरद्भिस्त्रिभिर्भटैः । वीरक्षेत्रे निजे देशे रक्षितस्तैर्यशःक्षयः ॥५९॥
कस्त्रिलोचनपालस्य माहात्म्यं वक्तुमीश्वरः । निःसंख्या अपि यं संख्ये न जेतुमशकन्द्विषः ॥६०॥
शुशुभे रुधिरासारवर्षी युद्धे त्रिलोचनः । कल्पान्तदहनज्योतिर्विसारीव त्रिलोचनः ॥६१॥
स योधयित्वा संग्रामे कोटीः कङ्कटवाहिनाम् । एकाकी कार्यमर्मज्ञो निर्ययौ रिपुसंकटात् ॥६२॥
गते त्रिलोचने दूरमंशेषं क्षितिमण्डलम् । प्रचण्डचण्डालचमूशलभच्छायमानशे ॥६३॥
संग्रामविजयोप्यासीन्न हम्मीरः समुच्छ्वसन् । श्रीत्रिलोचनपालस्य स्मरञ्शौर्यममानुषम् ॥६४॥
त्रिलोचनोपि संभित्य हास्तिकं स्वपदाच्युतः । सयत्नोभून्महोत्साहः प्रत्याहर्तुं जयश्रियम् ॥६५॥
यथा नामापि निर्नष्टं शीघ्रं शाहिश्रियस्तथा । इह प्रासङ्गिकत्वेन वर्णितं न सविस्तरम् ॥६६॥
स्वप्नेपि यदसंभाव्यं यत्र भग्ना मनोरथाः । हेलया तद्विदधतो नासाध्यं विद्यते विधेः ॥६७॥
ईषद्भूमिवैपुल्यं राज्ञः शंकरवर्मणः । वृत्तान्तवर्णने पूर्वममुत्र प्रकटीकृतम् ॥६८॥
स शाहिदेशः सामात्यः सभूभृत्सपरिच्छदः । किमभूत्किमु वा नाभूदिति संचिन्त्यतेधुना ॥६९॥
अवतारं तुरुष्काणां दत्त्वाशेषे महीतले । प्राग्भङ्गस्तस्तस्तुङ्गः स्वदेशं प्राविशच्छनैः ॥७०॥
सृगालायेव तुङ्गाय लब्धभङ्गाय भूपतिः । न तत्रागसि चुक्रोध स धैर्यसदृशाशयः ॥७१॥
किं तु खेदाय समभूत्तुङ्गायत्तत्वमीशितुः । परायत्तया चित्तं पशोरप्युपतप्यते ॥७२॥
तुङ्गात्मजोपि कन्दर्पसिंहः श्रीशौर्यगर्वितः । राजोचितं व्यवहरंस्तस्योद्देगमदोभवत् ॥७३॥
गूढलेखैः क्षणे तस्मिन्छिद्रान्वेषी स भूभुजम् । ज्ञाता विग्रहराजोपि प्रैरयत्तुङ्गमारणे ॥७४॥
कोशादिस्मरणाद्व्याजा चिरं दोलायमानधीः । अभीक्ष्णप्रेरणोद्विग्नः प्रेरकानब्रवीत्ततः ॥७५॥

---

४९. [1]) Thus A_3, A_1 स तथा. ५०. [1]) र supplied by A_3 in space left by A_1.—[2]) Thus corr by A_3 from A_1 °पद्यवत्. ५२. [1]) Thus corr. by A_3 from A_1 °नोक्ताः. ५३. [1]) Thus A_1, altered by later hand to हस्मी°; G as above.—[2]) Thus corr. by A_3 from A_1 °प्राय, A_3 gloss तौषी नाम नदी. ५४. [1]) स्त supplied by A_3. ५६. [1]) Thus A_3; A_1 °रेणोद्गच्छ°. ५८. [1]) Thus A_3, with gloss सङ्ग्रामस्यापत्य साङ्ग्रामि, A_1 सङ्ग्रामे. ६३. [1]) Thus A_3, A_1 रिपुम°. ६८. [1]) A_3 gloss वत्र देशस्य भूमे वैपुल्य. ७२. [1]) पशोर supplied by A_3 in space left by A_1. ७३. [1]) Emended., A राज्यो°. ७४ [1]) Thus A_1, altered by later hand to भूभुजाम् which is found also in G R. ७५. [1]) A_3 gloss वय देव्या पीतकोशा कृता इति स्मरणात्.

एकाकयेव सपुत्रः स गोचरो नः कदाचन । पतेद्यदि क्षणे तस्मिन्पश्यामः किं विदध्महे ॥७६॥
अन्यथा ध्रुवमाक्षिप्तो हन्यादस्मानसौ बलात् । इति कालापहारार्थमुक्ताभूद्गिरतो नृपः ॥७७॥
तावन्मात्रं वचो बीजभूतं हृदि निधाय ते । विधातुं तदवस्थत्वं तुङ्गस्यासन्कृतोद्यमाः ॥७८॥
षण्मासाभ्यन्तरे तुङ्गो भूपेनाकारितो गृहात् । सप्ततो निर्ययौ दृष्टदुःस्वप्नोपि विधेर्वशात् ॥७९॥
स प्रविश्य नृपास्थानं स्थित्वा राज्ञोपनतः क्षणम् । पञ्चभैः सहितो भृत्यैः प्राविशन्मन्त्रमण्डपम् ॥८०॥ 80
पश्चात्प्रविष्टास्तत्रैनं पर्वशार्करकादयः । अनुरक्तापि महीपालं तुङ्गं शस्त्रैरपातयन् ॥८१॥
मन्त्री महारथो नाम योभूच्छंकरवर्मणः । तद्दयस्तुङ्गभृत्येषु श्राव्यः सिंहरथः परम् ॥८२॥
निःशस्त्रो यः क्षणे तस्मिन्परित्राणविधित्सया । हन्यमानस्य तुङ्गस्य पृष्ठे स्वं वपुरक्षिपत् ॥८३॥
तुङ्गस्य प्रथमाघाते रुद्धः श्वासोभवद्भयात् । राजा तस्मिन्निरुच्छ्वासे सोच्छ्वासः समपद्यत ॥८४॥
आस्थानब्राह्मणस्यासीद्भर्मनाम्नः सुतोन्तिके । यः पापकारी तुङ्गस्य पार्श्वः क्रूरश्च दुर्मतिः ॥८५॥ 85
ताभ्यामाभुविरेकिभ्यां त्राणार्थं स्वाङ्गलीमुखे । क्षिप्तद्रव्यां पभुवत्तत्र शस्त्रं त्रासवशाज्जहे ॥८६॥
अन्तरङ्गाश्च चन्द्राद्या येभूवंस्तुङ्गमन्त्रिणः । तैः स्त्रीवदासितं तूष्णीं त्रस्तैः शस्त्रान्वितैरपि ॥८७॥
अज्ञानतुङ्गमृत्युभ्यस्तुमुले तत्र भूपतिः । तङ्कृत्येभ्यः शङ्कमानो वह्निदानाहवादिकम् ॥८८॥
आश्वासाय स्वभृत्यानां क्षित्वा खंड्गेन सत्वरम् । पातयामास तुङ्गस्य सप्ततस्य शिरो बहिः ॥८९॥
दृष्ट्वा स्वामिशिरश्छिन्नं सैन्ये दैन्यात्पलायिते । भृत्यतामुज्झवलीचक्रुः कतिचित्तुङ्गसेवकाः ॥९०॥ 90
भुजंगनामा सामन्तद्विजापत्यो गृहागतः । संग्रामराजं विदधे गेहाद्वेहं पलायितम् ॥९१॥
द्वारं कनकदण्डेन भञ्जन्नर्गलितं ततः । विशति हतवान्योधान्स राजास्थानमण्डपे ॥९२॥
कोशाधिकारि त्रैलोक्यराजनामा हतो रणे । कृष्यामन्तकधात्रेयो वीरोप्यभिनवाभिधः ॥९३॥
अङ्गने त्रिंशदेकाङ्गा वीरास्तुङ्गोपजीविनः । श्रेणीं बबन्धुर्निहता निःश्रेणीं स्वर्गपदृतेः ॥९४॥
संग्रामं पद्मराजाख्यः कृत्वापि निःसृतोक्षतः । स्वामिप्रमथदुःखाभिनापं तीर्थाश्रयाज्जहौ ॥९५॥ 95
अन्ये लोकद्वयत्राणमित्रं शस्त्रं रणाङ्गने । संत्यजन्तो व्ययुज्यन्त यशसा जीवितेन च ॥९६॥
चन्द्राख्यः सुभटंमन्यो दैशिकश्चानुनामिधः । हेलाचक्रो डामरश्च व्यक्तशस्त्राः परैर्हताः ॥९७॥
लोठितावसथस्तुङ्गो लुण्ठितश्रीर्महीभुजा । आषाढभूकृद्वादश्यां कथाशेषो व्यधीयत ॥९८॥
निर्द्रोहवृत्तौ भूभर्त्रा तुङ्गे सतनये हते । लब्धोदया व्यजृम्भन्त खलप्रायाः नृपास्पदे ॥९९॥
राज्ञो मनः कलुषयन्गूढपैशुनकर्मणा । यो भ्रातृभ्रातृसुतयोर्विपत्तौ हेतुतां गतः ॥१००॥ 100
स दुष्प्रवादनिर्दग्धो नागो निजकुलान्तकः । तुङ्गभ्राता ततो राज्ञा कम्पनाधिपतिः कृतः ॥१०१॥ युगलकम्॥
भार्या कन्दर्पसिंहस्य क्षेमा परमचर्षणी । नागेन संगमं चक्रे रक्षसेवामितक्षपाः ॥१०२॥
प्रशान्ते तुमुले विम्बा चतुर्भिर्दिवसैः सती । तुङ्गकृपा सुता शाङ्गैः प्रविवेश हुताशनम् ॥१०३॥

---

७७. [1]) Thus corr. by A, from A, श्रयमा° ७९ [1]) Thus corr by A, from A, गृहान्. ८४. [1]) Emended; A R G रुद्धश्वासो°. ८७. [1]) च supplied by A, in space left by A, ९२ [1]) Thus corr by A, from A, रङ्गन्तेर्गलितं हत ९५ [1]) Thus corr by A, from A, °क्ष्य कृत्वा.—[2]) A, निस्सृतो, A, निसृतो. १००. [1]) Thus corr. by A, from A, भ्रातृपुत्रसुत°. १०२ [1]) Emended, A °चर्षणी —[2]) A, gloss रक्षो हि रात्रौ चरति.

मन्मायामवरुद्धायां कन्दर्पो यावजीजनत् । पुत्रं विचित्रसिंहं च मातृसिंहं च विभुतौ ॥१०४॥
गृहीत्वा तौ स्नुषां तां च मङ्खेना तुङ्गवल्लभा । देशाद्विनिर्गता दीना राजपुर्यां स्थितिं व्यधात् ॥१०५॥ युग्मम्॥
तुङ्गस्थाने ततो राज्ञा पापो भद्रेश्वरः कृतः । भुवनेश्वरादिदेवानां चक्रे कोशादिलुण्ठनम् ॥१०६॥
किंयद्विवेकवैकल्यमस्य राज्ञः प्रकाश्यताम् । तादृशानपि यश्चक्रे पार्थादीनधिकारिणः ॥१०७॥
पार्थः परमदुर्मेधाः ख्यातो भ्रातृकलत्रगः । निर्विचारेण यत्नेन नगराधिकृतः कृतः ॥१०८॥
वधादिपापं पार्थेन सुकृतत्यक्तचेतसा । पवित्रे प्रवरेशस्य रङ्गपीठे प्रवर्तितम् ॥१०९॥
चक्रे लुब्धस्य भूभर्तुर्मतङ्गः कृपणाग्रणीः । सिंधोः सुतः कोशवृद्धिं प्रजापीडनपण्डितः ॥११०॥
पुरा देवमुखाख्यस्य दिविरस्य किलाजनि । आपूपिकायां वेहयायां पुत्रश्चन्द्रमुखाभिधः ॥१११॥
यस्तुङ्गोपाश्रयालब्ध्वा लालितत्वं महीपतेः । वराटकात्प्रभृत्यासीत्कोटीनां कृतसंचयः ॥११२॥
विभूतिमध्ये लुब्धस्य प्राभृतार्थान्यदौकितैः । अपूर्वैर्निजभृत्येषु विक्रयोभूत्कुलोचितः ॥११३॥
प्रभूतामिररोगश्च भूत्वा लब्धोदयः पुनः । यो मन्दाग्निः सरोगश्च निर्धनोऽकैर्व्ययहस्यत ॥११४॥
एकमेवाभवत्तस्य सुकृतं मरणक्षणे । कोटेस्त्रिभागं यददाच्छूरणेश्वरयोजने ॥११५॥
तदात्मजाः कृता नानाभागनन्दिमुखास्त्रयः । अधीशाः पृतनाङ्गस्य राज्ञा तुङ्गोपजीविनः ॥११६॥
हास्यं बभूव भूभर्तुस्तेषां तुङ्गपदार्पणम् । बन्धने यत्रकाण्डीनां हेमस्थाने शिशोरिव ॥११७॥
ते तुरुष्कान्हवे राज्ञा तुङ्गवत्सहिताः पुनः । प्रत्यावृत्त्य ययुर्देशं निजमेव पलायिताः ॥११८॥
इत्थं मन्त्रिष्वयोग्येषु क्षान्तिशीले च भूपतौ । केचिदुद्रेकमभजन्दरद्विरदामराः ॥११९॥
सा लोठिकामडं कृत्वा लोठिका नृपतेः सुता । तिलोत्तमाया विदधे मातुर्नाम्नापरं मडम् ॥१२०॥
पापिनामपि हन्तेयं कापि सत्कर्मवासना । भद्रेश्वरोपि यश्चक्रे विहारं सुकृतोज्ज्वलम् ॥१२१॥
सत्यं विवेक्ता संग्रामराजो योन्याय्यतोर्जितम् । निजं त्रुवाणो द्रविणं प्रपामपि न निर्ममे ॥१२२॥
श्रीलेखा पार्थिवबधूः श्रीयशोमङ्गलात्मजा । पत्यौ शिथिलसामर्थ्ये स्वैरिणीत्वमसेवत ॥१२३॥
सुतः सुरान्धिसीहस्य जयलक्ष्म्यां बभूव यः । वल्लभो निर्भरं देव्यां सोस्यास्त्रिभुवनोभवत् ॥१२४॥
स जयाकरगच्छादिगच्छलट्टातिनीरुधीः । कोशोपकारकृत्तस्या जारोप्यासीज्जयाकरः ॥१२५॥
मयग्रामीणगच्छादिकर्त्री संचयतत्परा । साभूद्भर्तुः प्रसादेन सुभगा भूरिवैभवा ॥१२६॥
स चतुर्थसमाषाढप्रारम्भाहे महीपतिः । हरिराजाभिधं पुत्रमभिषिच्यास्तमाययौ ॥१२७॥
सुमनःसेवितः कुर्वन्नशेषाशाप्रकाशनम् । द्वादशवर्षः स सर्वस्य चैत्रोत्सव इवाभवत् ॥१२८॥
अमोघाज्ञेन तेनेमां निश्चौरां कुर्वता महीम् । पण्यवीथ्यां निशीथिन्यां निधिद्वारं संवृतिः ॥१२९॥
अचिरस्थायिनी राज्ञस्तस्याज्ञाचिन्तितोर्जितः । वन्ध्या नवेन्दुलेखेव पार्थिवानामजायत ॥१३०॥

---

१०४. [1]) A_3 gloss कन्दर्पसिंह॰ १०५. [1]) युग्मम्. added by A_3. ११०. [1]) Emended with G C, A R भूभर्तु सतङ्ग ११३ [1]) A_3 gloss कोशालिकार्थे. ११७ [1]) Thus A_1, A_2 °वेर्पणम् १२४ [1]) Thus corr by A_3 from A_1 °लक्ष्मी १२५ १२६. [1]) The words from गच्छादिगच्छलट्टा° to मवधामीण in the following verse have been omitted by A, and supplied in margin by A_3, they are found in G R. १२८. [1]) A_3 gloss पण्डितैः पुरश्च —[2]) A_3 gloss आकाङ्क्षा विलम्ब — [3]) A_3 gloss हास्यं सांधम्य १२९ [1]) [2]) Thus corr. by A_3 from A_1 पुण्यवीथ्यां and निशीथिन्यां. ११०. [1]) Thus A_2, A_1 °ज्ञाचिन्तनोर्जित.

द्वाविंशतिमहाब्दीं स रक्षित्वा क्षमापतिः । स्वयं यशो भुवियशाः शुचिभुक्लाष्टमीदिने ॥१३१॥
प्राणिनां योगमानानां नक्षत्राणामिव क्षणात् । लक्ष्मीर्यौष्मक्षयंपेयं संगता भङ्गदायिनी ॥१३२॥
समन्योः स्वैरिणीवृत्तिः सुतस्य जननी निजा । अभिचारं चकारास्येत्यविज्ञानां जनभुतिः ॥१३३॥
राज्योपकरणे सज्जीकृते राज्यार्थिनी स्वयम् । सा राजमाता श्रीलेखा यावत्स्वात्वा समागता ॥१३४॥
मिलित्वैस्तावदेकाङ्गैर्भ्रात्रा धात्रेयकेण च । सागराख्येन तत्पुत्रो बालोनन्तो नृपः कृतः ॥१३५॥ युग्मम् ॥ 135
निर्धिं जिघृक्षोरन्येन हते तत्र प्रमापणम् । तद्भक्षिणोर्हेलुब्धस्य पापायैव यथा किल ॥१३६॥
राजमातुस्तथा राज्यलुब्धायाः पुत्रनाशनम् । अभूदन्यहते राज्ये वृत्तिनायैव केवलम् ॥१३७॥ युग्मम् ॥
सा राज्यविप्लवम्लेन तादृशा व्यथिताशया । व्यस्मरत्तनयस्नेहं धिग्भोगाभ्यासवासनाम् ॥१३८॥
अथाजगाम स्थविरः पितृव्यो बालभूपतेः । राज्यं त्रिप्रहराजाख्यो हर्तुं विततविक्रमः ॥१३९॥
स लोहरास्यचलितो दत्त्वा हारमनार्कतः । दिनद्वयेन सार्धेन नगरं सत्वरोविशत् ॥१४०॥ 140
श्रीलेखायेन्विताः सेनाः प्रविष्टं लोठिकामटम् । उद्दीपिताप्रयस्तत्र निजघ्नुस्तं सहानुगम् ॥१४१॥
मठद्वयं ततः कृत्वा स्वस्य भर्तुः सुतस्य च । तस्थौ व्ययवती राज्ञी राज्यद्रोहोद्यतानिशम् ॥१४२॥
ततो नरपतिः किंचिच्छनैः शिथिलशैशवः । अतिव्ययादिव्यसनी यमेश्वरतयाभवत् ॥१४३॥
तस्यासन्नुद्रपालाद्याः शाहिपुत्राः परं प्रियाः । अनल्पवेतनादानै राज्योत्पत्त्यपहारिणः ॥१४४॥
कृतप्रत्यहनिर्वाहः सार्धलक्षेण भूभुजा । रुद्रपालो दरिद्रत्वं कदाचिदपि नात्यजत् ॥१४५॥ 145
दिहापालः क्षमापाललब्धया प्रतिवासरम् । सहस्राणामशीत्यापि शेते स्म न सुखे निशि ॥१४६॥
अनङ्गपालवेतालश्चके क्षमापाललालितः । शश्वत्सुवर्णगीर्वाणप्रतिमापाटने मनः ॥१४७॥
रुद्रपालः परित्राता धनप्राणादिहारिणाम् । बभूव चौरचण्डालप्रायाणां वधपक्षरः ॥१४८॥
कायस्था रुद्रपालाद्याः प्रजानां पीडनं व्यधुः । चकाशान्धमठं श्रीमानुत्पलाख्यो यदपणीः ॥१४९॥
क्रियद्भूपालवाक्षभ्यमन्यत्तस्याभिधीयताम् । जालन्धराधिपस्येन्दुचन्द्रस्येन्दुमुखीं सुताम् ॥१५०॥ 150
उपयेमे मनोज्ञत्वाज्ज्येष्ठामासंमतिं स्वयम् । यया मठः स्वाभिधया विदधे त्रिपुरेश्वरे ॥१५१॥
तस्याः किंचिद्वयोन्यूनां स्वसारं यो यवीयसीम् । अथ सूर्यमतीं देवीं भुभुजे परिणीतवान् ॥१५२॥
रुद्रेण भूपतिः सख्या स कर्णसुखदायिना । पात्रीकृतो दुर्नयानां कर्णेनेव सुयोधनः ॥१५३॥
कम्पनाधिपतिस्तत्र क्षणे त्रिभुवनो बली । आयथौ भूपतेर्हर्तुं राज्यं संभृतडामरः ॥१५४॥
आकृष्टादोषकटके तस्मिन्योद्धुमुपागते । एकाङ्गाः सहयारोहा राजपक्षं न तत्यजुः ॥१५५॥ 155
असिना लङ्घयन्यासानमोघाऽस्त्राण्यविक्रमः । प्रजहारानन्तदेवः स्वयं त्रिभुवनं रणे ॥१५६॥
संनाहरक्षिनाङ्गः स दृढप्रहतिपीडितः । विदद्रौ वदनेनासृक्स्वप्रतापमिवोद्गमन् ॥१५७॥
विनयच्छत्रशौटीर्यैः शिथुप्रायः स भूपतिः । दृष्ट्वा बलमसंभाव्यं तस्मिंस्त्यक्त्वा रणं गते ॥१५८॥

---

१३१. [1]) स्वविगाता supplied by A, in space left by A, १३५ [1]) A, gloss तस्या अपर पुत्र १३६ [1]) Thus A, ; A, रत्न १३९. [2]) Thus A R ; G C हन्तु १४१. [1]) Thus corr by A, from A, प्रविष्टं. १४७. [1]) Thus corr. by A, from A, [2]मापटले १५० [1]) प supplied by A, १५१ [1]) मास supplied by A, in space left by A, १५२ [1]) Thus A, . A, किंचिदिव १५७ [1]) A, gloss चचाल १५८. [1]) A, gloss शौटीर्य अभिमान प्रागल्भ्य वा —[2]) A, gloss शिथुसदृश

शमालाडामरं प्रन्तं प्रातैरभिनवाभिधम् । शालास्थले व्यधाल्लाघ्यविक्रमो मोघविक्रमम् ॥१५९॥
मांसासृग्वेष्टनाद्यष्टीभूनखङ्गो भ्रमन्रणे । भुवनक्षोभकृदभूद्वैरवोनन्तभूपतिः ॥१६०॥
पश्यन्प्रहारलूनाङ्गानेकाङ्गान्स पदे पदे । निवेशमाननस्थैर्यमयहणपूर्वकम् ॥१६१॥
क्षितिभृज्ज्ञातदाक्षिण्यो विलम्बिस्थावरे ततः । चाम्बल्यमक्षपटलादेकाङ्गानां न्यवारयत् ॥१६२॥ युग्मम् ॥
एवं तत्र कृतज्ञेन भृत्येभ्यः प्रतिपादिता । विलम्बिस्तेन दीनारकोटिषण्णवतेः क्रमात् ॥१६३॥
राज्ञो रणाग्निवृत्तस्य दुग्धसेकैः करात्सरुः । स्थिरमहद्दः कृष्टश्रिरेणेति जनश्रुतिः ॥१६४॥
अहो महत्त्वं भूभर्तुर्दीनो देशान्तरागतः । तादृक्त्रिभुवनो येन संविभेजे विमन्युना ॥१६५॥
ब्रह्मराजाभिधस्तेन बन्धुर्गन्ध्राधिपः कृतः । रुद्रपालकृतद्वेषो विरक्तश्चलितो ययौ ॥१६६॥
सप्तभिर्म्लेच्छभूपालैः समं मिलितडामरः । तेनानीतो दरद्राजो यत्रादश्चलमङ्गलः ॥१६७॥
क्षीरपृष्ठाभिधं ग्रामं प्राप्तस्य समरोत्सुकः । तस्यापि विक्रमोदग्रो रुद्रपालो विनिर्ययौ ॥१६८॥
श्रो व्यवस्थापिते युद्धे सैन्याभ्यां दरदीश्वरः । क्रीडन्यिण्डारकाख्यस्य नागस्य भवनं ययौ ॥१६९॥
दुर्नयाचरणात्तत्र पार्श्वस्थैर्वारिनोपि सः । ध्रुवमानस्य मत्स्यस्य गात्रे कुन्तमपातयत् ॥१७०॥
अथोज्जगाम गोमायुवपुः कुण्डाङ्कुजंगमः । स च नं मृगयोत्सुक्यादधावद्दरदीश्वरः ॥१७१॥
तमापतन्तमालोक्य व्यवस्थोन्मूलनं विदन् । आस्कन्दाशङ्कि भूभर्तुः सैन्यं युद्धाय निर्ययौ ॥१७२॥
अभूत्तोत्रसंघर्षसंजातानलसंहतिः । कृतस्वर्गाङ्गनोद्वाहो वीराणां समरोत्सवः ॥१७३॥
तस्मिन्महाभटाटोपे शिरश्छिन्नं दरत्यतेः । रुद्रस्य रौद्रमहसः संप्ररूढं यशः पुनः ॥१७४॥
समरे वधबन्धादि म्लेच्छराजाः प्रपेदिरे । संप्राप हेमरत्नादि पुनः कइमीरभूपतिः ॥१७५॥
उत्तंसमुक्ताद्योताम्भःक्षालितास्रझलञ्झलम् । रुद्रपालो दरद्राजशिरो भर्तुरुपानयत् ॥१७६॥
भ्रात्रोदयनवत्सेन कृतप्रायैस्तया द्विजैः । बह्वीश्चैवंविधास्तस्य बभूवुरवदानिकाः ॥१७७॥
रुद्रपाले ततो लूतामयेन प्रमयं गते । अन्येपि ज्ञातिनत्याः क्षिप्रमेव क्षयं ययुः ॥१७८॥
पालस्खलन्त्यविगमे शुद्धाशयजुषोभवत् । देवी सूर्यमती भर्तुर्दर्पणस्येव बिम्बिता ॥१७९॥
सुभटापरनामा सा गौरीश्वरविधायिनी । पुण्यं वितस्तापुलिने निर्ममे सुभटामठम् ॥१८०॥
गोहेमहयरत्नादिप्रदानैः सुबहून्द्विजान् । सदाशिवप्रतिष्ठायामवरिद्रांश्चकार सा ॥१८१॥
आज्ञाचन्द्रापराख्यस्य कल्हनस्यानुजन्मनः । नाम्ना व्यधापि वात्सल्यात्सामहारो मठस्तया ॥१८२॥
सिल्हनाख्यस्य च भ्रातुर्भर्तुश्चाभिधया सती । मठौ चाकारयत्पार्श्वे विजयेशामरेशयोः ॥१८३॥
अष्टोत्तरं नागहारशतं श्रीविजयेश्वरे । ब्राह्मणेभ्यो महापुण्यं विद्वद्भ्यः प्रत्यपादयत् ॥१८४॥
पत्युर्नाम्ना व्यधाद्धारान्यदद्वामरेश्वरे । त्रिशूलबाणलिङ्गादिप्रतिष्ठाश्च विनिर्ममे ॥१८५॥

---

१५९ [1]) Thus corr. by A_3 from A_1 मोघविक्रियम १६२ [1]) Supplied by A_3. १६६ [1]) Emended with G C, A कूप [illegible]. [1]) A_3 gloss ब्रह्मराजेन — [2]) चलमङ्गल supplied by A_3 in space left by A_1, A_2 gloss नाम १६८. [1]) Thus A_1, A_2 खरपृष्ठा°, with gloss खरोष्ट इति नाम क्रमराज्ञ्य १७२ [1]) Emended, A त्रिदन. १७६ [1]) A_3 gloss उत्तंसमुना या मुक्ता मुक्ता-फलस्य तासां यो द्योत वांग्रि स एवाम्भ तेन क्षालिता अस्रस्य रुधिरस्य झलज्झलाकाचकस्य प्रकाश स्फार इति यावत् यस्य तत इति शिरोविशेषण। झलज्झला तु शोभायामिति कोश मुक्ताफलवीग्रेनिशुद्धस्वाम्भस्त्वेन रूपणम। जलस्य हि शुद्धं रूपमिति वैशे-षिका॥ —[2]) Thus corr by A_3 from A_1 झलज्झलस.—[3]) Thus corr. by A_3 from A_1 °रूपायनम. १७७ [1]) Thus A_3, A_1 तथा स्रवं°

दंपती राजराजाख्ये मृते पुत्रे पत्नक्रतुः । सदाशिवान्तिके राजवेश्म संत्यज्य तौ स्थितिम् ॥१८६॥
ततः प्रभृति सत्यज्य पूर्वराजकुलस्थितिम् । तयैव रूढ्या भूपालास्तत्रैव वसतीर्ययुः ॥१८७॥
पार्थिवस्याश्वशालीयाः प्रियवाजिजया प्रियाः । प्रसादैर्देशनुण्ण्यां च सर्वतः समतां ययुः ॥१८८॥
गर्भेश्वरतया भर्तुर्वल्लभो नर्मकोविदः । अलुण्ठ्यपत्रजा नित्य इल्लकी नाम दैशिकः ॥१८९॥
मालवाधिपतिर्भोजः प्रहितैः स्वर्णसंचयैः । अकारयद्येन कुण्डयोजनं कपटेश्वरे ॥१९०॥ 190
प्रतिज्ञा भोजराजेन पापमूदनतीर्थजैः । सततं वदनक्षालने या तोयैर्विहिताभवत् ॥१९१॥
अपूरयत्तस्य यस्तां दुस्तरां नियमादितः । प्रहितैः काचकलशीकुलैस्तद्वारिपूरितैः ॥१९२॥
स तस्य पद्मराजाख्यः पर्णप्राप्तिकदैशिकः । प्रियतास्बूलशीलस्य त्यागिनो वल्लभोभवत् ॥१९३॥ चक्रलकम् ॥
तेन नागरखण्डादिपर्णविक्रयिणा नृपः । देशोत्पत्तिधनं प्रायो निःशेषं दापितस्तदा ॥१९४॥
पञ्चचन्द्रकशोभाढ्यमौलिसिंहासनं नृपात् । बन्धयादत्त लब्धव्ये धने स धनिकोधिके ॥१९५॥ 195
तद्राजचिह्नमास्थानोपयुक्तं तस्य मन्दिरात् । आनीयमानं मासांधवासरे मासि मास्यभूत् ॥१९६॥
स्वकोशसंक्षयं दृष्ट्वा देवी सूर्यमती ततः । पद्मराजोद्भवां देशस्थाप्यवस्थां न्यवारयत् ॥१९७॥
शमिते चाश्वशालीयदल्लकादिभये तदा । प्रावर्तन्त पुनर्देशे व्यवस्था निरुपद्रवाः ॥१९८॥
ततः प्रभृति राज्ञेव राजकार्योद्यतोभवत् । तस्थौ शौर्यकथां त्यक्त्वा राजा कार्यकरः पुनः ॥१९९॥
भर्तुर्नीरीविधेयत्वं तस्या भर्तृजयस्तथा । निष्कलङ्केन शीलेन नान्योन्यं गर्ह्यतांगतः ॥२००॥ 200
भवभक्तिव्रतस्नानैत्यागशीलादिभिर्गुणैः । कृतिनानन्तदेवेन मुनयोपि विनिर्जिताः ॥२०१॥
राज्ये तस्य महीभर्तुर्दर्पि तांस्तानलङ्घयत् । पतिवरेव राजश्रीर्भृत्याज्ञवनवोन्मुखी ॥२०२॥
क्षेमाभिधो राजगच्छपुरणं बालभञ्जकः । व्यधाद्भादशभागादिप्रकारैर्दैकयन्पनम ॥२०३॥
मन्त्री ततोभवत्सापुस्त्रैगर्तः केशवो द्विजः । सौधश्चन्द्रातपेनेव भूपालो येन भूषितः ॥२०४॥
भ्रात्यन्गतश्रीरेकाकी स एव ददृशे जनैः । भाग्याम्बुवाहतडितेव निविडाः कस्य संपदः ॥२०५॥ युग्मम्॥ 205
भाग्याधीनं धनं ध्यात्वा मुधा मुग्धधियामसौ । कुलविक्रमयोर्दर्पो मिथ्यैव पृथुतां प्रति ॥२०६॥
प्रासादपालवैद्यस्य गौरीशब्दिदशालये । भुर्तेहलधरो वज्रो वराहश्चाभवन्सुताः ॥२०७॥
तेभ्यो हलधरः सूर्यमन्या विहितसेवनः । वृद्धिं दिने दिने गच्छंल्लेभे सर्वाधिकारिताम् ॥२०८॥
विधेयान्बुद्धियुक्तेन कुर्वतः क्षित्यनन्तरान् । सपत्नीकोभवत्तस्य सुखप्रेक्षी क्षमापतिः ॥२०९॥
क्षेमेण सूत्रितं पूर्वं सपादायमुदग्धीः । कर्मस्थानं स्फुटीचक्रे सर्वस्थानंधुरंधरम् ॥२१०॥ 210
अभूद्गणकमुल्यादिलेखनं कनकस्य यत् । राजायत्तं जनस्यार्थसंचयानां प्रकाशकम् ॥२११॥
स तत्रिवारयामास भाविनां भुभुजां विदन् । ज्ञानीं संचितवित्तस्य दण्डाद्यायासकारिताम् ॥२१२॥

१८७. [1]) Thus corr by A_3 from A_1 रूढ्या १८८. [1]) Thus corr. by A_3 from A_1 °लुण्ठ्या १९० [1]) Thus corr by later hand from A_1 °भोजै. १९२. [1]) A_3 gloss प्रतिज्ञां.—[2]) Thus corr. by later hand from A_1 प्रहितै काशक° —[3]) A_3 gloss शेष इति भाषया १९३. [1]) A_3 gloss मासविशेष १९५ [1]) Thus corr by later hand from A_1 °सनं १९६ [1]) पं supplied by A_3 in space left by A_1 २०० [1]) Thus corr. by later hand from A_1 शीलेना —[2]) Thus corr by A_3 from A_1 गृह्यता° २०१ [1]) Thus corr by A_1 from A_1 °स्थान° २०३ [1]) A_3 gloss नापित २०४ [1]) Thus corr by later hand from A_1 केशवां. २०७. [1]) Thus A_1; A_3 भूमिर्ह°. २०९. [1]) Thus A_1, A_3 °द्युद्यम.—[2]) Thus corr by A_3 from A_1 °न्तरम. २१० [1]) Thus A_1, A_3 सर्वकार्यधु° २१२. [1]) Thus A_1, A_3 ज्ञाने

भर्त्सितानभ्रशालीयान्धनदारापहारिणः । कांश्चिद्व्यापाद्य स शमं निन्ये लोकस्य विभ्रवम् ॥२१३॥
तनायासहता नीतः कचत्स्वर्णैः सुरास्पदैः । शोभां मठापहारैश्च वितस्तासिन्धुसंगमः ॥२१४॥
भ्रातरश्च सुताश्चास्य लक्ष्मीपरिचयोन्मदाः । द्विरदा इव न क्वापि दानप्रणयितां जहुः ॥२१५॥
तद्भ्रातृपुत्रो विम्बाख्यः श्रीमान्वीरो वराहजः । द्वाराधिकारकार्यासीद्भानप्रलयवारिदः ॥२१६॥
स डामरकुलाकालमृत्युः स्वल्पानुगोभवत् । खशाहवे जहौ प्राणान्पलायनपराङ्मुखः ॥२१७॥
चम्पायां सालभूपालमुन्मूल्यानन्तभूपतिः । तत्तनूपजयी नव्यं धराधवमरोपयत् ॥२१८॥
मन्त्रभून्येन शौर्येण परदेशेषु भूपतिः । हठप्रवेशाभिज्ञदर्पसोभुक्कुच्छ्रमनोसकृत् ॥२१९॥
तुक्कात्मजस्य कलशास्यारब्धौ खिन्नसैनिकम् । अमोचयद्बलधरो युक्त्या वल्लापुरादमुम् ॥२२०॥
उरशां च प्रविष्टस्य वैरिरुद्धाध्वनो व्यधात् । कम्पनाधिपतिस्तस्य मार्गान्संशोध्य निर्गमम् ॥२२१॥
कालेनन्तमहीभर्तुर्वीरविग्रहसंकटे । साहसान्युदजृम्भन्त तानि तानि क्षणे क्षणे ॥२२२॥
राजेश्वरो द्वारपतिः श्रीमान्भद्रेश्वरात्मजः । डामरैः क्रमशोऽन्यस्थैरन्वेषि बहवो हताः ॥२२३॥
वीक्ष्य नीतिदृशा कार्यं भीत्या व्यत्वहरन्नपि । भृत्यतां निष्परिभवां को भुङ्क्ते नृपमन्दिरे ॥२२४॥
दुष्प्रवादास्पदीभूतो देव्या निर्विडंसेवनात् । आशाचन्द्रादिभिः कुद्धैर्बद्धो बलधरोऽभवत् ॥२२५॥
स राज्ञा हृतसर्वस्वो बन्धनक्लेशमन्वभूत् । भाग्यप्रभावे निःसारे सुखमेकान्ततः कुतः ॥२२६॥
नृपेण बन्धनात्त्यक्तं तं श्रीः प्रत्यागता पुनः । आलिलिङ्ग सितच्छत्रलक्ष्म्याश्मितसिताननं ॥२२७॥
स राज्याः प्रावृष इव प्रणयेन क्षणे क्षणे । कोपप्रसादमेघार्कपर्यायापातमन्वभूत् ॥२२८॥
ततः सरलचित्तस्य क्रमेण समपद्यत । भार्याजितत्वं भुवर्तुर्दुर्विपाकार्पणोन्मुखम् ॥२२९॥
अधिकारपरित्यागाद्दोषाननुशयावहान् । वङ्क्रिर्वार्यमाणोऽपि प्राशैर्हलधराजिभिः ॥२३०॥
पत्न्या संप्रेरितः शश्वत्तनयस्नेहमुद्रया । पुत्राय कलशायाभूद्राज्यं दातुं समुद्यतः ॥२३१॥
न्यास्यन्यनुशयं राजन्नेवंवाद्यपि कारितः । सज्ञं तेन रणादित्यनामा क्षत्ताभिधेयनम् ॥२३२॥
एकाब्दचत्वारिंशत्य वर्षस्य तनयः सिते । पक्षेह्नि बाहुलस्यांभूदभिषिक्तो महीभुजा ॥२३३॥
अथास्थाने रणादित्यो राजपुत्राज्ञिवेशयन् । चिन्तयन्राज्यमाहात्म्यं प्रतिपत्तिषु निष्णुरः ॥२३४॥
अनन्तो राजपुत्रोयं देवेति कथयन्वचः । कृकाटिकान्यस्तहस्तः क्षितिपालं न्यवेदयत् ॥२३५॥
कुपितेन स भूभर्त्रा परिवृत्यावलोकितः । एवं कृतस्मितो व्यक्तं तमूचे नीतिनिष्णुरः ॥२३६॥
हत्यं यत्र निवेद्यन्ते कान्यकुब्जादिभूभुजः । तत्रैव त्यक्तराज्यस्य कान्यास्तु प्रक्रिया तव ॥२३७॥
दिने दिने सानुशयो नियत भविता भवान् । नाभिमानपरित्यागः कर्तु शक्यो मुनेरपि ॥२३८॥
सुदूरदर्शिनां तत्र मन्त्रिणां हृदयंगमम् । राज्ञा तस्य वचः श्रुत्वा प्रतिवाक्यायासमोभवत् ॥२३९॥
दृष्ट्वान्येषुनवं भुवं राजचक्रेण सेवितम् । नवेतरं च सहितं परिमेयैः परिच्छदैः ॥२४०॥

---

२१४ [1]) Thus corr by A_3 from A_1 कांश्चित्त्व[2]), A_2 gloss कचत् क्वचित्यमान स्वर्ण यथा तैः. २१७. [1]) Thus corr by A_3 from A_1 °भवत —[2]) Thus A_1, A_2 जहत २२० [1]) मुक्ता supplied by A_3 in space left by A_1 २२१ [1]) Thus corr by A_3 from A_1 मार्गान्स[2] २३२ [1]) सज्ञं supplied by A_3 in space left by A_1.—[2]) A_3 gloss नेनानन्तनेवेन रणादित्य-नामा क्षत्ता प्रतीहार अभिषेचन सज्ञं कारित इत्यन्वय कथ भूत एवमाह अपि २३३. [1]) A_2 gloss कलश.—[2]) Thus corr by later hand from A_1 बहं, A_2 gloss कार्तिकस्य २३४ [1]) प supplied by A_2

धीमान्हलधरो युक्त्या कृतकासूयया नृपम् । एवं निर्भर्त्स्यैवंलक्ष्मीं तं प्रत्याजीहरत्पुनः ॥२४१॥
विधाय निःसुखं सूनुं राज्यभारार्पणाच्छिशुम् । कस्मात्स्वसुखसापेक्षो न जिह्रेष्यत्र वार्द्धके ॥२४२॥
तत्स्वयं राजकार्याणां कार्यमुद्वहनं त्वया । अभून्मे यौवनाभोगैरयमस्तु सुतस्तव ॥२४३॥
इत्युक्ता स पुनर्भूपमधिकारमजिग्रहत् । चक्रे कलशदेवं च कलया युक्तिवञ्चितम् ॥२४४॥
पित्रोरेवान्तिके कुर्वन्नाहाराद्यपि संततम् । ततो बभूव कलशो नाममात्रमहीपतिः ॥२४५॥ 245
सर्वास्थानास्वपृच्छादिविधाने पार्थिवोचिते । पितुः सहायकल्पः स पौरोहित्यमिवाकरोत् ॥२४६॥
अनिमित्तप्रहृष्टानामनिमित्तानुतापिनाम् । न क्वापि चलचित्तानां तिरश्चामिव निश्चयः ॥२४७॥
दापयित्वा पतिं राज्यं निर्वन्धेनापि तावता । सूनौ बभूव यद्राज्ञी विषेमेवानुतापिनी ॥२४८॥
सेर्ष्या क्षुण्णामुत्कर्षं पार्थिवप्रमदोचितम् । वेषालंकरणादौ सा रूक्षचित्ता न चक्षते ॥२४९॥
दासीकृत्यं तया पुत्रमहिष्यः कारिताः सदा । गृहोपलेपने यावच्च वैमुख्यमदर्शयन् ॥२५०॥ 250
पुत्रो विग्रहराजस्य क्षितिराजाभिधस्ततः । राज्ञः पितृव्यजो भ्राता कदाचित्पार्श्वमायत्रौ ॥२५१॥
तस्मै न्यवेदयल्लेखं स चित्तस्योपतापकम् । पुत्रे भुवनराजाख्ये राज्यलुब्धेतिविप्रुते ॥२५२॥
स हि तस्यात्मजो नीलपुरराज्यं समाश्रितः । तद्वलैः पितुरारब्धं विधातुं सोद्यमोभवत् ॥२५३॥
नाम भागवतानां च पूज्यानां स्वपितुर्व्यधात् । दत्तयज्ञोपवीतानां शुभानामुचिमानसः ॥२५४॥
क्षितिराजः स्वबन्धां च विरुद्धायां विशुद्धधीः । मनस्तापपदं चक्रे सर्वत्यागामुते स्पृहाम् ॥२५५॥ 255
राज्यं कलशपुत्राय ज्येष्ठानन्तरजन्मने । रामलेखाभिधानायां राज्यां जातायं सत्वरम् ॥२५६॥
दत्त्वा स्तनधयायापि तदौत्कर्षाभिधाय सः । राजर्षिर्विबुधैः सार्धं विदधे तीर्थसेवनम् ॥२५७॥
भुक्त्वा शमसुखं भूरिन्वर्षान्परमवैष्णवः । स चक्रायुधसायुज्यं ययौ चक्रधरः सुधीः ॥२५८॥
सं च भोजनरेन्द्रेश्च दानोत्कर्षेण विश्रुतैः । सूरी तस्मिन्क्षणं तुल्यं द्वात्रिंशां कविवान्धवौ ॥२५९॥
पितुः पितृव्यजाद्भ्रातुर्जातस्यानन्तभूभुजा । तन्वङ्गराजस्योत्सङ्गे न्यासीकृतः शिशुः ॥२६०॥ 260
तन्वङ्गोऽपि विवृद्धि तत्रीत्वा राज्यं शिशुं च तम् । पुनः प्रविष्टः कश्मीरानस्तं चक्रधरं ययौ ॥२६१॥
सर्वसाधारणीभूतभोगानां राजयोषिताम् । तावज्जातेयमभवद्व्रीहकलङ्कितम् ॥२६२॥
इन्दुराजात्मजासिद्धराजो यो बुद्धराजनः । जातो मदनराजाख्यं वीरं पुत्रमजीजनत् ॥२६३॥
अन्युस्मिन्मुक्तः सुतस्तस्य दर्वाभृपतिमण्डलात् । विधुरे राज्ञि निर्यातः शौर्योद्रेकादखण्डितः ॥२६४॥
तदानीं जिन्दुराजाख्यो डामरोद्रेकखिन्नया । राज्या स्वयं गृहं नीत्वा साचिव्यं याहितोभवत् ॥२६५॥ 265
काणः शोभाभिधस्तेन गाढोद्वेगावहः प्रभोः । देग्रामस्थो डामरोथ दत्त्वास्कन्दं निपातितः ॥२६६॥

---

२४८ [1]) A_2 gloss विप्रेमा निस्स्नेहा, A_5 विप्रेमवानुतापिनी इत्यन्वयवर्ती २५१. [1]) त supplied by A_5 in space left by A_1 २५१. [1]) Thus A_1, A_3 नीलपूरराज —[2]) Thus corr. by A_5 from A_2 °पलर्दिप, A_4 gloss भास्कन्द २५४ [1]) दत्त supplied by A_3 in space left by A_1. २५६. [1]) A_4 gloss कलशदेवस्य ही पुत्रौ ज्येष्ठो रणैरव एक कान्तिर उत्कर्षो द्वितीय. २५९. [1]) A_4 gloss अनन्तदेव.—[2]) A_4 gloss भोजराजश्च २६०. [1]) A_4 gives in margin a genealogical list showing the descendants of the brothers उत्कराज and कान्तिराज उत्कराज, सभामदेव, अनन्तदेव, कलश, and कान्तिराज, जस्सराज, तन्वङ्ग.—A_4 gloss (to पितुः) सभामदेवस्य —[1]) A_4 gloss कान्तिराजपुत्रजस्सराजात —[2]) A_4 gloss तन्वङ्गस्य —[3]) Thus corr by A_5 from A_1 तन्वराज°.—[4]) A_4 gloss पौत्र उत्कर्ष २६४ [1]) Thus corr by A_5 from A_1 इत्यु° —[2]) A_5 दूरं तृपती न्यन्यावर्ती २६५. [1]) Thus A_1, A_3 गत्वा. २६६ [1]) A_5 gloss देगामो इति भाषया

कम्पनाधिपतां दत्त्वा ततस्तस्य प्रतापिनः । पार्थिवो राजपुर्यादीन्देशांश्चक्रे करप्रदान् ॥२६७॥
अनन्तभूभुजो राज्ये तत्तत्स्खलितसंकटे । आलम्बयष्टिप्रतिमो ययौ हलधरः क्षयम् ॥२६८॥
मुमूर्षुणा चक्रधरं तेन पार्श्वस्थितो नृपः । सजानिरुपदेशार्थी स तदेत्यमकथ्यत ॥२६९॥
मा कार्क्ष पररा[ष्ट्रे]षु रभसारब्धिसाहसम् । युक्त्या वल्लापुरादौ वो व्यपोढं व्यसनं मया ॥२७०॥
विशङ्कुचो जिनेन्दुराजोयं पराध्यां वृद्धिमागतः । भेदं वः सह पुत्रेण जयानन्दो विधास्यति ॥२७१॥
कथितं तेन तत्सर्वं जिनेन्दुराजं महौजसम् । विज्ञेनाबन्धयद्राजा युक्तिमांस्याजितायुधम् ॥२७२॥
अथ कालेन कलङ्कमाभृत्कलुषिताशयः । भृत्यैरसाधुसंसेव्ये प्रसक्तिं याहितोऽध्वनि ॥२७३॥
तस्याभवन्विजयपित्यराजपाजादयः प्रियाः । उत्सेकदा राजपुत्राश्चत्वारः शाह्रिवंशजाः ॥२७४॥
पुत्रो गञ्जपतेर्नागनाम्नो[1] निकटसेवकः । सोपि तस्य जयानन्दः कौटिल्याध्यापकोभवत् ॥२७५॥
द्विजेन्द्रमरकण्ठं तु याते शिवसमानताम् । राजा प्रमदकण्ठस्य ययौ तज्ज्ञस्य शिष्यताम् ॥२७६॥
दुःशीलस्य प्रकृत्यैव तस्याकृत्योपदेशकृत् । गम्यागम्यविनास्य परिहर्ताभवद्गुरुः ॥२७७॥
गुरोर्गतविकल्पत्वं तस्यान्यत्किमिवोच्यताम् । त्यक्तशङ्कः प्रववृते स्वसुतासुरतेपि यः ॥२७८॥
महासमयसंचारचर्चनुर्यैरभीतितः । गण्यते स्वप्रभावोर्यैर्यैरवोपि न निर्भयैः[1] ॥२७९॥
ते भट्टपादास्त्रासेन पतिता भग्नजानवः । बिडालवणिजा स्वस्थाः शिरोहस्तार्पणैः कृताः ॥२८०॥
पुरा कृष्णबिडालाङ्को वणिक्श्रिदिहाभिधाम् । बिडालवणिगित्यात्मनामविस्मारिकां दधे ॥२८१॥
यो व्याजमूर्खो वैद्यत्वगुरुत्वाहंकृतः क्रमात् । पदकृद्रजकादीनां शिल्पिनां गुरुतामगात् ॥२८२॥
स भट्टपादानुल्लाघांश्चक्रे मूर्ध्नयधिरोपयन् । श्रेष्ठी बिडालविष्ठोघहिङ्गुगन्धोल्कटं करम् ॥२८३॥
एवं प्रकृतिनिःसारैरपि गर्जद्भिरन्वहम् । आन्ध्यं स गुरुभिर्नन्ये दिवसोम्बुधरैरिव ॥२८४॥
ये दीर्घजागरा रात्रौ भूम्निभोजनसेविनः । अजीर्णपिशितोद्गारनित्यदुर्गन्धकन्धराः ॥२८५॥
अवस्करप्रणालाभाः पृथ्वं क्षिप्रमधःपथैः । शौचपाथ इव क्षिप्रमुज्झन्ति मधुनिर्झरम् ॥२८६॥
नक्तमातोद्यवाद्यज्ञैस्तैः सार्धं कृतसेवनः । चारणो वेणुवाद्यज्ञो योषितां धर्षयन्हृदात् ॥२८७॥
कनकाख्ये महीहारमे कुद्धे हलधरात्मजे । स्तम्भे निबद्ध तद्रक्ष्यैश्चिन्तासो व्यधीयत ॥२८८॥
यो विटध्वमको नाम लुनाद्रोमङ्गलावहः । शनैर्लेभे स वाल्लभ्यं कौङ्कण्याम्रवभूपतेः ॥२८९॥
प्रसादवित्तो भूभर्तुरन्तरे मन्त्रिणामपि । लब्धप्रतिष्ठः स प्राप उक्कुराख्यां नृकुक्कुरः ॥२९०॥
प्रथां प्राप्तस्तपोहेतुं स भट्टान्वशमञ्जसा । प्रागेव नासावंशस्य भट्टानं बहुमन्यत ॥२९१॥
तेनोद्दीपितदौःशील्यः स यत्रैके त्रपोज्झितः । अवाच्यमपि वृत्तान्तं मध्यपातात्तदुच्यते ॥२९२॥
कलनाख्या स्वसा राज्ञो नागाख्या च तदात्मजा । परदारप्रसक्तेन संभोक्तुं नावशेषिता ॥२९३॥

---

२६७. [1]) Thus corr by A_3 from A_1 सपर्यो and °देशाश्चक्रे —[2]) A_3 gloss राजादिश २७१. [1]) A_4 gloss कलङ्कोन —[2]) A_4 gloss अनन्तवेत्रगञ्जपतेर्नागनाम्नो भृत्यस्य पुत्र २७२ [1]) A_4 gloss हलधरेण २७४ [1]) Emended, A R G °भवद्भिन्न° २७५ [1]) A, gloss मुद्ग भानु २७६ [1]) Thus corr by A_3 from A_1 तज्ज्ञनांश° २७८ [1]) r supplied by A_3, A_4 gloss स्वा आत्मीया चासौ पुत्री तस्या सुरते सम्भोगे २७९ [1]) Thus A_1, A_4 निर्भय २८० [1]) Thus corr by A, from A_1 बिडाज° २८१. [1]) Thus corr. by A_3 from A_1 बिडालनाम इत्या° २८२ [1]) This verse has been omitted by A_1 and added in margin by A_3, found in R G २८५. [1]) Thus A_3, A_4 °जागरात्रौ. २८६ [1]) Thus corr by A_3 from A_1 क्षिप्रम°. २८९. [1]) Thus corr by A_3 from A_1 कौङ° २९१ [1]) Thus A_3, A_4 कथामासां°पोहेतुं २९२ [1]) Thus R G, A वधके

तमुदन्तं सपत्नीको बुद्धवान्वृद्धभूपतिः । न प्रत्यमैत्सीच्चपया तस्थौ तु निभृतव्यथः ॥२९४॥
भिक्षको[1] धान्यमुष्टीनामोदनामामजो द्विजः । योप्यभूद्रामदैवज्ञो वैधेयो लोष्टकाभिधः ॥२९५॥ 295
स ग्रामक्षेत्रपालस्य प्रसादात्पर्यटन्क्षिति । वस्तूनां मुष्टिबद्धानां विज्ञानान्मुष्टिलोष्टकः ॥२९६॥
परां प्रसिद्धिं संग्रामो नवक्ष्मापस्य रागिणः । आसीद्गुरुस्वकौड्डिन्यदैवज्ञत्वे रतिप्रियः ॥२९७॥ तिलकम् ॥
भट्टारकमठाधीशः साधुर्ध्यामशिवो जटी । खुर्खुटाख्याधिकरणे गृहीतनियतव्रतः ॥२९८॥
अन्धगान्धर्विकान्मम्मनाम्नः स्वार्चनसेवकात् । अवन्तिपुरजं हस्तग्राहकद्विजचेलकम् ॥२९९॥
परिभ्रष्टमुपादत्त लालितत्वेन यं[2] पुरा । स तेनं वारिताश्चस्तभङ्गासूत्रमयाम्बरः ॥३००॥ 300
विसृज्यमानः पुष्पाणि ग्राहयित्वा नृपान्तिकम् ।[3] ..... ॥३०१॥
मदनो नाम वाचालः प्रपेदेत्यन्तरङ्गताम् । शनैः कौड्डिन्यदुर्गोष्ठीमध्यपातं समाभयत् ॥३०२॥ चक्कलकम ॥
तैश्चान्यैश्च विटैश्चाटुकारैः क्षिप्रविमोहितः । दोषानपि गुणान्मेने कलत्राः कलुषीकृतः ॥३०३॥
नर्म ह्रेपणकारि वाक्यमुचितं कृत्यं प्रजापीडनं तेजस्वित्वमलज्जता सरसतागम्याङ्गनासंगमः ।
सारल्यं खलगालिदानसहनं वेषां न तत्संनिधौ किंचित्कर्म कुकर्म दोष इति यद्विज्ञाय संत्यज्यते ॥३०४॥
राजा चौर्यरतौत्सुक्यात्यतिगेहं परिभ्रमन् । स्वदारालिङ्गनैः प्रीतिं क्षणदासु न लब्धवान् ॥३०५॥ 305
पारतन्त्र्यकृतापारप्रीतिः परवधूरतिः । अभिलाषानलोत्सेके रागभाजां घृताहुतिः ॥३०६॥
तान्कुट्टनान्पुरस्कृत्य पञ्चषानेकदा नृपः । जिन्दुराजगृहं यायास्त रात्रौ चौर्यकामुकः ॥३०७॥
तत्रासीज्जिन्दुराजस्य स्नुषा परमपुंश्चली । स्वगृहे दत्तसंकेता नक्तं कलत्राभुभुजः ॥३०८॥
प्रविशन्तमधावंस्तं भषद्भिः सूचितं श्वभिः । धृतासयो गृहद्वारं चण्डालाधीरशङ्कितः ॥३०९॥
तान्हन्तुमुद्यतान्दृष्ट्वा तं क्षितौ पतितं भयात् । पृष्ठन्यस्तस्त्रवत्पृषो ररक्षुरनुयायिनः ॥३१०॥ 310
तेभ्यः स मुष्टिघातादि ददद्भ्यः कथमप्यभूत् । मैवं कलत्रादेवोयमित्युक्त्वा त्याजितो निजैः ॥३११॥
घ्राणहीनं पुरस्कृत्य नारीमभिसस्तार यत् । तदेव कामिनस्तस्य नूनमासीदमङ्गलम् ॥३१२॥
स निर्यातो गृहात्कान्ताकटाक्षविशिखीकृतः । पथि कालीकटाक्षाच्च दैवाच्च प्रलयं ययौ ॥३१३॥
निजचित्तापराधेन कुर्वन्तीतिरतिक्रमम् । अस्पृश्येभ्यः परिभवं भूपालोप्युपलब्धवान् ॥३१४॥
इन्द्रियैरिन्द्रचन्द्राद्या हेपिता यैः सुरा अपि । अपरिम्लानमानस्वं तैर्मर्त्यस्याथ वा कथम् ॥३१५॥ 315
प्रागुन्मीलति दुर्यशः सुविषमं गर्ह्यामिलाषस्ततो धर्मः पूर्वमुपैति संक्षयमयो ज्ञाप्योभिमानक्रमः ।
संदेहं प्रथमं प्रयात्यभिजनं पश्चात्पुनर्जीवितं किं नाभ्येति विपर्ययं विगलने शीलस्य चिन्तामणेः ॥३१६॥
राजधानीमवाप्तस्य दुःशीलस्य महीपतेः । क्षपायामेव तां वार्तां पितरावधिजग्मतुः ॥३१७॥
तौ रुदित्वा सुतस्नेहलज्जाशोकान्वितौ चिरम् । निश्चयं बन्धने तस्य सदोषस्य प्रचक्रतुः ॥३१८॥
सर्वविद्यानिधिं ज्येष्ठं नप्तृणां वप्रिकात्मजम् । हर्षे राज्ये चिकीर्षुं च नित्युतस्तां निशीथिनीम् ॥३१९॥

२९५. [1]) Thus A R G, C भिक्षुक —[2]) A_2 gloss उदन नाम धाम. २९८ [1]) A_2 gloss भट्टीमठ २९९ [1]) The second half of this verse has been omitted by A_1 and supplied by A_2 in margin. ३००. [1]) A_1 gloss मदनं वक्ष्यमाण.—[2]) A gloss स्वोमसिवेन. ३०१. [1]) A_1 indicates here a *lacuna* of two *pádas*. ३०७. [1]) Thus corr. by A_2 from A_1 कुट्टनान्पु°. ३१२. [1]) Thus A_1 originally, भूत् has been subsequently erased by A_1 and replaced by two dots ३१२. [1]) A_2 gloss चमकं विद. ३१३ [1]) Thus emended with C and G *sec. manu*, A °कटाक्षा°. ३१४ [1]) प supplied by A_2

आकारितस्ततस्ताभ्यां प्रातः कलशभूपतिः । ऊचे विज्जलयानन्दौ साशङ्को जनकाग्रयम् ॥३२०॥
तन्मतेन जयानन्दस्तहस्तः कथंचन । अन्वीयमानो विज्जेन स पितोः प्राविशद्गृहम् ॥३२१॥
पिता प्रविष्टमात्रं तं बद्धवे दत्तचपेटकः । अभाग्यभागिञ्जिह्रिहि क्षुरिकामित्यथाब्रवीत् ॥३२२॥
एनं त्रासविसूत्राङ्गसंधिमालम्ब्य पाणिना । सावष्टम्भं स्पृशञ्शास्त्रं बिज्जो राजानमब्रवीत् ॥३२३॥
राजन्मानवतां धुर्यो भवन्नपि भवान्कथम् । नात्याज्यं मानिनां वेत्ति मानमहमहाव्रतम् ॥३२४॥
गृहीतवेतनेनायं राजपुत्रेण शास्त्रिणा । संकटेस्मिन्मया स्वामी जीवता त्यज्यते कथम् ॥३२५॥
पिता भवानयं पुत्रः क्षणेन्यस्मिन्महीपते । मय्यसंनिहितेमुष्य यथोर्ग्यं तद्विधीयताम् ॥३२६॥
मुग्धं विमोह्य नृपतिं वचोभिः स्निग्धकर्कशैः । बिज्जः स्वामिनमादाय निराक्रामत्तदन्तिकात् ॥३२७॥
बिज्जस्यापूजयन्धीरास्तद्धैर्यमतिमानुषम् । अनन्तदेवस्याप्यमे यदेवं स न व्यजृम्भत ॥३२८॥
चण्डी नरपतेः[1] पत्नी भाव्यर्थबलवत्तया । अत्याज्यजपमौनस्था तस्मिन्नवसरेभवत् ॥३२९॥
सा वेदासिष्यतेयुक्ता नाभविष्यत्तदेतरत् । निवमात्सर्यनाशाद्वा बन्धनात्कुलशास्त्र्या वा ॥३३०॥
ततो बिज्जेन कलशाः सत्वरेण प्रवेशितः । अस्यन्दिलाभिधानाया वल्लभाया निवेशनम् ॥३३१॥
शिरोर्तिरस्य संजातेत्युक्ता भीतं पतिं व्यधात् । सा प्राज्ञा ज्ञातवृत्तान्ता तैलेनाभ्यक्तमस्तकम् ॥३३२॥
व्याजेन तेन सर्वस्य संप्रवेशं निषिध्य सा । पतिं जुगोप विन्यस्य बिज्जं द्वारस्य रक्षणे ॥३३३॥
ततः समाधेर्विरता राज्ञी निर्भर्त्स्य भूपतिम् । कुशलान्वेषणमिषात्तनयस्यान्तिकं ययौ ॥३३४॥
बद्धुं बद्धोद्यमो राजा तथैव प्रययौ यदा । दत्तप्रवेशो बिज्जेन तदैकाक्येव सोभवत् ॥३३५॥
निषेधादनुगन्तॄणां ततः कुद्धो धराधवः । रुधित्वा विजयक्षेत्रं गन्तुं प्रावर्ततोद्धतः ॥३३६॥
तं प्रयान्तं सपत्नीकं प्राप्तं पद्मपुरान्तिकम् । अवोचन्नेत्य तत्रस्था विद्वज्जावद्वादयो द्विजाः ॥३३७॥
अधिकारं स्वयं त्यक्त्वा राजन्किमनुतप्यसे । कृतस्यानुशयो युक्तो न सतो नासतोपि वा ॥३३८॥
न च ते दुर्मतौ त्यक्ताः प्रजा एता मंस्यत्यपि । ध्यात्वा सूनोः समुचिता कर्तुं दुष्टस्य वाच्यताँ ॥३३९॥
न यन्त्पुत्रकस्येव शक्तिः कापि हि भूभुजः । भवेत्साधुरसाधुर्वा स प्रजानां शुभाशुभैः ॥३४०॥
उज्झन्ति यत्पयोवाहा जलानि तडितोथ वा । वनस्पतीनां सदसत्कर्मपाकस्य तत्फलम् ॥३४१॥
यद्यापथस्थितं पुत्रं त्यक्तेरञ्जस्यासितुं सुखम् । कोशं त्यक्त्वा प्रस्थितस्य घटते तत्कथं तव ॥३४२॥
धाराधिरूढसामर्थ्यः सहंशः भुविमानपि । संस्पृश्यते क्षीणकोशः कृपाण इव कैः पुमान् ॥३४३॥
भुक्त्वेत्यैच्छन्नृपो यावत्प्रत्यावृत्तिं विचारवान् । तावत्स पुत्रेणाभेत्य सभार्येण प्रसादितः ॥३४४॥
अथ प्रविश्य नगरं स प्रासादोपबर्हिताम् । अशान्तमन्युरादाय लक्ष्मीं भूयो विनिर्ययौ ॥३४५॥

---

३२०. [1]) A_3 gloss जयानन्द नागपुत्र. पुरुषभावपुत्र. ३२४. [1]) Thus corr. by A_2 from A_1 न त्यजेयं. ३२९ [1]) ण्डी नरपते and जयसरेभवत् supplied by A_2 in space left by A_1. ३३०. [1]) सिष्यतो supplied by A_2 in space left by A_1.— [2]) वैनाशाद्वा बन्ध supplied by A_2 in space left by A_1. ३३५. [1]) Emended A_1 बन्धुं, A_2 बन्धुं. ३३६. [1]) द्धत supplied by A_2 in space left by A_1. ३३७ [1]) Emended, A विचाव°. ३३८. [1]) कृतस्या supplied by A_2 ३३९. [1]) Thus corr. by A_2 from A_1 त्यक्ता —[2]) A_2 gloss, partly effaced, दुर्मतौ दुष्टबुद्धिविशिष्टे पुत्रे मया एता प्रजा त्यक्त[I]पुत्र एव राज्य[स्था]पनार्हत्वात् [ध्या]त्वा दुष्टस्य पुत्रस्य वाच्यता निन्दा कर्तुं न समुचिता ते ··त्यन्वय. ३४२. [1]) A_2 gloss भाण्डागार. ३४५. [1]) Emended A प्रसादा°, C प्रमादा°.

हयायुधतनुत्राणं स्वयं स्वीकृत्य निर्गतः । देवीं प्रतीक्षमाणोऽस्थात्संरिस्पारे ततः क्षणम् ॥३४६॥
नानाप्रकारानारोप्य कोशाद्यैषु नृपाङ्गनाः । नायःशङ्कूनपि गृहे निर्यान्त्यः पर्यशेषयत् ॥३४७॥
अज्ञातवार्तः प्राक्तूष्णीं तत्प्रस्थानेऽभवज्जनः । ज्ञातवार्तस्तदा स्वांसीदाक्रन्दमुखराननः ॥३४८॥
प्रतिमोक्तुं पुरे ताभ्यां दत्तपुष्पाञ्जलौ जनः । बाष्पबिन्दुमिषादौज्झीद्वीर्यानर्घकणानिव ॥३४९॥
हा मातर्हा पितः क्वेत्थं गच्छतः परिदेवितात् । इत्यस्मादपरः शब्दो मार्गेषु न तदा श्रुतः ॥३५०॥ 350
मार्गेन्तरान्तराक्रन्दविरतौ निर्झरध्वनिः । शैलानां शोकनिःश्वासशूत्कार इव शुश्रुवे ॥३५१॥
तयोराक्रन्दितैः शश्वत्पथि संजातसंस्तवौ । कर्णौ भूत्येष्वशृणुतामाक्रन्दितमिवासकृत् ॥३५२॥
पुत्रागसा तादृशौ तौ दृष्ट्वा मार्गे द्रुमौकसाम् । खगानां शावभरणमपि लोको व्यगर्हत ॥३५३॥
तयोः पुत्रानयोत्तप्तचेतसोर्विजयेश्वरः । मनःप्रसादं संदृष्टः खिद्यबन्धुरिवाकरोत् ॥३५४॥
तत्तत्र भाण्डागाराश्वभृत्यावासयथार्पणैः । संविधानक्रियाभिश्च व्यधत्तोरगमन्दिनम् ॥३५५॥ 355
देशे कोशोपकरणपूर्णगोणीगणावृते । आसन्निन्धनगण्डालीच्छन्नरथ्या इवापणाः ॥३५६॥
तन्वङ्गराजतुङ्गादिज्ञातिपुत्रं नृपात्मजाः । तं सूर्यवर्मचन्द्राद्या डामराश्चानुवव्रजुः ॥३५७॥
डामरान्क्षीरभूपादीन्राजा नौनगरादिषु । स्थानेषु स्वेषु निक्षिप्य रक्षित्वे गुप्तिमानभूत् ॥३५८॥
विश्रान्तसर्वचित्तस्य श्रीमतीनन्तभूपतेः । प्रावर्तन्तोत्सवैर्गन्तुं दिनानि विजयेश्वरे ॥३५९॥
राजपुत्रहयारोहशस्त्रिडामरमण्डलैः । कृत्स्नैरेव स्थितिर्बद्धा सर्वदे वृद्धभूभुजः ॥३६०॥ 360
वत्सरे पञ्चपञ्चाशे ज्यैष्ठे मासि विनिर्गतः । आसाद्य विजयक्षेत्रं स स्वर्गसुखमन्वभूत् ॥३६१॥
कलशस्तु गते राज्ञि प्राप वीतत्रसं महीम् । रक्षाहौ चलिते यातरत्नां निधिमहीमिव ॥३६२॥
स्वराज्यमुज्ज्वलीकर्तुं रिक्तोपि विहितोद्यमः । चक्रे संमन्त्र्य विज्ञातैः संमतानधिकारिणः ॥३६३॥
तेन सर्वाधिकारेषु जयानन्दो नियोजितः । हारे वराहदेवश्च वितस्तात्रपुराङ्गवः ॥३६४॥
यो ह्यम्बराधिकार्यासीज्जिन्दुराजस्य कम्पने । राज्ञां विजयमित्रः स कम्पनाधिपतिः कृतः ॥३६५॥ 365
यथाधिकारमन्यांश्च विनिधायाधिकारिणः । राजार्यचिन्तामारेभे संरब्धः पितृविग्रहे ॥३६६॥
जयानन्दः पदातीनां चिकीर्षुरथ संग्रहम् । यत्रादनुचितेभ्योपि धनिकेभ्योमहीवृणम् ॥३६७॥
स्वीकृत्य पत्नीन्विज्ञादिराजपुत्रगणान्वितः । अथावन्तिपुरं प्राप योद्धुं वृद्धनराधिपम् ॥३६८॥
अभ्यर्थ्य कारितो वेलां राज्ञा काराविनिर्गतः । शिमिकावर्त्मना योद्धुं जिन्दुराजो विनिर्ययौ ॥३६९॥
तेषामुद्योगमाकर्ण्य क्रुद्धा वृद्धमहीभुजम् । स्वे डामराश्चवाराद्याः संरम्भादुपतस्थिरे ॥३७०॥ 370
अजायत न्यस्तगुडक्रीडत्तुरगमण्डला । शस्त्रैः सन्नाहवी कृत्वा संकटा विजयेश्वरे ॥३७१॥
ततः सूर्यमती यत्नात्पत्नीं परमकोपनम् । ययाचे पुत्रवात्सल्यादयुद्धं दियसद्वयम् ॥३७२॥

---

३४६. [1]) Thus corr by A_3 from A_1 °स्था सरि°. ३४८ [1]) Thus corr. by A_3 from A_1 °स्तश्वासी°. ३५०. [1]) Thus corr. by A_3 from A_1 क्र. ३५३. [1]) A_2 gloss शावा पोता तेषां भरण पोषण ३५६. [1]) A_2 गण्डाल्य गण्ड इति भाषया. ३५७. [1]) Thus corr. by A_3 from A_1 °गुङ्गा°. ३६१ [1]) A_2 gloss अनन्तक्षेत्र.—[2]) A_2 gloss स्वर्गसुख परमानन्दं न तु मृ [तिम्] ३६२ [1]) A_2 gloss धनरहिताम्. ३६४. [1]) व supplied by A_3 in space left by A_1.—[2]) A_2 gloss वितस्तात्रं नाम यत्पुर। तस्मादुद्भवो यस्य स वितस्तात्रपुरोद्भव. ३६५. [1]) Thus corr. by A_3 from A_1 यो ह्याम्बाधि°.—[2]) A_2 gloss कलशोन. ३६९ [1]) वे supplied by A_3 in space left by A_1. ३७०. [1]) सरम्भा supplied by A_3 in space left by A_1.

अत्यागानय मट्यादीन्द्विजाञ्शिशि विसृज्य सा । तन्मुखेनातिवात्सल्यादिदमूचे रहः सुतम् ॥३७३॥
विनाशशंस्ययं पुत्र कस्ते मतिविपर्ययः । तीव्रशौर्येण पित्राद्य यदेवं योद्धुमिच्छसि ॥३७४॥
375 यस्य भूभङ्गमात्रेण दरद्राजादयो हताः । तत्पराक्रोपनतेः कस्मादीहसे[1] शलभायितुम् ॥३७५॥
अस्मिंस्तु वीतिमांरूढे वीतिहोत्रसमे नृपे । कस्त्राता स्यात्त्वदीयानां तृणानामिव शस्त्रिणाम् ॥३७६॥
सेनाङ्गैः कतमैः केन शौर्येण कतमैर्धनैः । भवाञ्शक्तिमतां धुर्यं योद्धुमेनं प्रधावति ॥३७७॥
दैवात्संत्यक्तमेतेन भुङ्क्ष्व[2] राज्यमखण्डितम् । पित्रा तीर्थोपविष्टेन किमिवापकृतं तव ॥३७८॥
द्वेधेच्छुभिः पात्यमानो व्यसनेस्मिन्नुदारुणे । प्रयास्यसि दिनैरेव रिक्तोप्यत्यन्तरिक्तताम् ॥३७९॥
380 नय सेनाः पितुर्भीतिर्जीवन्त्यां मयि नास्ति ते । ऋजुमेनं नवस्त्रीव्रं प्रत्युतानुनयोक्तिभिः ॥१८०॥
इति दूनमुखैर्गूढं पुत्रो मात्रा कृतार्थनः । सर्वाशाभ्योनयत्सैन्यं रात्रावेव निजान्तिकम् ॥३८१॥
श्रुतापसारं सैन्यानां दूतैश्चैत्य प्रसादितम् । उपालेभे पतिं मातर्दृष्टा प्रत्युत वल्गभा ॥३८२॥
राज्ञ्या मिथस्तयोरेवं शमिताक्षेपयोरपि । पिशुनप्रेरणात्पाप कालुष्यं धीः क्षणे क्षणे ॥३८३॥
वैरस्य रूपमेतद्धि भेदं याति मुहुर्मुहुः । संधीयमानमपि यत्क्लिन्नाम्बरमिवाशयम् ॥३८४॥
बाद्यात्यादौ स्तुतोदन्तं श्रुत्वा तप्ताशयो नृपः । गृहं प्रविष्टो धृष्टस्त्रीभाविनैजउतां ययौ ॥३८५॥
385 एवं प्रतिदिनं तप्तस्यक्तापः प्रतिक्षपम् । स्वच्छाशयः शरत्तुच्छतडाकौपम्यमाययौ ॥३८६॥
चकार पितृपत्न्याणां पुत्रो वेश्मादिनाशनम् । पिता तु पुत्रपत्न्याणां न किंचित्स्त्रीवशीकृतः ॥३८७॥
पुत्रस्नेहान्धया पत्न्या बाधितैश्चानुयायिभिः । रूक्षोक्तिभिस्ताप्यमानस्तस्थौ दुःस्थः सदा नृपः ॥३८८॥
राज्यं जिहीर्षुः पुत्रस्य निःशूरं तद्बलं विदन् । ईषत्स जिन्दुराजस्य गणनां पौरुषेकरोत् ॥३८९॥
390 पुत्राज्जिहीर्षुणा राज्यं तेन तन्वङ्गनन्दनाः । प्रार्थ्यन्ते स्म तदा राज्यकृतये तत्पराङ्मुखाः ॥३९०॥
संप्रेर्य तं तदा रात्रौ स्वान्वयाशर्मशङ्किनी । हर्षं देवी नृपं कर्तुं दूतैराहूतवत्यभूत् ॥३९१॥
स पितामहयोर्दूतैराहूतः साहसोन्मुखः । बाद्यात्यां निर्गतः सज्जे रक्ष्यमाणोपि रक्षिभिः ॥३९२॥
दत्तपार्ष्णिकघाताः क्षणार्धेनोदलङ्घयत् । मनोजवेनाभग्नौजा वाजिना पञ्चयोजनीम् ॥३९३॥
395 वाजिनं विजिताभ्यासमनुगन्तुं समुद्यनाः । अगच्छन्बहवो मार्गे दीनाः सेनाहयाः श्रमम् ॥३९४॥
प्राप्तस्य पादयोस्तस्य पतितस्य पितामहौ । आनन्दाम्बुजलस्यन्दैरभिषेकं प्रचक्रतुः ॥३९५॥
पुत्रे तत्रिकटं प्राप्ते कलशाः कम्पिताशयः । अप्रियाचरणात्पित्रोः संधित्सुः स न्यवर्तत ॥३९६॥
स तस्य नगरात्पत्रीः पार्श्वे प्राज्ञो व्यसर्जयत् । अकरोद्विद्रुते राष्ट्रे स्वभेदस्याप्रकाशनम् ॥३९७॥
एवं प्रवर्धमानेपि वैरे कलशभूपतिः । कंचित्कालं मते मातुरवर्तिष्ट मनागिव ॥३९८॥
खशालाः कलशादेशाधियासोः कम्पनापतेः । तया प्रावर्तितनेमार्गे संत्याजितः पतिः ॥३९९॥
अत्रान्तरे शमयितुं वैरं देशोपघातकृत् । तावुद्दिश्य पितापुत्रौ द्विजाः प्रायं प्रचक्रिरे ॥४००॥
400

---

३७५ [1]) Thus corr by A_3 from A_1 °हीशिये. ३७६ [2]) A_3 gloss अत्र ३७८. [1]) Thus corr. by A_3 from A_1 भुङ्क्ष्व. ३८३. [1]) A_3 gloss अनन्तकलशयोः ३८४ [1]) रूप supplied by A_3 in space left by A_1 ३८५ [1]) Thus corr by A_3 from A_1 बाह्याला°. ३८६. [1]) °क्षुच्छ supplied by A_3 in space left by A_1. ३८८ [1]) Thus $A_{2,3}$; A_1 तदा. ३९१. [2]) Thus corr. by A_3 from A_1 स्वन्व°. ३९२. [1]) A_3 gloss पितामहयोः पितामहपितामहयोः.

संधिबन्धे समुत्पन्ने ततस्तदनुरोधतः । दंपती संप्रविष्टौ तौ सार्धं मासद्वयं पुरम् ॥४०१॥
जयानन्दादिबुद्ध्वाथ बुद्ध्वा बन्धोर्यतं सुतम् । भूयोपि ययतुः खेदाच्चिरंगत्य विजयेश्वरम् ॥४०२॥
तस्याश्वासकृतानि पुत्रो रात्रावदाहयत् । व्यापादयत्पदातींश्च विषशस्त्राग्नियुक्तिभिः ॥४०३॥
तथा प्रवर्धमानेपि विरोधे सत्यरोधयत् । वात्सल्यविवशा राज्ञी भर्तुः प्रतिचिकीर्षितम् ॥४०४॥
लुडुाभिधाभृत्कैवर्तबन्धकी तद्विधेयधीः । धक्कडामरनामा च तज्जारः खलतिस्तदा ॥४०५॥ 405
स तत्रासीद दुष्टात्मा कथ्यमानौ समीपगैः । शुभ्रात्र पितरौ नित्यं लीलास्मितसिताननः ॥४०६॥ युग्मम् ॥
तौ दंपती पुनर्हेमतुलापुरुषयुगमदौ । चित्राभिर्धर्मचर्याभिर्धर्मनस्तापममुञ्चताम् ॥४०७॥
यदा पुनस्तयोर्दार्ढ्यमाद्यत्वान्न व्यहीयत । तदा सेर्ष्यः स दुष्पुत्रो रात्रौ वह्निमदापयत् ॥४०८॥
तेनाग्निनोर्वरीशस्य सर्वोपकरणैः समम् । भस्मावशेषमभवद्विजयेश्वरपत्तनम् ॥४०९॥
सर्वनाशाशुचा दीना राज्ञी मर्तुः समुद्यता । तन्नद्धपुत्रैश्चक्रुपे कथंचिज्ज्वलतो गृहात् ॥४१०॥ 410
त्यक्तांशुकानि शय्याभ्यो निशायां सुप्तमुत्थितम् । निःशेषं राजसैन्यं तदजायत दिगम्बरम् ॥४११॥
तद्राजधानीसौधाग्रात्पश्यन्कल्पशभूपतिः । तोषादनृत्यज्ज्वालीवैर्गगनालिङ्गिभिः समम् ॥४१२॥
अतरच्चसर्वस्वः स पारं सरितो नृपः । निममज्ज सजानिस्तु दुस्तरे शोकसागरे ॥४१३॥
संप्राप्य प्रातरभ्रष्टं रत्नलिङ्गं नृपाङ्गनाः । व्यक्रीणाल्लक्षसप्तत्या टाकानां पार्श्वमीयुषाम् ॥४१४॥
क्रीत्वा चैं प्रददौ पूर्वं भृत्यानां भोजनांशुके । धनेन तेन निर्दग्धान्यपि धामान्यशोधयत् ॥४१५॥ 415
भस्मकूलतलात्तावल्लब्धं स्वर्णादि भूभुजा । कथापि यावतो हन्त मयग्रन्थस्य कौतुकम् ॥४१६॥
राजा शून्याटवीभूते पत्तने तत्र सानुगः । नडस्त्वग्ग्रथितच्छत्रपटलाच्छादितेक्षणः ॥४१७॥
तावत्यप्यर्थसामर्थ्ये चिकीर्षोस्तत्पुरं नवम् । विना राजोचितामाज्ञां न सिद्धं वृद्धभूपतेः ॥४१८॥
भ्रष्टाभिभवो मातुरानुकूल्याच्चयो नृपः । परितापं पितुस्तैस्तैर्दुःसंदेशैः सदाकरोत् ॥४१९॥
निर्बन्धादथ पुत्रेण पर्णोत्सगमनं पिता । निर्वासनोत्सुकेनोक्तः शश्वद्भूतमुखैर्यदा ॥४२०॥ 420
प्रभवन्त्या यदा चासीत्पत्न्या तस्यैव वस्तुनः । निष्पत्तये प्रेर्यमाणः साधिक्षेपं क्षणे क्षणे ॥४२१॥
तदा जातु रहः कुर्वन्तन्नद्धे धक्कने स्थिते । उवाचानुक्तपूर्वं तामेवं स परुषं वचः ॥४२२॥ तिलकम् ॥
अभिमानो यशः शौर्यं राज्यमोजो मनिर्धनम् । मया जायाविधेयेन हन्त किं किं न हारितम् ॥४२३॥
मिथ्योपकरणं नारीगणयन्ति नृणां जनाः । परिणामे तु नारीणां क्रीडोपकरणं नराः ॥ ४२४ ॥
द्वेषोन्मेषात्प्रसक्ताभिर्विरक्ताभिरसूयया । के नाम नात्र कान्ताभिः कृतान्तस्यातिथीकृताः ॥४२५॥ 425
रूपं काश्चिद्बलं काश्चित्प्रज्ञां काश्चिच्च कामैणः । पुंस्त्वं काश्चिदसून्काश्चिद्भर्तॄणां जहुरङ्गनाः ॥४२६॥
हरन्ति यावभिरित्र क्ष्मां पुत्रैरन्यगोत्रजैः । मत्ताः पयोधरौत्सेत्याक्षरक्ष्णि इवाङ्गनाः ॥४२७॥
पर्यन्ते वेतनमिमे कि जीर्णैरीदृशैरिति । पोषयन्ति सुतान्भर्तृञ्शोषयन्ति तु योषितः ॥४२८॥
सर्वकालं विदित्वापि दोषान्योषित्कृतानमून् । प्रतिपत्स्यनुरोधेन मयेयं नावधीरिता ॥४२९॥

४०६. [1]) A, gloss पितराविति पितरौ राजा राज्ञी च राजा धक्कडामरनाम्ना समीपगे. कथ्यमान राज्ञी च लुडुाभिधा कैवर्ती नाम्ना कथ्यमाना उपहासार्थमित्यर्थ. ४१४. [1]) Thus corr. by A, from A, नृपात्मजा.—[2]) Thus corr by A, from A, चिक्री° [3]) Thus A, A, पूर्वमीयु°. ४१५. [1]) Thus A, A, तत्स्व°. ४१७. [1]) नडत्वक्। चिचु इति भाषया. ४२६ [1]) दसून्काश्चि supplied by A, in space left by A,.

प्रभविष्णुर्नहत्येयमैहिकीः सुखसंपदः । परलोकसुखस्याशामपि हन्तुं ममोद्यता ॥४३०॥
वलीपलितयुक्तस्य नेदीयोमरणावधेः । विहाय विजयक्षेत्रं कुत्र गन्तुं ममोचितम् ॥४३१॥
क्षपाकरकलामौलेः किंत्विषक्षपणक्षमा । हारोपकण्ठसंसेवोल्कण्ठा कुण्ठीभवेत्कथम् ॥४३२॥
पुत्रो लोकद्वयत्राता कस्यान्यस्येदृशो भवेत् । तीर्थात्यस्यापयन्मां यत्कुपथे मृतमिच्छति ॥४३३॥
प्रतिभान्यत्रगतीयं प्रवादो मेद्य चेतसि । अनयान्यकुलोद्भूतो यदयं संप्रवेशितः ॥४३४॥
विसंवादिनमाकारात्तारैर्बन्धुविरोधिनम् । पुत्रं पितुरसंश्लिष्टं जानीयादन्यरेतसम् ॥४३५॥
सुचिराविष्कृताकूतां त्यक्ता प्राणाय यन्त्वणाम् । एवं वदन्पतिस्तस्याश्चक्रे मर्मसु ताडनम् ॥४३६॥
गोत्रजस्य पुरः पुत्रोत्पत्तिर्गुप्त प्रकाशिते । आमृष्टविप्रियालापा साभूदधिकलज्जिता ॥४३७॥
महत्तमस्य पुत्रो हि प्रशस्ताख्यस्य सोभवत् । विपन्नापत्ययोपात्तस्तयेत्यासीज्जनश्रुतिः ॥४३८॥
उत्सिक्तभाषितं भर्तुर्योषितो जितमर्तृकाः । जानन्त्यन्यान्यङ्गसंवृत्तशिरस्ताडनसंनिभम् ॥४३९॥
अतः सा सुदृढं प्रौढिसंस्कारपरुषं वचः । प्राकृतप्रमदावेषैरित्युवाच रुषा पतिम् ॥४४०॥
गतश्रीस्तापसो मन्दो जातभाग्यविपर्ययः । वृथा वृद्धः क्व किं वाच्यमिति मूढो न वेत्त्ययम् ॥४४१॥
ज्ञात्वेत्थिनस्य यस्यास्य नाभुत्थानवरणं पुरा । लोकां जानात्ययं किं न तेन मां प्रत्य हारितम् ॥४४२॥
स्वकुलस्त्रीसमुचितं यत्किंचिन्मामभाषथाः । क्रियते किं न कालोयं यत्पायश्चित्तसेवने ॥४४३॥
अकर्मण्यो गतवया देशात्पुवेग वारितः । पत्यापि त्यक्त इत्यस्मान्परिवादाद्धि मे भयम् ॥४४४॥
कुलदोषादिवृत्तान्तगर्भापालम्भनिर्भरैः । वचोभिर्व्यथितस्तस्यास्तस्थौ तूष्णीं यदा नृपः ॥४४५॥
तदा तस्यासनप्रान्तनिःसृतः प्रसरन्बहिः । निर्विकाराकृतेर्धैर्यं दृशे रक्तनिर्झरः ॥४४६॥
संभ्रान्तायां ततो राज्ञ्यामपश्यन्यङ्कनो रुदन् । असिपेनुं गुदे तेन क्रुधा राज्ञा प्रवेशितम् ॥४४७॥
ततोतिधीरो राजैव तं लज्जाचकितोन्वशात् । राज्ञो रक्तातिसरणं जातमित्युच्यतां बहिः ॥४४८॥
त्रिषेया नारीणां तनयनिहिताशेषविभवाः कृतम्लानौ भृत्ये पुनरुदितविस्रम्भरभसाः ।
नयन्तो गण्यत्व प्रसभमभियोगैर्लघुभिरैं नयत्यक्ताः क्षमापाः प्रलयमुपगच्छन्ति न चिरात् ॥४४९॥
नृपतिर्वाहितहृदयः शरदातपखेदितः । तृष्यन्निपीय धान्याम्बु च्युतासृग्जात इत्यभूत् ॥ ४५०॥
गम्भीरै राजपुरुषैस्तथा वार्ता प्रवर्तिता । यथा नाबुद्ध वृत्तान्तमेतं कोपि बहिर्जनः ॥४५१॥ युग्मम् ॥
वत्सरे सप्तपञ्चाशे पौर्णमास्यां स कार्तिके । विजयेशाप्तनो राजा जीवितेन व्ययुज्यत ॥४५२॥
पत्न्याः पुत्रस्य चैद्विगैस्त्यक्तो राजा सुखोचितः । प्रसार्य पादौ निद्रातुं प्राप सोवसरं चिरात् ॥४५३॥
चुकोपासौ न कस्मैचिच्चुकोपास्मै न कश्चन । चक्रे सुखी विमन्युश्च मरणेन महामनाः ॥४५४॥
संग्रामराजदायादो न कस्यचिदिव प्रियः । अंशुकाच्छादितो भूमावनाथ इव सोस्वपत् ॥४५५॥
न प्रियाक्रन्दितैः स्निग्धैर्न कुप्यन्नप्रियोक्तिभिः । सर्वत्यागी ययौ राजा दीर्घनिद्रारसज्ञताम् ॥४५६॥
दाक्षिण्योल्लङ्घनप्रायश्चित्तायेव त्यजन्नसून् । कृतज्ञया पतिः पत्न्या ततो निन्ये सनाथताम् ॥४५७॥

---

४४९ ¹) Thus A_2, A_1 °योगं लघु° ४५०. ¹) A_2 gloss धान्व धनिका धान्यवत् इति भाषया। तस्मात्. ४५२. ¹) Thus corr. by A_2 from A_1 क्षपान्तिकें. ४५५. ¹) Thus corr. by A_2 from A_1 सोभवत.

आराजपुत्रचण्डालं देयं प्रत्यहवेतनम् । दत्तौ स्वस्येव भृत्येभ्यः सा कर्तुमनृणं पतिम् ॥४५८॥
गृहीतवेतना भृत्याः कोशं सर्वं तया स्वयम् । पुरस्ताद्विजयेशस्य न्यधुः क्षेमाय पायिताः ॥४५९॥
पादन्यस्तशिराः पौत्रो रुदत्यर्पितकोशया । मुर्धन्याघ्राय कथितो मा पितुर्वैश्वसीरिति ॥४६०॥ 460
उत्थितैव ततो भूत्वा स्वयमाप्तलतां सती । प्रातिहार्यं व्यधाद्भर्तुः कारयन्त्यन्तमण्डनाम् ॥४६१॥
सादिनां ज्ञानमादिश्य नप्तुस्तत्रैव रक्षणे । सा पुनः शिबिकारूढमथ प्रास्थापयत्पतिम् ॥४६२॥
क्षणमेकां दिनार्धं च स्थित्वैवं पतिदेवता । प्रणम्य विजयेशानं युग्यारूढा विनिर्ययौ ॥४६३॥
निर्यान्तौ वीक्ष्य तौ प्रेततूर्यकल्लोलमिश्रितैः । लोकस्याक्रन्दनुमुलैर्भग्ना इव दिशोऽभवन् ॥४६४॥
विमानस्योत्पतत्काक्ष्ये परिष्कारेषु बिम्बिताः । प्रजा राज्ञीन्तिके रेजुरनुगन्तुमिवोद्यताः ॥४६५॥ 465
राज्ञां वितीर्णस्कन्धानां मरुल्लोलाः शिरोरुहाः । विमानस्थस्य नृपतेरवहंश्चामरश्रियम् ॥४६६॥
पश्यन्ती पश्चिमां सेवां सैन्यानां नृपतिप्रिया । अस्ताभिलाषिणि दिने प्रपेदे पितृकाननम् ॥४६७॥
दुस्त्यजात्मसुतवात्सल्याद्वह्वा केनापि हेतुना । सा बभूव क्षणे तस्मिंस्तनयालोकनोत्सुका ॥४६८॥
जानन्ती पवनोद्धूतं रजः सेनासमुत्थितम् । चकितोत्कण्ठिता साभूत्कुलशागमनाशया ॥४६९॥
तस्मिन्क्षणे जनाः केचिदायाता नगराच्चना । अङ्ग किं कुलशाः प्राप्त इति पृष्टास्तया स्वयम् ॥४७०॥ 470
स तु पुत्रः क्षणे तस्मिन्यियासुर्मातुरन्तिकम् । दत्त्वा विभीषिकास्तास्ता निरुद्धो द्वैधकारिभिः ॥४७१॥
ततो गृहीतनैराश्या राज्ञी पुत्रावलोकने । सा पार्थयित्वा वैतस्तं वारि श्लोकमयापठत् ॥४७२॥
वैतस्तेन तु तोयेन जठरस्थेन ये मृताः । भोक्षं गच्छन्त्यसदेहं ते यथा ब्रह्मवादिनः ॥४७३॥
उपनीतं वितस्ताम्बु पीत्वोपस्पृश्य नाथ सा । एवं शशाप पिशुनान्स्नेहसंक्षयकारिणः ॥४७४॥
जनितं प्राणहरैर्नैः पुत्रेण सहजन्मयोः । सान्वयानां क्षयस्तेषां भूयात्परिमितैर्दिनैः ॥४७५॥ 475
तस्यास्तेनोपतप्तायाः शापेनाव्यभिचारिणा । क्षिप्तमेव जयानन्दजिन्दुराजाद्रयो मृताः ॥४७६॥
चक्रे हलधरप्रख्यजातकौलीनशान्तये । परलोके पणीकृत्य युक्त्या च शपथं सती ॥४७७॥
एवं विशुद्धशीलत्वं सपत्काश्य शुचिस्मिता । कर्णेभ्यादादजस्रम्पां ज्वलिते ज्ञानवेतसि ॥४७८॥
भजायत नभो वह्निज्वालावलयमालितम् । तदागमोत्सवे दत्तसिन्दूरमिव निर्जरैः ॥४७९॥
साक्रन्दैर्न चटत्कारी दुःखोत्तप्तैर्न चाम्लकः । परमालेख्यलिखित इव जज्ञे शिखी जनैः ॥४८०॥ 480
गङ्गाधरश्चक्रिवृद्धो युग्यवाहश्च दण्डकः । नावुद्धा नोनिका वल्गा चेति दासस्तदान्वयुः ॥४८१॥
वप्पटोद्भटयोः कुल्यौ मेनटक्षेमटावुभौ । भूपालवल्लभावास्तां वैराग्याद्विजयेशयोः ॥४८२॥
भावा यन्त्रनिसर्गभङ्गुरतरास्तिष्ठन्ति नैते चिरं चेतःकाचघटस्य तस्य घटने दीर्घायमेको गुणः ।
यत्तस्मिन्निहितप्ररूढि न गलत्यायाति न म्लाननां धत्ते नापचयं चमत्कृतिचयो गीर्वाणगङ्गापयः ॥४८३॥
एकषष्टिमनिक्रम्य वर्षान्भूपतिरायुषः । सपत्नीकः पुरारातिगौरीसायुज्यमासदत् ॥४८४॥

---

४५९ 1) A_4 gloss दिव्य ४६१ 1) उत्थि supplied by A_2 in space left by A_1 — 2) A_4 gloss आत्ता गृहीता लता यया — 3) A_4 gloss हास्यार्थं. ४६६. 1) A_4 gloss, वितीर्णा दत्ता स्कन्धा. भुजशिरांसि शिबिकावाहनार्थं ये तेषां ४६७ 1) Thus corr. by A_3 from A_1 पश्यन्त्यपश्चि'. ४६९ 1) Thus corr by A_3 from A_1 °गमाशया ४७३ 1) A_3 gloss चेतोरूपे काचघटे क्षीरा इति प्रसिद्धे.

अथास्थीनि समादाय चतुर्थे दिवसे तयोः । पुत्रास्तन्वङ्गराजस्य सर्वे गङ्गां प्रतस्थिरे ॥४८५॥
पैतामहेन कोशेन परिवारेण चान्वितः । पित्रा विसर्गेधं जमाह हर्षस्तु विजयेऽभवे ॥४८६॥
आद्ये पिता पुरवरे[1] पिता श्रीविजयेश्वरे । तस्मिन्पुत्रस्तु तत्रासीत्पिता तु नगरान्तिके ॥४८७॥
ततोऽतिव्ययितं पुत्रं दरिद्रो नीतिमान्पिता । अभ्यर्थ्यानर्थभीतश्च संधिं दूतैरयाचत ॥४८८॥
स तैरसकृदायातैरुत्सिक्तो युक्तवादिभिः । राजपुत्रः समं पित्रा संधिं निन्ये कथंचन ॥४८९॥
रक्षां पैतामहे कोशे शरीरे चात्मजन्मने । प्रतिशुश्राव जनकः कृतप्रत्यहचेतनः ॥४९०॥
नृपतेः पुत्रमानेतुं विशतो विजयेश्वरम् । दृष्टिः प्रवृत्तैर्गृहैर्दग्धा श्रुतिश्च जनगर्हया ॥४९१॥
स पीतकोशः संगृह्य तनयं प्राविशत्पुरम् । कोशं चास्थापयन्मुद्रां दत्त्वा तदभिधाङ्किताम् ॥४९२॥
अत्रान्तरे तस्य राज्ञो धार्मिकी धीरजायत । दारिद्र्यच्छेदिनी धर्म्या धनबुद्धिश्च सर्वतः ॥४९३॥
तनयो नयनाख्यस्य कल्यः सेल्यपुरौकसः । कुटुम्बिनो जघ्यकाख्यः क्रमाद्धामरतामगात् ॥४९४॥
स्थलोत्पत्तिः स दिग्देशविक्रीतात्रो वणिज्यया । संभृतार्थः शनैर्लुब्धो धनेशस्पर्धितां दधे ॥४९५॥
सार्धं क्रोशं खनित्वा स नित्यं दीनारराशिभिः । पूरितायाः क्षितेः पृष्ठे बहून्दीनारवान्पपत् ॥४९६॥
दीनारन्यसनं भृत्यैः कारयित्वा प्रतिक्षपम् । बहवो भेदभीतेन तेन गूढं निपातिताः ॥४९७॥
स भाङ्गिलं लब्धुमिच्छन्बलेकस्मात्पलायिते । द्राक्षालतानिरुद्धाधो हतः केनापि पत्तिना ॥४९८॥
तदीयेनोपलब्धेन धनेन वसुधातलात् । पर्याप्तेनात्यजद्राजा यावदायुर्दरिद्रताम् ॥४९९॥
समृद्धु क्षाल्यमानेषु तद्दीनारेष्वहर्निशम् । कलुषाम्भा बहून्मासान्वितस्ता समपद्यत ॥५००॥
दानोपभोगरहिताः काले क्लेशेन भूयसा । अन्यार्थमर्थान्रक्षन्ति चित्रं लुब्धा महाशयाः ॥५०१॥
प्राणान्धारयते निपीय मरुतः शेते तमोन्धे बिले संभोगे परदत्तमिच्छति पटं नग्नस्त्वपाशान्तये ।
विस्तार्यैति कदर्यतामहिरत्वन्यस्य हेतोर्निधीन्नान्यः कोपि परं परोपकृतिषु प्रौढास्ति लुब्धं विना ॥५०२॥
अन्यैश्च बहुभिर्मार्गैर्नयः सिन्धुमिवाविशन् । नानार्थसंपदस्तास्तां भाग्यभाजं महीभुजम् ॥५०३॥
अर्था भाग्योदये जन्तुं विशन्ति शतशः स्वयम् । दिग्भ्योऽभ्युपेत्य सर्वाभ्यः सायं तरुमिवाण्डजाः ॥५०४॥
स्रोतांसि प्रबलत्वमेत्य वसुधां मूलेषु पूर्णन्त्यधो व्योम्नोऽम्भः पतति त्यजन्ति हरितो वारि प्रणालीमुखैः ।
इत्थं शुष्कसरः पयोदसमये संपूर्यते सर्वतो भाग्यानामुदये विशन्ति शतशो द्वारैर्न कैः संपदः ॥५०५॥
जनरक्षणदाक्षिण्ये ततः पितुरिवान्वहम् । कुशला कलशास्यासीत्पजापुण्योदयैर्मतिः ॥५०६॥
स्वयं वणिगिवार्याणां गणनाकुशलोपि सः । विवेक्ता सत्पथत्यागे मुक्तहस्तः सदाभवत् ॥५०७॥
उपस्थितौ भाविनी च पश्यन्नायव्ययौ स्वयम् । अन्तिकान्नान्यजज्रूर्खखटिकादि नियोगिवत् ॥५०८॥
तस्य स्वरूपमूल्येन रत्नादि क्रीणतः स्वयम् । नाशकन्वञ्चनां कर्तुं केपि विक्रयकारिणः ॥५०९॥
त्रिवर्गं सेवमानः स विभज्य समयं सुखी । मध्याह्नादूर्ध्वमभवदृश्यः सर्वकार्यैणाम् ॥५१०॥
तस्य स्वेषां परेषां च कृत्यमन्विष्यतश्चरैः । अज्ञातः स्वप्रवृत्तान्तः प्रजानामभवद्यदि ॥५११॥

---

४८७ [1]) Thus emended with G, A पुत्रवरं ४९५ [1]) शस्य supplied by A_3 in space left by A_1.—[2]) Thus corr. by A_3 from A_1 °तामगात् ५०० [1]) Emended, A तहीना° ५०३. [1]) Thus corr. by A_3 from A_1 °स्नाता. ५०४. [1]) तन. supplied by A_3 in space left by A_1.—[2]) Thus corr by A_3 from A_1 °वान्तिकम.

स्ववेश्मैव गृहस्थस्य व्यायतश्चास्य मण्डलम् । जनो जनपदे जातु न कश्चिदैन्यमस्पृशत् ॥५१३॥
कौलीनचकितो राजा कुर्वन्कण्टकशोधनम् । प्रकटं नात्यजद्दण्डं चौरेभ्योपि स जातु चित् ॥५१३॥
न तस्यार्थः कोपि नष्टो मन्त्रिणो यमयोजयन् । मन्त्रिणां स पुनश्चक्रे नष्टस्यार्थस्य योजनम् ॥५१४॥
विवाहयज्ञयात्रादिमहोत्सवशताकुलः । नित्यप्रहृष्टो निर्दैन्यस्तद्राज्ये ददृशे जनः ॥५१५॥ 515
तेन नीतिविदाक्रान्ताः क्ष्माभुजः क्षित्यनन्तराः । आहाराचरणेप्यासंस्तदध्यक्षान्विनाक्षमाः ॥५१६॥
तन्द्वङ्गस्थस्थकुनादीस्त्रीनायानान्दिगन्तरात् । व्यथितैकानुजान्मल्लप्रमुखान्गुङ्गजानपि ॥५१७॥
अगीणयद्बन्धुभृत्यान्स भव्याभिर्विभूतिभिः । कलाभिरमृतार्द्राभिः सोमः सुरपितृनिव ॥५१८॥ युग्मम् ॥
अत्राग्रपरिपाकोपि दौःशील्येन न भूपतिः । कुदैशिकोपदिष्टेन दुष्टाचारेण चोज्झितः ॥५१९॥
टङ्केन वृद्धियाख्येन कन्यकाः समुपाहृताः । क्रीतास्तस्य तुरुष्केभ्यो नानादिग्देशसंभवाः ॥५२०॥ 520
स ताभिः परदारेश्च रूपलोभादुपाहृतैः । अवरोधपुरंध्रीणां ह्रासप्रतिमढौकयत् ॥५२१॥
बद्धीः कामयमानस्य योषितः प्रतिवासरम् । मत्स्ययूषादिभिर्वृष्यैर्नोस्य पुष्टिरहीयत ॥५२२॥
महाममयपूजासु व्यपः स गुरुभिः समम् । महाचरूणामाहारं नीतिमुत्सृज्य चाकरोत् ॥५२३॥
एवं शबलकृत्येन पुरं तेन नवीकृतम् । निर्दग्धे विजयक्षेत्रे शिलावेश्म न भूलिनः ॥५२४॥
विजयेशशिलावेश्ममौलाबातपवारणम् । नृपोम्बरशिरश्चुम्बि जाम्बूनदमयं व्यधात् ॥५२५॥ 525
व्ययस्थितिं चानपायां व्यधत्त त्रिपुरेश्वरे । पिनाकिनश्च प्रासादं स स्वर्णामलसारकम् ॥५२६॥
ततः सत्कर्मकुशलश्चकार कलशेश्वरम् । निःसंख्यहाटकघटीपटलाङ्कशिलागृहम् ॥५२७॥
कलशेशोपरि छत्रं चिकीर्षोः काञ्चनाञ्चितम् । तुरुष्कदेशजः शिल्पी राज्ञोभ्यर्णमुपाययौ ॥५२८॥
सहस्रैर्मूरिभिर्हेम्नश्छत्रसिद्धिं वदन्कलाम् । स छादयद्भिजां ताम्रे काञ्चनारोपणं विदन् ॥५२९॥
कानिचिद्दिवसान्यासीत्प्राप्तुत्सृपसत्क्रियाम् । ततोतितीक्ष्णपत्रेण नोनकाख्येन मन्त्रिणा ॥५३०॥ 530
अभ्यूह्य शिक्षितकलो विलक्षोगाद्यथागतम् । तच्च छत्रं ययौ सिद्धिमत्यल्पैरेव काञ्चनैः ॥५३१॥
अनन्तेशाभिधं बाणलिङ्गमन्याश्च भूपतिः । प्रतिष्ठा विविधाश्चक्रे स शक्राधिकवैभवः ॥५३२॥
नृपे सङ्गजपालाख्ये शान्तिं यातेभ्यधिच्यन । ततः संग्रामपालाख्यो राजपुर्यां तदात्मजः ॥५३३॥
राज्यं जिहीर्षुर्बालस्य पितृव्यस्तस्य भूपतेः । भेजे मदनपालाख्यो बलीयानुद्यमं मदात् ॥५३४॥
तद्व्याच्चरणं प्रायाद्भूपं साहायकार्थिनी । स्वसा संग्रामपालस्यं जस्सराजश्च ठक्कुरः ॥५३५॥ 535
कृतप्रसादो नृपतिः साहायककृते ददौ । तयोः पश्चाज्जयानन्दं शूरैर्विज्ञादिभिः समम् ॥५३६॥
तत्र विद्राविताभित्रः स स्फूर्जन्कान्तमण्डलः । संग्रामपालामात्यानां कार्यान्ते शङ्कुतां[2] ययौ ॥५३७॥
कारुन्तो गमनं तस्य दत्त्वा तास्ता विभीषिकाः । ते त्रासमैच्छन्नाधातुं स वीरो न त्वकम्पत ॥५३८॥
मतिं राजपुरीयाणामसावेतामदादिति । शङ्कमानेन तेनाथ विज्ञे मन्युरुपाहृतः ॥५३९॥

---

५१५ [1]) Thus corr. by A_1 from जनै ५१७ [1]) Doubtful, thus A ५१८ [1]) म supplied by A_1 in space left by A_1 ५२० [1]) Thus A_2, A_1 तुरुष्कैन. ५२२ [1]) A_1 gloss वृष्यै: वाजीकरणै A_2 quotes वृष्यकल्पतरौ पारिभद्रसनैव द्विहुल वामनाचकम । मर्कटिरसा पारतवत्पातयेत्पूर्णयुक्तित । योजयेत्सर्वयोगेषु समकस्तुकवाजिनम ॥ ५२४ [1]) न supplied by A_2 in space left by A_1 ५३३ [1]) A_1 gloss राजर्षिर् इति भाषया ५३५ [1]) Thus corr by A_2 from A_1 संग्रामराजस्य ३७. [1]) A_1 gloss जयानन्द .—[2] Thus emended with G *see manu*, A शङ्कतां

तैस्तत्र दत्तद्रविणैः प्रार्थितोथ महामतिः । रक्षापदेशात्स्वं सैन्यं स्थापयित्वा न्यवर्तत ॥५४०॥
एवं राजपुरीं तस्मिन्स्वीकृत्यान्तिकमागते । तुतोष कार्यमर्मज्ञः प्राज्ञः कलशभूपतिः ॥५४१॥
क्रमाद्राजायमानेषु विज्जादिष्वथ पस्पृधे । आमयेन जयानन्दो दैवात्प्रमयहेतुना ॥५४२॥
स्वास्थ्यवार्तोपलम्भाय भूपतिं गृहमागतम् । वाच्यमस्ति रहः किंचिदित्यूचे स कथान्तरे ॥५४३॥
निर्यातेष्वथ सर्वेषु किंचिच्चैवाब्रवीद्यदा । तदा ताम्बूलनित्यक्षाव्याजाद्विज्जो विनिर्ययौ ॥५४४॥
आप्रेनोक्तोपि निर्गच्छन्कि प्रयासीति भूभुजा । मन्त्रिणा चैत्य स प्राज्ञो बहिरेव व्यलम्बत ॥५४५॥
जयानन्दोभ्यधाद्भूपमुल्का राजपुरीकथाम् । व्यक्तं नास्त्येव ते राज्ये विज्जे वृद्धिमुपागते ॥५४६॥'
आदीयमानाद्विज्जेन कार्येभ्यो वेतनादपि । दर्शयामास गणनां बहुमूल्यां महीभुजे ॥५४७॥
प्रायः कलुषतां राजा प्रयातः स्वगृहांस्ततः । याचितो गमनानुज्ञां विज्जेनोद्विग्नवेदिना ॥५४८॥
निषेधस्त्रिय दाक्षिण्यलेशात्तिर्बन्धकारिणः । तस्यानुज्ञां ददौ गन्तुं सान्तस्तोषो महीपतिः ॥५४९॥
लब्धादेशो गृहान्गत्वा सर्वोपकरणैः समम् । प्रस्थाप्य सोग्रतो भ्रातॄनाप्रष्टुं नृपतिं ययौ ॥५५०॥
राजधर्मगभीरत्वकुरयोः स्वामिभृत्ययोः । काचिदेव क्षणे तस्मिन्नेष्टाभूद्द्रुतावहा ॥५५१॥
न यत्प्रभुः प्रियं भृत्यं गमनात्स न्यवर्तयत् । उपालेभे समन्युश्च न यद्भृत्यः प्रिय प्रभुम् ॥५५२॥
सहोत्थितेन कतिचित्पदानि सह भूभुजा । चिरं कृत्वा कथां नीचैर्हसन्विज्जो विनिर्ययौ ॥५५३॥
जिन्दुराजं हलधरो मुमूर्षुर्दूषयन्यथा । तथा विज्जं जयानन्दः स व्यवारोपयत्पदात् ॥५५४॥
तल्लक्ष्मीमात्रशेषां क्ष्मां कृत्वा गच्छन्विधीयताम् । कृतार्थो विज्ज इत्युक्ति नायहीन्मन्त्रिणां नृपः ॥५५५॥
निवर्तयिष्यति क्ष्माभृत्रियतं गमनादमुम् । इत्याशयान्वगाद्विज्जं राजवर्जं जनोखिलः ॥५५६॥
आस्कन्द शङ्कमानोस्याद्विज्जाद्राजा बलोर्जितात् । तृणस्पन्देपि चकिते निर्निद्रः पञ्च यामिनीः ॥५५७॥
तस्मिञ्शूरपुरादाते निवृत्तेष्वनुगन्तृषु । निवृत्तशङ्कस्तां शङ्कां प्रादुश्चक्रे स मन्त्रिणाम् ॥५५८॥
ते तदाकर्ण्य यं मन्त्रं विज्जार्थहरणेब्रुवन् । तस्याविधाने भूभर्तुरमन्यन्त नयज्ञताम् ॥५५९॥
विज्जादयस्तु निर्द्रोहा यं यं देशमशिश्रयन् । तत्र तत्रैव पुण्यत्वं रत्नानीव प्रपेदिरे ॥५६०॥
विज्जोधिकं प्रवृद्धोपि दैवतस्येव भक्तिमान् । पद्यां कलशदेवस्य सत्यंकारः सदाभवत् ॥५६१॥
एवं निर्वास्य विज्जादीननिरावाप्रवैभवः । क्षिप्रं सूर्यमतीशापाज्जयानन्दः क्षयं ययौ ॥५६२॥
राज्ञो विरोधकृद्वृत्तं शापस्याभिचारिताम् । प्रमयं जिन्दुराजोपि तस्मिन्नेव क्षणे ययौ ॥५६३॥
तेपि विज्जादयः क्षिप्रमनिरावाप्रसंपदः । प्रापुः शापोचितं सर्वे प्रमयं गौडमण्डले ॥५६४॥
आकस्मिकेव प्रमये विज्ज्ञः प्रमयमाययौ । सुदीर्घबन्धनक्लेशं प्रापुस्तदनुजा अपि ॥५६५॥
पलायितेषु कारायास्तेषु व्याघ्रेण पाजकः । हतस्तदनुजाः शेषा भुक्तक्लेशाः क्षयं ययुः ॥५६६॥
द्विरास्तेधिकाराणां नानदयन्मदनादयः । अदीर्घेणैव कालेन दुरन्तैर्वैभवैर्विधे ॥५६७॥
जयानन्दसहायोथ तत्पुत्रान्परिपालयन् । सर्वाधिकारी भूपेन वामनाख्यो व्यधीयत ॥५६८॥

---

५५१. [1]) Thus corr by later hand from A_1 राज्ये' ५५८ [1]) A_3 gloss दूरपुर. ५६५ [1]) A_2 gloss आकस्मिके प्रमये मारीरोग इत्यर्थ. ५६६ [1]) Thus A_1, A_2 R G पाजका —[2]) Thus A_1, A_2 तनस्त[2]. ५६७ [1]) Thus A_1 A_2 द्विरास्तु दै र[2] —[2]) Thus corr by A_3 from A_1 —तैस्तैर्वि[2].

यस्य नास्ता व्यवदतीर्नीतिज्ञस्याद्भुतावहाः । वर्णयन्ति वयोवृद्धा गोष्ठीष्वद्यापि[1] धीमताम् ॥५६९॥
मामानवन्तिस्वाम्यादिभोग्यानाहृत्य लुब्धधीः । राजा कलशगश्चाख्यं कर्मस्थानं विनिर्ममे ॥५७०॥ 570
मन्त्रिणे नोनकायासौ धनोत्पादविदेऽदात् । क्रौर्यत्रस्तो न पापाय जनरक्षणदक्षिणः ॥५७१॥
मन्त्रिणो राजकलशाप्रत्यान्यत्यन्तरङ्गताम् । लेभिरे क्ष्माभुजः पार्श्वे प्रशस्तकलशाग्रयः ॥५७२॥
सुताः स्वाच्छन्द्यविवशाधीराः संध्यादिसंभयाः । युक्तया निदधिरे राज्ञा निबद्धस्वाधिकारिणः ॥५७३॥
पुनर्मदनपालेन क्रान्ते राजपुरीपतौ । सहायकाय व्यसृजत्सेनान्यं बप्पटं नृपः ॥५७४॥
प्रतापैर्भूपतेस्तेन भृत्यांशेनापि[2] निर्जितः । बद्ध्वा मदनपालोपि कदमीगन्तमावेशितः ॥५७५॥ 575
भ्राता वराहदेवस्य कन्दर्पाख्यो महीभुजा । कृतो द्वाराधिपो वीरो विदधे डामरक्षयम ॥५७६॥
बभूव जिन्दुराजास्य शिक्षितो नयविक्रमी । भूम्यनन्तरसामन्तमुकुटस्पृष्टशासनः ॥५७७॥
स राजपुर्यादिजयी द्वारं परमकोपनः । क्षणे क्षणेन्यजद्राजा प्रसाद्य साहितः स्वयम् ॥५७८॥
मदनः क्षितिपालेन पाषितः कम्पनेशताम् । लब्धप्रकर्षान्बोपादीन्डामरान्बहुशोवधीत् ॥५७९॥
सेवावशीकृतः श्येनपालं सं नगराधिपम् । चक्रे विजयसिंहाख्यं हताशेषमलिम्लुचम् ॥५८०॥ 580
कन्दर्पोदयसिंहाद्यैः प्रहिते लोहरे सकृत् । राजा भुवनराजस्य दुरं निःसारणं व्यधात् ॥५८१॥
कीर्तिराजस्य तनयां स च नीलपुरप्रभोः । लब्ध्वा भुवनमत्याख्यां रिपोश्छिद्रामयोभवत् ॥५८२॥
कार्यप्रतिग्रहे कर्तुं प्रवृत्तिं साहितोभवत् । हत्वा विजयसिंहाद्यो नृपेण नगरेशताम् ॥५८३॥
गुडात्मजः स मल्लोथ तेन द्वारपतिः कृतः । राज्ञां मौलिमणिस्थाने स्वप्रतापमरोपयत् ॥५८४॥ युग्मम् ॥
शौर्यं निष्परिवारस्य पार्थस्योत्तरगोयथे । उरशासंपवेशे वा भुवं मल्लस्य मानिनः ॥५८५॥ 585
पञ्चाशीत्सुरगैर्यस्य कृष्णां तीर्त्वा व्यपाहरत् । राज्यं वाजिवरैः सार्धमभयाख्यस्य भूभुजः ॥५८६॥
एवं वशीकृतभुवो भूपतेर्नयवेदिनः । सममेवाष्टभूपालास्त्रिपञ्चेन्दविशन्पुरम् ॥५८७॥
कीर्तिन्यञ्चपुराधीशश्चाम्पेयो भूभृतासटः । तुक्तान्मत्तस्तु कलशो वल्लापुरनरेश्वरः ॥५८८॥
राजा संग्रामपालाख्यः स च राजपुरीपतिः । उत्कर्षो लोहरोर्वीभृद्वीरशो मुद्ग लो नृपः ॥५८९॥
गाम्भीरसिंहः कान्देशः काष्टवाटधराधिपः । श्रीमानुत्तमराजोपि राजानमुपनस्थिरे ॥५९०॥ तिलकम् ॥ 590
राजलोकः प्रवृद्धोपि धने जनपदेभवत् । दुर्लक्ष्यो वार्षिकसस्पूरे वारिनिधाविव ॥५९१॥
तस्मिन्क्षणे शिलीभूतविततस्तासलिले नृपैः । शीतक्षणेष्वसंक्षीणं सुखं नैरन्त्यभूयत ॥५९२॥
मनसापि हि भूपाला यत्ने किंचिदचिन्तयन् । प्राग्रमेव पुरोपदयन्वामनेन तदाहृतम् ॥५९३॥
कौशलं मन्त्रिणस्तस्य राजेतरदुर्लभम् । निमित्तं तदसंभ्रान्तो नित्यवद्योस्यवाहयत् ॥५९४॥
पार्थिवेष्वथ यातेषु मल्ले कार्यपराङ्मुखे । क्षितिपालेन कन्दर्पो द्वारं स्वीकारितः पुनः ॥५९५॥ 595
अभिमानधनो मन्त्री कृतारब्धिर्ननैर्धनैः । दुर्गं स स्वापिकं नाम युक्तया दुर्महमग्रहीत् ॥५९६॥
स पविष्टोपि नगरं खिन्नः केनापि हेतुना । पार्थिवाभ्यर्थ्यमानोपि कार्यं नैवाग्रहीत्तदा ॥५९७॥

---

५६९ [1]) पि supplied by A_2 ५७५ [2]) Thus corr by V, from A_1 °शेनापि ५७९ [3]) A_1 gloss मदनपाल. ५८०. [4]) स supplied by V_1. ५८१ [5]) Thus corr by V, from A_1 कन्दर्पोभ'. ५८२. [6]) Thus corr by A_2 from A_1 °च्छिन्नाग्रयो° ५८५ [7]) A_1 gloss अर्जुनस्य --[8]) V, gloss उत्तरं विराटपुत्र [9]) Thus A_1 A_2 दुन

तदा प्रशस्तकलशो[1] नित्य दूत्यं समाचरन् । ततुल्लिक्तोक्तिसंतप्तः संस्पृशन्नभिमानिताम् ॥५९८॥
निजश्रियातिभूयस्या भूरीन्संगृह्य शक्तिभिः । तत्पदे रत्नकलशं स्वभ्रातरमकारयत् ॥५९९॥
सोर्थैः क्रीतंपथोप्यासीन्न कन्दर्पसमः क्वचित् । किं चित्रोल्लिखितः सिंहः सत्यसिंहक्रियां स्पृशेत् ॥६००॥
ततः क्रमेण भूभर्त्रा भृत्यरत्नं कथंचन । राजस्थानाधिकारे स नगरे योजितः पुनः ॥६०१॥
अतिताडनतश्चैरे विपक्षेथ कृपाकुलः । त्यक्त्वा तमप्यधीकारं विष्णुर्जाह्नवीमगात् ॥६०२॥
पटान्तकृतसंरोधस्ताडयित्वा करं प्रभोः । कोपाद्देशान्तरं यातस्तं प्रत्यास्ते[2] स्म मन्युमान् ॥६०३॥
अत्यन्तखेदितोप्यासीदानीतस्यान्तिकं पुनः । दर्पं हर्तुं नृपस्तस्य संनद्धो न तु जीवितम् ॥६०४॥
इत्थं पुरुषसिंहानां प्रौढदार्ढ्यो विमोढवान् । आरोहमवरोहं च सोन्नरङ्गः क्षमापतिः ॥६०५॥
उपाङ्गगीतव्यसनं नर्तकीसंग्रहादरः । देशान्तरोचितं राज्ञा वेत्रेवेह प्रवर्तितम् ॥६०६॥
ततो जयवनोपान्ते निरन्तरमहागृहम् । स्वनामाङ्कं पुरं कर्तुं प्रावर्तत विशांपतिः ॥६०७॥
मठाग्रहारप्रासादमहागृहपरंपराः । सत्तोयोपवनास्तत्र ययुः सिद्धिं सहस्रधा ॥६०८॥
अत्रान्तरे राजसूनुर्हर्षः सोत्कर्षपौरुषः । गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः ॥६०९॥
सोशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः । कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥६१०॥
लुब्धेन पित्रा संत्यक्ता जना नानादिगागताः । गुणशौर्योज्ज्वलास्तेन गृहीताः कृतवेतनाः ॥६११॥
अपर्याप्ते पितृकृते वेतने व्ययशालिनः । एकाहान्तरितं तस्य भोजनं त्यागिनोभवत् ॥६१२॥
पितरं गायन इव व्यक्तं गीतैः स रञ्जयन् । भर्तव्यभरण चक्रे तद्दत्तैः पारितोषिकैः ॥६१३॥
उद्गायति पुरस्तस्मिन्कदाचिदथ पार्थिवः । सभ्येषु प्रीयमाणेषु शौचायोत्थाय निर्ययौ ॥६१४॥
तेन प्रमङ्गभङ्गेन जातनेत्रोत्रधः सुधीः । क्षुभ्यन्वैलक्ष्यकोपाभ्यां कुमारः क्षितिमैक्षत ॥६१५॥
प्रभुर्वीतक्षान्तिः सुहृदनिशठः स्त्री परुषवाक्सुतो गर्वोद्धतः परिजन उदात्तमतिवचाः ।
ह्यान्सोढुं शक्यो ननु हृदयदाही परिकरो न तु श्रोतावज्ञालुलितनयनान्ते परिभवन् ॥६१६॥
पितुरेव तदा भृत्यो विद्याद्यावद्वाभिधो विटः । शार्ङ्गि राज्यं निहत्यैमं नर्मणेवेत्युवाच तम् ॥६१७॥
अधिक्षिपन्स तं रोषाद्यानेनोत्क्रमसांप्रतम् । हृत्यामत्तेन हसता धर्म्मटेनाप्यकथ्यत ॥६१८॥
अये भोगेच्छवश्छन्नाः कुमारानुगाप्पितुः । खेदं प्रदर्श स्वीकुर्युर्वैद्या कामिसंक्षीरिव ॥६१९॥
पुनः सभां संप्रविष्टस्तं पिता पर्यतोषयत् । प्रीतिदायैस्तनस्तैस्तैः साधुवादैश्च मानिनाम् ॥६२०॥
अन्येद्युस्तु पितुः पार्श्वात्स भुक्त्वा स्वगृहान्गतः । अभ्येत्य विद्याद्यावट्टेन तदेव जगदे रहः ॥६२१॥
उपपत्तिं तत्तदुक्त्वा तेनाभीक्ष्णं निषेधता । निर्बन्धात्तेन हस्तेन सोथ कोपादताडयत् ॥६२२॥
ललाटाभिघातं रुधिरं वमन्तं व्राणवर्त्मना । तं वीक्ष्य सोभिजातोभूत्सदाक्षिण्यो नृपात्मजः ॥६२३॥
भृत्यै प्रक्षालयन्नस्रं तस्येदृक्पाप्मनो भवेत् । उक्तेनापीति कथयन्स्मित्वा वासांस्यदापयत् ॥६२४॥

---

५९८ [1]) Emended, A R G °कलश ६०० [1]) Thus A_1, A_3 नांत° — [2]) Thus corr by later hand from A_1 कन्दर्प° सम. ६०२ [1]) जाह supplied by A_3 in space left by A_1. ६०३ [1]) Thus corr by A_3 from A_1 प्रत्यास्ते ६०४. [1]) Thus A_1, A_3 °खेदितस्यासीत्° ६१३ [1]) Emended, A °तोषकै ६१५ [1]) Thus A_1; A_3 क्षुभ्यद्वै° — [1]) Thus corr. by A_3 from A_1 कुमाग ६१८ [1]) Emended A धर्मटेना° ६१९. [1]) Thus A_1, A_3 कामी स°

अनिच्छोरपि तस्येच्छा दानात्तेनान्वमीयत । दुःशीलेनान्यकामिन्याः स्मितमात्रादिव स्पृहा ॥६२५॥ 625
असकृत्कृतयत्नः स ततः कालेन भूयसा । तं पैरयत्तत्र कृत्ये मन्त्रे स्त्रीकृत्य धम्मटम् ॥६२६॥
स रोहद्रोहसंकल्पजन्मना पाप्मना भ्रितः । संमन्त्र्य पितरं हन्तुं तीक्ष्णान्प्रायुङ्क्त सर्वतः ॥६२७॥
शश्वत्स गोचरीभूतस्तेषां व्रेहलवस्पृशाम् । न घातितः सुनुना च वांछिता न च तत्कथा ॥६२८॥
आप्तत्वं तीक्ष्णवर्गस्य प्रतिभेदभयाद्गते । तां विदित्वावट्ट एवाभु वार्तां राज्ञे न्यवेदयत् ॥६२९॥
बुद्ध्वात्मानपुत्रस्तत्तस्मिन्नहनि जातभीः । भोक्तुं नागात्पितुः पार्श्वमपि दूतैः कृतार्थनः ॥६३०॥ 630
सोपि तस्मिन्ननायाते तत्रार्थे शान्तसंशयः । दिने तत्र मनस्तापान्नाभुङ्क्त सपरिच्छदः ॥६३१॥
सभ्रातृकस्य प्राप्तस्य पानर्दुःखं न्यवेदयत् । सुचिरं शकनस्याङ्के शिरो विन्यस्य सोरुदत् ॥६३२॥
उक्त्वा च धम्मटोदन्तं वद्ध्वा तस्य समर्पणम् । विधेहीत्यभ्यधात्तापि तं भद्रीभणितिक्रमैः ॥६३३॥
न कृताधिगमावावां कृत्यस्यास्येत्युदीर्य तम् । अभाषेतां भ्रातुरर्थे पुनस्तन्वद्ध्वनन्दनौ ॥६३४॥
त्वत्प्रसादबलाद्राजन्नापन्नत्राणदीक्षितौ । यावावां तत्प्रवेशार्थं व्यक्तद्वारं निशास्त्रपि ॥६३५॥ 635
कथं नु पृथिवीपाल प्राप्ते प्राणात्ययक्षणे । निर्दोषो वा सदोषो वा नाभ्यां संत्यज्यतेनुजः ॥६३६॥ युगलकम् ॥
स्वामिद्रोहापवादश्च भवेत्तद्रक्षणाद्ध्रुवम् । देशत्यागं तदुत्सृज्य शरणं नान्यदावयोः ॥६३७॥
हन्यादि संभाव्य तयोः पादन्यस्तोत्तमाङ्गयोः । रुदित्वा गमनानुज्ञां कथंचित्पार्थिवो ददौ ॥६३८॥
पथि कश्चिदमुं हन्यान्मयीकृत्येति धम्मटम् । तौ विनिर्जग्मतुर्दंशात्तनः सबलवाहनौ ॥६३९॥
तन्वद्ध्वनेषु यातेषु विविक्तीकृतमन्दिरः । सुतमानीय नृपतिः सान्त्वयन्निदमब्रवीत् ॥६४०॥ 640
आसंसारं जगत्यस्मिन्सर्वतः ख्यातकीर्तिना । जनकेनैव जन्यस्य ज्ञप्तिरुत्पाद्यते जनैः ॥६४१॥
पुत्र शीतांशुनेवात्रि दिग्व्रीपख्यातकीर्तिना । भवता तु सुपुत्रेण मां जानात्यखिलो जनः ॥६४२॥
स त्वं गुणवतामग्र्यो निरर्गलयशा भवन् । असाधुमेवयमज्ञानं वद कस्मादिषेवसे ॥६४३॥
पैतामहं निज चार्थं यत्र तुभ्यं समर्पयम् । तत्र हेतुमनाकर्ण्य नासूयां कर्तुमर्हसि ॥६४४॥
रिक्तः स्वेभ्यः परेभ्यश्च प्राप्तोत्यभिभवं नृपः । इति निर्ध्याय हि मया क्रियते कोशरक्षणम् ॥६४५॥ 645
पुरप्रतिष्ठां निष्पाद्य क्षिप्त्वा राज्यधुरं त्वयि । वाराणस्यां गमिष्यामि नन्दिक्षेत्रेत्र वा पुनः ॥६४६॥
तद्राज्यकोशयोः स्वामी बुभूषुर्न चिराद्भवान् । अतित्वर्यतः कस्मादनार्योचितमीहसे ॥६४७॥
संभाव्यते त्वयि न तद्यन्ममावेदितं खलैः । यथार्थकथनात्तस्मात्कौतीनं विनिवार्यताम् ॥६४८॥
विशुद्धये करोत्येष स्वकृतस्याप्रतिभ्रवम् । क्षेत्रादिदीच्छंस्तद्राजा साभिप्रायं वचोभ्यधात् ॥६५९॥
अपलापवचोमात्रं निनीषुस्तस्य हेतुताम् । जनप्रत्ययने सोभूद्यस्मात्क्षान्तिसमुत्सुकः ॥६५०॥
हर्षस्तु साधुवादैस्तत्पितुः सपूज्य भाषितम् । वक्ष्याम्यग्रमुखे तत्त्वमित्युक्त्वा निर्ययौ बहिः ॥६५१॥ 650
सामान्येप्रेरणादेषा चिकीर्षाभूदिति ब्रुवन् । स पितुःप्रहितं दूतं हीतः स्वांवसथं ययौ ॥६५२॥

६२५ [1]) Thus corr. by A, from A, दुःशीलान्य° ६२९ [1]) र supplied by A, ६३० [1]) Thus corr. by A, from A, °पुत्रस्तत्त° ६३१ [1]) A, तत्रार्थेऽशान्त° ६३३. [1]) Emended; A धम्मटो° —[2]) Emended, A बुद्ध्वा ६३४. [1]) A, gloss धम्मटस्य. ६३५. [1]) यावावा तत्प्रवेशा supplied by A, in space left by A, ६३९ [1]) Emended, धम्मटम् supplied by A, in space left by A, ६४१. [1]) A, gloss पुत्रस्य ६४४. [1]) A, gloss अनन्तदेवसम्बन्धिन —[2]) Emended with C, A समर्पयम्. ६४६ [1]) Thus R G C, A पुत्र.. ६५२. [1]) Emended, A सावसथं

दृष्ट्वा म्लानाननं वीक्ष्य पाणिभ्यां ताडयच्छिरः । हा पुत्रेति वदन्राजा तस्याश्चस्कन्दमदापयत् ॥६५३॥
हतेस्मिन्स्वशिरश्छिन्द्यामिति प्रोक्तवतः प्रभोः । निदेशाद्वेष्टयित्वैव तस्युस्तद्देहमं शास्त्रिणः ॥६५४॥
तीक्ष्णास्त्रं पिप्लिद्वारा परिवार्य नृपात्मजम् । ऊचुः सुपरुषां वाचमेव निश्चितमृत्यवः ॥६५५॥
अस्मान्पूर्णा प्रमादी च विरुद्धं छद्म कारयन् । घातयित्वा दुराचार क्व जीवन्स्थातुमिच्छसि ॥६५६॥
रक्षिष्यति सुतं स त्वां स पिता रक्षितस्त्वया । ज्ञातेयं युवयोरस्ति वयमेव हताः पुनः ॥६५७॥
युध्यस्व मध्यगोस्माकं त्वां निहन्मोन्यथा वयम् । एवं सर्वप्रकारं ते व्यक्तं नास्त्येव जीवितम् ॥६५८॥
तां वार्तां भूपतेः श्रुत्वा व्याकुलस्यामतः स्थितः । हुर्दान्तिकं दण्डकाख्यः प्रायाज्जिनमहत्तरः ॥६५९॥
तीक्ष्णैर्निजनया दत्तप्रवेशः स नृपात्मजम् । प्रसह्योवाच मतिमान्नयं सर्वात्मिमोहयन् ॥६६०॥
क्षत्रियापुत्र नीवित्वा कल्यानल्पेतरानपि । कारणैरपि गन्तव्यं नियमात्रियतैर्वशम् ॥६६१॥
तद्देहस्मिन्समासन्ने मरणेऽभिचारिणि । यदर्थं गृह्यते शस्त्रं स मानः पाल्यतां त्वया ॥६६२॥
कृतश्रुतः ख्यातयशा युवा सुक्षत्रियो भवान् । तदाहवविलम्बेन कार्यं किमिव पश्यसि ॥६६३॥
एतेषु सुसहायेषु मयि चामेसरेषुना । विपत्तिर्विजयो वापि प्रतापिस्तव शोभते ॥६६४॥
उत्क्षिप्त नवकेशादियोजन कार्य द्रुतम् । वीरपट्टं बधानापि स्वःस्त्रीपरिणयक्षमम् ॥६६५॥
इत्युक्ता क्षुरकर्मार्थं राजपुत्रं सनापितम् । प्रावेशयत्पुज्यमानस्तीक्ष्णैराभ्यन्तरं गृहम् ॥६६६॥
न्यस्तासिधेनुर्वेषेण दत्तझम्पः क्षणात्स्वयम् । पश्चात्पविदय तद्देहम चके मुनिहितार्गलम् ॥६६७॥
ततः स राजस्थानीय तमाराद्वत्रीद्वचः । रक्षितो राजपुत्रोयं क्रियतां स्वोचितं त्वया ॥६६८॥
भूतग्रहादिभवमोषधिभिर्विरोधिजातं बलैः प्रहरणप्रभवं तनुत्रैः ।
निर्वाप्यते प्रतिभयं पृथिवीपतीनां सार्वत्रिकं नु रभसाद्भुवि बुद्धिवृद्धैः ॥६६९॥
नवन्तस्तुमुलं योधास्ततो राजगुनास्पदे । आरोढुमाययुर्वप्रहर्म्यादि प्रविवेक्षवः ॥६७०॥
तीक्ष्णा दृढद्वारगृहस्थित त्यक्ता नृपात्मजम् । यावद्विगेन्तुनिच्छन्ति हन्यमाना ययुस्त्वरः ॥६७१॥
द्विषः प्रसङ्गमनिच्छन्मापात समाश्रिताः । तावद्विनिर्ययुर्वीरा निर्दोहं अभिमानिनः ॥६७२॥
ते निर्याता. सूर्यमनीगौरीशाश्रयिणो गृहात् । सद्योऽशिवान्तिकं प्रापुर्यन्तो युधि विरोधिनः ॥६७३॥
रक्ष्यमाणोपि भूभर्तुर्गिरा ज्ञातेयशालिनः । राजज्ञातिर्हतस्तेषु प्रथमं सहजाभिधः ॥६७४॥
द्विजस्तिव्याभियो वीरः पण्डितः शौर्यमण्डितः । रामदेवश्च केशी च कर्णाटैरभटैस्त्रयः ॥६७५॥
केचिच्चयन्तः शस्त्राणि स्व घ्नन्तः केपि च स्वयम् । लेभिरे वधबन्धादि पापाः कापुरुषोचितम् ॥६७६॥
सितषष्ठ्यां सहस्यस्य चतुःषष्ठे स वत्सरे । वैरं नीत्वा पितापुत्रौ विश्वस्तः कारितो विटैः ॥६७७॥
हठत्यागासक्तिः प्रिययुवतिसंप्रेरणवचः खलासङ्गः पूर्वप्रणयपरिहारो जनयितुः ।
अमात्येन भ्रात्रा सममपरमात्राथ कलहः कुमाराणां बुद्धिं पितरि विपरीतां प्रतनुते ॥६७८॥
एव स खलसंगत्या कुमारो लब्धलाघवः । बन्धं कारागृहे प्रापदसुखानि सुखोचितः ॥६७९॥

---

६५५ [1]) A_2 gloss स्वर्गीया एव पूर्व राजवध प्रति प्रेरयितारः . ६६६. [2]) A_2 gloss कारणानि ब्रह्मादीनि पश्च ६६७. [3]) Fol. 166 of A ends with पश्चात्स्व , fol. 167 which ended with verse 688, is now lost. ६७५. [4]) Thus R, G केशव

राज्ञी भुवनमत्यस्मिन्बद्धे माध्यस्थ्यसंविदि । स्थापिता मानिनी कण्ठच्छेदं कृत्वा जहावसून् ॥६८०॥ 680
रक्षिणो मल्लिणामाप्तांस्तस्य विन्यस्य भूपतिः । प्राहिणोदुचितान्भोगान्सुतस्नेहाहिने दिने ॥६८१॥
चक्रिकायामशक्तोयमिति संचिन्त्य भूभुजा । भृत्यैः प्रयागनामास्य निजः पार्श्वाच्च वारितः ॥६८२॥
नोनकी हर्षमुद्दिश्य स्वेनान्यैश्च महीभुजम् । जीवितं लोचने चास्य कृष्णेतामित्यभाषत ॥६८३॥
नृपः स शीलवैकल्ये पशुतुल्ये हियं त्यजन् । रिपोरिव तनूजस्य चकमे कर्तनिच्छियाः ॥६८४॥
तासु श्रेष्ठ्यवाल्लभ्यमवाप्य सुगलाभिधा । बभूव तुङ्गभूभर्तुनष्ट्री भर्तृवधार्थिनी ॥६८५॥ 685
समन्त्र्य नोनकः सा च द्वौ सूदावशनान्तरे । रसं प्रदातुं हर्षस्य पापं धैरयतां ततः ॥६८६॥
अन्यसूदमुखाद्वार्तां प्रयागस्तामवाप्रवान् । प्रभुं तदाप्यमानात्मपरिहारमकारयत् ॥६८७॥
तेनाज्ञेन परीक्षार्थं दापितेनापजीविनौ । हर्षः श्रुत्वा निशम्याभूद्विगशो निजजीविते ॥६८८॥
प्रयुक्ति गूढदण्डस्य पितुरेव स तां विदन् । ततः सर्वाणि भोज्यानि स्पर्शैर्वीक्ष्यादिशे दिने ॥६८९॥
प्रयागोपहतेनासीत्परं बाधेन सर्वदा । भोज्येन येन केनापि कुर्वञ्जीवितधारणम् ॥६९०॥ 690
अज्ञस्याभोजनं भुक्त्वा राजा सूदैर्निवेदितम् । ततः प्रयागमानीय तत्र पप्रच्छ कारणम् ॥६९१॥
प्रयोजकौ च सूदौ च सोपलभ्य न्यवेदयत् । रसार्पणकथां कृत्स्नां तज्ज्ञानं च स्वयं प्रभोः ॥६९२॥
अथान्येष्वपि सूदेषु पित्रा दत्तेषु शङ्कितः । राजसूनुर्न बुभुजे प्रयागोपहृतं विना ॥६९३॥
स सर्वेषु विरुद्धेषु यथेच्छाल्यवाहयत् । मेने तत्तस्य लब्धं शेषेष्वास्थापराङ्मुखः ॥६९४॥
अत्रान्तरे समुद्भूतकस्माच्चाशसूचकः । अदृष्टपूर्वो भूभर्तुः सदाचारविपर्ययः ॥६९५॥ 695
उत्थाय ताम्रस्वाम्याख्यं पूर्वं ताम्रमयं रविम् । स रीतिप्रतिमाः स्वैरं विहारेष्वीक्ष्यपाहरत् ॥६९६॥
धनानि निरपत्यानामाहर्तुं व्यवसायिना । न्यवार्यतार्यमर्यादा क्रौर्याक्रान्तेन भूभुजा ॥६९७॥
ततोतिशापसंतापव्यञ्जकेनाङ्गसाभवत् । अतिसंभोगजातेन धातुक्षेण्येन सोर्दितः ॥६९८॥
कुम्भप्रतिष्ठासंभार चिकीर्षोर्हरमन्दिरे । तस्यापतन्महाकालकुम्भे नासापुटादसृक् ॥६९९॥
आकस्मिकं दुर्निमित्तं तत्प्रतीकारसंविदा । न मनागप्यगाच्छान्ति प्रवृद्धिं प्रत्युताययौ ॥७००॥ 700
अस्रसृत्यनुबन्धेन तेन स्खलितसौष्ठवः । शनैः शय्यामधयितामन्तः स प्रत्यपद्यत ॥७०१॥
बलमांसकृतक्षेण्यमभिमान्याद्युपद्रवैः । कलाशेषेण शाखिना तदपुः साम्यमायुषो ॥७०२॥
राज्ये स दित्सुर्हर्षाय वृद्धामात्यान्पराङ्मुखान् । ततोभिषेकमौत्कर्षमानिन्ये लोहशालात् ॥७०३॥
उद्यावत्तेन सर्वे संविभक्ता मुमूर्षुणा । परमीर्ष्याविधेयेन न शुद्धान्तवधूजनः ॥७०४॥
कृत्वा धनार्पणं कुर्या देशादस्य प्रवासनम् । इत्युक्ता हर्षमानेतुं तेनाप्तार्थैस्त मन्त्रिणः ॥७०५॥ 705
ते तु गोमूत्रिकावार्याशाकुगल्लोहशालिताः । विन्यस्य रक्षिभावे तमुत्कर्षाय न्यवेदयन् ॥७०६॥
स नायमण्डपात्तेन निष्कुष्टः क्षमविग्रहः । निवेशितश्चतुःस्तम्भे वद्ध्वा वान्धववर्जितः ॥७०७॥
अथोज्जिगमिषून्माणात्रिःसामर्थ्यो विदत्नृपः । मुमुर्षुरभवत्तीर्थप्रस्थानाय कृतस्वरः ॥७०८॥

६८० 1) Thus R G *sec manu*, C G *prima manu* मध्यस्थं. ६८५ 1) Emended, G R °भूनर्तृसमर्तृवधार्थिनी; C °भूनर्तृसमर्तृवधा° ६८६ 1) Thus C, R रसं ६८८ 1) Thus emended with C, A R G तेनाज्ञेन. ७०६ 1) Emended, A अशु ७०६ 1) Emended with C, A गोमूत्रि°. ७०८. 1) Emended with C, A अथोज्जग°.

स जानन्दैवतक्रोधं ताम्रस्वामिविपाटनात् । ह्येष शरणं कर्तुं मार्ताण्डं प्राणलब्धये ॥७०९॥
संत्यज्य विजयक्षेत्रमत एवापवर्गदम् । महीश्वरोपि प्रययौ तत्र त्रासवशंवदः ॥७१०॥
अधीकारप्राप्त्या तृणमिव विदन्त्यिश्वमखिलं नियोगी जानातीर्नमति गृहदासीरपि रुदन् ।
नदन्मूर्खो ज्ञानी बहुदुरुपदेशाधिगमतः करोति प्राणान्ते शिशुरिव च किं किं न विगुणम् ॥७११॥
तादृश्या कृपणप्रायसेव्यया क्लैब्यसंविदा । गुरूपदेशाहंकारस्तस्य हास्यत्वमाययौ ॥७१२॥
शुक्रायां मार्गशीर्षस्य तृतीयस्यां निशामुखे । तलादेवाश्रितो युग्यं भूभृन्मर्तुं विनिर्ययौ ॥७१३॥
स भेरीतूर्यनिर्घोषैर्जनाक्रन्दं निरोधयत् । सामात्यान्तःपुरो नौभिः प्रतस्थे जलवर्त्मना ॥७१४॥
यामशेषे दिनेन्यस्मिन्प्राप्य चरणान्तिके । मार्ताण्डस्य स्वजीवाप्त्यै सौवर्णीं प्रतिमां व्यधात् ॥७१५॥
भूत्यैरगणिताज्ञस्य दिदृक्षोर्ज्येष्ठमात्मजम् । औत्सुक्येनारतिस्तस्य व्यथितस्याधिकाभवत् ॥७१६॥
बहिर्द्वारकृतं गीतं गायनानां स गायताम् । विवृतद्वारविवरः शृणोति स्म विनिःश्वसन् ॥७१७॥
प्राणावसानसमये परिसंकुचन्ती स्वप्रप्रसङ्ग इव धावनशक्तिराज्ञा ।
प्रायुर्यदा खलु रुजो मरणोद्भवाया मर्मव्यथां पथयते पृथिवीपतीनाम् ॥७१८॥
प्रज्ञाभ्यर्क्षं तनुजं च संविभक्तुं कृतार्थनः । उत्कर्ष पाहयऽश्रिक्षां बद्धजिह्वोभवत्ततः ॥७१९॥
अव्यक्तं वदतो हर्ष इति वाचं पुनः पुनः । निह्नोतुं नोनको भावं तस्यादर्शमदीकयत् ॥७२०॥
स तच्चिरार्य विहसन्दन्तौष्ठः कम्पयऽशिरः । जपन्किमपि सार्धे द्वे वङ्गवागभवद्विने ॥७२१॥
आसन्नप्राणनिर्याणः संज्ञयाहूय मन्त्रिणः । ततः स्वं तैरसमुर्दैर्मार्ताण्डायमनाययत् ॥७२२॥
वर्षानिकाग्नपञ्चाशद्भुक्त्वान्स सितेहनि । मार्गस्य पञ्चषष्टेब्दे पञ्चत्वं निष्ठामथासदत् ॥७२३॥
सप्त मम्मनिकामुख्या देव्यः परिणयाहृताः । अवरुद्धापि जयमत्यभिधाना तमन्वगुः ॥७२४॥
प्रसादवित्तया तस्य पुनः कृष्याभिधानया । अवरुद्धिकया कृत्स्ना स्त्रीजातिरपवित्रिता ॥७२५॥
सर्वावरोधप्राधान्यपदानं नाम्मरद्यदि । मा स्मार्षीन्नाम भर्तुस्तदनुचाभिजनोद्भवा ॥७२६॥
संश्रित्य विजयक्षेत्रं क्रमाद्राममनियोगिनः । भेजे यस्त्ववरुद्धात्वमतो दुःखाकरोति नः ॥७२७॥
भूपालभोग्यं स्ववपुः सा भोगाभ्यासभासुरम् । निनाय याम्यभोग्यत्वं भिद्वारीर्नीचचेतसः ॥७२८॥
उत्कर्षस्याभिषेकाय व्यषेध्वखिलमन्त्रिषु । अन्त्येष्टिमकरोद्राज्ञः कृतज्ञो वामनः परम् ॥७२९॥
घोषोभिषेकतूर्याणामेकतो गीतमङ्गलः । साक्रन्दः प्रेततूर्याणां नादोन्यत्र समुद्ययौ ॥७३०॥
जातः पद्माश्रियां देव्याः पुत्रः कलशभूभुजा । ततो विजयमल्लाख्यो भ्रातुर्वैमत्यमादधे ॥७३१॥
यदादङ्पर्देवस्य पिता प्रत्यहवेतनम् । प्रतिभुभ्राव तस्मै स तदेवोत्कर्षभूपतिः ॥७३२॥
आश्वासाय च मध्यस्थान्दधौ सामन्तमन्त्रिणः । कृष्यात्मजस्य चक्रे च जयराजस्य वेतनम् ॥७३३॥
अन्विष्यन्ति हृदय एव तरला गत्यन्तरं योषितो योगक्षेमकथां चिनान्तिकगता एवात्मजाः कुर्वते ।
अन्येषां शतशोवसानसमये चर्चां विचार्यैर्हृदीं स्त्रीपुत्रादिकृते कुकर्मभिरहो संचिन्वतेर्थं जडाः ॥७३४॥

७११ [1]) Emended with C, A 'देशांधि°. ७२० [1]) A, gloss हर्षं ज्ञानीयमामिति राज्ञो भावमभिप्राय निह्नोतु भावर्शो नोनकेना नीत इत्यर्थं हर्षं भावर्शं इति पाठमात्रसाम्यादिरित्यर्थं. ७२४ [1]) A, gloss उरद्धा इति देशभाषया. ७२९. [1]) Emended with C, A अन्तेष्टि° ७३१. [1]) ज supplied by A, ७३२. [1]) Emended, A तदेवो°.

प्रविवेश ततः श्रीमान्नगरं नृपतिर्नवः । न तु हर्षोदयाकाङ्क्षि हृदयं नगरौकसाम् ॥७३५॥ 735
तद्राज्यलाभदिवसो जनस्याभोगदूषितः । सञ्चषि प्रत्यभात्तेव स रोगार्तेरिवोत्सवः ॥७३६॥
हर्षदेवस्तु पितरि प्रयाते मर्तुमातुरे । नववद्भश्रुतुस्तस्मे न तस्मिन्नह्नि भुक्तवान् ॥७३७॥
सार्धभ्रष्टमिवाप्यन्यमन्यस्मिन्नह्नि टक्कुराः । ते शोकमूकं संप्राप्य कथंचित्तमभोजयन् ॥७३८॥
राज्यं दातुं जिजे देशो चक्रुश्चास्य प्रतिश्रवम् । राज्यद्वयं नायमर्हत्येक एवेति वादिनः ॥७३९॥
एवं मिलितचित्तैर्तैर्पत्ति श्रुतवान्पितुः । कृतोपवासः सोन्येद्युः शुभावोत्कर्षमागतम् ॥७४०॥ 740
बाष्पैः पित्रे प्रयच्छन्तं निर्वापसलिलाञ्जलीन् । तं दूतैरनुजो राजा ज्ञातुं प्रार्थयतात्र सः ॥७४१॥
तस्य स्नानक्षणे राज्ञि सज्जे राज्याभिषेचने । घोषाभिषेकतूर्याणामुदभूत्सजयध्वनिः ॥७४२॥
स तेन सुनिमित्तेन प्राप्तां मेने निमित्तवित् । विद्युद्द्योतेन जीमूतगर्जामिव नृपश्रियम् ॥७४३॥
ततः प्रभृत्यनुबला सुनिमित्तैरगृह्यत । तस्यात्यासन्नराज्यस्य भूत्यैरिव दिने दिने ॥७४४॥
स भोजनं कारयितुं दूतान्प्राहा विसर्जितान् । देशाच्चिर्वासयन् मां राजा संत्यज्य बन्धनात् ॥७४५॥ 745
स्थातुमप्यत्यवधित्यां विदध्यां कोशसंविदम् । प्रियेणेत्थं निरुद्योगैः संदिश्येति व्यसर्जयत् ॥७४६॥
स तन्मिथ्या प्रतिश्रुत्य तं दूतैः प्रस्थितैस्ततः । कृतकोशं सान्त्वयित्वा राजा भोज्यमभोजयत् ॥७४७॥
नित्यं च श्रोत्रियास्ये तदर्थ्यमान इति ब्रुवन् । कालापहारं कुर्वाणः शङ्कां तस्योदपादयत् ॥७४८॥
विश्रामाय स्वतोदङ्मुखाणि कृत्वा प्रयागकम् । पार्श्वे विजयमल्लस्य सोथ गूढं व्यसर्जयत् ॥७४९॥
तदबोधा तमूचे स त्वां ब्रूते दुःस्थितोपजः । कुमारे त्वयि राज्येस्मिञ्जुष्यामो बन्धने वयम् ॥७५०॥ 750
सक्रान्तदुःखः संचिन्त्य चिरेणापि तमब्रवीत् । कार्यं कुर्यात्कथमिदं मद्विरा नीतिमान्नृपः ॥७५१॥
तथाप्यस्मिन्यथाशक्ति यतिष्ये त्वद्विमोक्षणे । त्वया तु सावधानेन रक्षणीयं स्वजीवितम् ॥७५२॥
तं पार्श्व हर्षदेवस्य संदिश्येति व्यसर्जयत् । उपायोन्विष्यतस्तावत्तस्य कार्यस्य सिद्धये ॥७५३॥
उत्कर्षः प्राप्तराज्यस्तु देवतेव मोहितः । नादधे किंचिदारम्भं व्यवस्थापयनक्षमम् ॥७५४॥
समर्पिताधिकारोपि कन्दर्पादीन्स मन्त्रिणः । राज्यकृत्यं न पप्रच्छ विदधे स च न स्वयम् ॥७५५॥ 755
परिमातुं परीमाणं कोशसंचयवीक्षणे । परं क्षमापतेस्तस्य दिनकृत्यमजायत ॥७५६॥
कर्मणा निर्व्यथेनास्य चिन्त्यमानस्य येन वा । सुदीर्घदर्शी लोकोभूत्तेन लुब्धत्वनिश्चयी ॥७५७॥
सा तस्य लुब्धतारूपातिः समुद्गात्रप्रदायिनः । भूभर्तुः पितृपत्वीभिः स्वैरिणीभिः पवर्धिता ॥७५८॥
स श्रोत्रिय इवोत्कर्षी व्यवहारमिताशयः । महाहृदयभोग्यानां प्रजानां नाभवत्प्रियः ॥७५९॥
ततो नियमितां वृत्तिं तस्मात्कुर्धाद्धनामुचन् । कुर्यन्विजयमल्लोभूद्देशान्गन्तुं कृतोद्यमः ॥७६०॥ 760
स्वं रक्षितुं स मध्यस्थाननुव्रज्याकृतेंगिलान् । प्रार्थयामास तेनापि सज्जास्तमनुवव्रजुः ॥७६१॥
लवणोर्मेः निशामेकां पुराद्गिर्गत्य तस्थुषः । मध्यस्थसैन्यास्तस्यैव योधाः पक्षमशिश्रयन् ॥७६२॥

---

७३७ [1]) Thus corr by A_1 from A_1 °ह्नि. ७४५ [1]) Thus corr by A_1 from A_1 राज्यात्सन्त्य. ७४६ [1]) त्या supplied by A_2 in space left by A_1. ७४८ [1]) Emended, A °र्धमान. ७४९ [1]) ताद supplied by A_2 in space left by A_1. ७५७ [1]) यन वा supplied by A_2 in space left by A_1. ७५९. [1]) A_2 gloss उत्कर्षी मानसमये सकम्प इत्यर्थ. ७६१. [1]) A_2 gloss हेतुना. ७६२. [1]) मध्यस्थ supplied by A_2 in space left by A_1. —[2]) Thus corr. by A_2 from A_1 °स्तस्या –

हर्षे बद्धे त्वयि गते कृतकृत्यो भवेन्नृपः । तत्तं निष्कृष्य कारागा गमनं तव सांप्रतम् ॥७६३॥
इति तैः प्रेर्यमाणः स राजसूनुरुदायुधैः । विनिवृत्याकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥७६४॥
765 श्रुत्वा चिकीर्षितं तस्य व्यावृत्तस्य तथाविधम् । सहायाः समपद्यन्त कतिचिद्भामरा अपि ॥७६५॥
अकरोन्मधुरावद्दो हयसेनापतिः सुतम् । राजसूनुर्ययासूर्यं मध्यस्थाननुयायिकम् ॥७६६॥
नागाह्वयो द्रोहहीनो राजपक्षमसंत्यजन् । कैश्चित्सह हयारोहैः स पद्मपुरवर्त्मना ॥७६७॥
आगच्छन्तिकं राज्ञो दुर्निमित्तशतत्वरः । न यावन्नगरं प्राप क्षिप्रकारी नृपात्मजः ॥७६८॥
शकुनैराहितोत्साहः शालापोहीपितामिभिः । सैन्यैर्गृहान्दहंस्तावद्राजधानीमवेष्टयत् ॥७६९॥ चक्रलकम् ॥
770 समवाय विनिर्यातं त्यक्तोत्कर्षं महीभुजम् । तत्पक्षं जयराजोऽपि राजसूनुरशिश्रयत् ॥७७०॥
हस्तस्थितौ राजपुत्री तस्याचिन्तयतां गतिम् । नत्रौ कवी व्यहरतिं सिद्धवाचः कवेरिव ॥७७१॥
हर्षदेवे परित्यक्ते यास्याम इति वादिनः । स हस्तिमहिपादीनां शालाः सैन्यैरदाहयत् ॥७७२॥
त्यागप्रलयजीमूतो हर्षदेवोऽभिषिच्यताम् । लुब्धः खशो वणिक्प्रायो राज्यादेष निवार्यताम् ॥७७३॥
एवं वदन्तः सन्तोऽपि हर्षमेत्य पुरौकसः । पुष्पैः प्राच्छादयन्वद्धं तमोरिविवरार्पितैः ॥७७४॥
775 उत्पिञ्जे तत्र संजाते भग्नसैन्यस्य भूपतेः । संप्रेष्य ठक्कुरान्हर्षस्तटस्थं तद्बलं व्यधात् ॥७७५॥
इत्थं बद्धोऽपि तत्कृत्वा वैरिकार्यावरोधिनः । संदेहवेपमानाङ्गस्तनस्तानेवमब्रवीत् ॥७७६॥
वर्तेऽद्य संकटे दुष्टे तन्मां मुञ्चत बन्धनात् । न चेदाशु महीपालादनिष्टं नियमाद्भवेत् ॥ ७७७॥
इत्युच्यमानास्ते यावद्विमृशन्ति स्म तन्मुहुः । पादप्रहारा न्यपतंस्तावद्वारगृहाद्बहिः ॥ ७७८॥
उच्चचार स किं द्रोहः क्रान्तोयं दुराशयैः । रे ठक्कुरा विवृणुत द्वारमित्युच्चकैर्वचः ॥७७९॥
780 ठक्कुरेष्वथ भीतेषु धैर्यादगणयन्भयम् । अकारयद्धर्षदेव एव द्वारमपावृतम् ॥७८०॥
नेत्रमात्रस्थितप्राणो ददर्श विशतस्ततः । लौहद्राङ्शस्त्रिणो हन्तुं प्राप्तान्योऽश वारिकान् ॥७८१॥
ते हि छित्त्वोज्झिते हर्षशीर्षे सर्वमिदं क्षणात् । शाम्येदिह भयं मन्त्रं नोनकस्येति जल्पतः ॥७८२॥
उत्कर्षेणासकृच्छ्रुत्वा तं निहन्तुं विसर्जिताः । विमृश्य चोक्ता गच्छन्तः कार्यशेषं विमुच्यता ॥७८३॥
कदाचित्तेन कृत्यं स्यादहतेनेति तत्क्षणम् । निवार्य ठक्कुरान्रक्षो हन्तव्यश्च यदोर्मिकाम् ॥७८४॥
785 इमां दद्यामभिज्ञानं यदा चेयं विसृज्यते । तदा तु बन्धनाच्याज्य हत्युदीर्याङ्गुलीयकम् ॥७८५॥
पाणौ दर्शयता चोक्ता विलम्बालम्बनं यतः । निवार्य ठक्कुरांस्तस्मिन्क्षिप्रं न प्राहरंस्ततः ॥७८६॥ कुलकम् ॥
स तु प्रत्येकमाहूय नामग्रहणपूर्वकम् । अजिघ्रत्तास्ताम्बूलमप्युपावेशयत्पुरः ॥७८७॥
जहुस्ते कृतसत्कारास्ताम्बूलग्रहणक्षणे । हीनाः करायाच्छस्त्राणि प्रजिहीर्षा च मानसात् ॥७८८॥
धत्ते श्रियं सृजति कीर्तिमघं लुनीते मित्रत्वमानयति हन्त विरोधिनोपि ।
यात्यध्वभिः प्रतिपदं सुमनोनुकूलैर्गीः कामधुक्समिव नापहरत्यनर्थम् ॥७८९॥
790 राजपुत्रः स तानूचे किं हीना इव तिष्ठथ । निर्दोषाः सर्वथा प्रेष्याः स्वाम्यादेशानुपालने ॥७९०॥

---

७७० 1) Thus corr. by A_3 from A_1 त्यक्तोत्क°. ७७६. 1) Emended, A वैरिन्वि°, C वैरिकानवि°. ७८६. 1) Thus A, R वारिकान्

विलम्ब्यतां तथाप्यत्र द्रष्टव्यं महदद्भुतम् । ययोर्देव्यत्यंवस्थानामन्यथात्वं क्षणे क्षणे ॥७९१॥
द्विपक्षीपिक्रव्याद्दुरगतुरगादिभ्रमकृतो यथास्यां भिद्यन्ते दिवि किल त एवाम्बुदलवाः ।
तथा सौम्यक्रूरक्रमविकृतिभाजस्तनुभृतां क्षणानां नानात्वान्नु यदि विकारोर्मय हमाः ॥७९२॥
क्षणानुवृत्तिं कुर्वाणास्तथात्र स्थिता वयम् । तथा सन्तु भवन्तोपि कार्यान्तरदिदृक्षवः ॥७९३॥
अपि चैवंविधा एव वितन्वन्तो रसान्तरम् । भासन्नराज्यप्राप्तीनां राज्ञां स्युः प्राणसंशयाः ॥७९४॥
मीष्मस्योष्मा व्रजति घनतां नूनमासन्नवृष्टेर्दैशं गाढीभवति तिमिरं संनिकृष्टप्रभातम् ।
जन्तोरेवं प्रसभविभवस्फारसंपत्प्रचाराच्चिष्क्रामन्ती विपदुपचितोपद्रवोद्रेकमेति ॥७९५॥ 795
प्राणचारेण शकुनं निश्चित्येति वदन्सनाम् । आचचक्षे शुभोदर्कान् स्वोदन्तसदृशीः कथाः ॥७९६॥
कालं क्षेप्तुमुपन्यस्तश्रुद्धिव्यक्तीभवद्रसाम् । तेभ्यश्च कथयामास हरिश्चन्द्राभ्रयां कथाम् ॥७९७॥
तद्रक्षने स्वरक्षायां बाधवार्तामवेषणे । व्यापृतत्वं गभीरस्य न तस्य समलक्ष्यत ॥७९८॥
अत्रान्तरे तमुद्दिश्य मते जाते नवे नवे । राजभ्रियश्च काल्याश्च शतशोभूद्वतागतम् ॥७९९॥
उत्कर्षी भूमिपस्तस्य परित्यागं व्यमन्यत । आदिदेशानुगांस्तांस्तान्भूरिशश्च प्रमापणे ॥८००॥ 800
अभिज्ञानोर्मिकादानं वधादेशे तु नास्मरत् । ते नोक्तिं तस्य दुतानमन्वतिष्ठन्त रक्षिणः ॥८०१॥
स तान्वन्ध्यश्रमान्वीक्ष्य स्मृत्वाभिज्ञानसंविदम् । सत्त्वोत्मनं राजपुत्रं भ्रुशाख्यं व्यसृजत्ततः ॥८०२॥
अभिज्ञानं वितरतस्तत्करे तस्य मृत्यवः । दैवयोगात्क्षणे तस्मिन्नूर्मिकाव्यत्ययोभवत् ॥८०३॥
यः पात्यर्थमुपार्जितोन्यशिरसस्तेनैव सिन्धुप्रभुर्वृद्धक्षत्रधराधवः स्वशिरसः पातं वरेणान्वभूत् ।
दिष्ट्या स्वैव गदा श्रुतायुधनृपं हन्तावधीदाहवे यच्चाणाय विगण्यते विधिवशात्तेनैव नाशो भवेत् ॥८०४॥
तथा चैकस्य विस्मृत्या व्यत्ययेनापरस्य च । अभिज्ञानस्य स नृपो नाशं प्रत्युत लब्धवान् ॥८०५॥ 805
आभिजन्येन हर्षस्य ते क्षणादेव रक्षिणः । प्रपेदिरे हितैषित्वमुत्कर्षाज्ञाविरोधिनः ॥८०६॥
क्षारमाक्रान्तमुत्क्रोधो वधायायमुपागतः । इति निर्धार्य ते भूरिं हन्तुमैच्छन्नुदायुधाः ॥८०७॥
उद्घाटितारिपुट्टा दृष्ट्वा तस्योर्मिकां करे । तेनैव साकं नृत्यन्तो हर्षं समुपतस्थिरे ॥८०८॥
पादन्यस्तोत्तमाङ्गैस्तैर्मर्गच्छेत्यर्थितस्ततः । अविश्वसन्नाजहनुः क्षणमासीत्स चिन्तयन् ॥८०९॥
तस्मिन्क्षणे हर्षदेवं हतं ज्ञात्वा रणे स्थितः । क्रुध्यन्विजयमल्लोभूरधिक्रोक्तिपौरुषः ॥८१०॥ 810
तं दरभुमुद्यतं राजधानीं जीवति तेमजः । अभिधायेति रुरुधुः कथंचित्पार्थिवानुगाः ॥८११॥
प्रत्ययार्थं ततस्तस्य राज्ञा हर्षवधूद्भुतम् । गृहीतभर्तृताडङ्का सुगला प्रैष्यतान्तिकम् ॥८१२॥
तां विलोक्यैव विरते वह्निदाहाच्नृपात्मजे । राजा भयप्रतीकारं हर्षत्यागादमन्यत ॥८१३॥
गत्वामात्याः स्वयं नोनप्रशस्तकुलशादयः । हर्षं निर्निगडं कृत्वा कारागारात्ततोत्यजन् ॥८१४॥

---

७९१ [1]) Thus corr. by later hand from A, °कुनाम - -[2]) देव्यत्य supplied by A_3 in space left by A. ७९५. [1]) Thus corr. by A_1 from °प्रतापम, A, °प्रभाने ७९६. [1]) Thus corr. by A, from A_1 श्रुचांद° ७९९ [1]) A_3 gloss काली यमस्त्री. ८०२. [1]) Doubtful, thus A R G ८०४ [1]) A_3 gloss व पातार्थमिति एतद्वृत्तद्वयेपाख्यान महाभारते द्रोणपर्वणि ज्ञेयम्. ८०६. [1]) A_3 gloss आभीजन इति देशभाषया. ८०८. [1]) क नृत्यन्तो supplied by A_3 in space left by A_1. ८११. [2]) Emended; A R G नेतुज

मन्त्रः स तेषां शोकेन वक्त्रात्कृतगतागतः । अन्त्यक्षणे श्वास इव प्रससार बहिश्चरन् ॥८१५॥
हर्षैः प्रच्छाद्यमानस्तु पौराणां पुष्पवृष्टिभिः । हयमारुह्य सामात्यो रणस्थं नृपमासदत् ॥८१६॥
अभिनन्द्यानुजो राजा तमूचे भ्रातरं रणात् । निवार्यागम्यतां कुर्मः प्राप्तकालं ततो वयम् ॥८१७॥
तथेति प्रस्थिते तस्मिंस्त्यक्त्वा तत्स रणाजिरम् । प्राविशन्मन्त्रिभिः सार्धं कोशं हेमादिसंश्रयम् ॥८१८॥
उत्तीर्णं महतः कृच्छ्राद्धर्षदेवमुपस्थितम् । दृष्ट्वा विजयमल्लोभूत्प्रहर्षाच्चिक्रियः क्षणम् ॥८१९॥
ततो ववन्दे तत्पादौ स चोत्काम्यालिलिङ्ग तम् । तास्ताः कथास्तयोरासन्नुपकर्तृपकार्ययोः ॥८२०॥
व्यापादयेनमेवादौ हर्षोत्कर्ष ततो नृपः । निष्कण्टकोसि भवितेत्याप्तस्योपांशु जल्पतः ॥८२१॥
ततो विजयमल्लेन नाद्रेहिणादृतं वचः । ज्ञात्वेङ्गितज्ञो हर्षस्तत्तस्तु चकितः क्षणम् ॥८२२॥ युग्मम् ॥
स्वदेहमामिषीभूतं स भ्रात्रोः श्येनयोरिव । निष्पत्तपक्षप्रतिमो ररक्षार्वगतश्चरन् ॥८२३॥
आसन्नाभ्रजलस्य दावविगमे विश्वद्भयं शाखिनो नक्रास्याद्गलतश्च मज्जनमयी शङ्का भवेद्वारिधौ ।
भोक्तव्यस्य विधिः शुभस्य रभसात्त्वादुत्त्वनिष्पत्तये जन्तोः संतनुते निराकृतभियो भीत्यन्तरोत्पादनम् ॥८२४॥
तं हयभ्रमणव्याजाद्रक्षितुं निजजीवितम् । ज्ञातवार्ता निजाः केचित्पत्तयः पर्यवारयन् ॥८२५॥
साकं विजयमल्लेन ततः संमन्त्र्य स क्षणात् । चचाल विश्रवापायमाख्यातुं तं महीभुजे ॥८२६॥
अयं तद्वेदमनः प्राप्तं विनिर्यान्तं नृपात्मजात् । ततो विजयसिंहस्तं संप्रवेशाज्ञयावारयत् ॥८२७॥
ऊचे च मरणात्तीर्णो मर्तुं किं पुनः । निष्पन्नं गत्वोपविश त्यक्तशङ्कं नृपासने ॥८२८॥
एवमुक्त्वतस्तस्य भृत्यैः कोशादुपाहृते । सिंहासने हर्षदेवस्ततस्तूर्णमुपाविशत् ॥८२९॥
वैयात्यच्छादितानन्तप्रातिकूल्या तदन्तिके । उपाविशच्च सुगला महादेवीत्वसिद्धये ॥८३०॥
तस्याभिषेकशब्देन समघुष्यन्त सर्वतः । रसितेनाम्बुवाहस्य चातका इव मन्त्रिणः ॥८३१॥
तद्वार्ताश्रवणेनार्तमुत्कूर्प मन्दिरात्ततः । धूर्तो विजयसिंहोपि कृष्ट्वान्यमनयद्गृहम् ॥८३२॥
आस्थानस्थस्य भूभर्तुरग्रेण स मितानुगः । नष्टश्रीर्दैन्यशे गच्छन्थिरः कस्य विभूतयः ॥८३३॥
तस्य वेश्मप्रविष्टस्य बहिर्विन्यस्य रक्षिणः । राज्ञो विजयसिंहस्तत्कृतं कार्यं न्यवेदयत् ॥८३४॥
कारायां संस्तुतान्राजपार्श्वमानीय ठक्कुरान् तत्सैन्येप्यस्थितेत्याक्षीद्भयं विजयमल्लतः ॥८३५॥
सोप्यगजं प्राप्तराज्यं श्रुत्वा तत्सविधं व्रजन् । निन्ये संमान्य तद्भृत्यैः स्वामेव वसतिं क्षणात् ॥८३६॥
तस्मैन्यं स्वान्तिकं प्राप्तमथ वीक्ष्य क्षमापतिः । आनिनाय तमभ्यर्णं क्षणमात्रेण नीतिवित् ॥८३७॥
मद्यं प्राणाश्च राज्यं च त्वया दत्तमिति ब्रुवन् । स प्राञ्जलिस्तमकरोत्क्लेशसाफल्यदायिनम् ॥८३८॥
तस्य दैवानुकूल्येन नीत्येव सुप्रयुक्तया । तत्कालमेव तद्राज्यशय्यायां समुपाविशत् ॥८३९॥
कारागृहान्तःसंवीतान्येव वासांसि धारयन् । सिंहासनेन शुशुभे श्रीसांनिध्याज्जवो नृपः ॥८४०॥
तादृक्साहससंरम्भपश्चिभ्रान्तो दिनात्यये । कृतारोहोथ शय्यायां त्यक्तभार इवापतत् ॥८४१॥

---

८२० ¹) स्कास्या supplied by A_3 in space left by A_1 — ²) Emended with C, A °क्षुपकर्तृपः. ८२३ Thus A_1, perhaps, पक्षि ' ८२४ ¹) The same hand which has supplemented the marginal note of A_3 in f. 110, writes here नक्रास्याद्गलतश्च मज्जनमयी शङ्का प्लवस्यात्कृपौ इत्यन्वादेशे, with the gloss नक्र जलप्राणिविशेष यो जलहस्तिनोपीरयति तन्मुखात्सकाशाद्वेववशाच्चलितस्यापि मुडनमयी शङ्का उडुपस्य स्यादेवेत्यर्थ

पश्यन्निवसतामेव सर्वतो विशरारुताम् । न स निद्रासुखं तत्र मीलिताक्षोपि लब्धवान् ॥८४२॥
उत्कर्षो युधि बद्धस्तु मन्त्रं पृच्छन्त्वमन्त्रिणः । आक्षिप्यान्यद्वचो रूक्षं नोनकेनेत्यकथ्यत ॥८४३॥
प्रातः प्रोक्तोसि यन्मन्त्रं तन्नाकार्षीर्महीपते । पतितामनयादस्माद्भाविनीं भूणु संविदम् ॥८४४॥
अध्याक्षिपो बन्धनस्थं त्वं तमुच्छिष्टभोजिनाम् । भ्रुः भ्रमांसार्पिणां हस्ते स तुरत्स्वमर्पयिष्यति ॥८४५॥ 845
शरणं मरणादन्यत्तस्मादस्मिन्क्षणेस्ति किम् । त्यक्ताहवानामस्माकं तदप्यप्राप्यतां गतम् ॥८४६॥
अवसादफलास्वादकालेत्यन्तमरुंतुदम् । यद्दोषालम्बपाण्डित्यं न विपक्षेषु शोभते ॥८४७॥
स्वयापायमनालोच्य य उपायः प्रवर्तितः । सर्वमेकपदे तेन मुहूर्तेनैव हारितम् ॥८४८॥
संस्थाप्यमानो दुर्नीत्या सूच्येव जरटः पटः । प्रत्युतोपद्रवोल्पोपि ज्ञातद्वारः प्रजायते ॥८४९॥
एवं श्रुत्वा स तन्मध्यान्निर्गत्याभ्यन्तरं गृहम् । अवरुद्धिकया सार्धं विवेश सहजाख्यया ॥८५०॥ 850
तत्र संध्यासमाधिस्थस्तिष्ठामीत्यभिधाय ताम् । क्षणं तिरस्करिण्यन्तरेकाकृत्येवाकरोत्स्थितिम् ॥८५१॥
निःशस्त्रेण गलं क्षिप्त्वा पटच्छेदनकर्तरीम् । नाद्यः प्राणहरास्तेन छिन्नाः खिन्नात्मना ततः ॥८५२॥
फणत्कारेण कर्तर्याश्रुताया भुवि शङ्किता । अपश्यत्सहजा रक्तं श्योतज्जवनिकान्तरात् ॥८५३॥
सोथ लम्बशिरोनिर्यत्सान्द्रासृग्दृग्दृशा तया । वचाबभग्नभृद्भ्रान्तश्योतद्धातुरिवाचलः ॥८५४॥
तस्यास्तदानीमौचित्यं निर्ब्यूढं येन योषिताम् । भर्तृप्रसादपात्राणामथाप्युच्चैस्तरां शिरः ॥८५५॥ 855
व्रजति रजनी त्यक्त्वा क्वापि क्षये क्षणदाकरं पदमुपगतस्यास्तं संध्या रवेरनुगच्छति ।
इति परिणतौ प्रेमण्युच्चावचे परिचिन्तिते कचन नियमाच्चिन्त्या वन्द्या न वा सुधियां स्त्रियः ॥८५६॥
कुलाचारपतिप्रेमसादृश्येप्यभवत्तदा । कृत्यासहजयोर्यस्माच्चिन्त्या वन्द्या च पद्धतिः ॥८५७॥ युग्मम् ॥
सापि हि श्रुसदो वेदमनर्तकी नाद्यमण्डपे । दृष्ट्वा तेनावरुद्धात्वं निन्ये राजवधूः पुरा ॥८५८॥
कान्तालम्बैरिकास्यन्दकृतसान्द्राङ्गरागया । प्रेम्णो हेम इवौज्ज्वल्यं प्रविश्याग्निं तयार्पितम् ॥८५९॥
हर्षदेवस्यापि पूर्वं वेश्यात्वे साभवत्प्रिया । अतस्तेनार्थ्यमानापि मरणाच्च न्यवर्तत ॥८६०॥ 860
चतुर्विंशाब्ददेशीयो दिनद्वाविंशती नृपः । मृतस्तिष्ठन्त्रिशामेकां प्रातः स्तोक्रियताभिधाम् ॥८६१॥
तस्यावरोधलोलाक्ष्यो लोहद्वाद्रिस्थिता अपि । कृशानुवर्त्मना काश्चिन्पदवीं द्रुतमन्वयुः ॥८६२॥
शस्त्रं संत्याज्यमानेषु तन्मन्त्रिषु नृपानुगैः । मुमूर्षुर्नोनकः शस्त्रं न तत्याज क्षणं यदा ॥८६३॥
विनाऽस्मान्मन्त्रदो राज्ञः कोन्यः स्याद्विश्वसैरसौ । मोक्ष्यत्यस्मांस्ततः प्राणांश्चोपेक्षिता विचारयन् ॥८६४॥
स्वयूथ्य एवेति वचः प्रशस्तकलशो वदन् । तदा संत्याजयामास स्वयं तच्च समर्पितम् ॥८६५॥तिलकम् ॥ 865
नोनसिल्हारभद्वारप्रशस्तकलशादयः । बद्धाथ हर्षदेवेन कारागारे प्रवेशिताः ॥८६६॥
इत्येवमेकेनैवाह्ना तादृग्राजविपर्ययैः । कृतश्च हर्षदेवेन दैवेनेव महाद्भुतः ॥८६७॥
यथाकथंचिद्व्युत्क्रान्ता बहवः पृथिवीभुजः । प्रतीतिविषमो मार्गः कष्टमापतितोधुना ॥८६८॥
सर्वोत्साहोवकक्षेत्रं सर्वानुग्रासदूतिका । सर्वव्यवस्थाजननी सर्वनीतिव्यपोहकृत् ॥८६९॥
उद्रिक्तशासनस्फूर्तिरुद्रिक्ताज्ञाक्षयक्षितिः । उद्रिक्तन्यायसंपत्तिरुद्रिक्तहरणग्रहा ॥८७०॥ 870

---

८४७. [1]) अवसाद supplied by A_2 in space left by A_1

कारुण्योत्सेकसुभगा हिंसोत्सेकभयंकरी । सत्कर्मोत्सेकललिता पापोत्सेककलङ्किता ॥८७१॥
स्पृहणीया च वर्ज्या च वन्द्या निन्द्या च सर्वतः । निश्चेया चोपहास्या च काम्या शोच्या च धीमताम् ॥८७२॥
आशास्या चापकीर्त्या च स्मार्या त्याज्या च मानसात् । हर्षरागाभया चर्चाकथा व्याचक्ष्यतेऽथ ॥८७३॥कुलकम्॥
नूनं स तैजसैरेव सस्रजे परमाणुभिः । कुतोऽन्यथाभूत्प्रसवे दुष्प्रेक्ष्यो महतामपि ॥८७४॥
न मर्त्येषु न देवेषु तद्देहो दृश्यते क्वचित् । दानवेन्द्रेषु स प्राज्ञैः परमुत्प्रेक्ष्यते यदि ॥८७५॥
प्रतिमार्कपरीमाणज्वलत्कुण्डलमण्डितः । उत्तुङ्गमुकुटानद्धविकटोष्णीषमण्डलः ॥८७६॥
प्रसन्नसिंहविक्षेपी नीचदम्भुच्छटाञ्चितः । वृषस्कन्धो महाबाहुः श्यामलोहितविग्रहः ॥८७७॥
व्यूढवक्षाः क्षाममध्यो मेघघोषगभीरवाक् । सोमानुषाणामपि यत्प्रतिभाभद्रकार्यभूत् ॥८७८॥तिलकम् ॥
सिंहद्वारे महाघण्टाश्चतुर्दिक्कमबन्धयत् । शान्तुं विज्ञप्तिकामान्स प्राप्तांस्तद्घाश्वसंज्ञया ॥८७९॥
भार्ता च वाचमाकर्ण्य तेषां तृष्णानिवारणम् । प्रावृषेण्यः पयोवाहश्चातकानामिवाकरोत् ॥८८०॥
आत्तवस्त्रो निर्हेमभूषणोल्परिच्छदः । ददृशे विगतो--[1] न कश्चिद्राजमन्दिरे ॥८८१॥
सिंहद्वारे नरपतेर्नानाजननसंभृते । सर्वदेशश्रियोश्चान्तमासंन्नाशीकृता इव ॥८८२॥
अपेतसंख्याः सौवर्णशृङ्खलाकटकान्विताः । श्रेभुर्मत्तेभप्रतीहारमुख्याः क्ष्मापतिमन्दिरे ॥८८३॥
एवं स्फूर्जन्स नृपतिर्नवसाम्राज्यसुन्दरः । अभुङ्क्त विजयमल्लस्य गुरोरिव मते स्थितः ॥८८४॥
आहीयमानवचसः कृतज्ञेन महीभुजा । तस्याभूत्पार्थिवस्येव सेवकैः संकटा सभा ॥८८५॥
स्वसेवकाननादृत्य रक्षन्संस्थाव्यतिक्रमम् । पित्र्येभ्य एव मन्त्रिभ्यः सोधिकारान्समर्पयत् ॥८८६॥
द्वारे चकार कन्दर्पं मदनं चापि कम्पने । अन्यान्विजयसिंहादीन्कर्तव्ये च निजे निजे ॥८८७॥
तेन प्रशास्तकलशप्रमुखाः शान्तमन्युना । बन्धास्संत्यज्य कार्येषु निजेष्वेव नियोजिताः ॥८८८॥
स्मृत्वापकारान्सुबहूनमात्यो नोनकः परम् । धात्रेयेन समं भ्रात्रा कोपाच्छूले विपादितः ॥८८९॥
काले काले तु कार्येषु संकटेषु महामतिम् । संस्मरन्स्वामिभक्तं तं पश्चात्तापेन पस्पृशे ॥८९०॥
योग्यः कृतापकारोपि कदाचिदुपयुज्यते । विहितागारदाहोग्निः शरणं भोज्यसिद्धये ॥८९१॥
संदर्शयिषे स्वभार्यायाः कर्णनासावकर्तनम् । विज्ञाताहो राजभृत्यैः भूलेनैव विपादितः ॥८९२॥
उदये संविभेजे स भृत्यान्कारावितिर्गतान् । मधौ प्रफुल्लः शाखीव भृङ्गान्भुविवरोत्थितान् ॥८९३॥
राज्ञेः क्षेमस्य यः पौत्रो वज्रजः स महीभुजा । सर्वामात्यप्रधानत्वं निन्ये सुत्रः सहानुजः ॥८९४॥
राज्ञो यात्रादिसमये प्रेक्षकाणां पदे पदे । एक एकोभवन्मन्त्री महीपालभ्रमप्रदः ॥८९५॥
सर्वप्रतीहारघटामूर्धन्यमधिरोपितः । जयराजानुजस्तस्य जीवितादधिकोभवत् ॥८९६॥
जाङ्गलीयावया भ्रात्रोरानृशंस्या ----[1] । धम्मटः सोपि तान्वङ्गैर्भ्रातृपुत्रैः सहाययौ ॥८९७॥

---

८७९ [1]) Thus corr. by A_3 from A_1 मघा°. ८८० [1]) कर्त्य and तृष्णा supplied by A_3 in space left by A_1. ८८१ [1]) A_1 indicates here a *lacuna* of two *aksharas*, C विगतोत्साप, perhaps, विगतांदोले (?). ८८२ [1]) Emended. A °मार्सीक्षार्शा° ८८८ [1]) Thus corr. by A_3. A_1 ----सन्न्यश्य कार्येषु नियोजिता. ८८९. [1]) Thus corr. by later hand from A_1 स्मृत्वाप° ८९२ [1]) Thus A, perhaps, to be read विदशावहो, cf vs. 617, 621, 630 ८९३. [1]) A_2 gloss मधौ वसन्ते भूविवरोत्थिता भृङ्गा नीलवस्त्रवर्ण द्वयी भाषया प्रसिद्धा ये अस्ताचलम्बिनि सूर्ये सूक्ष्मेभ्य. भूविवरेभ्य वसन्तसमये उज्जिघ्रन्ति शाद्वलोपरि सञ्चारार्थं ॥. ८९७. [1]) Here A_3 indicates a *lacuna*, C °गृहस्वार्द्धचक्षण

संमान्य तं नरपतिः स्वकृते हारितायनम् । सभ्रातृपुत्रमद्राक्षीत्स्वाविशेषेण सर्वदा ॥८९८॥
विभज्य भुञ्जतो राज्यं तस्यैवं प्रेरितः खलैः । क्रमाद्विजयमल्लोथ दुर्बुद्धिर्विकृतिं दधे ॥८९९॥
राज्यं प्रादाः किमन्यस्मै जित्वेत्युक्तः स दुर्जनैः । तद्विघ्नधुर्मन्त्रयामास वधं प्रथमजन्मनः ॥९००॥ 900
विजने मन्दिरे हन्यामिति संमन्त्र्य भूपतिः । यागं विधाय व्याजेन तेनागन्तुं निमन्त्रितः ॥९०१॥
मन्त्रे भुक्तिं गते राज्ञः सोथास्कन्दविशङ्कितः । आदिदेश स्वसैन्यानां द्रुतं संनहनोद्यमम् ॥९०२॥
संनद्धे राजसैन्येथ द्रुतं निर्गत्य भूपतेः । हता विजयमल्लेन मन्दुराश्चस्तुरंगमाः ॥९०३॥
संहरंस्तुरगान्वीक्ष्य प्रहरन्नृपतेर्बलम् । कुर्वन्महाहवं वीरो निर्गन्तुं तत्वरे पुरात् ॥९०४॥
आश्लिष्य पृष्ठं निघ्नन्त्या जायया सहितो व्रजन् । हृत चकार तुरगस्थः संग्राममतिमानुषम् ॥९०५॥ 905
धारासारैः क्षणे तस्मिन्सकालजलदोज्झितैः । विपर्यस्तेव पृथिवी सर्वतः समलक्ष्यत ॥९०६॥
भांकारमारुतारब्धभूरिभेरीरवे रणे । आसारेण शरैश्चासीच्छादयमानो नृपात्मजः ॥९०७॥
तं क्षीयमाणपृतनं यान्तं हन्तुं समुद्यताः । कर्माणि प्राकृतानीव न चण्डकृद्युता जहुः ॥९०८॥
भग्नसेतुं पयोवेगैर्वितस्तासिन्धुसंगमम् । सजानिरंतरद्वैर्भ्यामवतीर्य स वाजिनः ॥९०९॥
सत्त्ववानंकरोत्पत्त्यां मज्जनं रिपुसंकटे । सिन्धुं प्रवृद्धामुत्तीर्य तुरंगोपि तमन्वगात् ॥९१०॥ 910
द्विषां दृग्गोचरात्यातः स तमारुह्य वाजिनम् । दरदेशोन्मुखो वीरः प्रायाल्लङ्घ्यवर्त्मना ॥९११॥
कन्दर्पद्वारपतिना सर्वतो रुद्धपद्धतिः । गिरीशुल्लङ्घ्य चाविक्षद्गिरिगुप्तां दरत्पुरीम् ॥९१२॥
ददर्शाभ्यर्चितं तत्र श्रीविद्याधरदेहिना । केचिच्चिजाः परिजनाः शनकैस्तं प्रपेदिरे ॥९१३॥
श्रुत्वा स्वीकार्यमाणं च संरम्भं डामरादिभिः । प्रायुङ्क्त हर्षपृथ्वीभुदुपायांश्चकितोन्मदम् ॥९१४॥
तेषु वन्येषु शीतेषु सोतिवाह दरत्पुरे । डामरैः प्रहितालोपश्चैत्रे यात्रामदान्मदात् ॥९१५॥ 91
उत्तीर्य संकटांस्तिष्ठन्मार्गान्तः पटमण्डपे । अकस्मादभवन्मानी हिमानीहतजीवितः ॥९१६॥
यदुल्लासाय संरम्भो धीरैर्वैस्तार्यते महान् । कृत्यं हिनस्ति तैरेवमत्यल्पेनैव वस्तुना ॥९१७॥
उन्मीलनं निम्नरुचिः प्रयत्नाशेषां सहस्रेण करैः करोति ।
उन्मूलयत्येककरेण तानि पद्मानि धाता कुपितो द्विषेन ॥९१८॥
द्वैराज्यशङ्क्या कंचित्कालं संकुचितं ततः । भूयः प्रभयतो लग्नं राज्यं हर्षमहीभुजः ॥९१९॥
राजशब्दस्तवा सेहे न कुत्राप्यधिरोपणम् । अत्युद्यमतया तस्मिन्नुत्सवेनान्यराजसु ॥९२०॥ 920
सुशोभादायिनीभङ्गीः प्रावर्तयत मण्डले । निर्मत्सरो नरपतिः पुष्पर्तुरिव कानने ॥९२१॥
मुक्तकेशा निरुष्णीषा निष्कलाभरणाः पुरा । संत्यज्यैकं महीपालमभवन्निह देहिनः ॥९२२॥
धर्म्मिल्लयथनाद्यत्र मदनः कम्पनापतिः । जयानन्दोप्यमात्याभ्यश्चित्रार्धोरुकधारणात् ॥९२३॥

---

९०२. [1]) पास्कन्द supplied by A_3 in space left by A_1 —[2]) Emended, A °नोत्थानम्. ९०४ [1]) संहर supplied by A_3 in space left by A_1. ९०८. [1]) Thus A, perhaps to be read प्राकृतानीव. ९०९. [1]) सजानिर supplied by A_3 in space left by A_1 —[2]) Thus corr. by A_2 from A_1 °नरन्वी° —[3]) Thus corr by A_2 from A_1 °तार्य ९१० [1]) Thus corr. by A_2 from A_1 °वामक°.—[2]) स्पत्न्या and न supplied by A_3 in space left by A_1. ९१३ [1]) Thus corr. by A_2 from A_1 °तरया° —[2]) A_1 indicates a *lacuna*, C °धरदेहिना. ९१५ [1]) न्मतात् supplied by A_3 in space left by A_1 ९१६ [1]) Thus corr. by A_2 from A_1 पुरम°. ९१९. [1]) प्रभवतो लग्नं राज्यं supplied by A_3 in space left by A_1

अन्वभूत्पार्थिवक्रोधमविशेषेण मण्डले । तेन राज्योचितो वेषस्तत्र राज्ञा प्रवर्तितः ॥९२४॥युग्मम्॥
925 स केषांचिदमात्यानामाकल्पोल्लासशोभिनाम् । निर्मत्सरः स्वदासीभिरारात्रिकमकारयत् ॥९२५॥
दाक्षिणात्याभवद्भक्तिः प्रिया तस्य विलासिनः । कर्णाटानुगुणष्टङ्कैस्तस्तेन प्रवर्तितः ॥९२६॥
लडत्तालीदलाः स्थूलचन्दनस्थाससुन्दराः । रेजुर्जनास्तदास्थाने शाण्यदीर्घासिधेनवः ॥९२७॥
स्वर्णकेतकपत्राङ्कजूटलम्बोर्जितस्रजः । चटुलातिलकांश्लिष्टविलोलतिलकाङ्कुराः ॥९२८॥
अपाङ्गश्रोत्रयोर्वद्धसंधयोऽम्लनरेखया । निर्नीरङ्किककेशान्तबद्धहेमोपवीतकाः ॥९२९॥
930 अधराम्बरपृच्छान्तैर्लम्बैर्धुम्बितभूतलाः । प्रच्छादितार्धदोर्लेखकञ्चुकाङ्कपयोधराः ॥९३०॥
कर्पूगोद्गलनस्मेरा भ्रमन्त्यस्तरलभ्रुवः । बभुराश्रितपुंवैर्षा झषाङ्कच्छलदङ्कताम् ॥९३१॥ चक्रलकम् ॥
अन्योपजीव्यतां प्राप्तास्तार्थित्वेन मार्गणाः । विश्वाप्यायकतां मेघाः प्रणयेनेव वारिधेः ॥९३२॥
प्रसादैस्त्यागिनस्तस्य राज्ञः कनकवर्षिणः । समस्ता गायकगणाः पार्थिवस्पर्धितां ययुः ॥९३३॥
विद्वच्चूडामणिर्भूभृत्पण्डितान्नलमण्डितान् । चकार युग्यतुरगच्छन्नादिप्रक्रियाभृतः ॥९३४॥
935 क्रुग्मीरेभ्यो विनिर्यान्तं राज्ये कलशभूपतेः । विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः ॥९३५॥
प्रसर्पतः करटिभिः कर्णाटकटकान्तरे । राज्ञोऽभे ददृशे तुङ्गं यस्यैवातपवारणम् ॥९३६॥
त्यागिनं हर्षदेवं स भुक्त्वा सुकविबान्धवम् । विल्हणो वञ्चनां मेने विभूतिं तावतीमपि ॥९३७॥
सौवर्णामलसाराढ्या राजधान्यो धरापतेः । सुबह्वीश्चलिहगृहा भेजिरे भुवनाद्भुताः ॥९३८॥
तदीये नन्दनवने द्रुमेभ्यो नो व्यधुः स्थितिम् । त्यागिना निर्जितास्तेन केवलं कल्पपादपाः ॥९३९॥
940 विविधाभिरभून्वाम्बु विहंगमृगजातिभिः । तेन व्याघ्रदिगाभोगं चक्रे पम्पाभिधं सरः ॥९४०॥
सोज्ञासीद्यावतीर्विद्यास्तासां नामापि निश्चितम् । वक्तुं नास्त्येव सामर्थ्यं व्यक्तं वाचस्पतेरपि ॥९४१॥
गीतमाकर्ण्यतेद्यापि तस्य वाग्वेयकारिणः । विपक्षैरपि पक्ष्मागलुटद्बाष्पोदबिन्दुभिः ॥९४२॥
स्वपतो दिनयामौ द्वौ सर्वकालं विलासिनः । दत्तस्थानस्य तस्यासीद्यामिनीषु प्रजागरः ॥९४३॥
तस्य दीपसहस्राङ्के स्थितस्यास्थानमण्डपे । विद्वद्गोष्ठीगीतनृत्तप्रस्तावेन क्षपा ययुः ॥९४४॥
945 कथान्ते शुश्रुवे तत्र पर्णचर्वणजः परम् । कान्ताधम्मिल्लशेफालीत्रुटिजन्मा च मर्मरः ॥९४५॥
वितानैः सपयोदेव साग्निवेषेव दीपकैः । रुक्मदण्डैः सशम्पेव सधूमेवासिमण्डलैः ॥९४६॥
साप्सरा इव कान्ताभिः सनक्षत्रेव मन्त्रिभिः । सर्षिसंघेव विबुधैः सगन्धर्वेव गायनैः ॥९४७॥
नित्यसकेतवसतिर्धनदस्य यमस्य च । एकं विहरणारण्यं दानस्य च भयस्य च ॥९४८॥
क्षपास्थानस्थितिस्तस्य राज्ञः शक्राधिकश्रियः।कस्य वाचस्पतेर्वाचा वक्तुं कात्स्न्येन शक्यते॥९४९॥चक्रलकम्॥
950 रैवतेश्च राजनैश्चासीद्व्यवहारस्तदा घनः । मण्डले विरलामुष्मिन्दीनारैस्तान्त्रजैः पुनः ॥९५०॥
दण्डनायकतां प्राप्य सुन्नः सर्वोचितिं भजन् । तस्मिन्काले त्वभूल्लोभाज्ञीचो मुष्टिपचः परम् ॥९५१॥
निजा जयवने सूर्यामूलके विजयेश्वरे । आख्यान्ति यस्य लुब्धत्वं निर्व्ययस्थितयो मठाः ॥९५२॥

---

९२८ [1]) A_3 gloss ललाटलम्बलङ्कारश्चुलातिलको मत. ९३१ [1]) Emended; A° पुंवेशा. ९३९. [2]) Thus corr. by A_3 from A_1 त्रिश्चे. ९३८ [1]) Thus corr. by later hand from A_1 सौवर्णामाल°.—[2]) राजधा supplied by A_3 in space left by A_1.

क्षुधितव्याधितानाथदीनार्थानिवारणम् । ह्रस्पष्टं प्राप पट्टस्य राज्यलक्ष्मीः कृताऽतताम् ॥९५३॥
नन्दिक्षेत्रे व्ययीकृत्य प्रत्यब्दं सप्तवासरान् । चण्पकः सफलां चक्रे सर्वकालार्जितां श्रियम् ॥९५४॥
कृष्णाजिनोभयमुखीमुख्यैर्दानैः क्षमाभुजा । अदरिद्रीकृता विप्रा निःशेषार्तिच्छिदार्थिनाम् ॥९५५॥ 955
राज्ञो वसन्तलेखाख्या शाहिवंशप्रियाकरोत् । मठाग्रहाराङ्गणे पूज्ये च त्रिपुरेश्वरे ॥९५६॥
माहेश्वर्यमयी काचिदित्थं ज्वालेव सोद्ययौ । उदारव्यवहारं तु न तद्राज्यं प्रचक्षते ॥९५७॥
अथ प्रवृद्धिं संप्राप्ताः दानकैर्नवमन्त्रिणः । पूर्वामात्यद्विषो राज्ञो मतिमोहं प्रचक्रिरे ॥९५८॥
कुष्ठार्तांङ्घियुगः शिखी बहुपदं गृह्णाति धावन्नहिं भानुः पादसहस्रभाक्प्रतिपदं संचार्यतेनूरुणा ।
वक्ष्यन्ते बलिनोपि यद्लघुबलैः सामर्थ्यहीनैश्च यद्भाम्यन्ते परिपूर्णवृत्तय इदं दैवस्य लीलायितम् ॥९५९॥
स सर्वशास्त्राधिगमप्रौढः परिवृढो विशाम् । यन्मोहितमतिश्चक्रे त्रैधैयैरपि मन्त्रिभिः ॥९६०॥ 960
विपक्षस्य पितुर्वैरप्रतिकारविधित्सया । स राजधानीनाम्राङ्मठादि निरलोठयत् ॥९६१॥
त्यागी तत्कोशसंभारं व्ययीकुर्वन्नितस्ततः । लुब्धस्य चाभिधां तस्य पापसेन इति व्यधात् ॥९६२॥
शुद्धान्ते शुद्धशीलानां द्यौकितं मूढचेतसा । स्पष्टं पट्टयधिकं राज्ञा स्त्रीणां तेन शतत्रयम् ॥९६३॥
यादृशीस्तादृशीस्तत्र नारीर्वीन्यस्यतानिशम् । नागृह्यन्त परं डोम्बनंगमकुलाङ्गनाः ॥९६४॥
अत्रान्तरे पूर्यमाणो गूढं कोटपदातिभिः । पुनर्भुवनराजोभूल्लहरालब्धलुब्धधीः ॥९६५॥ 965
स दर्पितपुरं प्राप्तः कन्दर्पद्वारनायकम् । श्रुत्वा योद्धुं विनिर्यातं ययौ भूयोप्यहृष्यताम् ॥९६६॥
तस्मिन्प्रमद्धेपि नृपो हृष्यत्राजपुरीपतिः । संग्रामपालः केनापि हेतुना विक्रियां ययौ ॥९६७॥
कन्दर्पे कोटभृत्यानां भित्त्वानां संग्रहोद्यते । कुध्यत्राजपुरीं राजा व्यसृजद्दण्डनायकम् ॥९६८॥
स महद्भिः समं सैन्यैर्गच्छंल्लोहरवर्त्मना । अधीरः कोटकच्छेषु सार्धं मासं व्यलम्बत ॥९६९॥
प्रत्यासन्नाच्छुचेर्मासात्प्रतापाच्च विरोधिनाम् । तस्यतस्तस्य यात्रायां न संकल्पोप्यराजत ॥९७०॥ 970
अविशेषज्ञभावेन भर्तुस्तिष्ठन्निरुद्यमः । ततो जगाम कन्दर्प एवोपालम्भमात्रताम् ॥९७१॥
कृतप्रतिज्ञोनाहारनया राजपुरीजये । उपालम्भार्दितः सोथ निःसाम्योप्यवाचलत् ॥९७२॥
निराहारस्य वसतः कन्दर्पस्याद्रिगह्वरे । षष्ठेह्नचभूद्राजपुरी योजनेभ्यधिके स्थिता ॥९७३॥
अध्याहनः सोरिबलाद्भिन्नच्छत्त्राणि पातयन् । कदलीपल्लवान्मूद्रन्वनं सिंह इवाविशत् ॥९७४॥
दण्डनायकसैन्येभ्यः परमेकस्तमन्वगात् । सेनानीः कुलराजाख्यो बुद्धराजकुलोद्भवः ॥९७५॥ 975
तं बाद्यास्यां राजपुर्या हतासंख्याहितं द्विषः । निहत्य शुक्लच्छत्त्राङ्कं कन्दर्पं मेनिरे हतम् ॥९७६॥
मध्याह्ने स तु कन्दर्पः स्वयं संप्राविशद्बली । राजधानीं राजपुर्या विंशत्रीशैः समं भटैः ॥९७७॥
द्वियां त्रिंशत्सहस्राणि योधानामनिवर्तिनाम् । रुरोध राजपुर्यमे तत्पदातिशतत्रयम् ॥९७८॥
काश्मीरिकाणां[1] निहतं रणे तत्र शतद्वयम् । चत्वारि तु शतान्युर्वी खड्गानामप्यशेरत ॥९७९॥
भग्ने रिपुबले दूरमसंख्यैर्वेधिताग्रिभिः । संस्कुर्वद्भिर्हिताचाशीत्रणो मृत्योर्महानसः ॥९८०॥ 980
तेनैवं स्वाम्युपालम्भवेतालो रभसार्पितः । रणदमशाने वीरेण शमितो मांसशोणितैः ॥९८१॥

---

९६४. [1]) Emended, A डोम्ब°. ९७९. [1]) Emended, A काश्मीरका°.

यामप्रान्तावशेषेह्नि पुनरेत्याय संहताः । द्विषः परिभवोत्तप्ताः कन्दर्पं योद्धुमाययुः ॥९८२॥
ततस्तानथ नाराचान्निचिक्षेप स संयुगे । लिप्तानौषधितैलेन विद्धा यैः प्राज्वलन्दिशः ॥९८३॥
आग्नेयं वेक्ष्यसावस्त्रमिति मूढा विशङ्किताः । ते दूरं प्रययुर्भीता निन्दन्तः पुनरागमम् ॥९८४॥
985 प्रगल्भभावः प्रतिभानमोजः प्रयोगचातुर्यमसंभ्रमश्च । महाशयानामतिसंकटेषु धैर्योपनद्धान न धियं जहाति ॥९८५॥
राजधानीं प्रविष्टः स भानावस्तामिलाधिपि । भूयोप्यपश्यत्स छत्रां बाह्यालीं बहुलैर्बलैः ॥९८६॥
योद्धुं वियासुः शुभ्राद्य प्राप्तं तं दण्डनायकम् । घोरां रणाटवीं दृष्ट्वा भयात्स्थगितसैनिकम् ॥९८७॥
स्वीयैर्दृष्टैः क्षतैः कैश्चिद्गुप्यन्त्यधिकमाहवे । पारकीयैस्तत्सन्त्यन्ये कोन्तरं वेत्ति देहिनाम् ॥९८८॥
आनीतोथ विनिर्गत्य तेनैव स भये द्रुतम् । स्पर्धमानो यथाम्भोधौ मज्जन्हंसेन वायसः ॥९८९॥
990 रक्तप्लवं वीतसैन्यमभिन्नं बहुकोशवत् । परराष्ट्रं विशेदेवं स्ववीर्येणैव कोपरः ॥९९०॥
प्रणतात्करमादाय ततो राजपुरीपतेः । मासमात्रेण कन्दर्पः पुनः सं भुवमाययौ ॥९९१॥
प्रत्युद्गमादिसत्कारैः कृतपूजो महीभुजा । स दण्डनायकादीनां शिरःशूलाबहोभवत् ॥९९२॥
परिहासपुरे पारिपाल्यं कुर्वन्कठोरधीः । वातगण्डाख्यया ख्यातिं निन्ये यस्तत्र पर्षदा ॥९९३॥
प्रभूतोत्कोचसंप्रीतसचिवप्रेरणस्पृशा । अपास्य वामनं राज्ञा पादापादौ नियोजितः ॥९९४॥
995 आनन्दः स क्षणे तस्मिन्निच्छन्द्वाराधिकारिताम् । कन्दर्पद्वेषिणामासीन्मन्त्रिणामतिसंमतः ॥९९५॥
तत्प्रेरितस्ततः पातुं लोद्धरं विभुताहितम् । मण्डलेश्वरतां दत्त्वा कन्दर्पं प्राहिणोन्नृपः ॥९९६॥
मन्त्रविक्रमसंपन्नः कुभृत्यैः स्वोदयेप्सुभिः । युक्तया तया राजपशोः समीपात्सोपत्राहितः ॥९९७॥
दूत्यार्होयमिति प्रहाय निकटाद्देशान्तरं वाग्मिनं सूरिं बन्धुवियोगकृच्चनु वचोमुष्येति संत्यज्य च ।
भूरो राज्यमसौ हरेदिति तया हित्वा विचारोज्झितो धूर्तप्रेरणयाबुधो नृपपथुर्नायाति नाशं चिरात् ॥९९८॥
अदर्शनात्खुबद्धापि कन्दर्पप्रीतिराशयात् । राज्ञः जगाल कालेन सा मुष्टेरिव वालुका ॥९९९॥
1000 उत्कर्षपुत्रावादाय चिकीर्षुर्लोहरेशताम् । कन्दर्पो वर्तत इति क्षितिपं मन्त्रिणोवदन् ॥१०००॥
तथेति नृपतिर्गृह्णन्बन्धुं हन्तुमथाभु तम् । ससैन्यं व्यसृजत्पट्टं टङ्कं चासिधराभिधम् ॥१००१॥
तयोः संप्राप्तयोर्वार्तां तां लेखव्यत्ययाद्विदन् । विमुखश्चकितात्मा च कन्दर्पोभूयथा मुहुः ॥१००२॥
केलिद्युतक्षणे हस्तं मृद्नन्सेवकवत्पुरः । आसीदसिधरस्तस्य बन्दुर्मभ्युद्यतस्तदा ॥१००३॥
ततः पाणिं विनिष्कृत्य सोद्रुष्ठाग्रेण तत्करम् । अमुद्राद्येन निस्त्वक्कं क्लिन्नः पक्षीव सोगमत् ॥१००४॥
1005 अनन्तरज्ञो भूभृच्च नेनात्मा च नृपाश्रितः । विगर्ह्यते स्म खिन्नेन पट्टश्चैवमकथ्यत ॥१००५॥
नेयाशयो नरपतिः कुटुम्बं प्रहिणोतु मे । अर्पयित्वा ततः कोटं प्रयास्यामि दिगन्तरम् ॥१००६॥
आनीय दत्तांस्तैर्ज्ञातीनादाय द्रोहवर्जितः । स विमुक्ताधिकारोथ मन्त्री वाराणसीं ययौ ॥१००७॥
हत्वा गयायां सामन्तमेकमन्यं निवेश्य च । काश्मीरिकाणां चक्रे स भाद्रशुक्लनिवारणम् ॥१००८॥

---

९८२. [1]) Emended, A °भवो तमा. ९९१ [1]) Thus A, perhaps, to be read स्वयुवं ९९४ [1]) Thus A_1, A_3 वासनं. ९९९. [1]) Thus corr. by A_2 from A_1 मुष्टिरिव १००१. [1]) A_4 gloss मन्त्रिण.—[2]) Thus A_2; A, रक्ति. १००२. [1]) तां supplied by A_2 in space left by A_1 १००३ [1]) Emended with C; A °न्सेवकत्पुर.. [2]) Emended, A बद्धुयु°. १००४. [1]) Doubtful emendation, A apparently निस्त्वक्तं, R G निस्त्वत्वं. १००८. [1]) Emended; A काश्मीरकाणां.

स हत्वा चौरसेनान्यं ससैन्ये दुर्गमेधत्नि । पूर्वाशामध्वनीनां च व्यधाद्भिर्धूतकण्टकाम् ॥१००९॥
व्याघ्रं निहत्योपसत्त्वं वाराणस्यां निरस्यता । पूर्वा दिग्भूषिता तेन मठैः सुकृतकर्मठैः ॥१०१०॥ 1010
ते तस्थिर्वासनादेव लब्धलक्षाः कुमन्त्रिणः । अन्योन्यासूयया जघ्नुरथ कार्याणि भूभुजः ॥१०११॥
स्वैराहारोदितगुरुमदाः शूद्रकण्डूतिशान्त्यै दुर्वारेर्ष्याकलुषमतयो यत्र दुर्मन्त्रिमेषाः ।
घ्नन्त्यन्योन्यं भवति गणितैर्वासरैरेव कैश्चिन्मध्यस्थाणोरिव नरपतेस्तत्र सर्वाङ्गभङ्गः ॥१०१२॥
अतिक्रामति कालेथ पार्थिवं हन्तुमुद्यमम् । दुर्बुभुर्जानराज्येच्छस्तान्बद्ध्वा धर्म्मटोभजत् ॥१०१३॥
द्रोहापवादभागेष भवेद्राज्यमिदं पुनः । मामेव वैदर्यापुत्रत्वादनर्हमिमुपेष्यति ॥१०१४॥
इति संमन्त्र्य सुचिरं निहन्तुं पृथिवीभुजम् । प्रेरितो जयराजोभूत्सेनासरलचेतसा ॥१०१५॥युग्मम्॥ 1015
विलावग्रामजाक्षित्वा तीक्ष्णान्द्रोहाय भूपतेः । सोवरोधबधूर्बिभ्रा विदधे मध्यपातिनीः ॥१०१६॥
क्रमात्तिद्धचुन्मुखे तस्मिन्कार्ये राजपुरीं नृपः । दूत्याय व्यसृजज्ज्ञातुं बहुमानेन धर्म्मटम् ॥१०१७॥
सहस्रमल्लगृहे सुदिनापेक्षया स्थितम् । तं सिद्धिभद्रचकितो जयराजः समाययौ ॥१०१८॥
तमर्थं मण्डपे गूढं तयोर्मन्त्रायमाणयोः । प्रयागानुचरः कश्चिद्विस्त्रिश्चवहितोशृणोत् ॥१०१९॥
तदावेदितनक्तार्तात्प्रयागात्तत्कथां ततः । बुद्ध्वा निवर्तयामास धर्म्मटं गमनाशृपः ॥१०२०॥ 1020
कुलक्षयभयात्तिष्ठंस्तत्प्रतीकारमन्थरः । स्वमेव केवलं रक्षन्नासीत्स चकितोन्वहम् ॥१०२१॥
असिद्धिं जयराजस्तु दृष्ट्वा दूतैः स्वसंमुखौ । शमालडामरौ वीरौ वागपाजाभिधौ व्यधात् ॥१०२२॥
स्वभृत्यैर्भेदनियातैर्यैर्यासुं तं निवेदितम् । श्रुत्वा क्षपायां क्षितिभृद्दिक्षु चिक्षेप रक्षिणः ॥१०२३॥
व्याजाशात्रां वदन्सङ्गः प्रातस्तान्बद्ध्विरेव तम् । चतुष्कं पूजने धूर्तो जयराजमुपानयत् ॥१०२४॥
राज्ञो दत्तार्गले धाम्नि स्थितस्य स्थानमण्डपम् । सत्रा स भ्रातृपुत्रेण धर्म्मटेन ततोविशत् ॥१०२५॥ 1025
रक्षिणोथ बहिर्न्यस्य प्रयागः पार्थिवाज्ञया । जयराजं बधानेति नीचैर्धर्म्मटमभ्यधात् ॥१०२६॥
धर्म्मटं विश्वसञ्शस्त्रं जयराजस्त्यजेद्ध्रुवम् । निदेशेनामुना वेत्ति स्वमज्ञातं च धर्म्मटः ॥१०२७॥
द्वयोरेकस्य वा युद्धे तयोर्मृत्यौ हितं च नः । व्यक्तीकृतैक्ययोर्वापि वधो लोकेष्वगर्हितः ॥१०२८॥
इति निर्ध्यायतः शश्वदविरोधेन वेधसः । प्रज्ञास्य प्रत्यभाद्राज्ञो मन्त्रो युक्ततमस्तथा ॥१०२९॥तिलकम्॥
नाबुद्ध मां ध्रुवं राजा तान्बद्ध्वारिति विभ्रसन् । जयराजमुपागत्य ततो धाष्टर्यादुवाच ह ॥१०३०॥ 1030
अप्रसन्नस्त्वयि नृपो यद्यद्रोहोसि निश्चयात् । तत्त्वयाशु विशुद्धयर्थमसिधेनुः समर्प्यताम् ॥१०३१॥
दैवेन वा मोहितः स तद्विश्वासेन वात्यजत् । आक्षिप्यमाणः शस्त्रास्त्रकोविदः शस्त्रमन्यवत् ॥१०३२॥
वैक्लव्यदर्शनात्सेर्ष्यस्ततः स परुषां गिरम् । तन्वङ्गपौत्रष्टुह्लाख्यस्तं जगादाज्जकात्मजः ॥१०३३॥
न त्वं निःसत्त्व कव्यायां जातः कलशभूभुजा । आसीज्जनयिता नूनं क्लीबो यः कश्चिदेव ते ॥१०३४॥
निष्ठायां धैर्यचर्याणां परिणाममजानता । तेनेत्युक्तः स शीताम्बुसिक्तश्चोपमोभवत् ॥१०३५॥युगलकम्॥ 1035
द्रोहोद्यन्तं पृच्छ्यमानो धीरस्तन्मध्यपातिनम् । यातनाक्लेशितोप्यूचे स्वमेव न तु धर्म्मटम् ॥१०३६॥

१००९. [1]) च has been erased by A_1. १०१२. [1]) Thus A_1, corr. by later hand दुर्मन्त्रिसेधा. १०१४ [1]) Thus corr by later hand from A_1 वेदर्या°. १०१८. [1]) Thus corr by later hand from A_1 स्थितिम्. १०२४ [1]) Thus corr. by A_2 from A_1 पूर्तये, A_1 in margin नोजने. १०२६. [1]) Thus corr. by A_2 from A_1 प्राथम.

विषप्रमन्त्रवीर्येण मोघीकृतविषाशनः । रञ्ज्वा निपीड्य पीवानं ततो निशि विपादितः ॥१०३७॥
जव्यकेन प्रतीहार्या शिरश्छित्त्वोज्झितं ययौ । भङ्गारनङ्गुलातीर्थे तद्दुर्मेल्यभोज्यताम् ॥१०३८॥
तमेकसप्ततेवर्षे हत्वा भाद्रपदे नृपः । वर्धं गभीरहृदयो धम्मटस्याप्यचिन्तयत् ॥१०३९॥
आदिदेशाथ तत्सिद्धयै रहः शस्त्रभृतां वरम् । भूरं कलशराजाख्यं टक्कुरं लोहराभयम् ॥१०४०॥
प्रहिणोति यदा दूतं प्रयागस्ते तदा त्वया । संपाद्यमेतदित्यूचे तं चोपचितसत्क्रियम् ॥१०४१॥
असिद्धिभीत्या स्वं दूतं स प्रहिण्वन्प्रयागकः । संमन्त्र्य क्रियतामेतदित्यूचे कुपितो नृपम् ॥१०४२॥
राज्ञि मन्त्रयमाणेथ पञ्चानीयाध्यमन्त्रिणः । वामनः सार्गले द्वारे त्यक्तदेहोऽग्रचीक्षत ॥१०४३॥
मन्त्रश्च मन्त्रिणश्चैते न यावन्निःसृता बहिः । तावत्क्रियेत चेदेतच्च भद्राणि दरिद्रति ॥१०४४॥
राजाज्ञया प्रयागेन ततो दूते विसर्जिते । तीक्ष्णः कलशराजाख्यस्तनयाभ्यां सहाययौ ॥१०४५॥
तस्मिन्प्रसङ्गे तान्वाङ्गिः श्येनस्य ददतापम् । राजधान्यन्तरेवासीच्चित्रैरनुचरैः समम् ॥१०४६॥
पुरः कलशराजं तं दृष्ट्वा पश्चाच्च तत्सुतौ । यावत्साशङ्कमानख्यौ तावद्भृत्यैर्नमेजेहे ॥१०४७॥
शक्तोपि धम्मटः क्रुद्धं कृपाणीमिति वादिनम् । हन्तुं कलशराजं तु यावच्छस्त्रे व्यधात्करम् ॥१०४८॥
तावत्तेनायतः पश्चात्तत्पुत्राभ्यां कृताहतिः । आसनादुच्चलञ्चेव क्षिप्रं प्राणैरमुच्यत ॥१०४९॥
मुमूर्षुणा क्षतस्तेन ज्यायान्कलशराजजः । चित्रमायुधपैर्गुप्ताज्ञाभीक्ष्णव्रणितोभवत् ॥१०५०॥
तस्य लभाग्ययोगेन तेष्वेवाहःसु शास्त्रिणः । निजा कृपाणी तुचोट तेनाभद्रायुषोभवत् ॥१०५१॥
निहत्य पातितः पृष्ठात्स तैर्व्यूढैरिवाण्डजः । भुनां वासाय संत्यक्तः श्वपाकैः पार्थिवाज्ञया ॥१०५२॥
राज्ञा तन्वङ्गनत्रारौ स्वयं रत्नहणमल्हणौ । आगत्य प्राङ्गने त्यक्तकृपाणौ परिरक्षितौ ॥१०५३॥
दत्तास्कन्दास्तु दुल्लाद्याः संरम्भेण युयुत्सवः । मायथोदयसिंहेन रामिकेनैत्य वञ्चिताः ॥१०५४॥
यूयं पुत्रा ममेत्युक्तवतस्ते धार्मिकस्य यत् । प्रत्ययात्तस्य शस्त्राणि तत्यजुर्जीवितेच्छवः ॥१०५५॥
राज्ञो विशुद्धिः क्रियतां पार्श्वमेत्येति तद्वचः । तैः समागत्य जगृहे मार्गो राजगृहान्प्रति ॥१०५६॥
तन्वङ्गनगृहोच्छिष्टैर्बालः एव विवर्धितः । दुल्लं ततो विहस्यैषं स्वच्छन्दयाहकोवदत् ॥१०५७॥
तन्वङ्गनप्रयत्नेपूर्वं जयराजमभाषथाः । न त्वं निःसत्त्व कथ्याया इति तद्विस्मृतं तव ॥१०५८॥
स ते तादृश एवायं वर्तते संकटः क्षणः । किं धैर्यावसरे मूढ वैक्लव्यमवलम्बसे ॥१०५९॥
तस्माज्ज्ञातोसि नियतं मत्पित्रोच्छिष्टमुष्टिना । अहं तु तेन वीरेण त्वत्पित्रा कीर्तिभागिना ॥१०६०॥
इत्युक्त्वा स रणे गृह्णन्खड्गधाराजलज्वलम् । पपात जन्ममालिन्यं मानी प्रक्षालयंश्चिव ॥ १०६१ ॥
नृपान्तिकं प्रयास्याम इति निश्चयतस्ततः । दुल्लादीन्राजपुरुषाः कारागारे निचिक्षिपुः ॥ १०६२ ॥
ते यौवनभरोन्मत्ता द्रुमा वासन्तिका इव । प्रत्यभासन्त कारुण्यवृक्षणीयाः क्षमाभुजः ॥ १०६३ ॥
टक्कस्तु बिम्बियो नाम पापः संप्रेक्ष्य भूभुजम् । न्यजिघत्तान्मीवाद्य निशि पाशान्विशेषयन् ॥१०६४॥
दुल्लो विजयराजश्च बुल्लो गुल्लश्च तेलुउन् । तन्वङ्गपौत्राश्चत्वारो हता वध्यमहीतले ॥ १०६५ ॥

१०४३ [1]) Emended, A मन्त्रिय°. १०४५ [1]) A here and elsewhere प्रयागेण १०४७. [1]) Emended, A ° त्साशङ्का° १०४८. [2]) Thus A, perhaps, to be emended कृपाणीमितिवादिनीम्. १०५१. [1]) दुर्धो supplied by A, in space left by A, १०५४. [1]) Emended, A °त्स्कन्दास्तु १०५८. [1]) Emended, A °तस्तो वत्पूर्वं.

हतानामपि सौन्दर्यं तेषामद्यापि वर्ण्यते । कथान्तरे वयोवृद्धैर्वृद्धास्तस्यन्दनैर्दृढैः ॥१०६६॥
सततास्यस्तनाम्बुभिः स्रस्तैस्तद्दशनाङ्कुरैः । कीर्णशोणाश्ममालेव सुचिरं वध्यभूरभूत् ॥१०६७॥
वृद्धिमानीतयो राज्ञाप्युत्कर्षापकर्षयोस्ततः । ज्यायान्प्रमेय्यं डिम्बाख्यो गूढदण्डैः कुलच्छिदा ॥१०६८॥
स्फुलिङ्गमिव संभाव्य तेजोविस्फूर्जितं शिशुम् । जघान जयमल्लं च तद्द्विजयमल्लजम् ॥१०६९॥
गोमृन्स्वगोत्रजान्हत्वा भोक्तुमेकस्य कस्यचित् । कुर्वन्ति दैवोपहता राज्यं निष्कण्टकं नृपाः ॥१०७०॥ 1070
संरूढं मधुगोलमुचाविटपव्यूहावलीगह्वरे मूढः कर्तुमकृच्छ्रहार्यमभितः कस्यापि भव्यात्मनः ।
दैवप्रेरणया प्रकम्पविवशः पत्त्रप्रहारैर्दृढं तद्गोमृन्मधुपाद्विहत्य शमयत्यध्वत्यपृथ्वीरुहः ॥१०७१॥
ज्ञातिद्रोहमहापापमनष्टधीरथ पार्थिवः । डिम्बानामप्यसंभाव्यामभजद्विटभोज्यताम् ॥१०७२॥
वामनस्यात्मजः क्षेमसंज्ञं जानञ्जनकद्विषम् । प्रैरयत्कलशेशास्थच्छत्रहेमनिवर्हणे ॥१०७३॥
तामिच्छामच्छिनत्तस्य भक्तो युक्तया प्रयागकः । धावतः श्वभ्रपातेच्छां धीरो यन्तेव दन्तिनः ॥१०७४॥
अनिशं नष्टचेष्टानां शत्रूणामिव भूभुजाम् । अन्तःप्रवेशकुशलो यो वेताल इवाभवत् ॥१०७५॥ 1075
नम्रा हलधरस्याथ विटो लोष्टधराभिधः । जगाद निर्जने जातु राजानं रज्जनेच्छया ॥१०७६॥ युग्मम्॥
क्रियतां यामदेमादि कलशेश्वरसंभयम् । तत्प्रासादाद्दमभिः सेतुं वितत्नायां करोमि ते ॥१०७७॥
आलेख्यं गगने लिखामि बिसिनीसूत्रैर्वयाम्यम्बरं स्वप्नालोकितमानयामि कनकं ग्रथ्नामि वर्षं हिमैः ।
इत्याद्युक्तमपि स्फुटं जडमतिर्नाजानाति सत्यं नृपो यस्तादृक्तया न वक्ति स गतप्रौढिः परं बध्यते ॥१०७८॥
निषिषेध चिकीर्षां तु प्रयागस्तामपि प्रभोः । मदुपस्थायिकोपस्थाभ्यर्थनामिव रोगिणः ॥१०७९॥
अथ लोष्टधरो हास्यावसरे जातु भूपतिम् । बद्धस्य मोक्षो देवस्य क्रियतामित्यभाषत ॥१०८०॥
स्मित्वा किमेतदित्युक्तवन्तं तं स व्यजिज्ञपत् । उदभाण्डपुरे [1] भीमशाहिरभूत्पुरा ॥१०८१॥
विरोधात्पारिषद्यानां तत्कृतो भीमकेशवः । राज्ये कलशदेवस्य बद्धद्वारोभवद्गिरम् ॥१०८२॥
तैः शान्तैर्वैरिवृन्दैश्च यदाथ विवृतारणिः । चौरापसृतदुर्वर्णकवचो दृश्यते तदा ॥१०८३॥
भूयोपि चक्रे तद्वित्त्या कोशसामग्र्यभागिति । ततः प्रभृत्यद्य यावद्बद्धद्वारारणिः स्फुटम् ॥१०८४॥
भाद्रीयतां तदीयस्तत्कोशधीरभयावहः । सोपि बन्धाद्विमुक्तोस्तु पुष्पसीपादिभोगभाक् ॥१०८५॥ 1085
इति संप्रेरितस्तेन तथा चक्रे स भूपतिः । कोशं ततः प्रपेदे च मणिस्वर्णादिनिर्भरम् ॥१०८६॥
अचिन्तयच्च यत्रेदृग्वस्तु भूय्यसुरास्पदे । कीदृक्तत्रापरेषु स्यादाद्येषु सुरवेश्मसु ॥१०८७॥
कृतप्रायः स तत्रत्यैः पारिषद्यैस्ततो नृपः । निष्क्रयं रूढभारोद्विवारणेन प्रदापितः ॥१०८८॥
क्रमेण सेनानाङ्कव्ययव्यसनशालिनः । सुरार्यद्वरणे रूढा धीः संभावनया तया ॥१०८९॥
पुर्वराजार्पितान्कोशांस्ततः स भुवनाद्भुतान् । सर्वगीर्वाणवेश्मभ्यो लुब्धबुद्धिरपाहरत् ॥१०९०॥ 1090

१०६७. [1]) Thus A_1, altered by later hand into ° गोणाश्म° १०६८ [1]) Emended, A प्रसिस्ये. १०७० [1]) Emended, A गात्रं १०७१ [1]) Emended, A नद्रोमृ°. १०७३. [1]) Emended, A जान जनक° —[2]) ज supplied by A_2. १०८१ [1]) Two *aksharas* are wanting, A does not indicate the *lacuna* —[2]) Emended, A भीमशाहिर°. Cf vi. 178. १०८२ [1]) Doubtful emendation; A °त्पारिपन्थानां. Cf. vii 1088 १०८५ [1]) Emended, A °स्कोशधीर°. १०८७. [1]) Emended; A वत्तदृशस्तु —[2]) Emended with C; A कदृक्तुवा°. १०८९ [1]) Thus A, G C सुराकुहरणे.

हतेषु कोशेष्वानेतुं देवानां प्रतिमा अपि । नकारोदयराजाख्यं देवोत्पाटननायकम् ॥१०९१॥
वदनेषु स नमाटैः शीर्णघ्राणाङ्घ्रिपाणिभिः । मूर्तिनाशाय देवानां शकृन्मूत्राश्चपानयत् ॥१०९२॥
स्वर्णरूप्यादिघटिता गीर्वाणाकृतयोलुठन् । अध्वस्विन्धनगण्डाल्य इव सावस्करेष्वपि ॥१०९३॥
त्रिदशप्रतिमाश्चक्रुराकृष्टा गुल्फदामभिः । धृत्कारकुसुमच्छन्ना भग्ननाटकादयः ॥१०९४॥
1095 यामे पुरेऽथ नगरे प्रासादो न स कश्चन । हर्षराजनुरुत्कर्षेण न यो निष्प्रतिमीकृतः ॥१०९५॥
तस्य देवावधृष्यौ द्वौ परमास्तां प्रभाविनौ । नगरे श्रीरणस्वामी मार्तण्डः पत्तनेऽब्बिव ॥१०९६॥
द्वौ महाप्रतिमामप्यादुद्बिम्बावरक्षताम् । दानप्रसङ्गे तं जानु याचित्वा त्यागिनं नृपम् ॥१०९७॥
परिहासपुरं जन्ममेदिन्यां कनकाभिधः । गायनः कुशलश्रीश्च भ्रमणे नगरान्तरे ॥१०९८॥
अधिगतवतां लोके विश्वाद्भुतामपि संपदं न खलु विरतिर्दुष्कर्मभ्यो धनार्जनकाङ्क्षिणाम् ।
किमपि कमलावाप्त्यै पद्माकरोद्भूतिपातकं भजति कमलालीलावासो भवत्यपि हि द्विपः ॥१०९९॥
1100 पैतामहेन पित्र्येण तथा राज्यविकर्षया । लोद्दराद्राहतार्थस्य कोशेनोत्कर्षभूपतेः ॥११००॥
युक्तोपि पूर्वराजार्थं देवीकोभ्यो जहार यः । ऐच्छद्धनार्जनं हा धिक्सोपि वास्तव्यपीडया ॥११०१॥युग्मम्॥
तदाज्ञामात्रमादाय सविवैरथ पापिभिः । ते ते नवनवायासनामाङ्का नायकाः कृताः ॥११०२॥
कालानुवृत्तिपरतां धिग्धिग्राजोपजीविनाम् । यत्र मन्त्री वयःस्थः सन्सदाचारोपि गौरुकः ॥११०३॥
सर्वदेवगृहग्रामसर्वस्वापहृतिव्रतम् । स्वीचक्राराज्ञया भर्तुरर्थनायकतामपि ॥११०४॥ युग्मम् ॥
1105 पार्षदः समरस्वामिदेवागारे सहेलकः । आम्रो विजयमल्लस्य यो राज्ञो द्वेष्यतां ययौ ॥११०५॥
द्विगुणोत्पत्तिदानेन सोर्थनायकतां गतः । लब्धावकाशो राजापे क्रमेणासीन्महत्तमः ॥११०६॥
किमन्यद्बरता तेन सर्वार्थान्सर्वनायकैः । व्ययीयत धनाढ्याप्त्यै पुरीशस्यापि नायकः ॥११०७॥
भीगर्भपदपर्यायच्छन्नजाड्यप्रभावनः । तथार्जितस्य कोशस्य सोनुरूपव्ययोभवत् ॥११०८॥
मृगीदृशां दुर्लभतां हयानां श्वासान्विटानां कुवचःसहत्वम् ।
वैतालिकानां च विकत्थनत्वं क्रेतुं क्षितीशाः क्षपयन्ति लक्ष्मीम ॥११०९॥
कोपप्रसादैर्वंचितजनस्य हयादिवृत्तान्तगवेषणेन ।
1110 भृत्यानुवृत्त्या मृगयाकथाभी राज्ञां शिशूनामिव याति कालः ॥१११०॥
विलासहासासनयानदानपानाशनाद्या असतीः सतीर्वा ।
छायेव चेष्टाः क्षितिपालवर्गः परानुकारेण करोति सर्वाः ॥१११९॥
अमानुषत्वं पुरुषाधिराजा विटस्तवैः स्वस्य विचिन्त्य सत्यम् ।
तृणीयमक्ष्यभ्यधिकं भुजौ वा ममेति मत्वा न बिभेति मृत्युम् ॥१११२॥
निशाम्य येषां प्रभवन्ति दारा दिनेष्वमात्या नियताधिकाराः ।
अहो भ्रमः स्वस्य यदत्र तेपि विदन्ति भूपा प्रभविष्णुभावम् ॥१११३॥

१०९१ [1]) Emended with R C, A °स्पाटनायकम्. १०९३ [1]) Emended, A °रूप्या°. १०९४ [1]) Thus corr. by later hand from A, हसन°. ११००. [1]) Emended, A °भूपति. ११०५ [1]) Emended, A च हलक. Cf vii. 1170. 1319, 1358, 1359.

स्वादूचितं स्वादुतयैव भुङ्क्ते थूत्कृत्य मुञ्चत्यपि थूत्कृतानि ।
विश्रासितस्त्रासमुपैत्यकस्माद्भूमन्न बालश्च समानभावः ॥१११४॥

जाद्यमित्यादि यत्किंचित्क्षितिपानां कटाक्षितम् । तत्सर्वं हर्षदेवस्य जाद्येन लघुतां ययौ ॥१११५॥ 1115

तुष्टः पटहवाद्येन हस्त्यारोहविदे ददौ । भीमनायकनाम्ने स करिणं करिणीसखम् ॥१११६॥

स्वशिष्यस्तेन तस्यासीद्वायनः कनकोदयः सः । चण्पकावरजः खेदाद्गीताभ्यासकृतोद्यमः ॥१११७॥

प्रसादीकृतमस्मै च खेदच्छेदनमिच्छता । तेन काञ्चनदीनारलक्षमक्षतचेतसा ॥१११८॥

कर्णाटभर्तुः पर्माण्डेः सुन्दरीं चन्दलालिभिधाम् । आलेख्यलिखितां वीक्ष्य सोभूत्पुष्पायुधक्षतः ॥१११९॥

उत्तेजयन्ति संघर्षं हास्ये जडमतीन्विदाः । सारभेयानिवाजस्रं प्रोत्साह्य प्राकृताशयाः ॥११२०॥ 1120

स विटोद्रेचिनो वीतत्रपश्चक्रे समान्तरे । प्रतिज्ञां चन्दलावाप्त्यै पर्माण्डेश्च विलोडने ॥११२१॥

कृतापत्रिम्रमकर्पूरपरिग्रागं प्रतिज्ञया । तं च स्तुतिमिषादेवं जहसुः कविचारणाः ॥११२२॥

भावावेषविशेषतः परिगतस्त्वं दाक्षिणात्येोध्वगो गन्धादण्यवधारितं यदुत ते कर्पूरकोलं करे ।
पक्वं चेदिदमद्र हर्षनृपतेस्तत्कल्पयोपायनं नो चेत्तिष्ठतु नालिकेरकुहरे संप्रत्यमुष्मन्यतः ॥११२३॥

आ कर्णाटवसुंधराधववधादा चन्दलालिङ्गनादा कल्याणपुरप्रवेशनविधेरा पिम्मलादर्शनात् ।
आ राजाभयकाननान्तवसुधापारर्द्धिकौतूहलाद्वेवेन प्रतिषिद्धमिद्धमहसा पोतासंचर्वणम् ॥११२४॥

विटः प्रसाद्य नृपतिं मदनः कम्पनापतिः । महत्तरत्वं जग्राह तस्याधिकारिपदिनाकृतेः ॥११२५॥ 1125

वस्त्रालंकारनिर्वाहकृतेमुख्याश्च वेतनम् । नित्यमादत्त भूपालाद्वायमीर्ष्याशमाय च ॥११२६॥

विटत्वे निस्त्रपत्वे च मदनस्य कथाक्रमः । मौग्ध्ये पारिप्लवत्वे च नृपस्य निकषोभवत् ॥११२७॥

मानेयं वप्पिका नाकात्तवानीनेति वादिभिः । संदर्श्य जरतीं नारीं मुदितः सोपरैर्विटैः ॥११२८॥

दासीश्च देवता एता इत्युल्कान्यैः प्रवेशिताः । उन्नतिं च श्रियं चौज्झत्प्रणमञ्झहसे जनैः ॥११२९॥

दास्यो मदनसंलापमन्त्रायुल्लेख्यकारिभिः । अध्यापिता विटैस्तस्य मतिमोहं प्रचक्रिरे ॥११३०॥ 1130

ताभ्यः काश्चिरपि क्ष्माभृत्सुरतं समयोचितम् । वाङ्कन्तीभिः कृतः स्वाङ्गस्पर्शाद्वाग्योदयोज्झितः ॥११३१॥

आयुष्कामाय भूयांसं कालं जीवितकाङ्क्षिणे । आयुर्वर्षशतान्यस्मै ता मूढमतये ददुः ॥११३२॥

डोम्बेन पिण्डसिद्ध्यर्थी केनाप्येतद्रसायनम् । पिण्डसिद्धिकृदित्युक्ता पेयं किमपि पायितः ॥११३३॥

किं तस्य कथितैरन्यैर्मौग्ध्यैर्यो याचितो विटैः । विश्रमानादिव धनादायुरोपि व्ययं व्यधात् ॥११३४॥

बलरूपेच्छुरपरानुपायान्यानसेवत । कथयेत्कः सदाचारस्तानतोपि त्रपावहान् ॥११३५॥ 1135

स एवमन्धतामिस्रे निक्षिप्तः शाश्वतीः समाः । मुग्धबुद्धिः स्वजात्येन दुर्जातैश्च कुमन्त्रिभिः ॥११३६॥

मेघवाहनमुख्यानां कृत्ये लोकोत्तरे यथा । सन्त्यल्पधियः केचित्संदेहान्दोलिताशयाः ॥११३७॥

तथास्मिन्नपि दुष्कृत्ये वर्ण्यमानेदुनात्रहे । भविष्यतीय कालेन नूनमप्रत्ययो जनः ॥ ११३८ ॥

राज्ये बहुच्छले तादृग्दुर्नीत्योपहतोप्यभूत् । आयुःशेषेण न वशे स रन्ध्रान्वेषिणां द्विषाम् ॥११३९॥

११२८. [1]) Emended; A वञ्जिका. Cf. vn. 319 ११३६. [1]) Emended, A 'नाम्ने.—[2]) Emended, A स्वजात्येन; C स्वजन्येन. .

1140 नर्तकीः शिक्षयन्त्रात्रावुत्थायाभिनयं स्वयम् । तिष्ठन्दीपोज्ज्वले धाम्नि दूरात्केनापि शत्रुणा ॥११४०॥
क्षिप्तेषुरपि नाभूच्चिह्नतो व्रणितोऽथ वा । फलं तस्यायुःशेषस्य प्रजानां कुकृतस्य वा ॥११४१॥
कश्चिदेवाथ शुद्धान्ते पातकृतो महीपतेः । सर्वाशुद्धिनिधेः प्राभूत्सारीचारित्रविप्लवः ॥११४२॥
ते युवानो मदोन्मत्तास्ताः स्त्रियो यौवनोन्मदाः । नाशाय हर्षदेवस्य तस्मिन्सेवाभवन्क्षणे ॥११४३॥
निगृहीतास्तेन रोषात्सजाराः काश्चन स्त्रियः । काश्चित्त्वाकृष्य शुद्धान्ताज्जारैर्नीता दिगन्तरम् ॥११४४॥
1145 स्वेन दौःशील्यदोषेण सर्व एव विशङ्किताः । भृत्यास्तस्याशुभान्यैच्छन्नयतन्त च शान्तये ॥११४५॥
तस्यापि शीलवैकल्यं तावत्सर्वत्र पप्रथे । यावत्कलशभूपालात्संजातस्योपपद्यते ॥११४६॥
शैशवे वर्धितो याभिरङ्कमारुह्य मातृभिः । सोऽङ्कमारोप्य ता एव चुम्बन्संबुभुजेनिशम् ॥११४७॥
संभोगं भगिनीवर्गे कुर्वता दुर्वचोरुणा । निगृहीता च भुक्ता च नागा पुरी पितुस्वसुः ॥११४८॥
स तुरुष्कशताधीशाननिशं पोषयन्धनैः । निधनावधि दुर्बुद्धिर्बुभुजे याम्यसूकरान् ॥११४९॥
1150 अथ सेवाभिसारेण कदापि कुपितो नृपः । स मन्दबुद्धिरास्कन्दमदाद्राजपुरीं प्रति ॥११५०॥
विलोक्य सैन्यसामग्रीमनन्यसदृशीं पथि । त्रैलोक्याक्रान्तिसामर्थ्यं पार्थिवेस्तस्य शङ्कितम् ॥११५१॥
स तु पृथ्वीगिरिं दुर्गं दृष्ट्वा तद्गहणोद्यतः । अप्रविष्टो राजपुरीं तन्मूले समुपाविशत् ॥११५२॥
मासमभ्यधिकं तेन तत्थुषा परिपीडिताः । प्रक्षीणान्नादिसंभारा बभूवुर्दुर्गरक्षिणः ॥११५३॥
त्रातुं संग्रामपालस्तानुरीचक्रे धरापतिः । कियन्तं न करं भीतः कियतीर्न च संविदाः ॥११५४॥
1155 उपोढदार्ढ्यं नृपतौ स तदप्रतिगृह्णति । लुब्धमुत्कोचदानेन स्वीचक्रे दण्डनायकम् ॥११५५॥
अमन्यमाने नृपतौ व्यावृत्तिं प्रेरिता रहः । प्रवासवेतनं भूरि मार्गितुं तेन शक्षिणः ॥११५६॥
तैः प्राग्दे प्राकृतप्रायैः कृते सोद्धुण्ठभाषितैः । राज्ञो दूरस्थकोशस्य कटकः क्षोभमाययौ ॥११५७॥
स तत्समर्थनां यावच्चक्रे तावद्भिषिक्रामृ । तुरुष्कास्कन्दजामन्यां प्रददौ दण्डनायकः ॥११५८॥
अथाल्पसैन्यो नृपतिरुत्थाप्य कटकं ययौ । कृत्स्नां च कोशसामग्रीं तत्याजाध्वसु साध्वसात् ॥११५९॥
1160 अपरीक्ष्याहृतो भृत्यः स्वामिनामतिसंकटे । करोति व्यसनापातमजान्योसिरिवाहवे ॥११६०॥
तेन स्वयमयोग्येन योग्यानन्यानविच्छता । कलङ्किता नरेन्द्रश्रीः क्षुद्राश्वेनेव मन्दुरा ॥११६१॥
ततः प्रभृति निर्वाणप्रतापस्य महीपतेः । प्रतापचक्रवर्त्याख्या सर्वतो म्लानिमाययौ ॥११६२॥
म्लानाननो न यत्सिद्धं स्वेन भृत्यैस्तथाखिलैः । तत्कर्म कृतवन्तं स कन्दर्पं बहुमन्यत ॥११६३॥
आनिनीषोश्च तं तस्य जडस्याकृत भूपतेः । दण्डनायक एवेच्छाच्छेदं पैशुनकर्मणा ॥११६४॥
1165 ज्ञातद्रोहोऽथ नृपतिरबधाद्दण्डनायकम् । प्रातिपत्त्यानुरोधेन न क्रुधा न्यग्रहीत्पुनः ॥११६५॥
दुर्गे संदिग्धजीवोऽपि निवसन्संचिकाय सः । लुब्धस्तान्बूलवस्त्रादि प्रहितं भृत्यबान्धवैः ॥११६६॥
आत्मनः सर्वनाशाय संजातं दैवमोहितः । वधार्हं प्रत्युत पुनर्नैन्ये तं स्वपदं नृपः ॥११६७॥
तं क्षिताधाटुभिर्भूयो राजानमुदनेनयन् । घोषयात्राजिनं श्लोकैः कर्णाथा इव कौरवम् ॥११६८॥

११४२ [1]) Emended, A सर्वशुद्धनिधे. ११५६ [2]) Emended, A प्रमन्यमाने ११६५. [3]) Emended, A न्यगृही°. ११६६ [4]) Conjectural reading, A दुर्गे.

वादी वादपराजितः प्रतिभटं गालीभिरत्याक्षिपन्योषिन्नटसतीव्रता कुकलहैरुद्वेजयन्ती पतिम् ।
कायस्थश्च हताखिलार्थमहिमा कृच्छ्रे नृपं पातयन्स्वस्यासन्नपराभवस्य कुरुते भूयः समुत्तम्भनम् ॥११६९॥
भुक्तदेयधनो बिभ्यत्तं सहेलमहत्तमः । उर्वीपतिं दुर्व्यसने प्रेरयन्स्वार्थपण्डितः ॥११७०॥ 1170
बन्धुमन्विष्य दरदां लवन्यैः सह लाहरैः । दुर्गघातामिषं दुर्गं यहीतुं तमचूचुदत् ॥११७१॥
तद्धि लक्कनचन्द्राख्ये पुरा गोप्तरि डामरे । जनकद्वारपतिना हतेनन्तनृपाज्ञया ॥११७२॥
प्रायोपविष्टया द्वारे तत्पत्न्यापि समर्पितम् । कलशक्ष्माभुजा कूलमेषिक्षं प्राप दरद्वृपः ॥११७३॥
तद्बलाद्वारदैः क्रान्तानन्तधामेव मण्डले । राजा च मन्त्रिणा चाथ बभूव स्वीकृतोद्यमः ॥११७४॥
निर्हृदे[1] तत्र गोप्तॄणां वृत्तये संभृतं हिमम् । अवग्रहेण तत्तस्मिन्क्षणे निःशेषतां ययौ ॥११७५॥ 1175
चारैस्तद्ग्रन्थमालक्ष्य तद्ग्रहाय महत्तमः । अभीक्ष्णं प्रेरयन्क्ष्मापं स च तत्रोद्यमं व्यधात् ॥११७६॥
वातगण्डं तदुद्योगे प्रतिष्ठासुं नृपाज्ञया । चण्पको द्वारकार्यस्थमभिसंधातुमैहत ॥११७७॥
द्वारं निवार्य भूपेन प्रापितो मण्डलेशताम् । सर्वैः सहाभजद्द्वारं स हि द्वाराधिकारिभिः ॥११७८॥
विसूत्रितेपि[2] कटके तेन द्वारपतिस्ततः । तीव्रां मधुमतीं सिन्धुं सैन्यैर्दुर्गमवेष्टयत् ॥११७९॥
समस्तानपि सामन्तान्प्रहिण्वन्सर्वतः स्वयम् । एकप्रयाणान्तरितः कोटेपि न्यवसद्वृपः ॥११८०॥ 1180
त्यजद्भिर्गण्डशैलादि दुर्गसंश्रयदुर्नयैः । काश्मीरिकाः सह दरम्लेनिकैः समरं व्यधुः ॥११८१॥
विदधे प्राज्ञिमठिक्कानाम्न्याघातपदे वसन् । सपुत्रो गुद्गजो मद्रः संभ्रमाननिदुःसहान् ॥११८२॥
तत्पुत्रौ दैवविन्योक्तराज्यप्राप्ती तदिच्छया । मानं व्यवर्धयतां यौ वीरावुच्चलसुस्सलौ ॥११८३॥
अन्युद्दामस्तयोर्ज्यायान्द्वेषपक्षेपि नृपासनम् । आसीद्राज्यर्थमाहात्म्याच्चायां तत्र निर्गतः ॥११८४॥
अवग्रहेण भूपालप्रतापेन च शोषिताः । यथाकथंचित्तद्दुर्गं रक्षन्दारदा भटाः ॥११८५॥ 1185
अथाजेव विनिर्हृदैतापपरिपन्थिनी । पपात महती वृष्टिरेकीकृतजलस्थला ॥११८६॥
दुर्गभृद्भिः हिमैः कृत्स्नं दुर्भेद्यैः पर्यवार्यत । अनुकूलेन विधिना संनाहैर्नेहितैरिव ॥११८७॥
उत्थाने पातयन्कांश्चित्पतने कांश्चिदुत्क्षिपन् । वेधाः कन्दलयत्येव कन्दुकक्रीडितभ्रमम् ॥११८८॥
ततः स्मृत्वा गृहान्वृष्टिदुःस्थास्ते तुष्टमन्त्रिणः । चक्रिरे पूर्ववद्राज्ञः स्कन्दावारे विसूत्रणम् ॥११८९॥
ऊर्ध्वस्रोतोनुसारीव तिमिः शैलहतानने । ततोपि चक्रे व्यावृत्ति राजा जयपराङ्मुखः ॥११९०॥ 1190
मुक्तापणः शीर्णकोशः त्यक्तभीकश्युतायुधः । कटकः सर्व एवाभूत्पलायनपरायणः ॥११९१॥
धावतः पथिभिस्तैस्तैः साक्रन्दात्राजसैनिकान् । पृष्ठलग्नरिपुन्दीर्घा मार्गेयसिष्यतापगा ॥११९२॥
क्षौमैः सहंसमालेव साञ्जपण्डेव खेटकैः । सशैवलेव खड्गौघैः सशिलेव तुरंगमैः ॥११९३॥
सौवर्णैः सरथाङ्गेव राजतैर्भोजनैरपि । सफेनेव जनत्यक्तैरासीन्मधुमती सरित् ॥११९४॥
नीतानां च हतानां च दरदैः प्रसृतोदयैः । अभुग्नदीहतानां च संख्या काचिन्न देहिनाम् ॥११९५॥ 1195
अनाथवत्तथा भूतं सैन्यं त्रातुं कृतोद्यमः । एकस्तु सानुजो मानी नाचलन्माल्हिरुच्चलः ॥११९६॥

११७५ [1]) Emended, Λ निर्हादे ११७७ [2]) Emended, Λ वातगण्डस्तदु ११७९ [3]) Thus or, perhaps, विसूत्रितेपि to be read for Λ विसूचितापि ११८१. [1]) Emended, Λ काश्मीरका. ११८३. [2]) Emended, Λ तत्पुत्रौ

दरद्वलाम्बुधिर्यावत्स विश्राक्रमणोद्यतः । ताभ्यां वेलागिरीन्द्राभ्यामिव संस्तम्भितोऽखिलः ॥११९७॥
तौ रक्षित्वा बलं प्राप्तौ प्रसिद्धिमतुलां गतौ । पतिवरेव राजश्रीर्भेजे लक्ष्मेण तेजसा ॥११९८॥
ततः प्रभृति लोकस्य सर्वस्यासीदसौ मतिः । राज्यार्हौ मानिनावेतौ क्लीबोयं न तु भूपतिः ॥११९९॥
1200 तथा कृत्वापि यद्राज्ञे दर्शनं परिजह्रतुः । तौ प्रीतिदायविमुखौ बबन्धास्थां ततो जनः ॥१२००॥
अथ शान्तरिपुत्रासो नगरं प्राविशन्नृपः । प्रतापस्तु दिशः प्रायान्मल्लराजतनूनयोः ॥१२०१॥
तौ रामलक्ष्मणावेताविति सर्वैस्तदाब्रवीत् । रावणप्रतिमे राज्ञि भाव्यर्थानुगुणं वचः ॥१२०२॥
राजा तु गतलज्जः स नित्यकृत्योपमं जडः । कर्तुं प्रारभतास्विन्नः पुनर्मण्डलपीडनम् ॥१२०३॥
अल्पापकारमपि पापगतं निघ्नन्ति नीचो न दूरमसमागसमप्यरातिम् ।
श्रा निर्दशत्युपलमन्तिकमापतन्तं तत्त्यागिनं न तु विदूरगमुग्ररोषः ॥१२०४॥
1205 ततः प्रविष्टः संप्रीतः सेवया दत्तकम्पनम् । मदनं सोऽशृणोत्स्वैरं शंसन्तं तत्पराभवम् ॥१२०५॥
तन्नोपेक्ष्य जिघांसुस्तमागो जग्राह सोपरम् । तस्य देवीविसृष्टाज्ञालेखेलङ्घनलक्षणम् ॥१२०६॥
प्राप्तो मण्डवराज्यात्स क्षमाभुजादत्तदर्शनः । भीतो लक्ष्मीधरस्यागान्मन्दिरं टक्कमन्त्रिणः ॥१२०७॥
राजा प्रसाद्यमानोपि तत्कृतेन्येन मन्त्रिणा । सस्मितं वीक्षितं सैन्यैस्तं सपुत्रमघातयत् ॥१२०८॥
कोपस्मितं नरपतेरकालकुसुमं तरोः । वेतालस्याट्टहसितं नैवमेव प्रशाम्यति ॥१२०९॥
ये संप्ररूढविपुलप्रणयाभिमाना निःशङ्कमीश्वरनिषेवणमाचरन्ति ।
1210 मन्त्रानुपङ्गरभसाद्गुणेन्द्रमखयं प्रख्यापयन्त इव ते प्रलयं प्रयान्ति ॥१२१०॥
कर्णेजपकुले तावन्मदनप्रलयावधिः । शापः सूर्यमतीदेव्याः प्रसास्तिभुजोभवत् ॥१२११॥
विक्रमालोकनोत्कम्पी निचिक्षेप क्षमापतिः । वङ्गा कलशराजं तं लक्ष्मीधरनिवेशने ॥१२१२॥
विरुद्धं तस्य बद्धस्य शिक्षापेक्षामिषाद्भृपः । तेजोवधाय सविधमुदयाख्यं व्यसर्जयत् ॥१२१३॥
लक्ष्म्या जाज्वल्यमानं तं वीक्ष्य प्रज्वलितः क्रुधा । लब्धासिरनुः कर्म्माद्यिन्मनस्वी सहसावधीत् ॥१२१४॥
1215 तद्भृत्यैरथ संक्रुद्धैर्नीपत्य स विपादितः । दुर्बुद्धेस्तस्य भूमर्तुरेवं भृत्या विपेदिरे ॥१२१५॥
मण्डले राजदण्डेन क्षतेनेव परिक्षते । क्षारपातोपमान्यापि प्राभूवुःखपरंपरा ॥१२१६॥
अहारि काञ्चनस्थाली यैः पार्थिवगृहादपि । सत्यप्यहस्करे जग्मुस्तस्करास्तादृशा विशः ॥१२१७॥
प्रवर्धमाने मरके क्रन्दितध्वनिनिर्भरः । निर्घोषः प्रेतवाशानां न व्यरंसीद्दिवानिशम् ॥१२१८॥
उदीपद्भुडिनयामे वत्सरे पञ्चसप्तते । अखण्डं सर्वभाण्डानां दुर्भिक्षमुदजृम्भत ॥१२१९॥
1220 दीनाराणां धान्यखारिः प्राप्याभूत्पञ्चभिः शतैः । दीनारेणाभवल्लभ्यं मार्ष्टिकस्य पलत्रयम् ॥१२२०॥
ऊर्णापलस्य दीनारैः क्रयः षड्भिरजायत । लवणौषणहिङ्ग्वादेरभिधास्यास्त दुर्लभा ॥१२२१॥
शर्वेनैशोभवन्नम्भःसंसेकोच्छ्वसनविग्रहैः । छन्नतोया गिरिस्रस्तैश्छिन्नदारुवनैरिव ॥१२२२॥
एतद्व्यवहिता राजधानी दूरान्न दृश्यते । ध्यात्वेति सर्वतो राजा द्रुमाणां छेदमादिशत् ॥१२२३॥

१२०७. [1]) Emended, A टक्क° १२२३ [1]) Emended, A व्यवहृता

सप्तसूनफला वृक्षा गृहस्था इव पातिताः । कुटुम्बैरिव रोलम्बैरशोच्यन्त पदे पदे ॥१२२४॥
प्राणापहं महादण्डं तथापेपि ननं नृपः । हलावरुग्णे वृद्धोक्षे गण्डशैलमिवाक्षिपत् ॥ १२२५॥ 1225
निपीड्य लोकं कायर्थैर्महादण्डव्यवस्थया । पुरमामादिषु क्षापि न मृदव्यवशेषिता ॥१२२६॥
अथोल्बणत्वं संप्राप्तान्निहन्तु सर्वडामरान् । स दण्डभृदिव क्रुध्यन्नादिक्षन्मण्डलेश्वरम् ॥१२२७॥
पूर्वं मडवराज्योर्वी होलडान्तः स डामरान् । दत्तास्कन्दोवधीत्तांस्तान्कुलाये विहगानिव ॥१२२८॥
व्रता लवन्यानुवृद्धकुन्तलेविकटाकृतिः । जीवन्मडवराज्यान्तस्तेन त्रिप्रोपि नोज्झितः ॥१२२९॥
लावन्यबुद्ध्या भूलानि पान्थैरप्यथ रोपितैः । भीमरूपाभवद्भूमिर्भैरवस्य महानसः ॥१२३०॥ 1230
थूले लवन्यस्यैकस्य क्रूरां विन्यस्यतो वधूम् । ययुः सर्वे दिशो भीता लवन्या मण्डलेश्वरात् ॥१२३१॥
केचिद्बुभुजिरे तेषां गोमांसं म्लेच्छभूमिषु । अरघट्टघरट्टादिकृष्टाः केचिदवालगन् ॥१२३२॥
प्राहिणोत्प्राभृतं भूरि भैरवाय महीभुजे । लवन्यमुण्डमालालीरखण्डा मण्डलेश्वरः ॥१२३३॥
तोरणावलयो राजद्वारेदृश्यन्त सर्वतः । डामराणां करोटीभिर्घटीभिरिव निर्भराः ॥१२३४॥
हरिं कङ्कणवत्त्वादि लम्बमानं नृपैकसः । नेता डामरमुण्डस्य यः कोपि स किलासदत् ॥१२३५॥ 1235
भोक्तुं डामरमुण्डानि व्याघ्रविस्तीर्णतोरणाः । विदधुर्गृध्रकङ्काद्या राजद्वारोपमेवनम् ॥१२३६॥
यत्र यत्रारत भूपालस्तत्र व्यधुर्जनाः । लवन्यमुण्डैरुच्चण्डैर्विस्तीर्णास्तोरणस्रजः ॥१२३७॥
गन्धेनाशुचिना घ्राणं कर्णौ भीमैः शिवारुतैः । अखिद्यत शवाकीर्णे श्मशान इव मण्डले ॥१२३८॥
बलेरुत्प्रेक्षमाणान्तालोकपुण्यार्णवेधि व्यधात् । एकश्रेणीं मण्डलेशो डामरैः थूलकीलितैः ॥१२३९॥
एवं मडवराज्यं स कृत्वा निर्नष्टडामरम् । अधावत्क्रमराज्योर्वी कर्तुं तामेव पद्धतिम् ॥१२४०॥ 1240
अवश्यं न भविष्याम इति निश्चित्य डामराः । चक्रिरे क्रमराज्यस्था लौल्याद्व सैन्यसंग्रहम् ॥१२४१॥
तैः सर्वैरुत्तसंघातैः कुर्वद्भिः कदनं महत् । आस्ते स्म तत्र सुचिरं निरुद्धो मण्डलेश्वरः ॥१२४२॥
किमन्यद्ब्राक्षसः कश्चित्सुरतीर्थेषुजितम् । निहन्तुं मण्डलमिदं हर्षव्याजादवातरत् ॥१२४३॥
उल्लासो रात्रिषु दिने स्वापः क्रौर्यमुदयता । अवाङ्मुखत्वं कर्तव्ये दक्षिणेशोचिते रतिः ॥१२४४॥
इत्यादयस्तस्य केचिद्धर्मा नक्तंचरोचिताः । तथा हि तत्कालभवैः प्रियाः प्राज्ञैः प्रकीर्तिताः ॥१२४५॥ 1245
अत्रान्तरे मल्लसूनुः कनीयान्यौवनोन्मदः । लक्ष्मीधरस्य गेहिन्या हृदयाह्लादकोभवत् ॥१२४६॥
सा हि राजसुते तस्मिन्संसक्ता प्रातिवेशिके । नारब्धत निजे पत्यौ वानरप्रतिमाकृतौ ॥१२४७॥
ज्ञातीनगण्यान्स्वान्यान्कृत्वाद्राज्यार्हलक्षणौ । नावधीरुद्धतावेतौ राजचुञ्चुलसुस्मलौ ॥१२४८॥
इति लक्ष्मीधरेणर्ष्यारोषादुक्तोपि भूपतिः । न चुकोधानुतापार्ति पूर्वज्ञातिवधाद्गतः ॥१२४९॥
स्वयमन्यमुखेनापि स तेनोक्तस्ततोसकृत् । [illegible] घाते तदीहृत्यं ध्यात्वा साध्वसमादधे ॥१२५०॥ 1250
ज्ञातिप्रीत्यनुवृत्त्यादि तेन विस्मरता ततः । संमन्त्र्य मन्त्रिभिः सार्धं दध्रे तद्वधनिश्चयः ॥१२५१॥
आसन्नवारवनिता थक्कनाख्याथ तं ययुः । भूभर्तुर्दुरभिप्रायं तयोः कर्णपथातिथिम् ॥१२५२॥

१२२४. 1) Emended, A शेलम्बैर°. १२३२ 1) Thus A_2, A_1 °वावत्त, G °वागलन. १२३६ 1) Emended, A व्याघ्रा विस्तीर्णतोरणा. १२३९. 1) A_1 gloss नूतन[illegible]यावलोकनवन (three *aksharas* illegible) १२४१ 1) Emended, A चक्रोधा°. १२५० 1) A_1 indicates a *lacuna* of two *aksharas*

सख्या दर्शनपालेन तत्रार्थे छिन्नसंशयौ । निरगातां निशीथिन्यां द्वित्रैस्तावनुगैः समम् ॥१२५३॥
षट्सप्तनेब्दे नगरान्मार्गशीर्षेथ निर्गतौ । उत्रासवसतेः प्राप्तौ डामरस्योपवेशनम् ॥१२५४॥
1255 प्रशस्तराजो दुधुक्षुः सिद्धराजं निजानुजम् । सोमिसंधाय तौ निन्ये लवन्यो मण्डलान्तरम् ॥१२५५॥
ततो राजपुरी ज्यायान्पायात्कलहस्य भूपतेः । कनीयान्प्रययौ पार्श्वं कलिञ्जरधरेशितुः ॥१२५६॥
तयोर्निर्गतयो राज्यं न कैश्चिच्छ्रद्दधीयत । निमित्तज्ञेन राज्ञैव दुर्निमित्तैस्त्वशङ्कयत ॥१२५७॥
लक्ष्मीधरमुखेनैव प्रार्थनां हन्तुमुद्यतम् । चक्रे संग्रामपालस्य सोद्रीकृत्य धनं ततः ॥१२५८॥
स त्वन्तिकागतस्येषन्मल्लसूनोः कृतादरः । तया विशङ्कया शत्रोरासीदधिकगौरवः ॥१२५९॥
1260 आसन्नाभ्युदयं शत्रुं दृष्ट्वैव विधिचोदितः । शङ्काविष्करणाल्लोके नयेत्संभावनामुचम् ॥१२६०॥
राजपुर्याः पक्कत्यैव काश्मीरानर्थकाङ्क्षिताः । प्रभविष्णौ रिपौ प्राप्ते चक्रिकायां किमुच्यताम् ॥१२६१॥
कांश्चिन्निकृतिकप्रायान्पार्श्वयातानथोच्चलः । गमागमान्कृतोद्योगो डामराणामकारयत् ॥१२६२॥
डामरास्तु महोत्साहांस्तमानेतुं व्यसर्जयन् । राज्ञा विप्रकृतां दूतान्विनीर्णोपायनान्बहून् ॥१२६३॥
तं सूर्यवर्मचन्द्रस्य तनयो जनकाभिधः । चकारोपनितोत्साहं मायादूतैर्विसर्जितैः ॥१२६४॥
1265 वीक्ष्य डामरदूतांस्ताञ्छ्रुता राजतो भयम् । व्यक्तं संग्रामपालेन निन्ये माहात्म्यमुच्चलः ॥१२६५॥
स कार्यगौरवात्पक्षो मूर्ध्नि कर्पूरचूर्णनम् । कृत्वा तमविनाशाय यावद्विस्रब्धमैहत ॥१२६६॥
तावत्कलशराजाख्यस्तद्देशे मुख्यठक्कुरः । हर्षदेवार्पितोत्कोचस्तमेत्य विजनेब्रवीत् ॥१२६७॥
राज्ञः प्रसादने त्यक्ता तवोच्चलहितैषिणः । कामनेनं विनिर्जेय छागकण्डयहे यहः ॥१२६८॥
कोयं काश्मीरभूपानां कस्य शक्तिस्तपस्विनः । आराधनेन तद्राज्ञो विधेहि स्वमसाध्वसम् ॥१२६९॥
1270 अयं राजगिरौ दुर्गे स्थाप्यतां पार्थिवस्ततः । स्यान्मनीषितवर्षी वस्रासान्मित्रं च सर्वदा ॥१२७०॥
तेनेति प्रभुराख्यातः खशानां स मिताशयः । तद्गीतः स्वार्थलुब्धश्च तथेति प्रत्यपद्यत ॥१२७१॥
तमभ्यधाच्च नो बन्द्धुं शक्तोहममुमुद्यतम् । त्वय्येव बध्यतामेष मिषतः प्रेषितोन्तिकम् ॥१२७२॥
इत्युक्ता तं स्वबसति विसृज्यावदुच्चलम् । प्रातः कलशराजस्य त्वया गन्तव्यमन्तिकम् ॥१२७३॥
इह प्रधानामात्योसौ तेन ते स्यादनत्ययः । ततो विपक्षेच्छिन्धि त्वां प्रतिमोक्ष्यामि सानुगम् ॥१२७४॥
1275 अथ तद्वसतिं गन्तुं चलितोन्येद्युरुच्चलः । प्रारब्धुर्निमित्तैस्तत्कृत्यमात्मैरय विबोधितः ॥१२७५॥
मन्त्रे भिन्ने निवृत्तं तं श्रुत्वा खशानुपान्तिकम् । कुप्यन्कलशराजोथ सज्जसैन्यः समाययौ ॥१२७६॥
तमास्कन्दाय सप्राप्तं जानञ्शस्त्रभृतां वरः । ऐच्छद्रणाय निर्गन्तुं निजभृत्यैः सहोच्चलः ॥१२७७॥
क्षोभे संप्रस्तुते त स सान्त्वयित्वा खशाधिपः । तिष्ठन्कलशराजेन सहानिये निजां सभाम् ॥१२७८॥
निषेधाधायिनो भृत्यान्स विधूयौजसां निधिः । सज्जः खशसमाजं तं कोपकम्पाधरोविशत् ॥१२७९॥
1280 द्रष्टुं तं नाशकत्कश्चित्कल्पान्तार्कमिवोल्बणम् । क्रुद्धं कलशराजो वा राजा वा तेजसां निधिम् ॥१२८०॥
स विविक्तीकृतं धाम्नि खशाधीशं समन्त्रिणम् । सान्त्वयन्तं महातेजाः कोपरूक्षाक्षरोब्रवीत् ॥१२८१॥

१२५४ [1]) Thus A_1 A_2 gloss उत्रासो, corr by later hand into उत्रास, A_3 reads उत्रास. १२५६. [1]) Thus corr. by A_1 from कालि°. १२५७ [1]) Emended, A कश्चि°. १२६३ [1]) Thus A_{11}, a later hand corrects डामरांस्तु महोत्साहांस्त° and विप्रकृतान्दू १२८० [1]) Emended A तत्राश्च°. १२८१ [1]) Emended, A कूनो [2]) Emended, A खशाधीश

पूर्वं दार्वाभिसारेभूद्धारद्वाजो नरो नृपः । नरवाहननामास्य सुतः फुल्लमजीजनत् ॥१२८२॥
स सातवाहनं तस्माच्चन्द्रोभूत्तस्तुतः सुतौ । गोपालसिंहराजाख्यौ चन्दुराजाप्यवाप्रवान् ॥१२८३॥
ब्रह्मात्मजः सिंहराजो दिद्दाख्यां तनयां ददौ । क्षमाभुजे क्षेमगुप्ताय सावीरा भ्रातृनन्दनम् ॥१२८४॥
राज्ये संग्रामराजाख्यं व्यधादुदयराजजम् । भ्रातापि कान्तिराजोस्या जस्संराजमजीजनत् ॥१२८५॥ 1285
पितानन्तस्य संग्रामो जस्सस्तन्वङ्गगुङ्गयोः । अनन्तात्कलशक्षमाभृद्दुद्दान्मल्लोप्यजायत ॥१२८६॥
कलशाङ्कदेवाथा जाता मल्लानथा वयम् । कोयमित्यादि तन्मन्दैः क्रमेस्मिन्कथ्यते कथम् ॥१२८७॥
पृथिव्यां वीरभोज्याया क्रमो वा कोपयुज्यते । वीरस्य च सहायोस्तु कः स्वबाहुद्वयात्परः ॥१२८८॥
दिष्ट्या तदनुकम्प्यानां मूर्ध्नि हस्तमिवास्पृशन् । काश्मीरिकाणां भूपानां नाभूवं कुलपांसनः ॥१२८९॥
तस्माद्वक्ष्यथ मे शक्तिमित्युक्त्वा निर्गतस्ततः । विजयाय स पत्तीनां शनैनानुगनोचलत् ॥१२९०॥ 1290
निहतं शशमादाय तस्थामे कथिदायथौ । स तेन सुनिमित्तेन प्राप्तां मेने रिपुश्रियम् ॥१२९१॥
अरघट्टघरट्टादिकृष्टिमुत्सृज्य निर्गताः । डामरा वाट्टदेवाद्यास्तं यान्तमुपतस्थिरे ॥१२९२॥
कटकस्थस्य संग्रामपालस्यायातमन्तिकात् । तद्भेद्यो राजपुर्यन्तः खिन्नं निन्युः प्रसन्नताम् ॥१२९३॥
भुक्त्वा तद्वसतेर्गेच्छन्स्वावासं स दिनात्यये । सैन्यैः कलशराजस्य दत्तास्कन्दोभवद्वहिः ॥१२९४॥
राज्ञीभिर्निर्गमात्तस्मिन्द्वारं संरोध्य वारिते । तदीयाः सैनिका युद्धे लोष्टावट्टादयो हताः ॥१२९५॥ 1295
मध्यं प्रविश्य शमिते प्रधनैस्तत्र संयुगे । सोन्यसैन्योपि संवृत्तः सुतरामल्पसैनिकः ॥१२९६॥
चैत्रस्य पौर्णमास्यन्तः कृच्छ्रमप्यनुभूतवान् । वैशाखासितपञ्चम्यां यात्रामत्रस्तधैर्य्यधात् ॥१२९७॥
विसृज्य वाट्टदेवादीन्विश्रब्धाय स्ववर्त्मभिः । आललम्बे प्रवेशेच्छां क्रमराज्याधना स्वयम् ॥१२९८॥
यं राजोदयसीद्यान्ते कपिलं क्षेमजात्मजम् । अस्थापयल्लोहरोर्व्यां स विशन्तं मुमोच तम् ॥१२९९॥
स्वयमथे समग्राणां खड्गचर्मधरो व्रजन् । पलायने पूर्वशिष्यान्पर्णोत्से तद्भटान्व्यधात् ॥१३००॥ 1300
बद्ध्वा निःशङ्कमासीनं द्वारेशं सुज्जकाभिधम् । काश्मीरानामिपाकाढ्यौ क्षिप्रं श्येन इवापतत् ॥१३०१॥
तं डामराश्च कतिचिन्खाशिकाश्चाद्रिसंश्रयाः । राजद्विषः प्राप्तमात्रं सर्वतः पर्यवारयन् ॥१३०२॥
नभाकाशादिव स्रस्तं भुवो गर्भादिवोत्थितम् । निशम्यार्तिकरं प्राप्तं चकम्पे हर्षभूपतिः ॥१३०३॥
मा भूत्सौ बद्धमूलः क्रमराज्यान्तरस्थितम् । मा वधीन्मण्डलेशं च ध्यायेत्यिाकुलोथ सः ॥१३०४॥
विलम्बमाने संनद्धसैनिके दण्डनायके । त्वरितं प्राहिणोत्पट्टं विनीर्णासंख्यनायकम् ॥१३०५॥ 1305
दैवोपहतबीर्यो वा क्रान्तो वा द्रोहचिन्तया । अभ्यमित्रीणतां त्यक्त्वा स तु मार्गे व्यलम्बत ॥१३०६॥
अन्यांश्च यान्यांस्तिलकराजादीन्व्यसृजन्नृपः । ते ते पट्टं समासाद्य नाकुर्वन्नप्रनिर्गमम् ॥१३०७॥
दण्डनायकमुख्येपि लोके राज्ञा विसर्जिते । याते विमुढतां प्राप बद्धमूलत्वमुच्चलः ॥१३०८॥
वराहमूलं प्रविशन्नागतां द्विषतां बलात् । अश्वां क्षुलक्ष्णोपेतां राजलक्ष्मीमिवासदत् ॥१३०९॥
महावराहमौलिस्रक्तस्य मूर्ध्नि पपात च । तदंसस्थितया पृथ्व्या वरणार्थमिवार्पिता ॥१३१०॥ 1310

१२८३. [1]) Emended, A सार्थवाहन Cf. vs. 367. १२८५ [1]) Thus corr. by A_3 from \, °स्यास्सञ्जरा°. १२८९ [1]) Emended, A काश्मीरकाणां. १२९५. [1]) Thus A_1, corr. by later hand into लांदवहा° १२९८ [1]) Emended, A_1 वद्द°.—[2]) स्त्रिग्रवा and र्म्म supplied by A_3 in space left by A_1.—[3]) Emended, A आललम्ब १२९९. [1]) Thus A, perhaps, to be emended लोमहा°. Cf. vs. 482. १३०४. [1]) Emended; A °स्थितिम. १३०८. [1]) Thus A_1, A_3 °नायकसख्ये.

काकाक्षवैद्यकुलजैर्योधैः संरुद्धपद्धतिः । स हुल्कपुरमुत्सृज्य क्रमराज्योन्मुखो ययौ ॥१३११॥
अत्रान्तरे तमायान्तमाकर्ण्योत्सेकमागतैः । विद्रवोन्मुखतां निन्ये डामरैर्मण्डलेश्वरः ॥१३१२॥
तैर्हि प्रागेव भङ्ग स नीतो हत्वा महाभटान् । यशोराजमुखान्भूरीन्ययौ मन्दप्रतापताम् ॥१३१३॥
शनैरपसरन्सोथ तारमूलक्रमासदत । उच्चलाधिष्ठितास्तेपि विद्रवन्तस्तमन्वयुः ॥१३१४॥
1315 समेतानन्तसैन्येन तेन तत्र चिरं धृतः । उच्चलप्रलयाभ्रस्य पौरस्त्यानिलविभ्रमः ॥१३१५॥
सैन्ययोरुभयोस्तत्र जयश्रीकरिणीकृते । बभूव तुल्यसंघर्षः सेर्ष्ययोरिव दन्तिनोः ॥१३१६॥
आनन्दनामाप्युत्पिञ्छोत्थानमुच्चलमातुलः । चक्रे मडवराज्येय निविडीकृतडामरः ॥१३१७॥
तद्विप्रवे डामरौघा दिग्देशेभ्यः सहस्रशः । उन्मज्जुर्हिमापाये रन्ध्रेभ्य इव षट्पदाः ॥१३१८॥
तत्क्षणं क्षीणभाग्यस्य यथा द्वारपतिस्तथा । कायस्थः कम्पने राज्ञः सहेलोभून्महत्तमः ॥१३१९॥
1320 आनन्देन कृतास्कन्दो बहुशो विहिताहवः । औज्झीन्मडवराज्यं स न यत्तद्बहभूतदा ॥१३२०॥
अथाङ्कुतपतापेन वेष्टयित्वा महाचमूम् । उच्चलेनाहवे बद्धः ससैन्यो मण्डलेश्वरः ॥१३२१॥
न विद्मः किं तदा वृत्तं योधानां यत्किलाविदन् । ते सखड्गाभ्रसनाहा बद्धा वयमिति स्फुटम् ॥१३२२॥
तथा बद्धेपि निर्दग्धो स भव्यः प्रभवे हितम् । स्वामिभक्तिर्विपर्येति पर्यन्तेपि न मानिनाम् ॥१३२३॥
तूर्णं पुरप्रवेशाय सोथ प्रैरयदुच्चलम् । विश्वास्य नेदृगन्योस्ति क्षण इत्यसकृद्ब्रुवन् ॥१३२४॥
1325 विशतस्तस्य चानेकैः पुरद्वामाशतुण्ठयत् । कर्मणानेन कौलीनमस्यास्त्विति विचिन्तयन् ॥१३२५॥
परिहासपुरं तेन स ततः संप्रवेशितः । श्वभ्राम्बुविषमाश्चस्मान्निर्गमेत्यन्तदुर्गमः ॥१३२६॥
तत्रोच्चलं चतुःशाले स्वं च दग्धुमनूनुदत् । निजान्स निशि ते तत्तु न चक्रुस्तद्धितैषिणः ॥१३२७॥
यथा चित्तं तथास्य स्यात्कायश्चेत्साहसक्षमः । तदात्मनिरपेक्षस्य किं न सिध्येन्मनीषितम् ॥१३२८॥
क्लीबच्छद्मवपुस्त्वचा सह वसत्यच्छेद्यया कच्छपो निर्वर्मा रणकर्मसाहसमहोत्साहश्च सिंहः सदा ।
धिक्पादुष्कृतपक्षपातरभसो नीचेषु मुग्धो विधिर्वीराणां कुरुते शरीरमभितो वैकल्यशल्याहतम् ॥१३२९॥
1330 संदिदेशाथ स क्ष्मापमाकृष्यायं मयाहतः । सृगाल इव ते क्षिप्रः क्षिप्रं निर्गत्य वध्यताम् ॥१३३०॥
ततः समस्तसामन्तसैन्यसंततिसंयुतः । अद्य मृत्युर्जयेो वेति निश्चित्य निरगात्सृपः ॥१३३१॥
स प्राणसंशये सर्वायासप्रशममादिशत् । पटहोद्घोषणेनासीत्परैरनुगतोखिलैः ॥१३३२॥
प्राप्तं भरतसैन्यवं ध्वन्तः सैन्यं विरोधिनम् । आजानेयै राजभृत्याः क्षणान्मार्गमलङ्घयन् ॥१३३३॥
क्षुभितेष्वादिवायाते राजसैन्ये द्विषद्बलम् । मण्डलेश्वर एवान्तःप्रविष्टो निरनाशयत् ॥१३३४॥
1335 अथोच्चलबले भग्ने विद्रुद्रुः केपि जाह्निकाः । भ्रान्ता राजविहारं च प्राविशन्केपि डामराः ॥१३३५॥
त्रिस्रोसेनाभिधं दृष्ट्वा प्रविष्टं डामरं परे । उच्चलोसाविति भ्रान्त्या विहारं तमदाहयन् ॥१३३६॥
सोमपालाभिधेनारिहयारोहान्तरे चिरम् । कुर्वन्दर्शनपालस्य पितृव्येण सहाहवम् ॥१३३७॥
यत्राज्ञानकचन्द्राद्यैर्मानी व्यावर्तितो रणात् । परिहासपुरात्प्रायान्मृत्युवक्त्रादिवोच्चलः ॥१३३८॥

१३११ [1]) Thus A_1, corr. by later hand into कांकाक्षवैद्यक°. १३१९ [1]) Emended; A सहलो.—[2]) Emended, A °भूमह-जम १३३२ [1]) Doubtful, thus emended with C, A °सीत्पारैर°. १३३६ [1]) Thus A_1, corr by later hand into प्रविहा.

वितस्तां गौरिकाबालपामाक्रीत्वा हयान्वितः । स डामरैः सह पुनः प्रययौ तारमूलकम् ॥१३३९॥
जयेन तावन्मात्रेण किंतथोल्व इवोन्मदः । राजा प्रशंसन्नानन्दं राजधानीं न्यवर्तत ॥१३४०॥ 1340
जीवन्तमप्यरिं श्रुत्वा न पश्चादलगत्स यत् । आसन्नुच्छ्वसितास्तेन भङ्गभाजोपि डामराः ॥१३४१॥
यातान्पलाय्य ताञ्ज्येष्ठामुरीये मासि सर्वतः । भूयोपि संघटयितुं स्थिरधीरैरुच्छृङ्खलः ॥१३४२॥
स्वदोर्मात्रसहायस्य परायत्तस्य मानिनः । दुर्भिक्षान्तर्महोद्योगः स तस्य विषमोभवत् ॥१३४३॥
तन्मध्येतिदरिद्रेपि संग्रामं स ररक्ष यत् । तमुत्पाद्यानयद्राजा श्रीपरीहासकेशवम् ॥१३४४॥
तस्मिन्विघटिते पांशुः कपोतच्छदधूसरः । रोदसीच्छादनं हर्षशीर्षच्छेदावधि व्यधात् ॥१३४५॥ 1345
प्रागन्धकारो[1] देशेस्मिन्दिवसेपि व्यजृम्भत । रूपिकादिवसालोक इति यत्पप्रथे जनैः ॥१३४६॥
निवेदिते परीहासकेशवे प्रशशाम तत् । तस्मिन्नुन्मूलिते भूयः सार्धं मासमजृम्भत ॥१३४७॥
किंचिदुच्छ्वसिते राज्ञि मन्दोद्रेकतया रिपोः । दिशा शूरपुरस्याथ सुस्मलः प्रत्यहृदयत ॥१३४८॥
अवनांद्रं[2] स हि वसन्तपालम्भपरैः पितुः । संदेशैः शांसतो ज्येष्ठमौदासीन्यादपाहृतः ॥१३४९॥
दत्तान्कल्हक्षितीशेन कांश्चिदादाय वाजिनः । चिरेण राजदाक्षिण्यमौज्झीत्तेन व्यलम्बत ॥१३५०॥ 1350
आरम्भादुदयान्तं च तिष्ठन्वैरेपि निर्गुरे । साम प्रयुयुजे मोहाद्वहं मायानिधौ रिपोः ॥१३५१॥
जित्वा माणिक्यनामानं तेन सेनापतिं रणे । प्रापि शूरपुरद्रङ्गाज्जयश्रीः श्रीश्च भूयसी ॥१३५२॥
तस्याभ्युदयपात्रस्य तया संग्रामया श्रिया । आरब्धिसमयः कृत्स्नः स विभूत्युद्गमोभवत् ॥१३५३॥
मण्डलेश्वरपट्टादीनविचिन्त्योच्चलं ततः । प्राहिणोन्नृपतिर्योद्धुं सुस्मलं क्षिप्रकारिणम् ॥१३५४॥
तेन शूरपुरे भग्नास्तयोधाः शौर्यशालिना । भूयांसः प्रलयं प्रापुर्मग्ना वैतरणीजले ॥१३५५॥ 1355
तत्र दर्शनपालस्य स्वामिद्रोहकृतेव वपुः । विक्रामतो न संस्पृष्टं खिन्नेव जयश्रिया ॥१३५६॥
राजसैन्य तदन्योन्यदत्तशेषं पलायितम् । लोकपुण्यं निवसतः सह्येलस्यान्तिकं ययौ ॥१३५७॥
सुस्मलापातकल्यान्तं विशङ्कूचापि सह्यलकः । तैस्तैर्भग्नैर्बलैः साकं नगरं प्राविशत्ततः ॥१३५८॥
एवमभ्येत्य नृपतौ सुस्मलेन विसूचिते । अवाप तारमूलस्थः प्रतिष्ठां पुनरुच्चलः ॥१३५९॥
बिभ्यद्भिस्तुरगानीकात्पत्तिप्रायैः स डामरैः । आनिन्ये शैलदुर्गेव भूयो लङ्घरवर्त्मना ॥१३६०॥ 1360
राजाप्युदयराजाख्यं कृत्वा द्वारपतिं पुनः । प्राहिणोदुच्चलं जेतुं लङ्घरं मण्डलेश्वरम् ॥१३६१॥
ततः पद्मपुरं प्राप्ते मातुले मल्लजन्मनोः । न कोपि कम्पनं भूपान्मन्वी त्रासातुरोमहीत् ॥१३६२॥
को भैस्मीति विनिश्वस्य वदतोथ महीपतेः । अधिकारस्रजं हस्तात्चन्द्रराजः समाददे ॥१३६३॥
अनाशीः शयने मृत्योर्येषां तेषां स वंशजः । श्रीजिन्दुराजमुख्यानामौचित्यं प्रत्यपादयत ॥१३६४॥
स द्रोणिरिव निर्नष्टे काले सेनापतिः कृतः । निर्गस्य तत्पद्मपुरादरिसैन्यं न्यवारयत् ॥१३६५॥ 1365
विपक्षः कम्पनेशः स तेन क्ष्मां क्रामता शनैः । नवम्यां शुक्लनभसो हतोवन्तिपुरान्तरे ॥१३६६॥
स हि गोवर्धनधरोपान्ते कुर्वद्भिराहवम् । स्वरौन्यैर्वाजिनो गीतं शृण्वन्परिमितानुगः ॥१३६७॥

१३३९ [1]) A, gloss परिहासपुरसमीपे गुरिकाबलमास्त १३४५ [1]) Emended, A °कारवेश १३४९ [2]) Thus A_1, A_2 (') अवनाहे, A_3 gloss पीडुपावग्रामे. १३५१. [1]) Emended, A मोहाँवह १३६० [2]) Emended, A °नीकात्पत्ति° १३६६. [1]) Emended, A क्रमता.

प्रविश्यारिह्यारोहैर्वितस्तानीरवर्त्मना । प्राप्तोऽस्माद्दर्पं लेभे प्रमत्तानां शुभं कुतः ॥ १३६८॥
पहिनं चन्द्रराजेन क्षमापतिर्वीक्ष्य तच्छिरः । भूयो जयाशामकरोदानुकूल्यं विदन्विधेः ॥१३६९॥
वैमुख्येन व्रजन्कुर्यात्सांमुख्यैरन्तरा विधिः । प्रत्यागमभ्रमं सिंह इव व्यावृत्य वीक्षितैः ॥१३७०॥
अथ लब्धबलश्चन्द्रराजोमन्दोद्यमोविशत् । विजयक्षेत्रमाकर्षन्कटकं दशधाशधा ॥१३७१॥
तुलाधर इव स्रष्टा साम्यभङ्गं न चक्षमे । तदा द्वयोः कटकयोस्तुलायाः पुटयोरिव ॥१३७२॥
प्राप्ते यतस्तृतीयस्मिन्दिवसे मण्डलेशितुः । अकालवृष्टिविवशं लङ्घरे व्यद्रवद्बलम् ॥१३७३॥
शीतवातहता योधा मग्नाः केदारकर्दमे । तुरगासितनुत्राद्रि द्राक्किर्यश्च इवामुचन् ॥१३७४॥
उच्चलेन ततो रक्ष्यमाणमत्याद्रचेतसा । प्राप्तं जनकचन्द्राभ्यां निजघुर्मण्डलेश्वरम् ॥१३७५॥
हर्षभूमुद्गत्यवर्गे द्रोहशुद्धाङ्किते परम् । कलेवरव्ययात्कीर्तिः क्रीता तेनैव मन्त्रिणा ॥१३७६॥
ध्रुव सस्पर्धनो वन्द्या देवशर्मादयोऽस्य ते । न नेत्कोपि विपर्यासे दोषमुद्घोषयेज्जनः ॥१३७७॥
लङ्घन्योन्मूलनारातिव्यूहव्यामोहनादयः । विध्यधीने फले ध्याते स्तुत्याः कस्य न तत्क्रियाः ॥१३७८॥
किं पातालतमो न हन्ति हिमगुः किं नो त्रिपं भीतये पानीयं गिलतः किमान्तरशिखिध्वस्त्यै न धन्वन्तरिः।
सर्वत्रैकपदे प्रयात्यफलतां वाच्यो जडो नाम्बुधिः सिद्धैर्देवविधेयतां विमृषतां स्तुत्यैव वस्तुज्ञता ॥१३७९॥
स्वामिकृत्योद्यमस्तुत्यस्तुतिषु स्त्रीषु पुण्यताम् । गच्छा तज्जननी स्वस्य नमस्यन्त्यविशङ्कितम् ॥१३८०॥
साहसे सा हि तनये यत्र तत्र मही भुजा । प्रहीयमाणे तं स्नेहमोहिताह स्म भूभुजम् ॥१३८१॥
अनन्यसंततेरेकं सुतमेतं प्रभो मम । मा नियुङ्क्था यत्र तत्र कार्ये संक्षेहितासुनि ॥१३८२॥
स तामकथयन्मातर्यथा तेनन्यसंततेः । तथा मेनन्यभृत्यस्य सोयमेकोवलम्बनम् ॥१३८३॥
स्वसभवस्य तां भर्नुर्भक्तिसंभावनामसौ । प्राप्रप्रतिष्ठानिष्ठायां नेने मानवती सती ॥१३८४॥
उच्चलस्य क्षणे तस्मिन्हिरण्यपुरमीयुषः । राज्याभिषेकं संभूय तत्रत्या ब्राह्मणा ददुः ॥१३८५॥
नृपमत्यन्तविवशं प्रमदे तत्र मन्त्रिणः । भूयांसः सन्ति तैः सार्धं व्रज तल्लोहगार्चलम् ॥१३८६॥
प्रजा एव ततः शान्तोत्कण्ठा नवनृपं प्रति । त्वामानेष्यन्ति न चिराद्दिवैर्वा स्वयमेष्यसि ॥१३८७॥
सोभ्यधाद्वरोधस्त्रीकोशसिंहासनाद्यहम् । असामान्यं परित्यज्य गन्तुं सपदि नोत्सहे ॥१३८८॥
पुनस्तेकथयद्यात्रा यान्तोप्यारुह्य वाजिनः । पृष्ठे विन्यस्य नेष्यन्ति कोशान्तःपुरयोषितः ॥१३८९॥
अपाकीकामुकोप्यासीद्यस्मिंस्तदपरोपि चेत् । सिंहासनं समारोहेत्कामिमानक्षतिस्ततः ॥१३९०॥
आस्तामेतत्परं ब्रूथ मन्त्रमित्यथ चोदिताः । ते पार्थिवेन भूयोपि समरंभं बभाषिरे ॥१३९१॥
क्षत्रधर्मं पुरस्कृत्य शासतां क्ष्मां क्षमाभुजाम् । को दैन्यस्यावकाशः स्यादाशीर्यंथां मृधे वधः ॥१३९२॥
अनुद्योगश्च लज्जा च भयं द्वैधं च मन्त्रिणा । भूभुजां व्यसनोल्लासे शत्रवो न तु गोत्रिणः ॥१३९३॥
कार्यं न पश्येदलसः स्वयं यो भृत्येषु विन्यस्तसमस्तकृत्यः ।
यष्ट्याश्रयस्येव विनष्टदृष्टेः पदे पदे तस्य किलोपघातः ॥१३९४॥

१३९१ [1]) Emended, A धान्व°. १३८२ [1]) Emended; A नियुक्था १३८४. [1]) Emended, A ता भर्तुं° १३९२ [1]) Thus A$_1$, corr. by later hand into सेन्य°

तज्जेहमस्य स्वयमात्तशस्त्रः स्वल्पस्य शत्रोः कलयन्नवज्ञाम् ।
एवं किलादीर्घमतिर्ददाति स्वयं प्रवृद्धिं जपया विमुग्धः ॥१३९५॥ 1395
कालेन याति क्रिमितां महेन्द्रो महेन्द्रभावश्च क्रिमिरप्युपैति ।
अयं पृथीयानयमप्रतिष्ठ इत्येष निष्ठानुचितोभिमानः ॥१३९६॥
पराभवाधायि भयं जिगीषोः सर्वाङ्गवैकल्यवताहितेन ।
येनाभियुक्तः स समस्तसंपन्पूर्णोपि वैकल्यहतत्वमेति ॥१३९७॥
लब्धस्थितिः स्फीतविभूतिपात्रं दीनोभियोक्ता परपिण्डवृत्तिः ।
आद्ये कथ नाम पराभवः स्याद्भयं भवेद्येह न तत्र भावः ॥१३९८॥
अमात्यवैमत्यवशेन निष्ठा दृष्टा न कार्यस्य तनीयसोपि ।
वैशाखरज्जोरिव कर्षकाभ्यां पर्याययोगेन कृते विकर्षे ॥१३९९॥
समयशक्तेरकेनाप्याशाक्रान्तस्य भूपतेः । वैरी सर्वाङ्गहीनोपि राज्यमायुश्च कर्षति ॥१४००॥ 1400
यत्र द्विषस्तत्र याहि क्रान्तां क्रान्तां च मेदिनीम् । पातार्थी न चिरादेवं पुनर्जयमवाप्स्यसि ॥१४०१॥
विधुरेपि विधौ भूरमहस्रपरिवारितैः । पतद्भिराहवे भूपैः क्षयात्याभिख्ययोपलभ्यते ॥१४०२॥
नृत्यच्छिवशिरोधरोद्धुरनटे[1] ज्यालार्बुदीणागुणप्रक्षाणिन्युदयच्छिवामुखशिखिज्वालाप्रदीपाङ्कुरे ।
धन्याः केष्वपलभ्य वीरशयने शान्ताभिमानज्वरोल्लाघप्लाघ्यशरीरतासफलितस्निग्धाशिषः शेरते ॥१४०३॥
उदात्तमित्यन्तकृत्य संचित्यं कितवा इव । राज्ये भजन्ते दीव्यन्तः क्षत्रियाम्त्रासहीनताम् ॥१४०४॥
मन्त्रान्तरानुयोक्तारं तदप्युन्मृज्य मन्त्रितम् । परुषं प्राप्तकालं च ते निःश्रेयस तमब्रुवन् ॥१४०५॥ 1405
उत्कर्षवदसंस्थेयक्तमपि शक्नोषि संकटे । अन्वयानुचितं किंचित्पाप्स्यस्यहितचिन्तितम् ॥१४०६॥
स तानुवाच स्वं हन्तुं न शक्नोमि ततो मयि । भवद्भिरेव विषमे प्रहर्तव्यमुपस्थिते ॥१४०७॥
गिरं कापुरुषस्येव क्लैव्यवस्तस्य तां प्रभोः । सबाष्पास्तेनुशोचन्तः पुनरेवं बभाषिरे ॥१४०८॥
प्रतीकाराय नः शक्तिर्न चेद्देहौजसाम् । प्रत्युतैवविधे कृत्ये प्रसरेयुः कराः कथम् ॥१४०९॥
पभून्पुरुषरूपान्स नूनं भूभृत्पुषोष तान् । दुःखेनोदखनस्तस्य ये तादृग्दैन्यमीयुषः ॥१४१०॥ 1410
युगान्तानपि जीवित्वा कार्यः सापाय एव यैः । तत्त्यागमात्रसाध्येर्थे धिग्दैन्यमनुजीविनाम् ॥१४११॥
योषितोपि विशन्त्यग्निं ये ध्यात्वा विस्मृति व्रजेत् । भर्तृस्नेहः स पुंसोपि यस्य कोन्यस्ततोधमः ॥१४१२॥
शैलूषस्येव ये शोकभयदैन्याद्यविक्रियाः । भर्तुः पश्यन्ति तैरेषा भूः सतीर्थ्याप्यपावनी ॥१४१३॥
क्षुत्क्षामस्तनयो वधूः परगृहप्रेष्यावसन्नः सुहृद्दुग्धा गौरजनाद्यभावविवशा हम्भारवोद्गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी द्विषज्जिनतो दृष्टो येन परं न तस्य निरये भोक्तव्यमस्त्यप्रियम् ॥१४१४॥
भयेपि मानुषपभून्स तानुपतिरब्रवीत् । उदात्तकृत्योप्यविहय भूतैरिव विमोहितः ॥१४१५॥ 1415
एतस्मिन्पश्चिमे काले भुक्तं राज्यं यथा मया । नानेविशालेच्छतया तथान्यो नोपभोक्ष्यते ॥१४१६॥

१३९५ [1]) ह supplied by A_3 in space left by A_1. १३९८ [1]) Thus corr. by later hand from A_1 तत्प्रभाव १४०१. [1]) Emended, A_1 has written first °द्धुरनट्य and corrected this into °द्धुरनटे.—[2]) Thus cor. by A_1 from ज्वालाप्र°.—[3]) Thus corr. by A_1 from °च्छिवो—[4]) omitted in A १४०४. [1]) Thus A, perhaps, to be emended सन्धिन्य १४०५. [1]) Emended, A पुरुष १४११. [1]) Emended, A व

यमः कुबेरश्चौडाग्नेये राज्ञां तिष्ठत इत्यसौ । मदेकशरणैवाभूत्ख्यातिरस्मिन्कलौ युगे ॥१४१७॥
रुद्रोपेन्द्रमहेन्द्राद्याः प्रयातारो यदध्वना । उपस्थितायां नियतौ तत्र मर्त्यस्य काः भुवः ॥१४१८॥
किं तु दृष्ट्वं यदेषा भूर्भृत्या कुलवधूरिव । महीपाद्धृत्तचेटीव प्राप्ता प्रसभभोग्यताम् ॥१४१९॥
इतः प्रभृति यः कश्चिद्राज्यस्यास्य गतौ जनः । चक्रिकामात्रसाध्यत्वं जानन्नाशां करिष्यति ॥१४२०॥
अलौकिके कृते यद्यत्तद्वीक्ष्य फलवन्त्यताम् । प्राप्तोद्यैरल्पसत्त्वैर्दीर्घासूनं हसिष्यते ॥१४२१॥
कार्यारम्भः फलोल्लासमालोक्य प्रायशो जनैः । अनानुगुण्यगणनां कुर्वाणैर्न विगर्ह्यते ॥१४२२॥
पक्षान्तकोटिरवलम्बनभूः स नेत्रं दुर्ग्रहं यस्य मरणं धिगि कैरित्येत्यम् ।
पारं गते मथनकर्मणि मन्दराद्रेर्दोर्पीड्यते विगुणहेतुपरीक्षणेन ॥१४२३॥
शास्त्रसंदर्भचित्रेऽपि श्रीगर्भत्वमदर्शयम् । जनोपजीवनार्थं यत्तेज्ज्ञातं जाड्यसिद्धये ॥१४२४॥
उल्लेनापि सत्कृत्ये हस्तापोद्येयचेतसा । दीर्घीतदयामदशनं करिष्यन्ते विडम्बनाः ॥१४२५॥
ननोत्तमानान्न त्रासात्संत्राणोद्य विहस्तताम् । समर्थनेच्छुर्याच्छामि मृत्युमीदृशमप्यहम् ॥१४२६॥
स्वैरेव स हतो नो चेत्कस्तस्माद्वसुधां हरेत् । लब्धां रक्षितुमिच्छामि ख्यातिमेतेन हेतुना ॥१४२७॥
मुक्तार्पाडः पुरा राजा ज्वलित्वा मूर्ध्नि भूभुजाम् । कार्पण्यप्रणयं प्राप लब्धरन्ध्रो विरोधिभिः ॥१४२८॥
स श्रुतरापथे नानापथस्थगितसैनिकः । मितानुगोऽहैवे रुद्धमार्गोभूद्गर्भेश्वनि ॥१४२९॥
तं ज्ञाल्यो नाम सामन्तवैरलंबविवर्जं नृपः । वन्दुं प्रतिज्ञामकरोद्राजिलक्षैर्युतोटभिः ॥१४३०॥
स सामप्रमुखोपायापायध्यानावसक्तधीः । भत्रस्त्वाख्यभिधं कृत्यमपृच्छन्मुख्यमन्त्रिणम् ॥१४३१॥
असाध्यां सोपि निर्ध्याय विनिपातवतिक्रियाम् । न्याये निश्चित्य नैयत्यं कर्तव्ये प्रत्युवाच तम् ॥१४३२॥
उपायपुक्तिपत्युक्ते कृत्ये कीर्त्यभिमानिनाम् । निःसंभ्रमेव प्रतिभा लोभेनाक्षोभिते हृदि ॥१४३३॥
कृत्यं कृत्यविदो लब्धप्रसिद्धिपरिरक्षणम् । साम्राज्योपार्जनमुखो व्यापारस्यानुपद्धिकः ॥१४३४॥
गच्छच्छरीरविच्छेदादपि भस्मावशेषताम् । कर्पूरः सौरभेणैव जन्तुः ख्यात्यानुमीयते ॥१४३५॥
शान्तयोर्जीवितस्थानं द्वयमत्यद्भुतं द्वयोः । अनङ्गस्याङ्गनापाङ्गः स्तोतृजिह्वा यशास्विनः ॥१४३६॥
ख्यातिसंरक्षणं नाम जन्तोः कल्पान्तरस्थितिः । वर्तने कीर्तिकायस्य संपूर्णाः परभागवः ॥१४३७॥
धीरैर्विधिश्च निर्ध्येयो विरोधिष्ववधानवान् । यस्तेषामुद्यतिधनध्वंसाय यतते न्वहम् ॥१४३८॥
नुद्वावपातनहृदयसनी विधाता स्त्रोत्पत्तिपद्मकुलजेपि सरोजषण्डे ।
संकोचिनि द्विजपतावपि शुद्धिवन्ध्ये मातङ्गहस्तपतनैः कुरुतेधमानम् ॥१४३९॥
ये हत्यापातिनो धात्रुर्ध्यं ख्यातिनिपातने । रक्षितुं समुपेक्षन्ते तैः किं नाम [-] रक्षितम् ॥१४४०॥
जातिः क्ष्माभृति वंशजाश्रयतया ख्यातिप्रतिष्ठाभिमामुद्दीप्यानलमुज्झितस्ववपुषः केप्यत्र वेत्राङ्कुराः ।
त्रातुं हन्त विदन्ति ये न विधिना क्रुद्धेन पृथ्वीभृता द्वारि द्वाःस्थकरैर्गतागतखलीकाराणि संपापिताः ॥१४४१॥
भोगान्निर्वाणभूयिष्ठानिष्टान्याप्तानवेत्य तत् । प्रतिष्ठासौष्ठवत्राणे संरब्धुं देव सांप्रतम् ॥१४४२॥

१४३० [1]) Thus A_1, A_2 °वैचल्य° १४४० [1]) Thus corr. by A_1 or a later hand from °धातुरियं.—[2]) The *lacuna* not indicated in A, n supplied in R C

दण्डकालसकाख्यस्य तद्रोगस्याभ्युकारिणः । पार्थिवाकस्मिकोत्थानं भिषादेश प्रकाशयताम् ॥१४४३॥
श्रो वक्तास्यय कर्तव्यं व्यापत्प्रक्षपणक्षमम् । उक्तेति स महामात्यो निर्गत्य स्वगृहानगात् ॥१४४४॥
दण्डकालसकं दण्डधरो व्यञ्जन्मियात्ततः । अधीर इव चक्रन्द लुठन्निस्पन्दलोचनः ॥१४४५॥ 1445
स्वेदसंवाहनक्लेदवमनाद्यैरुपक्रमैः । निःशैथिल्यव्यथं तेन मुमूर्षु ते जनोऽवदत् ॥१४४६॥
ततो निश्चितमृत्युत्वं पत्युः कथयता कृतः । वह्निप्रवेशोमात्येन कृतज्ञत्वनिवेदकः ॥१४४७॥
कर्तव्यशेषं दाक्षिण्यादनाचक्षाणमभ्यतः । युक्तयोक्तनिष्ठुराचारमन्तस्तुष्टाव तं नृपः ॥१४४८॥
अप्रौढः सोढुमुद्रामां व्यथामस्मीति वादिना । राज्ञाप्यनलसाहेहं तनश्चक्रेभिमानिना ॥१४४९॥
तेन पाणानुपेक्ष्यैवमन्यरक्षानैर्मनस्विना । ऊर्ध्वापिरोहे सोपानं कृतं न निजकीर्तनात् ॥१४५०॥ 1450
एवं दैवोपनीतानामरक्षानां चिकित्सितम् । स्वधियामात्यवृद्धा वा पारमेति मनस्विनाम् ॥१४५१॥
इत्युक्ता विरतो वंशबीजरक्षार्थमात्मनः । भोज्ञो विसृज्यतां क्रोष्टमेवमूचेथ मन्त्रिभिः ॥१४५२॥
तं राजपुत्रं प्रस्थानमङ्गलान्ते विनिर्गतम् । पुनर्व्यावर्तयामास दण्डनायकमोहितः ॥१४५३॥
सा धीः स साहसारम्भस्तदवैक्लव्यमापदि । नष्टमेकपदे तस्य नाशकाले नृपस्थिते ॥१४५४॥
लक्ष्मीतडिल्लता कीर्तिबलाका द्यौर्यशोजितम् । प्रतापशक्रचापं च भागधेयाम्बुदानुगम् ॥१४५५॥ 1455
धीशौर्यादिगुणैर भाग्यसमये प्रागेष एको नृपः शक्रस्याक्रमणं क्रियेत न कुसोनेनेति सभाव्यते ।
मौख्यं पङ्गुजडान्धवच्च स ततो गच्छन्नभाग्योदये दत्तोनत पदवामो भुवि कथं नाभिति सचिन्त्यते ॥१४५६॥
विरोधिधातनिरोधाय तान्त्रिमन्यं विसर्जितम् । नगरस्थमपि क्षमापत्प्रयासधनमादधे ॥१४५७॥
सायादाश्रयणं राजभृत्या. सर्वेपि चक्रिरे । ये केचित्त्ववसन्नेहे ते देहेरेव केवलम् ॥१४५८॥
पराश्रयपरं हित्वा न संकल्पमपि व्यधुः । किं वा स्तुतैस्तैर्ये स्त्रीवदमुच्चन्नचिरादसून् ॥१४५९॥
यां क्राणश्रावतीनर्तक्यन्वये कापि नर्तकी । पूर्वाचके कापि जाती जयमत्यभिधाय सा ॥१४६०॥ 1460
भुक्त्वा गृहीतकौमार्या तरुण्युच्चलरागिणी । धनलुब्धावरुद्धात्मभवजन्मण्डलेशितुः ॥१४६१॥
तस्मिन्हते तदैवात्मापत्यपोच्चलमायया । तयैव दैवयोगेन पट्टदेव्या भविष्यते ॥१४६२॥ निष्कर्म ॥
आवद्धपट्टयश्चामुच्चलाभ्यर्णां व्यधुः । भूपालदर्शनेष्वस्मभीतयो राजसेवकाः ॥१४६३॥
वेतनस्वीकृतैः सर्वैः शिक्षाचार्यो पुरस्कृतः । लोभावमानावुद्दीप्य योधभद्रां हरन्युधि ॥१४६४॥
मन्दपातपतात्रोग्रो नर्मोक्त्या मर्मभेदकृत् । आहारादिक्षणे कर्ता प्रक्रियार्थनया कलेः ॥१४६५॥ 1465
अतीव प्रभुदानादिमाहात्म्याख्यानकोविदः । एक एकोकरोद्योधः पृतनानां विसूत्रणम् ॥१४६६॥ युग्मम्॥
श्रीलिखाधानुसूनोर्यस्तनयो व्यङ्गमङ्गलः । मल्लज्ञातीयकोपेन स राज्ञास्कन्ध घातितः ॥१४६७॥
मातुलस्यात्मजा मल्लापत्यस्यैतस्य गेहिनी । श्रुत्वा समं स्वसतीरादीप्य दहने मृता ॥१४६८॥
मौनव्रतादिनियमच्छद्मक्रौर्योन्तकोपमः । करोत्यभ्यन्तरान्मिन्नान्मल्लः परमदाम्भिकः ॥१४६९॥
तदेष पुत्रराज्येच्छुर्वध्यतां निर्भयं रिपुः । ज्ञात्वेतिपुत्रीभिरित्युचे तस्मिन्नवसरे नृपः ॥१४७०॥ 1470

१४५२ [1]) Emended, A लक्ष्मीस्तडि° १४५२ [2]) Emended, A °मुच्चत्रि°. १४५२ [3]) A_1 writes here ३ instead of त्रिलक्षम. १४५६ [1]) A_1 writes here २ instead of युग्मम (युगलकम). १४७० [1]) Emended, A °वैध्यता.

स्वयं प्रादात्समास्कन्दं द्वारि स्थितवतः पुरः । तस्य प्राणार्थिनो वाञ्छापूर्त्यै मल्लश्च निर्ययौ ॥१४७१॥
स हि हैराज्यसज्जाभ्यां पुत्राभ्यां प्रार्थितोपि सन् । मुनिव्रतः सदाचारानुरोधात्त्यजन्नृपम् ॥१४७२॥
विश्वासाय परं राज्ञो भ्रातृत्राज्ञोर्भविष्यतोः । हैमातुरान्सल्लक्षणादीक्षीर्षि दत्त्वावसद्गृहे ॥१४७३॥
आसेदुषे मुनिदशामाजन्मप्रीणितात्मने । तदा स तस्मै चुक्रोध प्रत्यासन्नवधो नृपः ॥१४७४॥
1475 स सुराभ्यर्चनं कुर्वेस्राहूतः परिपन्थिभिः । रेजे तेनैव वेषेण समराय विनिर्गतः ॥१४७५॥
उपवीत्यक्षसूत्राङ्कपाणिर्भोज्ज्वलाङ्गुलिः । भस्मस्मेरललाटाङ्को जामदग्न्य इवापरः ॥१४७६॥
स्नानार्द्रधवलश्यामलोलधम्मिल्ललीलया । देहत्यागे प्रयागाम्बु धारयन्निव मूर्धनि ॥१४७७॥
उष्णीषी वीरपट्टेन खेटकेनोष्णवारणी । सोसिधारातीर्थपान्थो दण्डी खड्गेन दिद्युते ॥१४७८॥
भोगे पुरस्कृताः केचित्तद्भृत्याः पूर्वनिर्गताः । अमर्त्यनारीभोगेपि तस्यासन्नप्रभागिनः ॥१४७९॥
1480 द्वौ रथ्यावट्टविजयौ द्विजौ पौरोगवस्तथा । कोष्ठकः सज्जकाख्यश्च योद्धा युद्धे हता बभुः ॥१४८०॥
क्षतोप्युदयराजाख्यः क्षत्तायुःशेषसत्तया । प्राणैर्नियोगभागाजौ नाज्झकोपि व्ययुज्यत ॥१४८१॥
विरोधियोधैर्नीरन्ध्रं द्वारमालोक्य सर्वतः । त्यक्तकम्पो ददौ झम्पा स तेषामेव मूर्धनि ॥१४८२॥
शेवलेष्विव खड्गेषु खेटकेष्वम्बुजेष्विव । जरसा धवलो भ्राम्यन्नाजहंस इवाबभौ ॥१४८३॥
क्षणाच्च ददृशे शातशरशङ्कुशताचितः । प्रवीरो वीरशयने सुप्तो भीष्म इवापरः ॥१४८४॥
1485 शोच्यं गतायुषो राज्ञः किं नाभूत्तस्य तादृशः । चिच्छेद यः शिरः पुंसे हयं च भ्रमयन्समयात् ॥१४८५॥
राज्ञी कुमुदलेखाख्या मल्लस्यालो च वल्लभा । गृहेष्वनुदिनं वीतिहोत्रे गात्राणि संभृते ॥१४८६॥
राजावकल्ययोः पत्न्यौ बाले सल्लक्षणल्लयोः । स्नुषे मल्लस्यासमती सहजा चाग्निमाद्रते ॥१४८७॥
सर्वोपभोगभागिन्यस्तदन्तःपुरयोषिताम् । परिवाराङ्गना बह्वी षट्त्रैव विंपिदिरे ॥१४८८॥
महागृहाग्नितापेन शोकोष्णैश्च जलाप्लुभिः । तप्ताभ्यसो वितस्तायास्तीरे वामे बभूव तत् ॥१४८९॥
1490 प्रवर्धितायाः स्तन्येन द्रष्टुमक्षमया पयः । दास्यमानं निवापेषु पुत्र्याश्चान्द्रायया समम् ॥१४९०॥
धात्र्या परस्मिन्वै तस्मिंस्तीरे स्वान्तःपुरे स्थिता । माता भविष्यतो राज्ञोर्नन्दानिन्द्यकुलोद्भवा ॥१४९१॥
महानसाग्निधूमेन संलक्ष्यावीक्ष्य पुत्रयोः । सोत्कण्ठं कटकौ सौधादुदग्दक्षिणदिक्स्थयोः ॥१४९२॥
क्रियतां दिवसैरेव पुत्रौ शत्रोः पितृद्विषः । जामदग्न्यायितं वंशे शान्तेति नृपतिं सती ॥१४९३॥
अनिषण्णेव दीप्राग्नौ गृहे स्वं निरदाहयत् । मनृत्यन्तीभिरालीभिरिव ज्वालाभिरावृता ॥१४९४॥
1495 वधे दर्शनपालस्तु नृपे प्राप्ते प्रतिक्षणम् । अन्यद्भुतैरन्तरायैरायुःशेषेण रक्षितः ॥१४९५॥
वर्षमात्रावशेषायुर्यद्वा द्रोहेण रक्षितः । सोत्रमानस्य पुण्यस्य रोगजस्य च भुक्तये ॥१४९६॥
कृष्णभाद्रनवम्यां तं वर्धं श्रुत्वनोः पितुः । मल्लान्मजन्मनोः शोकः कोपेन निरपीयत ॥१४९७॥
आवह्निपुरकृपामान्प्रज्वलन्क्रोधवह्निना । अधावद्विजयक्षेत्रं सोन्येद्युरथ मुस्मलः ॥१४९८॥
योद्धुमभ्यापतन्तं तं चन्द्रराजोथ निर्गतः । पद्मदर्शनपालाद्यैः ससैन्यैः पर्यवर्त्यत ॥१४९९॥
1500 निजैरुपेक्षितश्चक्रे स चिरं तत्र दुष्करम् । स्वल्पसैन्योपि संग्रामं भूरिसैन्येन शत्रुणा ॥१५००॥

१४७७ [1]) Emended, A °धम्मिल्ल° १४८० [1]) Emended, A योधा १४८१ [1]) Emended; A क्षतायु° १४९१. [1]) Emended, A राज्ञो नन्दा°. १४९९ [1]) Emended. A योद्धुमस्याप°.

अक्षोटमल्लः समरे तत्र मल्लश्च चाचरिः । अगातां राजगृह्यौ द्वौ स्वर्गस्त्रीभोगभागताम् ॥१५०१॥
रजोन्धकारे ज्वेन्दुद्योतिन्यातिक्रिनो हतः । चन्द्रराजः क्षरत्स्त्रीभिरिन्दुराजोस्य चानुगः ॥१५०२॥
तस्मिन्नपि हते वीरे चक्रे हर्षमहीभुजः । आशारविन्दिनीमूलकन्दनिर्दलनं विधिः ॥१५०३॥
पट्टादयः प्रविश्याथ विजयेशाङ्गनं भयात् । प्रविष्टे सुस्सले देशं द्वारं दत्तार्गलं व्यधुः ॥१५०४॥
आस्थानीयः परं पद्मनामा युद्ध्वा हतो बहिः । लक्ष्मीधरो मर्तुमिच्छुर्बद्ध्वा नीतः स डामरैः ॥१५०५॥ 1505
विजयेश्वरगच्छापसौधारूढोथ सुस्सलः । अधो ददर्श तान्सर्वान्पभूनिव भयाकुलान् ॥१५०६॥
धूर्तः स दत्तमध्यस्थो हसन्नानीतवान्पुनः । पट्टदर्शनपालौ द्वौ तेषां पूर्वं निजान्तिकम् ॥१५०७॥
निःश्रेण्यभावादारोढुमक्षमौ सुस्सलानुगैः । तौ मृताविव निर्बद्धपाणी रज्ज्वाधिरोपितौ ॥१५०८॥
तयोर्विदेशगमनं व्रीडादर्थायमानयोः । प्रतिभुत्याकरोद्धीमान्सुरसलो म्लानिमार्जनम् ॥१५०९॥
स्निग्धोत्या मृष्टमांसादिभोगैस्तस्यामतस्तयोः । तस्मिन्नेवाह्नि मन्दत्वं विदेशौत्सुक्यमाययौ ॥१५१०॥ 1510
केनाप्यधिष्ठितश्चक्रे परेद्युर्यस्स सुस्सलः । जान विश्वसृजोप्यङ्गरोमाञ्चयति तत्स्मृतिः ॥१५११॥
जासटो नृपतिर्हर्षभूभर्तुर्मानृलात्मजः । उमाधरसुधाश्वान्ये राजानो यत्र च त्रयः ॥१५१२॥
राजपुत्रहयारोहतन्त्रिसामन्तसंततेः । न यत्र गणना काचित्सैन्येष्वष्टादशस्वभूत् ॥१५१३॥
विजयेशाङ्गनस्थानां द्वारमुत्पाट्य सोविशत् । एकाकीयेवान्तरं तेषां सासिरक्षेपरूक्षत्राक् ॥१५१४॥
स तत्र साक्षिणं कृत्वा क्षमावान्विजयेश्वरम् । प्रतिभुन्याभयं नेभ्यः प्रणतेभ्यो विनिर्ययौ ॥१५१५॥ 1515
पुनः सौधायमारूढस्तान्सर्वानर्पनायुधान् । रज्जुबद्धकरान्भृत्यैरानिनाय ततोन्तिकम् ॥१५१६॥
स्वर्णरूप्यत्सरुश्रेणिपूर्णायुधपरिष्कृता । कीर्णपुष्पोपकारेव सुस्सलास्थानमभूभुत ॥१५१७॥
विन्यस्य पशुपालानां पशूनिव स तान्करे । संरक्षितुं डामराणां व्यधं तत्राकरोत्स्थितिम् ॥१५१८॥
ततः सुवर्णसानूरग्रामं स प्राप्य बन्धनात् । पट्टदर्शनपालौ द्वावौज्झीद्देशान्तरोन्मुखौ ॥१५१९॥
पट्टः श्रुत्वापुरं प्राप्तो भार्ययागतया गृहात् । संसृष्टमानोप्यस्मार्षीदल्पसत्त्वो दिगन्तरम् ॥१५२०॥ 1520
यावन्मात्राप्यौचिती सा विदेशौन्मुख्यलक्षणा । द्वेग्युर्दर्शनपालस्य पट्टमैक्ष्या विसस्रिवा ॥१५२१॥
अहंपूर्विकया राज्यं जिघृक्षुरय सुस्सलः । नगरासादनादैच्छद्दभिसंधातुमग्रजम् ॥१५२२॥
समानप्रायवयसोः सर्वद्वेषामयोरभूत् । यस्माज्ज्येष्ठकनिष्ठत्वं प्रक्रियारहितं तयोः ॥१५२३॥
द्वित्रेष्वहःसु यातेषु क्रामंस्तां तां भुवं बली । उदतिष्ठद्राजधान्याः सन्निधावेव सुस्सलः ॥१५२४॥
निर्दग्धुं कलशां तत्प्रस्तुतं भूपतेः सुतः । बुप्पापराभिधो भोजदेवो योद्धुं विनिर्ययौ ॥१५२५॥ 1525
आत्मवच्छङ्कमानेन कुमाराणां प्रदुष्टताम् । यो भाव्यर्थबलात्पित्रा हतीजा विदधे सदा ॥१५२६॥
कृतो गत्यन्तराभावात्तदानीं तु निरङ्कुशः । केषु केषु न युद्धेषु योधानामग्रणीरभूत् ॥१५२७॥
प्रपितामहतुल्यः स स्याच्चेत्पागेव वर्धितः । कुर्यादुत्साहसंपन्नो निर्दायादा न किं दिशः ॥१५२८॥
नानीतिविज्ञाम कश्चित्प्रयोगस्तु विहीयते । अस्त्रविद्भ्यते सर्वो विषयज्ञस्तु दुर्लभः ॥१५२९॥

१५०२. [1]) Thus corr by A_1 from °भिनन्दराजो° —[2]) Thus corr by A_1 from चारमज १५१७. [1]) Emended, A °कृत्य°. १५२३ [1]) Emended with C, A वयसो. १५२५. [1]) Thus A_1, C कलशास्वं, doubtful.

स राजसूनुरुहामविक्रमस्य रिपोरभूत् । अत्युद्दामोधिकं जातस्तिमेरिव निर्मिगिलः ॥१५३०॥
कृतघ्नभावं पितरि प्रपन्ने विगर्हणां नार्हति तत्प्रसूतिः ।
कल्कीभवेच्चेत्तिलमुज्झ्यते किं तैलेन दत्तः कुसुमाधिवासः ॥१५३१॥
देवेश्वरात्मजः पित्थः पार्थिवेनाधिगौरवम् । वर्धितोप्यभजत्पापः प्रतिपक्षसमाश्रयम् ॥१५३२॥
ततस्तदात्मजो मिल्लः प्रस्थिते सुस्सलाह्वये । नृपेणार्थायमानोर्भं खेदात्सावज्ञमीक्षितः ॥१५३३॥
ज्ञास्यस्यथान्तरं राजन्ममेत्युक्त्वा विनिर्गतः । खड्गधाराजलैर्मानी म्लानिमक्षालयद्रणे ॥१५३४॥
सर्वनाशादभूद्दुःखं तथा न हृदि भूपतेः । तदन्तरापरिज्ञानात्कृतज्ञस्य यथाधिकम् ॥१५३५॥
विभवैर्नित्यसंमूढा जानते त्वन्तरं नृपाः । तदा शक्या यदा तेषां प्रलापैरेव सक्रिया ॥१५३६॥
भोजेन निर्जितानीको विद्रुतः सुस्सलो रणात् । लवणोत्सं पलाम्यागाद्विर्दीर्णगजगतागतः ॥१५३७॥
प्रत्यावृत्तस्ततो भोजस्तीव्रातपकदर्थितः । उद्यानान्तस्तनुं तल्पे पित्रा सह मुहूर्तकौ ॥१५३८॥
अथोत्तरेणोदतिष्ठद्वादः पाराशृपैकसः । ज्यावान्मज्ञात्मजः प्राप्तः सेतुराच्छिद्यतामिति ॥१५३९॥
सुस्सलेन हतं राज्यं नाद्यायासि द्रुतं यदि । स दण्डनायकेनाभूत्संदिष्ट इति पापिना ॥१५४०॥
अतो जवेन चाविक्षत्प्रथमं चावधीन्मृधे । नरेन्द्रेश्वरदेवाग्रवर्तिनं देवनायकम् ॥१५४१॥
अथोज्जगाम स्थामस्थः सह व्यूहेन सादिनाम् । नगराधिकृतो नागस्तस्यामाद्यूरिसैनिकः ॥१५४२॥
यत्रास्थां पार्थिवोबभ्रात्प्रधानपृतनान्विते । बभार नोच्चलाशङ्कां सुस्सलाह्वविनिर्गतः ॥१५४३॥
अल्पसैन्यो मज्ञसूनुर्यावत्तस्मादशङ्कत । अपनीतशिरस्त्राणस्तावत्स तमवन्दत ॥१५४४॥
मण्डलेश्वरवर्त्त स प्रियं शत्रोरविश्वसन् । ऊचे स्ववेश्म याहीति स च पापस्तथाकरोत् ॥१५४५॥
तस्य द्रोहफलं दृष्टमेतस्मिन्नेव जन्मनि । मण्डले यदनन्यस्मिन्भिक्षित्वा जीवितं जहौ ॥१५४६॥
ततो राजा सरित्तीरं प्राप्तः प्रैक्षत डामरान् । सेत्स्वमे दयामविकृतान्दावदग्धान्द्रुमानिव ॥१५४७॥
बलक्षवारबाणस्य तेषां मध्ये वपुर्बभौ । परं जनकचन्द्रस्य शुक्लस्येव तमोन्तरे ॥१५४८॥
महासेतुः स घटितो राज्ञा नौभिः स्वसिद्धये । पर्यवस्यन्विधेरशाच्छ्रूणां सिद्धये पुनः ॥१५४९॥
अथारुरुहुरादाय वह्निं हर्म्यचतुष्किकाम् । शतद्वारे मर्तुकामा देव्यः शाह्लिसुतादिकाः ॥१५५०॥
लोको विरक्तः सेत्स्वमे दायादैः सह संगरम् । ददर्शाश्वयुजीलागिमिव निर्विक्रियः प्रभोः ॥१५५१॥
त्रिनये सावशेषेसौ वह्निदानोद्यताः प्रियाः । अनिशं वारयन्राजा सेत्स्वमे रणममहीत् ॥१५५२॥
अथ विन्यस्तवर्माणं राजसेनागजं शरैः । सेतोर्जनकचन्द्राद्याः प्रमुखस्थमनाडयन् ॥१५५३॥
स विद्धो मर्मभिः शरैः पुष्कारोद्धारकृद्गजः । स्वचमूमेव चरणैरमृद्नाद्विमुखीकृतः ॥१५५४॥
विधिनेव विरुद्धेन सिन्धुरेण कदर्थिता । भ्रश्यत्पत्तिहयारोहा समपद्यत वाहिनी ॥१५५५॥
सेतुं तीर्णस्ततो वैरिसैनिकैर्विमुखीकृतः । शतद्वाराङ्गनं त्रस्तः साश्वारोहोविशन्नृपः ॥१५५६॥
उदात्तवेषरहितो रहोपि ददृशे न यः । भुञ्जानस्यापि यस्यास्यमुद्रा नैव व्यभाव्यत ॥१५५७॥

१५३० [1]) Emended with C, A जाता तिमेरिव. १५३१. [1]) Emended; A शङ्की[2], corr by later hand into शल्की°. Cf Bohtlingk, *Sanskrit Wörterbuch in kürzerer Fassung*, vi. 214 *b* १५५२. [1]) Emended, A सावशेषोसौ. १५५७ [1]) Emended; A 'वेशर'.

स भयद्विगुणार्कोष्णस्वेदप्रस्विन्नविग्रहः । पुनः पुनः क्षिप्यमाणस्तत्वर्मीसयोर्भिजैः ॥१५५८॥
अनवस्थितपार्ष्ण्यन्ताघातप्रचलितं हयम् । निरोद्धुं बहुशः कर्षन्नष्टवल्गामहं करम् ॥१५५९॥
खल्वाटशीर्षपर्यन्तलम्बिनीः कुन्तलच्छटाः । प्रापयञ्श्रवणोपान्तं करेण गलितासिना ॥१५६०॥ 1560
लङ्घयल्लम्बनिर्भुग्नभोत्रपालिलताच्छलात् । कालाहिनेव मूर्धेन वेष्टितोच्छ्वस्कन्धरः ॥१५६१॥
निस्ताम्बूलतयोच्छुष्को जतुपीताविवासकृत् । ओष्ठावुत्क्षिप्य कृच्छ्रेण विह्वलो जिह्वया लिहन् ॥१५६२॥
कनीनिकासत्करेणु क्षामधूसरमाननम् । उत्तानीकृत्य पृष्ठस्थाः पश्यन्दीनमनाः प्रियाः ॥१५६३॥
परिभ्रमन्नङ्गनान्तस्तस्तः स ददृशे जनैः । वह्निदानोद्यतास्ताथ वारयन्करसंज्ञया ॥१५६४॥
मल्लराजस्य वेश्माभूद्राजधान्यन्तिकेपि यत् । तीर्त्वा जनकचन्द्रेण तत्र वह्निरदीयत ॥१५६५॥ 1565
राजधान्युन्मुखं दृष्ट्वा ज्वलन्तं वह्निमागतम् । भेजे पलायनं भोजो राज्यं निश्चित्य हारितम् ॥१५६६॥
स भूतैर्विद्विषां भीमैर्नैर्ऋत इव तिरोहितम् । द्वारं भित्त्वा तुरंगस्थः प्राङ्मुखाभिर्ययौ बहिः ॥१५६७॥
पञ्चभैः सादिभिः सार्धं लोहरौन्मुख्यमाश्रितः । प्रतस्थे सेतुमुत्तीर्य सिंहराजमठाग्रगम् ॥१५६८॥
यातस्य दृक्पथात्सूनोः सासुरालोकयन्दिशम् । राजाश्ववारैः सहितो वेश्मनां बहिरभ्रमीत् ॥१५६९॥
अत्रान्तरे मर्तुकामास्त्रातुं काश्चिन्नृपाङ्गनाः । अश्वमभिस्तत्परिजनैरभज्यत चतुष्किका ॥१५७०॥ 1570
ज्ञाहिपुण्यस्तदज्ञात्वा शत्रवः पतिता इति । मत्वा चतुष्किकाभृङ्गे ततोभिमुदरीपयन् ॥१५७१॥
वास्तव्या डामराश्चाथ घ्नन्तोन्योन्यमुदायुधाः । ज्वलतः क्षमापतिगृहाद्भाण्डागाराद्यलुण्ठयन् ॥१५७२॥
केचित्तत्र वधं प्रापुर्विपदं केचनात्यजन् । अदृष्टवस्तुसंप्राप्तिः केषांचिद्डास्यदाभवत् ॥१५७३॥
सितेय शर्करेत्येकः कर्पूरं वदनेक्षिपत् । ततः सरिति तद्भाण्डं निर्दग्धवदनो व्यधात् ॥१५७४॥
पामरैः स्वर्णचित्राणि कैश्चित्स्वर्णमहेच्छया । विनिर्दग्धानि वासांसि विचिनं भस्म चादरात् ॥१५७५॥ 1575
अविद्धमौक्तिकस्तोमः सिततण्डुलविभ्रमात् । क्वचित्पामरनारीभिर्धरट्टेषु विचूर्णितः ॥१५७६॥
वसन्त्यदृश्ये देशेस्मिन्खलीकारेण नादृशा । एवं विडम्बिता लक्ष्मीर्न पुनः क्वाप्यदृश्यत ॥१५७७॥
विद्याधरीरिवोदात्तवेषाः क्षमापतिसुन्दरीः । हरन्तो डामराः क्रूरा ददृश्यन्ते स्म पदे पदे ॥१५७८॥
वसन्तलेखाप्रमुखाः सस्नुषास्तत्र चक्रिरे । निर्यातशेषाः स्वान्देहान्त्राज्यः सप्तदशाग्निसात् ॥१५७९॥
गृह्णां दह्यमानानामभूयत चटत्कृतिः । गाढोष्मकथमानाभ्रसिन्धुघोषप्रतीतिकृत् ॥१५८०॥ 1580
श्रीपद्मश्रीप्रपापार्श्वस्थितस्तद्वीक्ष्य पार्थिवः । आर्षं श्लोकमिमं शोकात्स्मृत्वापाठीत्पुनः पुनः ॥१५८१॥
प्रजापीडनसंतापात्समुद्भूतो हुताशनः । राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते ॥१५८२॥
दग्ध्वाथ राजधानीं तामुच्छलो डामरान्वितः । अत्यक्तसैन्यं वीक्ष्यारिं पारमेवातरत्पुनः ॥१५८३॥
ततो युद्धा मर्तुमिच्छन्निन्ये राजाकुलात्मनाम् । उद्यावचैर्मनिर्हैयैः पदातीनां क्षणे क्षणे ॥१५८४॥
गच्छन्ननन्तपालादिराजपुत्रधिया मृधम् । दण्डनायकवाक्येन न्यषिध्यत पदे पदे ॥१५८५॥ 1585
युध्यस्व लोहरं वापि याहीत्यूचे च चण्पकः । प्रयागस्योत्तरः पक्षः प्रत्यभाज्ञामिमः पुनः ॥१५८६॥

१५७१ ¹) Emended, A °स्तश ज्ञात्वा. १५७६. ²) Emended; A °स्नोमसित° १५७७. ³) Emended, A वसस्वदृश्ये. १५७८ ¹) Emended, A °वेषा. १५८०. ²) Emended, A °भूयन्त १५८६. ³) न wanting in A, supplied with R C.

वार्तामबुद्ध्वा पुत्रस्य नृपतिर्श्याकुलीभवत् । पदवीं भोजदेवस्य याहीत्याह स्म चण्पकम् ॥१५८७॥
प्रयागमात्रानुचरो राजन्संपत्स्यसे क्षणात् । तस्मान्मामपि मा त्याक्षीरित्यूचे तं स निःश्वसन् ॥१५८८॥
सोन्तर्बाष्पस्तं बभाषे निर्द्रोहोसीति कथ्यते । त्वय्याप्यस्मिन्क्षणे कस्मात्तस्मादुद्रुह्यते वचः ॥१५८९॥
विना पुत्रं न पश्यामि सार्केपि दिवसे दिशः । त्वं तस्मिन्नङ्गसंवृद्धे न मन्युं कर्तुमर्हसि ॥१५९०॥
अभ्राभमित्तं कलहस्तेष्वेव दिवसेष्वभूत् । मन्त्रिणो राजपुत्रेण तेन तस्यामिमानिना ॥१५९१॥
गिरा प्रभोरुपालब्धस्तदागूरणगर्भया । स लज्जानम्रवदनो राजपुत्रानुसार्यगात् ॥१५९२॥
पञ्चाशताश्वचारैः स भ्रातृभृत्यादिभिः समम् । उत्तीर्णः सरितः पारमात्मना पञ्चमोभवत् ॥१५९३॥
भ्रातुर्द्वयेश्वचारे च शेषाराजात्मजे पथि । हताश्वे पतिते सोभूद्भनकेनान्वितो भ्रमन् ॥१५९४॥
अनाप्तबन्धुराजस्नोर्वार्तां वा वर्त्मनाप्यटन् । गलितेहनि संप्राप वितस्तासिन्धुसंगमम् ॥१५९५॥
एवमाप्तान्परान्पुत्रमन्वेष्टुं प्राहिणोच्चृपः । अन्येपि तन्मिषं लब्ध्वा तस्य पार्श्वादवाचलन् ॥१५९६॥
उत्कोचादायिना क्रुद्धं राजपुर्यादिविग्रहे । योग्यानसहता भृत्यान्निःसारः कटकः कृतः ॥१५९७॥
लोहरपस्थितौ विघ्नं राज्ञा पुत्रस्य कारितः । प्रवेशितः पुरं वैरी राजन्यन्याहवाकुले ॥१५९८॥
सर्वस्वध्वंसिना येन स एव नृपतेरभूत् । तदाप्युचितकर्तव्यनिषेद्धा दण्डनायकः ॥१५९९॥ तिलकम्॥
राज्ञः कृत्स्नावसन्नस्य शृण्वतो बहुमन्त्रितम् । नैकत्र रूढिः कर्तव्ये काप्यधीरधियोभवत् ॥१६००॥
सर्वैर्यथा निखिलरन्ध्रमुखेन वंशः संपूरिता न खलु शब्दमपाकरोति ।
तैस्तैस्तथा बहुपथप्रचयेन मन्त्रः संकल्पितः किल न निश्चयमभ्युपैति ॥१६०१॥
भाग्यक्षयस्यैतदेव लक्षणं प्राकृतोपि यत् । अपृष्टः कथयेद्वाष्टचर्चान्मन्त्रं स्वहृदयोचितम् ॥१६०२॥
त्रैलोक्यनाथा सूतेन शंसता दण्डनायकम् । निरोध्य वल्गामित्यूचे भूयः क्ष्माभृद्रणोन्मुखः ॥१६०३॥
एकाद्वैः साश्वचारैः प्राग्जिगाय त्वंत्पितामहः । तद्गच्छामोक्षपटलोपान्तं तत्संग्रहेच्छया ॥१६०४॥
पदातिप्रायसैन्यांस्तान्विहन्मः संहतान्निपून् । पश्चान्निपत्य तैः सार्कं श्येना इव विहंगमान् ॥१६०५॥
ततश्चिलिपावेव राज्ञि तत्कटको दिशः । सवृष्ट्यम्बुहतो रङ्गप्रेक्षिलोक इवागमत् ॥१६०६॥
पारेवितस्तां प्राग्नेभ्यः पायेयायात्मजन्मनः । स शेषाराजजन्मभ्यो रत्नमेवेयकाद्यदात् ॥१६०७॥
आरामिकैस्तैः संप्राप्ते राजचिह्ने क्षणादिव । तेजःस्फारोमितो राजा गतश्रीर्दृष्टशेजनैः ॥१६०८॥
पदे पदे भ्रश्यमानसैन्योक्षपटलादिषु । स्थानेषु चाश्रमीत्कथित्र च तस्यापदन्तिकम् ॥१६०९॥
संश्रयार्थाय बभ्राम सार्यं वेदमनि मन्त्रिणाम् । प्रवेशं प्रददौ चास्य न कोपि द्वारि तस्थुषः ॥१६१०॥
प्रायोपवेशकुशलाः शक्तास्त्यक्तुं न कुत्रचित् । मिथ्यासंभावनाभूमिर्भूपानां ब्रह्मबन्धवः ॥१६११॥
ये केपि देशे सन्त्यस्मिंस्तत्रेहेच्छास्यया भ्रमन् । प्रविविक्षुर्गृहान्प्राप कपिलाख्यस्य मन्त्रिणः ॥१६१२॥
तस्मिन्लोहरकोट्टस्थे तत्पत्न्या स्थातुमर्थितः । नैमिश्च कोट्टं गन्तुं न प्राविक्षदेवमोदितः ॥१६१३॥

१५९४. [1]) Emended, A भ्रातृद्वारे —[2]) Thus A, cf. vii 1607. १५९७. [1]) Emended, A °त्रिमार. १५९८ [1]) Emended; A राजपुत्रस्य Cf vii 1453. १५९९. [1]) A, writes here ३ instead of तिलकम्. १६०४ [1]) Emended, A प्राग्जिगायन्तत्सिता° C °गाय तत्पिता' १६०७. [1]) A, शेषा — — राजन्भ्यो, ज subsequently supplied by A, or later hand but comp शेषा-राजात्मजे. vii 1594

आर्तस्य तस्य तत्पुत्रैः पितृद्रोहकारिभिः । ऋणिकैरुत्तमर्णस्य स्वं निःस्वैरिव गोपितः ॥१६१४॥
सदोषोस्मीति सोज्ञासीत्स्वयं भृण्वन्विगर्हणाम् । तदैव गोपिताशेषकृत्यो दुर्मन्त्रिभिः पुरा ॥१६१५॥ 1615
गृहीतसर्वनैराश्यः पार्श्वस्थेष्वप्यविश्वसन् । अभूत्प्रत्युप्तमुप्तीर्णो नितरां विरलानुगः ॥१६१६॥
प्रस्थापयन्तः संभूतिं षष्टिर्त्रिंशति कुंठपु ये । तेजस्विनो भास्वतोपि सहन्ते नोच्चकैः स्थितिम् ॥१६१७॥
नेष्यन्तेनन्तपालाद्या राजपुत्रास्तमत्यजन् । सान्द्रतां दधति ध्वान्ते स्थगिताश्वाः पदे पदे ॥१६१८॥
वाहनाज्जोहिलमठोपान्तं प्राप्यावतीर्णवान् । स दण्डनायकेनापि तत्यजे सानुजन्मना ॥१६१९॥
इहास्मच्छ्वशुरावासस्तत्र वस्तुमिमां निशम् । वीक्ष्य ते स्थानमेष्यामीत्युक्त्वा ध्यानेन सोचलत् ॥१६२०॥ 1620
यियासोरनुनं तस्य पाथेयार्थं प्रयागकः । ययाचेद्रवमस्मै स प्रादात्सक्तुत्र तत्पुनः ॥१६२१॥
एकाभुक्तावशेषश्रीस्ततो वा शेषजीवितः । प्रयागशेषानुचरो नृपतिः समपद्यत ॥१६२२॥
सूदश्चण्डकमृत्यस्य जलकाख्यस्य तत्क्षणम् । मुक्तो नामान्तिकं प्राप्तो नृपतेराप्तामगात् ॥१६२३॥
उलीपविहितैः खनैरपे दुःसंचरा क्षितिः । भ्राम्यतस्तानुवाचेति नारी काचिद्गुहान्तरात् ॥१६२४॥
ननस्तीरे वितस्तायाः निषण्णस्मिन्प्रयागकः । गन्तुं जयपुरं कोटमाजुहाव स नाविकान् ॥१६२५॥ 1625
स हि प्राग्विदधे चक्रे तत्रत्यैः सह शास्त्रिभिः । नृपं प्रेयाभयं नेतुं भीमादेवस्य मन्दिरम् ॥१६२६॥
उच्चलाश्रयिणाप्युचे भीमादेवेन येन सः । राज्ञोनुगो गमिष्यामि प्रविष्टस्योपवेशनम् ॥१६२७॥
नौचरैराप्तनावमारुरोह न भूपतिः । नाशोन्मुखः समासन्नदृष्टिपातभयाकुलः ॥१६२८॥
पर्यापतत्कालकरस्थभोगिसंदर्शनेनेव मनियदीपः ।
क्षिप्रं प्रशान्त्युन्मुखतामुपैति विनाशकालेषु शरीरभाजाम् ॥१६२९॥
तस्मिन्द्रोहसुभिक्षेपि यस्य मानवतः परम् । अनन्यालौकिकी दृष्टिर्भेजे कुलवधूव्रतम् ॥१६३०॥ 1630
नीलाश्रीयः स विम्बाख्यो डामरैर्मिलितोहिनैः ।
तदापि प्रययौ राज्ञो विस्मृति संश्रयार्थिनः ॥१६३१॥ युगलकम् ॥
ततः प्रावर्तत त्यक्तुं वारि वारिमुचां गणः । क्षमामिव क्षालयितुं द्रोहस्पर्शेन दूषिताम् ॥१६३२॥
भूनिर्जना वृष्टिपातस्तमिस्रा दुःसहायिता । वैरिभीतिरिति प्राभूत्किं किं तस्य न दुःखदम् ॥१६३३॥
इति वृत्तानुरोधेन भिन्नदुष्कर्मविधायिनाम् । अस्मर्तव्यमपि व्यक्तं नाम पाठिष्यतेधुना ॥१६३४॥
सोमानन्दाभिधानस्य पूज्याः सिद्धस्य देवताः । सोमेशश्चाभिधा सन्ति काश्चित्पितृवनान्तरे ॥१६३५॥ 1635
तद्गाङ्गिताङ्गना तुङ्गतरुपच्छन्नवाटिका । अभूदुणाभिधानस्य कुटी क्षुव्रतपस्विनः ॥१६३६॥
वारस्त्रिया स विरहभुजंगीतिप्रसिद्धया । भिक्षाख्यया समं भेजे चेष्टितं कुट्टिनोचितम् ॥१६३७॥
तस्य प्रतापगौरीशदेवागारान्तिकस्थितेः । कुटीं मुक्तेन तां निन्ये क्षमाभृद्भ्रस्तुं स तां क्षपाम् ॥१६३८॥
मुक्तमालम्ब्य नृपतिस्तमालम्ब्य प्रयागकः । यान्ति स्म विद्युद्द्योतेन क्षमां पश्यन्तोन्तरान्तरा ॥१६३९॥
निरुष्णीषोद्गसंस्पृतकूलवासाः स्खलद्भूपः । स ता प्रयागमुक्ताभ्यां कथंचित्यापितः कुटीम् ॥१६४०॥ 1640

१६१८ [1]) A_1 writes here ३ (instead of शून्यम्) १६१९.) Emended, A सोनुजन्मना Cf. vii 894. १६२०. [2]) Emended, A चिन्तम् १६२१. [1]) Emended with C, A त पुन १६२६ [1]) Emended, A भूमादेवस्य १६३१. [1]) Emended, A डामरामि° १६३३ [1]) Thus A. १६३५. [1]) Thus A_3, A_1 [2]वनान्तिके. १६३६ [1]) Thus A_3; A_1 अभूच्छिताभि°. १६३७. [1]) वारस्त्रिया supplied by A_3 in space left by A_1. १६३८. [1]) Emended, A शमम्

तदा कुमन्त्रिनिष्कृष्टं स व्यापद्वारणक्षमम् । शोचन्सस्मार कन्दर्पं रुद्रं दैत्यमिवोत्पलः ॥१६४१॥
प्राकारमूर्ध्नां मुक्तेन प्रविष्टेन हतार्गलाम् । नृपः कुटीपाङ्गनोर्वीं विवेशास्थिततापसाम् ॥१६४२॥
विशतोऽदृश्यक्षतः पादस्तस्यामृग्दक्षिणोत्थजत् । मेने तेनानिमित्तेन स मृत्युं समुपस्थितम् ॥१६४३॥
कुड्यामर्गलरुद्धायां निषण्णस्याङ्गने ययौ । रात्रिर्भीतिमतो भीमा तस्य घोराश्रमालिनी ॥१६४४॥
1645 पङ्क्तीपलिप्तः पङ्क्त्याङ्कस्थण्डिलस्थो निनाय ताम् । दासकम्बलिकाच्छन्नगात्रो वृष्टयुत्तरां निशम् ॥१६४५॥
विसस्मारान्तराङ्गःखमासीनप्रचलायितैः । निर्निद्रस्त्वभवच्छ्वभ्राङ्गरयन्निव समाकुलः ॥१६४६॥
कोहं केनाभिभूतोऽद्य क्व वर्ते कोनुगोधुना । किं कृत्यमिति निर्धाय मुहुर्मुहुरकम्पत ॥१६४७॥
हतं राज्यं प्रिया दग्धा भ्रष्टः सूनुरबान्धवः । जातोस्म्येकाकृत्यपाथेयो लुठन्भिक्षाभुजोङ्गने ॥१६४८॥
इत्यैकैक च निर्धाय दुःखं नैक्षिष्ट सोपरम् । प्राप्तावसादं शोचन्तमात्मतुल्यं कथास्वपि ॥१६४९॥ युग्मम् ॥
1650 भोजस्तु वाजिभिर्द्विरेवशिष्टैः समं व्रजन् । हस्तिकर्णान्तरं प्राप निर्गत्य नगरान्तरात् ॥१६५०॥
व्रजतस्तस्य धीरासीच्चियतं पञ्चभिर्दिनैः । पुनः संग्रामयां राज्यं यदीन्द्रोपि भवेद्रिपुः ॥१६५१॥
गर्भवास इव पौरुषे स्फुरन्निह न कर्म पुरुषश्चिकीर्षति ।
कर्मवायुरिव संप्रशान्हठान्मुहमेव कुरुते तु तं विधिः ॥१६५२॥
मातृभिर्दत्तपाथेयं भृत्यं नागेशनामभिधम् । प्रतीक्षमाणश्चक्रे स रङ्गवाटान्तरे स्थितिम् ॥१६५३॥
भृत्ये दैवगृहे तत्र निश्चब्धुत्वा तमागतम् । स निर्ययौ तेन तस्मिन्निःशङ्कं प्रहतं पुनः ॥१६५४॥
1655 तत्र प्रादुष्कृतद्रोहे क्षत्रधर्मादनिच्युतः । राजपुत्रः स यत्नेन तत्कस्याद्भुतावहम् ॥१६५५॥
स सिंह इव संहारं कृत्वा युधि विरोधिनाम् । अस्राङ्गरागलिप्ताङ्गो वीरश्यामामभूषयत् ॥१६५६॥
भ्रातास्य मातृलापत्यं विषेदे पद्माकाभिधः । खेलो लालितवच्चैव संख्येसंख्यपराक्रमः ॥१६५७॥
मठं सूर्यमतीदेव्याः शर्वर्यामु लोविशत् । भ्रातास्यस्य रणश्रान्तो लवणोन्मान्समासयत् ॥१६५८॥
हतं भोज भुवनेर्हर्षमात्रे स्थिते तयोः । मनस्युत्खातशूलेभिरेवैका पर्यशिष्यत ॥१६५९॥
1660 प्राग्रमप्राप्तराज्य तथापि प्रत्यभात्तयोः । प्रवासे विस्मृते राज्यसुखे लब्धे च कुत्रचित् ॥१६६०॥
प्राङ्गे कुतश्चिदानीतो मुक्तेनान्विष्य तापसः । प्रणम्य नृपति चक्रे स्वकुटीं तां निरर्गलाम् ॥१६६१॥
तां दंशमशकाकीर्णामासीर्णतृणविष्टराम् । कृताम्बुमेकां मुक्तेन नृपतिः प्राविशत्कुटीम् ॥१६६२॥
यद्विना बहुमानोमृच्छुतया भुभुजामपि । स भूभृच्चाटुकारित्व भीतो भिक्षाभुजोप्यगात् ॥१६६३॥
भिक्षाकार्योचित पात्रमनुद्यात्त त्रपावहम् । आलापाभ्यवहाराभ्यां तस्य शुश्रूषत विदधे ॥१६६४॥
1665 स भिक्षाकः प्रयागेन विक्रयायाधरांशुकम् । निजं दत्त्वा विसस्मर्ज विपणि भोज्यसिद्धये ॥१६६५॥
कटूक्तिः कटुवाग्येव परोक्षं भेदभीतिकृत । कृतापसो दैन्यहेतुर्नृपस्यार्तिर्थाप्यभूत् ॥१६६६॥
मध्याह्ने स्कन्धविन्यस्तभोज्यभाण्डकरण्डिका । तपस्विन्याप्यथानिन्ये तेन क्षुद्रतपस्विना ॥१६६७॥
भृत्यभिक्षाकयोः पूर्व स्त्रिया अप्यथ पार्थिवः । स्वं वीक्ष्य गोचरीभूतं निराशो जीवितेभवत् ॥१६६८॥

१६४४ 1) Emended with C, A °भीतिगतो. १६४५. 1) प्राङ्गे कुतश्चि, पस, चक्रे स्वकुटीं ता, supplied by A_3 in space left by A_1. १६५२. 1) Thus corr by A_2 from A_1 चापम्'--2) Emended, A मेषका°

तेन प्रयागोपहृतं भोज्यं तदनुरोधतः । स्पृष्टमेव न भुक्तं तु नीव्रदुःखेऽल्पणात्मना ॥१६६९॥
का वार्तेति प्रयागेन प्राङ्नर्त्थेन पृष्टया । तापस्या याम्यया व्यक्तमुक्तो भोजनवधस्ततः ॥१६७०॥ 1670
मिथ्यैतादिति तेनार्थं कथ्यमानोऽपि पार्थिवः । श्रुतिं तामङ्गशकुनं परीक्ष्यावुद्ध नान्यथा ॥१६७१॥
नारोहति गिरं शत्रोरप्रियाख्यायिनोऽपि यत् । तस्य संवृणे दुःखं निमग्नस्य तदापदि ॥१६७२॥
स शोचन्नात्मजं बाल्ये नीत्यै यां यन्त्रणां व्यधात् । भाजन्मदुःखदायित्वं मेने तस्यात्मनस्तया ॥१६७३॥
हतः स समरे वृत्त्या प्रवीरस्पृहणीयया । जज्ञे तेनातिवात्सल्याद्वृद्धशायीव घातितः ॥१६७४॥
गात्रेषु हारान्पुत्रस्य यौवनव्यूढवक्षसि । पश्यन्नात्मनि संकल्पैर्विह्वलः सोऽकृताशिषः ॥१६७५॥ 1675
रक्षणीयो हतो बालो वृद्धस्त्वेवं स्वजीवितम् । रक्षाम्यनुचिताचारैर्जिह्मयेति स चिन्तयन् ॥१६७६॥
एवं स पुत्रशोकेन धृतावाव्यव्यथो व्यथयन् । निनाय तापसावासे द्वितीयामपि यामिनीम् ॥१६७७॥
कृतार्थनः प्रयागेन प्रयातुं भगवन्मठम् । शोकहान्तिधी रात्रौ न संकल्पमपि व्यधात् ॥१६७८॥
लम्बेन्दुवदनेसान्द्रावश्यायाम्भोमुचीपणी । रथाङ्गाक्रन्दिनी रात्रिः सशोकेवाथ सागमत् ॥१६७९॥
क्षुत्पिपासापरिक्षामं प्रभुं वीक्ष्य स तापसः । प्रार्थयते स्म प्रयागेन प्रातर्भोक्तव्यसिद्धये ॥१६८०॥ 1680
उपनिन्ये विनिर्गत्य प्रविष्टस्तापसस्तयोः । सद्यश्चन्नान्नपूर्णे द्वे पात्रे -- क्षणात्पुरः ॥१६८१॥
कस्यापि गृहिणो यागोत्सवादेते मयाहृते । तस्मिन्नित्युक्तवत्यूचे विनिश्चत्य प्रयागकः ॥१६८२॥
राजन्स्वामिवियोगेस्मिन्पश्य लोकस्य सुस्थताम् । स तं जगाद विहसन्निकं मुढ इव भाषसे ॥१६८३॥
यो गतो गत एवासौ तत्कृत्या नापरः क्षतः । सर्वो निजसुखापेक्षी न किंचित्कोपि शोचति ॥१६८४॥
लोकैकचक्षुषि गते परलोकमर्के लोकः स्वपित्यखिल एव सुखं गृहेषु ।
कोन्यो विचिन्तयितुमर्हति विश्वमेतत्तिष्ठेन्मया विरहमेत्य कथं किलेति ॥१६८५॥ 1685
पुत्रस्य क्षेत्रविश्रामः पूर्वमास्ते क्षये भुवे । वयैकः प्रभवेन्नान्यस्तथा स्नेहोपि देहिनः ॥१६८६॥
अहमेव हत पुत्र श्रुत्वा जीवितजीवितम् । निष्क्रामि स्वस्थवद्यत्र तत्रान्यो निन्द्यतां कथम् ॥१६८७॥
इत्युक्त्वा विरते राज्ञि पुनर्गुरु प्रयागकः । प्रेरयत्तापसं भोज्यं कर्तुं ते भाजने त्वजन् ॥१६८८॥
ह्यस्तनव्ययशिष्टं मे पर्याप्तं नास्ति वेतनम् । यते तथापीत्युक्त्वा स सखेद इव निर्ययौ ॥१६८९॥
गोप्यं रङ्गस्यभणितमन्यत्पद्मदयातिथि । भ्रमन्तं पारतमिव नात्यसत्त्वैः सुदुर्जरम् ॥१६९०॥ 1690
कुत्सो मनोरथो नाम विप्रस्य वनवासिनः । सुदत्तपत्निवनस्तस्य तां कथामुपलभ्यवान् ॥१६९१॥
राज्ञः संदर्श दायादं भवावो भूतिभाजनम् । इत्युक्त्वा तेन निन्ये स ब्रोरभूतां क्षुद्रतापसः ॥१६९२॥
जज्ञे भूत्येन गर्वेण जातः सोन्येन केनचित् । सदृशं यत्सदसनोर्जापकं जन्मकर्मणोः ॥१६९३॥
इक्ष्वाकुजस्तां प्रवृत्तिं बुद्ध्वा ताभ्यां न्यवेदयत् । उच्चलाय समादिक्षत्कार्ये तत्र तमेव सः ॥१६९४॥

१६७१ [1]) Emended ; A नेनाप १६७३ [1]) स्वतो supplied by A_3 in space left by A_1 १६७६ [2]) Thus corr by A_3 from A_1 हुवा [3]) रक्षाम्यनु and ताचारै supplied by A_3 in space left by A_1 १६७९ [1]) Thus corr, by later hand from A_1 °वदना — [2]) Emended with C ; A °इयायांम्भो° १६८१ [1]) Two *aksharas* wanting in fourth *pâda*, the *lacuna* not marked in A ; C नक्षीक्षणात्पुर. १६८६ [1]) Thus A_1, A_3 पूर्वमास्तये १६८८ [1]) प्रेरयत्तापस supplied by A_3 in space lef by A_1 १६९२ [1]) Emended ; A क्षेत्रभूतां.

केनचित्तु भूनिभिश्चाख्यमिह्याराजोपसर्पणे । कार्यस्थं कारणं प्राहुस्तयोस्तापसविप्रयोः ॥१६९५॥
वार्ता चेदवगीतेयं सुबहुश्रोत्रसकुले । काले तद्भृत्यपाशस्य तस्यैव द्रोहमुख्यता ॥१६९६॥
श्वपाकस्कन्धमारूढो लब्ध्वा तास्ता विमाननाः । त्रिपेदे यत्स कारायां युक्तं तत्तस्य कर्मणः ॥१६९७॥
क्षुत्तप्तो हर्षदेवस्तु प्रयागेनार्थितोसकृत् । प्रत्यये पुत्रशोकेपि भोजनायाकरोन्मनः ॥१६९८॥
गृहीतभोजनं जानन्प्राप्तं प्राप्तं स तापसम् । तमोरेर्बहिरैक्षिष्ट नीडाच्छिशुरिवाण्डजः ॥१६९९॥
अपश्यंश्च कुटीं कृत्स्नां वेष्टितामेत्य शस्त्रिभिः । शुभाव चाङ्गनद्वारार्याणार्गलाङ्गुलिम् ॥१७००॥
जानन्ज्ञातं ततो द्रोहमङ्गनात्तापसाधमम् । सशस्त्रिणं मुक्तसंहतीत्याह्वयन्तं व्यलोकयत् ॥१७०१॥
मुक्तं विसृज्य कृत्वा च द्वारमुद्घाटितारिरि । त्यक्तभीरादधे लब्धीं क्षुरिकामन्तिकस्थिताम् ॥१७०२॥
एकस्तत्सप्तविंशं क्रूरः साहसावक्रियोन्मदः । आरुरोहाथ कृष्णालिधेनुः कवचितो भटः ॥१७०३॥
तं राजा संकटकुटीरुद्वायामोप्यपातयत् । क्षितौ व्यायामकुशलो नावधीत्कृपया पुनः ॥१७०४॥
पतितेन हतेनार्थो वराकेणामुना न मे । हत्त्वा चे दुरहंकारपस्तस्मिन्नपि क्षणे ॥१७०५॥
नीध्रमुत्पाद्य निपतन्नेकोन्योप्युत्पतन्भटः । भयाद्भूमौ न्यपतां तं विलोक्योद्यतायुधम् ॥१७०६॥
पृष्ठे पूर्वं प्रविष्टस्य निष्ठस्थानकनिष्ठुरः । स रुरोरिव चामृष्ठा रेजे दण्डाकृतिः क्षणम् ॥१७०७॥
न सिंहनादैर्नो भेरीतूर्यघोषैर्न वोन्मदैः । शस्त्रशब्दैः स शुशुभे भूपस्यान्तक्षणे रणः ॥१७०८॥
आस्खोर्भाण्डपवेशस्य बिडाला इव डामराः । परं प्रवेशितास्तस्य निःशब्दं शस्त्रिणः कुटीम् ॥१७०९॥
अथान्यो नीध्रमार्गेण संप्रविष्टः प्रयागकम् । हत्त्वा दोष्णि च शीर्षे च राजानं समुपाद्रवत् ॥१७१०॥
राज्ञः प्रहरतः शस्त्रं वञ्चयित्वा स शस्त्रभृत् । वक्षसि क्षुरिकाघातद्वयं प्रादात्कृतत्वरः ॥१७११॥
वर्णान्मेहेश्वरस्येवानिरुद्धा गतजीवितः । पपात निहतो भूमौ छिन्नमूल इव द्रुमः ॥१७१२॥
पलाय्य संप्रविशतो योग्यश्चौरस्य यादृशः । चक्रवर्त्यपि स प्राप वधं वेश्मनि तादृशम् ॥१७१३॥
नान्यः स इव कालेस्मिन्ददृशे भूतिमानृपः । गर्ह्यनिर्हरणत्वं च तस्येवान्यस्य नेक्षितम् ॥१७१४॥
यद्वैकेनैव संग्रामवैमुख्येनोन्नतात्मनः । सर्वप्रकारसुभगं माहात्म्यं तस्य खण्डितम् ॥१७१५॥
नेयबुद्धित्यमेवामीदथ वा तस्य दूषणम् । सर्वक्लेशावहा दोषाः कृत्स्नास्तन्मन्त्रिणां पुनः ॥१७१६॥
द्वाचत्वारिंशतिः षष्टमासा यस्य वयःसमाः । स शुक्लभाद्रपञ्चम्यां हतोब्दे सप्तसप्तते ॥१७१७॥
राजा दुर्योधन इव स्ववंशच्छेदमिच्छता । सोभूज्ज्ञातकयोगेन कारितः स्वकुलक्षयम् ॥१७१८॥
तस्यामन्दर्क्षमार्कजौ जीववुधौ शक्रेज्यगुं शशी । तनयामित्रजामित्रखेषु कर्कटजन्मनः ॥१७१९॥

१६९९ [1]) Emended, A भूनिश्चा° Cf viii 94 १७०४ [1]) Emended, A संकटी कु°. १७०७ [1]) Emended with C, A प्रविष्ट १७१७. [1]) Emended; A द्वाचत्वारिंशत. १७१९. [1]) Emended, A तस्यासी क्ष्मा°.—[2]) Emended with C; A °ल्नगी —[1]) A, explains this verse by the following *janmachakra*



चन्द्रदैत्येज्यपापेषु खमदात्मजगेषु यत् । आहुः सुसंहिताकाराः कौरवादीन्कुलान्तकान् ॥१७२०॥ 1720
निर्व्रह्मण्यो जनः कृत्स्नो देशेऽस्मिन्वैरिणोन्तिकम् । दस्योरिव शिरश्छित्वा स्वामिनोपि निनाय तत् ॥१७२१॥
तस्योत्तमाङ्गे भुवर्तुश्छिद्यमाने ससागरा । चकम्पे भूर्नरश्रापि द्यौर्वृष्टिं महतीं जहौ ॥१७२२॥
तन्मुण्डे लगुडारूढे यदयुक्तं जनो व्यधात् । अभुक्तेनाभिशापेन सोपे दीर्घोपसर्गभाक् ॥१७२३॥
मण्डले देवबिम्बानां यथामुष्मिन्विपाटनम् । तथा नवं प्रववृते भूपतेर्मुण्डखण्डनम् ॥१७२४॥
नैक्षिष्ट नश्चिरः प्राग्रमौचित्यादुच्चलो नृपः । भुक्त्वा चिरमुदस्रुस्तु कारयामास वह्निसात् ॥१७२५॥ 1725
धिक्कष्टं तस्करस्येव तादृशश्चक्रवर्तिनः । नोच्चलाज्ञां विना प्राप्ता शरीरेणान्तसत्क्रिया ॥१७२६॥
भृत्यत्यक्तो नष्टवंशो गौरकाख्येन केनचित् । स काष्ठागारिणा चक्रे नग्नोनाथ इवाग्निसात् ॥१७२७॥
दीर्घो हर्षनृपोदन्तः सोयं कोप्यद्भुतावहः । रामायणस्य नियतं प्रकारो भारतस्य वा ॥१७२८॥
भाग्याम्बुवाहनडितस्तरलाः श्रियस्तास्तद्यावसानविरसं प्रसभोज्झतत्वम् ।
तत्रापि नैष वत मोहहताशयानां शान्तिं प्रयाति विभवानुभवाभिमानः ॥१७२९॥
तावत्यप्यवरोधिकापरिकरे नैकापि चक्रन्द तं तावत्स्वप्यनुगेषु नानुसृतवान्कोप्यास्त तीर्थे न वा ।
लोकस्य स्वसुखोपलिप्समनसो वीक्ष्येति निःस्नेहता निर्वेदं समुपेत्य नाभ्यति धिक्स्वान्तं वनान्ते रतिम् ॥१७३०॥ 1730
नादौ किंचिद्भवति नियतं यच्च पश्चान्न किंचिन्मध्येकस्मात्सपदि घटयन्सौस्थ्यदौस्थ्यानुरोधम् ।
निःशीर्षाङ्गिनट इव मुहुः कोपि जन्तुर्नटित्वा नो जानीमो भवजवनिकान्तर्हितः क्व प्रयाति ॥१७३१॥
श्रीः सानवाहनकुलेकृत क्रान्तिराजवंशे त्यजन्त्युदयराजकुले प्रतिष्ठाम् ।
भृङ्गं सुरैर्विरहितं जहती हिमाद्रेर्दिव्ये तटे सुरगिरेरिव वासरश्रीः ॥१७३२॥

इति काश्मीरिकमहामात्यचम्पकप्रभुसूनोः कल्हणस्य कवेः कृतौ राजतरङ्गिण्यां सप्तमस्तरङ्गः ॥
समाप्तानवनावस्यां ह्यहोनायां महीभुजः । षडत्रोदयराजस्य वंशे जाताः प्रकीर्तिताः ॥
राजानः ६ श्लोकाः १७३३ ॥

१७२०. [1]) A_2 gloss शु. १७३२. [2]) Emended, A श्रीसान°.—[3]) Emended, A कान्तराज°. Cf. vii. 1285. *Colophon.* Thus A_1, perhaps for १७३२. A_1 adds here लिखितश्चैष मया राजानकरत्नकण्ठेन.

*

॥ अष्टमस्तरङ्गः ॥

ॐ नमो विघ्नहर्त्रे ।

प्रौढाः कञ्चुकिनो जरद्वरवृषः कुञ्जस्तुषारद्युतिर्मित्र्याप्रोपि बहिष्कृतः परिकरः सोयं समस्तोप्यहो ।
अर्धाच्छ्वसनीकृताङ्गगवता चारित्रचर्याविदा सा भिक्षांहुरितं चराचरगुरोरन्तःपुरं पार्वती ॥१॥
उच्चकोपप्रसादोभूत्कंचित्स्कालं नत्रो नृपः । प्राङ्मन्थादिव पाथोधिरव्यञ्जितविषामृतः ॥२॥
सोदरो डामरौधश्च तस्याभूतां भृशोन्मदौ । मेघस्येव पुरो वातावपहौ स्फूर्तिहारिणौ ॥३॥
यत्किंचनविधाव्यासीद्वाता यद्यौवनोन्मदः । राज्ञो दुष्प्रक्रिया दौःस्थ्यकरी वात्सल्यशालिनः ॥४॥
सोनिशं हि गजारूढो विकोशासिः परिभ्रमन् । आत्तसारां महीं पीतरसां रविरिवाकरोत् ॥५॥
एकीभूतानमून्सर्वाण्डामरान्निर्दहाग्निना । इत्युक्तं तेन नोर्वीभृत्सचस्वैकाग्रो वचोयहीत् ॥६॥
दस्यवो मन्त्रिसामन्ता हैराज्येच्छुः सहोदरः । भूर्नैष्कोशेत्यभूत्किं न भूपतेस्तस्य संकटम् ॥७॥
अधिराज्याभिषेकेण सत्कृत्य भ्रातरं ततः । पातुं लोहरसंबन्धं प्राहिणोन्मण्डलान्तरम् ॥८॥
द्विरदायुधपत्त्यश्वकोशामात्यादि स व्रजन् । निनाय सर्वं वात्सल्यादनिषिद्धोयजन्मना ॥९॥
आशङ्क्य कोष्टभृत्येभ्यः प्रवेशे प्रत्यवस्थितिम् । उत्कर्षजं प्रतापाख्यं सह निन्येन्ववीच तान् ॥१०॥
कुर्याममुं नृपमहं प्रातिहार्ये समाचरन् । नम्राः स्वभृत्यवत्तस्थुर्भुजो भूम्यनन्तराः ॥११॥
दिनानि सप्त संरुद्धे मार्गे तदनुयायिनाम् । गायनः कनकोऽलब्धान्तरो देशान्तरं ययौ ॥१२॥
वाराणस्यां विजहता निर्वेदात्तेन जीवितम् । हर्षभूभर्तृभृत्येषु व्यक्तं निन्ये कृतज्ञता ॥१३॥
ऊर्ध्वाधिरोहं दाक्षिण्याद्दस्यूनामुच्चलः पुनः । सेवास्मृत्या सुधीः सेहे चन्दनो भोगिनामिव ॥१४॥
तथा जनकचन्द्रेण दर्पाध्यवहनं तदा । राजान्ये डामराश्चासन्यथा नष्टप्रभा इव ॥१५॥
अभयस्योरशाभर्तुस्तनयायामजीजनत् । राज्यां त्रिभवमत्यां यं भोजो हर्षनृपात्मजः ॥१६॥
जात मृतद्विषिपुत्रानन्तरं गुरुभिः शिशुम् । भायुष्कामैस्तमाबद्धाभव्यभिक्षाचराभिधम् ॥१७॥
व्यब्दमप्यरिसंतानतन्तुत्वेनाप्रियोचितम् । ररक्ष तद्विरा राजा राज्याश्वाङ्के समार्पयत् ॥१८॥ तिलकम् ॥
तमादाय स्वयं वासौ यावद्राज्येकरोन्मनः । तावद्भारोद्वितज्ञो नीतिकौटिल्यमुच्चलः ॥१९॥
तुल्योत्साहासहिष्णुत्वादस्मै कुप्यन्तु डामराः । एष एवातिसत्कारायद्वास्तु विशदाशयः ॥२०॥
इति संचिन्त्य स द्वारदिस्सां तस्योदघोषयत् । यथा विकारं प्रययुर्भीमांदेवादयोखिलाः ॥२१॥

---

१ [1]) Thus A_1, A_2 भिन्याहु° २ [1]) Emended, A °भूरिकंचित्स्कालं. ५. [1]) कोशासि supplied by A, in space left by A_1 १७. [1]) Emended with C A सूनं. १८ [1]) Emended with C; A समर्पयत.

तेषां तस्य च मात्सर्यं यदा पर्याप्तिमाययौ । तदान्योन्याभिता भृत्याः पणं चक्रुर्युयुत्सवः ॥२२॥
दिदृक्षुः क्ष्मापतिस्तेषां सेतुपृष्ठे रणं मिथः । वार्यमाणोऽपि सचिवैरारुरोह चतुष्किकाम् ॥२३॥
द्वन्द्वयुद्धे प्रवृत्ते तु डामरैरुभयाश्रितैः । अथ प्रारभ्यताक्रम्यात्संरब्धैर्वीरणो रणः ॥२४॥
सेतुद्वयाध्वना युद्धे लग्ने **राशि** सरित्तटात् । योधा **जनकचन्द्रस्य** शरवर्षमवाकिरन् ॥२५॥ 25
वान्तः शराः ससीत्कारास्ते स्पृष्टनृपविग्रहाः । मर्माः स्तम्भेष्ववृद्दयन्त कोपेनेव प्रकम्पिनः ॥२६॥
आकृष्य दोर्भ्यां भूपालं बलादिव ततोनुगाः । प्रविष्टा मण्डपद्वारं चक्रिरे **निर्हितार्गलम्** ॥२७॥
शस्त्रं **जनकचन्द्राया भीमादेवादयोपि ते** । चतुष्किकायां चक्रुस्ततोन्योन्यं जिघांसवः ॥२८॥
तुमुले तत्र **शस्त्राग्नं भीमादेवानुगोभिनत्** । तीक्ष्णो **जनकचन्द्रस्य कालपाशात्मजोर्जुनः** ॥२९॥
स वीक्ष्य स्वं क्षतं द्रोहं प्रयुक्तं भूभुजा विदन् । पादप्रहारान्विदधे क्रोधाद्वारि नृपैकसः ॥३०॥ 30
अभग्ने तत्र संत्रासात्स्नानद्रोण्यन्तरं गतम् । अधावत्कृटशस्त्रीको भीमादेवो जिघांसया ॥३१॥
स्तम्भच्छत्रस्तद्विलोक्य तद्रेहगणनापतिः । मध्यं **जनकचन्द्रस्य** कृपाणेन द्विधा व्यधात् ॥३२॥
तस्मिन्हते **तदनुजौ गग्गसज्ञौ** प्रधावितौ । स एव करवालेनालक्षितोकृत **विक्षतौ** ॥३३॥
अवभज्य तरुं यज्ञः सुचिरं नात्रतिष्ठते । उदयकर्मा च पुमान्निहत्यात्युन्नतं **रिपुम** ॥३४॥
स हि द्विभाद्रे तत्राब्दे हर्यान्ताह्वादनन्तरम् । अन्यूनानतिरिक्तैर्यत्रिभिः **पक्षैरहन्यत** ॥३५॥ 35
यद्रोपकर्तुरप्येष द्रोहं यत्स्वामिनो व्यधात् । औत्कट्यात्पाप्मनस्तस्य क्षिप्रमेव क्षयं ययौ ॥३६॥
सान्तस्तोषे कोपशोकावाविष्कुर्वति कृत्रिमौ । **भीमादेवः** पलायिष्ट **गग्गास्तु** व्यथशंसीन्नृपे ॥३७॥
प्रहिते लोहदं गग्गं स्वमुल्लाघयितुं क्षतम् । त्रस्तास्तेन व्यसृज्यन्त स्त्रोवीरन्येपि डामराः ॥३८॥
उपायापकृतैः प्राप्यं राज्यं दस्युभिरुज्झितम् । एवं शनैरवष्टम्भं मेने भूपतिरुच्चलः ॥३९॥
तेनाथ लब्धस्थैर्येण दिनैरेव जिगीषुणा । त्याजिताः क्रमराज्यान्तर्डयसैन्यादि डामराः ॥४०॥ 40
ततो मडवराज्यं स प्रस्थितो त्रिप्रियप्रियान् । डामरान्कालियमुखान्बद्ध्वा शूले व्यपादयत् ॥४१॥
इल्लाराजोपि बलवांस्तेन क्रान्तक्षितिः क्रमात् । बलैर्नगर एवोरुवस्कन्देन घातितः ॥४२॥
प्राग्जन्मप्रेमसंस्काराद्वन्तरज्ञतयाथ वा । तस्य पुत्र इव प्रीतिर्गग्ग एव व्यवर्धत ॥४३॥
न स्नेहे नाममात्रं यः कण्टकानां प्रियप्रनः । नृपो गग्गाय चुकोध सापराधाय न क्वचित् ॥४४॥
राज्यारम्भेनुयुक्तेन भीमादेवेन धीमता । उक्ते शुभावहे शिक्षे द्वे स मन्त्रवरस्मरत् ॥४५॥ 45
एकया लोकवार्तार्थं प्राक्तात्पभृति निर्गतः । बहिरुद्दिश्य वाशालीरचारीदादिनक्षयम् ॥४६॥
अन्ययेत्थानर्शालेन भुक्त्वा नामापि वैरिणः । अर्धरात्रेपि यात्राभिस्तेनाच्छिद्यत विव्रतः ॥४७॥
तस्यैवानुग्रपैर्यस्य राज्ञां मध्ये[1] मनस्विनः । कार्पण्योपहतं वृत्तं नाप्यर्थभूरमलीमसम् ॥४८॥
अथोच्चलसदाचारजाह्नवीजलमज्जनात् । कुनृपोदीरणोद्भूतो गिरः पाप्मापनेष्यते ॥४९॥
तेनानुपचिताद्रेन प्रायशो विनिवारिताः । भनृरुणेव सृष्टिध्वंसिनो ध्वान्तसंचयाः ॥५०॥ 50

---

२६ [1]) स्पृ supplied by A_1 in space left by A_1 २७. [1]) Emended, A निहता°. ३९. [1]) Emended, A ग्रामराज्य. ४४ [1]) Emended, A सापराध न क्वचित्. ४७. [1]) Thus A_1, corr by later hand into अन्यायो° ४८ [1]) तस्यैवानुग्रपैर्वैस्य राज्ञा मध्ये supplied by A_2 in space left by A_1.—[2]) Thus A_2; A_1 कार्मेणापहत.—[1]) Thus A_2; A_1 नाप्यनुद्°.

प्रायोपविष्टप्रमथे देहत्यागप्रतिज्ञया । निबद्धया प्रत्यवेक्षां धर्माध्यक्षानकारयत् ॥५१॥
निशम्य कृपणस्यार्तं क्रन्दितं तदनिष्टकृत् । बभूव तस्य स्वात्मापि नानिमाल्लो महात्मनः ॥५२॥
कार्यिणो यस्य वा दोषादार्ताक्रन्दितमुच्चयौ । तस्य स्वबान्धवाक्रन्दैस्तस्मिन्क्रुद्धे शशाम तत् ॥५३॥
अबलानुपहत्यापे तस्मिन्राजनि सर्वतः । वास्तव्या बलिनस्तस्थुरबलास्त्वधिकारिणः ॥५४॥
सोऽथैनैकश्वरत्राजेत्यज्ञात्वा कथितं जनैः । यं यं स्वदोषमश्रौषीत्तं त्वरितमत्यजत् ॥५५॥
येन केनापि संप्राप्तः प्राप्युपायेन पार्थिवः । अमोघदर्शनः सोभूत्कल्पवृक्ष इवार्थिनाम् ॥५६॥
सुधावर्षी प्रियालापप्रीतिदायैर्जनप्रियः । नाशकत्सेवकास्त्यक्तुं विश्रम्भभवनेष्वपि ॥५७॥
श्राव्यश्रमैः प्रतिकलं तस्य सेवाविधायिभिः । प्राप्तं त्रिचतुरान्वारान्क्षणदास्वपि दर्शनम् ॥५८॥
सेव्यमानः सदाक्षिण्यः क्षणेनैव फलप्रदः । कस्यैन्द्रजालिकैरुक्तः शाखीव न बभूव सः ॥५९॥
वास्तव्यानां निशम्यार्तिं तेन दैन्यनिवारणम् । चक्रे पित्रेव पुत्राणां संत्यक्तेतरकर्मणा ॥६०॥
स्वसंचितानि सोन्नानि विक्रीणानोल्पवेतनैः । दुर्भिक्षमुद्रतावेव जघान जनवत्सलः ॥६१॥
निवार्य चौर्याचरणात्कृपार्द्रस्तस्करानपि । कोशाध्यक्षान्स विदधद्यकारागर्ग्यनीविकान् ॥६२॥
कः संविभाग्यश्छेत्तव्या विपदः कस्य मण्डले । इत्यन्विष्यन्सदैकैकं चारैश्चिन्तापरोभवत् ॥६३॥
तस्यैकोप्यर्थनैस्पृह्यं नाम कोपि महान्गुणः । अनुपक्तो गुणैस्तैस्तै राज्ञः पक्षवितोभवत् ॥६४॥
स स्थित्यै दण्डयन्दण्डद्यानाश्लेषभयाद्धनम् । तेषां नादत्त सत्कर्म शुद्धये तांस्त्वकारयत् ॥६५॥
प्रस्तुतस्यार्थिने दातुं वस्तु तस्यैकसंख्यया । सहस्रसंख्यया दानश्रद्धागात्पूर्णतां यदि ॥६६॥
भूयनेर्थी यथा मह्यं देहि देहीति गां वदन् । तथास्मै देहि देहीति वदन्दाता स शुशुभे ॥६७॥
अनुदात्त क्षिप्रकालं क्षीणसंख्यमसत्कृतम् । नेतृदृतादिनीतार्थं न तद्दत्तमदूषयत् ॥६८॥
उत्सवे दैन्यविज्ञप्तौ रञ्जने कार्यसाधने । आलेख्यलीनशाखीव न सोलभ्यफलोभवत् ॥६९॥
उत्सवे शिवरात्र्यादौ जनतां सोसिचद्धनैः । यहयोगे पयःपूरैर्मेहेन्द्र इव मेदिनीम् ॥७०॥
ताम्बूलदानव्यसनं परार्ध्योत्सवता तथा । नाभूद्धर्षनृपस्यापि तादृक्तस्यास्त यादृशी ॥७१॥
लोष्टमात्रावशेषेपि लब्धे नृपपदे व्यधात् । स दानविभ्रमांस्तान्ये धनदेनापि दुष्कराः ॥७२॥
निर्माणलोडनैर्धाम्नामजस्रं वाजिनां क्रयैः । काश्मीरिकोपि चक्रे स न मृत्स्करसाद्धनम् ॥७३॥
भव्यन्यञ्चनि योगेन प्राणविन्यासनैस्तथा । बभूव सर्वकृत्यज्ञः सोन्तरात्मेव देहिनाम् ॥७४॥
भोगाद्यानोचितान्विप्रा भैषज्यं व्याधिपीडिताः । वेतनं वृत्तिहीनाश्च तस्मात्समुपलेभिरे ॥७५॥
पित्र्योपरागकेत्वादिदुर्निमित्तोपशान्तिषु । गोसहस्राभ्रहेमादिसंभवैः सोभजद्द्विजान् ॥७६॥
नन्दिक्षेत्रं पुरं कृत्स्नं दग्धमुत्पातवह्निना । पूर्वाधिकगुणं तेन नवं राज्ये व्यधीयत ॥७७॥
श्रीचक्रधरयोगेशस्वयंभूस्थानयोजनम् । जीर्णोद्धृतिव्यसनिना कृतं तेन सुकर्मणा ॥७८॥
हर्षदेवेन यो निन्ये श्रीपरीहासकेशवः । परिहासपुरे तं स नवं नरपतिर्व्यधात् ॥७९॥

---

५३ [1]) Emended, A °वादार्ता°, C °वाद्दत्ता° ५७ [1]) A विस्रम्भ° ७१. [1]) Thus A_1, A_2 °स्यास्तु. ७२ [1]) Emended, A °विभ्रमान्ये. ७३ [1]) Emended, A काश्मीरकोपि. ७६ [1]) Emended, A °पमातिषु.

प्रारब्धेनेतरुकावल्या भूषितो हर्षनीतया । तेन त्रिभुवनस्वामी निर्लेभेन महीभुजा ॥८०॥ 80
जयापीडाहतं हर्षोत्पाटने प्रहसन्निव । सिंहासनं नवं चक्रे स राज्यककुदं नृपः ॥८१॥
लब्ध्वा तदर्थाधारोऽहं भर्तुः प्रेम्णातिदुर्लभम् । सामान्ययापि देवीत्वं जयमन्त्री न दूषितम् ॥८२॥
सा त्वानृशंस्यमार्यत्यागसत्क्रियतानयैः । अस्तम्भार्तपरित्राणमुख्यैर्भेद्यैरभवद्गुणैः ॥८३॥
लब्धभूपालबालेभ्या नार्यः क्रोधात्यजासु यत् । राक्षस्य इव भद्राय लावण्यललिता अपि ॥८४॥
प्रियप्रतस्यायमन्यो गुणः सर्वगुणामणीः । उच्चलक्ष्मापतेरासीदर्थेनैस्पृहशालिनः ॥८५॥ 85
निर्वासव. पापकामाः परस्वादायिनश्च ना· । रक्षांस्यधिकृता नाम नेभ्यो रक्षेदिमाः प्रजाः ॥८६॥
नेनेतिहासिनीं नीतिं अहृद्यानेन सर्वदा । येन संपदता श्रीकं कायस्थेनमूलनं कृतम् ॥८७॥
यत्ते विपणिकाभूलसंन्यासेभ्यः किलेतरे । प्रत्यूषाभुक्तारिणो विश्वं प्रजारोगा नियोगिनः ॥८८॥
पितरं कर्कटो हन्ति मातरं हन्ति पुत्तिका । हन्ति सर्वं तु कायस्थः कृतघ्नः प्राग्भवेभवः ॥८९॥
गुणान्समर्घ्य स्फुरता येनैवोत्थाप्यते शठः । वेताल इव कायस्थस्तमेवाहन्ति हेलया ॥९०॥ 90
विषवृक्षो निर्योगो च यदेवाश्रित्य वर्धते । नित्यं करोति तस्यैव स्थानस्यानिष्टमग्रयताम् ॥९१॥
तेन ते क्ष्माभुता मानक्षतिकार्यनिवारणैः । कारापेक्षैश्च खलाः शमं नीताः पदे पदे ॥९२॥
कार्याच्चिरार्य बहुशः संज्ञलाद्यान्महत्तमान् । भद्रासुतमय वासः कारायां पर्यधापयत ॥९३॥
स कायस्थेन हास्याय सभार्यं चारणोचितम् । अकारयद्भुतांभश्च धावनं डोम्बयोधवत् ॥९४॥
स पार्श्वपरिवेष्टितश्मश्रुदध्नोलोमकलम्पुनः । भ्रुकुटहस्तः सजानुरु कृपामासीच्च हास्यकृत् ॥९५॥ 95
स शीर्षदर्शनं साम्यवादवैदग्ध्यान्वितम् । प्रियवेदस्य कस्यचिद्ये नृत्तवाद्यमकारयत् ॥९६॥
बद्धान्यं शकटे नग्नं क्षुरकुनार्धमस्तकम् । अकारयत्सटान्यस्तचीनपिष्टच्छटाङ्कितम् ॥९७॥
ते कुम्भवादनैर्मुण्डमण्डनैश्चाङ्कितामिधाः । नियोगिनो भ्रमन्तश्च सर्वतः ख्यातिमाययुः ॥९८॥
कार्यभ्रष्टा मलक्लिन्नक्षीणवस्त्रावगुण्ठनाः । सर्वार्थिनो व्यभाव्यन्त कैरुयटन्तः प्रतिक्षपम् ॥९९॥
वृथावृद्धाः सुखप्राप्यं पाण्डित्यं भूर्जवत्परे । मत्वा बाला इवाचार्यगृहे प्रारेभिरे श्रुतम् ॥१००॥ 100
कैरुयुद्धिभिक्षाकाः सादरं स्तोत्रपाठिनः । कृतानुपाठाः स्वापत्यैः प्राहे लोकमहासयन् ॥१०१॥
माता स्वसा सुता भार्या स्वापि कैरुयकार्यत । सामन्तसेवनं कार्यप्राप्त्यै सुरतसेवया ॥१०२॥
जातकस्त्रग्रजकुनखुलक्षणनिरीक्षणम् । कारयद्भिः शठैरन्यैर्गणकाः परिखेदिताः ॥१०३॥
पिशाचा इव शुष्कास्या रूक्षश्मश्रुकचाः कृशाः । बद्धाः परैर्व्यभाव्यन्त भूर्जलामुखराङ्गयः ॥१०४॥
नृपेण कार्यिणां दर्पलिङ्गनाशे विपाटिते । अक्षपोज्ञातिपरिज्ञानक्षमत्वं समजायत ॥१०५॥ 105
भारतस्तवराजादिस्तोत्रपाठमजिह्मियन् । ते दुर्गोत्तारिणीविद्याजपं चोदश्रुलोचनाः ॥१०६॥
इत्थ दौःस्थ्योदये दीर्घे मज्जन्तो नित्यदुर्दिनाः । तस्मिन्राजनि कायस्था व्यलोक्यन्त पदे पदे ॥१०७॥
भिन्नसंधानभूर्यर्थदानभोज्यादिदौकनैः । न हि मोहयितुं शक्ताः राज्ञ त तेन्यराजवत् ॥१०८॥
तान्प्रत्याकृष्टकान्दृष्ट्वा कृतपरिकृतानिशम् । तैस्तैः भुविभिरभ्यक्षैः स विशामीश्वरो वशान् ॥१०९॥

---

९४ [1]) Emended, A -कृतभिश्चया'.—[2]) Emended A डोम्ब°

भूनेरास्य यथा पुरी हृतवहप्लुष्टा त्वदाज्ञाबलाद्भूयः स्वां श्रियमाससाद सहसा तद्वत्समस्तामिमाम् ।
110 त्वं कायस्थकुटुम्बिकूलिशविषया[1]पस्नानलीलाद्रामुच्चलदेव निर्वृतिसुखस्थित्या पुरीं स्वां क्रियाः ॥११०॥
शिवरात्र्युत्सवे ब्रह्मकर्मभुं शिवरपाभिधः । विद्वान्पर्वस्तेन हठात्सर्वाध्वक्षो व्यधीयत ॥१११॥
व्यवहारानभिज्ञोपि कश्चित्कालमदीदृशत् । शुचिन्वाचार्यसाजः स क्रामन्कृतयुगस्थितिम् ॥११२॥
शीघ्रदण्डत्वमुद्घण्डतेजसस्तस्य भूपतेः । क्रूरानुद्दिश्य कायस्थान्धीमद्भिर्बहुमन्यत ॥११३॥
न हि क्षुद्राश्रकायस्थपिशाचाविष्टवैरिणाम् । शंसन्त्यन्तरितं दण्डं दण्डनीतिविशारदाः ॥११४॥
115 चिरेण दण्डिता होते कुर्युर्दण्डभयाद्धुवम् । लब्धान्तराः प्राणहरं कृच्छ्रं किंचन्नशासितुः ॥११५॥
दण्ड्यानां दण्ड्यमानानां पुत्रस्त्रीमित्रबान्धवाः । राज्ञा विचारशीलेन न तेनोपद्रुताः क्वचित् ॥११६॥
कर्णेजपालोष्टधरप्रमुखांस्तेन दुःखदैः । कर्मभिः क्लिश्नताप्यापि पैशुन्यस्य खिलीकृतः ॥११७॥
विस्मृतिं लब्धराज्यानां पूर्वसंकल्पवासनाः । प्रयान्ति प्राप्तननुषां गर्भवासस्पृहा इव ॥११८॥
प्राप्याज्याधिगमाल्किंचित्सदसद्व्यचिन्तयन् । राज्ये तत्र विसस्मार जातिस्मर इवेश्वरः ॥११९॥
120 ददर्श शत्रोरद्रोहान्यान्द्रोग्धून्वा पुरानुगान् । कर्तव्यानुगुणं तेषां प्रतिपत्तिमदर्शयत् ॥१२०॥
स्मरेश्वोपपतिः पूर्वपतिद्रोहं कुयोचितः । पूर्वस्वाम्यरितां चाथ कुभृत्यस्येश्वरो जडः ॥१२१॥
शेषाहिदेहान्मेदिन्या समं प्रज्ञापि राज्यभूत् । तस्मिन्परिणता नूनं कृत्याकृत्यविवेक्तरि ॥१२२॥
तथा लोकस्य वणिजो व्यवहर्तुश्च सोभवत् । विवादे संशयं छिन्दन्नेवं स्थेयाद्यगोचरे ॥१२३॥
सौहृदागूढसद्भावे व्यापदीपयिकं धनी । न्यासीचकार दीनारलक्षं कोपि वणिग्गृहे ॥१२४॥
125 तेनोपयुज्यमाना च व्ययेषु वणिजः करात् । क्रियत्यपि गृहीतामूद्वात्तमात्रान्तरान्तरा ॥१२५॥
त्रिंशद्दिशाद्यं यातासु समासु न्यासधारिणम् । गृहीतशेषं दातुं स धनं प्रार्थयताथ तम् ॥१२६॥
वणिक्तु कुकृती तस्य न्यासमात्राय सोद्यमः । कालापहारमकरोत्तैस्तैः कलुषधीर्मदैः ॥१२७॥
लोलोभिर्ग्रस्तमम्भोधौ लभ्यं मेघमुखैः पयः । प्राप्निर्भुयस्तु नास्त्येव वणिग्व्यस्तस्य वस्तुनः ॥१२८॥
तैलस्निग्धमुखः स्वल्पालापो मृद्वाकृतिर्भवन् । न्यासमात्मविवादोयो वणिग्व्याप्राहिशिष्यते ॥१२९॥
130 विवादे श्रेष्ठिना शार्द्धं स्मितैः प्राक्सख्यदर्शनैः । मुक्तं मुक्तं ज्ञायमानं प्राणान्तेपि न मुच्यते ॥१३०॥
निसर्गवञ्चका वेदयाः कायस्थो दिविरो वणिक् । गुरूपदेशोपस्कारैर्विशिष्टाः सचिवादिषु ॥१३१॥
चन्दनाङ्गालिके श्वेतांशुके धूपाधिवासिनि । विश्रब्धः स्याल्किराते[2] यो विपक्षेस्य नापदः ॥१३२॥
ललाटस्फुटभोत्रद्भन्हृदयस्तचन्दनः । वह्निर्वृश्चिक इव क्षणात्प्राणान्तकृद्भृशम् ॥१३३॥
पाण्डुश्यामोग्निधूमार्द्रः सूच्यास्यो गहनोदरः । तुम्बीफलोपमः श्रेष्ठी रक्तं मांसं च कर्षति ॥१३४॥
125 सोथ निःशेषितनिधिः क्रुद्धो निर्बन्धकारिणः । गणनापत्रिकां तस्य सभ्रूभङ्गमदर्शयत् ॥१३५॥
यदादौ श्रेयस इति न्यस्तमश्रेयसे पदम् । आतरेष्वत्ययं सेतोर्गृहीता षट्शती त्वया ॥१३६॥
छिन्नोपानत्कषाबन्धे शतं चर्मकृतेर्पितम् । विपाद्विकाकृते दास्या नीतं पञ्चाशतो घृतम् ॥१३७॥

---

११०. [1]) A, indicates here a *lacuna* of one *akshara* १११ [2]) Emended with C, A लोक° १२५ [1]) Emended, A °भूतमा° Cf viii 154. १२६ [1]) Emended, A विपाद्दिशयातासु Cf v 210. १३२ [1]) Emended, A किरादे.

स्फोटने भाण्डभारस्य क्रन्दन्त्याः कृपयार्पितम् । कुलाल्या बहुशः पश्य मूर्ज्ये लब्धं शतत्रयम् ॥१३८॥
शिशुभ्योस्य बिडालस्य क्रीताः पोषाय मूषिकाः । स्वया शतेन वात्सल्याद्दृष्टान्मन्यरसस्तया ॥१३९॥
चरणेहर्तनं सर्पिः शालिचूर्णं च सप्तभिः । क्रीतं शतैः श्राद्धपक्षस्नाने च घृतमाक्षिकम् ॥१४०॥ 140
नीतं क्षौद्रार्द्रकं कासायासायादर्भकेण ते । सोऽथक्तनिद्रः किं वेत्ति वक्तुं लब्धं शतं ततः ॥१४१॥
वृषणोत्पाटको भिक्षाचरस्ते हठयाचकः । यो वारितो युद्धपटुस्तस्मै दत्तं शतत्रयम् ॥१४२॥
आनीते भट्टपादानां मध्यं सर्वव्ययोपरि । शतं शतद्वयं धूपशन्दामूलपलाण्डुषु ॥१४३॥
इत्याद्यचिन्त्यतायुक्तान्परिहार्यव्ययानसौ । तस्यैकीकृत्य गणनां लाभेपि शनकैर्व्ययात् ॥१४४॥
वर्षमासपहतिथिप्रत्यावृत्तिः पुनः पुनः । संसारस्येव तस्यान्तं न ययौ नर्तिताडुलेः ॥१४५॥ 145
स मूलग्रहणं पिण्डीकृत्याय सकलान्तरम् । प्रसारितोष्टस्तत्रेत्रे मीलयन्नभ्यधान्मृदु ॥१४६॥
शल्यमुद्धर निक्षेपं नयोज्झासधनं स्विदम् । विभ्रम्भदत्तं निर्दम्भं दीयतां सकलान्तरम् ॥१४७॥
तस्य धर्म्यं वचो जानन्क्षणमुच्छ्वसितोभवत् । क्षुरं क्षौद्रोपलिप्तं तु ध्यात्वा पश्चादतप्यत ॥१४८॥
युक्तापह्नुतसर्वस्वं क्रौर्यानार्यमयार्थकः । विवादे नाशकज्जेतुं नापि स्थेया विचारकाः ॥१४९॥
स्थेयैरनिश्चितन्यायं पुरो न्यस्तं ततो नृपः । तदित्यभिति निश्चित्य वणिजं तमभाषत ॥१५०॥ 150
अद्यापि न्यासदीक्षारः सन्ति चेत्तत्पदर्शयताम् । अंशः कियानपि ततस्ततो वक्ष्मि यथोचितम् ॥१५१॥
तथा कृते तेन वीक्ष्य दीक्षारान्मन्त्रिणोब्रवीत् । राजभिर्भाविनां राज्ञां नाम्ना टङ्कः क्रियेत किम् ॥१५२॥
न चेत्कलशभूपालकाले न्यासीकृतेष्वमी । दीक्षारेषु कुतष्टङ्का मन्नामाङ्का अपि स्थिताः ॥१५३॥
निक्षिप्तेनैव लक्षेण वणिक्तस्माद्व्यवाहरत् । वणिजो द्रविणेनायमप्यासेनान्तरान्तरा ॥१५४॥
तस्माद्यदा यदेतेन गृहीतं दीयतां ततः । तदा प्रभृत्यद्यावल्लाभोस्मै वणिजोर्थिनः ॥१५५॥ 155
न्यसनानेहसश्चैव प्रभृत्यस्मै प्रयच्छतु । लक्षादखण्डिताल्लाभं किं वाच्यं मौलिके धने ॥१५६॥
अवधारयितुं शक्यं मादृशैः सचूर्णैरियत् । श्रीयशस्करवद्वीक्ष्यमीक्षेषु तु युज्यते ॥१५७॥
विवादे संदिहानस्य युक्तं क्षान्त्यानुशासनम् । भाव्यं दण्डधरानारैः प्रयुक्तकुक्षुतैः पुनः ॥१५८॥
अनिर्हार्येषु शल्येषु महामर्मगतेष्विव । सविवादेषु चोपेक्षां कालापेक्षी व्यधान्नृपः ॥१५९॥
पप्रथे पार्थिवस्येत्थं निधीशं तस्य पालनम् । प्रजासु जागरूकस्य मनोरिव मनस्विनः ॥१६०॥ 160
सख्यं कारणनिरपेक्षमिनताहंकारहीना सतीभावो वीतजनापवाद उचितोक्तित्वं समस्तप्रियम् ।
विद्वत्ता विभवान्विता तरुणिमा पारिप्लवत्वोज्झितो राजत्वं त्रिकलङ्कमत्र चरमे काले किलेत्यन्यथा ॥१६१॥
स वादशोपि राजेन्द्रश्चन्द्रमाः सन्किलाभवत् । मात्सर्याविष्टवैवश्याद्दोषोल्काक्षवर्षभीषणः ॥१६२॥
औदार्यशौर्यधीधैर्यगुणत्नरुण्यमत्सरः । बभूव संख्यातीतानां मानमाणहरो नृणाम् ॥१६३॥
मानोज्झनैश्च भूयोपि वाक्पारुष्यरुषाहतैः । लाघवं प्रत्युपालम्भैः पार्थिवोप्यनुभाविनः ॥१६४॥
प्रसुप्तानां फणीन्द्राणामिव कोपेऽद्भवं विना । तेजो विस्फूर्जितं ज्ञेयं न हि नाम शरीरिणाम् ॥१६५॥ 165

---

१४३ 1) A विश्रम्भ°. १५२ 1) Emended with C, A क्रौर्यानर्य°. १६२ 1) Emended, A स किला°.

विविधे भुवसर्गेऽस्मिन्न च कश्चित्स विद्यते । वपुर्वंशचरित्रादि यस्य दोषैर्न दूषितम् ॥१६६॥
जाति. पङ्कुरुहाह्वयुः कपिलनाक्रान्तं शिरः खण्डनप्रभ्रंशच्छुचिशीलसादिविगुणाचारप्रदुष्टं यशः ।
विभ्रस्तद्युतिं प्रभुतविषयव्याप्रिप्रभूतो दुःसहा दोषा यत्र पुरोस्तु तत्र कतमो निर्दोषतोत्सेकभूः ॥१६७॥
अविचार्येति भूपालः स चकारानुनीविनाम् । वंशचारित्रदेहादिदोषोद्घोषणमन्वहम् ॥१६८॥
अन्योन्यद्वेषमुत्पाद्य संख्यातीता महाभटाः । युद्धश्रद्धालुना तेन द्वन्द्वयुद्धेषु घातिताः ॥१६९॥
मासार्धदिनमाहेन्द्रमहाद्यवसरेषु सः । निनाय योधान्संनद्धानन्योन्यप्रपनैर्धनम् ॥१७०॥
स नाभूदुत्सवः कश्चित्तदा यत्र नृणद्वने । भूमिर्न सिक्ता रक्तेन हाहाकारो न चोद्ययौ ॥१७१॥
नृत्यन्त इव निर्याता गृहेभ्यो वंशशोभिनः । बान्धवैर्नैन्यिरे योधा लुनाङ्गाः पार्थिवाद्वनात् ॥१७२॥
स्त्रिग्धश्यामकचांश्चारुश्मश्रुनाकलपशोभिनः । हतान्वीक्ष्य भटांस्त्राजा मुमुदे न तु विव्यथे ॥१७३॥
नार्यो राजगृहं गत्वा प्रत्यायातेषु भर्तृषु । मेनिरे दिवसं लब्धमनास्था नित्यमन्यथा ॥१७४॥
भवेत्त्वद्यदहं कुर्यामित्यहंक्रियया वदन् । साचिव्यमव्याहतवाग्वैस्तैर्भृत्यैरजियहत् ॥१७५॥
प्रवर्धमानांस्तानेव विद्वेषकलुषाशयः । हताधिकारान्विदधे बहुशश्च विमानितान् ॥१७६॥
दञ्जकः कम्पनार्याशः प्रवृद्धौ तत्र सक्रुधि । विद्युतो विषलाटायां निपत्य निहतः खड्गैः ॥१७७॥
तेन स्ववर्धितो द्वारापीश्वरो रक्तकाभिधः । हताधिकारो विदधे विभुतिं वीक्ष्य भूयसीम् ॥१७८॥
माणिक्यसैन्यपतिना द्वारेकस्माच्चिवारितः । खिन्नेन विजयक्षेत्रे चक्रे व्रतपरिग्रहः ॥१७९॥
कम्पनाद्यधिकारस्थाः प्रवीरास्तिलकादयः । काकवंशा मदिरेन तत्कोपं नानुभाविताः ॥१८०॥
भोगसेनो निरनुगः क्षीणवासा भवन्कृतः । तेनातिसेवापीतेन राजस्थानाधिकारभाक् ॥१८१॥
यस्येन्द्रह्रादशीयुद्धे सान्द्रसैन्योपि विद्युतः । क्षुद्रवद्रणगन्द्रोपि रौद्रमालोक्य विक्रमम् ॥१८२॥
येपि सङ्घाभिधानस्य पुत्राः सामान्यशस्त्रिणः । तान्त्रिद्युन्नद्युद्यद्वान्स मन्त्रिणः समपादयत् ॥१८३॥
पुत्रो विजयसिंहस्य तत्सेवात्यक्तदुर्दशौ । तिलको जनकश्चास्तामामात्यश्रेणिमध्यगौ ॥१८४॥
यमेलाभयवाणादिमुख्या द्वारादिनायकाः । कस्तान्समर्थः संख्यातुं तद्विस्तरलसंपदः ॥१८५॥
द्विजाः प्रशस्तकलशाद्दय. पूर्वं तदन्तरे । प्रापुर्वालद्रुमान्तःस्थजीर्णनौकेहविभ्रमम् ॥१८६॥
कन्दर्पः क्ष्माभुजा दूतैः समानीतोपि नाददे । तस्यासहनतां वीक्ष्य प्रार्थितोप्यधिकारिताम् ॥१८७॥
आस्थानाचारसंलापव्यवहारादि मण्डले । नवमेवाभवत्सर्वं तस्मिन्नभिनवे नृपे ॥१८८॥
लक्ष्मीः कार्मणचूर्णाढ्या वेश्येव वशवर्तिनः । धीरानपि विधायेयं करोत्युन्मार्गवर्तिनः ॥१८९॥
सपिण्डानामपि व्यक्तभूलवीक्षणतत्परा । प्रेतनेव नरेन्द्रश्रीर्जातिखेदापकारिणी ॥१९०॥
समस्तसंपत्पूर्णोपि यस्मान्मुस्मलभूपतिः । दध्यौ भ्रातुरवस्कन्दं राज्यापहरणोद्यतः ॥१९१॥
अकस्मादभूणोच्छ्वेनमिव तं शीघ्रपातिनम् । स्थानं वसाह्ववार्तास्यमुल्लङ्घ्यायानमभजः ॥१९२॥
क्षिप्रकारी विनिर्गत्य तमप्राप्तपदं ततः । निपत्य सैन्यैर्बहुलैः सोपकारमकारयत् ॥१९३॥
विद्युतस्यास्पदे तस्य नानोपकरणैश्चुतैः । ताम्बूलवल्लीकुटैश्च सामर्थो समभाव्यत ॥१९४॥

१८४. [1]) Emended with C ; A °श्चास्तम°. १८६. [1]) Emended, A °जीर्णानोकह°. १९४ [1]) Emended, A ताम्बूलवेलाकू°

कृतकार्यपरावृत्त्यासावरूढोपि पार्थिवः । प्रत्याघृत्तं तमभृणोदन्येद्युः क्रूरविक्रमम् ॥१९५॥ 195
गग्गचन्द्रस्तदादेशाद्गत्वा बहलसैनिकः । चक्रे सुस्सलभूपालबलनिर्दलनं ततः ॥१९६॥
असंख्यैः सौस्सलैर्योधैराहवायासनिःसहैः । क्लान्तिर्विमानोद्यानेषु सुनारीणामुपेयुषः ॥१९७॥
भर्तृप्रसादस्यानृण्यं प्राणैर्युधि समर्पितैः । राजपुत्री गतौ तत्र सहदेवत्रयुधिष्ठिरौ ॥१९८॥
वराश्वान्सुस्सलानीकाद्गृह्णतस्तान्पाप विद्विषान् । चक्रे भूरितुरंगस्य यैर्भूपस्यापि कौतुकम् ॥१९९॥
निविष्टकटकं तं स श्रुत्वा सैल्यपुराध्वना । क्रमराज्योन्मुखं यान्तं द्रुतमन्वसरन्नृपः ॥२००॥ 200
अन्विष्यमाणसरणिः प्रयत्नादप्रजन्मना । प्रविवेश दरद्देशं परिमेयपरिच्छदः ॥२०१॥
दत्तमार्गं तस्य राजा डामरं लोष्टकाभिधम् । स सैल्यपुरजं हत्वा नगरं प्राविशत्ततः ॥२०२॥
तस्मिन्दूरं गते वैरकलुषोपि स नाददे । भ्रातृस्नेहेन संरम्भं महीतुं लोहरं गिरिम् ॥२०३॥
कल्हः कालिञ्जराधीशो दौहित्रीं पुत्रवद्गृहे । यामवर्धयत स्नेहादपुत्रः पितृवांजिताम् ॥२०४॥
राज्ञो विजयपालस्य सुतां सुस्सलभूपतिः । उपयेमे स तां श्रीमाननघां मेघमञ्जरीम् ॥२०५॥ 205
तस्य प्रभावाधिष्ठानाच्छिशोरपि न लोहरे । शक्तिरासीद्विरुद्धानामपि बाधाय वैरिणाम् ॥२०६॥
धीरः सुस्सलदेवोपि मार्गैर्निर्गत्य दुर्गमैः । आसदद्भूरिभिर्मासैः स्वोर्वीं दुर्गमिवात्मना ॥२०७॥
प्रशान्ते व्यसने तस्मिन्धीरस्योच्चलभूपतेः । अन्येपि व्यसनाभासा उत्पन्नध्वंसिनोभवन् ॥२०८॥
भीमादेवः समादाय भोजं कलशदेवजम् । साहायकार्थमानिन्ये दरद्राजं जगद्बलम् ॥२०९॥
सल्हो हर्षमहीभर्तुरवरुद्धात्मजोभवत् । भ्राता दर्शनपालस्य सञ्जपालस्तु तद्बलम् ॥२१०॥ 210
नीतिज्ञेन ततो राज्ञा साम्नैव दरदीश्वरः । आक्षेपाहारितः प्रायात्पत्यावृत्य निजां भुवम् ॥२११॥
सल्हस्तमन्वगाच्छत्रं भोजोविक्षत्स्वमण्डलम् । भेजे सुस्सलदेवस्य सञ्जपालोनुजीविताम् ॥२१२॥
गृहीतार्थेन भृत्येन निजेनैव प्रदर्शितः । भोजः क्षिप्रं नृपात्पाप निग्रहं तस्करोचितम् ॥२१३॥
देवेश्वरात्मजः पित्थकोपि हैराज्यलालसः । डामरानाभिते राज्ञि निर्याते व्यद्रवद्दिशः ॥२१४॥
विचारपरिहारेण धावन्तः सर्वतो जडाः । तिर्यञ्च इव हास्याय प्रसिद्धिशरणा जनाः ॥२१५॥ 215
मल्लस्य रामलाख्यस्य सुनुरासं दिगन्तरे । अट्टसूदः कश्चिदेवं चक्रिकाचतुरो वदन् ॥२१६॥
निन्ये प्रवृद्धिं व्यामूढैर्बहुभिर्विप्रवञ्चयैः । धनमानादिदानेन भूमिपैर्भूम्यनन्तरैः ॥२१७॥युग्मम्॥
ग्रीष्मे प्रविष्टः कश्मीरानेकाकी धर्मपीडितः । व्यधीयत छिन्ननासः परिज्ञाय नृपानुगैः ॥२१८॥
कटके पर्यटन्राज्ञः स एव ददृशे पुनः । स्वजात्युचितभक्ष्यादिविक्रयी सस्मितं जनैः ॥ २१९॥
मिथ्यैव नीतिकौटिल्यैः क्रियतेभ्युदयभ्रमः । शक्यतेपरथा कर्तुं न दैवस्य मनीषितम् ॥२२०॥ 220
शान्तापि ज्वलति क्वापि क्वनिहीप्रापि शाम्यति । दैववातवशाच्छक्तिः पुंसः कक्षाग्निसंनिभा ॥२२१॥
पलायनैर्नापयाति निश्चला भवितव्यता । देहिनः पुच्छसंलीना वह्निज्वालेव पक्षिणः ॥२२२॥

---

१९९. 1) Emended, A °कान्याग्र्य°. २०४. 1) Emended, A कालिम्बर°. Cf. VII. 1256. VIII. 618. २१४. 1) Emended with C, A वह्नय°. २१६. 1) Thus corr. by A, from A, महारामाला°. २१७. 1) A, writes here २ instead of युग्मम्.

नाच्छिन्नवह्निविषशस्त्रशरप्रयोगैर्न श्वभ्रपातरभसेन न चाभिचारैः ।
शक्या निहन्तुमसवो विधुरैरकाण्डे भोक्तव्यभोगनियतोच्छ्वसितस्य जन्तोः ॥२२३॥
भिक्षाचरः समादिष्टश्चरो जयपतीगृहात् । नक्तं वध्यभुवं निन्ये वधकैः पार्थिवाज्ञया ॥२२४॥
225 प्राणि प्रस्फोटय निक्षिप्तो वितस्तायां समीरणैः । क्षिप्रस्तटं क्षणं स्पन्दमानवक्षाः कृपालुना ॥२२५॥
द्विजेनैकेन संप्राप्तश्चिराद्दुष्टतचेतनः । आसमत्यभिधानाया शान्तिर्देहेति गौरवात् ॥२२६॥
शाह्निपुत्रीभिरुक्ता या दत्तश्चतुरया तया । नीतो देशान्तरं गूढं ववृधे दक्षिणापथे ॥२२७॥ तिलकम् ॥
स वृत्तघ्न्यभिज्ञोऽथ पुत्रवन्नरवर्मणा । मालवेन्द्रेण शस्त्रास्त्रविद्याभ्यासमकार्यत ॥२२८॥
अन्यदीयं घातयित्वा तत्तुल्यवयसं शिशुम् । रक्षितो जयमत्यैव स किलेत्यपरेब्रुवन् ॥२२९॥
230 देशान्तरागतादृत्तात्तां वार्तामुपलभ्यवान् । अत एवाभवत्तस्या भूभृद्धिरलितादरः ॥२३०॥
बहिरप्रतिभिन्वंस्तत्त धीरो मार्गवार्तिभिः । चक्रे तदप्रवेशाय संबन्धं पार्थिवैः समम् ॥२३१॥
ईर्ष्यामगोपयन्नार्याः शङ्कामच्छादयन्निपोः । स्वयमन्याभिगम्यत्वं करोति हि जडो जनः ॥२३२॥
भिक्षाचरे हते बालं कंचिदादाय तत्समम् । तच्चाप्ता ख्यातिमनयद्विद्वेष्येत्यपरेब्रुवन् ॥२३३॥
तथ्येन सोस्तु मिथ्या वा प्रतिष्ठां तां तथाप्रथान् । यया लघुत्वमानेतुं न दैवेनाप्यशक्यत ॥२३४॥
235 स्वप्नेन्द्रजालमायानामपि निर्विषया इमाः । कर्मवैचित्र्यजनिताः काश्चिदाधर्वविद्युषः ॥२३५॥
स राजबीजी नाशाय विशां गूढं व्यवर्धत । पुरमामादिदाहाय कक्षान्तरिव पावकः ॥२३६॥
रोहत्यन्तिकसीमनि प्रतिविषावीरुद्विषद्भारुहः काले प्रावृडुपद्रुताच्छसलिले मूर्छत्यगस्त्योदयः ।
सर्गच्छेदविधिक्षमानुदयतो दृष्ट्वा किलोपद्रवान्संधत्ते प्रतिकारकल्पनमहो दीर्घावलोकी विधिः ॥२३७॥
अजायत विपन्मज्जज्जगदुद्धरणक्षमः । तस्मिन्नेव क्षणे यस्मात्सुस्सलक्ष्मापतेः सुतः ॥२३८॥
तज्जन्मकालादारभ्य सर्वतो जयमर्जयन् । नामान्वर्थं नृपस्तस्य जयसिंह इति व्यधात् ॥२३९॥
240 शास्तुः सर्वार्थसिद्धाख्या यथा सर्वार्थसिद्धिभिः । तथा तस्याभिधान्वर्थं नात्यजद्बुद्धिशब्दताम् ॥२४०॥
मुद्रां स कुङ्कुमस्याङ्कैस्तदीयस्याभ्युपागताम् । विलोक्यैश्चलदेवोभूद्विस्मयुर्भ्रातरं प्रति ॥२४१॥
बालस्यैवाङ्किमुद्रास्य वैरं पितृपितृव्ययोः । निवारयन्ती विदधे सुस्थितं मण्डलद्वयम् ॥२४२॥
स स्वर्गिणः पितुर्नाम्ना ततः सुकृतसिद्धये । चकारोच्चलभूपालः पैतृके स्थण्डिले मठम् ॥२४३॥
गोभूमिहेमवस्त्रान्नदाता तस्मिन्महोत्सवे । आश्चर्यकल्पवृक्षत्वं त्यागी सर्वार्थिनामगात् ॥२४४॥
245 प्रसादैः प्रहितैस्तेन महार्घैः श्लाघ्यसंपदा । महान्तोपि दिगन्तेषु पार्थिवा विस्मयं ययुः ॥२४५॥
भर्तृप्रसादाधिगतां श्रियं नेतुं परार्ध्यताम् । विहारं समठं देवी जयमत्यपि निर्ममे ॥२४६॥
केषांचित्पूर्वपुण्यानां विरहेण महीभुजः । हताभीष्टाभिधानोभून्मठो नवमठाख्यया ॥२४७॥
सुस्थां स्वसारमुद्दिश्य परस्मिन्स्थण्डिले पितुः । विहारोपि कृतस्तेन नोचितां ख्यातिमाययौ ॥२४८॥
मृत्योर्मस्तकपातित्वं तस्याकलयतः किल । न निष्ठां स्वप्रतिष्ठासु संप्रपेदे व्यवस्थितिः ॥२४९॥

---

२२७ [1]) A_1 writes here ३ instead of तिलकम. २३०. [1]) Emended, A °त्ताच्चत्तपुष°. २३५. [1]) Emended with C; A °णद्युत. २३७. [1]) A_2 gloss प्रतिविषा वीरुत यस्या उपविषेत्यादिनामान्तरं कोशे यथा विश्वाविषा प्रतिविषातिविषोपविषाहऊा भङ्गीमहौषधं चेति (*Amarakośa* II. 4. 99-100). २४७. [1]) Emended, A °ण्डे.

कदाचित्क्रमराज्यस्थो द्रष्टुमग्निं स्वयंभुवम् । ययौ वर्द्धटचक्राख्यं गिरियामं स भूपतिः ॥२५०॥ 250
तं कम्बलेश्वरग्रामाध्वना यान्तमवेष्टयन् । अकस्मादेत्य तत्रत्याश्चौराश्चण्डालशस्त्रिणः॥२५१॥
प्रजिह्मीर्षुभिरप्याशु तस्मिन्नत्यल्पसैनिके । न तैः प्रहर्तुमुत्तेजोवष्टम्भस्तम्भितायुधैः ॥२५२॥
अथ हारितमार्गः स गहने गिरिगह्वरे । भ्रमन्नल्पानुयाय्येकां क्षणदामत्यवाहयत् ॥२५३॥
उच्चचार क्षणे तस्मिन्स्कन्दावारेषु दुःसहा । नास्ति राजेति दुर्वार्ता सर्वतः क्षोभकारिणी ॥२५४॥
कटकात्रिःसुतात्यल्पा वात्येव गिरिगह्वरात् । सा दुष्पवृत्तिर्दीर्घत्व पुरेरण्य हवासदत् ॥२५५॥ 255
नगराधिकृतस्तस्मिन्क्षणे क्षुद्रुाभिधोभवत् । शल्किनः कामदेवस्य कुल्यो रुद्रादिसोदरः ॥२५६॥
कृत्वा पुरक्षोभशान्तिं शल्कोकः स नृपास्पदे । प्रविश्य भ्रातृभिः सार्धं कार्यशेषमचिन्तयत् ॥२५७॥
नृपं कं कुर्म इत्येवं तान्विचिन्तयतोऽब्रवीत् । सद्रुाभिधोपि कायस्थः कुटुम्बिकुटिलाशयः ॥२५८॥
यूयमेव सुहृद्बन्धुभृत्यदाहुल्यदुर्जयाः । राज्यं कुरुत संप्राप्य राष्ट्रमेवमकण्टकम् ॥२५९॥
तैरेवमुक्तास्ते पापा जातराज्यस्पृहास्ततः । सिंहासनाधिरोहाय क्षिप्रमासन्समुद्यताः ॥२६०॥ 260
श्रीयशस्करदेवस्य वंदया एत इति श्रुतिः । तदन्वयेभूत्सर्वेषां राज्यौत्सुक्यप्रदायिनी ॥२६१॥
अत एवाभजत्क्रोधं तेषां कुक्षुरुक्तिभिः । सा वासनान्तःसंलीना सदाचारानपेक्षिणाम् ॥२६२॥
कथं न प्रतिभात्येषा सद्रुस्यापि कुपद्धतिः । भारिकस्य कुले जातो लवटस्य हि सोधमः ॥२६३॥
क्षेमंदवाभिधानस्य पुत्रोप्यल्पनियोगिनः । क्रूराशयत्वमभजन्महासाहसिकोचितम् ॥२६४॥
चौर्येण स्वर्णभृङ्गारं हृतवान्भूपतेर्गृहात् । संभावितोपि गाम्भीर्याज्ञाज्ञायि स किलेङ्गितैः ॥२६५॥ 265
सासिधेनुर्नीरुष्णीषो विहसन्नखिलान्स्मयात् । राजपुत्र इवात्यल्पं स त्रैलोक्यममन्यत ॥२६६॥
तस्य चिन्ता कानिदासीत्सदा दोलायतोऽनुलीः । या राज्यहेतुः क्रूरेण फलेन समभाव्यत ॥२६७॥
तद्विरा निजसंकल्पादपि ते राज्यलालसाः । नृपं जीवन्तमाकर्ण्य ततोभूवन्हतस्पृहाः ॥२६८॥
न स्फुरन्न च संमीलन्न वा सुप्त इवानिशम् । तेषां चेतसि सकल्पस्तदा प्रभृति सोभवत् ॥२६९॥
असुस्थिरादरेणाथ शनकैः पृथिवीभुजा । निन्यिरे मध्यमां वृत्तिं राजस्थानाविचार्य ते ॥२७०॥ 270
प्रकृत्या रूक्षवामाजौ सर्वेषामेव सर्वदा । तेषामप्यकरोदन्तरे मर्मस्पृशः कथाः ॥२७१॥
ते राज्ये हर्षभूभर्तुः पितरि प्रमयं गते । मातुस्तारुण्यमत्तायाः विश्वस्या गृहेवसन् ॥२७२॥
तैर्मन्यामत्तकौ नाम शल्कभृत्यातिवेश्मिकः । सुहृदुक्तोय विश्वस्तो जननीजारशङ्क्या ॥२७३॥
असतीर्मा किं नैने न्यगृह्णन्निति भूपतिः । विचार्य कोपात्तन्मातुर्नासाच्छेदमकारयत् ॥२७४॥
तां कथां स नृपस्तेषां परोक्षमुदघोषयत् । क्व पुनश्छिन्ननासाया वदन्नित्यन्विवेष च ॥२७५॥ 275
बृहद्वङ्गादिगङ्गेशं कृत्वा कार्याऽन्यवारयत् । स कायस्थकृतान्तत्वं भजन्सद्रुमपि प्रभुः ॥२७६॥
पीडितस्तेन रौद्रेण निजोथ गगनापतिः । कोशोत्पत्त्यपहर्तारं तं नृपाय न्यवेदयत् ॥२७७॥
प्रवेशश्चागिकपदे हते राज्ञा रुषा ततः । स क्रूरो रुद्रुच्छुद्रादीन्यैरयत्पूर्वचिन्तिते ॥२७८॥
जिघांसवस्ते नृपतिं प्रसङ्गापेक्षिणः परैः । समगंसत दुष्प्रज्ञैरथ हंसरथादिभिः ॥२७९॥

---

२५२ [1]) Doubtful emendation, A °सुद्रोजोवष्टम्भ°. २७५. [1]) Emended, A पुनायाच्छिन्न°.

प्रजिहीर्षुभिरुर्वीशां पीतकोशैः समेत्य तैः । चतुष्पञ्चानि वर्षाणि नावाप्यवसरः क्वचित् ॥२८०॥
बहुभिर्बहुधा भिन्नैर्बहुकालं विचिन्तितः । न भेदमगमन्मन्त्रः स चित्रं लोकदुष्कृतैः ॥२८१॥
तवैतां कुरुते शश्वन्नृपो मर्मस्पृशं कथाम् । इति प्रत्येकमुक्त्वा ते विरागं पार्थिवेऽजनन् ॥२८२॥
तैरुरःपार्श्वपृष्ठादि गूढैर्वर्मभिरायसैः । प्रच्छाद्य पार्थिवोऽजस्रमनुसस्रे जिघांसुभिः ॥२८३॥
असहो विरहं सोढुं यां प्रसादयितुं न काम् । राजापि संदधे चेष्टां प्राक्प्राकृतभुजंगवत् ॥२८४॥
स्वभाववैपरीत्येन नाशचिह्नेन स स्थिराम् । जयमत्या संहार्मीतिं तदादाद्दत्सरद्वयम् ॥२८५॥
रक्षां भिक्षाचरस्यार्हन्निमित्तं तत्र केचन । केचित्तु विद्युत्सदृशीं प्रेम्णां तरलवृत्तिताम् ॥२८६॥
अथ वर्तुलभूभर्तुरात्मजा विज्जलाभिधा । कृतपाणिग्रहस्यागाद्गृहं राज्ञः वसुधाभुजः ॥२८७॥
संग्रामपाले नृपतौ तस्मिन्नवसरे मृते । तत्सूनुः सोमपालाख्यः पित्र्यं राज्यं समादधे ॥२८८॥
राज्यार्हमयजं बद्ध्वा सोऽभ्यषिच्यत चाक्रिकैः । इति कोपात्तरेन्द्रोभूत्कुध्यत्राजपुरीं प्रति ॥२८९॥
लक्ष्मीस्वैर्यैर्यतिभुवः पुत्र्याः पाणिमजिघ्रहत् । ..... ॥२९०॥
अर्थिचिन्तामणेस्तस्य प्रीणतो निखिलाः प्रजाः । नानाव्ययोर्जितो रेजे पश्चिमः स महोत्सवः ॥२९१॥
याते जामातरि क्ष्माभृच्चक्रे निखिलतन्त्रिणः । निर्नृत्तीन्किमपि क्रुध्यन्दुर्धुक्षूंस्तु व्यसर्जयत् ॥२९२॥
भोगसेनोऽपि भूपेन काले तस्मिन्समन्युना । निवारितो द्वारकार्यात्सवैरः समपद्यत ॥२९३॥
विक्रान्तः स हि कार्यस्थो निर्जिताखिलडामरः । सुस्सलक्ष्मापतिं जेतुं प्रतस्थे लोहरं पुरा ॥२९४॥
वात्सल्यमिश्रवैरेण वारितोऽथ महीभुजा । तत्परीवादमकरोच्चुक्रोधावेत्य तच्च सः ॥२९५॥
प्रवेशयन्नरद्दृच्छुङ्गमुखान्स समयान्तरम् । तमादिसद्दृदं वीरं तदा राज्ञा विमानितम् ॥२९६॥
विमानिता विशालेच्छाः संहता हतवृत्तयः । न ते बहिष्कृतास्तेन यमराट्टं जिगीषता ॥२९७॥
तान्भोगसेनविन्यस्तसद्भावान्कुटिलाशयः । सङ्घो निनिन्द वीरत्वात्तं जानन्सरलान्तरम् ॥२९८॥
ऊचे चायैव दित्वापि प्राणान्व्यापाद्यतां नृपः । भोगसेनोऽन्यथा भेदं कुर्यादगहनाशयः ॥२९९॥
अन्यथाभूत सङ्घोक्तं भोगसेनो यदब्रवीत् । किंचिद्रहोस्मि वक्तेति नृपतिं भेदलालसः ॥३००॥
स तु किं वक्षि न द्वारं तव दद्यामिति ब्रुवन् । दुधुक्षुंपक्षप्रणयं निन्ये तमवमानयन् ॥३०१॥
प्रबोधाधायिनो हेष्टि निर्यानप्रणयीभवन् । तपात्ययाहनिद्रान्त इव जन्तुर्गतस्मृतिः ॥३०२॥
तन्निर्गो यामिका भूत्वा स्वस्मिन्द्वारे ततोविशन् । ते राजधानीं संनद्धैः स्वसैन्यैः सह संहताः ॥३०३॥
यामिन्यां यं वयं हन्मस्तं हतेत्यभिधाय च । प्रावेशयन्त्रयस्तच्चिह्नांश्चण्डालान्मण्डपान्तरम् ॥३०४॥
भुक्तोत्तरं स्थिते राज्ञि ते बाह्ये मण्डपे स्थिताः । सरोषो नृप इत्युक्ता सेवकोत्सारणं व्यधुः ॥३०५॥
राजा च विज्जलावेश्म श्रियासुर्मण्डपान्तरात् । दीपिकाभिः कृतालोको निर्ययौ मदनालसः ॥३०६॥
मध्यमं मण्डपं तस्मिन्प्राप्ते स्वल्पैः सहानुगैः । तस्यक्तं मण्डपं सङ्घो रुद्धान्यानरुणज्जनान् ॥३०७॥
अन्यैरप्यथिमे द्वारे निरुद्धे सर्व एव ते । जिघांसवः समुत्थाय नृपतिं पर्यवारयन् ॥३०८॥

---

२८१ 1) Emended with C, A पार्थिवे २८५. 1) Emended, A मह्या°. २८६ 1) Emended with C, A विद्वस्त° २९० 1) A omits here two *pādas* without indicating a *lacuna*, C adds here: तं प्रेत्र सर्वलोकानां श्रेष्ठ सर्वक्षमाभुजा. २९२. 1) Emended with C; A निर्नृत्तीन् किमपि.—2) Emended, A °दुधुक्षुंस्तु. २९५. 1) Emended with C, A °निभं वैः ३०१. 1) A दुधुक्षु°.

विज्ञप्तिदम्भादेकेन रुद्धमग्ने निवेदयन् । तं द्विजो दिव्यजन्मेज्यः शस्त्र्या कृष्टकलोभिनत् ॥३०९॥
ततः काञ्चनगौराणि तस्याङ्गान्यसिधेनवः । बह्व्यः सुमेरुशृङ्गाणि महोरस्य इवाविशन् ॥३१०॥ 310
म द्रोहो द्रोह इत्युक्ता केशान्कृष्टान्विमोचयन् । क्रीडाशस्त्र्याः कपां रुद्धमुष्टिं दन्तैर्व्यपाटयत् ॥३११॥
सुजनाकरनामा हि भृत्यः कट्टारकं वहन् । तस्यान्तिकात्पलायिष्ट प्रहरन्तु विरोधिषु ॥३१२॥
अतो बालोचितां लज्जां क्षुल्लिकां स चकर्ष ताम् । मुष्टावर्गलिता कोशात्सा कृच्छ्रेण विनिर्ययौ ॥३१३॥
निर्यातान्त्रः शत्रुभिस्तैस्त्यक्तकेशो बबन्ध तम् । धम्मिल्लमथ तां शस्त्रीं जानुद्वन्द्वान्तरर्पयन् ॥३१४॥
नदित्वा प्रहरंस्तेजं तादृग्वीर्योपि सोभवत् । येन क्षितौ निपतितः सर्वमर्मस्विवाहतः ॥३१५॥ 315
अभिनच्च ततो रुद्रं प्रहरन्तं च पृष्ठतः । नदन्सिंह इव व्यद्रिं परिवृत्य व्यदारयत् ॥३१६॥
अन्यं च शस्त्रिणं कंचित्सवर्माणमपातयत् । विवेष्टमानो यः प्राणैरचिरेण व्ययुज्यत ॥३१७॥
लब्धान्तरे प्रवासाय तस्मिन्धावति मण्डपः । रक्षिभिर्भूमिपालोयमित्यबुद्ध्वा कवाटितः ॥३१८॥
द्वारमन्यत्पसर्पन्त क्व प्रयासीति जल्पता । लुंटेन रुद्धमार्गेण स्वद्वयपातैरहन्यत ॥३१९॥
भोगसेनं ततोपश्यद्वारस्थान्ते समुत्थितम् । दारुतूलिकया भित्तिमालिखन्तं पराङ्मुखम् ॥३२०॥ 320
भोगसेनक्षमे कस्मादमं त्वमिति वादिनम् । सोप्यक्तं किमपि क्षीतः प्रधावन्तं जगाद तम् ॥३२१॥
रथ्यावद्दामिधो दीपधरस्तिष्ठन्निरायुधः । अयोदीपिकयारब्धयुद्धसैर्विक्षतोपतत् ॥३२२॥
चाम्पेयः सोमपालाख्यराजपुत्रः क्षताहितः । प्रहारैः प्राप्तवैकल्यो न गत्यांचारतामगात् ॥३२३॥
पौत्रः श्रीभूपालस्य राजकापत्यमज्जकः । विदद्रौ येन सहाय शस्त्र्यां पुच्छच्छटोपमाम् ॥३२४॥
ततः प्रधावन्प्रथीयमारुरुक्षुः क्षितीश्वरः । निकृत्तजानुश्वण्डालैरालिलिङ्ग वसुंधराम् ॥३२५॥ 325
तत्पृष्ठे स्व क्षिपन्दंडं प्रहारैर्जर्जरीकृतः । भृङ्गारनामा कायस्थो निर्द्रोहो वारिणोभिभिः ॥३२६॥
पुनरुत्थातुकामस्य सर्वे शस्त्रावलीर्हरेः । व्यपातयन्तस्य क्रान्त्या नीलाञ्जवरणस्त्रजम् ॥३२७॥
निश्रेयसाचिद्भुतोयमविपन्नो विपच्चयन् । कन्धरामधमः सद्दस्तस्येति स्वयमच्छिनत् ॥३२८॥
कृतं पदापहरणं यस्य सोहमिति ब्रुवन् । छित्त्वाङ्गुलीश्चकर्षापि रत्नाङ्गार्मुमिकावलीम् ॥३२९॥
एकपादस्थितोपानत्स्रस्तमात्यैः शिरोरुहैः । छन्नवक्त्रः स ददृशे सुप्तो दीर्घभुजः क्षितौ ॥३३०॥ 330
पर्यायप्राप्तस्य पर्यन्ते वीरवृत्त्या महौजसः । निर्द्रोपतामीपदगाच्चित्स्थित्वं जनान्पति ॥३३१॥
सेवकः शृगटो नाम पूत्कुर्वन्द्रोहमुच्चकैः । निर्गत्य भोगसेनेन बहिः क्रोधाच्चिपातितः ॥३३२॥
प्रस्थितो दयितावासं स दिदृक्षुरवशादिव । पन्थानं पृथिवीनाथः क्रान्त्या जग्राह वेश्मनि ॥३३३॥
राज्योद्यानं नृपतिमुपा भोगकिञ्जल्ककोलाश्रेणी नानावसनकुसुमश्रेणिभिः प्रीणयन्तः ।
हा धिर्दैवानिलतरलया पात्यमाना नियत्या वल्ग्येवैते किमपि सहसा दृष्टनष्टा भवन्ति ॥३३४॥
निर्यद्रथस्त्रिजगज्जयी परिभवं लब्ध्वेश्वरो लब्धवान्पाणेशपनृपोत्तमः कुरुपतिः पादावनिं मूर्धनि ।
इत्यन्ते बहुमानहत्परिभवः सर्वस्य सामान्यवत्तत्को नाम भवेन्महानहमिति ध्यायन्नृतार्हक्रियः ॥३३५॥ 335
परासुमग्निनैस्त्यक्तं तमनाथमिव प्रभुम् । नग्नं हुताशमात्कर्तुं स्वच्छत्रग्राहिणोनयत् ॥३३६॥

---

३०९. [1]) Thus corr. by A_1 from °स्तेज्ञ

भुजौ कण्ठे गृहीत्वैकः करास्यां चरणौ परः । तं भुग्नग्रीवमालोलकुन्तलं रुधिरोक्षितम् ॥३३७॥
सभूत्कारव्रणं नग्नमनाथमिव पार्थिवम् । राजधान्या विनिष्कृष्टं न्यधत्तां पितृकानने ॥३३८॥
महासरिद्विनिस्ताम्भःसंभेदद्वीपभूतले । अह्नाय वह्निसंस्कारं ते भीतास्तस्य चक्रिरे ॥३३९॥
न हतो नापि निर्दग्धः स केनापि व्यलोक्यत । उड्डीयेव गतस्त्वाशु नेत्रनिर्विषयोऽभवत् ॥३४०॥
व्यतीतेन स वर्षैकचत्वारिंशतमायुषा । सप्ताशीत्यब्दपौषस्य शुक्लषष्ठ्यां व्ययुज्यत ॥३४१॥
चक्रेथ सासिकवचो रुद्रः शोणितमण्डितः । श्मशानाश्मनि वेताल इव सिंहासने पदम् ॥३४२॥
..... । ---[1]बद्धमूलानामाद्यानां तन्न[1] दिद्युते ॥३४३॥
तस्यावरोहतः सिंहासनाद्योद्धुं पुरो युधि । विक्रामन्तो बन्धुभृत्या युद्धभूमिमभूषयन् ॥३४४॥
नन्दिनी वह्निपद्माख्यौ युद्ध्वा तद्बान्धवौ चिरम् । योधाश्च रुद्रसूर्याद्याः सिंहद्वारेपतन्हताः ॥३४५॥
रणरङ्गनटो नृत्यन्निव राजगृहाङ्गने । सखड्गखेटको रुद्रः खण्डयञ्छत्रिताम्बभौ ॥३४६॥
दिशन्विजयसंदेहमहितानां क्षणे क्षणे । प्रहारैः सुबहून्भित्त्वा स चिरेणापतद्रणे ॥३४७॥
राजद्रोहोचितं तस्य निहतस्यापि निग्रहम् । वैशसत्यक्तमर्यादो गर्ग[1] कोपादकारयत् ॥३४८॥
दिङ्मातङ्गनिके व्यद्युः पौरैर्भस्मादमर्षिभिः । अवस्करप्रणालान्तर्मम्रवक्त्रो न्यपात्यत ॥३४९॥
ते गुल्फदामभिः कृष्टाः स्थाने स्थाने प्रभुद्रुहः । तत्क्षणं लोकथूत्कारपूजां कृत्योचितां दधुः ॥३५०॥
पलाय्य प्रययुः क्वापि सद्यं हंसरथादयः । मरणाभ्यधिकां कंचित्कालं सोढुं विपद्व्यथाम् ॥३५१॥
दृग्यपराजितं गर्ग[1] नष्टे तदनुजे विदन् । भोगंसेनोथ तां वार्तामशृणोत्पलयोपमाम् ॥३५२॥
व्यावृत्य प्रत्यवस्थातुकामः पश्यन्पलायिनः । योधान्स्वैः सहितः कैश्चित्ततः क्वापि भयादगात् ॥३५३॥
इत्थं निहतविध्वस्तनायका द्रोग्धृसंहतिः । स्वदोर्मात्रमहायेन गर्गचन्द्रेण सा कृता ॥३५४॥
सत्त्वं साहससिद्धिं च नेतिहासेष्वपि क्वचित् । अभ्यैषं तादृशं यादृक्तस्यास्ते स्म प्रतापिनः ॥३५५॥
निशां प्रहरमद्वक्त्र राज्यं कृत्वा स लब्धवान् । द्रोहकृच्छ्रद्रुराजाख्यां गतिं कुकृतिनामगात् ॥३५६॥
यशस्करकुले जन्म द्रोग्धृभिस्तैः प्रमाणितम् । क्षणभङ्गुरभोगाढ्यं यस्मादूर्णठदेववत् ॥३५७॥
दावोद्दीपनकूटयन्त्रघटनैः सिंहादिसंहारिणो यान्त्याकस्मिकगण्डशैलपतनैरन्तं किराता वने ।
एकेनैव ननु प्रधावति जनः सर्वोपि मृत्योः पथा हन्ताहं निहतोयमेष तु मितं कालं विभेदग्रहः ॥३५८॥
स्त्रोद्वाहे ललनोद्यमङ्गलरवो यैर्हैर्पुलैः श्रूयते दीनैस्तैर्दयितावियोग उदयन्नाकर्ण्यतेन्तक्षणे ।
सोपि प्रत्यहितं प्रहृष्यति परः स्वं प्रन्तमन्ते मुहोर्वृत्तं सोप्यवलोकयत्यहह धिङ्मोहोयमन्याय्यवहः ॥३५९॥
सायं विचिन्तितो रात्रौ फलितोन्यत्र वासरे । दुर्विपाकप्रदाताभूद्रोग्धृणां साहसद्रुमः ॥३६०॥
अथ सिंहासनस्थान्तः कार्यान्ते व्यक्तविग्रहः । गर्गः प्रक्षालितामर्षश्चक्रन्द स्वामिनं चिरम् ॥३६१॥
तस्मिन्रुदति सर्वोपि पौरलोको भयोज्झितः । संप्राप्तावसरो भूपं व्यलापील्लोकवत्सलम् ॥३६२॥
कारुण्योत्पत्तये दत्त्वा कोशं जीवितकामया । जयमन्या तदावादि गर्गः कपटशीलया ॥३६३॥

---

३४३. [1]) These words written by A_1 after verse 342, belong apparently to a verse of which the beginning is lost, the *lacuna* in the text is not indicated in A. Perhaps, more verses have been lost here.—[2]) A तन्निद्युः. ३४८ [1]) Thus corr. by A_1 from गग्गः. ३५२. [1]) Thus corr. by A_1 from गग्गं. ३५८. [1]) A_1 gloss अहं हन्ता.

कुरु मे संविदं भ्रातरिति सत्त्वमयस्तु सः । तत्प्रक्रियावचो ज्ञात्वा चिंतं तस्या अकल्पयत् ॥३६४॥
निकुरनिचये यस्कौटिल्यं विलोचनयोश्च या तरलतरता यत्काठिन्यं तथा कुचकुम्भयोः ।
वसति हृदि तथासां पिण्डीभवच्चनु ता इमा गहनहृदया विज्ञायन्ते न कैश्चन योषितः ॥३६५॥ 365
दौःशील्यमप्याचरन्त्यो घातयन्त्योपि बल्लभान् । हेलया प्रविशन्त्यग्निं न स्त्रीषु प्रत्ययः क्वचित् ॥३६६॥
युग्याधिरूढा सा यान्ती यावन्मार्गे व्यलम्बत । अमतो विज्जला तावन्निर्गत्य प्राविशच्चितां ॥३६७॥
अथ तस्याश्चितारोहं कुर्वन्त्या भूषणार्पणैः । लुण्ठकैर्लुण्ठ्यमानाया व्यथा गात्रेषु पप्रथे ॥३६८॥
सच्छत्रचामरे राज्यौ दह्यमाने विलोकयन् । लोकः सर्वोपि साक्रन्दो दग्धदृष्टिरिवाभवत् ॥३६९॥
औचित्यं तेन च तदा निन्येत्यन्तपवित्रताम् । सर्वैर्यदर्थ्यमानोपि नोपाविक्षद्भृपासने ॥३७०॥ 370
हतमुच्चलदेवस्य बालमङ्के निधित्सता । राज्येभिषेक्तुं ने केचित्तेनान्वैक्षन्त यत्नतः ॥३७१॥
लोको येष्वस्य केषांचित्सत्त्वमालोक्य सस्मितः । भिक्षामप्यटितुं जानै नैव जानाति योग्यताम् ॥३७२॥
राज्यां श्वेनाभि नायां मद्दराजस्य यै सुताः । सल्हणाद्यास्तयोर्भूवन्मध्यमे प्राक्षयं गते ॥३७३॥
हन्तुं ज्येष्ठकनिष्ठौ द्वौ शेषौ सल्हणलोठनौ । अन्विष्टौ शङ्कराजेन भयान्नवमठं गतौ ॥३७४॥
निर्लज्जैर्नीहतान्द्रोग्धृन्विहाय मिलितैः पुनः । तन्व्यश्चारोहसचिवैरानीतः कृतवाक्रिकैः ॥३७५॥ 375
दृष्ट्वा राज्यार्हमप्राप्य कंचिज्ज्यायांस्तयोस्तदा । गर्गेण राज्ये संरम्भादभ्यषिच्यत सल्हणः ॥३७६॥
हा धिक्कवर्तुणा यामानामन्तरे नृपतित्रयी । अहस्त्रियामे तत्रासीद्दया या पुरुषायुषैः ॥३७७॥
ये सायमुच्चलनृपं प्राक्षे द्रष्टुं सिषेविरे । मध्याह्ने सल्हणं प्रापुर्दृष्ट्वास्ते राजसेवकाः ॥३७८॥
अथ लोहरकोट्टस्थः सार्धेह्नि गलिते नृपः । सुस्सलो भ्रातृमरणं श्रुत्वा तूष्णान्तमानसः ॥३७९॥
गर्गेण प्रहितो दूतः स क्रन्दन्स्वं क्षिपन्क्षितौ । ततस्तं वीतसंदेहं चकारार्तप्रलापिनम् ॥३८०॥ 380
श्रान्तसल्हणवृत्तान्तपर्यन्ता नाभृणोत्कथाम् । गर्गदूताद्भ्रातृवधं स्वस्यात्मानं च केवलम् ॥३८१॥
अश्रद्दधानस्तं क्षिप्रमरिच्छेदं सुदुष्करम् । तदाहानाय गर्गो यं प्राहिणोत्तं चलन्गृहात् ॥३८२॥
आक्रन्दमुखरो भूत्वा तां रात्रिमरुणोदये । कश्मीराभिमुखो यावन्मसंभृतबलोप्यदात् ॥३८३॥
अन्योथ गर्गदूतस्तं पथि संघटितोभ्यधात् । कृत्स्नमावेद्य वृत्तान्तं नागन्तव्यमिति ध्रुवम् ॥३८४॥
क्षिप्रं हतेषु द्रोहेषु त्वय्यसंनिहितेनुजः । कृतस्तु सल्हणो राजा कृत्यमागमनेन किम् ॥३८५॥ 385
श्रुत्वेति गर्गसंदेशं कोपादसहनो नृपः । अप्रयाणैषिणो भृत्यान्विहस्यैवं वचोऽब्रवीत् ॥३८६॥
नास्माकं पैतृकं राज्यं यदि रिक्थहरोनुजः । मज्ज्यायसा मया चैतद्भुजाभ्यामर्जितं पुनः ॥३८७॥
राज्य स्वीकुर्वतोरन्यो न ह्रातामूत्तदावयोः । येनाहृतमिदं पूर्वं स क्रमः क्व गतोधुना ॥३८८॥
इत्युक्ताविरतैरेव वहद्भासीत्प्रयाणकैः । दूतांश्च पार्श्वं गर्गस्य स्वीकृत्यै प्राहिणोद्बहून् ॥३८९॥
स काश्मवाटं संप्राप सल्हणस्य हितैषिणा । निर्गत्य गर्गचन्द्रेण चक्रे हुष्कपुरे पदम् ॥३९०॥ 390
प्रवृत्तायां विभावर्यां दूतैः कृतगतागतैः । तस्याद्रीकृतसामापि गर्गो द्रोग्धाभ्यधीयत ॥३९१॥

---

३६९. 1) Emended, A राज्ञो. ३७१. 1) Emended with C, A न्वेक्ष्यन्त. ३७३ 1) Thus A, C R, A, य.

कार्यमध्यगतो राजा तथापि प्राह्णिणोत्तदा । धात्रेयं भ्रातरं गर्गाभ्यर्णं हितहिताभिधम् ॥३९२॥
योगसेनः क्षणे तस्मिन्नाययौ दैवमोहितः । खाशाकान्यिल्ववननाम्नध्येकृत्य नृपान्तिकम् ॥३९३॥
सोभ्यर्णं कर्णभूत्याख्यमश्वारोहं महीपतेः । विसृज्य गर्गं जेष्यामीत्युक्त्वाभूच्छोभनोद्यतः ॥३९४॥
कालापेक्षामपि त्यक्त्वा हन्तुं भ्रातृद्रुहं स तम् । योग्यं प्रसङ्गमन्विष्यन्नज्ञे लोकैरसज्जनः ॥३९५॥
यस्य भ्रातृद्रुहः पार्श्वे स त्वमाश्रीयसे कथम् । गर्गोपि तमुपालेभे दूतैरित्यादि संदिशन् ॥३९६॥
स तु मार्गात्पलाय्यायं तमसीति विलम्बकृत् । दत्तास्कन्दः क्षपापाये तं सानुगमघातयत् ॥३९७॥
पतत्रणं कर्णभूतिर्वीरवृत्त्या व्यरोचत । तस्य ह्येमातुरो भ्राता तेजःसेनोप्यनुनया ॥३९८॥
तेजःसेनस्तु भूलाभे नृपादेशाज्यवेदयत । मरिचौ लवराजस्य तनूजोभूपतेरपि ॥३९९॥
अवष्टब्धेन भूपेभूच्चियहावमदक्षमः । न येनासितुमप्यास्था तावदासीत्तु तद्बलम् ॥४००॥
पुरोगेपि कृतः पश्चाद्योगीतेहि महीभुजा । स सन्नपालस्तत्पार्श्वमथादायायायौ हयान् ॥४०१॥
तेष्वायातेष्वष्टदम्भं यातं किंचिच्च तद्बलम् । प्राप्तश्च गर्गसेनानीः सूर्याख्योनल्पसैनिकः । ४०२॥
दृष्टेक्षुर्वीक्ष्य तानग्रैर्नृपोश्मभिरोपितः । उत्सेकशङ्गीवर्मैः कुच्छ्राच्च परिधापितः ॥४०३॥
गगनं ग्रासभल्लाग्रमिव कुर्वत्तथापतत् । शरासारो रिपुबलान्सर्वतोच्छिन्नसंततिः ॥४०४॥
ओंकारं शरपुङ्खैः कृत्वा ब्रह्मस्य दुर्मदाः । प्राहरन्नाजकटके सर्वान्सर्वायुधैर्द्विषः ॥४०५॥
हतविक्षतविध्वस्तसैन्यः साहसिको नृपः । वेगादपससारैको मध्याह्निर्गत्य वैरिणाम ॥४०६॥
गर्जन्मिन्नुरथाश्वान्तन्यूचतिरलद्रुचत् । सत्राजिना तेन सेतुर्दुर्दृक्षुः पत्रिणामपि ॥४०७॥
सन्नपालादयो द्विजाः शोकुलमनुवर्तिनम् । प्रणम्य निरुत्यन्तः स्थाने स्थाने विरोधिनः ॥४०८॥
वीरानकाभिधं वीरः स खज्ञानां निवेशनम । विंशद्भिर्शैः समं भृत्यैः प्रविष्टस्तत्यजेरिभिः ॥४०९॥
निरम्बरैर्निरुहारैस्त्रिष्टङ्कनिषदैः समम् । स तत्र चित्रमाकस्य निर्भयो दण्डयन्यज्ञान् ॥४१०॥
क्रमेण च हिमापातदुर्लङ्घ्याध्वनि संकटे । अविषह्यो भाग्ययोगात्पर्यो लोहरं पुनः ॥४११॥
पदे पदे प्राप्तमृत्युरायुःशेषेण रक्षितः । तथाप्यासीत्स क्रूरमीप्राग्निमेव विचिन्तयन् ॥४१२॥
वराक द्वारसंस्थश्च गर्गो हितहितं कुधा । विरुद्धं चिंतितस्तायां वज्रपाण्यद्रिमक्षिपत ॥४१३॥
तस्मिन्प्रक्षिप्यमाणेष्वप्यु क्षमाख्यः स्व क्षिपत्पुरः । दासोस्यैर्भैःपदारोहमयःपातेपि लब्धवान ॥४१४॥
राज्यप्रदः क्षतारिश्च गर्गः प्राग्नैतिक ततः । प्राप सन्हणराजस्य सविशेषमशिताम ॥४१५॥
स भुञ्जन्निन्विक्रान्तिहीनो राज्यमवाप्तवान् । चक्रभ्रममिवापश्यत्सर्वतो भ्रान्तमानसः ॥४१६॥
न मन्त्रो न च विक्रान्तिर्न कौटिल्य न चार्जवम् । न दानुना न लुब्धत्वं तस्योद्रिक्तं किमप्यभूत् ॥४१७॥
तद्राज्ये राजधान्यन्तर्मध्यार्द्धेपि मल्लिमुनेः[1] । लोक मुमुषुरन्याध्वसंचारस्य कथैव का ॥४१८॥
पङ्गुरप्यङ्गना कालं क्रान्त्या यत्रात्यवाहयत् । पुमानप्यभवत्तत्र साध्वसाध्वस्तधीरसौ ॥४१९॥
यामद्य सन्हणोन्येद्युर्भेजे तां लोठनः स्त्रियम् । साधारण्यं गतो राज्यभोग इत्यभवत्तयोः ॥४२०॥
पुरुषान्तरविज्ञानविहीनस्य प्रमाद्यतः । सर्वोपि तस्य तन्त्रैश्वर्यवहागो व्यहीयत ॥४२१॥

३९५ [1]) Emended with C, A सन्निधत ४१८ [1]) Thus A ४२० [1]) Emended with C, A लोठन.

श्वशुरो लोठनस्योज्झमूढस्तेन व्यधीयत । द्वारे तापसगोष्ठीषु योग्यो विक्रमनिद्धुरे ॥४२२॥
यः सुस्मलभयोच्छेदमङ्गीकुर्वंस्तदागमे । स्वमन्त्वलक्षणापेन सिद्धिं मन्त्वक्षणेभ्यधात् ॥४२३॥
जिश्नो गर्गाज्ञया राजा तदग्रियमपातयत् । बद्धाञ्जलिं विनम्रायां विम्बं नीलाश्वडामरम् ॥४२४॥
राजानुपाद्रको गर्गान्तांस्तान्व्यापादयन्निपून् । ज्वालाज्वाण्डामरान्भूरीन्दत्तभोज्यानघातयत् ॥४२५॥ 425
राज्यकिंचित्करे गर्गायत्तजीवितमृत्यवः । बाह्याभ्यन्तरे चासन्क्षल्पे वा पृथवोपि वा ॥४२६॥
कदाचिच्छदराद्रौर्गे प्रविष्टेय नृपान्तिकम् । चुक्षोभ नगरे लोकः सर्व एव भयाकुलः ॥४२७॥
तदा क्षुद्रचरद्वार्ता भुलान्यागेत्य नौपु यत् । कृध्यन्गर्गोयमायातो इन्तुं सर्वानृपाश्रितान् ॥४२८॥
गर्भिणीगर्भपातिन्या तादृश्या भयवार्तया । द्विजाण्यद्वान्यन्वभावि जनैर्ज्वर इवाखिलैः ॥४२९॥
ततस्तिलकसिंहाद्यैरुद्रेकाद्वागदीयत । अनवेक्ष्य नृपादेशमास्कन्दो गर्गमन्दिरे ॥४३०॥ 430
देशश्चात्युल्बणः क्रुद्धो धावति स्म धृतायुधः । प्रत्यग्रहीत्तानखिलान्गर्गचन्द्रस्त्वविह्वलः ॥४३१॥
निर्लज्जा दिल्हभट्टारलक्कक्काद्यास्तुरंगमैः । भ्राम्यन्तस्तत्रादृश्यन्त गर्गात्रिमथवीथिषु ॥४३२॥
निषिषेध न तान्राजा प्रत्युतास्कन्ददायिनाम् । लोठनं कुण्डशक्तीनां तेषां स्फूर्त्यै व्यसर्जयत् ॥४३३॥
तेनापि योधैर्गर्गस्य रुद्धमार्गेण मन्दिरम् । न रुद्धं नापि निर्दग्धुं पारितं दत्तवह्निना ॥४३४॥
धानुष्कः केशवो नाम मडेशो लोठिकामठे । अवाधतैव नाराचैस्तद्बाधान्वातयन्परम् ॥४३५॥ 435
प्रकाशेन समं रात्रलोके विरलतां गते । सायं सानुचरो गर्गो हयारूढो विनिर्ययौ ॥४३६॥
समैरप्रतिहतो निनाय लहरं व्रजन् । बद्धाञ्जसुद्गमस्त्रस्थमासीनं त्रिपुरेश्वरे ॥४३७॥
तापसेन किमेतेनेत्युक्तान्येषुर्मुमोच तम् । तं सुस्मलेपि विधुरे नृपतिं नोदपाटयत् ॥४३८॥
क्षणे क्षणेभवद्धेशस्ततः प्रभृति सर्वतः । गर्गागमनसंत्रस्तपौरागलितमन्दिरः ॥४३९॥
अथातस्य महीभर्तुर्गर्गसंधानमिच्छतः । महत्तमः सहेलोभूद्धहरे दृत्यमाचरन् ॥४४०॥ 440
तेनाङ्गीकारितो गर्गः कथंचित्कन्यकार्पणम् । भृत्यास्तु तेन संबन्धं नैच्छन्भूतस्य भूपतेः ॥४४१॥
ततः सुस्मलदेवेन सह संधिं निबद्धवान् । पश्चात्संप्रार्थ्यमानोपि संबन्धं न व्यधत्त सः ॥४४२॥
मण्डले विशरारुत्वमेवं याते नृपोचयीत् । सइं हंसरथं नोनरथं चासादितांश्वरैः ॥४४३॥
तानभिक्रमणस्त्र्यादिप्रवेशै — — — र्जनैः । अत्यक्तानसुभिर्धीरामवस्थामन्वबीभवत् ॥४४४॥
भोगसंनाद्धनां मल्लामनुमेने स यत्नतः । अनुसनै पतिं उच्चं वमन्ती साधु तद्व्यधात् ॥४४५॥ 445
तादृग्दृष्ट्वापि वैक्लव्यं शङ्कितेन तदन्तरे । प्रमिम्ये दिल्हभट्टारो रसदानेन भूभुजा ॥४४६॥
न राजधीनी नोच्चण्डविक्रमो वा बभूव सः । शमिनो गुढवण्डेन [illegible] या तेन पापिना ॥४४७॥
तं या निनिन्दानिष्पन्नपौरुषं तत्स्वसुस्तदा । तस्या वह्निप्रवेशेन सिद्धं मानवतीव्रतम् ॥४४८॥
सोप्यपि राज्यकालोभूद्देवमातङ्गदुःसहः । दीर्घक्षपादृश्यमानरीधिदुःस्वप्नसंनिभः ॥४४९॥
कालवित्सुस्मलो गर्गाद्वद्धसंधिरपि त्वसन् । न्ययुङ्क्तापे सङ्गपालं काइमीरान्सुख्यभाक्ततः ॥४५०॥ 450

---

४२२ [1]) Emended, A °योज्झमूढ° Cf viii 437 ४४३ [1]) Emended, A नृपोत्रवीत ४४४ [1]) A, °प्रवेशार्जन, without indicating the *lacuna*, C वेशैरिह दुर्जन —[2]) Emended, A °भीषवन ४४५ [1]) Thus corr by later hand from A वसन्ती. ४४२ [1]) Emended with R C; A राजका°

द्वारेण सह दत्तार्थो लक्कुकः सल्हभूभुजा । वराहमूलं संप्राप कथंचित्प्रस्थितिं भजन् ॥४५१॥
गर्गः स्मरन्नवस्कन्दं पश्चादभ्येत्य नाशयन् । वाराहमूलेन समं तस्य सैन्यमलुण्ठयत् ॥४५२॥
विदद्रौ स तु तथाविधैस्तैश्च परिषस्वजे । अदिव्यैर्मेदिनी दिव्यैर्देहैस्त्वप्सरसां गणः ॥४५३॥
नायके गलिते शुद्धवृत्तैः सहंशनैर्मही । पतितैरुप्यच्छद्मद्विजैर्भुषिता मौक्तिकैरिव ॥४५४॥
आगच्छता छिन्नभीतिः सञ्जपालेन लक्कुकः । निराभयः संप्रपदे पार्श्वं सुस्सलभूपतेः ॥४५५॥
सोथ भूभृत्सञ्जपाले दूरं क्रान्तरिपौ गते । आजगामान्तिकं प्रीतैः प्रेरितः पौरडामरैः ॥४५६॥
संधिं तत्र विधास्यामि सार्धं सुस्सलभूभुजा । इत्युक्त्वा सल्हणं पार्श्वात्तदभ्यर्णं संडेलकः ॥४५७॥
काङ्क्षिताभ्युदयं पौरैश्चातकैरिव वारिदम् । अशिश्रियन्नाजवनौ सर्व एवोच्चलानुगम् ॥४५८॥
गर्गस्य गृहिणी कुङ्कुमाभिधानाय तदन्विकम् । कन्यकाद्वयमादाय परिणेतुमुपायथौ ॥४५९॥
उपयेमे स्वयं राजा राजलक्ष्म्यभिधां तयोः । गुणलेखां खुपास्वेन स्वीचक्रे तथवीयसीम् ॥४६०॥
सल्हणे सानुजेभ्येत्य सञ्जपालेन वेष्टिते । राजापि राजसदसः सिंहद्वारे समासदत् ॥४६१॥
साक्षाद्वरौषधिभूम्येव द्वारमेकेन पालितम् । अभून्मोवं तमप्राप्य सार्धं वैरिमनोरथैः ॥४६२॥
समैन्यैर्गलितद्वाररावेदमस्थिते रिपौ । गर्गास्कन्दस्थिशङ्कुद्यासीच्चकितं सौस्सलं बलम् ॥४६३॥
गर्गे विती(र्णे)कन्येपि राजसैन्यमविश्वसत् । तस्थौ स्थातव्यमित्येव तृणस्पन्देपि शङ्कितम् ॥४६४॥
अस्ताभिलाषिणि दिने तादृक्कासहते बले । लेहाददहनि क्ष्मापे दुर्भेद्योकःस्थितान्रिपून् ॥४६५॥
प्रविश्य पार्वनिर्भुग्नकवाटेन तमोरिणा । द्वारं विवृत्याङ्गनस्थैः सञ्जपालोपसीद्रणम् ॥४६६॥
तस्य निश्चित्य पार्वगीं वृत्तिं भूयस्यरिव्रजे । अनुप्रवेशं विदधे पदातिर्लक्कुकाभिधः ॥४६७॥
दरदानयने काष्ठवाटसंकटविक्रमे । यस्तस्य सदृशो योधः प्रतिबिम्ब इवाभवत् ॥४६८॥
स केशवश्च स मठाधीशस्तमनुसस्रतुः । शैनेयमारुती पार्थमिव प्रार्थितसैन्धवम् ॥४६९॥
निर्गत्य मण्डपाग्रप्रहारैस्तैः कथंचन । विवृते प्राङ्गनद्वारे धीरो राजाविशत्स्वयम् ॥४७०॥
निर्विभागे वर्तमाने संगरे सैन्ययोर्द्वयोः । प्राङ्गनं प्रथमं प्रापुर्भूयासस्तत्र शक्तिणः ॥४७१॥
सचिवः सल्हराजस्य पतंगग्रामजो द्विजः । आत्मा प्रापाज्जको नाम स्वःस्त्रीसंभोगभागिताम् ॥४७२॥
कायस्थेनापि रुद्रेण लब्ध्वा गङ्गाधिकारिताम् । स्वामिप्रसादः साफल्यं निन्ये स्वल्का तनुं रणे ॥४७३॥
सायं वनस्पतिर्लीनैः खगैर्वाचालितो यथा । पाणि प्रविष्टे प्रोद्दीननिःशब्दविहगोभवत् ॥४७४॥
आयोधनोर्वी वाचाला चक्रे चित्रार्पितेव सा । तथा सुस्सलभूपेन तुरंगस्थेन तर्जिता ॥४७५॥
अनारूढेङ्गनान्तःस्थे तस्मिन्सिंहारुढध्वनिः । सुस्सलो जयतीत्येवं ढक्कावाद्यं च शुश्रुवे ॥४७६॥
मल्लराजगृहे तादृङ्नान्यस्याप्युदपद्यत । अगानां तत्र वैक्लव्यं यादृक्सल्हणलोठनौ ॥४७७॥
आबद्धकवचावश्वारूढावालिङ्ग्य सुस्सलः । बालौ युवामिति वदन्धूर्तोत्यायदायुधम् ॥४७८॥
आदिश्य मण्डपन्यस्मिन्बद्धयोश्च स्थितिं तयोः । प्राप्तराज्यस्ततो राजा विवेशास्थानमण्डपम् ॥४७९॥
त्र्यहोनांश्चतुरो मासान्भुक्तराज्यं बबन्ध तम् । सितस्य सोष्टाशीतिब्दे राधस्य त्रितयेहनि ॥४८०॥

---

४५२. [1]) Thus A. ४६२ [1]) Emended with C, A सार्धाद्रि°. ४६६. [1]) Emended, A मामनि°.

तेन सिंहासने क्रान्ते भास्वतेव नभस्तले क्षणादेवाखिलो लोकः क्षोभमध्यरिवान्यजत् ॥४८१॥
विकोशशस्त्रः सन्द्रोहापेक्षणक्षोभतः सदा । व्याधलोके व्याक्तवक्त्रो मृगराज इवाभवत् ॥४८२॥
भ्रातृद्रुहां कुलच्छेदमन्विष्यान्विष्य कुर्वता । न तेन नीतिनिष्ठेन शिशवोप्यवशेषिताः ॥४८३॥
जनस्य वीक्ष्य दैन्यमभूताकारतां वहन् । स कार्यापेक्षयाप्यासीन्न क्वाप्याहितमार्दवः ॥४८४॥
वस्तुतस्त्वार्द्रहृदयः क्रूरं दमयितुं जनम् । अवास्तवं तद्भीमत्वाद्विचित्र्याल इवाबभौ ॥४८५॥ 485
कालवित्समयत्यागी प्रगल्भः प्रतिभानवान् । इङ्गितज्ञो दीर्घदृष्टिः स एवान्यो न कोप्यभूत् ॥४८६॥
अधिकः कोपि कोप्यूनः कोपि तस्य समो गुणः । दोषोथ वा पूर्वजस्य स्वभावैक्येप्यदृश्यत ॥४८७॥
अन्वकारि समानेपि कोपे तत्पूर्वजन्मनः । कोपेन विषमालर्के नदीयेन तु सारधम् ॥४८८॥
न बभूव स वेशादौ सामृयोनुचितं पुनः । स्थितिभेदभयात्सेहे नोत्सेकमनुजीविनाम् ॥४८९॥
नैच्छत्स इन्द्रियद्वादिसंधानैर्मानिनां वधम् । तस्मिन्यमादात्रिरूढे स्वदीयत कृपाकुलः ॥४९०॥ 490
वाक्पारुष्यं नृपस्यासीदाशयस्यानुदुःसहम् । तस्य तु प्रणयप्रायं हिंसाद्यावाधवर्जितम् ॥४९१॥
तस्यार्थगृध्नोरुत्पादो भूयानास्ते स्म संपदाम् । त्यागो विषयकालादिदैन्यत्यक्तुं मितोभवत् ॥४९२॥
नवकर्माभ्यासदुत्यर्थिये तस्मिन्दरिद्रताम् । तत्यजुः कारवो वानिर्विक्रेनारश्च दैशिकाः ॥४९३॥
दुःसहव्यसनोत्पत्तौ निगीर्णोः प्रशमैषिणः । तस्यासीदपरित्याज्ये न किंचिद्वसुवर्षिणः ॥४९४॥
तस्येन्द्रवादशी भूरिपरार्ध्याभुक्तदायिनः । यथा नृपस्य भुभुजे तथा नान्यस्य कस्यचित् ॥४९५॥ 495
यथा प्रागुच्चलो राजा सुरापः प्रियसेवकः । स तथा सेवकैरासीद्भ्रमा दुर्लभदर्शनः ॥४९६॥
नोच्चलादपरस्यासीद्व्यसनं हयवाहने । नान्यस्य सुस्सलनृपाहार्क्ष्यं तत्र च पप्रथे ॥४९७॥
शममुत्पन्नमुत्पन्नं निन्ये दुर्भिक्षमुच्चलः । राज्ये सुस्सलदेवस्य न तत्स्वप्नेप्यदृश्यत ॥४९८॥
किमन्यदखिलैः सोभूदधमादधिको गुणैः । त्यक्ता त्यागार्थिनस्पृष्टसुरापत्वानि केवलम् ॥४९९॥
औच्चलः पालको गर्गो यं राज्ये कर्तुमैहत । सहसमङ्गलस्तेन निरवास्यत स क्रुधा ॥५००॥ 500
तस्मिन्भद्रावकाशार्थे प्रासनामा तदात्मजः । काञ्चनोत्कोचदभ्रकं डामरैः सह चाक्रिकाम् ॥५०१॥
असत्यजच्चुच्चलनं पितृव्येणार्थितं शिशुम् । प्रमङ्क्ते तत्र गर्गोपि प्रातिकूल्यमदर्शयत् ॥५०२॥
प्रहितानां नरेन्द्रेण तृणानामिव शत्रिणाम् । गर्गदावाग्निदग्धानां निःसंख्यानामभूत्क्षयः ॥५०३॥
गर्गस्यालोपि विजयः स देवसरसोद्भवः । प्रातिलोम्येन नृपांतसेन्यानां कदन व्यधात् ॥५०४॥
राज्यप्राप्तेर्मासमात्रे दिनैरभ्यधिके गते । तेनोत्पिञ्जेन राज्ञोभूत्र धीरस्याकुलं मनः ॥५०५॥ 505
सुरेश्वर्यमरेशार्वीवितस्तासिन्धुसंगमाः । गर्गेण राजसैन्यानां कृताः कदनकाङ्क्षिणः ॥५०६॥
संग्रामे तुमुलेमात्यौ भृङ्गारकपिलौ हतौ । कर्णशुक्रकनामानौ तन्त्रिणौ च सहोदरौ ॥५०७॥
निहतानन्तसुभटसमूहान्तरलक्षितान् । तादृशानपि निष्क्रष्टुं नासीत्कस्यापि पाटवम् ॥५०८॥
हर्षमित्रः कम्पनेशो भूभर्तुर्मातुलात्मजः । विजयेन हतानीको विदधे विजयेश्वरं ॥५०९॥

---

४९२. [1]) Emended, A °नैवस्था तु. ४९८. [1]) Emended with C, A स्वप्नेदृश्यत ५०६ [1]) Emended with C, A राज्यमे°

पुत्रो मङ्गलराजस्य तिल्हो राजान्यवंशजः । तत्र चिब्बाकरमुखास्तन्निक्षणश्च प्रमिम्यिरे ॥५१०॥
राजानीके सन्नपालः प्रवीरप्रवरोभवत् । भूरिसैन्येन गर्गेण नाल्पसैन्योपि यो जितः ॥५११॥
सस्तम्भ्य विजयक्षेत्रे लक्कूकाद्यैर्विसर्जितैः । धीरो राजा बलं भग्नं स्वयं गर्गोन्मुखं ययौ ॥५१२॥
सोन्विष्य गर्गेण हतान्योधान्राजीकृतान्बहून् । निरदाहयदन्येद्युरसंख्येयैश्चितामिभिः ॥५१३॥
बलिना भुभुजा गर्गः पीड्यमानः शनैः शनैः । ततः स्वबसतीर्दग्ध्वा हलाह्लाभिमुखोभवत् ॥५१४॥
स तत्र रत्नवर्षाख्यं गिरिदुर्गं समाश्रितः । हताश्वानुचरैस्त्यक्तो नृपेणारादवेष्टयत ॥५१५॥
अन्वारूढेन तत्रापि सन्नपालेन वेष्टितः । चरणौ शरणीचक्रे राज्ञो दस्वोच्चलात्मजम् ॥५१६॥
अन्तिकस्थ नृपे कर्णकोष्ठजं मल्लकोष्ठकम् । विरुद्धं रुद्धवत्यापु गर्गो विश्वासमाययौ ॥५१७॥
गृहीतप्रणतिस्तस्य नष्टेषु विजयादिषु । शमितोपप्लवो राजा विवेश नगरं शनैः ॥५१८॥
गत्वाथ लोहरं न्यस्य बद्ध्वा सल्हणलोठनौ । स कल्हसीमपालाद्यै रेमे समेत्रितो नृपैः ॥५१९॥
भूयः प्रविष्टः कडमीरान्सेख्यः सर्वातिशायिभिः । गर्ग प्रसादैरनयद्वृद्धिमन्त्रिकादिकैः ॥५२०॥
भीष्मार्कप्रतिमे तस्मिन्हर्षादिनावनुचक्रतुः । महादेवी कुमारश्च द्रुमच्छायावनानलौ ॥५२१॥
डामरौ देवसरसोद्भवौ विजयगोत्रिणौ । वृहट्टिक्कस्तथा सूक्ष्मटिक्को वेलां प्रचक्रतुः ॥५२२॥
सानाथ्यकाङ्क्षिणौ पार्थिवस्य प्रविशतः पुरः । लोकपुण्ये तस्थतुस्तौ क्रन्दद्भिः स्वानुगैः समम् ॥५२३॥
विजये गर्गसंबन्धात्सदाक्षिण्यो महीपतिः । सदाचारे परित्यज्य वेत्रिभिस्तावताडयत् ॥५२४॥
तौ मानिनश्च बद्ध्वास्यः कृष्टशस्त्रास्ततो व्यधुः । साध्वसं सुमहत्तस्मिन्ये प्रहरन्तो महीपतेः ॥५२५॥
श्वपाकोभोगदेवाख्यः कृपाण्या प्राहरन्नृपम् । धीरो गज्जकनामा च करवालेन पृष्ठतः ॥५२६॥
सावशेषतया भूपस्यायुषो मोघतां ययुः । द्विषत्प्रहतयो बाहतुरगी तु व्यपद्यत ॥५२७॥
नृपस्यान्तरयन्वैरिप्रहतिं बाणवंशजः । निहतस्तत्र भृङ्गारमीडः सादीशमस्यकः ॥५२८॥
सैनिकैस्तैर्वृहट्टिक्काभोगदेवादयो हताः । सूक्ष्मटिक्कस्तु निस्तीर्णो हेतुर्भावितिं विव्रवे ॥५२९॥
शूले व्यापादिता गज्जकादयो द्रोहमंश्रिताः । सदेहितासुस्त्रियासीद्राजा गर्गानुकूल्यभाक् ॥५३०॥
न भवेत्पविपातेपि प्रमयः समयं विना । प्रसन्नमप्यमून्हन्ति जन्तोः प्राग्वयैः पुनः ॥५३१॥
ज्वालाभिरौर्वदहनस्य पयोधिमध्ये न म्लानतामपि हि यानि मुहुः स्पृशन्ति ।
तान्येव यान्ति विलयं किल मौक्तिकानि कान्ताकुचेषु युवभावभुवोष्मणापि ॥५३२॥
प्राक्सेवामपि विस्मृत्य परोक्षेकासहिष्णुना । मण्डलात्सन्नपालाद्या निरवास्यन्त भूभुजा ॥५३३॥
संबन्धी काकवंश्यानां यशोराजाभिधस्ततः । महत्तममङ्गल्याख्यं राजां निर्वासितो ययौ ॥५३४॥
तमन्यांश्च विनिर्यातान्देशाद्गर्गसमृद्धिमान् । ऐल्कलक्ष्यप्रतिष्ठः स राजः प्रत्यभियोगिताम् ॥५३५॥
तत्पुत्रः कान्दमार्गेण विविक्षुः क्षमापसैनिकैः । यशोराजे क्षते प्रासः प्रत्यावृत्य ययौ भयात् ॥५३६॥
अथान्येष्वपि भृत्येषु राजा निर्वासितेषु सः । मिलितेषु पथां यावद्यथावदुपलब्धवान् ॥५३७॥

---

५१४. [1]) Emended, A फलाहा°. C हलाहाण्डासान् viii 425 ५१७. [2]) Emended, A with diplography मल्लकोष्ठका प्रकम् ५१४ [3]) Emended with C. A राजा

उपरागे नवे सज्जे पार्वतीयास्त्रयो नृपाः । चाम्पेयो जासटो वज्रधरो बब्बापुराधिपः ॥५३८॥
राजा सहजपालश्च वर्तुलानामधीश्वरः । युवराजो त्रिगर्तीवल्लापुरनरेन्द्रयोः ॥५३९॥
बल्ह आनन्दराजश्च पञ्च संघटिताः क्वचित् । प्रस्थानार्थं कृतपणाः कुरुक्षेत्रमुपागताः ॥५४०॥
आसमत्याहवं तावदभ्येत्य नरवर्मणः । प्रापुर्भिक्षाचरं तेन दत्तपाथेयकाञ्चनम् ॥५४१॥कुलकम् ॥
स जासटेन संबन्धिस्नेहाद्धितसत्कृतिः । नीतोन्यैश्च प्रथां भूपैर्वल्लापुरमथाययौ ॥५४२॥
देशाद्विनिर्गतैर्वैरम्बप्रमुखैर्वर्धितप्रथे । तस्मिन्प्राप्ते सहस्रस्य प्रतिष्ठा लघुतामगात् ॥५४३॥
पौत्रोयं हर्षदेवस्य क एते राज्य हत्यय । उक्त्वा त्यक्ता सहस्रादीस्तमेवाशिश्रियन्नृनाः ॥५४४॥
कृतज्ञभावमुन्मृज्य संबन्धिस्नेहमोहितः । दर्यकोो राजपुत्रस्तं राज्ञा निर्वासितोप्यगात् ॥५४५॥
पुत्रः कुमारपालस्य तत्पितुर्मातुलस्य सः । वृद्धिं मुस्सलदेवेन पुरा निन्ये हि पुत्रवत् ॥५४६॥
प्रेरितो युवराजेन जासटेन च कन्यकाम् । वल्लापुराशः प्रददौ भिक्षवेथ स पद्मकः ॥५४७॥
तद्देशठक्कुरो भूपान्संघट्याखिलांस्ततः । तमैच्छद्भूयपालाख्यः कर्तुं वैतामहे पदे ॥५४८॥
तां वार्तां श्रुतवान्राजा यावदासीत्समाकुलः । गयपालो हतस्तावद्भोजैश्छद्मना बली ॥५४९॥
पद्मके तान्प्रतिगते योद्धुं प्रधनमध्यगः । भिक्षाचरश्चमूधुर्यो दर्यकोपि व्यपद्यत ॥५५०॥
तेन प्रधाननाशेन ततो भिक्षाचरो ययौ । अकिंचित्करतां मेघ इवात्यग्रहवारितः ॥५५१॥
आसमत्यां प्रयातायां क्षीणे पाथेयकाञ्चने । श्वशुरोपि ययौ तस्य शनैर्मन्दोपचारताम् ॥५५२॥
चतुष्पञ्चानि वर्षाणि तिष्ठञ्जासटमन्दिरे । मासाच्छादनमात्रं स ततः क्लेशात्समासदत् ॥५५३॥
ठक्कुरो देङ्गपालाय चन्द्रभागातटाश्रयः । दत्त्वा सुतां बप्पिकाख्यां तं निनाय निजान्तिकम् ॥५५४॥
प्राप्तसौख्यो वसंस्तत्र कंचित्कालं भयोज्झितः । स राजबीजी दैन्येन शैशवेन च तत्यजे ॥५५५॥
तदन्तरे साहसिकः प्रासः साहस्रिरुन्मदः । गतागतानि कुर्वाणः संरम्भमनयत्पृथम् ॥५५६॥
स सिद्धपथमार्गेण विचिक्षुर्विद्रवोन्मुखः । स्वैरेव भृत्यैर्भूभर्तुर्बद्ध्वा पापैः समर्पितः ॥५५७॥
तत्रोत्पिञ्जे परं सत्त्वं सज्जपालस्य पप्रथे । खिन्नोपि द्रोहविमुखो यस्स देशान्तरं ययौ ॥५५८॥
तस्मिंश्चभूरे कुलीने च किं वाच्यं स दिगन्तरे । शौर्येणैव यशोराजः पप्रथे यत्तदद्भुतम् ॥५५९॥
अथ राजा नित्रार्याद्यान्सहेलादीन्महत्तमान् । सर्वाधिकारे विदधे कायस्थं गौरकाभिधम् ॥५६०॥
स तापसस्य संबन्धी कस्यचिद्विज्जयेश्वरे । सेवया लोहरस्यस्य तस्य वाल्लभ्यमाययौ ॥५६१॥
शमिते पूर्वकायस्थवर्गे तेन ततः क्रमात् । नीतः सर्वाधिकारित्वं सोन्यामेव स्थितिं व्यधात् ॥५६२॥
अशेषकर्मस्थानेभ्यो वृत्तिं राजोपजीविनाम् । निर्वार्य कोशे भरणं तेनाकार्यनिशं प्रभोः ॥५६३॥
अदिक्षा पाप्मिनस्तस्य नाशायि क्रूरता जनैः । मधुरिम्णा विषस्येव शक्तिः प्राणापहारिणी ॥५६४॥
न्यधात्कृपणवित्तं स पूर्वसंचितनाशकृत् । विभुद्धे नृपतेः कोशे हिमे हिममिवाम्बुदः ॥५६५॥
कोशः कृपणवित्तेन प्रविष्टेन हि दूषितः । भुज्यते भूमिपालानां तस्करैरय वारिभिः ॥५६६॥

---

५३८. [1]) Comp. VII 588. ५४५ [1]) A, with diplography दर्यको राजको राजपुत्रस्तं. ५५०. [1]) Emended; A प्रतिगतो. ५५२ [1]) Emended, A क्षणे. ५६३. [1]) Emended, A निर्वार्य.

लोभाभ्यासेन भूयोपि संचिन्वन्कोशमन्वहम् । आस्ते स्म लोहरगिरौ प्रहिण्वन्सर्वसंपदः ॥५६७॥
गौरकाश्चर्मिभिर्वृष्टपञ्चकाद्यैर्नियोगिभिः । विधीयते स्म निःसारा महोत्पातैरिव क्षितिः ॥५६८॥
उच्चलक्ष्मापतौ शान्ते मूर्धारूढशिलोपमे । अबाधन्त पुनर्लोकं व्याधा इव नियोगिनः ॥५६९॥
प्रशस्तकुलशास्त्रान्ते तद्भ्रातृतनयः परम् । कायस्थः कनको नाम श्रण्यामकृत संपदम् ॥५७०॥
नानादिगन्तरायातो दुर्भिक्षपतितो जनः । येनाविच्छिन्नसत्रेण शान्तव्यापद्व्यधीयत ॥५७१॥
संजातमुज्वलस्यान्ते येषां तत्त्वपरीक्षणम् । त एव चक्रिरे राज्ञा प्रमत्तेनाधिकारिणः ॥५७२॥
ह्रारे तिलकसिंहः स तादृक्तेन व्यधीयत । राजस्थाने च जनकः काणस्तस्य सहोदरः ॥५७३॥
प्रतापैर्नृपतेस्तीक्ष्णैः करमाक्रान्तमण्डलः । जिताह्वाराधिपः सोपि स्वीचकारोरशाधिपात् ॥५७४॥
काकवंश्यस्तु तिलकः क्ष्माभुजा दत्तकम्पनः । निन्ये प्रकम्पमहितान्प्रकम्पन इव द्रुमान् ॥५७५॥
प्राग्यशाह्वभृता द्रोड्डराजस्थानाधिकारिणा । नृपप्रतापैरहिताः सज्जकेनापि निर्जिताः ॥५७६॥
काकवंशाभ्यर्णात्प्रराजद्वारेण धीमता । अट्टमेलकभूत्येनाप्यवापीष्टेन मन्त्रिता ॥५७७॥
एवं स्वाहंक्रियात्यक्तगुणापेक्षेण मन्त्रिणः । कुर्वतोप्यावयोस्तेन कश्चित्कालोत्यवाहत ॥५७८॥
वितस्तापुलिने सोथ कर्तुं प्रारभतोचतम् । स्वस्य श्वश्वाश्च पत्न्याश्च नाम्ना हरगृहत्रयम् ॥५७९॥
उत्पातवह्निना दग्धो निःसंख्यधनदायिना । तेन दिद्दाविद्दारोपि नूतनत्वमनीयत ॥५८०॥
पुरीमद्दिलिकां जातु स प्रयातोल्लिकस्थितैः । अद्रिः प्रैर्यत कल्हाद्यैर्गर्गोच्छेदाय भूपतिः ॥५८१॥
गार्गीः कल्याणचन्द्राख्यस्तानतिक्रम्य हि स्फुरन् । मृगयादिक्षणे तेषामसूयामुदपादयत् ॥५८२॥
सर्वोभ्यधिकसामर्थ्यं तं निधाय निवेश्य ते । नित्योपजपनैर्गर्गे विक्रियामनयन्नृपम् ॥५८३॥
बद्ध्वा त्वां लोहरे भूमृदिच्छति क्षेमुमित्यथ । गर्गः शशङ्के भृत्येन राज्ञा चैकेन बोधितः ॥५८४॥
ततः स सद्यस्तत्र पलाय्य स्वभुवं ययौ । दिनैर्भूपोपि संप्राप्तः प्रविवेश स्वमण्डलम् ॥५८५॥
अन्योन्यशङ्कया भेदं यातयो राजगर्गयोः । चाक्रिकैः कृतसंचारैर्वैरं प्रौढिमनीयत ॥५८६॥
स्यालं गर्गस्य विजयं स्नेहदोषवशंवदः । समीपात्स त्यजन्राजा पश्चात्तापेन पस्पृशे ॥५८७॥
कारायां गर्गशत्रुर्यस्तेन पूर्वं व्यधीयत । स मल्लकोष्टकस्तस्मिन्कालेमुच्यत बन्धनात् ॥५८८॥
निबद्धयौनसंबन्धं डामरैरपरैः समम् । तं कारयित्वा सामर्षो निनाय बलितां नृपः ॥५८९॥
शनैर्युद्धाय निर्याते राजसैन्येथ पूर्ववत् । गर्गेण कदनं चक्रे योधानाममरैर्भरैः ॥५९०॥
तत्र सर्वातिशायिन्या वीरवृत्त्या नृपाश्रितः । शमालाडामरः प्राप प्रथां पृथ्वीहरः परम् ॥५९१॥
रणे ह्रारपतेर्गर्गनिर्जितस्य पलायने । शौर्यं तिलकसिंहस्य आप सर्वोपहास्यताम् ॥५९२॥
हतशेषाः क्षताः शस्त्रवरत्वादि त्याजिता भटाः । तदीया गर्गचन्द्रेण कारुण्यात्केपि रक्षिताः ॥५९३॥
वह्निसात्क्रियमाणेषु वीरदेहेषु सर्वतः । राजसैन्ये चिताग्नीनां गणना कापि नाभवत् ॥५९४॥
कृष्टसैन्येन राज्ञाथ गर्गो निर्दग्धमन्दिरः । सत्यज्य लहरे प्रायान्निरि धुडावनाभिधम् ॥५९५॥
गिरिमूलोपविष्टस्य भूपतेः सैनिकैः समम् । तेषु तेष्वकरोत्सित्यं गिरिमार्गेषु संगरम् ॥५९६॥

५७० 1) Emended with C, A प्रकम्पं सहिता°. ५७७ 1) Emended, A °श्रयान्प्राप्त°. ५८९. 1) Thus A; cf. viii. 761 881 1947 (C)

कूटयुद्धैर्नृपानीकं प्रतिराज्युपतापयन् । रणे त्रैलोक्यराजादिप्रमुखांस्तन्निरणैषीत् ॥५९७॥
फाल्गुने[1] हिमसंभारभीमे परिमितानुगः । स धीरो राज्यपि रिपौ न धैर्येण व्ययुज्यत ॥५९८॥
धैर्यवान्काकवंध्यस्तु तिलकः कम्पनापतिः । परं शिखरिभूदुर्गस्थं शक्तोभूत्तं प्रधाविनुम् ॥५९९॥
पीडितस्तेन संप्रेष्य स्वभार्यातनयेन्तिकम् । निन्येनुकूलनां भूपं प्रसादच्छादितक्रुधम् ॥६००॥ 600
गूढमन्युर्नृपः संधिं बद्ध्वा प्रचलितस्ततः । तं मल्लकोष्टकं वृद्धिं निनाय न पुनः शमम् ॥६०१॥
लेहेय लङ्घेर द्वित्रान्मानविशदे नृपे । स मल्लकोष्टकासन्नस्पर्धी नीचविमाननाम् ॥६०२॥
तन्मध्ये नृपतिर्गूढं विभेदं तद्बलं नयन् । तदीयानकरोद्दूत्यान्कर्णादिन्स्वहितावहान् ॥६०३॥
स खिन्नो नीचदायादसमशीर्षिकयाथ तैः । प्रेरितः पार्थिवाभ्यर्णं सदारतनयोविशत् ॥६०४॥
ज्ञातुं प्रवृत्तः पार्श्वस्थं खानद्रोण्युपरिस्थितः । अथैकदा नमाक्षिप्तं शस्त्रमत्याजयन्नृपः ॥६०५॥ 605
कुर्यादास्थामवष्टम्भे कोन्यः पौरुषगर्वितः । आक्षेपसमये सोपि यत्कैश्च्यं भीरुवर्यया ॥६०६॥
उत्खातरोपितनृपः क्व नु सोभिमानः कार्पण्यभागितरलोकसमा क्व वृत्तिः ।
यद्भावजं नटयति प्रकटं विधातुरिच्छैव यत्त्रगुणपङ्क्तिरिवात्र जन्तुम् ॥६०७॥
अशकन्युधि ये द्रष्टुमपि तं नास्य ते शठाः । केपि राजप्रिया बाह यन्थिबद्धौ तथा व्यधुः ॥६०८॥
श्रीसंग्रहमठाभ्यर्णमन्दिरस्था नृपे स्वयम् । संक्रान्ते[2] प्राङ्गनं युद्धात्कन्याणाद्या व्यरंसिषुः ॥६०९॥
जीवन्तं पितरं श्रुत्वा विंदहो गर्गनन्दनः । सान्त्वमानः स्वयं राज्ञा कृच्छ्राच्छस्त्रं समार्पयत् ॥६१०॥ 610
गर्गः सदारतनयो राजोकस्येव भूभुजा । उपाचर्यत दाक्षिण्याद्बद्धो भोगैर्मनोज्ञैर्नैः ॥६११॥
गार्गिः पलाय्य यातोपि चतुष्कों निजमन्दिरात् । अवर्णभाजा कर्णेन दृष्ट्वा राज्ञः समार्पितः ॥६१२॥
रूढच्छद्मनृपोपस्थ प्रसादस्य महीभुजः । अन्तःभुद्धिविहीनस्य व्रणस्येव न निश्चयः ॥६१३॥
दरत्राजे मणिधरे दिदृक्षात्रागते नृपः । तत्संगमाय निर्यातो गर्ग भृत्यैरघातयत् ॥६१४॥
द्वित्रान्मासान्सोनुभूतकारागारस्थितिर्निशि । सत्रा त्रिभिः सुतैः कण्डबद्धरज्जुर्न्यपात्यत ॥६१५॥ 615
निष्ठां बिम्बमुखाच्चिन्ये ययैव स नृपानुगैः । तयैव कण्डबद्धाश्मा सपुत्रोक्षिप्यतामभसि ॥६१६॥
तं चतुर्नवते वर्षे हत्वा भाद्रपदे नृपः । सुखेच्छुः प्रत्युत प्राप दुःखभुद्भवत्रिप्रवः ॥६१७॥
कल्हे कालिञ्जराधीशे महादेव्याश्च मातरि । मल्लाभिधायां शान्तायां स ततोभूत्सुदुःखितः ॥६१८॥
तन्मध्ये नागपालाख्यः सोमपालस्य सोदरः । तेन प्रतापपालाख्ये हते भ्रैमातुरेयजे ॥६१९॥
शङ्कितस्तन्निहन्तारं हत्वामात्यं पलायितः । त्यक्तस्वदेशः शरणं ययौ मुस्लमभुभुजम् ॥६२०॥ 620
बुद्धः स कारणात्तस्मात्यणय वशवर्तिनः । अगृह्णत्सोमपालस्य निश्चिकायाभिषेणनम् ॥६२१॥
निश्चित्य सर्वोपायानामसाध्यं विधुरे नृपम् । स भिक्षाचरमानिन्ये तस्य वल्लापुराद्रिपुम् ॥६२२॥
निशम्यानीतवायादं तं प्रकोपाकुलो नृपः । दत्तास्कन्दोविशत्तीव्रतेजा राजपुरीं ततः ॥६२३॥
दत्त्वा राज्ये नागपालं सोमपाले पलायिते । सप्त मासान्स तत्रासीत्तांस्तान्संत्रासयन्रिपून् ॥६२४॥

---

५९८. [1]) A फाल्गुणे ६०४. [2]) Emended with C, A पार्थिवा° ६०५. [1]) Emended, A °शिखरात् ६०९. [2]) Emended, A सद्मसे प्रा° ६१०. [1]) Emended with C, A समर्पयत्

राज्ञां वज्रधरादीनां राजा वज्रधरोपमः । सेवावसरदानेन प्रसादविवशोभवत् ॥६२५॥
भ्रमतां चन्द्रभागादिसन्तीरेषु सर्वतः । तत्सैन्यानां मुखमपि द्रष्टुं शेकुर्न वैरिणः ॥६२६॥
अयमगम्यभवत्तस्य तिलकः कम्पनापतिः । पृथ्वीहरो डामरश्च मार्गरक्षणदीक्षितः ॥६२७॥
धार्मिको नृपतिर्ब्रह्मपुरीं देवगृहांश्च सः । मण्डलं द्विषतो रक्षन्प्रपेदे मौलिकं फलम् ॥६२८॥
तस्येन्द्रविभवस्यान्यत्सामस्त्यं वर्ण्यते कियत् । आयायावश्वधासोपि सैन्ये यस्य स्वमण्डलात् ॥६२९॥
तत्र प्रसङ्गे तत्राग्रीभवन्सुजनवर्धनः । दूरस्थस्यानयद्वृद्धिं गौरकस्योपरि क्रुधम् ॥६३०॥
राष्ट्रगुप्त्यै स्वयं राज्ञा स्थापितः स स्वमण्डले । अज्ञायि पैशुनाशुद्धबुद्धिना निखिलार्थहृत् ॥६३१॥
तत्सबन्धेन जनकं स निन्दन्नगराधिपम् । मनस्तिलकसिंहस्य तङ्कातुरुदवेजयत् ॥६३२॥
हत्वापिकां त्वस्थाथ क्रुद्धः पर्णोत्ससंभवम् । अनन्तात्मजमानन्दाभिधं द्वारापिं व्यधात् ॥६३३॥
सोमपालादयः श्लाघ्यास्तदा प्रकृतयोभवन् । राज्ञस्तथा स्थितस्यापि न याः सविधमाययुः ॥६३४॥
स पञ्चनवते वर्षे वैशाखेथ स्वमण्डलम् । प्राविशन्नागपालोपि राज्यभ्रष्टस्तमन्वगात् ॥६३५॥
दुःसहातङ्कदुष्टेन लोभेन क्षोभितस्ततः । अदण्डयच्च वास्तव्याननयच्चाल्पतां व्ययम् ॥६३६॥
निवार्य गौरकं कार्यात्कार्यैणस्तत्समाश्रितान् । तस्य दण्डयतः सर्वे विरागं मन्त्रिणो ययुः ॥६३७॥
अकाण्डे व्यवहारेषु स विपर्यासितेष्वभूत् । अवसन्नधनो गाढमवीद्यात्रवमन्त्रिणाम् ॥६३८॥
सौवर्णीरिष्टिकाः कृत्वा प्राहिणोच्छोहरान्तरे । काञ्चनाद्रिप्रतीकाशान्सवर्णराशीनढौकयत् ॥६३९॥
अथ दण्डयितुं गर्गभृत्यान्दण्डाधिकारिणम् । लट्टरेकृत गर्गस्य मन्त्रिणं गज्जकाभिधम् ॥६४०॥
तं दण्डभीतैर्गर्गस्य सेवकैराश्रितस्ततः । विश्वस्तमवधीत्कुध्यन्कृष्णना मल्लकोष्ठकः ॥६४१॥
लट्टरे विद्रुते राजा हैमातुरमथाभजम् । मल्लकोष्ठस्यार्जुनाख्यं बबन्ध सविधस्थितम् ॥६४२॥
हस्तं च सहचन्द्रस्य पुत्रं गोत्रिणमध्यसौ । बद्ध्वा व्यधाद्विद्रुकाख्यं तस्य तद्भातरं हितम् ॥६४३॥
पूर्ववैरं स्मरन्सूर्य सपुत्रं तं परांस्तथा । बबन्धानन्दचन्द्रादीन्नीत्युल्लङ्घनमाचरन् ॥६४४॥
निर्गते लट्टरे मल्लकोष्ठके विद्रुते ततः । आरोप्यार्जुनकोष्ठं तं भुले कोपाद्व्यपादयत् ॥६४५॥
निवेदय सैन्यं तत्राथ प्रविष्टस्य पुरं ययुः । डामरा निखिलास्तस्य वैरं विश्वस्तघातिनः ॥६४६॥
क्रुध्यन्पृथ्वीहरायापि कृतसेवाय मन्त्रिभिः । आदिष्टैः कम्पनेशायैरवस्कन्दमदापयत् ॥६४७॥
कथं चित्स तु निस्तीर्णो जयन्तीविषयैकसः । बन्धोः क्षीराभिधानस्य प्रविवेशोपवेशनम् ॥६४८॥
दिनेवन्तिपुरादीनां पुराणामन्तरेण तम् । व्रजन्तं विधुरं केचिन्नाशकन्बाधितुं द्विषः ॥६४९॥
तद्वैधुर्यविधानं तत्प्रजासंहारकार्यभूत् । प्रमादाद्भूपतेः क्रुद्धवेतालोत्थापनोपमम् ॥६५०॥
क्षीरोय तीक्ष्णधीर्वृद्धः सह पृथ्वीहरेण सः । अढौकयच्छमाङ्कासान्तरेष्टादश डामरान् ॥६५१॥
अभेद्यसंवांस्ताञ्जेतुं निर्यातो विजयेश्वरम् । न्ययुङ्क्त भूभृत्संभ्रान्तस्तिलकं कम्पनापतिम् ॥६५२॥
संग्रामैः खण्डशः कुर्वन्स तानतुलविक्रमः । विद्रावयामास रयैः पुरोवायुरिवाम्बुदान् ॥६५३॥

---

६२६. [1]) Emended, A तान्सैन्य°. ६३१. [1]) Emended with C, A स्थापितां. ६३३ [1]) Emended, A अनन्ताधिपमा°. Cf. viii. 713. 1005. 1042 ६३६. [1]) Emended, A क्षोभतस्तत. ६४० [1]) Emended with C; A °कारिणाम्. ६४५. [1]) Emended with C; A परंस्त°. ६५०. [1]) Emended with C, A प्रमाद्भूपते.

संमानावसरे तस्य जित्वायातस्य डामरान् । प्रवेशं प्रत्युत नृपो न प्रादादवमानकृत् ॥६५४॥
स भग्नमानो नगरं प्रविष्टे नृपतौ ततः । खिन्नः स्ववेश्मन्यवसत्स्वामिकार्ये निरुद्यमः ॥६५५॥ 655
संप्राप्ताः समशीर्षिकां विसृष्टैस्तुल्यैर्निरुद्धोदया वैरे विद्विषतां कृता धुरि परं संधौ बहिः स्थापिताः ।
कार्यान्तेद्युतकर्मकौशलकृतावज्ञा विरागस्पृशः सर्पाकीर्णमिवाशु वेश्म गृहिणो भृत्यास्त्यजन्ति प्रभुम् ॥६५६॥
त्यक्तकार्यानुसंधाने तस्मिन्सर्वत्र डामराः । संभूतिं विक्रियां निन्युः कृषिं क्षयघना इव ॥६५७॥
आतङ्कोद्वेजितैर्विप्रैः कृतवापैः पुरे पुरे । वह्नौ हुतामिषैर्घोरा कुकीर्तिरुदपद्यत ॥६५८॥
उपसर्गेण तुरगाः करभाश्च क्षयं गताः । न्यवेदयन्मण्डलस्य प्रत्यासन्नमहाभयम् ॥६५९॥
प्रत्यासन्नाशुभा कम्पं भयेन जनता दधे । आसन्नवपतना वातेनेव द्रुमावलिः ॥६६०॥ 660
अथ षण्णवताब्दस्य प्रारम्भे डामरावलिः । ऊष्मस्पृष्टा हिमानीव बभूवापतनोन्मुखी ॥६६१॥
प्रथमं देवसरसाद्विप्लवप्रसरस्ततः । मुखं व्यथावहो गण्ड इव पाकं व्यदर्शयत् ॥६६२॥
एककार्यत्वमानीय टिक्कादीन्गोत्रजान्बली । स्यामस्थं विजयोभ्येत्य राजानीकमवेष्टयत् ॥६६३॥
तत्र कायस्थपुत्रोपि स्यामस्थानीकनायकः । संरम्भं नागवद्वाख्यः सेहे तस्य चिरं युधि ॥६६४॥
कथंचिदथ भूपेन प्रार्थितः कम्पनापतिः । निर्ययौ स्वामिदौरात्म्यसंस्मृतिश्रथसौष्ठवः ॥६६५॥ 665
विजयेन समं तस्य वद्धमूलेन संयुगे । संदेहं प्राणवृत्तिश्च जयश्रीश्चासकृद्ययौ ॥६६६॥
प्रवृद्धे मल्लकाष्ठेपि प्रयाते लहरान्तरे । वैशाखे निर्ययौ राजा यामं धल्योरकाभिधम् ॥६६७॥
सैनिकाः शत्रुभिस्तस्य भ्रामितास्तत्र रात्रिषु । अरतिं निन्यिरे घोरैः स्वप्नैरिव मुमूर्षवः ॥६६८॥
बाहुमात्रसहायेन सर्वशक्तिमतां वरः । येन हर्षनरेन्द्रोपि विधुरेणोदपाद्यत ॥६६९॥
भूरिन्यारात्रिंशतवतो विक्रमेण महीमिमाम् । साप्तसानां न संख्यास्ति जामदग्न्यस्य यस्य वा ॥६७०॥ 670
स संकुचितविक्रान्तिः कालस्य बलवत्तया । तत्र भग्नबलोकस्माद्व्यधुन्यत जयश्रिया ॥६७१॥
ततः पलायिते तस्मिन्नकस्मादेत्य सज्जकम् । हाडिग्रामस्थितो वीरं भद्रं पृथ्वीहरोनयत् ॥६७२॥
पलायितस्यानुसरंस्तस्य पृष्ठं स निष्ठुरः । प्रतापी नगराभ्यर्णे दग्ध्वा नागमठं ययौ ॥६७३॥
स चान्ये च ततः क्रूरा डामराः सर्वतोनयन् । राज्ञो राजाश्रितानां च चारकेभ्यस्तुरंगमान् ॥६७४॥
निस्त्रिंशतां नीत्रकोपस्ततो भूपः समाश्रयन् । अभाग्यभागिनां योग्यामाललम्बे कुपद्धतिम् ॥६७५॥ 675
नीत्वे पृथ्वीहरस्याथ हत्वा डामरमन्तिकम् । पृथ्वन्यस्तविस भोज्यमिव रात्रौ व्यसर्जयत् ॥६७६॥
विसृज्य भ्रातरं हम्ब विद्वत्कस्य तथैव सः । अन्येषां प्राहिणोत्पार्श्वे भ्रातॄन्पुत्रांश्च विप्रुतः ॥६७७॥
मातरं जघ्यकाख्यस्य सिंफिञ्चामामवासिनः । विच्छिन्नकर्णघ्राणां च कृत्वाभ्यर्णं व्यसर्जयत् ॥६७८॥
सपुत्रं सूर्यकं शूलेधिरोप्य नगरे परान् । भूरिन्यवध्यानवध्यांश्च क्रोधाक्रान्तो न्यपातयत् ॥६७९॥
कालस्येवोल्बणस्याथ तस्य सर्वेपि शङ्किताः । आभ्यन्तराश्च बाह्याश्च विरागं प्रतिपेदिरे ॥६८०॥ 680
येनैवानीतिमार्गेण हारितं हर्षभूभुजा । निन्दन्नप्यादधे तं स राज्ये व्यवहरन्स्वयम् ॥६८१॥

---

६५६ [1]) Thus corr. by A, from पद. ६६५ [1]) Emended, A °दौरास्यास°. ६६९. [1]) मात्र supplied by A_3. ६७४ [1]) Emended; A चरकै° ६७७. [1]) Emended, A तथैव

प्रविष्टानां युद्धे गहनकविकर्मप्रणयिनां प्रसक्तानां द्यूते नरपतिधुरायां विहरताम् ।
तटस्थत्वे वक्तुं स्खलितमसकृत्सोऽर्हति परं प्रयोगे वैकल्यं स्वयमविकलो यो न भजते ॥६८२॥
नीत्वप्रयत्नो नृपतिस्तत्रापि विहितोद्यमः । निनाय मल्लकोष्ठादीन्किंचिन्मन्दप्रतापताम् ॥६८३॥
अथानिनाय विजयो विषलाटाध्वना शनैः । नप्तारं हर्षदेवस्य तं भिक्षाचरमन्तिकम् ॥६८४॥
विविक्षन्देवसरसं कम्पनापतिना ततः । विद्राव्यमाणः श्वभ्रात्पधावन्सोपतल्पितौ ॥६८५॥
परिज्ञाय हतस्याथ स तस्य विजयी शिरः । विससर्जान्तिकं राज्ञः फलं जयतरोरिव ॥६८६॥
तदप्यत्यद्भुतं कर्म भजन्भूभृत्कृतघ्नताम् । न तस्य तुष्टस्तुष्टाव न चकार च सत्क्रियाम् ॥६८७॥
अवजानञ्छ्रघानामुं श्वभ्राख्यः कम्पनापतिः । तत्र कस्मात्त्वयोत्सेक इति तं संदिदेश च ॥६८८॥
सर्वप्रकारं तिलकः कृतज्ञं नृपतिं विदन् । अथ जातविरागः स द्रोहैर्नामुख्यं समादधे ॥६८९॥
सतां स्यादनुपालभ्यो भजेद्दैमुख्यमेव चेत् । द्रोहेच्छया स तु तया यथावत्पाल्यनामताम् ॥६९०॥
नेयाशयित्वमथ वोचितकृत्यकुरुत्वं नीतिप्रियाः प्रतिपदं समुदाहरन्तु ।
मानोन्नतास्तु विहितस्तुतयः कृतज्ञैस्त्यक्त्वाप्यमून्परहितं घटयन्ति सन्तः ॥६९१॥
पटं वह्निस्पर्शज्वलितमहिदष्टां त्वचमरेः श्रुतिं यातं मन्त्रं पतननिरतां जीर्णवसतिम् ।
असेवाङ्गं भूपं व्यसनविमुखं खिन्नमजहद्य धीरोप्युत्थानोपहतमहिमा शर्म लभते ॥६९२॥
हत्युपायं परित्यज्य न्याय्यं ये प्रभवे क्रुधि । द्रोग्धारः कथितास्तेभ्यः केन्ये पापीयसां धुरि ॥६९३॥
जन्मन्येकोपकारित्वं पित्रोः सर्वत्र च प्रभोः । अधिकाः पितृघातिभ्यः पापिनस्तत्प्रमुद्गुहः ॥६९४॥
निहते विजये शाम्यप्रभावेष्वपरेष्वपि । नाज्ञायि कस्यचित्स्वास्थ्यं तत्त्वज्ञेनान्तरात्मनः ॥६९५॥
कंचित्क्षणं सोपसृतः प्रत्युतोपतापकृत् । विप्रवप्रसरो ज्ञातः सर्वैर्हुड इवोन्मदः ॥६९६॥
आनिनीषुस्ततो मल्लकोष्ठौ[1] भिक्षाचरं पुनः । विषलाटां[2] तस्य पार्श्वे निजं सैन्यं व्यसर्जयत् ॥६९७॥
कम्पनेशस्तमायान्तं द्रोग्ध्राख्यावेदयत्ततः । राज्ञा न्यषेधि तद्रोधादेवं च समदिश्यत ॥६९८॥
एनं वर्त्मन्यनुद्गाने त्यज हन्यामहं ततः । पुरोगतं मृगव्याप्तः शृगालमिव वाजिभिः ॥६९९॥
द्वैराज्यकार्यमर्मज्ञभावेपि विधिवोदितः । कर्तव्ये तत्र शाठ्यं स नृपतिः प्रत्यपद्यत ॥७००॥
मर्मराजमुखादेवं लब्ध्वा द्रोग्धृथ डामरान् । तिलकोकारयच्छैलमार्गेभिक्षाचरागमम् ॥७०१॥
स्थाने स्थाने ततः प्राप ततः कर्णोपकर्णिका । जनानां या ख्यातिर्हेतुर्भिक्षो राज्ञस्तु भीतिदा ॥७०२॥
नासंस्कृतं वक्ति शिला भिनत्त्येकेषुणा दश । अभ्रान्तो योजनशतं यात्यायाति च संचरन् ॥७०३॥
इत्यादितादृद्भावास्यभिक्षुस्तुत्यानयज्जनः । निखिलान्पलितध्वेनलम्बकूर्चोपि कौतुकम् ॥७०४॥ युग्मम् ॥
भविष्यन्निव साम्राज्यस्यैक एकोर्धभागभाक् । वार्तामव्यवहार्योपि भिक्षोरूचेन्नियेष च ॥७०५॥
सरित्स्नानगृहे स्नान्तो वृद्धाः क्षीणनियोगिनः । राजवेश्मन्यगणिता नाममात्रनृपात्मजाः ॥७०६॥
स्वभावदुर्नयाः केचिद्योधाश्चाश्वकाङ्किणः । कारयन्तोप्युपाध्यायाः शिष्यान्किंकरवर्णं नखैः ॥७०७॥

---

६९९ [1]) Emended; A °कोष्ठ —[2]) Emended, A विषलाटं Cf. viii. 177, 1074, 1664(C). ७०१. [1]) Emended, A °चरागम. ७०४ [1]) A_1 writes २ instead of युग्मम् ७०७. [1]) Thus corr. by A_1 from A_1 शिष्यान्किङ्क°.

वृद्धाः सुरीकोनर्तक्यो देवप्रासादपालकाः । वणिजो भुक्तनिक्षेपाः पुस्तकभ्रातृतत्पराः ॥७०८॥
प्रायोपवेशकुशलाः पारिषद्यद्विजातयः । शत्रिणः कार्षकप्राया नगरोपान्तडामराः ॥७०९॥
सुखयन्तः स्वमन्यांश्च किमप्युत्पिञ्जवार्तया । एते प्रायेण देशेस्मिन्पार्थिवोपद्रवप्रियाः ॥७१०॥कुलकम्॥ 710
प्रवर्धमानया भिक्षाचरागमनवार्तया । वेपमानोभवल्लोको ययौ चिन्तां च भूपतिः ॥७११॥
पृथ्वीहरस्तरुच्छत्रे गिरिकच्छे वसत्रये । राजानीकं बभञ्जाजौ निर्लीयातुलविक्रमः ॥७१२॥
अनन्तकाकयोर्वैदग्ध्यावानन्दहारनायकौ । चक्रे तिलकसिंहं च मन्त्रिणस्त्रीन्पलायिनः ॥७१३॥
निहते विजये ज्येष्ठे शुक्रषष्ठ्यां पराभवम् । तमापादस्य नृपतिः प्राप्याभूद्विवशः पुनः ॥७१४॥
उट्टीकिनैर्गवां वृक्षमुर्धारेण भोगिनाम् । पिपीलककुलस्याण्डोपसंक्रान्त्यैव वर्षणम् ॥७१५॥ 715
प्रत्यासन्नं स राजाथ दुर्निमित्तैरुपद्रवम् । विचिन्त्यायातमुचितं कर्तव्यं प्रत्यपद्यत ॥७१६॥ युग्मम्॥
तृतीयेह्नि शुचेः शुक्ले ततः प्रास्थापयत्सुतम् । देवीमन्यत्कुटुम्बं च स कोटं लोहरं पटुः ॥७१७॥
तानुवत्रतस्तस्य सेतुभङ्गात्परिच्युताः । लोष्टद्विजातयो विप्रा विनस्तायां विपेदिरे ॥७१८॥
स तेन दुर्निमित्तेन खिन्नो हुष्कपुरान्तिकम् । अनुगम्याथ तान्विप्रैर्दैनैर्भूयोविंशत्पुरम् ॥७१९॥
विना पुत्रेण देव्या च स ततः प्रत्यपद्यत । प्रतापेन च लक्ष्म्या च परित्यक्त इवान्यताम् ॥७२०॥ 720
स मन्त्रो व्यापदि शुभः प्रत्यभात्तस्य तद्दशात् । अभ्यन्तरप्रकोपेपि सर्वाभ्युदयभागभूत् ॥७२१॥
स्वयमुत्थापितानर्थः सोपि हर्षनरेन्द्रवत् । अद्यापि सान्वयो नीत्या तया साम्राज्यभोगभाक् ॥७२२॥
श्रावणे लाहरैर्योधैरानीय बलशालिनाम् । भिक्षुमंडवराज्यानां डामराणामथार्पयत् ॥७२३॥
तेपि जन्या इव वरं श्वशुरालयसंनिभम् । प्रविशन्तंस्तं लहरमनुयान्तः ससैनिकाः ॥७२४॥
सभाजयित्वा तान्मल्लकोष्ठमुख्या निजां भुवम् । व्यसर्जयन्क्रमप्राप्तेनेजमाथाय पृथुश्रियः ॥७२५॥ 725
सर्वतः परचक्रेण पर्यापतति पार्थिवः । संग्रहीतुं प्रवृत्ते पदातीनतुलक्षयः ॥७२६॥
तस्मिन्दुर्व्यसने राज्ञि वसुवर्षिणि सर्वतः । अकारि शस्त्रग्रहणं शिल्पिशाकटिकैरपि ॥७२७॥
नगरं सैन्यपतयः प्रतिमार्गमकारयन् । तुरगाऽश्वस्तसंनाहान्व्यायामसमरोन्मुखाः ॥७२८॥
मय्यामस्थिते भिक्षाचमरेश्वरवासिभिः । राजसैन्यैः समं युद्धमगृह्णन्त्रेत्य लाहराः ॥७२९॥
नैर्हिरण्यपुरोपान्ते प्रबन्धारब्धसंगरैः । श्रीविनायकदेवाद्या राजसेनापिपा हताः ॥७३०॥ 730
आय एव रणे यातां राजानीकाद्विरोधिनः । लब्ध्वा वराश्वमायातामन्यन्त नृपश्रियम् ॥७३१॥
राजधान्यन्तिके क्षिप्तिकाख्यायाः सरितस्तटे । पृथ्वीहरश्चकाराजावशेषसुभटक्षयम् ॥७३२॥
तिलके विजयेशस्थेप्यगृह्णन्त्रेत्य डामराः । महासत्त्वेटे युद्धं खड्डवीढोलडौकसः ॥७३३॥
ते रुद्धनगरा दानं क्वापि क्वापि च लुण्ठनम् । वास्तव्यानां विदधिरे विनदन्तो दिवानिशम् ॥७३४॥
निर्यत्सनूर्यपृतना प्रविशच्छस्त्रविक्षताः । क्रन्दद्धतान्निवहाः प्रधावद्गजसैनिकाः ॥७३५॥ 735
प्रसरत्प्रेक्षिनिवहा वहद्दाशुगभारिकाः । सचाय्यमाणसंनाहाः कृप्यमाणतुरंगमाः ॥७३६॥

---

७१६. [1]) A_1 writes here २ instead of युग्मम् ७२५ [2]) य and माथाय supplied by A_3 in space left by A_1 ७२६ [1]) Emended, A संगृहीतु॰ ७३३. [1]) A लोलळौ॰ ७३६ [1]) Emended with C, A व्यहव॰.

आसन्नशान्तसंमर्दप्रसरत्पांसवोनिशम् । दिने दिने राजपथाः उपप्लवविभृङ्गुलाः ॥७३७॥ तिलकम्[1] ॥
प्रतिप्रत्यूषमायात्सु सर्वारम्भेण वैरिषु । अथ ध्रुवं जितो राजेत्यज्ञायि प्रतिवासरम ॥७३८॥
धीरः कः सुस्सलादन्यो न यः प्रत्यभियोगिनाम् । कृच्छ्रेणापि स्वराष्ट्रेण क्रुद्धं धैर्यादपार्यत ॥७३९॥
740 व्रणपट्टाञ्चनं शल्योद्धारं पथ्यधनार्पणम् । शस्त्रक्षतानां सततं कारयन्स व्यलोकयत ॥७४०॥
प्रवासवेतनप्रीतिदायभैषज्यदत्तिभिः । शस्त्रिलोके नरपतेर्नैःसंख्योभूद्धनव्ययः ॥७४१॥
युद्ध एव विपन्नानां क्षतानां च स्ववेश्मसु । नित्यं नरतुरंगानां सहस्राणि क्षयं ययुः ॥७४२॥
तुरंगबहलैरेन्यमाना नृपबलैस्ततः । लाहरा मल्लकोष्ठाश्च मन्दोद्रेकत्वमाययुः ॥७४३॥
भिन्नैराभ्यन्तरैरेव दत्तमन्त्राः सुरेश्वरीम् । ते निर्युर्भिक्षुमल्पेन तन्मार्गेण युयुस्सवः ॥७४४॥
745 सेतुना स्वल्पपार्श्वेन धन्विपायैः सरोन्तरे । अवापि तैर्जयो मौक्तिवाजिभ्यश्च भयं रणे ॥७४५॥
द्रोग्धाथ कम्पनेशः सं नित्रसन्विजयेश्वरे । बलितां डामरान्निन्ये मन्दोद्रेकं स्फुरज्जगे ॥७४६॥
लवन्यलोको मा ज्ञासीदशक्तिं मेथ गच्छतः । पृष्ठे निपत्य मा कार्षीद्यथां चेति विचिन्तयन् ॥७४७॥
स प्रभावं दर्शयितुं प्राप्तस्य विजयेश्वरम् । अज्जराजस्य सेनायां व्यावृत्य प्रस्थितोभवत् ॥७४८॥
साधौ शतद्वयीं तस्य योधानां हतवानपि । संत्यज्य विजयक्षेत्रं द्रोहकृन्नगरं ययौ ॥७४९॥
750 पथि नान्वसरन्भीत्या भयार्त्ता डामराः क्वचित् । नदन्तोद्रिशिरोरूढा मार्गान्सर्वांश्च तत्यजुः ॥७५०॥
त्यक्त्वा मडवराज्यं स प्रविष्टो व्यसनातुरम् पूर्ववेष्टां स्मरन्भूपं जहास कृतसत्क्रियम् ॥७५१॥
इतरामात्यवत्स्थामस्थितोथ न निजोचितम् । रणे प्रादर्शयत्किंचित्साक्षिभूत इव स्थितः ॥७५२॥
ततो मडवराज्यान्ते समस्ता एव डामराः । अभ्येत्य प्रत्यपद्यन्त तां महासरितस्तटीम् ॥७५३॥
उपायाः सामभेदाद्या रिपुचक्रे प्रयोजिताः । राज्ञो विफलतां जग्मुर्बहिरग्नैः प्रकाशिताः ॥७५४॥
755 क्रान्तनत्तन्महीपालमण्डलस्यापि भूपतेः । फलं दोर्विक्रमस्याप्यमासीन्नगररक्षणम् ॥७५५॥
अमरेशो द्वारपतिः सार्धं तस्थौ नृपात्मजैः । राजानवाटिकोपान्ते राजस्थानीयमन्त्रिणः ॥७५६[1]॥
दूरद्वीपान्तरगता इव स्वीचक्रिरे नृपात् । ते प्रवासधनं भूरि न चायुध्यन्त कुत्रचित् ॥७५७॥
कटका विद्विषां सर्वे पर्यायेण जयाजयौ । लेभिरे विजयादन्यत्र तु पृथ्वीहरः क्वचित् ॥७५८॥
मधुमत्तेन तेनाजौ वेतालेनेव वल्गता । प्रायो वरा वराः सर्वे मस्ता नृपचमूभटाः ॥७५९॥
760 उदयस्थेच्छटिकुलोद्भूतस्यैकस्य पप्रथे । युवदेहस्यापि शौर्यमेकस्मिंस्तु तदाहवे ॥७६०॥
पृथ्वीहरस्यापजहे द्वन्द्वयुद्धाभिमानिना । प्रहृत्य कृष्टकूर्चेन कराग्रेनासिवल्लरी ॥७६१॥
युद्धे पुरोपकण्ठेषु वर्तमाने शराहताः । स्त्रीबालाद्या अपि वधं प्रमादात्प्रतिपेदिरे ॥७६२॥
एवं जनक्षये घोरे वर्धमाने किमप्यभूत् । अनुत्साहाद्भृपो गेहादपि निर्गन्तुमक्षमः ॥७६३॥
तस्मिन्निरुद्धसंचारे सोमपालस्तदन्तरे । अलुण्ठयद्भाट्टलिकां लब्धरन्ध्रो ददाह च ॥७६४॥
765 सिंहे गजाहवव्यग्रे तद्गुहाप्रपरिग्रहे । समयो ग्रामगोमायोः पौरुषस्यापरोस्तु कः ॥७६५॥

---

७३७. [1]) A$_1$ writes ३ instead of तिलकम. ७३६ [1]) Thus corr. by A$_3$ from A$_1$ कम्पनेशस्य ७५३ [1]) Thus corr. by A$_3$ from A$_1$ °पद्यत. ७२६ [1]) A$_1$ writes here २ for युग्मम् which would be in its place after the following verse. ७६४. [1]) Emended; A °च्चाटलिकां. Cf vm. 581 831. 1947 (*C*)

राष्ट्रद्वयोपमर्देन राजा निःसदृशेन सः । तेन त्रपाविधेयोभूत्स्वमपि द्रष्टुमक्षमः ॥७६६॥
सर्वानौचित्यबहलः सर्वव्यसनदुःसहः । सर्वदुःखमयः कालस्तस्यावर्तत कोपि सः ॥७६७॥
तथाप्यस्खलिते तस्मिन्हितव्याजाद्धितापहः । राजानवाटिकाविप्रैः प्रायश्चक्रे विरागिभिः ॥७६८॥
प्रार्थयन्ते स्म ते युद्धे तटस्थास्तव मन्त्रिणः । गृहीत्वा नीविरेतेभ्यो लोहदार्वी विसृज्यताम् ॥७६९॥
न चेद्व्याप्य इवैतस्मिन्व्यसने स्थायिनां गते । को दद्यान्न परैर्नीतिं प्रत्यासत्तं शरत्फलम् ॥७७०॥ 770
न प्रत्यैमीत्तीटस्थ्यं यत्कालापेक्षया नृपः । तस्मिंस्तैर्दर्शिते शङ्कां निखिला मन्त्रिणो दधुः ॥७७१॥
शक्तिस्तृण कुरुष्वयितुं न यस्य स तदार्थिभिः । विसृज्यव्यवहारत्वं निन्ये राजा शठद्विजैः ॥७७२॥
कर्मस्थानोपजीव्युपपारिषद्यादिसंकुला । तत्पार्श्वात्प्रययौ वृद्धिमन्या सेनेव वैरिणाम् ॥७७३॥
तत्सान्त्वनक्षणे तैस्तैः प्रमादैरुत्थितैरगात् । देशो व्याकुलतां कृच्छ्रं लुण्ठिभाघटनोत्कटा ॥७७४॥
अदृष्टपार्थिवास्थानैः शठैरव्यवहारिभिः । ऊचे तैः सान्त्वयन्राजा दुःस्थितस्तत्तदप्रियम् ॥७७५॥ 775
लवन्यविप्रवाद्राज्ञः सोपिको विप्रवोभवत् । गलरोगः पादरोगादिव तीव्रव्यथावहः ॥७७६॥
काञ्चनोत्कोचदानेन तन्मध्येधिकचक्रिकाम् । कांश्चित्स्वीकृत्य स प्रायं कथंचिद्विन्यधीवरत् ॥७७७॥
विजयो वर्णसोमादिशस्त्रिवंदयो हठात्पुरम् । प्रविशन्भिक्षुसंज्ञनानीरश्वारोहैरहन्यत ॥७७८॥
तेनातिरभसात्स्थानं भित्त्वा प्रविशता पुरम् । प्रायशः कृत एवाभूत्तदा राज्यविपर्ययः ॥७७९॥
ईषन्मन्दप्रतापेन लवन्येष्वपि भूपतेः । पृथ्वीन्द्रेण संधिस्था भेदेच्छोः संप्रकाशिता ॥७८०॥ 780
तस्मिन्पुर्यं जिगीषूणां संधित्सौ भूभुजा समम् । ह्रयेपि सैनिकाः शान्तं तममन्यन्त विप्लवम् ॥७८१॥
राजा नागमठोपान्तमानेतुं प्रहितांस्ततः । त्रीनमात्यान्सुविश्वस्तानागच्छंश्छद्मनावधीत् ॥७८२॥
भात्रेयो मम्मको गुर्द्रो द्विजो रामश्च वारिकः । तेषां तिलकमिश्रस्य पार्श्वे भृत्यास्त्रयो हताः ॥७८३॥
नीविर्दत्तो गौरकम्तु हतो भूपतिं स्मरन् । इष्टे त्वाकुन्दिनि परैः प्रहतं करुणोज्झितैः ॥७८४॥
तद्वैशसं श्रुतवतो देशः सर्वो विरागकृत् । राजधान्यन्तरे राज्ञो दुरुक्तिमुखरोभवत् ॥७८५॥ 785
इयं शुक्लचतुर्दश्यां तद्विपर्यस्तमण्डलम् । अतिवाहयितुं कष्टं दिनमासीन्महीपतेः ॥७८६॥
अथ संजातवैकल्यो नेदमस्तीति चिन्तयन् । किं कृत्यमित्यसदृशानपि पप्रच्छ भूपतिः ॥७८७॥
विषमे वर्तमानस्य तस्य कश्चित्स नाभवत् । अन्तर्जह्रासे यो नान्त --- न तुतोष या ॥७८८॥
तमपि व्यसनापातं तस्य सोढवतस्ततः । अभजन्त क्रमाद्भृत्याः प्रतिपक्षसमाश्रयम् ॥७८९॥
कम्पनेशस्य चिम्बाख्यो भ्राता द्वैमातुरोहितान् । समाश्रयद्वारकार्यं तद्दत्तं प्रत्यपद्यत ॥७९०॥ 790
गूढ जनकमिश्रेण दूतान्प्रेषयतानिशम् । भिक्षवे भ्रातृतनया वाग्दत्ता निरवर्त्यत ॥७९१॥
असिवाजितनुत्रादि हत्वा भिक्षाचरान्तिकम् । अश्ववारा व्यभाव्यन्त प्रयान्तः प्रतिवासरम् ॥७९२॥
किमन्यद्व्यक्तमेवाह्नि येवसन्पार्थिवान्तिके । अलक्ष्यन्तायतो भिक्षोस्ते निशायां गतत्रपाः ॥७९३॥
इतो यांति ततश्चैति लोको व्यक्तमतन्त्रितः । इति राजनि कुण्ठाजे कोप्यजृम्भत विप्लवः ॥७९४॥

---

७७२ [1]) Emended with C, A °घटितोत्कटा ७७७. [1]) A, has first written °विन्यवीवृतत and then indicated the above reading between the lines ७८०. [1]) Conjectural reading, A न वन्येष्वपि. ७८८. [1]) Emended with C, A °त्रासो.— [2]) Thus A, C नान्तर्बहिर्यो न. ७९४ [1]) A, has first written °निन्दित and then indicated the above reading in margin.

795 डामरैः शरदुत्पत्तौ नीतायां सर्वतस्ततः । कान्दिशीकोभवल्लोकः कृत्स्नो धनजनोज्झितः ॥७९५॥
प्रयाते सुस्थलनृपे स्वर्गपूर्णामिमां महीम् । भिक्षुः कुर्यादिति मृषा लोकस्यासीद्विनिश्चयः ॥७९६॥
क्व दृष्टा त्यागिता भिक्षोः कुतो वा तस्य संपदः । परामर्शी नैवेति गतानुगतिको जनः ॥७९७॥
संदृश्यते परिवृता चिरमम्बरेण रेखा स्वयं न खलु या शशिनो नवस्य ।
तस्यां जनः प्रकुरुते नतिमम्बरार्थी धिग्लुब्धतामपसरत्सदसद्विचाराम् ॥७९८॥
त्रिजये राजवर्ण्याणां भुग्नग्रीव इवाभवत् । भिक्षुपक्षजये लोको हृष्यन्नासीद्विभूद्भवः ॥७९९॥
800 द्विजकौलेयकन्यायो राजडामरसंघयोः । ततोन्योन्यभयभ्रंशैरयोरुदजृम्भत ॥८००॥
राजाभ्यन्तरभेदेन राज्ञः स्थैर्येण चारयः । ऐच्छन्पलायितुं भीता अज्ञातान्योन्यनिश्चयाः ॥८०१॥
बान्धवानपि दुर्भिक्षुनविश्वस्तो विदद्भुपः । स्थितौ पलायने वापि अक्षमे न स्वजीवितम् ॥८०२॥
तं महाव्यसने वासःस्वर्णरत्नादिवर्षणम् । नाभ्यनन्दन्गृहीतार्था निनिन्दुः शस्त्रिणः परम् ॥८०३॥
नष्टोयं नैष भवितेत्यभीतेर्जल्पतो जनात् । वचो रोगी भिषक्त्यक्त इव भृण्वन्स विव्यथे ॥८०४॥
805 अप्यपोपस्थितं किंचित्तदादेशेन लौकयन् । सविलासं सगर्वं च तमैक्षिष्टानुगव्रजः ॥८०५॥
सोन्य एवाभवत्तस्मिन्क्षणे साहसिकोप्यहो । स्वगृहावपि निर्गन्तुं नाशकत्खद्वयाकुलः ॥८०६॥
यावद्वैच्छन्संघभद्याचलितुं डामरव्रजाः । स्वैरेव शस्त्रिभिस्तावन्निन्ये भूभृद्विसूत्रताम् ॥८०७॥
ते कृष्टशस्त्रा द्वाराणि रुन्धन्तो नृपमन्दिरे । प्रवासक्षित्त लब्धव्ये प्रायं चक्रुः पदे पदे ॥८०८॥
ददद्भनं धनेशश्रीर्दयादप्यधिकं नृपः । तेषामभिमतो नाभूदवमानाभिलाषिणाम् ॥८०९॥
810 मर्तुं चिर्चलिषुस्तीर्थमृणिकैरिव सामयः । स रुद्ध्वा निखिलैर्देयं दापितोथ गतत्रपैः ॥८१०॥
स्थानपालैरपि प्रायकृद्भिराक्रम्य दापितः । धनं सुवर्णभाण्डादि चूर्णीकृत्य विभूद्भवैः ॥८११॥
सवृद्धबालं नगरं ततः क्षुभ्यत्क्षणे क्षणे । सोभूदब्धिमिवोद्वृत्तं न संस्थापयितुं क्षमः ॥८१२॥
एकदा प्रातरेवान्ये रुद्धद्वारः स्वदाशस्त्रिभिः । सर्वतः क्षोभमागच्छन्नगरं स व्यलोकयत् ॥८१३॥
ततः क्षोभं शमयितुं जनकं नगराधिपम् । पुरभ्रमार्थमादिश्य चलितुं क्षणमैक्षत ॥८१४॥
815 कथंचिद्भानमानाभ्यां तानावर्ज्यापि शस्त्रिणः । सावरोधः स संनद्धो राजधान्या विनिर्ययौ ॥८१५॥
अङ्गनात्तुरगारूढो बहिर्यावच्च निर्ययौ । राजधान्यन्तरे लुण्ठिस्तावत्पारभ्य तस्करैः ॥८१६॥
अरुदन्केपि केप्युच्चैरनदन्केप्यलुण्ठयन् । तद्भृत्यान्राज्यमुत्सृज्य तस्मिन्व्रजति शस्त्रिणः ॥८१७॥
विभूद्भवस्त्रपाकोपशङ्काभिः शस्त्रिणां नृपः । सहस्रैः पञ्चवैरासीद्भ्रजन्नगतोध्वनि ॥८१८॥
वर्षं षण्णवते कृष्णषष्ठ्यां मार्गे विनिर्गतः । याममात्रावशेषेह्नि सभृत्यो द्रोहविह्वलः ॥८१९॥
820 निजैर्हरद्भिरध्वादि त्यज्यमानः पदे पदे । स प्रतापपुरं प्राप क्षपायामल्पसैनिकः ॥८२०॥
तिलकस्य पुरो गत्वा प्राप्तस्यामं च विश्वसन् । तत्र बन्धोरिवात्मानं चिरं दुःखोल्बणोमुचत् ॥८२१॥
द्रोहं न कुर्यादेवं मे चिन्तयित्वेति सत्वरम् । वेश्म हृष्टकपुरेन्येशुस्तस्य च प्राविशत्स्वयम् ॥८२२॥

---

७९५. [1]) Emended, A °मर्षः. ८०२. [2]) Emended, A दृदुक्षुन°. ८१०. [1]) Emended with C, A विचलि°. ८१३. [1]) Emended, A स शस्त्रिभि. ८१६. [1]) Emended, A आङ्गना°. ८१९ [1]) Emended with C, A षण्णनवते

तद्वीरसेन स्नानादि कृत्वैच्छत्सैन्यसंग्रहम् । प्रविश्य क्रमराज्यं स कर्तुं भूयो जयोत्सुकः ॥८२३॥
गूढं युयुत्सून्कल्याणवाडादीनथ डामरान् । आनीय स पुरस्तस्य धैर्यभ्रंशमकारयत् ॥८२४॥
गृहीतेन तया युक्त्या निष्कूटः स ततो ययौ । स्वीकुर्वन्स्वर्णदानेन दस्यूनमार्गविरोधिनः ॥८२५॥ 825
प्रयान्तं तत एवोज्झीत्तिलकूस्तत्सहोदरः । प्रयाणमेकमानन्दो दाक्षिण्यादन्वगात्तु तम् ॥८२६॥
भृत्यत्यक्तः स दानेन विक्रमेण च तस्करान् । अगान्मार्गेण शमयन्नायुःशेषेण रक्षितः ॥८२७॥
त्राणं सिंहनखा द्रुमाद्रिगहनस्थारादरण्यस्य ये तेषां बालगलाभयादपि भवेत्कालातिवाहः क्रमात् ।
ये दन्ताः करिणां रणप्रहरणं तेष्वामुयुर्दीव्यितां क्रीडायां करताडनानि न दृढा शौर्यस्य रूढिः क्वचित्॥८२८॥
जन्तूनां विक्रमत्यागयशःप्रज्ञादयो गुणाः । भवे चित्रस्वभावेस्मिन्न भवेयुरभङ्गुराः ॥८२९॥
भास्वानप्यौष्ण्यमृदुतां भिन्नावस्थां दिने दिने । तां तामायाति जन्तूनां कः प्रभावेषु निश्चयः ॥८३०॥ 830
अशक्नुवन्नङ्गलिक्कामरिप्रेष्टां निरीक्षितुम् । मन्युनिःशब्दसैन्योद्रिमारुरोह स लोहरम् ॥८३१॥
स्वं कलत्रमपि द्रष्टुं तत्रानित्रपयाक्षमः । शयनीयविमुक्ताङ्गस्तत्यक्ते स्म दिवानिशम्॥८३२॥
दत्तक्षीपादनिर्गच्छन्नन्तर्गेहाङ्गिनेष्वपि । दाक्षिण्याद्दर्शनं प्राप्ताद्भृत्यानां भोजनक्षणे ॥८३३॥
विक्लेपनानि नाश्नाक्षीन्नारुरोह तुरंगमान् । गीतनृत्तादि नैक्षिष्ट सुखगोष्ठीर्न चादधे ॥८३४॥
ताम्यंस्ताटस्थ्यमौखर्यनैक्ष्ण्यद्रोहादि दर्शितम् । एकैनैकेन च स्मृत्वा स्मृत्वा देव्यै न्यवेदयत् ॥८३५॥ 835
अन्वगास्त्वां भुवं त्यक्ता मामेतेन्वगुरित्यपि । निन्ये वृद्धिं परार्ध्यश्रीः स दाक्षिण्याद्धनार्पणैः ॥८३६॥
कङ्कमीरेषु गते तस्मिंस्तदैवाखिलमन्त्रिणः । पुराणराजधान्यये ससैन्याः समगंसत ॥८३७॥
मन्त्र्यश्चारोहसामन्तनन्त्रिपौरादिसंमतः । तेषां जनकसिंहोभूदमणींनगराधिपः ॥८३८॥
स भिक्षोर्मल्लकोष्ठाद्यैरात्तैः कृतगतागतैः । विश्वासाय सुतभ्रातृसुतौ नीत्वै प्रदापितः ॥८३९॥
प्रावर्तत भयध्वस्तस्त्रीबालाद्यावृते पुरे । अराजकाय रजनी सर्वभूतभयावहा ॥८४०॥ 840
निहताः केपि मुषिताः केपि केप्यरिभिः पुरे । दग्धागारा व्यधीयन्त दुर्बला राजवर्जिते ॥८४१॥
सैन्यैरन्येद्युरुच्चादैर्नीरुद्धाखिलदिक्पथः । सिन्दूरारुणपुण्ड्राभ्रसादिमण्डलमध्यगः ॥८४२॥
विकोशशस्त्रकदलीषण्डदुर्लक्ष्यविग्रहः । मृगेन्द्र इव लोकस्य भयकौतूहलावहः ॥८४३॥
वीरपट्टाच्चलश्लिष्टैर्यौवनोद्रेचितैः कचैः । अबद्धैः शोभितः पृष्ठे जयश्रीबन्धभृद्भुजैः ॥८४४॥
कुण्डलद्योतिना स्निग्धधवलायतदृष्टिना । प्रत्यग्रमदमश्नुणा चारुचन्दनोल्लेखशोभिना ॥८४५॥ 845
ताम्राधरेण वक्त्रेण श्रीसांनिध्याधिकत्विषा । पक्षपातिं विपक्षाणामपि संपादयन्मनः ॥८४६॥
असेर्विकोशस्यान्तःस्थां प्रियमध्येन वल्गता । केसरच्छटया चापि चामरेणेव वीजयन् ॥८४७॥
पदे पदे निवृत्ताश्वः सामन्तैरुपपादिताम् । स्वीकुर्वन्नर्हणां भिक्षुः प्राविशन्नगरं ततः ॥८४८॥ कुलकम् ॥
तस्याभीकस्य धात्रीव पृष्ठस्थो मल्लकोष्ठकः । प्रयत्नावगल्भस्य सर्वकार्योपदेष्टृताम् ॥८४९॥
अयं पितुः प्रियस्तेभूत्त्वमस्याङ्के विन्यधिताः । राज्यस्थायं मूलमिति प्रत्येकं समदर्शयत् ॥८५०॥ 850

---

८२३. [1]) Emended, A जनोत्सुक. ८२४. [1]) A °न्कल्याणवाळार्डा°. ८३०. [1]) Emended with C, A भिन्नावस्थां. ८३७ [1]) Doubtful emendation, A पुराणि राज°. ८४७. [1]) A omits here two *aksharas* without indicating a *lacuna*; °पि supplied with C.

गृहं जनकसिंहस्य प्राक्कन्यावाप्तयेविशत् । राजलक्ष्मीं स संप्राप्तुं राजधानीं ततः परम् ॥८५१॥
दूरनष्टे कुले तेन पुनरुद्वेचिते यथौ । वह्नास्थो गर्भगेपत्ये स्त्रीजनोनवहास्यताम् ॥८५२॥
दृष्टेन तादृशा भिक्षोरिति वृत्तेन शत्रुषु । चित्रस्थेष्वपि साशङ्का नोपहास्या जिगीषवः ॥८५३॥
पार्वतेन्त धनाधीशश्रियः सुस्सलभूपतेः । कोशेन नीतशेषेण विलासा नवभूपतेः ॥८५४॥
वाजिवर्मासिभूयिष्ठां राजलक्ष्मीं विभेजिरे । राजद्वामरलुण्ठाकमन्त्रिणो यन्त्रणोज्झिताः ॥८५५॥
पुरे स्वर्गे इवास्वादं भोगानामुपलेभिरे । दस्यवो ग्रामभोगार्हाः पिशाचा इव गह्वराः ॥८५६॥
आस्थाने न बभौ भूभृद्भामीणैः सर्वतो वसन् । प्रलम्बकम्बलप्रायविलासावरणैः समम् ॥८५७॥
भिक्षाचरस्यासंभाव्यप्रादुर्भावतया प्रथाम् । डामरा अवतारोयमित्यन्यां निन्यिरे प्रथाम् ॥८५८॥
राज्यस्यानन्यदृष्टस्य कर्तव्येषु सुमोह सः । अदृष्टकर्मेव भिषग्भैषज्यस्य पदे पदे ॥८५९॥
शनैर्जनकसिंहेन कृतभ्रातुसुतार्पणम् । कम्पनाधिपतिर्दत्तकन्योपि तमशिश्रियत् ॥८६०॥
जुह्वो राजपुरीयस्य राज्ञः कटकवारिकः । पादयाधिकृतोद्राक्षीत्स्वार्थमर्थं न तु प्रभोः ॥८६१॥
सर्वाधिकारिणं राजलक्ष्मीर्बिम्बमशिश्रियत् । राजशब्दस्यैव पात्रमभूद्भिक्षाचरः परम् ॥८६२॥
वेश्ययासक्तिकृतैश्वर्यः प्राकृताचारभागपि । अन्तरङ्गः सदसतां किंचिद्भिन्नस्तदाभवत् ॥८६३॥
द्वैमातुरो दर्पकस्य भ्राता साश्वर्यशौर्यभूः । नृपान्तरङ्गज्येष्ठत्वं ज्येष्ठपालोप्यशिश्रियत् ॥८६४॥
मन्त्रिणो भूतभिक्षाद्यास्तस्य पेतामहा अपि । लक्ष्मीसरोजिनीभृङ्गा बहवोन्ये जनुर्भिरे ॥८६५॥
मुग्धे राज्ञि प्रमत्तेषु मन्त्रिषूषेषु दस्युषु । उत्थानोपहतं राज्यं नवत्वेपि बभूव तत् ॥८६६॥
स्त्रीभिर्नवनवाभिश्च भोज्यैः प्राज्यैश्च रञ्जितः । भिक्षुर्नैक्षिष्ट कर्तव्यं सुखानुभवमोहितः ॥८६७॥
स सुखानुभवप्रावृड्विद्रान्धो विजयोद्यमे । स्वैः प्रेरितः सभामध्ये स्वयुमैच्छन्मडालसः ॥८६८॥
दर्पेण सचिवे वाचं कथयत्यनुकम्पिकाम् । न स चुक्रोध मुग्धस्तु पितरीवान्वरज्यत ॥८६९॥
निष्प्रतिष्ठैः सेव्यमानो वेश्योच्छिष्टैरशिष्टवत् । भट्टचेटोचिनाधेष्टा विटैः प्रेर्यत सेवितुम् ॥८७०॥
पानीयरेखाप्रतिमस्थैर्यस्याखिलवस्तुषु । तस्याप्रमाणवचसः सेवां प्रणयिनो जहुः ॥८७१॥
यदूचुः सचिवास्तत्तानन्वबोचन्न भूभृतः । वचः सुधिरगर्भस्य तस्य किंचित्समुद्ययौ ॥८७२॥
सचिवैः स्वगृहाज्ञीत्वा दत्तभोज्यः स मुग्धधीः । धनी विपन्नपितृक इव प्रमुषितो विटैः ॥८७३॥
आहारमुष्टीर्बिम्बस्य गृहे बिम्बनितम्बिनी । तस्याश्चास्येव वडवा रामिणोपगतान्हरत् ॥८७४॥
वञ्चयित्वा दृशो पत्युर्दयितैः स्मेरया तया । कुचकक्षकटाक्षैः स लुलुभेर्यो व्यधीयत ॥८७५॥
पृथ्वीन्द्रो मद्रकोष्ठश्चान्योन्योद्भूतमत्सरौ । क्षोभं व्यधत्तां संरब्धौ राजधान्याः क्षणे क्षणे ॥८७६॥
स्वयं राज्ञा सुतोद्वाहं गृह्णन्नन्यापि कारिनौ । तावन्योन्यमुपेक्षेतां न मन्युं विक्रमोन्मदौ ॥८७७॥
अथ पृथ्वीन्द्रगृहात्कृतोद्वाहः स्वयं नृपः । ज्ञातामर्षेण सुस्पष्टं भद्रकोष्ठेन तत्यजे ॥८७८॥
दुह्यज्जनककाणेपि संबन्धापेक्षयोज्झितः । विरागमाजानन्दादीचिन्ये ब्राह्मणमन्त्रिणः ॥८७९॥

---

८५२. [1]) Thus A ८५४. [2]) A कोषेण ८५२ [3]) Emended with C, A राज्ञा लक्ष्मीबिम्बमशिश्रयत ८५५. [4]) Emended; A भूतविभ्रा°. Cf. viii 1695 viii 94. ८७० [5]) Emended with C, A वेश्यार्थिक° ८७१ [6]) Emended, A °मुष्टिर्बि° [7]) Emended with C, A तस्याश्चेव ८७७ [8]) Emended; A °मुपेक्षेतां

तटस्थो द्रोग्धृदुर्बुद्धिप्रायभृत्यविधेयधीः । विसृत्वव्यवहारत्वं निन्द्यत्वं च ययौ नृपः ॥८८०॥ 880
डामरस्वामिके लोके प्राभवत्को न विभ्रवः[1] । ब्राह्मण्यो धर्षणं यत्र श्वपाकेभ्योऽपि लेभिरे ॥८८१॥
अराजकेथ वा भूरिराजके मण्डले तदा । समस्तव्यवहाराणां स्फुटं तुर्वोट पद्धतिः ॥८८२॥
टीचारा भैक्षवे राज्ये निष्पचाराः पुरातनाः । तच्छतेन तु नव्यानामशीतेरभवत्क्रयः ॥८८३॥
राजपुर्यध्वना विम्बं समैन्यमथ पार्थिवः । लोहरं प्राहिणोत्कर्तुं सुस्सलास्कन्दमुन्मदः ॥८८४॥
तुरुष्कमैन्यमानिन्ये सोमपालेन सोन्वितः । सहायकाय सङ्गार विस्मये मित्रतां गते ॥८८५॥ 885
संदर्श्य पाशमेतेन बद्ध्वा क्रक्ष्यामि सुस्सलम् । इत्येक एकोश्वारोहस्तुरुष्काणामकत्थत ॥८८६॥
काश्मीरिकंखशम्लेच्छयोधव्यतिकरोभवत् । न केषां नाम संभाव्यो विश्वोत्पाटनपाटवः ॥८८७॥
भिक्षाचरः प्रयाते तु विम्बे विगलिताङ्कुशः । न कासामव्यवस्थानां मूढः स्थानमजायत ॥८८८॥
स निमन्त्र्य निजं नीतो गृहं त्रिम्बावरुद्धया । भोगसंभोगदानेन धर्षण्या पर्यतोष्यत ॥८८९॥
कार्यापेक्षापि तस्यासीच्च मन्त्रिस्त्रीसमागमे । कौलीनभीतेरासन्ननिपातस्य कथैव का ॥८९०॥ 890
आशुनानुगुणं[2] भोज्यं कुम्भकांस्यादिवादनम् । तत्र प्राकृतकामीव न स जिह्राय शीलयन् ॥८९१॥
शनैः शनैस्ततो नष्टावष्टम्भस्य महीपतेः । काले भोज्यमपि प्राप्यं नासीन्ललितसंपदः ॥८९२॥
तादृक्प्रलोभकौर्यादिक्रान्तो यः प्रागगर्हत । स सुस्मलोथ लोकानामभिनन्द्यत्वमाययौ ॥८९३॥
धनमानादिनाशं या विरक्तास्तस्य चक्रिरे । काङ्क्षन्ति स्म घनोत्कण्ठास्ता एवागमनं प्रजाः ॥८९४॥
प्रत्यक्षदर्शिनोप्यासाश्चर्या वयमस्य यत् । ताः प्रजाः कोपिताः केन केन भूयः प्रसादिताः ॥८९५॥ 895
क्षणाद्विमुख्यमायान्ति सांमुख्यं यान्ति च क्षणात् । न हेतुं कंचिदीक्षन्ते पशुप्रायाः पृथग्जनाः ॥८९६॥
ते मल्लकोष्टजनकाद्यो दूतैर्विसर्जितैः । त्यक्तराज्यं पुनर्भूपं जयोद्यममजिघ्रन् ॥८९७॥
अक्षोमुत्रायहारेण लोकैष्टिक्कस्य लुण्टिते । तत्रस्था ब्राह्मणाः प्रायं नृपमुद्दिश्य चक्रिरे ॥८९८॥
तैश्चान्यैश्चायहारैश्च संभितोविजयेश्वरे । राजानवाटिकाप्रायो नगरेपि न्यविक्षत ॥८९९॥
ओजानन्दादिभिर्मुख्यद्विजैरुत्तेजितास्ततः । गोकुलेपि व्यधुः प्रायं त्रिदशालयपर्षदः ॥९००॥ 900
युग्यार्पितैः सितच्छत्रचामरशोभिभिः । त्रिदुषप्रतिमावृन्दैः सर्वतश्छादिताङ्गनः ॥९०१॥
काहलाकांस्यतालादीवाद्यक्षोभितदिङ्मुखः । अदृश्रपूर्वो ददृशे पारिषद्यसमागमः ॥९०२॥
ते सान्त्वमाना भूभर्तुर्दूतैरुत्सेकवादिनः । न विना लम्बकूर्चं नो गतिरित्यब्रुवन्वचः ॥९०३॥
ते हेलया लम्बकूर्चाख्यया सुस्सलभूपतिम् । तं निर्दिशन्तोमन्यन्त क्रीडापुत्रकसंनिभम् ॥९०४॥
प्रायं प्रेक्षितुमायातैः पौरैः सह दिने दिने । अमन्त्रयत कां कां न व्यवस्थां पर्षदां गणः ॥९०५॥ 905
नृपापातभयात्क्षोभं मुहुर्मुहुरुपागतैः । पारिषद्यैश्च पौरैश्च यादृमास्थीयतोद्धतम् ॥९०६॥
वश्यं जनकसिंहस्य नगरं तन्मतेन तत् । सज्जं सुस्मलदेवस्य कृत्स्नमानयनेभवत् ॥९०७॥
प्रायाद्वारयितुं पूर्वमयहारद्विजाचृपः । प्रययौ विजयक्षेत्रं तत्रासीच्च हतोद्यमः ॥९०८॥

---

८८१ [1]) A, had first repeated here the second half of verse 878, but has subsequently erased it and written as above. ८८६. [2]) Conjectural reading, A °स्तुरुष्कामकत्थत, C °तुरुष्के समकत्थत. ८८७ [1]) Emended; A काश्मीरक° ८९१ [2]) Emended with C, A °गुणां.

तन्मध्ये निखिलांस्तत्र डामरांस्तिलकोऽब्रवीत् । व्यापादयेति तं तत्र सत्त्वैकार्थो न सोऽहरीत् ॥९०९॥
राज्ञ एव मुखाद्बुद्ध्वा लवन्यास्तद्विशश्वसुः । तस्मिन्पृथ्वीहरमुखास्तत्सुस्तिलकात्पुनः ॥९१०॥
भागिनेयं प्रयागस्थ क्षत्तारं लक्ष्मकाभिधम् । बन्धुमैच्छन्नृपोल्लिख्य प्रयथौ स तु सुस्सलम् ॥९११॥
ततः प्रविश्य नगरं संनिपत्याखिलं जनम् । अकारणविरक्तानां पौराणां प्रददौ सभाम् ॥९१२॥
युक्तमप्युक्तवांस्तत्र हतोक्तिः शठबुद्धिभिः । पौरैः स चक्रे नास्त्येव भेषजं विप्रवसृशाम् ॥९१३॥
अत्रान्तरे सोमपालबिम्बाद्या लोहरं स्थितम् । योद्धुं सुस्सलभूपं ते सर्वे पर्णोत्समाययुः ॥९१४॥
तं च पद्मस्थो नाम राजा कालिञ्जरेश्वरः । मैत्रीं संस्मृत्य कल्हाद्यैरययौ तत्कुलोद्भवः ॥९१५॥
सोथ शुक्लवयोदश्यां वैशाखे बलिभिः समम् । तैर्मानी सुस्सलो राजा संयामं प्रत्यपद्यत ॥९१६॥
प्रेक्षकैर्वर्ण्यतेद्यापि स पर्णोत्मान्तिके रणः । तस्याद्भुतोद्यमानाग्निक्षालनप्रथमक्षणः ॥९१७॥
कुतोप्येत्य निजस्कारस्ततः प्रभृति भूपतिम् । तमभून्यं पुनश्चक्रे मृगेन्द्र इव काननम् ॥९१८॥
भयस्खलितपाशानां कालपाशैः समागमम् । स चकार तुरुष्काणां क्षणात्पुष्कलविक्रमः ॥९१९॥
मातुलं सोमपालस्य निन्ये कवलतां बली । रणे तत्कोपवेतालो विनोलासरितस्तटे ॥९२०॥
किमन्यदल्पमेन्यः स बहूनपि स तान्व्यधात् । हतविद्रुतविध्वस्तान्यथात्मपरिपन्थिनः ॥९२१॥
काश्मीरिकाणामौचित्य कि नाभूत्स्वामिनो ददुः । एकस्य ये रणं नष्टाः कुकीर्तिमपरस्य च ॥९२२॥
तुरुष्कैः सह यातेय सोमपाले गतत्रपाः । बिम्बं काश्मीरिकाम्यक्ता राजान्तिकमशिश्रियन् ॥९२३॥
ह्यो धनूषि शिरांस्यस्य नमयन्तोद्भुताशयाः । कुलप्रभोः पुरः स्पष्टं न ते दृष्टा ललज्जिरे ॥९२४॥
आगच्छद्भिस्ततः पौरैर्डामरैश्च समं नृपः । प्रतस्थे दिवसैर्ह्रैः काश्मीराभिमुखः पुनः ॥९२५॥
राजपुत्रः सहदेविः कल्हणो विशतः प्रभोः । डामरान्क्रमराज्यस्थान्संगृह्यापेसरोभवत् ॥९२६॥
य एव प्रथम राजमैन्याद्दिक्षुमशिश्रियत् । स एव बिम्बो राजानं तमुत्सृज्य समाययौ ॥९२७॥
अन्ये जनकसिंहस्य संमता मन्त्रिनन्त्रिणः । प्रत्युद्ययुस्तो व्यलोकयन्त नृपति निरपत्रपाः ॥९२८॥
काण्डिलवाभिधामजन्मा शस्त्री कुलक्षणः । भाट्टिले कश्चिदभवद्धन्य क्रान्तोपवेशनः ॥९२९॥
भिक्षुर्पिवतीर्णमार्गं तं सुस्सलान्तिकगामिनः । लोकस्यात्रान्तरे जेतुं सहपृथ्वीहरो ययौ ॥९३०॥
जितवांसं ववन्धेच्छां निहन्तुं सुस्सलोन्मुखम् । क्रोधाज्जनकसिंहं च वार्तां तां च विवेद सः ॥९३१॥
नगरस्थेन तेनाथ पौराश्चारोहतन्त्रिणः । संघट्याखिलान्भिक्षोः प्रातिपक्ष्यमगृह्यत ॥९३२॥
जानंस्तेनावृतं राज्यं ततो भिक्षाचरो नृपः । पृथ्वीहरेणानुयातो नगरं सहसाविशत् ॥९३३॥
सेतौ सदाशिवाग्रस्थे तत्सैन्यैः सह संगरम् । कृत्यज्जनकसिंहोथ सान्त्वमानोपि सोयहीत् ॥९३४॥
दृष्टं जनकसिंहस्य योधानां बलगतं मदात् । अविशङ्क्य पराभूति मूहूर्तं सुभटायितम् ॥९३५॥
अलकेन सम पृथ्वीहरस्तद्भ्रातृसनुना । अन्येन सेतुना तीर्त्वा तस्य सैन्यमनाशयत् ॥९३६॥
तन्त्र्यश्चारोहपरेषु विद्रुतेषु सबान्धवः । नक्तं जनकसिंहोथ पलाय्य लहरं ययौ ॥९३७॥

---

९१०. [1]) Emended, A मुखाद्बुद्ध्वा. ९११. [1]) Emended, A बन्धुमै°. ९१४ [1]) Emended, A लहरे. ९२१. [1]) Emended, A °ध्वस्तयथा° ९२२ [1]) Emended, A काइमीरका°. ९२३. [1]) Emended A काइमीरका° ९२९. [1]) Emended with C, A °वदन ९३१ [1]) Emended with C, A स ९३७. [1]) Emended with C, A तन्त्र्यारोह°.

भिक्षुपृथ्वीहरौ प्राप्तस्तत्पृष्ठग्रहणोद्यतौ । तत्पश्चात्तेश्वरारात्रा धृष्टा भूयोऽप्यशिश्रियत् ॥९३८॥
क्षिप्त्वा क्षिप्त्वा स्वकक्ष्यान्तर्विद्युत्प्रतिमा भयात् । ते पारिपथ्यविप्राप्ताः प्रायमुत्सृज्य विद्रुताः ॥९३९॥
भूत्यानि सुरभूत्यानि रक्षन्तः केपि भिक्षुणा । प्रायाद्विवृत्ता वयमित्युक्तवन्तो न बाधिताः ॥९४०॥ 940
यो जानके भैक्षवेश्य वल्गत्तुङ्गतुरंगमान् । दृष्टवन्तो वयं सैन्ये सादिनोऽपि साद्भुताः ॥९४१॥
भिक्षुराजप्रदीपेन द्योतितः क्षणभङ्गिना । पैतृष्वसेयाधिकारेण स्यालस्तिलकसिंहजः ॥९४२॥
गते जनकसिंहेश्य प्रतिपक्षानुसारिणाम् । विधातुं वेश्मभङ्गादि लब्धं भिक्षुमहीभुना ॥९४३॥
अवान्तरे हृष्टकपुरे नीतेषु तिलकादिषु । भङ्गं सुन्दरणसिम्बाद्यैः समेतानन्तसैनिकैः ॥९४४॥
अथायातैर्मल्लकोष्ठजनकाद्यैः ससैनिकैः । अपरैरपि सामन्तैर्बलबाहुल्यशालिभिः ॥९४५॥ 945
अन्वीयमानो दिवसैर्द्वित्रैराक्रान्तमण्डलः । विशल्लहरमार्गेण विपक्षालक्षितोपतत् ॥९४६॥
नगरापणवीथ्यन्तर्हयारोहमुखान्पुरः । द्रोहयोधानुपायातांस्तदैवोज्झितसाध्वसः ॥९४७॥
वेष्टितालम्बकूर्चेन वक्त्रेण भ्रुकुटीभृता । कोपकम्पिततारेण फुल्लनासापुटस्पृशा ॥९४८॥
कांश्चित्संतर्जयन्निन्दन्नन्यान्मर्मांसतथापरान् । तीव्रातपश्रमक्लान्तपुस्ताभ्यन्काल इवोल्बणः ॥९४९॥
आशीर्षिकृतां पुष्पवर्षिणां पुरवासिनाम् । पूर्वापकारिणां श्रेणीष्वव्यज्ञान्यस्तलोचनः ॥९५०॥ 950
स्कन्धमात्रोपरि न्यस्तं कवचं हेलया दधत् । केशानन्तशिरस्त्रान्तर्निःसृतान्धूलिधूसरान् ॥९५१॥
पक्ष्ममालां च बिभ्राणः सकोशासिस्तुरंगिणाम् । आकृष्टखड्गमालानामन्तर्वल्गत्तुरंगमः ॥९५२॥
ससिंहनादैरुद्दामैर्भेरीभांकारनिर्भरैः । बलैर्भरितदिक्चक्रोः सुस्सलः प्राविशत्पुरम् ॥९५३॥ कुलकम् ॥
षड्भिः सहादशदिनैर्मासैर्ज्यैष्ठे सितेदनि । स सप्तनवताब्दस्य तृतीये पुनरायया ॥९५४॥
राजधानीमप्रविष्टो भिक्षुं पूर्वपलायिनम् । अन्विष्यन्क्षिप्रिकातीरे सलवन्यं व्यलोकयत् ॥९५५॥ 955
सरित्पारं गिपो प्राप्ते स सपृथ्वीहरो गतः । मार्गे लवन्यैर्मिलितैरन्यैः साकं न्यवर्तत ॥९५६॥
तं विज्ञाय रणे राजा बद्ध्वा प्रहतिविक्षतम् । सिंह पृथ्वीहरज्ञातिं राजधानीमथाविशत् ॥९५७॥
तपभोगैः सपत्नस्य तत्कालनिःसृतस्य सा । अङ्किना मानिनस्तस्य वेदयेवोद्वेगदाभवत् ॥९५८॥
भिक्षुः संत्यज्य कृष्णीरान्सह पृथ्वीहरादिभिः । मामं पुण्याणनाडाख्यं सोमपालाश्रयं ययौ ॥९५९॥
प्रस्थिते डामरान्सर्वान्राजा स्वीकृत्य तु व्यधात् । खेर्या वह्वात्मजं मल्लं हर्षमित्रं च कम्पने ॥९६०॥ 960
पूर्वापकारं स्मरतो देशकालानपेक्षिणः । ..... ॥९६१॥
भिक्षुसंपर्कजं गन्धमपि सोढुमशक्नुवन् । भृत्येभ्यः खण्डशः कृत्वा द्वेषात्सिंहासनं ददौ ॥९६२॥
अनयोपार्जितां त्यक्तुमनीशा डामराः श्रियम् । समन्योश्च नृपाद्रीता नात्यजन्विश्रब्धवाग्मम् ॥९६३॥
भिक्षुस्तु राज्यविभ्रष्टः सुहृदो विषये वसन् । उत्साहं सोमपालस्य दानमानैः पुनर्ययौ ॥९६४॥
बिम्बः साहायकप्रार्थी विस्मयस्यान्तिकं गतः । तस्मिन्विरोधिभिर्बद्धे रणे धीरस्तनुं जहौ ॥९६५॥ 965
भिक्षाचरो बिम्बभुन्यो भजन्दुर्नयपात्रताम् । अनेषीदवरुद्धात्वं तत्रियां तां गतत्रपः ॥९६६॥

---

९४२. [1]) Emended, A पितृष्वेया° ९४१. [1]) Emended, A °मुत्पात्पुरः. ९४४. [1]) Emended with C, A वल्लेन ९५५. [1]) Emended; A सलवन्यो. ९६०. [1]) Thus A, perhaps to be emended प्रस्थितो ९६१. [1]) Here two *pādas* are missing A does not indicate the *lacuna*, C supplements पूर्ववैद्वेषिणस्तस्य न कृपा प्रतिपेदिरे ९६५. [1]) Emended, A °बंद्धै, C °बद्धो. ९६६. [1]) Emended with C, A भिक्षाचरे

निपत्य स्वल्पसैन्योपि ततः भृगुपुरे बली । जित्वा पृथ्वीहरौ वद्वात्मजं व्यद्रावयद्रणात् ॥९६७॥
तस्मिन्पलायिते भिक्षु पुनरानीय सोविशत् । भुवं मडवराज्यानां दस्यूनां स्वचिकीर्षया ॥९६८॥
तत्पर्यंसृजच्यश्वैर्डामरैः स्वीकृतैः समम् । जगाम विजयक्षेत्रं विजेतुं कम्पनापतिम् ॥९६९॥
970 जितस्तेनाहवे हर्षामित्रो निहतसैनिकः । विजयेश्वरमुत्सृज्य भीतोवन्तिपुरे ययौ ॥९७०॥
विजयक्षेत्रजास्तत्पुरमामोद्रवा अपि । जना भयेन प्राविक्षन्नथ चक्रधरान्तिकम् ॥९७१॥
योपिच्छिश्नुपभुक्तीहिधनोपैरपूर्यत । स्थानं तत्तैश्च राज्ञश्च योधैः सायुधवाजिभिः ॥९७२॥
अन्वारूढैरथ स्पष्टं लोकोद्भुण्डनलालसैः । तैर्भैक्षवैरवेष्टन्त कटकैर्व्याप्रवित्तकैः ॥९७३॥
तान्दारुमयवप्रीघद्वारगुप्ते क्षुरौकसः । अङ्गने निष्ठतां हन्तुं बन्दुं वा नाशकन्द्विषः ॥९७४॥
975 तदन्तरस्थितं दग्धुं कर्पुरारख्यं स्ववैरिणम् । कश्चित्कतिस्थलीग्रामजन्मा निर्गुणडामरः ॥९७५॥
पापो जनकराजाख्यस्तत्राग्निमुददीदिपत् । मृडस्तादृगपर्यन्तजन्तुसंहारनिर्घृणः ॥९७६॥
तमापतन्तं ज्वलितं ज्वलनं वीक्ष्य सर्वतः । भूतग्रामस्य क्षुभद्यान्हाहाकारः समुद्ययौ ॥९७७॥
विशत्कृतान्तत्राहारिभियेव छिन्नबन्धनैः । अश्वैरसूचीसंचारा भ्रमद्भिर्जग्निरे जनाः ॥९७८॥
प्राच्छादयन्त वलज्ज्वालाकरालैर्धूमराशिभिः । व्योम पिङ्गकचश्मश्रुजालैर्नक्तंचरैरिव ॥९७९॥
980 निर्धूमस्य विसारिण्यो ज्वाला हव्यभुजो दधुः । संतापद्रुतहेमाभ्रसुवर्णलहरीभ्रमम् ॥९८०॥
सतापविद्रुतव्योमचारिमौलिपरिच्युताः । रक्तोष्णीषा इव भेमुर्ज्वालाभद्रा नभोद्रुमे ॥९८१॥
दीर्घदारुमन्थिभङ्गजन्मा चटचटारवः । तापप्रकाश्यमानाभ्रगङ्गाघोष इवोद्ययौ ॥९८२॥
स्फुलिङ्गैः द्रोणविस्तजन्तुजीवितसंनिभैः । अपाहि गहनव्योममार्गभ्रमणसंभ्रमः ॥९८३॥
शकुनैः शावसंचारशोकादाक्रन्दिभिर्नभः । मानुषैर्दह्यमानेश्च भूमिर्मुग्धरितामवत् ॥९८४॥
985 भ्रातृन्भर्तृन्पितृन्पुत्रानालिङ्ग्याक्रन्दनिर्भराः । भीमीलितदृशो नार्यो निरुद्यन्त वह्निना ॥९८५॥
तदन्तरास्साहसिका ये केचिद्विरयासिषुः । बहिस्ते निहताः क्रूरैर्डामरैर्मृत्युचोदितैः ॥९८६॥
तावन्तो जन्तवस्तत्र व्यपद्यन्त तदा क्षणात् । स्विन्ना एव न ये दग्धास्तावतापि कृशानुना । ९८७॥
अन्तः शान्तेषु सर्वेषु बहिः शान्तेषु हन्तृषु । क्षणादेव प्रदेशः स निःशब्दः समजायत ॥९८८॥
990 वह्नेः कहकहाशब्दो हस्वीभूतार्चिषः परम् । स्विद्यतश्च शवौघस्य श्रुतः सिमसिमाध्वनिः ॥९८९॥
विलीनास्रग्वसामेदोनिःष्यन्दाः सरणीशतैः । प्रसस्रुर्विस्मयन्धश्च योजनानि बहून्यगात् ॥९९०॥
एकः सुश्रवसः कोपाद्विनीयो दस्युविद्रवात् । ईदृग्घुंतवहाबाधो घोरश्चक्रधरेभवत् ॥९९१॥
भूतग्रामस्य संहारः संवर्त इव वह्निना । तादृक्त्रिपुरदाहे वा खाण्डवे तत्र वाभवत् ॥९९२॥
पृथ्वेद्धि शुक्लहादश्यां नभसः कुरुतं महत् । तद्धिक्षुः कृतवान्राज्यलक्ष्म्या भाग्यैश्च तत्यजे ॥९९३॥
सकुटुम्बेषु दग्धेषु तदानीं गृहमेधिषु । पुरग्रामसहस्रेषु गृहाः शून्यत्वमाययुः ॥९९४॥
995 मड्डाख्यो डामरश्चिन्वडशवान्नोनगरोद्भवः । प्रीतिं प्राप्तिस्तदीयार्थैः कापालिक इवाययौ ॥९९५॥

---

९६७. [1]) Emended with C, A विद्राव°. ९७३. [1]) Emended, A नैर्भक्षवै°. ९७४. [1]) Emended with C; A आङ्गने. ९७५ [1]) Emended, A निर्गुंटडा° ९९१ [1]) Emended with C, A ईदृग्घुत° ९९२ [1]) Emended, A भूतग्रामसंहार°, C भूतग्रामाविर्भ°. ९९५ [1]) Emended, A °ग्रोगरोद्भव.

अवरुद्धोय विजयक्षेत्रं भिक्षाचरस्ततः । लब्ध्वा नागेश्वरं पापं यातनाभिरमीमरत् ॥९९६॥
गर्ग पैतामहे देशे किं नासीत्तस्य चेष्टितम् । पितृद्रुहः स तु वधः सर्वप्रीतिकरोभवत् ॥९९७॥
गृहिणी हर्षमित्रस्य पत्यौ त्यक्त्वा पलायिते । पृथ्वीहरेण संप्राप्ता विजयेशाद्वनान्तरात् ॥९९८॥
निमित्तभूतमेतादृक्प्रजासंहारवैशसम् । स्वं निन्दन्सुस्सलो राजा ततो योद्धुं विनिर्ययौ ॥९९९॥
संवेगारूढमनसः शीघ्रं निरयकेशभुक्तये । प्राप्तो जनकराजेन वधोवन्तिपुरान्तिके ॥१०००॥ 1000
यत्कृते क्रियते कर्म लोकान्तरसुखान्तकम् । स मूढैः खलभाषायः कायश्चित्रं न गण्यते ॥१००१॥
कम्पनाधिपतिं सिम्बं कृत्वा डामरमण्डलम् । चकर्ष विजयक्षेत्रादन्यतोपि ततो नृपः ॥१००२॥
शामालां प्रययौ पृथ्वीहरो मडवराज्यतः । विजित्य मल्लकोटेर्न स्याजितो निजमण्डलम् ॥१००३॥
क्षिप्राः केचिद्विनस्तायां केचिच्चक्रधराङ्गने । अक्रियन्तामिसात्कदुमशक्या बहवः शवाः ॥१००४॥
क्रमराज्येथ कल्याणवाडादीन्त्रिल्हणोजयत् । आनन्दोनन्तजस्तत्र ततो द्वाराधिपोभवत् ॥१००५॥ 1005
भूले प्रमाथिनं सिंहं नयन्पृथ्वीहरो बली । सार्धं जनकसिंहाद्यैरयुध्यत्क्षिप्रिकातटे ॥१००६॥
तीर्थे प्रस्थाप्यमानेषु विपन्नास्थिग्रहास्यहः । भाद्रे मास्येकमबलाक्रन्दिताक्रान्तदिक्पथम् ॥१००७॥
हतवीराबलाक्रान्दमुखरे नगरान्तरे । पृथ्वीहराहवे सर्वैर्वीरैरन्वकारि तत् ॥१००८॥ युग्मम् ॥
अथायातो यशोराजस्यालः शूरो दिगन्तरात् । श्रीवको विदधे राज्ञा खेरीकार्याधिकारभाक् ॥१००९॥
अप्रियं स लवन्यानां तेपि वा तस्य नाचरन् । कालं तु गूढसौहार्दैरन्योन्यस्यात्यवीवहन् ॥१०१०॥ 1010
पुनराश्वयुजे राजा शामालां निर्गतस्ततः । पैरैर्मनीमुपग्रामे युधि भङ्गमनीयत ॥१०११॥
नित्याभ्यासेन युद्धानां लब्धोत्कर्षो न्यदर्शयत् । सर्ववीरामणीर्भिक्षुस्तत्पूर्वं तत्र विक्रमम् ॥१०१२॥
तुक्कद्विजादयो मुख्या भिक्षुपृथ्वीहरादिभिः । आसारापातविवशा निहताः सौस्सले बले ॥१०१३॥
प्रधानवीरभूयिष्ठे सैन्यद्वन्द्वे न कोप्यभूत् । स वीरश्चरतः संख्ये भिक्षोरैक्षिष्ट यो मुखम् ॥१०१४॥
पृथ्वीहरस्य भिक्षोश्च संग्रामे भूरिवार्यके । कादम्बरीपताकाख्ये द्वे अभे पीतपाण्डुरे ॥१०१५॥ 1015
आस्तामत्यद्भुते याभ्यामनेकतुरगक्षये । न विपन्नं प्रहर्तृभिर्नान्वभाव्यय वा क्रमः ॥१०१६॥
सैन्यानां संकटे त्राणमभान्तिरविकत्थनः । अभूत्क्लेशसहो वीरो नान्यो भिक्षाचरात्क्वचित् ॥१०१७॥
योधानां सौस्सले सैन्ये विद्रवेषु न कश्चन । त्राणं बभूव नैनैते बहवो बहुधा हताः ॥१०१८॥
नवेषु डामरानीकाः केचिद्भङ्गेषु सैनिकाः । भिक्षाचरगजेन्द्रेण कलभा इव पालिताः ॥१०१९॥
नान्यस्येत्थानशीलत्वं दृष्टं पृथ्वीहरात्तदा । स्वयं यो भैक्षवे द्वारे जजागार प्रतिक्षपम् ॥१०२०॥ 1020
ततः प्रभृत्यभूद्गोप्ता पुरः पश्चाच्च सर्वदा । विभेदेव इव भ्राद्धे युद्धे भिक्षुर्महाभटः ॥१०२१॥
आहवे साहसं कुर्वन्सर्वतः सोभ्यधाज्जिनान् । एवमस्खलितस्थैर्यमुपपत्तिमसंत्यजन् ॥१०२२॥
न मे राज्याय यत्नोयं पर्याप्तं दुर्यशः पुनः । कृत्ये प्रसक्तु पूर्वेषां व्यवसायं व्यपोहितुम् ॥१०२३॥
अनाथा इव ते नाथा विशां व्यापादनक्षणे । ज्ञात्वा नष्टं कुलं नाथवद्भो नूनं स्पृहां दधुः ॥१०२४॥

१००३. [1]) Emended with C; A महन. १००५. [1]) A °वाळाडी°.—[2]) Emended with C, A°सीचल्हणो°. १००८. [1]) Emended A °बलाक्रान्तमु°. १००९. [1]) Emended , A अथ यातो.

1025 इति मत्वा सोढकष्टश्चेष्टे सुदृढनिश्चयः । दूयमानोस्मि दायाददुःखदायी दिने दिने ॥१०२५॥
नास्त्येवाप्राप्तकालस्य विपत्तिरिति जानतः । कस्य साहसवैमुख्यमुपपद्येत यशोर्थिनः ॥१०२६॥
किं कार्यगतिकौटिल्यैरुक्तैस्तान्यथ वा कथम् । न वदामः प्रतिज्ञाय स्वयमार्यध्वनि स्थितिम् ॥१०२७॥
सोत्कर्षपीरुषाड्ढिक्षोरशङ्कितस्य ज्ञामराः । ततो दायादविच्छेदं नास्याकृपत जातु चित् ॥१०२८॥
प्राप्याज्याधिगमाद्राज्ञामन्येषां राजबीजिनः । चिन्तयन्तो व्यवहतिं व्युत्पद्यन्ते शनैः शनैः ॥१०२९॥
1030 पितुः पितामहस्याथ न दृष्टं तेन किंचन । अत एवाभजन्मोहं राज्यं संप्राप्तवान्पुरा ॥१०३०॥
तत्स भूयोपि नेदाप्यर्त्यकैव वार्ता विपाटने । सापेक्षं वीक्षितुं जाने न दैवेनाप्यशक्यत ॥१०३१॥चक्रलकम्॥
जानंस्तवन्यकौटिल्यं प्रमादात्स हतेहिते । भ्रातुर्यां राज्यमित्याशां बद्धाहान्यत्यवाहयत् ॥१०३२॥
दस्यूनां सुस्सलो राजा मेने तत्स्वहितं मतम् । जिगीषुर्नीतिविक्रान्तयोः प्रयुक्तो लिप्सुरन्तरम् ॥१०३३॥
युद्धे स्वान्स स्मरन्वैरं नापासीत्तेन तेभजन् । नास्मिन्विश्वासमेतस्माद्धेतोर्नास्याभवज्जयः ॥१०३४॥
1035 इत्थं नानामतैः पक्षप्रतिपक्षैरुपेक्षितम् । राष्ट्रं निखिलमेवागात्सर्वतः शोचनीयताम् ॥१०३५॥
यत्संबन्धाद्विटपिनिवहैर्निर्महद्व्यप्रबन्धव्याधप्रत्तानलपरिभवः कोपि नन्वन्वभावि ।
हा धिग्दन्ती विघटनपरः सोपि माद्यन्नमीषां लभ्यं श्रेयो विधिविधुरितैर्नान्यतो न स्वतोपि ॥१०३६॥
द्वैराज्ये प्रभवत्येवमकाण्डपतितैर्हिमैः । विवशं सुस्सलस्यमाभूद्जयद्वैक्षवं बलम् ॥१०३७॥
पुष्याणांनाडं भूयोपि भिक्षुपृथ्वीहरौ गतौ । अन्यैर्लब्धन्यैर्भूभर्तुर्नेतिर्दत्तकरैः कृता ॥१०३८॥
सिम्बोपि कम्पनाधीशो व्यधाद्विजितडामरः । सर्वां मडवराज्योर्वीं वीरः शमितविग्रहाम् ॥१०३९॥
1040 तावत्यापि विपक्षाणां शान्त्या शीतलतां गतः । पूर्ववैरं स्वपक्ष्याणां प्रादुश्चक्रेथ भूपतिः ॥१०४०॥
जिघांसौ कथिते राजन्युल्हणेन पलायितः । मल्लकोष्ठः सोपि कोपाद्राज्ञा राष्ट्रात्प्रवासितः ॥१०४१॥
अनन्तात्मजमानन्दं बद्धा द्वाराधिकारिणम् । व्यधत्त सैन्धवं प्रज्ञिनामानं राजबीजिनम् ॥१०४२॥
गतोथ विजयक्षेत्रं सिम्बेन सहितोविशत् । नगरं तं च विश्वस्तं बद्धा कारागृहेक्षिपत् ॥१०४३॥
अनुस्मृतिमहावात्याप्रेरितोमर्षपावकः । आचचाम क्षमावारि तस्य भृत्यान्धिधक्षतः ॥१०४४॥
1045 सिंहथक्कनसिंहाभ्यामनुजाभ्यां सहावधीत् । भूलेधिरोप्य सिम्बं स रोषावेशविलुप्तधीः ॥१०४५॥
कम्पने श्रीवकं चक्रे सुज्जि प्रज्ञेः सहोदरम् । बद्धा जनकसिंहं च राजस्थाने न्ययोजयत् ॥१०४६॥
आप्राश्च नान्त्रिणश्चासंस्तस्य वैदेशिकास्ततः । स्वदेशजस्तु सोभूद्यो लोहस्थं तमन्वगात् ॥१०४७॥
अथ सर्वेपि साशङ्कास्तं त्यक्ताध्वर्भयन्निपुन् । शतैकीयः कश्चिदासीद्राजधान्यां नृपाश्रितः ॥१०४८॥
तेनाप्रतिसमाधेयो भूयः शान्तेप्युपद्रवे । इत्थमुत्थापितोनर्थो न पुनर्यः शमं ययौ ॥१०४९॥
1050 एकाक्षेपे परेपि स्युर्यत्र भृत्या विशङ्किताः । तत्रापराधे प्राज्ञस्य राज्ञोवश्यैव शस्यते ॥१०५०॥
माधेय मल्लकोष्ठार्यैराहूताः पुनरायय्युः । ते भूरपुरमार्गेण भिक्षुपृथ्वीहरादयः ॥१०५१॥
विनस्तापरिखाक्षिप्रा भूरगम्या द्विपामियम् । इति प्रायान्नवमठं त्यक्त्वा राजगृहं नृपः ॥१०५२॥

१०२५. [1]) A, gloss स्वयं. १०२६ [1]) Emended with C, A नास्त्येवप्राप्त°. १०३१. [1]) Emended, A नेदाप्स्येवैव.—[2]) A, writes here ४ instead of चक्रलकम् १०३३ [1]) Doubtful emendation, A जिगीर्षोर्नी° and प्रयुक्तो लिप्सरन्तरम्, C जिगीर्षोर्नी° and प्रयक्तो लिप्यनन्तर. १०३८. [1]) A पुष्यान°. १०४८. [1]) Emended, A त्यक्ताधिश्र°. १०५१. [1]) Emended, A °कोष्ठार्यै आहूता:.

वर्षैष्टानवते चैत्रे डामरेषु युयुत्सवु । अभ्येत्य मल्लकोष्ठेन प्रागेवाप्ताधि संगरः ॥१०५३॥
सोभ्रवारैः सह रणं चकार नगरान्तरे । नृपावरोधैः सौधादालोकितमथाकुलैः ॥१०५४॥
भिक्षुणा क्षिप्रिकातीरे स्कन्दावारं न्यबध्यत । ..... [1] ॥१०५५॥ 1055
नृपोद्यानाम्रमाञ्जिन्युरिन्धनाय महानसे । दूर्वाङ्कुरान्मन्दुराभ्यो वाहभोज्याय डामराः ॥१०५६॥
पृथ्वीहरस्तु संगृह्णन्दस्यून्मडवराज्यजान् । चकार विजयक्षेत्रे यावत्कटकसंग्रहम् ॥१०५७॥
तावत्प्रज्जिमुखान्मल्लकोष्ठयुद्धाय भूपतिः । आदिदेशादरवस्कन्दं वैशाखे साहसोन्मुखः ॥१०५८॥
अकस्मात्पतिते तस्मिन्हतावष्टम्भविक्षताः [1] । प्रययुः सेतुमुल्लङ्घ्य जीवाश्वस्ताः कथंचन ॥१०५९॥
नगरं मल्लकोष्ठाजिव्यमे प्रज्जावथाविशत् । पृथ्वीहरानुजः सुज्जिं निर्जित्य मनुजेश्वरः ॥१०६०॥ 1060
परं पारं वितस्तायां सेतुच्छेदनामुषन् । अर्वाचि तीरे स गृहान्दग्ध्वार्गात्क्षिप्रिकां ततः ॥१०६१॥
लवन्यैर्नगरं प्राप्तं मत्वा मुस्सलभूपतिः । आययौ विजयक्षेत्रात्सैन्यमुत्थाप्य विह्वलः ॥१०६२॥
अहंपूर्विकयारातिशङ्कर्तिथ निजैर्बलैः । पीडितस्तस्य गम्भीरासिन्धुसेतुरभज्यत ॥१०६३॥
स कृष्णषष्ठ्यां ज्यैष्ठस्य तस्यासंख्यश्चमूचयः । यथाग्निना चक्रधरे तथा तत्राम्भसा मृतः ॥१०६४॥
भुजमुथ्य शमयन्सैन्यानां संभ्रमं नृपः । त्रस्तैर्भ्रष्टैस्तथा पृष्ठे पतितः सरिदन्तरे ॥१०६५॥ 1065
अनभ्यस्तास्तुतरणैराश्रित्य ह्रुडितोसकृत् । तरदायुधविद्वाङ्गः स निस्तीर्णः कथंचन ॥१०६६॥
अनुत्तीर्णं बलं त्यक्त्वा पारे सामन्तसंकुलम् । सहस्रांशेन सैन्यस्य तीर्णेनानुगतो ययौ ॥१०६७॥
संत्यक्तानन्तसैन्योपि सोवष्टम्भमयो नृपः । प्रविश्य नगरं मल्लकोष्ठमुख्यान्रणेग्रहीत् ॥१०६८॥
विजयस्याथ जननी सिल्हाख्या स्वामिनोज्झितम् । निनाय देवसरसं सैन्यं तद्विजयेश्वरात् ॥१०६९॥
साथ पृथ्वीहरेणैत्य हता तत्रोपवेशने । टिक्कश्च दत्तो भूपालसैन्यं विद्रावितं च तत् ॥१०७०॥ 1070
परं व्यायामविद्याविद्रुते निखिले बले । द्विजः कल्याणराजाख्यः समरेभिमुखो हतः ॥१०७१॥
मन्त्रिडामरसामन्तसंकुलान्सौस्सलाद्बलात् । पृथ्वीहरेणागृह्यन्त बद्ध्वा वृन्दानि शस्त्रिणाम् ॥१०७२॥
अन्वगात्स वितस्तान्तं यावत्तान्विद्रुतान्बलात् । ओजानन्दद्विजादींश्च बद्ध्वा भूले व्यपादयत् ॥१०७३॥
मन्त्रिणो जनकश्रीवक्काथा राजात्मजास्तथा । तीर्त्वार्द्रि विषलाटायां शरणं प्रययुः खशान् ॥१०७४॥
इत्थं पृथ्वीहरो लब्धजयः संगृह्य डामरान् । जिगीषुर्भिक्षुणा सार्कं नगरोपान्तमाययौ ॥१०७५॥ 1075
भूयोपि मानुषाश्वौघसंहर्ता सर्वतस्ततः । रणः प्रवृत्ते प्राग्वत्पुरे रुद्धस्य भूपतेः ॥१०७६॥
निर्निरोधः पथानेन नृपावसथ इत्यभूत् । सैन्ये मडवराज्यानां स्वयं पृथ्वीहरोग्रणीः ॥१०७७॥
तत्तत्सामन्तकुलजैर्वीरैः काश्मीरकैर्भटैः । समेतं डामरकुलं दुर्जयं सर्वतोभवत् ॥१०७८॥
काश्मीरकाः शौभकाथाः काकवंद्यायाः सहस्रशः । प्रख्याता भैक्षवे पक्षे रक्षाधाश्चापरेस्फुरन् ॥१०७९॥
नदतः स्वबलाह्राद्यं तुमुलं भुण्वतोन्मिषत् । पृथ्वीहरेणागण्यन्त वाद्यभाण्डानि कौतुकात् ॥१०८०॥ 1080
हित्वा भूर्यथ तूर्यादि परिच्छेत्तुं स कौतुकी । अपाकदुन्दुभीभाण्डशतानि द्वादशाशकत् ॥१०८१॥

१०५५. [1]) Here two *pâdas* seem to be lost, A does not indicate the *lacuna*. C adds रामेण वानरी सेना यथा पाथोनिधेस्तटे. १०५८. [1]) Emended, A °द्याबावस्कन्दं. १०५९. [1]) Emended with C, A °क्षित. १०६१. [1]) Emended with C, A °न्द्रग्ध्वामार्क्षि°.

तथा विनष्टसैन्योपि त्रिंशद्भिर्शैर्नृपात्मजैः । मितैः स्वदेशनैश्वारीन्प्रतिजग्राह सुस्थलः ॥१०८२॥
राजन्यावच्छटिकुलोद्भूतावुदयधन्यकौ । चम्पावल्लापुराधीशावुदयब्रह्मजज्ञलौ ॥१०८३॥
ओजो मल्हणडंसानां धुर्यौ द्वरिहडौकसः । क्षत्रिकाभिख्रिकास्थानसव्यराजादयस्तथा ॥१०८४॥
बिडालपुत्रा नीलाद्या भावुकान्वयसंभवाः । रामपालः सहजिको युवा तस्य च नन्दनः ॥१०८५॥
नानावंश्याः परेप्युग्रसंग्रामव्यग्रताजुषः । पुरोपरोधसंनद्धानरुन्धन्सर्वतो रिपून् ॥१०८६॥
तनूजनिर्विशेषेण रिल्हणेन महीभुजः । रणाग्रेसरतायाहि विजयार्थैश्च सादिभिः ॥१०८७॥
स्वयमुद्यमिना राज्ञा वर्मणेव निजौ भुजौ । सुज्ञिप्रज्ञौ पाल्यमानावभूतां रणकर्मठौ ॥१०८८॥
ताभ्यां साधारणीकुर्वन्राज्योत्पत्तिं महीपतिः । स महाव्यसने तस्मिन्स्वयमूढधुरोभवत् ॥१०८९॥
तत्पक्षा भागिकशरद्भासिमुन्मिनिमुद्भटाः । कलशाद्याश्च कुशला विपक्षक्षोभणेभवन् ॥१०९०॥
भूभर्तुष्टक्कविषये लवराजस्य नन्दनः । आसीत्कमलियश्चाद्य संग्रामग्रेसरः प्रभोः ॥१०९१॥
प्रहारं बलिनस्तस्य चामरध्वजशोभिनः । प्रभिन्नस्येव नागस्य हयारोहा न सेहिरे ॥१०९२॥
अनुजः सद्विकः पृथ्वीपालो भ्रातुः श्रुतोस्य च । पाञ्चालाः फल्गुनस्येव पार्श्वरक्षित्वमाययुः ॥१०९३॥
एतावद्भिर्भृत्यरत्नै राष्ट्रेपि कुपितेजयत् । भूरिस्वर्णार्पणोपायैर्वाजिभिश्च महीपतिः ॥१०९४॥
तत्र तत्राहवे सोपि बभ्रामाम्भ्रमो नृपः । उत्सवे गृहमेधीव मण्डपे मण्डपे स्वयम् ॥१०९५॥
तस्य हि व्यसनं त्रासहेतुः प्राभूदुपक्रमे । प्रवृद्धिं प्राप्तमभवद्धैर्यादाय्यथ धीमतः ॥१०९६॥
क्लैब्यक्लम्यमापाते मध्यपाते न तादृशम् । करक्षिप्तं यथा शीतं मज्जने न तथा पयः ॥१०९७॥
वैरिसैन्यतमो यत्र यत्र ज्योर्म्लेव निर्ययौ । सितासिता च भूभर्तुस्तत्रास्य वाहिनी ॥१०९८॥
एकदा कृतसंकेतास्तुल्यमाहवमेलके । महासरितमुत्तीर्य डामरा नगरेपतन् ॥१०९९॥
असीमनगरस्थानविभक्तकटको नृपः । परिमेयाश्ववारस्तान्विशतः स्वयमाद्रयत् ॥११००॥
नाभ्रजद्भामरानीकस्तेन विद्रावितो धृतिम् । हेमन्तमरुता कीर्णपर्णराशिरिवेरितः ॥११०१॥
श्यानन्दः काककुलजो लोष्टशाह्यनलादयः । अन्ये च डामरानीके ख्याता भूभुग्भटैर्हताः ॥११०२॥
लग्नाभिधातानानीतान्नाशः क्रूरस्य वृत्तयम् । बहून्निजग्रुश्चण्डाला इव राजोपजीविनः ॥११०३॥
भयाद्रोपाद्रिमारूढा अपरे भैक्षवास्ततः । आसन्नमृत्यवोभूवन्कटकैर्वेष्टिता द्विषाम् ॥११०४॥
यो मार्गो दुर्गमः पक्षिणोपि वातुं ततः स तान् । तत्र व्यापारयामास भिक्षुर्मानी तुरंगमान् ॥११०५॥
कथंचित्पक्षिणा विद्धपीवस्तस्यापहीन्मुहुः । पार्श्वे पृथ्वीहरो रूढं द्विश्चाश्चान्ये महाभटाः ॥११०६॥
वेलाद्रिभिरिवोद्भूतैः सिन्धौ तैर्हयितां बले । रुद्धे गोपाचलं त्यक्त्वा तेन्यानारुरुहुर्गिरीन् ॥११०७॥
अथोदतिष्ठद्भामेन राजानीकस्य वाहिनी । मल्लकोष्टस्य पत्यश्वक्षोभिताशेषदिक्तटा ॥११०८॥
अरिपृष्ठप्रहण्यैस्तिष्ठन्स्वैर्वीजितो बलैः । तदाज्ञाव्यग्रिकैरेष हतो राजेत्यसंशयम् ॥११०९॥
आपातं सुस्थलो राजा यावत्तस्याविसोढवान् । तावत्सावरजः प्रज्जिराजगाम रणाङ्गनम् ॥१११०॥

१०८४. [1]) Thus A_1 in margin; A_1 नेजो in text. १०९०. [1]) Thus A; perhaps to be emended मुज्जा-; cf viii. 589 १०९३ [1]) Emended (= e. पाञ्चालाः), A पाञ्चालौ.—[2]) Thus A; perhaps read with C फाल्गुन°. ११०४. [1]) Thus A_1, A_2 द्विषाम्. ११०८ [1]) Emended, A °तिष्ठ-मेन, C °तिष्ठत् सुरसेन. १११०. [1]) Emended with C, A प्राज्जि°

आषाढबहुलाष्टम्यां स हयारोहमेलकः । निजशस्त्रध्वनिप्रत्तसाधुवादो महानभूत् ॥१११॥
ताभ्यां स शमिते युद्धे ससूनुः ससमीरणः । दावो नभोनमस्याभ्यामिव प्राप्ताम्बुवृष्टिभिः ॥१११२॥
संग्रामबहले काले तादृगन्यो न कोप्यभूत् । यादृक्स दिवसो वीर्यशौटीर्यनिकषोपलः ॥१११३॥
अनीकिनी लाहरी सा विलम्बेनोपयायिनि । तेषामुत्पाटनेच्छूनां नाभवद्धस्तमेलकः ॥१११४॥
अन्योन्यस्य परिज्ञाता दिवसे तत्र संकटे । भिक्षोर्भूमिभृता शक्तिर्भूमिभर्तुश्च भिक्षुणा ॥१११५॥ 1115
ततो मडवराज्यांस्तान्योद्धुं तत्रैव निर्दिशन् । क्षिप्रिकारोधसा युद्धमेत्य पृथ्वीहरोमहीत् ॥१११६॥
दिनान्तराद्यायातो यशोराजो महीभुजा । मण्डलेश्वरतां निन्ये रिपून्प्रतिजिहीर्षुणा ॥१११७॥
खंगीकार्ये पुरा तस्य लवन्या दृष्टविक्रमाः । रणेषु मुखमालोक्य शतशः प्रचकम्पिरे ॥१११८॥
कङ्कुमालेपनच्छद्मनाहयादिप्रतिपत्तिदः । सर्वेषामभिनन्द्यत्वं तं राजा स्वमिवानयत् ॥१११९॥
दीर्घोपप्लवयाप्येन दुःस्थितः स्वास्थ्यलिप्सया । जनो बबन्ध तत्रास्यां नवत्वैद्य इवातुरः ॥१११०॥ 1120
ज्यायांसं पञ्चचन्द्राख्यं शेषाणां गर्गजन्मनाम् । नृपतिर्मल्लकोष्टस्य प्रातिपक्ष्ये न्ययोजयत् ॥११२१॥
शिशुश्छुडाख्यया मात्रा पालितः स शनैः शनैः । आश्रीयमाणोतुचरैः पित्र्यैः किंचित्प्रथां ययौ ॥११२२॥
यशोराजानुयातेन राज्ञा जन्येषु निर्जिताः । केचित्तत्पक्षमभजन्भग्नाः केचिच्च डामराः ॥११२३॥
सभिक्षुः प्रययौ पृथ्वीहरः स्वभुपवेशनम् । मल्लकोष्ठान्मुखो राजा निर्जगामामरेश्वरम् ॥११२४॥
अत्रान्तरे मल्लकोष्ठो विसृज्य निशि तस्करान् । सदाशिवान्तिके भूम्यां राजधानीमदाहयत् ॥११२५॥ 1125
पृथ्वीहरेण भूयोपि योद्धुमागच्छतासकृत् । प्रज्जिसुज्जिमुखा युद्धमकुर्वन्क्षिप्रिकातटे ॥११२६॥
वारं वारं लवन्यः स नगरं निर्दहन्गृहान् । प्रायः भून्यत्वमनयद्वितस्तातीरमुत्तमम् ॥११२७॥
तत्र तत्र रणान्कुर्वन्पाणसंदेहदायिनः । आचक्रामाथ नृपतिर्लहरं वहलैर्बलैः ॥११२८॥
निःसेतु तरतः सिन्धुं वृतिभद्राद्ययुर्जलैः । मन्दिरं कन्दराजाद्यास्तदीयाः समवर्तिनः ॥११२९॥
दग्ध्वेदं ययौ मल्लकोष्ठो राजा निराकृतः । सपुत्राप्यभजच्छुद्धा प्रारोहं लहरान्तरे ॥११३०॥ 1130
आनिन्यिरे जय्यकेन लवन्येन नृपान्तिकम् । विशलाटान्तरात्तेथ जनकश्रीवकादयः ॥११३१॥
लहरारूढ्यतिक्रान्तनिदाघः शरदागमे । ग्रामाल्यं निर्ययौ राजा यशोराजान्वितस्ततः ॥११३२॥
भग्नं पृथ्वीहरत्रासात्सैन्यं रक्षन्मनीषुये । आजौ सज्जात्मजो डाम्बनामा राजसुतो हतः ॥११३३॥
युद्ध सुवर्णसानुग्रामभूरपुरादिषु । कुर्वञ्शत्रूपः प्राप पर्यायेण जयाजयौ ॥११३४॥
श्रीकल्याणपुराद्रुद्धं नीते पृथ्वीहरादिभिः । श्रीवंके नागवट्टाद्या युधि प्रापुः प्रमापणम् ॥११३५॥ 1135
पौषे सुवर्णसानुग्रान्निहन्तुं मातुरन्तकम् । टिक्कं स देवसरसं व्यसृजद्गर्वबल्लभाम् ॥११३६॥
स्वेन राज्ञश्च सैन्येन सहिता सा जिताहिता । अकस्मात्तत्र टिक्केन निपत्य निहता युधि ॥११३७॥
स स्त्रीवधं व्यधात्पापी द्वितीयमपि निर्घृणः । विजेपः कोथ वा तिर्यङ्म्लेच्छतस्कररक्षसाम् ॥११३८॥
अबलां स्वामिनीं हन्यमानां त्यक्त्वा पलायिताः । चित्रं पशुपमाः शस्त्रं स्त्रीवधकुलीहराः पुनः ॥११३९॥

११११२ ') The text of this verse appears to be defective ११११४ ') A विलम्भन ११२१ ') Emended with C, A यातिपक्षे ११२३ ') Emended with C, A °चान्पक्ष . ११३६ ') Conjectural reading A मातुरन्तिकम् Cf vss. 1069 ff and 1138 ११३८ ') Emended with C, A द्वितीयमपि ११३९. ') Emended with C, A °चित

ईषत्यागाभितं शय्यां भूय एवोत्बणं नृपः । ज्ञात्वा मद्वराज्यं स प्रयत्नै विजयेश्वरम् ॥११४०॥
मल्लराजननुजानां निजा जिह्वेव दुर्जना । बभूव प्रभविष्णुस्वे व्यापदापातदुर्मिका ॥११४१॥
प्रायश्चाद्यतने काले भृत्यास्तितउवृत्तयः । दर्शयन्ति समुत्सार्य सारं दोषतुषप्रहम् ॥११४२॥
श्रा बाल्यात्संस्तुताक्षीलवचःपरुषभाषितैः । निर्गीरवैर्यशोराज्ञो राज्ञि तस्मिन्व्यरज्यत ॥११४३॥
स दुर्जातिर्महासैन्ययुतोवान्तपुरस्थितः । अभजत्तत उत्थाय प्रतिपक्षसमाश्रयम् ॥११४४॥
वैरिपक्षगते तस्मिन्बलैः सर्वोत्तमैः समम् । विह्वलो विजयश्रेत्रात्पलायिष्ट महीपतिः ॥११४५॥
धिग्राज्यं यत्कृते सोपि सेहे प्राणान्निरक्षिपुः । मुण्डश्मश्रुरचण्डालप्रायैः परिभवं पथि ॥११४६॥
माघे पलाय्य नगरं प्रविष्टः स यथाभिधे । भृत्ये द्रोरधर्यशङ्कष्टे स्वेषामपि तनूरुहाम् ॥११४७॥
काश्मीरिके जनेशेथे निराशो नितरां ततः । अङ्गन्यस्तोत्तमाङ्गेभूत्प्रज्ञिपक्षे क्षमापतिः ॥११४८॥
मुद्रिता रुद्रपालादिपूर्वराजात्मजप्रथा । प्रज्ञिना विक्रमत्यागनयाद्रोहादिभिर्गुणैः ॥११४९॥
तेनैव वर्धितामुत्र देशे विशदकीर्तिना । कालदोषात्व्यलुठिता प्रतिष्ठा शस्त्रजास्वयोः ॥११५०॥
अमन्त्रयत संगम्य यशोराजस्तु भिक्षुणा । नेच्छन्ति डामरा राज्यं तव विक्रमशङ्किताः ॥११५१॥
उत्पाद्य पुनरुत्पिप्सुं साधिष्ठानबला वयम् । राज्यं स्वयं महीष्यामो यास्यामो वा दिगन्तरम् ॥११५२॥
इति तैर्मन्त्रिते छद्मा हतां श्रुत्वा दरत्पुरात् । आगत्य मल्लकोष्ठोपि प्राविशत्स्वोपवेशनम् ॥११५३॥
वर्षोघे दुस्तरः ख्यात एकाब्दशतसंख्यया । सर्वभूतान्तकृल्लोके प्रावर्तत सुदारुणः ॥११५४॥
वसन्ते डामराः सर्वे प्राग्वन्मार्गैर्निजैर्नैजैः । आगत्य भूयो भूपालं नगरस्थमवेष्टयन् ॥११५५॥
धीरः सुस्थलदेवोपि पुनरासीद्विषादिशम् । निःसीमसमरस्तोमारम्भसंरम्भमाजनम् ॥११५६॥
दाहलुण्ठनसंघातकर्मशौण्डैः स डामरैः । प्राग्विद्रवेभ्योप्यधिको विप्लवः पर्यवर्तत ॥११५७॥
महासमित्पथे निर्निरोधे तस्थुर्विविक्षवः । नगरं ते यशोराजभिक्षुपृथ्वीहरादयः ॥११५८॥
ततः कतिपयेष्वह्नेषु यातेषु संगरे । निर्जेनैव यशोराजः परकीयश्रमाहतः ॥११५९॥
कृत्यात्मजेन हि समं विजयाख्येन सार्धना । सौस्थलेन तु संग्रामे परावृत्तीः प्रदर्शयन् ॥११६०॥
निष्फलब्धैः सवर्णाश्रकवचावेक्षणादिभिः । भूपार्थुधिभिरुद्दामैः शूलाघातैरहन्यत ॥११६१॥
भिक्षो राज्यं समर्थोय दातुं हन्तुं ततश्च नः । भीत्या तैर्डामरैरेव स घातित इति श्रुतिः ॥११६२॥
यथैव तेन विश्रब्धः स्वामी द्रोहेण वञ्चितः । तथैव प्राप विश्रब्धः क्षिप्रमेव वधं मृधे ॥११६३॥
पृथ्वीहरस्तत्र तत्र योधयित्वाथ डामरान् । क्षितिप्रकारोधसा भूयोभ्येत्य संग्राममहीत् ॥११६४॥
तत्राधिष्ठानयोधानां भिक्षुपक्षोपजीविनाम् । पौरुषं स्वपरोत्कर्षपरिभावि व्यभाव्यत ॥११६५॥
बह्विधानमहायोधसंहाराद्येरुपद्रवैः । एकमेकमहस्तत्रानेहस्यासीद्भयावहम् ॥११६६॥
अतपत्तरणिस्तीक्ष्णमभीक्ष्णं भूरकम्पत । ववुर्दुर्मादीन्मञ्जन्तो महोत्पातप्रभञ्जनाः ॥११६७॥
पवनोत्थापितैः पांसुकूटैर्व्योम्नि मदोद्धतैः । व्योम्नि प्रोत्तम्भनस्तम्भद्विर्निर्घातदारिते ॥११६८॥

११४८ [1]) A काश्मीरिके —[2]) Emended, A निराशो. ११५१. [1]) Emended with C, A °न्तिवेच्छुतां. ११५७. [1]) Thus corr. by A, from A_1- - - - भूत. ११६८ [2]) Thus A, G महोद्भतैः.

ज्यैष्ठस्य शुक्लैकादश्यां प्रवृत्तेथ महारणे । काष्ठीले डामरा वह्निमेकस्मिन्प्रददुर्गृहे ॥११६९॥
सोग्निर्वा मारुतोद्भूतः प्रसरन्वैश्वनोथ वा । जज्वालैकपदे कृत्स्नं नगरं निरवग्रहः ॥११७०॥ 1170
दृष्टस्तदानीमेतावद्व्रजव्यूह इवापतत्[1] । माक्षिकस्वामिनो धूमो बृहत्सैनो यदुत्थितः ॥११७१॥
अथेन्द्रदेवीभवनविहारं सहसागमत् । ततो नगरमुज्ज्वालं क्षणात्सर्वमदृश्यत ॥११७२॥
न भूमिर्न दिशो न द्यौर्धूमध्वान्ते व्यभाव्यत । हुडुक्कामुखचर्माभो दृश्यादृश्योभवद्रविः ॥११७३॥
धूमान्धकारसंच्छन्नास्तप्तः प्रज्वलताग्निना । अपुनर्दर्शनायेव मुहुरविष्कृता गृहाः ॥११७४॥
वितस्तादृश्यतोज्ज्वालवेदमाश्लिष्टतद्वया । रक्ताक्तोमयधारेव कृतान्तस्यासिवल्लरी ॥११७५॥ 1175
ब्रह्माण्डोर्ध्वकवाटान्तसंस्पर्शात्पतितोच्चकैः । ज्वालाकलापैः संवृद्धैर्हेमच्छत्रवनायितम् ॥११७६॥
उद्यावचैर्युतो ज्वालाभृद्भिर्हैमाद्रिसंनिभः । वह्निर्धूमच्छलान्मूर्ध्नि बभाराम्बुधरावलिम् ॥११७७॥
आविर्भवन्तो[1] ज्वालाभ्यो गृहाधक्रुर्मुहुर्मुहुः । भदन्था एते इत्याशां विमुग्धगृहमेधिनाम् ॥११७८॥
ज्वलितैस्तापितजला वितस्ता पतितैर्गृहैः । और्वोप्यवेदनाक्लेशं विवेद सरितां प्रभोः ॥११७९॥
द्रोग्रपक्षैः खगैः साकं ज्वलिता बालपल्लवाः । उद्यानद्रुमषण्डानां द्योमोद्वयनमादधुः ॥११८०॥ 1180
सुधासिताः सुरगृहा ज्वालासंवलिता व्यधुः । क्षयसंध्याम्बुदाश्लिष्टहिमाद्रिशिखरश्रमम् ॥११८१॥
मज्जनावासनौसेतुकदम्बैः शोषशङ्कया । अपास्तैर्नगरस्यान्तर्ययुर्नद्योपि शून्यताम् ॥११८२॥
किमन्यन्मत्तदेवौकोगृहाट्टादिविवर्जितम् । नगरं क्षणमात्रेण दग्धारण्यमजायत ॥११८३॥
लोष्ठावशेषे नगरे धूमदृश्यामो निरास्पदः । उच्चैरेको बृहद्भूतो दृष्टो दग्धद्रुमोपमः ॥११८४॥
सैन्येषु ज्वलितावासत्राणाय चलितेष्वथ । शतमात्रेण योधानां युतो भूभृदजायत ॥११८५॥ 1185
पारं गन्तुं वितस्ताया अशक्तसेतुं नमक्षमम् । लब्धरन्ध्रा द्विषोनन्ता निहन्तुं पर्यवारयन् ॥११८६॥
पुरं दग्धं स्वमुत्सङ्गं[1] प्रजा नष्टाश्च चिन्तयन् । आसन्नं मरणं राजा निर्विण्णो बहुमन्यत ॥११८७॥
प्रस्थास्नुमथ तं प्रत्यङ्मुखमाशङ्क्य विद्रुतम् । संज्ञितोन्यैः कमलियः क्व देवेत्यब्रवीद्वचः ॥११८८॥
संरम्भस्मितविद्योति चन्दनोल्लेखमाननम् । परिवर्त्य निरुद्वाश्रो धीरः स तमभाषत ॥११८९॥
तदद्य करवै भूमेः कृते हम्मीरसंगरे । चकार राजा भिज्ञो यस्सोभिमानी पितामहः ॥११९०॥ 1190
कुतस्त्योप्येष दायादो यद्वातास्माकमस्मि वा । स हर्षदेवोपश्रयः कार्यशेषं पलायितः ॥११९१॥
को नाम मानिनां पद्भ्यौ प्रविष्टोन्ते निजां भुवम् । असिक्तां स्वाङ्गरक्ताक्तां व्याघ्रः कृत्तिमिवोज्झति ॥११९२॥
इत्युल्कोदञ्चयन्वल्गामुल्क्षिप्राग्रमुख हयम्[1] । संस्पष्टुमिच्छुः पाणिभ्यां कृपाणमुदनामयत् ॥११९३॥
ततो निगृह्य[1] वल्गायां वाजिनं लवराजजः । ऊचे भृत्येषु सत्स्वमे प्रवेशार्हा न भूभुजः ॥११९४॥
प्रहारविक्लवस्तिष्ठन्गृहादेकोभ्युपाययौ । संकटे तत्र भूभर्तुः[1] पृथ्वीपालोन्तिकं परम् ॥११९५॥ 1195
कौलपुत्र्यं स्तुवंस्तस्य वात्सल्यादेष भूपतिः । स्वस्यात्मनिष्क्रयां[1] मेने सेवाविष्कृत्युपक्रियाम् ॥११९६॥

११७१. [1]) Thus corr by A, from °पतत् ११७८ [1]) Emended with C, A °भवन्त्यो —[2]) Emended, A यत. ११७१. [1]) Emended with C; A ज्वलित्वैते[2] ११८७. [1]) Emended, A स्वमुत्पन्नं. ११९१ [1]) Emended with C; A कुतस्त्येवेष, doubtful. ११९२. [1]) Emended with C, A स्वाङ्गरक्ता ११९३. [1]) Emended, A सम्यङ्मिच्छु.; cf. viii 1528 ११९४ [1]) Emended with C; A निर्गृह्य ११९५. [1]) Emended with C, A स्वस्यात्मनिष्क्रयां.

अथ स्थितास्त्रिभिर्व्यूहैरहितास्तोकिरञ्शरान् । हन्तुं वामेन ते योधाः सर्वे वाहनदुर्मदाः ॥११९७॥
स प्रेरयंश्च तुरगं दैवात्तस्य च तादृशः । सहस्राण्यपि भूरीणि व्यधीयन्त विरोधिनाम् ॥११९८॥
अल्पसैन्यो द्विषत्सङ्घमण्डलप्रतिबिम्बितः । नृपः साहायकायातविभ्रूरूप इवाबभौ ॥११९९॥
कलविङ्कानिव इयेनः कुरङ्गानिव केसरी । एको व्यद्रावयद्भूरीनरीन्मुस्सलभूपतिः ॥१२००॥
निपत्य पत्तीन्नुन्नानान्खुराग्राण्यपि वाजिनाम् । ग्राहरंस्ते हयारोहा व्यूहव्याहतरंहसः ॥१२०१॥
बिम्बितज्वलनज्वालाः सर्वे एव महाभटाः । हन्तव्याश्च हताश्चासन्नस्रोतोरुणा इव ॥१२०२॥
स द्विषां कदनं कृत्वा दिनस्यान्ते न्यवर्तत । बाष्पायमाणोस्तकाशं हय्याशेनोज्झितं पुरम् ॥१२०३॥
तादृशेप्यजिते तस्मिञ्जयाशागौरवं द्विषः । स चैज्झीद्रमणीयस्य विनाशाज्जीवितादरम् ॥१२०४॥
जायन्स्वपंश्चलंस्तिष्ठन्खन्नस्रश्चय सोरिभिः । निर्गच्छत्रित्यमाहूतो न कैरुद्भाप्यमीक्षितः ॥१२०५॥
वह्निनिर्दग्धसर्वाक्षसंभारे मण्डलेखिले । दुःसहः सहसैवाय घोरो दुर्भिक्ष आययौ ॥१२०६॥
दीर्घविप्रव्रसंक्षीणसंचया डामरैर्बहिः । उत्तब्धोत्पत्नयो रुद्धसंचारा दग्धमन्दिराः ॥१२०७॥
अनामुवन्तो विधुरे राज्ञि राजकुलाङ्गनम् । दुर्भिक्षे तत्र सामन्ता अपि क्षिप्रं विषेदिरे ॥१२०८॥
वह्निनिष्छ्युतशेषाणि वेश्मान्यन्नाभिलाषिभिः । बुभुक्षार्तैर्जनैर्दत्तो ददाहाग्निर्दिने दिने ॥१२०९॥
सरितां सेतवो वारिसंसेकोच्छ्वनविग्रहैः । दुर्गन्धाः कुणपैः रुद्धघ्राणैस्तीर्णास्तदा जनैः ॥१२१०॥
निर्मासनरकङ्कालकपालशकलाकुलां । उवाह सर्वतः श्वेता क्षितिः कापालिकव्रतम् ॥१२११॥
कृच्छ्रसंचारिणोर्कीभुरयामक्षामोष्मविग्रहाः । व्यभाव्यन्त बुभुक्षार्ता दग्धस्थाणुनिभा जनाः ॥१२१२॥
अथ प्रबन्धयुद्धेन दिनैः कापीषुणा क्षतः । पृथ्वीहरो मृत इति श्रुतिर्मिथ्यैव पप्रथे ॥१२१३॥
गाढप्रहारविवशे तस्मिन्प्रच्छादिते जनैः । तां वार्तां श्रुतवान्राजा ननन्दायुद्ध चोद्धतम् ॥१२१४॥
धीरेव पुंश्चली व्याजैरुत्सुक्यसंदर्शनेन तम् । जयश्रीर्लोभयन्त्यासीच्च तु भेजे समुत्सुकम् ॥१२१५॥
एकान्तवामहृदयो विधिरानुकूल्यं मिथ्या प्रदर्श्य विशिनष्ट्यनुबन्धि दुःखम् ।
अन्धीकरोति भृशमभ्रमगं ज्वलन्तं भास्वन्महौषधिभिदे प्रकटय्य वज्रम् ॥१२१६॥
दीर्घदुःखानुभूयन्ते यदीयागमनोत्सवम् । तपःफलमिव क्ष्माभृत्कादङ्क्षासीन्मनोरथैः ॥१२१७॥
वात्सल्येनान्वितं प्रेम गौरवेण प्रियं वचः । औनित्येन च दाक्षिण्यं सापत्यमिव या दधे ॥१२१८॥
तस्योपकरणीभूतविभूतिर्गृहिणी प्रिया । तस्मिन्काले महादेवी विषेदे मेघमञ्जरी ॥१२१९॥तिलकम्॥
विनोदभूम्यनिर्विण्णलोकयात्रं जगद्दिदन् । प्राणै राज्येन वा कृत्यं न स किंचिद्रिरक्षत ॥१२२०॥
सा भर्तुर्व्यसनोदन्तैः कृशा काश्मीरसंमुखी । औत्सुक्याद्वत्तयात्रासीच्छ्वान्ता फुल्लपुरान्तिके ॥१२२१॥
पूर्वं तद्दर्शनाशाया दुर्वार्तायास्ततोतिथिः । भवत्तोधिकं राजा दुःखावेगेन पस्पृशे ॥१२२२॥
राज्ञीमज्ञातपारुष्यतयादूषितभक्तयः । अनुसस्रुश्चतस्रस्ताः परिवारवरस्त्रियः ॥१२२३॥
अप्रत्यक्षे क्षत्रियस्या भक्त्युद्रिक्तत्वमत्यजन् । तेजो नामाभवत्स्नेहो वन्धो भृत्यान्तरेधिकम् ॥१२२४॥
स त्रासंनिहितोन्यस्मिन्नहृद्यायातो निजं शिरः । तच्चितोपान्तरूढेन भङ्क्त्वा माज्ञाविशङ्कदीम् ॥१२२५॥

११९७—११९८ [1]) The text in these two verses appears to be corrupt or incomplete. १२०३. [1]) Thus A. १२०८. [1]) Emended, A प्रपं°. १२११. [1]) Emended with C, A °कुला १२१९ [1]) A, writes here ३ instead of तिलकम्. १२२० [1]) ण्ण supplied by A_2 in space left by A_1.

आहवाह्वानसंरम्भैः शोकविस्मृतिकारिणः । राज्ञो द्विषः कार्यवशादुपकारित्वमाययुः ॥१२२६॥
स राज्यमथ निक्षेप्तुकामो निर्विण्णमानसः । व्युत्क्रान्तशैशवं पुत्रमानिन्ये लोहराचलात् ॥१२२७॥
मण्डलेश्वरतां प्रव्रज्रर्भ्रातृव्यं भागिकाभिधम् । नीत्वा च गुप्तिमकरोल्लोहरे कोशदेशयोः ॥१२२८॥
वराहमूलं संप्राप्तमथायातः प्रियं सुतम् । आश्लिष्य विषयो राजा बभूवानन्दशोकयोः ॥१२२९॥
राजसूनुस्त्रिभिर्वर्षैः पत्र्यायातः स्वमण्डलम् । स पश्यन्पितरं चान्तरसुस्थितमतप्यत ॥१२३०॥ 1230
खेदनम्राननो लोष्टावशेषं सोविशन्पुरम् । अम्बुलम्बाम्बुदो दावनिर्दग्धमिव काननम् ॥१२३१॥
राज्येभ्यर्पिच्छलायाढस्यायेद्धि जनकोयं तम् । अवादीद्राज्यतन्त्रं च कृत्स्नमुक्त्वालुगद्गदः ॥१२३२॥
भ्रान्ताः पितृपितृव्यास्ते न यां वोढुमशक्नुवन् । गुरुमुद्वह तां वीर त्वयि भारोयमर्पितः ॥१२३३॥
साम्राज्यप्रक्रियामात्रपात्रं पुत्रं नृपो व्यधात् । न त्वार्पिपदधीकारं तस्मिन्देवविमोहितः ॥१२३४॥
अभिषेकविधावेव राजसूनोः शमं ययुः । पुरोपरोधावसाढ्यार्पिचैरायुपद्रवाः ॥१२३५॥ 1235
संपन्नसस्या च तया देवी संवर्धते मही । दुर्भिक्ष श्रावणं मासि यथावत्वशमं ययौ ॥१२३६॥
अत्रान्तरे सिंहदेवो रणे कुर्वन्नरिक्षयम् । कर्णेजपैर्जनपितुर्द्रोग्धायमिति सूचितः ॥१२३७॥
कोपादविमृशस्तत्त्व स बन्द्रे तं व्यसर्जयत् । क्रुध्यात्मजं राजसूनुस्तत्तु प्रागेव बुद्धवान् ॥१२३८॥
कोपस्मितेत्कटस्यापे स तस्यापतिभोभवत् । निनाय स्तम्भमात्रेण पार्थिवाज्ञामखोघनाम् ॥१२३९॥
अभुक्तवान्मनस्तापव्यत्ययोत्तप्ते पितुः । साकं तेन सुतोन्येद्युर्नन्तुं प्रावर्ततान्तिकम् ॥१२४०॥ 1240
आक्षेप्तुं शक्तितोशक्य इति मन्त्रा स मन्त्रिभिः । मार्गाऽयवर्तयत तं पिता मिथ्या प्रसादयन् ॥१२४१॥
अन्तस्तु निधिकायेति प्रविश्यानाकैतागमः । बद्धैनं स्थापयिष्यामि कारायामिति सोनिशम् ॥१२४२॥
पित्राज्यं यत्कृते पुत्राः पितरश्चेतरत्तरम् । शङ्कमाना न कुत्रापि सुखं रात्रिषु शेरते ॥१२४३॥
पुत्रपत्नीसुहृद्वर्ग्या येषां शङ्कानिकेतनम् । विस्रम्भभूमुपगतोना कस्तेषामिति वेत्ति कः ॥१२४४॥
माह्याभिधानप्रख्यातकुयामोपान्तवासिनः । खलपालस्य तनयः स्थानकाख्यस्य कस्यचित् ॥१२४५॥ 1245
शैशवे पाशुपाल्येन वर्धितो डामरोद्भवैः । गृहीतशस्त्रस्तत्रित्यं क्रमाद्दिक्कस्य लब्धवान् ॥१२४६॥
प्रथमाश्वत्वभृत्याच्चदूरो भूमर्नुरात्मताम् । प्रथयाबुन्यलो नाम वैरिविच्छेदमिच्छता ॥१२४७॥
स हि भिक्षाचरं टिक्कमथ व्यापादयेत्यमुम् । जगादाद्रीकृतैर्भयैरानष्टिक्रोपवेशने ॥१२४८॥
कृतप्रतिश्रवं तस्मिन्नर्थे तं च महर्द्धिभिः । दानैरुपाचरद्भक्त्या पतिनासाप्ययोजयत् ॥१२४९॥
भोगलोभप्रभुद्रोहचिन्तादोलायमानधीः । स कार्यं परिहार्यं वा न कृत्यं निश्चिकाय तत् ॥१२५०॥ 1250
प्रासोष्टापत्यमत्रान्तस्तद्वधूः कार्यतो नृपः । तत्तच्च प्राहिणोत्तस्यै पितेव प्रसवोचितम् ॥१२५१॥
सा तस्यास्युपचारस्य कारणं परिशङ्किता । पतिं पप्रच्छ निर्बन्धात्सोपि तस्यै व्यवर्णयत् ॥१२५२॥
न कार्यः स्वामिनो द्रोहः कृते वास्मिन्न सुस्थलः । स्वामेव शनकैर्हन्याद्रोग्धायमिति चिन्तयन् ॥१२५३॥
वरं स एव विश्वास्य व्यापाद्यस्तत्र चेद्वधः । भवेत्ते स्वामिपुत्रादिकुटुम्ब स्याद्विभूतिभाक् ॥१२५४॥

१२३८ [1]) A 'विमृष' —) Emended, A वन्धु १२४४ [1]) Thus A १२५१ [1]) Emended with C, A प्रविणो'

भार्ययेति प्रेयमाणः स निश्चयविपर्यये । टिक्कं विदितवृत्तान्तं कृत्वा बद्धोद्यमः कृतः ॥१२५५॥
गतागतानि कुर्वाणे दुधुक्षावथ पार्थिवः । स पुत्र इव विश्वासं ययौ दैवविमोहितः ॥१२५६॥
विपर्यस्ता मतिः पुत्रे विश्वासो वैरिसंश्रिते । जायते क्षीणभाग्यानां को नाम न विपर्ययः ॥१२५७॥
वैधेयैः स्वार्थलोभान्धैर्यद्वानर्थसमागमः । सरघोपद्रवः क्षौद्रलुब्धैरिव न चिन्त्यते ॥१२५८॥
त पीडितं प्रज्ञिना च राज्ञा नावनतिं ततः । उत्पलोत्कारयद्विङ्कं नीविं चादापयत्सुतम् ॥१२५९॥
राजाथ देवसरसं जित संत्यज्य कार्तिके । वाटूक्काख्यमगाद्ग्रामं खेरीविषयवर्तिनम् ॥१२६०॥
स कल्याणपुराभ्यर्णे रणैस्तैर्वैलक्षताम् । भिक्षुकांश्चभ्रमुखानपि निन्ये महाभटान् ॥१२६१॥
मध्याद्भिक्षाचरणीनां सुज्जिं काककुलोद्भवम् । जीवग्राहं महावीरं युधि जग्राह शोभकम् ॥१२६२॥
भवत्कीयस्य कृत्वादौ विजयस्य पराभवम् । भुंजता तद्वधा दग्धाः कल्याणपुरवासिनः ॥१२६३॥
दग्धे वडोसके भिक्षाचरो नष्टाश्रयो व्यधात् । त्यक्त्वा तां क्षमां शमालायां ग्रामे काकरुडे स्थितिम् ॥१२६४॥
अनुजो भवत्कीयस्य विजयस्य भयावहम् । संश्रितस्तेन तूर्णेन बद्धा कारागृहेर्पितः ॥१२६५॥
भूरिसैन्यानुग भूरपुरे विन्यस्य रिल्हणम् । आस्कन्दाशङ्किनीं राजा चक्रे राजपुरीमपि ॥१२६६॥
इत्थमुद्दण्डया वृत्त्या खण्डितोद्दण्डडामरः । स्तोकावशेषं सोपद्रयत्कर्तव्यमरिनिर्नयम् ॥१२६७॥
भिक्षाचरो लवन्याश्च शक्तिक्षयमुपागताः । विदेशगमनं भीता रिपौ बलिनि मेनिरे ॥१२६८॥
किमप्यभाग्यावतारैर्भिक्षुपक्षजुषां यतः । जीवतामप्युन्नासाच्चिर्जीवत्वमिवायया ॥१२६९॥
स सोमपालकौटिल्यं स्मरन्कुर्यां हिमाल्यये । इमशानोर्वी राजपुरीमिति ध्यायन्व्यवर्तत ॥१२७०॥
शान्तप्रायस्वदेशोर्वीविप्रवस्य महीपतेः । तस्याणैवान्तकमणपतीतेः समभाव्यत ॥१२७१॥
शतैकीयो योवशिष्टो विप्रवक्षपिते जने । वर्षे वर्षे स तद्वान्ये युगदीर्घं त्वमन्यत ॥१२७२॥
अनुखत्रासहारिद्र्यप्रियनाशादिवैशसैः । स राज्यकालः सर्वस्व परितापावहो बभूव ॥१२७३॥
नरः पौरुषनैर्घृण्यशङ्कन्येन करोति किम् । विधातृवृत्तिवैचित्र्यपराधीनासु सिद्धिषु ॥१२७४॥
पुरोभूतं कंचित्परिहरति राशिं तम इव व्यतीते कस्मिंश्चिद्धरिरिव विवृत्यास्थिते दृशम् ।
स्वमुल्लङ्घ्यासन्नं क्वचन नृपतिं दर्दुर इव क्रमेत्स्रष्टुर्दृष्टः स्फुटमिति गतीनामनियमः ॥१२७५॥
विश्वासनिहताच्चिन्दन्नुखलादीन्पुरावसत् । नित्यं विकोशशस्त्रो यः पुराविज्ञो निशम्य च ॥१२७६॥
विदूरंस्थाविवृत्तान्तं नादात्केलिक्षणे ब्रुवन् । स्त्रीषु संभुज्यमानासु विश्वासविशदां दृशम् ॥१२७७॥
स बन्धाविव निर्बन्धाद्विशश्वास यदुत्पले । तत्र संभाव्यते केन दैवादन्यो विमोहकृत् ॥१२७८॥
टिक्कादयो भूमिपतेः सुज्जेर्वान्यतरे हते । त्वां तुल्यकार्यकर्तारं विद्म इत्यूचुरुत्पलम् ॥१२७९॥
सुज्जिनं व्यश्वसीत्तस्मिन्स निधांस्तु भुंजनम् । तत्र तत्राभवत्तस्य प्रसङ्गं नासदत्पुनः ॥१२८०॥
प्रतिभुवविलम्बेन समन्योरथ भूपतेः । प्रत्ययोत्पत्तये देवसरसान्नीविमात्मजम् ॥१२८१॥

१२५८ [1]) A, gloss सरघा मधुमक्षिका (*Amara* II 5 26) १२६२. [1]) Emended, A सुज्जि १२६४ [1]) A वळोसके, perhaps read वडोसके, Cf वाडोरस VIII. 1306 —[2]) Emended with C, A स्थिन १२७१ [1]) The last two *pādas* have become in A partly illegible by an ink blot and have been repeated in the margin by the same hand which supplemented the gloss to v. 110 १२७४ [1]) Emended with C, A °वैचित्र्य° १२७७. [1]) Emended with C, A विदूरया°. —[2]) Emended, A °मानास्वविश्वास° १२७९ [1]) Emended, A °न्यतमे.

व्याघ्रप्रशस्तराजादींस्तीक्ष्णांश्चात्मसमान्परान् । आदाय कार्यमेतैर्मे सिध्येदित्युक्त्वाबृपम् ॥१२८२॥
उज्जियोज्जिय्य सेनाभ्यो गृहीतैः साहसक्षमैः । शतैः समं त्रिचतुरैः पत्तीनामेकदा ययौ ॥१२८३॥तिलकम्॥
समयान्वेषिणो हन्तुस्तस्यासन्नस्य सर्वदा । प्रियाहारादिदानेन हन्तान्तःप्रीतिकार्यभूत् ॥१२८४॥
तुरंगं मन्दुराचक्रवर्त्याख्यं नगरस्थितम् । अस्वस्थमुल्लाघयितुं तुरगध्यसनी नृपः ॥१२८५॥ 1285
स लक्ष्मकंप्रतीहारकृष्यात्मजमुखाज्जिजान् । पार्श्वाद्विसृष्टवानासीत्क्षणे तस्मिन्मितानुगः ॥१२८६॥
भृङ्गारो लक्ष्मकापत्यं निशम्यान्यैर्निवेदितम् । व्यधाच्छ्रुतिपथे राज्ञस्तदुत्पलचिकीर्षितम् ॥१२८७॥
विरुद्धे बन्धुधीर्दृष्टहिंसारम्भेपि संभवेत् । आसन्नजीवितान्तस्य जन्तोः श्वनापशोरिव ॥१२८८॥
स शापो गान्धार्यास्तदपि सरुषो भाषितमृषेस्त उत्पाताश्चक्षुः स्वमपि तदभीमं प्रकटयत् ।
कुलान्तं तल्लाणाक्षममकृत वैकुण्ठमपि तद्विदन्नप्यन्यस्वं क इव भवितव्यस्य कुरुताम् ॥१२८९॥
मिथ्यैतदित्यधिक्षिप्य क्षितिपालः प्रदर्शयन् । तमङ्गुल्योत्पलादींस्तानमस्थानेवमब्रवीत् ॥१२९०॥ 1290
द्रोग्धुः सुतोभवत्तोगादनिच्छन्स्वास्थ्यमेष मे । त्वां दुष्टमुत्पलाचष्टे स्वेनान्यैर्वार्थ चोदितः ॥१२९१॥
ते ज्ञापयन्तः स्मेरास्या धाष्टर्येन भयवैकृतम् । वक्ति देवो यदस्माभिर्वाच्यमित्येवमूचिरे ॥१२९२॥
निर्यातेष्वथ तेष्वीषत्साशङ्क इव निश्चलान् । ह्राःस्थेनाकारयद्विज्ञानन्तिके मुख्यशास्त्रिणः ॥१२९३॥
उन्मनाश्च किमप्यासीद्विनिःश्वस्य स चिन्तयन् । सासुश्च न रतिं लेभे नृत्तगीतादिदर्शने ॥१२९४॥
मेने वैद्येशिकप्रायानाप्तानपि धृतभ्रमः । पुण्यक्षये पिपतिषुर्वैमानिक इवाम्बरात् ॥१२९५॥ 1295
राजान्तरङ्गाः साशङ्काः प्रभौ शाउचेन मोहिते । पूत्कारमैच्छन्दातारमन्यं केचिदचेतनाः ॥१२९६॥
अयमेव स कालस्य बलात्कवलनग्रहः । खिदन्तोपि यदायान्ति जन्तवः कृत्यमूढताम् ॥१२९७॥
सर्वान्तरक्षणेष्वस्तनक्षुषो द्विषदश्यम् । उत्पलाद्याश्च साशङ्काः कथमप्यत्यवाहयन् ॥१२९८॥
रहः क्षणप्रार्थितसंस्तुतीयेद्यश्वरवीच्चृपः । ज्ञात्वा प्रत्यूषे तशुयं भोक्तुं यात मुहुर्गृहम् ॥१२९९॥
देवतार्चनपर्यन्तमवसाय्याह्निकं विधिम् । आजुहावोत्पलं दूतैर्मध्याह्नेथ रहःस्थितः ॥१३००॥ 1300
कार्यसिद्धि श्रयानो वैजन्याद्राजसद्मनः । राज्ञोभ्यर्ण स साशङ्कं ह्राःस्थरुद्धानुगोविशत् ॥१३०१॥
प्रावेशयद्वारि रुद्धं व्याघ्रं तदनुजं नृपः । शेषाणामपि भृत्यानामादिदेश बहिःस्थितिम् ॥१३०२॥
विलम्बमानेष्वाम्रेषु केषुचित्सरुषो वचः । सत्यं तस्योथयावास्तां सोत्र द्रोग्धा य इत्यपि ॥१३०३॥
ताम्बूलदायकः प्रौढवयास्तेनावशेषितः । सांधिविग्रहिको विद्वान्नाद्विलश्चान्तिके परम् ॥१३०४॥
दूतौ टिक्कस्यार्यदेवतिष्यवैद्यभिधावुभौ । तत्र प्रसङ्गादासातामज्ञातोत्पलसंविदौ ॥१३०५॥ 1305
वाडौत्सः सुखराजाख्यो डामरो भिक्षुसंमतः । प्रयास्यति प्रभोर्दृष्ट्वा पादौ तत्कार्यसिद्धये ॥१३०६॥
इत्युक्तवांस्तेष्वहःसु तं नृपं नातिदूरगम् । ससैन्यं डामरं चक्रे स्वस्य त्राणार्थमुत्पलः ॥१३०७॥
तथा चैनं तस्थिवांसं कृत्यमस्थमुनेति च । उक्त्वा प्रशस्तराजं तं पार्श्व प्रावेशयद्द्रुतम् ॥१३०८॥
प्रविष्टो निर्जनं बाह्यमाकलय्य स मण्डपम् । अलक्ष्यमाणव्यापारो द्वारमर्गलितं व्यधात् ॥१३०९॥

१२८२. [1]) Emended, A °त्समसरान्परान् १२८३. [1]) A_1 writes here ३ instead of तिलकम् १२८६ [1]) Thus A; A_2 पक्ष्मक °– [2]) त्त supplied by A_2 in space left by A_1. १२८९. [1]) Emended; A प्रकटयन १३०१. [1]) Emended A ह्रास्थ १३०५ [1]) Emended; A °स्यापदेवतिष्यवैद्य°; Cf. VIII 1543. १३०६. [1]) A वाळौरस perhaps read वाडोस्स Cf. वडोंसके VIII 1264.—[2]) A सु×ख्°. १३०७. [1]) A डमरं

स्नानार्द्रकेशं शीतालुतया प्रावारवेष्टितम् । कृत्वा कृत्स्नं वपुः कृष्णशस्त्रीकं विष्टरोपरि ॥१३१०॥
आसीनं वीक्ष्य नृपति प्रसङ्गो नेदृशो भवेत् । विज्ञप्तिं कुरु भूमर्तुरित्युचे व्याघ्र उत्पलम् ॥१३११॥
स तया संज्ञया व्यसः पादप्रणतिकैतवात् । राज्ञोपमेत्य तच्छस्त्रीं विष्टरस्थामपाहरत् ॥१३१२॥
विकोशां चाकरोत्पश्यंस्तां तथोद्भ्रान्तलोचनः । प्राह स्म हा धिक्किं द्रोह इति यावद्वचो नृपः ॥१३१३॥
प्राहरत्पथमं तावत्सख्ये पार्श्वे तयैव सः । तस्य प्रहीस्तराजेन मूर्धनि प्रहृतं ततः ॥१३१४॥ युग्मम् ॥
व्याघ्रेणाथ क्षतं वक्षस्ताभ्यामेवासकृत्तदा । प्रहृतं तत्र स पुनः प्राहरच्च द्विरुत्पलः ॥१३१५॥
पूर्वयैव प्रहृत्या हि छिन्नपार्श्वास्थिमालया । मेने कृष्णान्तकतन्त्रीकं स तं प्रोषितजीवितम् ॥१३१६॥
गत्वा तमोरिं पुरस्कर्तुमिच्छन्व्याघ्रेण राहिलः । पृष्ठे कृताहतिर्द्वित्रा नालिका नोज्झितोत्तुभिः ॥१३१७॥
ताम्बूलदायकस्यक्त्वा कङ्कोलाद्यज्जको व्रजन् । दीनो निजेभ्यः कारुण्यादुत्पलेनैव रक्षितः ॥१३१८॥
अन्तः समुत्थिते क्षोभे बाह्यमण्डपवर्तिभिः । टिक्ककाद्यैः कृता लुण्ठद्रोहगृध्नैरुदायुधैः ॥१३१९॥
उत्पलो निहतो राज्ञेत्यवेत्य कटकस्थितैः । बहिःस्थान्हन्यमानान्स्वान्समाश्वासयितुं ततः ॥१३२०॥
रक्तार्द्रशस्त्रं मदहर्यं तमेरेर्वपुरुत्पलः । ऊचे मया हतो राजा न त्याज्या तच्चमूरिति ॥१३२१॥
तच्छ्रुत्वा दुःश्रवं राजभृत्याः क्वापि भयाद्ययुः । द्रोहानुगास्त्वङ्गनान्तर्लब्धोल्लासा व्यधुः स्थितिम् ॥१३२२॥
निर्यान्तो मण्डपात्तीक्ष्णा निजघ्नुर्नागकाभिधम् । द्वारात्यविष्टं निष्कृष्टकृपाणीकं नृपानुगम् ॥१३२३॥
भूपालशय्यापालस्य त्रैलोक्याख्यस्य सेवकः । निन्दन्द्रोहं टिक्ककाद्यैर्द्वीःस्थश्चैको विपोदितः ॥१३२४॥
उत्कृष्टं नष्टमत्त्वानां मध्ये राजानुजीविनाम् । सम्वेटकासिं धावन्तं भावुकान्वयभूषणम् ॥१३२५॥
दृष्ट्वा सहजपालाख्यं पार्श्वद्वारेण निर्ययुः । तीक्ष्णाः स त्वपतद्भूमौ तद्दृत्यप्रहृतिक्षतः ॥१३२६॥
जाते कुकीर्तिकालुष्यपात्रे राजात्मजन्मजे । वैलक्ष्यक्षालनं सिद्धं तस्य स्वक्षतजैः परम् ॥१३२७॥
हतो दौश्चिकसंवादिदेहो राजात्मभ्रजमान् । विद्वान्द्विजन्मा नानाख्यस्तीक्ष्णपक्षैः पुरो गतः ॥१३२८॥
अक्षतान्भ्रजनो वीक्ष्य तीक्ष्णान्मामान्तरोन्मुखान् । चित्रार्पिता इव क्रोधाज्ञाधावनेकपि शश्वित्रणः ॥१३२९॥
राजवंद्या महीपालप्रीतिपात्रमथाययुः । स्थगयन्तोद्भटं स्थूलकाया जनविवर्जितम् ॥१३३०॥
तांस्तान्कापुरुषान्हर्षदैवोदन्तात्यभृत्यलम् । स्मृत्वा च कीर्तयित्वा च कृतभारमहा इव ॥१३३१॥
जाता दुष्कृतभारपर्शास्वेदात्कर्तुं न शक्नुमः । पापात्पापीयसां येषां नामग्रहणसाहसम् ॥१३३२॥
भद्रनान्मण्डपारूढिं मन्वानाः पौरुषं महत् । पापिनः केपि तन्मुख्या ददृशुः स्वामिन हतम् ॥१३३३॥
अपरेणाश्रसंस्कारलेशावेशप्रकल्पिना । यदन्तं दन्तदष्टेन स्वान्तस्यान्तेनुतप्रताम् ॥१३३४॥
वञ्चितः कथमेषोहमिति नामेति चिन्तया । निस्पन्दे जीवितान्तेपि तयैव दधतं दृशौ ॥१३३५॥
श्यामायमानं बाष्पेण व्रणवक्त्रैरुदञ्चता । अन्तःप्रशान्तामर्षाग्निशेषधूमलतात्विषा ॥१३३६॥
आननस्यास्फुटीभूतचन्दनोल्लेखकुङ्कुमम् । सक्तया लिखितमेयेव घनक्षतजलाक्षया ॥१३३७॥
आद्यानाश्रजटीभूतकेशं नग्नं भुवि च्युतम् । पर्यस्तपाणिचरणं स्कन्धावालम्बिकन्धरम् ॥१३३८॥

१३१३. [1]) Emended with C, A विकोश १३१४ [1])A, writes here 2 instead of युग्मम. १३१८ [1]) Emended, A कङ्कोला°. १३२१ [1]) Conjectural reading, A °शस्त्रयालस्य —[2]) Emended, A °ङ्गिन्यश्चैको. —[3]) Emended; A व्यपादित. १३२८ [1]) Emended, A हतवैदि°. १३३६ [1]) The first *pâda* of this verse has been first omitted and subsequently supplied by A_1 in margin. १३३८ [1]) A कन्धरम्.

नं वीक्ष्य नोचितं किंचिदनिरुद्धे नराधमाः । वैजन्यस्य फलं भुङ्क्ष्वेत्यावेगादधिचिक्षिपुः ॥१३३९॥
बद्ध्वा तुरंगे युग्ये वा न नैर्ऋतश्चिताग्निसात् । कर्तुं न वा पारितः स प्राणत्राणाय धाविभिः ॥१३४०॥ 1340
आस्तां विलम्बसाध्यं वा कर्मैतद्भाटुदारुसात् । सज्जामि चाग्निसाद्देहमपि कश्चिन्न नाकरोत् ॥१३४१॥
राजवाजिनमेकैकं नेध्यारुह्य पलायिताः । निर्लुण्ठितस्तु कटको व्रजन्मामेषु डामरैः ॥१३४२॥
न पुत्रः पितरं पुत्रं पिता वा प्रत्यपालयत् । मृतं हतं लुण्ठितं वा प्रवलन्सहिमेध्वनि ॥१३४३॥
न कोपि शस्त्रभृत्सोभूत्स्मृत्वा मानोन्नतिं पथि । परैराक्षिप्यमाणो यः शस्त्रं वस्त्रं च नात्यजत् ॥१३४४॥
लवराजयशोराजद्विनौ व्यायामवेदिनौ । कान्दश्च राजा निहता वीरवृत्त्या त्रयः परम् ॥१३४५॥ 1345
अदूरादुत्पलाद्यास्तु कटकं वीक्ष्य विद्रुतम् । प्रविष्टा वाष्टुवं छित्त्वा शिरो निर्युर्महीपतेः ॥१३४६॥
गतेषु देवसरसं तेषु छिन्नशिरा नृपः । हतशौर इव प्राप ग्राम्याणां प्रेक्षणीयताम् ॥१३४७॥
एवं द्वेहैस्तृतीयाब्दमावास्यायां स फाल्गुने । पञ्चपञ्चाशतं वर्षानायुषेनीतवान्हतः ॥१३४८॥
विलासशयनस्थस्य सिंहदेवस्य सा श्रुतौ । प्रेमाख्येनैत्य दुर्वार्ता धात्रेयेण व्यधीयत ॥१३४९॥
सभाव्यते योनुभावः सशस्त्रस्यामियश्रुतौ । हतशस्त्रेपि तं प्राप स तदा पितृवत्सलः ॥१३५०॥ 1350
मोहलुप्तस्मृतिः स्मृत्वा चिरादुद्गतचेतनः । तत्तद्दुःखाहतधृतिर्विललाप स्फुटास्फुटम् ॥१३५१॥
मदर्थं कुर्वता राज्यं प्रयत्नादपकण्टकम् । अधर्मे किं महाराज स्वयात्मा परिभाविनः ॥१३५२॥
अहेतोः पश्यतः शत्रूनन्ते वैरविशुद्धये । अपि ते मानिनोगच्छंस्तात संभावनाभुवम् ॥१३५३॥
त्वया निषेधिते वैरे पिता भ्राता च ते दिवि । निर्मन्युः संप्रति त्वं नु वर्तसे मन्युदुःस्थितः ॥१३५४॥
अनरण्यरुपर्वाणजामदग्न्यादिषु स्पृहाम् । कुल्यक्षालितवैरेषु मा कार्षीः कांचन क्षणम् ॥१३५५॥ 1355
शोच्यस्त्वदाभयो मन्युरहं शोधयिता नृप । द्वये न तत्र यातं यच्चैलोक्यमभियोज्यताम् ॥१३५६॥
वात्सल्योत्पुलकस्मेरं स्निग्धोक्तिमधुरं मुखम् । मद्दर्शने यदासीत्ते तन्मे पुर इवाधुना ॥१३५७॥
इति चान्यच्च विलपन्नाम्मीर्यालक्ष्यवैकृतः । ह्रीशोकभयमुत्क्रान्त ददर्शाग्निपुतः पुरः ॥१३५८॥
अशिक्षयत यन्मन्युर्दीक्षितं निरुरोध तत् । तथाप्येवं स तानूचे किंचिदाक्षेपकैर्कशम् ॥१३५९॥
कोटीः सङ्गशतां वीक्ष्य कुर्वतः सत्क्रियां गताः । धिग्भवन्तश्च शस्त्रं च तातस्यान्ते विपर्ययम् ॥१३६०॥ 1360
यन्मत्पितृव्ये निहते कूतमुच्छिष्टजीविभिः । मान्यानां भवतां सिद्धं हा धिक्तदपि नाधुना ॥१३६१॥
इत्युपालभ्यमानस्तान्हिंस्रैरन्तिकमागतैः । द्विजैरमात्यैः कर्तव्यमुपदेशहितः कृतः ॥१३६२॥
प्रस्थानं लोहरे केचिदूचुः संत्यज्य मण्डलम् । त्वरां च तत्र राज्यन्ते वदन्तो भैक्षवं भयम् ॥१३६३॥
गर्भात्मजं पञ्चचन्द्रमालक्ष्यं लहरस्थितम् । द्वैराज्याचरणायान्ये धीरमाया बभाषिरे ॥१३६४॥
न हि स्वगृहवद्विक्षोर्भविक्षोर्नगरान्तरम् । अज्ञायि प्रत्यवस्थानं केनाप्यसति सुस्थले ॥१३६५॥ 1365
आत्मन्यसंभावनया तादृशां मन्त्रिणां नृपः । सान्तःखेदं श्रो विधेयं ब्रह्मण्येत्यब्रवीद्वचः ॥१३६६॥
कालापेक्षापरिव्यक्तपितृव्यापत्तिदुःस्थितः । स कोशादित्यथादिक्षद्रक्षिणस्त्राणदीक्षितान् ॥१३६७॥

१३४६ 1) Thus A; cf वाष्टुकं vm. 1459 १३४९. 2) Emended, A पार्थीयन १३५० 1) नुभाव supplied by A, in space left by A, १३५५ 1) Thus A. १३६० 1) Emended, A कुरुत १३६१ 1) Emended with C A न हते. १३६४. 1) Emended, A °लम्ब्य १३६६ 1) तादृशां supplied by A, in space left by A,.

इतश्चेतश्च बभ्रम्यमाणैः प्रोद्यद्भुतस्वरम् । अन्योन्याख्यायिभिर्लोकैः पुरं मुखरतामगात् ॥१३६८॥
पक्षवेतालमालेव कालराज्याकुलेव च । बभूव सा यामवती सर्वभूतभयावहा ॥१३६९॥
दीपैर्नैर्वातनिष्कम्पैश्चिन्तास्पन्दैश्च मन्त्रिभिः । निष्ठन्परिवृतो राजा स्वन्तरेवमचिन्तयत् ॥१३७०॥
निर्हारे सतमस्युग्रमारुते शून्यवेश्मनि । तातोपि निहतः शून्ये मयि जीवत्यनाथवत् ॥१३७१॥
कष्टमेतादृशासद्यवैशसक्षालनावधि । कथं गोष्ठीषु शक्ष्यामि द्रष्टुं मानवतां मुखम् ॥१३७२॥
विरोधिवशवर्तिभ्यो देशेभ्यः सैन्यनायकाः । सहिमैरेव दुर्लङ्घ्यैः कथमेष्यन्ति वर्त्मभिः ॥१३७३॥
इत्थं विमृशतस्तस्य तत्तत्तीव्राभिघद्विनः । ययौ भीतिमनो भीमा कथंचित्सा निशीथिनी ॥१३७४॥
प्रातश्चतुष्किकां पौरसमाश्वासाय निर्गतः । नष्टं कटकमन्वेष्टुं सोभ्यारूढान्व्यसर्जयत् ॥१३७५॥
मार्गानसूचीमत्तारैस्तुषारैर्विवरो ध्वितान् । आश्लिष्टवसुधा मेघाः कर्तुं प्रारेभिरे ततः ॥१३७६॥
नाप्यलब्ध्वा सैन्यस्य मोघसैन्येषु दूरतः । निवृत्तेषु नियुक्तेषु विमृश्यं नृपतिः क्षणम् ॥१३७७॥
यद्यद्येनाहृतं तत्तत्परित्यक्तं मयाधुना । दत्तं चारीञ्छ्रितवतामभयं सागसामपि ॥१३७८॥
इत्याज्ञां भ्रमयामास पटहोद्घोषणैः पुरे । साशीर्घोषास्ततः पौरास्तत्रारज्यन्त सर्वतः ॥१३७९॥तिलकम्॥
अनन्तरनृपाचारवैधर्म्योत्कारकलया । तया सोनघया वृत्त्या फलं सद्योनुभावितः ॥१३८०॥
शनादप्युनसंख्यैर्यैः स्थितवाननुगैः समम् । अनुरागहृतैर्लोकैस्तत्कालं पर्यवार्यत ॥१३८१॥
प्रियोक्त्यावेदनं प्रीतिदायोपायः प्रभोः पुरः । भजंल्लोकस्याभ्यमन्त्रिपदवीं लक्ष्मकोपहीत् ॥१३८२॥
राज्यं राज्यां नयत्येवं प्राज्ञे राजि नयक्रमैः । याति मध्यं दिने भिक्षुर्वैविक्षुः पुरमाययौ ॥१३८३॥
तस्य डामरपौराश्ववारलुण्ठाकसंकुलः । अष्टपूर्वो ददृशे सैन्यव्यतिकरस्तदा ॥१३८४॥
हतं श्रुत्वा रिपुं राज्योत्सुकः स नगरं व्रजन् । राजा काकात्मजेनेति तिलकेनाभ्यधीयत ॥१३८५॥
हतः समस्तविद्वेष्यः स दैवाद्यदि सुस्मलः । कथं प्रकृतयो जघ्नुर्गुणवन्तं तदात्मजम् ॥१३८६॥
पुरप्रवेशे का राज्ञस्तस्मादेकमहस्त्वरा । एहि पद्मपुरं यामो मार्गं रोद्धुं विरोधिनाम् ॥१३८७॥
आगच्छन्तो नष्टसैन्याः सुज्ञिमुख्या महाभटाः । निहता यदि वा रुद्धास्तत्र सायुधवाहनाः ॥१३८८॥
प्रविष्टोसि ततो न्यस्तशस्त्रो द्विर्वैर्दैनैर्धुवम् । नगरं नगरौकोभिः स्वयमभ्यर्थितागमः ॥१३८९॥
अलमेतैर्जरन्मन्त्रैर्वदन्त इति चक्रिरे । स च कौष्ठेश्वराद्याश्च स्मेरास्तस्याधीरणाम् ॥१३९०॥
राज्यं विदद्भिः संप्राप्तं तांस्ताञ्शासनपट्टकान् । द्रुतमर्घयमानैश्च विलम्बं कारितो निजैः ॥१३९१॥
अतो बहुहिमापातविवशाशेषसैनिकः । आसदन्नगरोपान्तं समयेन स तावता ॥१३९२॥
एतस्मिन्नन्तरे लब्धे निःसैन्यस्य ससैनिकः । गर्गात्मजः पञ्चचन्द्रो नृपतेः पार्श्वमाययौ ॥१३९३॥
हतस्वामिपरित्यागमन्युक्षालनकाङ्क्षिभिः । राजपुत्रैः समं सोथ वीरो योद्धुं विनिर्ययौ ॥१३९४॥
असंभावनसंग्रामान्वीक्ष्य तान्भिक्षुसैनिकाः । यावत्प्रारेभिरे योद्धुं तावत्किमपि सर्वतः ॥१३९५॥
क्षणेनैव ययुर्भङ्गं तांस्तान्वीक्ष्य हतद्विजान् । न संस्तम्भयितुं शेकुः स्वचमूश्च पलायिनीः ॥१३९६॥

१३७३ [1]) Emended, A °नायक. १३७४. [1]) A विसृपत.—[2]) A निर्याथिनी. १३७७ [1]) Thus A, perhaps read मार्गेष्वेषु.—[2]) A विसृष्य १३७९ [1]) A, writes here ३ instead of तिलकम्. १३९१ [1]) Emended, A संग्रामांस्तांस्ता°.

सेनानाथाश्च ये मुख्या भिक्षुपृथ्वीहरादयः । अदृष्टपूर्वं संत्रासं तेऽप्यशस्त्रिवदाययुः ॥१३९७॥
विद्रवन्तोनुयाताः स्युस्ते चेद्दूरं नृपानुगैः । तच्चूनमवशिष्येत क्षणादेव न किंचन ॥१३९८॥
वैमुख्यं तेषु यातेषु चिरात्सांमुख्यमाययौ । नवभृत्यभावेन नगरं विभुरे विधिः ॥१३९९॥
अन्यथा कलिनो लोकैरन्यथा दैवयोगतः । इत्थं राज्ञोर्द्वयोरासीद्विजयावजयक्रमः ॥१४००॥ 1400
कंचिन्निपातयति बद्धपदं क्षणेन कंचित्परं पिपतिषुं नयति प्ररूढिम् ।
संकल्पनिर्विषयचित्रतरानुभाव ओघोम्भसामिव तटं पुरुषं विधाता ॥१४०१॥
अथ तत्तद्वयस्थानशान्तः सुज्ञिर्नान्यये । वावड्याप्राद्विनिष्क्रान्तो निःसहोहिरिवाययौ ॥१४०२॥
मेधाचक्रपुरग्रामस्थितः श्रुत्वा हतं नृपम् । स हि संमन्त्र्य राज्यन्तर्नोत्तस्थावबलत्परम् ॥१४०३॥
रिल्हणादीन्स्थिताञ्शूरपुरादौ सैन्यनायकान् । प्रतीक्षमाणस्तैः सार्कं निर्बाधं नगरेविशत् ॥१४०४॥
तमिलाबां प्रत्यभिज्ञाकृते तेषामनश्वरान् । स्वावासपृष्ठे ज्वलतो दीपानस्थापयत्ततः ॥१४०५॥ 1405
वैमत्यात्ते तु पत्तीनां विद्रुतानां पृथक्पृथक् । निशि क्षापि परिभ्रष्टा न तत्कटकमाययुः ॥१४०६॥
प्रत्यूषे प्रचलत्सैन्यैः पृष्ठलग्नैः स डामरैः । न मुहूर्तमपि त्यक्तः प्रहरद्भिरितस्ततः ॥१४०७॥
वृद्धस्त्रीबालभूयिष्ठान्सहप्रस्थायिनो जनान् । ययौ रक्षन्पुरः कृत्वा पशुपालः पशूनिव ॥१४०८॥
पञ्चाशत्या हयानेकैः सह व्यावृत्य निष्ठता । कंचित्क्षणं तेन रक्षा तेषां कर्तुमशक्यत ॥१४०९॥
द्राक्षाषण्डदुमव्यूहसबाधेष्वन्यमार्गयैः । बाध्यमानेरिभिर्लोकं सोत्याक्षीत्पदे पदे ॥१४१०॥ 1410
हतस्य स्वामिनः स्वामिसूनोश्च व्यसनस्थितेः । आनृण्याकाङ्क्षिणा तेन तत्र त्यान्मैव रक्षितः ॥१४११॥
येषां प्राणपरित्यागे निश्चयं बध्रतामपि । न योग्यकालापेक्षास्ति किं तैर्हिंस्रपशुपमैः ॥१४१२॥
हन्तुं तं नष्टमायान्तं रुद्धा पद्मपुरान्तिकम् । अवसण्डामराः क्रूराः स्वदुर्वीविषयौकसः ॥१४१३॥
खंखीतलालशायामादुत्थाय पृथुसैनिकः । व्रजस्तेनाययौ तत्र प्रसङ्गे श्रीवकः पथा ॥१४१४॥
तमनष्टानुगं सुज्ञिरसाविति विशङ्किताः । निपत्य ते विदधिरे हतलुण्ठितसैनिकम ॥१४१५॥ 1415
मेरुश्च सज्जनश्चाभवारौ तत्राहवे हतौ । क्षतो वट्टान्मजो मल्हो दिवसैर्यो व्यपद्यत ॥१४१६॥
उदीर्णविहितभ्रभ्रवहत्सलिलसंकटम् । उदीपपूरवालाख्यं स्थानं तत्र क्षणेभवत् ॥१४१७॥
युद्ध्वा युद्ध्वा प्रचलतस्तत्र पद्मपुराद्गृहिः । रुद्धसैन्यस्य विशिखैः श्रीवकस्याविशद्बलम् ॥१४१८॥
प्रहारविवशो नासौ सुज्ञिरज्ञात्वेति डामरैः । स निर्लुण्ठ्य परित्यक्तः पूर्वमैक्यनुरोधतः ॥१४१९॥
लुण्ठितश्रीवकानीककोशभारप्रहानतैः । तैः कैश्चिच्चलितैरासीत्सुज्ञेर्मार्गोनुपद्रवः ॥१४२०॥ 1420
प्रस्थिते पथिकेकस्मात्यन्त्रेपुरसादयन्वने । आयुःशेषो मृगेन्द्राय विदध्यादध्वशोधनम् ॥१४२१॥
निःशब्दसैन्यो निर्यातः सुज्ञिः पद्मपुरान्तरे । उदीपभ्रभ्रसविधं संप्राप्तोज्ञायि डामरैः ॥१४२२॥
पदातिकोशशस्त्रादि मुष्णतः सोनवेक्ष्य तान् । तीर्त्वा भ्रभ्रं वाजिगम्यां साश्वचारो भुवं ययौ ॥१४२३॥
ततः परं प्रशान्तारिभयं दूराद्विरोधिनः । भूभद्रतनजेनीकस्परूक्षालपैरतर्जयत् ॥१४२४॥

१३९८. [1]) Emended with C, A ताब्रुन°. १४०३ [1]) Emended, A मेधाचक्र पुर° १४१९ [1]) A, had written in margin a gloss of which only इति भाषया is now legible १४२०. [1]) Emended, A लुण्ठित श्री°. १४२३. [1]) A °कोष° — [2]) Emended with C, A सोनवीक्ष्य.

संत्रस्तैरुज्झितात्रं तैस्त्यक्तमादाय च द्रुतम् । प्रविश्य नगरं साम्बुनृपतेः पार्श्वमाययौ ॥१४२५॥
ज्यायसि भ्रातरीवामं तस्मिन्प्राप्ते जहौ नृपः । दुःखोष्णैरस्रुभिः सार्धं वैरिव्यापातसाध्वसम् ॥१४२६॥
महत्तमोनन्तसूनुरानन्दस्तत्र वासरे । लोचनोद्धारकर्मामैः डामरैः प्रचलन्हतः ॥१४२७॥
तत्तन्मङ्गल्यदण्डादिदुःसहायासकारणात् । स विपत्पतितो नाभूत्कस्यापि करुणावहः ॥१४२८॥
भासाभिधः सुज्जिभृत्यो लोकपुण्यात्पलायितः । भ्रान्तोर्वान्तिपुरेविक्षदवन्तिस्वामिनोऽङ्गनम् ॥१४२९॥
कम्पनोद्धारकः क्षेमानन्दः स च तदन्तरे । अमर्षणैरवेष्टचेता डामरैर्हौलडोद्भवैः ॥१४३०॥
इन्दुराजोपि सेनानीः कुलराजकुलोद्भवः । टिक्कं तद्वेष्टितो ध्यानोद्धारं[1] व्याजादशिश्रियत् ॥१४३१॥
पिच्छदेवादयोन्येपि बहवः सैन्यनायकाः । अतिष्ठन्क्रमराज्यान्तर्डामरैः कृतवेष्टनाः ॥१४३२॥
पाते वनस्पतेः शाखा इव तन्नीडविच्युताः । इत्थं हताः क्षताश्वांसस्तत्र तत्र नृपानुगाः ॥१४३३॥
निष्पादत्रा हिमप्रुष्टचरणा नग्नविग्रहाः । क्षुत्क्षामा बहवोभूवन्मार्गेषु गलितासवः ॥१४३४॥
न व्यलोक्यत मार्गेषु तदा नगरगामिषु । पलालच्छन्नदेहेभ्यो मानुषेभ्यः परः क्वचित् ॥१४३५॥
घासं विलासत्रासस्त्वं तेपि चित्ररथादयः । निन्युर्यैरचिरेणैव महामात्यैर्भविष्यते ॥१४३६॥
द्वितीयेपि दिने रुद्धसंचाराः पक्षिणामपि । तुषारवर्षिणो मेघा न मुहूर्तं व्यरंसिषुः ॥१४३७॥
वनपूर्वाभिधग्रामस्थितस्य कटकाङ्कटान् । भिक्षोर्नीक्षिप्य धन्योथ सिंहदेवमशिश्रियत्[1] ॥१४३८॥
निशम्य कृतसत्कारं नृपं तदनुयायिनाम् । सर्वेपि भैक्षवास्तस्थुः सैनिका नगरोन्मुखाः ॥१४३९॥
मन्दप्रतापे दायादे संप्राप्तावसरास्ततः । राज्यश्चतस्रो राजानमनुमर्तुं विनिर्ययुः ॥१४४०॥
परापातभयाच्छीतापाताच्च विषदैर्जनैः । न ता नेनुमशक्यन्त दूरस्थं पितृकाननम् ॥१४४१॥
चक्रिरे स्कन्दभवनोपान्ते देहांश्चितामिसात् । ते सत्वरं ततस्तासामदूरे राजसद्मनः ॥१४४२॥
राज्ञी चम्पोद्भवा देवलेखा तरललेखया । स्वस्रा सहाविशद्वह्निं रूपोल्लेखाविधिर्विधेः ॥१४४३॥
गुणोज्ज्वला जज्वला[1] मृता वल्लापुरोद्भवा । गग्गात्मजा राजलक्ष्मीरपि वह्नौ व्यलीयत ॥१४४४॥
मत्वा हिमव्यपायान्तं राज्यरोधं निजप्रभोः । डामरा नवभूभर्तुर्हिमराजाभिधां व्यधुः ॥१४४५॥
ददर्श सौस्मलं मुण्डमथ भिक्षुरुपागतम् । गाढामर्षाग्निसंदीप्तैर्वक्त्रापातैर्निर्दहन्निव ॥१४४६॥
कौष्टेश्वरज्येष्ठपालादयस्तत्सत्क्रियोद्यताः । असहासन्नतां वैराद्गजता तेन वारिताः ॥१४४७॥
नगरं हिमवृष्टघ्ने स वियात्युत्सया । ताटस्थ्येनाहिताक्षुद्रान्भृत्यान्उज्ञात्वाब्रवीद्वचः ॥१४४८॥
प्रसह्य प्राप्तुयां राज्यमिति पृथ्वीद्वरे सति । हते तु तस्मिन्दायादेविपक्षः स्यां पतिर्भुवः ॥१४४९॥
इत्यचिन्तयमेतत्तु दैवात्संजातमन्यथा । राज्यस्याशापि विरता हते प्रत्युत यद्रिपौ ॥१४५०॥
किं राज्येनाथ वा कृत्यं भोगमात्रोपयोगिना । जिगीषोरुचितं कस्य ममेत्यन्यस्य सेत्स्यति ॥१४५१॥
मुण्डं न्यपातयद्भूमौ यः पूर्वेषां पुरा मम । सिंहद्वारे मदीयेय तन्मुण्डं वर्तते लुठत् ॥१४५२॥
दश मासान्मदाद्यानां सुखच्छेदं व्यधत्त यः । तत्तद्दुःखं स तु मया दशाब्दाननुभावितः ॥१४५३॥

१४३० [1]) Doubtful emendation ; A नोद्धारक .—[2]) Emended with C ; A °वेष्टश्चेत. १४३१ [1]) Emended, A °द्धार. १४३३ [1]) A श्रताश्वाश्वासस्तत्र with diplography. १४३८ [1]) Emended, A °शिश्रयत १४४१ [1]) Thus A_1, corr. by later hand into साम्नेमु° १४४४ [1]) One *akshara* wanting, the *lacuna* not indicated in A ; C supplements सा. १४४९ [1]) Emended, A विपन्नां, C °दायादे विपन्न

एवं निर्ऋद्धिकर्तव्यतया नेष्याम्यवन्ध्यनाम् । उपशान्तमनस्तापः सुस्थित्या शेषमायुषः ॥१४५४॥
इत्थायुक्ता गतष्टिक्काभ्यर्णं तं प्रणतं व्यधात् । प्रीत्या स हेमघटिकश्चेतच्छत्रादिभाजनम् ॥१४५५॥ 1455
तद्विलम्बेन राज्याशापिशाच्योदितया पुनः । गृहीतोभ्येत्य शीतांतस्तस्थावन्तर्विचिन्तयन् ॥१४५६॥
अत्यन्तानुचितं चान्यद्भवन्यैः सविधिस्थितैः । रक्षितं रक्षिणो न्यस्य हतरक्षमाभृत्कलेवरम् ॥१४५७॥
विपक्षाभ्रयणेप्यस्मिन्स्वामिनोन्ते किमीदृशी । दशा शरीरस्येत्यन्तः कृतज्ञत्वेन चिन्तयन् ॥१४५८॥
दिदृक्षाख्यातनः सज्जकाख्यो नगरशस्त्रभृत् । आयातो वाटुकं गोघ्नृन्युद्धैर्जित्वाभिसाध्यधात् ॥१४५९॥तिलकम्॥
स चतुर्नवतावर्षादारभ्यासादितच्छलैः । भूतैरधिष्ठितस्तिष्ठन्प्रजासंहारकार्यभूत् ॥१४६०॥ 1460
देवताधिष्ठिताविष्टदेहिवाक्यादिति श्रुतिः । भावितद्वधसंवादजनितप्रत्ययोथयौ ॥१४६१॥
तदीयानन्यथास्त्वेन छेत्ता भ्रमयिता च यः । तन्मुण्डस्यास्य स पुमांल्लब्धः स्रग्वी मृतस्तथा ॥१४६२॥तिलकम्॥
भिक्षुः कापुरुषाचारहतौचित्यो व्यसर्जयत् । प्राच्यद्वारुद्यानतये मुण्डमथ राजपुरीं रिपोः ॥१४६३॥
उच्चलात्मजया तत्र देव्या सौभाग्यलेखया । नेतृन्पितृव्यमुण्डस्य जिघांसन्त्या निजानुगैः ॥१४६४॥
राजपुर्यामाकुलत्वं नीतायामाससाद तत् । तद्भर्तुः सोमपालस्य दूरस्थस्यान्तिकं चिरात् ॥१४६५॥युग्मम्॥ 1465
आदीनस्यं मधुक्षैव्यमाम्यधर्मादिकर्मसु । तिरश्च इव शोच्यस्य नेयबुद्धेः खशप्रभोः ॥१४६६॥
सभ्यैरुद्भावनं तत्र कर्तव्यं परिचिन्तितम् । स्वोचितं व्यञ्जितौचित्यानौचित्यं निरवद्यदैः ॥१४६७॥
नागपालस्तु सौभ्रात्रं लब्ध्वा भ्रातुः स्थितोन्तिके । सेहे मुण्डावशेषस्य नोपकर्तुंर्विमाननाम् ॥१४६८॥
सुदीर्घदर्शिनोप्यन्ते कश्मीरेभ्यः पराभवम् । विशङ्कचोचुः सर्वथेदं सत्कार्यं वः शिरः प्रभोः ॥१४६९॥
क्रियते येन नियतेरन्यथात्वं सनाथनाम् । विनिहत्य हरेर्दृष्टाः कुर्वन्तो यत्र जम्बुकाः ॥१४७०॥ 1470
तट्टोपालपुरे कालागुरुचन्दनदारुभिः । काष्ठैर्नष्टां शिरो निन्ये वीतिहोत्रेव शत्रुभिः ॥१४७१॥
यथा प्राग्निश्चया धरणिपतिभावस्य त्रिविधा यथा हासोल्लासा अपि समरसीमासु बहुशः ।
यथा तच्छीर्षव्यसनविनिपातानुभवनं तथा दृढस्तस्य प्रमथसमयेप्यद्भुततरः ॥१४७२॥
कस्यापरस्य तस्येव लेभिरे वह्निसत्क्रियाम् । एकत्रेतरगात्राणि मुण्डमन्यत्र मण्डले ॥१४७३॥
टिक्कावथोथ नगरं यान्तोवन्तिपुराध्वना । तत्र हन्तुं व्यलम्बन्त भासादीन्पूर्ववैरिणः ॥१४७४॥
युद्धाग्न्युद्दीपनपात्रप्रहारच्छेदकारिभिः । न ते जेतुमशक्यन्त तैः प्रयत्नपरैरपि ॥१४७५॥ 1475
स्थितैर्नमद्दाढमप्राकारगुप्ते सुरगृहाङ्गने । तैर्हन्यमानास्ते स्थातुं गन्तुं वा नाभवन्क्षमाः ॥१४७६॥
एवं प्राग्विलम्बेषु तेषु लब्धान्तरः सुधीः । स्वीचकार प्रदानेन स्वङ्गवीडामसावृपः ॥१४७७॥
गृहीतनीतिना तेषां सुज्ञैः प्रायोजि सत्वरम् । तेन भासादिमोक्षाय पञ्चचन्द्रादिभिः समम् ॥१४७८॥
प्रापावन्तिपुरं यावन्न स तावत्तदभ्यगात् । कृत्यात्मजादीनालोक्य भङ्गं टिक्कादयो ययुः ॥१४७९॥
देवागाराद्विनिर्याता भासाद्यास्ते च विद्विषाम् । भग्नानामनुगान्हत्वा सुज्ञैरन्तिकमाययुः ॥१४८०॥ 1480

१४५६. [1]) Emended with C, A शीर्तांतं° १४५९. [1]) Thus A, cf वाटुक vss 1346 — [2]) A_1 writes here ३ instead of तिलकम् १४६२. [3]) A_1 writes here ३ instead of तिलकम १४६५ [1]) A_1 writes here २ instead of युग्मम्. १४६६. [1]) Emended, A आदीनास्य १४७० [1]) Emended with C, A वे. १४७३ [1]) Emended with C, A एकत्रेतगा°.

लब्धप्रतापे नगरं पर्विष्टे कम्पनापतौ । आयत्यामिन्दुराजोऽपि टिक्कं संत्यज्य सानुगः ॥१४८१॥
चक्रे चित्ररथश्रीवभासादीनपि भूपतिः । पादामद्वारखेर्यादिकर्मस्थानाधिकारिणः ॥१४८२॥
यथापूर्वमधिकारानजहत्सुज्जिरण्यभूत् । प्रतीहारमुखप्रेक्षी का कथंतरमन्त्रिणाम् ॥१४८३॥
प्रतीहारोऽपि निःसीमडामरस्यामसंमतः । तद्भेदचक्रिकां कुर्वन्नगाद्राज्ञः प्रतीक्ष्यताम् ॥१४८४॥
1485 स नामीदशुहदचूंड कोऽपि तत्प्रेरणेन यः । नाशिश्रियत्नृपं नो वा बभुवाश्रयणोन्मुखः ॥१४८५॥
निहुंशिल्पसहशस्फूर्तिपूर्तौ महीपतिः । आहारमप्यनासाद्य तन्मनं न व्यवेचत ॥१४८६॥
इत्थं नगरमात्रान्तर्लब्धपादप्रसारिकः । सोर्वीपीठं समासन्नफलं कन्दलयन्नयम् ॥१४८७॥
सप्तदश्यामिलान्भिक्षुर्डामरान्विजयेश्वरे । अथाध्यष्ठादधिष्ठानं जिघृक्षुः शिशिरात्यये ॥१४८८॥
अदृष्टपूर्वं स्वनमूचक्रैक्यं वीक्ष्य डामराः । भिक्षोर्हस्तगतं राज्यं मत्वाशङ्कितनाथ ते ॥१४८९॥
1490 एकैकस्यैव धीर्धैर्यमित्रामित्रादि दृष्टवान् । नोत्तिष्ठेत्प्रग्रराज्यः किमास्कन्देषु गृहान्तरात् ॥१४९०॥
इति संमन्त्र्य ते राज्यं सोमपालाय दिन्नवः । दूतान्निगूढं प्राहिण्वन्सोपि दूतं व्यसर्जयत् ॥१४९१॥
आकाराचारवेकृत्यैः पशुतुल्यस्य तस्य तैः । राज्यभोगा अभद्रा नो भविष्यन्तीत्यचिन्तयत ॥१४९२॥
भोगलोभाज्जिनौचित्यदस्युसंपचिकीर्षितम् । देशेत्र पापात्पापीयो दैवाच समपादि तत् ॥१४९३॥
दास्येष्यतोऽस्यो यो राज्ये स इत्यास्तां त्रपान्यतः । शक्येत पातुं देशोयं किमीपदपि तादृशा ॥१४९४॥
शालीन्पलालपृथ्वीति यः कृशानुरुधाननश्चटकपेटकमीतिदानैः ।
1495 चातुं स कानने तरून्विलिनो विदधात्कि तत्र भञ्जनकृतां वनकुञ्जराणाम् ॥१४९५॥
भिक्षोर्नेदिष्ठतां दिट्टवृद्धिव्याजात्तर्तो भजन् । तद्गतो डामरान्गूढं नीविद्रानोद्यतान्यधात् ॥१४९६॥
वैशाखेथ कृतारम्भस्तदा संभावितेश्वरः । निर्गत्य नगरात्सुज्जिर्गम्भीरातीरमाययौ ॥१४९७॥
तस्याभियोगः श्रव्येभ्यो द्रुं यत्समवायिनः । एकाकी तावतो वीरानरीकृत्य स निर्ययौ ॥१४९८॥
अन्तःपातं साहसानां नाद्रुतं तद्विधैर्वशात् । जीयते लक्ष्मिमेकेन लक्ष्मेणैकोथ वा युधि ॥१४९९॥
1500 पारे तरीतुं निःसेतोः सरितोपारयत्तसौ । पारे परस्मिन्नहितानपश्यच्छरवर्षिणः ॥१५००॥
द्विषा निशाः स ते चासंस्तस्याः सिन्धोस्तटद्वये । रुद्धाः संनाहिनोन्योन्यरन्ध्रावेक्षणदीक्षिताः ॥१५०१॥
अथावन्तिपुराद्भौभिरानीताभिरबन्धयत् । सेतुं साश्वोतरत्सुज्जिरारुह्य तरणीं स्वयम् ॥१५०२॥
तरन्तमेव तं दृष्ट्वा योधैः कतिपयैः समम् । द्विषच्चमूर्मरुल्लोला द्रुमालीवाभवच्चला ॥१५०३॥
दृष्टं मुहूर्तादेतावदारूढः स च यत्तटम् । बद्धश्च सेतुस्तीर्णश्च योधा भग्नाश्च विद्विषः ॥१५०४॥
1505 न खड्गी न हयारोहो नापि भृती न नापभृत् । व्यावृत्य प्रेक्षितुं कश्चिदशक्तिद्रुतादृलात् ॥१५०५॥
निबद्धवप्रशैथिल्याल्लोलपल्ययने हये । कोंऽश्वस्यास्याश्ववारा व्यलम्बन्तान्तरे क्षणम् ॥१५०६॥
निर्यन्त्र्य तेपि पर्याणं मुज्जौ पश्चात्पधावितें । वात्योद्भूतं रजश्चक्रमिव क्षिप्रं तिरोदधुः ॥१५०७॥
हतलुण्टितनिर्ध्वस्तध्वजिनीका तिरोधिनः । ध्यानोद्यादिषु सामेष्वमिलन्खण्डशो गताः ॥१५०८॥

१४८५ [1]) Emended with C; A नाशिश्रयन्नृप १४८८ [1]) Emended, A निभृन्डा[2].—[2]) Emended, A अथाधिष्ठद्[1]. C अथाधिष्ठद्[2]. १४९०. [1]) Conjectural reading, A एकैकस्यीपधीर्धै° १४९३ [1]) Emended, पापीय १५०५. [1]) Emended with C, A °वीक्षण° १५०८ [1]) Emended with C; A प्रेक्षितु. १५०९. [1]) Emended, A निर्यन्त्र्य, C निर्यन्त्र्य

विजयेशाप्रगं तीर्त्वा वितस्तासेतुमप्रगः[1] । भासोपि दस्यून्विद्रुते पलायनपरायणान् ॥१५०९॥
उषित्वा विजयक्षेत्रे तदान्येद्युरुपागते । कम्पनेशे[2] ययुस्तस्यक्त्वा ध्यानोद्गारं विरोधिनः ॥१५१०॥ 1510
तत्र स्थित्वा दिनैः कैश्चित्स देवसरसोन्मुखः । शिश्रिये भेदनिर्यातैरेत्य टिक्कस्य गोत्रिभिः ॥१५११॥
जयराजयशोराजौ तन्मुख्यौ भोजकात्मजौ । प्रविश्य देवसरसं व्यधाद्दिक्पर्वेशने ॥१५१२॥
ययुर्विनष्टसंघातास्तस्मिन्पश्चात्प्रधाविते । भिक्षवाद्यैः भूमुखं स्वीर्वी कोष्टेश्वराद्यैः ॥१५१३॥
गर्हा महाभये सोमपालबुतः पलायितः । दास्याः सुतेन सहितः कुत्रास्मीति प्रभोर्ययौ ॥१५१४॥
स हि तादृङ्महारम्भक्षोभसाध्योन्नतीच्छुताम् । तस्य सिंहासनाक्रान्तगोमायुवदमन्यत ॥१५१५॥ 1515
प्रमादात्स्वामिनो राज्यं चिरं नष्टं सितैर्दिनैः । मुञ्जिजः प्रहाय पदवीवेदं स स्वामिसूनवे ॥१५१६॥
शमालादीनपि व्युदान्दानोपायेन डामरान् । पौरांश्च भिक्षुवाश्रयिणो राजाभ्येतुं प्रचक्रमे ॥१५१७॥
राज्ञः परीक्ष्य सामर्थ्यमथ कुर्मो यथोचितम् । इति सर्वाभिसारेण तं संमन्त्र्य रणं ययुः ॥१५१८॥
रजोजवनिकालक्ष्यभटौघनटताण्डवः । डामोद्देशभुत्संग्रामः स वीरयामधस्मरः ॥१५१९॥
कोष्टेश्वरवशं यातं रक्षता पितरं क्षतैः । लब्धाः सहजपालेन श्रीधाः पक्तिभिः समम् ॥१५२०॥ 1520
श्रमस्तत्राविशेषेभूद्राजो भिक्षाचरस्य च । भिक्षुस्तद्वदन्यसंवेद्यं विवेदान्यपराजयम ॥१५२१॥
ततः प्रभृति यः प्रातः स न सायमदृश्यत । योऽद्य वा न परेद्युः स सैनिकैः भैक्षवे वृतः ॥१५२२॥
एवं त्यक्त्वा परान्पौरैडामरेषु नृपान्तिकम् । प्रयान्तु लाभसत्कारानुचितान्प्राप्नुवन्तु च ॥१५२३॥
काप्यहपूर्विकोत्तस्थौ मनुजेश्वरकोष्टयोः । प्रयातुं पार्थिवाभ्यर्णं लाभसीख्याभिलाषिणोः ॥१५२४॥
ज्ञात्वाथ तत्काकरक्षाहृतस्वपरिच्छदः । देशान्तरोन्मुखो भिक्षुस्तापादे मास्यवाचलत् ॥१५२५॥ 1525
अनुयाद्भिः स दाक्षिण्यशेषाद्विहितसान्त्वनैः । तदाद्यैर्डामरैः क्रुध्यन्न निरोद्धुमपार्यत ॥१५२६॥
अकरोत्स्वैरिणीसूनुतया शीलबहिष्कृतः । अतिरूपेषु दारेषु तस्य कोष्टेश्वरः स्पृहाम् ॥१५२७॥
सटां हरेः फणारत्नमहेर्जीवां हविर्भुजः । बालां च तस्य संस्पर्टुं कोप्रशान्तस्य शक्नुयात् ॥१५२८॥
समं सौम्सलिना बद्धसंधिराश्रयकाङ्क्षिणः । सोमपालः स्वविषये नादात्तस्य प्रतिश्रयम् ॥१५२९॥
उद्वेजितः प्राणहरैः प्रयत्नैस्तस्य सर्वतः । तद्देशदुर्गममहीसीमान्तं सुत्रहरीं ययौ ॥१५३०॥ 1530
त्रिगर्तेषु दया शीले चम्पायां मद्रमण्डले । त्यागो दार्वाभिसारेषु मैत्री नामर्त्यधामिणाम् ॥१५३१॥
पीडयेत्यक्तभीर्भूभुरस्थे त्वयि डामरान् । स्वामेवाभ्यर्थ्य राजानं ततः कुर्युः क्रमेण ते ॥१५३२॥
क्षमा तद्रुजामोर्थयितुं सांप्रतं नरवर्मणः । मन्त्रिभिर्युक्तमित्युक्तमपि मन्त्रं न चायहीत् ॥१५३३॥
वसाल्पपरिवारोस्मद्गृह इत्यथ गृह्णतः । श्वशुरस्यार्थनां तस्य भृत्याः पार्श्वादचालयन् ॥१५३४॥
प्रावर्तताथ नगरे विशद्भिर्विभवोज्ज्वलैः । सुलसत्कुलभे काले वरयात्रेव डामरैः ॥१५३५॥ 1535
वीक्ष्याश्चर्यचतुरैर्गरैकैकं पार्थिवापिकम् । सुस्मरत्क्षमापनैर्धैर्यै नैर्घृण्यं तुष्टुवुर्जनाः ॥१५३६॥
औदार्याकारतारुण्यवेषसौन्दर्यमन्त्रिणम् । कोष्टेश्वरांगिकं स्त्रीणां प्रययौ प्रेक्षणीयताम् ॥१५३७॥

१५०९. [1]) Thus corr. by A, from °मत. १५१०. [2]) Emended, A कम्पनेश. १५११. [3]) Emended with C, A °जवनिका लक्ष्य. १५२८. [4]) Emended with C; A समद्रु, cf. VIII 1193. १५३०. [5]) Emended with C, A लवेश°.

प्रशान्तविग्रहे देशे यथावृत्तसवयाश्रयताम् । विशङ्कैरिलवन्त्यौघतूर्यघोषो दिवानिशम् ॥१५३८॥
क्षीराद्या लक्ष्मकेणापि सर्वे मडवराज्यतः । आनीताः पार्थिवाभ्यर्णं सैन्यार्णवभयंकराः ॥१५३९॥
अपि भूपालवाह्याभ्यादभूद्राजोपजीविनाम् । प्रतीहारगृहद्वारप्रवेशो बहुमानकृत् ॥१५४०॥
लवन्यलुण्ठितग्रामतया दुर्भिक्षदुःसहः । व्ययोत्तरङ्गः कालोभूत्स राज्ञो धनदश्रियः ॥१५४१॥
डामरेभ्यो नृपः पारार्सगृह्णन्कृतवेतनः । निनायाभ्यन्तरं वृद्धिं बाह्यं चापचयं जनम् ॥१५४२॥
तिष्यवैरेश्यार्यदेवाद्या ज्ञातयो जनकद्रुहाम् । राजद्रोहोचितां राज्ञा विपत्तिमनुभाविताः ॥१५४३॥
मासैश्चतुर्भिः स पितृप्रयाताद्दनन्तरम् । अनन्यशासनं राष्ट्रं स्वमेव समपादयत् ॥१५४४॥
निर्धीम नगरं पौरा· सर्वसामर्थ्यवर्जिताः । अनन्तै राष्ट्रमाकीर्णं डामरैः पार्थिवोपमैः ॥१५४५॥
बद्धमूलो नाविद्रुद्धे सर्वभारसहो रिपुः । सबाह्याभ्यन्तरा मन्त्रिसामन्ता वैरिसंश्रिताः ॥१५४६॥
मन्त्रोपदेशो वृद्धस्य नैकस्यापि नृपास्पदे । अधर्मबहुलाः सर्वे भृत्या द्रोहैकवृत्तयः ॥१५४७॥
राज्यारम्भे बभूवेयं या सामन्यस्य भूपतेः । सा स्मर्तव्यान्तराज्ञातुं प्रत्युदन्तं विवेक्तृभिः ॥१५४८॥
प्राग्प्रसङ्गात्तदिदं गुणयामोपवर्णनम् । वक्ष्यमाणं सुबहुशोप्यत्र लेशात्प्रदर्श्यते ॥१५४९॥
पूर्वापरानुसंधानवन्त्यैर्दृष्टान्तवंस्कथाः । नाबुद्धातिगभीराणां शक्या रसयितुं गुणाः ॥१५५०॥
प्रत्यक्षस्य गुणान्राज्ञो विचिन्वन्तो यथास्थितान् । अनीर्ष्यस्य भविष्यामो विवेक्तस्यातृणा वयम् ॥१५५१॥
स्थितस्य तत्त्वविज्ञाने नान्यस्य हि पटुर्जनः । अमानुषानुभावस्य राज्ञः किं पुनरीदृशः ॥१५५२॥
हितानां दाराणां सदृशसुखदुःखस्य सुहृदः कवेः सोल्लेखस्य प्रियसकललोकस्य नृपतेः ।
स्थितानां कोप्यत्र व्यवहितविवेकः स्वकुकुटैरसामान्यं ज्ञातुं सुभगमनुभावं न कुशलः ॥१५५३॥
भवेत्प्राग्प्रसरणा परिणामेथ वा मतिः । कथं सर्वस्याद्भुतायां निष्ठायां गुणदोषयोः ॥१५५४॥
सन्त्येवास्यापि विषमाः स्वभावा दोषतां जनः । येषां विपाकभव्यत्वमजानन्गुणमव्ययम् ॥१५५५॥
विकास· केषांचिन्नयनविषमैर्विद्युदुदयैः परेषामुद्भूतिः श्रवणकटुभिर्दीर्घरसितैः ।
न चेष्टा कार्प्यन्योपकृतिपरिहीना जगन्मुक्ते जातो वर्षादन्यं गणयति गुणं नास्य तु जनः ॥१५५६॥
गुणोल्लेखोत्तराऽशून्यन्नस्मानुभवगोचरान् । भविता पूर्वभूपालकृत्ये सप्रत्ययो जनः ॥१५५७॥
अनुच्चलन्नपि स्थानाद्भुभंङ्गेन चकार सः । विलोलालोलकल्पेन दिङ्नाग इव भूधरान् ॥१५५८॥
विरुद्धद्वाहिनीवृन्दा गृहं यद्वयसंभवम् । वहन्ति तापं भूपाला और्वाग्निमिव सिन्धवः ॥१५५९॥
भूमिभृद्भास्वतस्तस्य तेजसाप्यायितो गतः । पूर्वराजयशश्चन्द्रो भुवनेष्वप्रकाशताम् ॥१५६०॥
यो यत्तं पश्यति स्वात्मसंमुखं स स सर्वतः । जानात्यवक्रोल्लिखितं दैवबिम्बमिवेश्वरम् ॥१५६१॥
स्थिरप्रसादो दत्ते यत्तदादत्ते न स कचित् । भयं पुनः प्रणमतां दत्तं हरति विद्विषाम् ॥१५६२॥
कृष्णासेः प्रतिबिम्बं स्वं हित्वा नान्योस्य संमुखः । नापरः प्रतिशब्दाच्च गर्जतः प्रतिगर्जति ॥१५६३॥
नस्य नानिशितं कोपि प्रसादे निशितं पुनः । धत्ते तीक्ष्णैकधारस्य तरवारेस्तुलां वचः ॥१५६४॥

१५३८ [1]) Doubtful emendation, A घोषा, C विग्रयो देशो and [2]घोषाविवा[3]. १५४२ [1]) Thus A, C पौरास्म[2] १५४३. [1]) Cf. वृत्तौ द्विरुक्त्याप्रवेवतिष्ठवैद्यैया[2] (A) viii. 1305 १५४५. [1]) Thus A_1, R C निवासन[2], as apparently corr. by later hand in A. १५४७ [1]) Conjectural emendation, A मन्त्रोपदेशवृद्धस्य १५५०. [1]) दृष्टान्त supplied by A_2 in space left by A_1 १५५८. [1]) Emended with C, A [2]भृङ्गेन.

तस्याकुलन्मनो नित्यास्थानलक्ष्मीविकासिनः । प्रभवन्त्याश्रिताः कल्पशाखिनः पल्लवा इव ॥१५६५॥ 1565
राज्ञि गाम्भीर्यदुर्लक्ष्यमाहात्म्यप्रभविष्णुताम् । विवेद मन्त्रिणां लोकः सिषेवे तांश्च सर्वतः ॥१५६६॥
परूढस्तु प्रतीहारो न विवेदेन्यमन्त्रिणाम् । पार्श्वद्रुमाणामेषाख्यौपधिस्तम्भ इवोद्गतिम् ॥१५६७॥
तस्योत्पाट्यतः सर्वीस्तृणानीवावहेलया । स्फुरज्जनकसिंहोभुदशक्योन्मूलनः परम् ॥१५६८॥
आ बाल्यात्संस्तुतो राज्ञः स कृत्स्नव्यवहारवित् । अभूद्यस्तरुणीभूततनयो न्यस्त सर्वतः ॥१५६९॥
अथैष यौनसंबन्धादिच्छतस्तनयस्तुतो मदात् । छुद्राभिधस्तस्य ततः कृतावज्ञोत्तरोत्तराम् ॥१५७०॥ 1570
रन्ध्रान्वेषी स तद्रोषादुपजापैः क्षणे क्षणे । समक्षं जनकं यत्नाद्वृषं द्वेषमजिघ्नत् ॥१५७१॥
राज्ञस्तुल्यवयःस्थौ हि जननीगाढसंस्तवात् । राज्यकाले हि सोत्सेकावास्तां तदवकाशदौ ॥१५७२॥
तुरगयोग्योपस्कारस्नानाहारादि राजवत् । अकालज्ञावकुरुतां राजयान्यन्तरेव तौ ॥१५७३॥
सह स्ववृद्धैः समशीर्षिका प्रभोर्न युज्यते प्राप्तममुचेतः क्वचित् ।
श्रितोज्झतेर्दर्दुरवृन्दलङ्घनं सरोजषण्डस्य महाद्विडम्बना ॥१५७४॥
तद्विज्ञिलाभसरूढपैशुनालेख्यकल्पनाः । तद्वर्गेष्वखिले चक्रुस्तद्विषः कलुषं नृपम् ॥१५७५॥ 1575
अथ राजा विजयिन सत्कर्तुं कम्पनापतिम् । कृतज्ञः श्रावणे मासि जगाम विजयेश्वरम् ॥१५७६॥
अत्रान्तरे पिनद्धवादागच्छन्निरिगहरे । प्राप शूरपुरद्रङ्गाधीश्वरादुत्सवं वयम् ॥१५७७॥
पुण्यागनाद्वादुत्पिच्छकृतये पुनरागतः । द्रङ्गाधिपेन गृष्टिकान्वेषिणा स समाप्यत ॥१५७८॥
क्षितौ निपतितः पार्श्वपार्श्वमेक द्विषद्वटम् । मुमूर्षुर्विशिखाविद्धजानुमर्मापि सोऽधीत् ॥१५७९॥
प्रत्यावृत्तस्य सत्कृत्य कम्पनेशं महीपतेः । हार्यवन्तिपुरस्थस्य द्रङ्गशोद्विग्नो व्यधात् ॥१५८०॥ 1580
स हृदग्राहिकामुष्टिरक्षुरन्मृदुमुद्वरः । चक्रे तस्य हृदामर्षशोकशून्यविपाटनम् ॥१५८१॥
आयायामेव यात्राया जातारातिक्षयो जनैः । स निःशेषयितोपेक्षकण्टकानामगण्यत ॥१५८२॥
तस्मिन्पर्यन्ते नगर विद्रुताः केपि सागसः । प्रापुर्जनकसिंहाद्याः केपि कारागृहस्थितिम् ॥१५८३॥
कैश्चिन्नलायितैः शङ्का जनिता पृथिवीपतेः । ततः कोष्ठिश्रमुखाः प्रातिलोम्य पर्यपिरे ॥१५८४॥
ग्रामाल्लां निर्यत श्रीमान्कार्तिकेय कृती नृपः । तत्र तत्रासुहृदामं संपोषोमप्रवात ॥१५८५॥ 1585
यत्र सम्मलभूपाद्याः प्रापुर्भग्नप्रतापताम् । न ह्यादित्याममद्वत्सु ज्ञिरूर्जितविक्रमः ॥१५८६॥
महीभृता पीयमानैराहवः कोष्ठकादिभिः । अथ भिक्षाचरैः राज्यगृध्नुभिर्योप्युपायथौ ॥१५८७॥
एकेनाह्ना योजनानि प्रोल्लङ्घ्य दश पञ्च च । शिलिकाकोट्टनामानं गिरिग्राममवाप सः ॥१५८८॥
क्षुत्पिपासाश्रमारातिभीतिमार्गश्रमोज्झितम् । क्रेश वाजीगणन्मानी धावितः स जिगीषया ॥१५८९॥
कार्यमायाति वैमुख्य जिगीषोर्विषुरे विधौ । पश्चित्यस्य पुरोवाते रयस्येव ध्वजांशुकम् ॥१५९०॥ 1590
आरम्भमात्रमपि कस्यचिदेव सिद्धेः कश्चिन्यवत्परमोत्फलयासः ।
मन्थाद्रिणामृतमवाप्युदधेर्मुहूर्तान्मक्ति चिराद्विदधता न हिमाद्रिजेन ॥१५९१॥

१५७१ [1]) Emended, A नृपो १५८० [2]) Emended with C, A °पुरस्थस्य १५८१ [3]) Emended, A विपादनम १५८४ [4]) Emended with C, A कैश्चित्य°.

भ्रष्टा सरित्स्ववसतेर्जलपिप्पलेशे वेलोर्मिवेल्लनवशेन विवर्तमाना ।
मिथ्यैव यच्छति धियं पुनरुद्गतेति नोत्थानमस्ति तु विधिव्यपरोपितानाम् ॥१५९२॥
तस्य तावन्महायत्नकठोरस्योदयक्षणे । सिद्धैर्विबन्धो विधिना विधुरेण व्यधीयत ॥१५९३॥
आयातं तमबुद्ध्वा तु तस्मिन्नेव क्षणेऽश्रयत् । पृथ्वीहरानुजः प्राप्तभङ्गः कृत्वाङ्गुलिर्नृपम् ॥१५९४॥
1595 कोष्ठेश्वरः स चावेत्य संप्राप्तं तमतिष्ठताम् । कृत्याक्षमौ ततः सर्पाविव मन्त्रनियन्त्रितौ ॥१५९५॥
ताभ्यां स्थानेय सोन्यस्मिंस्त्यानितोऽथपरिश्रमम् । कार्कोटद्वङ्गमार्गेण निर्गतः सुन्दरीं ययौ ॥१५९६॥
आसीच्च तत्र प्रोद्यण्डदर्पकण्डुलदोर्द्रुमः । ऊर्ध्वायमाणः कदमीराकान्तिसंतनचिन्तया ॥१५९७॥
उद्दीपसलिलस्येव तस्य स्नन्द्रगवेषिणः । पुरं प्रविष्टो राजापि प्रतीकारमचिन्तयत् ॥१५९८॥
अद्वितीयस्त्वमात्येषु प्रतीहारो मदोत्कटाम् । सुज्जैरसहमानोभुच्छत्रान्वेषणतत्परः ॥१५९९॥
1600 आययावथ विस्रम्भाद्गृष्टम्भं वल्गतः प्रभोः । धन्यायजः पूतमूर्तिर्जाह्नवीजलमज्जनात् ॥१६००॥
तदाद्याः संस्तुता राज्ञश्चिरसंभावितास्ततः । अनाप्नुवन्तोधीकारान्पर्यतप्यन्त चिन्तया ॥१६०१॥
कुर्वाणे कार्यतस्तस्मिन्भरं पित्र्येषु मन्त्रिषु । कालप्रतीक्षाक्षमतामुहुर्ते गहनाशयाः ॥१६०२॥
प्रतीहारस्तु दुर्लक्ष्यसुज्जिनिर्लोठनोद्यतः । अधियानपि तान्दीप्त्या जयाहोपयोगिनः ॥१६०३॥
व्यतीतेष्वथ मासेषु केषुचिद्दैवयोगतः । अकस्मादभवद्भूरिस्फीतलूतामयातुरः ॥१६०४॥
1605 विस्फोटशोकातीसारवह्निमान्द्यायुपद्रवैः । सदिग्धाभ्युदयं तस्मिन्देशः पर्याकुलोभवत् ॥१६०५॥
इत्थं स्थितः कुलस्यैकंभर्तुः स्वामी बली रिपुः । तत्पक्षा डामरा राष्ट्रं दुहमेव व्यचिन्तयन् ॥१६०६॥
भाग्यात्यां च तदात्वे च हितकृत्यं विचारयन् । राज्ञः श्रीगुर्णलेखाया जातमेकसुतं शिशुम् ॥१६०७॥
पञ्चाब्ददेश्यं पर्माण्डं सुज्जिभूमिपतिं तदा । चिकीर्षुर्मन्त्रयामास मातृलेनास्य गार्गिणा ॥१६०८॥
इत्थं भूतस्य दुर्भुक्षः ससूनुः सुज्जिराश्रय ते । पञ्चचन्द्रादिभिः सार्धं युक्त्या मन्त्रयतेनिशम् ॥१६०९॥
1610 लब्धमन्त्रः प्रतीहारो धन्यायाश्च तदीङ्गिताः । इत्यवोचंस्ततो भूपं स तथेत्यग्रहीच्च तत् ॥१६१०॥
पूर्वप्रज्ञासृजं इवाद्भुतवस्तुतत्त्वव्यावर्णनेन कुतुकं जनयन्ति तज्ज्ञाः ।
बाला इवाल्पमतिहार्यरियश्च सन्ति प्रायो नृपा नियमशून्यमनोनुभावाः ॥१६११॥
शौचस्थाने कृतवसतिभिः स्त्रीत्रयवायालये वा निःशस्त्रो यश्छलनकुशलैर्मानसं संप्रविश्य ।
नीतो भूतैरिव विवशतां निर्भरं गर्भवेदैर्भद्रं भूपात्कथमिव ततः स्यादवष्टब्धचेष्टात् ॥१६१२॥
निर्हेतु प्रहसन्विटः प्रविशति क्षोणीपतेरन्तिकं प्रीत्युत्फुल्लदृशेष किं किमिति न पृच्छत्यनच्छाशयम् ।
ब्रूते किंचिदसौ कचानथ कषन्सर्वंकषं मानिनां मानग्राणगुणेषु यत्सरसमं दम्भोलिपातायते ॥१६१३॥
सविभ्रमगतागतैः किमपि भाषमाणः भ्रुवौ प्रभोर्वलितलोचनं जगदवज्ञयालोकयन् ।
निजस्य मुखविक्रियाप्रणयतादनोर्यैवदन्नुपहसित्राहितं नृपतिवल्लभो दुःसहः ॥१६१४॥
1615 अपि जातु स दृश्येत निःसंक्षोभमतिर्नृपः । यो यन्त्रपुत्रक इव व्यक्तं भूर्तैर्न नर्त्यते ॥१६१५॥

१५९४ [1]) Here one *akshara* is wanting in A; तु supplemented with C १६०२. [1]) Emended, A °क्षमता मुहुर्म्ने १६०६. [1]) Thus corr by A_1 from कुलेस्यै°. १६०८ [1]) Emended, A गार्गणा. १६११. [1]) Emended, A °वज्ञ — [2]) Emended with C, A °तस्यं व्या°.

यतो भृत्यान्तराज्ञानाज्जातः सर्वस्वसंक्षयः । तत्प्रजादुष्कृतै राज्ञां हा धिङ्नाथापि शाम्यति ॥१६१६॥
सुज्ञिरारोग्यमन्वेष्टुमागच्छन्पूर्ववत्पथोः । विन्यस्तरक्षिणः पश्यन्नविश्रामस्खलिषत ॥१६१७॥
दाक्षिण्यं वामतां यातमाशये प्रतिबिम्बितम् । दर्पणस्येव राज्ञः स विभाव्याभूत्पराङ्मुखः ॥१६१८॥
तस्मिन्नाजगृहे खेदान्मन्दीकृतगतागते । नृपतेस्तद्गतां प्रीतिं निःशेषां जह्रिरे खलाः ॥१६१९॥
भृत्यः सुज्ञिश्चित्ररथाप्यास्थानद्विजभूः शठः । प्रातिलोम्यावहैर्मर्तुर्मनस्तैरासीच्छिरोन्नतम् ॥१६२०॥ 1620
नीरोगे राज्ञि तुष्टः स दिष्टवृद्ध्यै नृपास्पदे । वसुवर्षी विनिर्याय प्रार्थनार्यां गृहान्ययौ ॥१६२१॥
न त प्रासादयद्राजा विशालबलवाहनः । आक्रम्यासौ कथं नः स्यादित्युपायं त्वचिन्तयत् ॥१६२२॥
त्यज्येन हतकार्योंसौ निराशैरनुजीविभिः । मन्त्रेति तदधीकारानन्येभ्यस्तूर्णमार्पयत् ॥१६२३॥
राजस्थानात्त्यजं धन्यंमुदयं कम्पनादपि । अजिघद्धरपतिः खेशीकार्यं च स्निग्धेण्म् ॥१६२४॥
हतेऽधिकारे प्रत्यक्तकैकृते नृपतौ ततः । अल्पावशेषानुचरः सुज्ञिरासीद्विशङ्कितः ॥१६२५॥ 1625
विमानितः पुराद्राज्ञायात्रामुद्दिश्य मानवान् । सोथ सुस्मलभूमर्तुरस्थान्यादाय निर्ययौ ॥१६२६॥
औन्मुक्त्यान्प्रार्थनाकाङ्क्षी राजधान्यन्तिके न सः । निर्गच्छन्नाजपुरुषैर्न राज्ञा वान्वरुध्यत ॥१६२७॥
तन्निर्वासनगर्वस्य स्थापनायानुयात्रिके । प्रतीहारस्तस्य गुप्त्यै कोशादिः स्वात्मजं व्यधात् ॥१६२८॥
नियह्यानुयह्यावस्मदायत्तानिति रक्षिणम् । पुत्रं प्रादाल्लक्ष्मको मं इति व्यायस्म विश्रथे ॥१६२९॥
निवृत्तो लक्ष्मको द्वारात्पर्णोत्स्मं शनकैर्गतः । अवारोपयदद्रोहो भागिकं लोहशृङ्खलात् ॥१६३०॥ 1630
प्रतीहारविसृष्टाय धात्रेयाय महीभुजः । प्रेमाभिधाय तत्कोट्टाधीकारं च समार्पयत् ॥१६३१॥
उत्थाय लोहशृत्यागाच्छङ्खाशङ्कं महीपतेः । स भीष्मविषमं कालं राजपूर्यामलङ्घयत् ॥१६३२॥
अमात्यकन्दुकव्रातपातनोत्पातनक्षमः । आयत्तडामरः प्राप प्रथां कामपि लक्ष्मकः ॥१६३३॥
द्वारेथाकारयत्सुज्ञिपतिमल्लविधित्सया । कृत्यमाणो राजवंशपौरुषं राजमङ्गलम् ॥१६३४॥
अनन्यदेशजः सुज्ञेः शुभे मल्लोशपोषितः । कीर्तिमेष हरेदेषां विनीर्ष्याकलुषो हि सः ॥१६३५॥ 1635
खड्गपाहिसहायः स क्षुण्णः पर्यटितुं पथि । निःसुखश्चोपहास्यश्च तेन कार्यापणात्कृतः ॥१६३६॥
कर्तुं पदद्यां योग्यानामयोग्यान्प्रभवेन्न कः । नेयां गुणैस्तान्संयोक्तुं न शक्यं कारणैरपि ॥१६३७॥
पदे श्रीखण्डस्यानुचितमुनिने वर्ष्मणि निजे नृपाङ्कः प्रक्षेतुं प्रभवति चिताभस्म रभसात् ।
न तत्खेच्छायत्तत्रिजगदुदयापायघटनोप्यसौ तद्दम्भेन स्फुटमिह पटुः संघटयितुम् ॥१६३८॥
तस्मिन्सुज्ञिप्रतिस्पर्धामयैडे वोढुमक्षमे । दुतानमूजदानेतुं सज्जपालं दिगन्तरात् ॥१६३९॥
निर्वीरे मण्डले द्वेष्योप्यवापत्कार्यगौरवात् । कोंष्ठेश्वरो नरपतेर्नतरामन्तरङ्गताम् ॥१६४०॥ 1640
प्रीतिदायैस्तोष्यमाणस्तैस्तैस्तुष्टेन भूभुजा । विलक्ष्यो नगरे तस्थौ सोपि लुतामयानुरः ॥१६४१॥

१६१९ 1) Emended; A जह्रिरखिला १६२२ 1) Emended, A आक्रम्यासौ —) Thus corr. in A from न १६२४. 1) Emended, A धान्य°. १६२५ 1) Emended, A हृता° १६२९ 1) Conjectural reading, A °कोंष; R C °कोंय १६३१. 1) Emended; A समर्पयत्. १६३३ 1) Thus A_1, A_2 °पातनोत्थापनक्षम. १६३५ 1) Thus A_1, A_2 सुज्ञिः.— 2) Thus corr. by A_2 from A_1 मल्लेश°.— 3) Thus corr by A_2 from A_1 स्पर्धामय वहे ~ ~ विनी°. १६३८ 1) पटु supplied by A_2 in space left by A_1.

एवं दमकदम्बैश्च राज्ञि कुर्वति कार्यतः । चालकैः सोमपालाद्यैः सुज्जिर्ज्ञानेत्थेव वैकृतम् ॥१६४२॥
प्रतिज्ञाय लतामात्रसाध्यं कुडमीरनिर्णयम् । सोमपालाय तद्राज्यं सोड्डीचक्रेवमानितः ॥१६४३॥
प्रतिशुश्राव तस्मै च भागिनेयीं स कन्यकाम् । धीमानवान्तरे सामदाने पर्युयुजे नृपः ॥१६४४॥
1645 द्वौ तावल्पाशयौ राजकन्ययोः स्त्रीक्रियां तदा । रभसाद्यावरुर्वाणावदत्तामन्तरं द्विषाम् ॥१६४५॥
उपायैर्जयसिंहस्य शकुनैश्च निरीक्षितैः । प्रेरितः सोमपालोथ मुज्जिर्मन्दादरोभवत् ॥१६४६॥
स्वयमेत्य प्रतीहारस्तत्र राज्ञपुरीपतिम् । सीमान्तर्भुवमानिन्ये कन्यकोद्वाहसिद्धये ॥१६४७॥
जातां कल्हनिकाख्यायां महादेव्यां महीपतेः । उपयेमे नृपसुतां सोमोम्बापुत्रिकाभिधाम् ॥१६४८॥
याते तस्मिन्कृतोद्वाहे नागोल्ख्याभिधां सुधीः । तत्स्वस्रेयीं प्रतीहारो भुभुजे प्रत्यपादयत् ॥१६४९॥
1650 इत्थं राष्ट्रद्वये बद्धसंधौ निरवकाशताम् । प्राप्तः प्रतस्थे क्षेमन्ते सुज्जिर्ज्ञस्त्रिपथगोन्मुखः ॥१६५०॥
ज्ञालंधरं संवलितो ज्येष्ठपालो निनाय तम् । गाढावमाननिर्नष्टसौम्रवं भिक्षुपक्षताम् ॥१६५१॥
त्वयि भिक्षाचरं चैकसैन्यनायकतां गते । नोपेन्द्रो वा मंहन्द्रो वा समर्थौ प्रत्यवस्थितौ ॥१६५२॥
राज्यपदस्य ते यश्च चक्रे राजा त्रिमाननाम् । तस्थुषो यश्च विषये प्रतिकुर्मस्तयोर्द्वयोः ॥१६५३॥
इति संचिन्तितस्तेन दंडपालान्तिकस्थितः । त्रियासुः सोन्तिकं भिक्षोर्भागिकेन न्यषिध्यत ॥१६५४॥
1655 अनिक्षिप्तवतोर्मध्येनि स्वामिनो जाह्नवीजले । न युक्तमेतत्ते कृत्यमित्यावेगादशासि च ॥१६५५॥
ज्ञात्वा पुनर्यामेष्यामि पार्श्वं च इति निश्चयम् । स पीतकोशः कृत्वास्य ययौ प्रस्तुतसिद्धये ॥१६५६॥
प्रतीहारकरन्यस्तसर्वभारस्तु भूपतिः । मन्दाक्रान्ततया राज्यमसुस्थितममन्यत ॥१६५७॥
यो यो हि व्यग्रहीत्तं तं सपाय सविधस्थितः । तमन्वहं प्रतीहारः सानुग्रहमिवैक्षत ॥१६५८॥
प्रगल्भमाने शास्त्रेयेवमुदयः कम्पनापतिः । अवधीच्छक्तिना तूर्णं प्रकटं क्वालियात्मजम् ॥१६५९॥
1660 अविश्वासोल्बणान्सर्वलावन्यानथ लक्ष्मकः । निर्मर्यादान्कम्पनेशसीपत्नान्त्वमनिग्रहत् ॥१६६०॥
ज्ञात्वाभ्येष्यति गङ्गायां यावन्मुज्जिर्विसूचताम् । यावत्कथ मया नेया कुडमीरा इति चिन्तयन् ॥१६६१॥
तावन्मात्रान्तरव्याप्या राज्ञो विज्ञाय डामरान् । भिक्षाभिक्षाचरोविक्षद्विपलाटो हिमागमे ॥१६६२॥
मण्डलस्यान्तरे तस्य विविक्षो रुद्धडामरः । प्रतीहारो हिमर्तुश्च निषेद्धा समपद्यत ॥१६६३॥
स टिक्केन पितृद्रोहादेकान्तद्वेषिणा रिपोः । आनीतः संमतैर्दत्ताध्यायः सर्वैश्च डामरैः ॥१६६४॥
1665 प्रतीक्षमाणो राज्यायप्रेतुं मुज्जिसमागमम् । निर्भयष्टिक्कजामातुर्भागिकस्य स्वशर्मणः ॥१६६५॥
वाणशालाभिधे दुर्गे वसन्नप्योच्छिनावपि । दुर्वैरिभेदमनयत्सर्वडामरमण्डलम् ॥१६६६॥
प्रमोदं सुरदां त्रासं द्विषां च विसृजन्पुरः । व्यावर्तताथ गङ्गायाः मुज्जिर्वेपितमज्जनः ॥१६६७॥
पूर्वविप्रकृते भिक्षाचर्यमिश्राभेदमागते । यथामुष्य महीभर्तुस्तथास्माक भय भवेत् ॥१६६८॥
ध्यात्वेति सिंहदेवेन प्रार्थितो व्याजमादधे । मुज्जिर्सर्वाकरणोद्योगे सोमपालो भयाकुलः ॥१६६९॥
1670 मुज्जिर्ज्ञालंधरं प्राप्तः प्रान्तभिक्षाचरान्तिकम् । यावद्यास्यति तं साय तद्दूतस्तावदासदत् ॥१६७०॥

१६५१ 1) Emended with C; A स्वस्रेयी १६५५. 1) These two *pâdas* have been twice written by A.— 2) Emended with C, A शापि १६५९ 1) Thus A; perhaps read शास्त्रेयमु

प्रेरितो ज्येष्ठपालेन निषिद्धो भागिकेन च । विरराम स तस्योक्त्या विपक्षाभ्रयणग्रहात् ॥१६७१॥
ऋणं देशान्तरोपात्तं तव भूपोपनेष्यति । स्वं च दास्यत्यधीकारं मन्मुखग्रहितार्पणः ॥१६७२॥
इति दूतमुखेनोक्तः सोमपालेन चान्वहम् । विपक्षौत्सुक्यमुत्सार्य तदेशाभिमुखो ययौ ॥१६७३॥
उदयः कम्पनाधीशो वैशाखे तीर्णसंकटः । खज्ञान्वितेन संग्रामं प्रत्यपद्यत भिक्षुणा ॥१६७४॥
प्राक्तस्थुष्यल्पपृतने जाते पृथुबले ततः । तस्मिन्क्रोष्टान्तरं भिक्षुः प्राविशत्प्राग्रवेष्टनः ॥१६७५॥ 1675
राजाथ विजयक्षेत्रं निर्यातः प्रत्यपूरयत् । कम्पनेशस्य कटकं तास्तां संप्रेषयंश्चमूः ॥१६७६॥
यन्त्रोपलशरासारविविधायुधवर्षिणी । दुर्गस्थितैर्नृपचमूः प्रत्ययोध्यदमर्षिभिः ॥१६७७॥
पतत्स्वदमद्य भिक्षोश्च नामलक्ष्मसु पत्तिषु । ग्रहीतुं दुर्गजान्प्राजसेना दीर्घापि नाशकत् ॥१६७८॥
दिनैरभ्यधिके मासमाने यातेग्रहीत्तनः । विदार्य मूलं दुर्गस्य धन्यैः खातान्धु संभृतम् ॥१६७९॥
दुर्गभाजो बलासाद्य राज्युपायपरे धियम् । जानतद्वैरिवाधेच्छा धनलुब्धामदर्शयन् ॥१६८०॥ 1680
विमृसर्ज प्रतीहारमथ तद्वस्तुसिद्धये । राजा डामरसामन्तमन्त्रिराजात्मजैः समम् ॥१६८१॥
कोष्टेश्वरत्रिलक्षाद्याः कृच्छ्रंस्थस्य विमोक्षणम् । करिष्यामो वयं भिक्षोरिति बुद्ध्या तमन्वयुः ॥१६८२॥
पदधन्संकटशैलाग्रादधः कोट्टं मितोन्नति । जितं मेने प्रतीहारो वीक्ष्यानन्ताः स्ववाहिनीः ॥१६८३॥
पूर्वस्थितैः प्रतीहारानुगैश्चान्यत्र वासरे । श्रयोपि सर्वसैन्यस्य बलात्कोट्टं जिघृक्षुभिः ॥१६८४॥
ते तावन्तोप्यदमवृद्धया तथा तैः प्रतिचक्रिरे । नास्तीदं विक्रमेणेति यथागृह्णन्विनिश्चयम् ॥१६८५॥ 1685
वीरदेहदुमायेभ्यो न्यपतन्नरमर्महताः । निर्यदस्रौघसरघाः शीर्षभ्रमरगोलकाः ॥१६८६॥
कोष्टेश्वरस्य मूढत्वं निर्व्यूढं तत्र किंचन । स्वस्य भिक्षोर्बलवन्यानामन्येषां न विनाशकृत् ॥१६८७॥
नास्त्यत्र मत्समो वीर इत्येनावत्समिद्धये । स युद्धोद्धतं भिक्षोर्यत्प्राणक्षयकार्यभूत् ॥१६८८॥
बुभुक्षूणां खज्ञानां स संकटे धैर्यमादधे । कोष्टेश्वरोसि चाभिज्ञो तद्वदया डामराः परे ॥१६८९॥
यदेतद्वृद्धये भूरि मैन्यमस्मद्धिताय तत् । पर्यवस्येदिति वदन्समभाव्यन्यथा च तत् ॥१६९०॥ 1690
विश्वम्भरभुरुप्यारिर्यत्र कोष्टेश्वरोप्यसौ । अन्येषु तत्र केवल्यत्थेथ ते निश्चयं बुधः ॥१६९१॥
भूभृत्पितृद्रुहः कार्यवशेन स्वोपजेवने । अङ्गीकृताधिकारस्तु धीमांष्टिक्कस्य लक्ष्मकः ॥१६९२॥
खज्ञाधीशं महायामस्वर्णादिन्यागसंभयात् । स्वीकृत्य भिक्षुबुभुक्षांबद्धकक्ष्यमकारयत् ॥१६९३॥
आनन्दाख्यः खज्ञाधीशस्तालः कृतगलग्रहः । नीत्वा टिक्कं प्रतीहाराभ्यर्णं भूयोप्यशिक्षयत् ॥१६९४॥
प्रतीहारस्य टिक्केन सहैक्यं वीक्ष्य डामरैः । निःशङ्कं हतोज्ञायि भिक्षुः कोष्टेश्वरादिभिः ॥१६९५॥ 1695
संरब्धास्तद्विमोक्षाय प्राहिणवंस्ते खज्ञान्तिकम् । दूतानूरीकृतस्वर्णदाना भूरिधनैः समम् ॥१६९६॥
खज्ञस्तु दध्यावुत्कोचं गृहीत्वास्माभिरुज्झितः । जानाति रक्षितान्प्राणान्भिक्षुः कोष्टेश्वरादिभिः ॥१६९७॥
समन्युः प्राग्रराज्योथ देङ्गपालोथ दूरगः । हन्यान्मां जयसिंहस्तद्रक्ष्यः पक्ष्यः प्रयत्नतः ॥१६९८॥
मत्केति तेन पत्युक्ता भिक्षुं शौचस्थितं गृहात् । विषाद्यानः फलहकं निर्गच्छेत्पृथिवीरपि ते ॥१६९९॥

१६७६. [1]) Emended, A सप्रेषयच्चमू. १६७९. [1]) Emended, A धान्य, C धान्यखा° cf. viii 1624. १६८१. [1]) Emended A राज्ञां. १६८२. [1]) Thus corr. by A, from A, कृच्छ्रात्तस्य. १६९३. [1]) Emended, A °बुभुक्षु° १६९९. [1]) Emended with R; A °द्यायु°. १६९९. [1]) Emended, A भिक्षुशौ°

स त्वमेभ्योपलिप्राङ्गः श्वेतावस्करवर्त्मना । यात इत्ययशो लोके ध्यायन्मानी न निर्ययौ ॥१७००॥
कोष्टिभ्यरोध्यक्तकृत्यः सैन्यक्षोभेच्छयाक्षिपन् । रूक्षं कालविदा प्राह्णे प्रतीहारेण सान्त्वितः॥१७०१॥
नीवौ खड्गाधिरोप्यायामा प्रत्यूषादगृह्यत । व्यवसायः प्रतीहारमुक्तैर्भिक्षुप्रमापणे ॥१७०२॥
गच्छद्विरागच्छद्भिश्च राजा दूतैः प्रतिक्षणम् । अन्विष्यन्विजयक्षेत्रे वार्तां पर्याकुलोभवत् ॥१७०३॥
तावद्भिराहवैस्तैस्तैः साहसे दश वत्सरान् । कृतयत्नस्य साध्योभूच्च यो वृद्धमहीभुजः ॥१७०४॥
डिम्बो राजानुगा डिम्बास्तस्य भिक्षोः प्रमापणम् । साध्यमेते हि मन्यन्ते हन्त किं केन संगतम् ॥१७०५॥
विहस्य नीयते वित्तं खड्गैरेल्ल क्षणादमी । भग्ना नूनं प्रयास्यन्ति मुषिताश्चाखिलाः परैः ॥१७०६॥
पृथग्भूतः कोष्टकोयं विल्लकोस्यैव बान्धवः । एते भिक्षाचरोच्छिष्टपुष्टा आभ्यन्तरा अपि ॥१७०७॥
को नृतनोत्र संग्रामो यो राज्ञः साध्येदितम् । सामग्री नूनमायाता सेयमस्यैव सिद्धये ॥१७०८॥
इत्युच्चैः शिबिरे यावज्जनास्तावदवेष्टयत । कटकैर्मन्त्रिणां दुर्गं विकोशायुधवाहिभिः ॥१७०९॥
एकाकी चिरसंक्लिष्टो हन्तव्यस्तत्कृतेखिलैः । हा धिक्परिकरो बद्धो निर्लज्जैः सर्वशस्त्रिभिः ॥१७१०॥
त एवेत्युपरामीच कचच्छस्त्रोर्मिनिर्मलः । स्फुरद्योधाक्षिशफरो निःशब्दः सैन्यसागरः ॥१७११॥
व्योम्नोट्टीयेत वा सैन्यं लङ्घ्येद्वा मृगप्लुतैः । दुष्टाभवृष्टिरिव वा निखिलांस्ताडयेत्समम् ॥१७१२॥
साश्चर्यशौर्यः पर्यन्ते स्वीकुर्वन्भिक्षुरायुधम् । संभ्रान्तशङ्कितश्वासीदित्यन्तश्चिन्तयञ्जनः ॥१७१३॥
एतावन्मन्त्रिणां सिद्धमथ प्रत्यूहसंभवः । तच्छान्तिः कार्यसिद्धिश्च प्रतापैर्नृपतेरभूत् ॥१७१४॥
सैन्ये भिक्षाचरापातं पश्यत्यूर्ध्वापितेक्षणे । कोट्टाम्निष्कुटशस्त्रीकः पुमानेको विनिर्ययौ ॥१७१५॥
रुदतीभिः परीतस्य नारीभिस्तस्य निक्षिपुः । पृष्ठे केपि वपुर्लोलकौसुम्भारुवाससः ॥१७१६॥
बद्धः पलायमानोत्र सोयं भिक्षुरिति ब्रुवन् । उन्मुखः स जनोश्रौषीद्दिक्कं तमथ निर्गतम् ॥१७१७॥
स हि[1] भिक्षोः कृतघ्नोहतुमुले प्रस्तुतो[2] वधम् । तस्माद्राजानुगेभ्यो वा स्वस्याशङ्क्य विनिर्ययौ ॥१७१८॥
अद्रोहोस्मीति लोकस्य प्रत्ययाय चकर्ष च । कृपाणीमुदरं हन्तुं रक्ष्यमाणो निजानुगैः ॥१७१९॥
मानुगस्यक्तमार्गो स विलङ्घ्य नृपवाहिनीम् । अद्रिप्रस्थवणोपान्ते नातिदूरेभ्युपाविशत् ॥१७२०॥
उच्छ्वसंश्चिरसंग्रामैरम्भोभिर्दुर्गनिर्गतः । मायां प्रयोक्तुं प्रारेभे प्रेरितः सोन्यडामरैः ॥१७२१॥
संजातं लम्बमानार्कमहस्तद्रक्ष्यतां क्षणम् । भिक्षुः क्षपायामस्कन्दमपनेष्यन्ति डामराः ॥१७२२॥
इति तद्वाणिकाख्यिप्सा नीविभिर्मन्त्रिणां समम् । खड्गैस्त्यजद्भिर्हृषदो न्यरुध्यन्तारुरुक्षवः ॥१७२३॥
ततः किलकिलारावमुखरैः करनालिकाः । योधैर्ददद्भिः सचिवा व्यगृह्यन्ताकुलाशयाः ॥१७२४॥
मुक्ताः स्वामिद्रुहः कृच्छ्रगता राज्यं प्रसाधितुम् । द्विषतो मन्त्रिभिः स्वार्थो दस्वार्थान्को नु साधितः ॥१७२५॥
राजकार्ये च भानौ च लम्बमानेथ लङ्घकः । किमेतदिति तं नीर्वि खड्गास्थालमभाषत ॥१७२६॥
सोभ्यपात्कुम्भदास्यापि रोद्धुं शक्यं चिकीर्षितम् । खड्गानां प्रत्यवस्थाता कथं तत्रास्यसंनिधिः ॥१७२७॥
स हन्तुं वैपरीत्यं तं खड्गानां त्वं व्रजेत्यथ । उक्त्वा व्यसृजदानन्दं जहसे चान्यमन्त्रिभिः ॥१७२८॥

१७०१ [1]) Emended, A °वन्तस्य. १७१८. [2]) Emended; A सह.—[2]) Thus A, perhaps read कृतघ्नोहस्तुमुले प्रस्तुतं १७२३. [1]) Emended with C; A न्यरुधन्ता°. १७२५. [1]) Emended, A स्वार्थो.

सुदूरवर्तिना राज्ञा विषलाटाध्वपातनः । देङ्गपालगृहा[1] -[2]दारम्भः समभाव्यत ॥१७२९॥
अतः प्रधानकोष्ठेशस्यालः ममगृहान । प्रागेवार्थैरतेनर्थं यत्नता दीर्घवागुराम् ॥१७३०॥ 1730
संक्षोभात्तसरे क्षत्ता ततो निःसंभ्रमोभवत् । शिक्षितं पक्षिणमिव त्यक्तं प्राप्यं विवेद तम् ॥१७३१॥
स तानूचे न हास्यं मे नष्टे कार्येत्र साहसम् । सर्वनाशे हतेमुष्मिन्खड्गास्यालेपि किं भवेत् ॥१७३२॥
अकुण्ठया भाग्यशक्त्या राज्ञः स्यालः खड्गास्य सः । सर्वाक्षियन्त्र्य दुर्गापाक्षीक्षादीनाजुहाव तान् ॥१७३३॥
दस्यूनामसयः कण्डे संदेहं मल्लिणां धियः । स्वःस्त्रीणां प्रीतयः काष्ठां तीक्ष्णाश्वारुरुहुर्गिरिम् ॥१७३४॥
स वर्मकौपीनपटीबन्धस्तस्त्वाभिधाङ्किनैः । हयुभिः स्वामिवत्स्वस्य ख्यापनं सर्वतो युधि ॥१७३५॥ 1735
स ताम्बूलाधरः सक्तिः सा केशहमश्रुयोजने । याभूदनुमुमूर्षूणां भिक्षुराजोपजीविनाम् ॥१७३६॥
निश्चिन्तान्ते ततस्तस्मिन्स तेषां संन्यवर्तत । कोष्ठेश्वरादिशिविरे तूर्णं शरणमीयुषाम् ॥१७३७॥ तिलकम्॥
एकैकशो लक्ष्मकेण युक्त्या स्वैः प्रेरितैर्भटैः । टिक्कः स्वं वीक्ष्य वलितं निचकर्तांङ्घ्रिलं भयात् ॥१७३८॥
खड्गैरस्मिन्नवसरे स पलायनशङ्किभिः । रक्ष्यमाणस्तेष्वहःसु मनरतापादमुक्तवान् ॥१७३९॥
वीरस्तम्भ्यन्निलम्बेन तीक्ष्णानामाहवोत्सुकः । तस्थौ भिक्षाचरः स्वान्तमक्षवत्या विनोदयन् ॥१७४०॥ 1740
हर्म्यप्राङ्गनमायाते तीक्ष्णलोके युयुत्सया । उत्तिष्ठता तेन दायः स्तोकशेषः समाप्यत ॥१७४१॥
दीप्यतः कान्तया साकं कामिनः सुहृदागमे । प्रत्युत्थास्नोरिव क्षोभो नान्तस्तस्य व्यजृम्भत ॥१७४२॥
किमद्यापि वधेन स्याद्बहूनामिति चिन्तयन् । स विहाय शरात्रापं सासिधेनुर्विनिर्ययौ ॥१७४३॥
सुदीर्घचिन्तागलितायामश्यामलिभिः कचैः । चञ्चच्चित्रपताकाङ्कमिव वीरपटाच्छलैः ॥१७४४॥
गण्डनाण्डविनाच्छिद्रबाहुनाऽङ्कुरोचिषा । चन्दनोल्लेखकान्त्या च द्योतिताहंक्रियास्मितम् ॥१७४५॥ 1745
त्रिवीर्ण चित्रचार्यन्ते विपर्यस्ताङ्घ्रिनाडनम् । द्योतयन्तमिवालापैः शस्त्रीनेत्राधरांशुकैः ॥१७४६॥
कौसुम्भाधरवासोमबद्धधौताधराच्छलैः । लोलैर्वीरहरिं बद्धसटाटोपमिवांसयोः ॥१७४७॥
कृष्णः पाणिपदैक्यचारुप्रचुरचारिभिः । चरन्तं मण्डलैश्चित्रैर्लघुचित्रस्थिरक्रमैः ॥१७४८॥
औचित्यस्योचितां चर्यामलंकारमहंकृतेः । अभिमानविभूतीनां नित्योत्सेकमनत्ययम् ॥१७४९॥
अलक्षितक्षिप्रपातं स सर्वोप्युन्मुखो जनः । विचरन्तं तमैक्षिष्ट भिक्षुमग्रे विरोधिनाम् ॥१७५०॥ 1750
राजबीजी मधोर्नाम्ना तं प्रवीरः कुमारियः । भ्रातापि ज्येष्ठपालस्य निर्यातो रक्षिकोन्वगात् ॥१७५१॥
हर्म्यैर्नीसोत्तनैस्तैस्तैर्विशतः परिपन्थिनः । रुरोधैकः शरासारैर्गार्गीको भिक्षुसंभितः ॥१७५२॥
ते धावन्तो व्यभाव्यन्त शरैस्तच्चापनिर्गतैः । वर्षोपलैः पुरोवातप्रेरितैरिव दन्तिनः ॥१७५३॥
स रोद्धा प्रतियोधानां पापैः क्षिप्राद्रिभिः खड्गैः । क्षताङ्गो भग्नचापश्च विरेण विमुखीकृतः ॥१७५४॥
तस्मिन्प्रचलिते मार्गैः प्रविश्योद्यानवैर्भटाः । ते च भिक्षाचरादीनां सर्वे गोचरमाययुः ॥१७५५॥ 1755
भिक्षोरेकं क्षणालक्ष्यधैर्य पार्श्वभुतायुधम् । अधावत्तूर्णमादाय शूलमेको बृहद्भटः ॥१७५६॥

१७२९ [1]) A, omits here two *aksharas* without indicating the *lacuna*, C देङ्गपालगृहादस्माद्दारम्भः, perhaps read °गृहाऽर्थादारम्भ १७३०. [1]) Thus A, C स समगृह्णत. १७३६ [1]) Emended with C, A राजोपजी°. १७३७ [1]) Emended. A तेषां सन्यव° —[1]) A, writes here ३ instead of तिलकम. १७४२. [1]) Emended with C, A दीप्यन्त. १७४९ [1]) चर्यां supplied by A, in space left by A,. [1]) Emended; A न्यभा°

तस्य प्रहरतः शूलं भिक्षुराभिक्तवत्सलः । क्षिप्त्वापहस्तेनावेगात्स्केशाञ्जग्राह धावितः ॥१७५७॥
प्रजहार कृपाण्या च निर्यत्माणे पतिष्यति । तस्मिन्नाहरतां भूयस्तौ कुमारियरक्किकौ ॥१७५८॥
निर्घिभागैर्हते तस्मिन्विविधायुधवाहिभिः । विरोधियोधैः संनद्धैस्त्रयो युयुधिरेथ ते ॥१७५९॥
अजायन्त विचित्राश्च शस्त्रसंत्रासिताहिताः । कोटराजगरापास्तसरघौघा इव द्रुमाः ॥१७६०॥
अशक्नुवन्तस्तान्हन्तुं खड्गशूलादिभिर्द्विषः । अपसृत्य शरासारैस्ततो दूरादवाकिरन् ॥१७६१॥
भिक्षाचरमृगेन्द्रस्य भञ्जतः शरपञ्जरान् । ततो हर्म्यात्खशैर्मुक्ताः पुष्टाः पाषाणवृष्टयः ॥१७६२॥
धावतस्तस्य घोराद्रिमवृष्टिकुट्टितवर्ष्मणः । निममज्ज यकृत्पिण्डं भञ्जन्पार्श्वे शिलीमुखः ॥१७६३॥
क्रान्त्वा त्रीणि पदान्याशु स पपात दिशन्क्षितेः । ततश्चिरप्ररूढं तं कर्म्म विघ्नितां हरन् ॥१७६४॥
कुमारियोपि बाणेन विद्धवक्षुण्णवर्त्मना । व्रणितोप्यपतद्भूमेः पादोपान्तेपजीवितः ॥१७६५॥
रक्किकस्तु शरेणैव विद्धो मर्मणि विह्वलः । सजीवितोपि निर्जीव इव भूमावुपाविशत् ॥१७६६॥
महाकुलीनैः सहितो हतो भिक्षुरशोभत । वज्रावभुग्नः शिखरी पुष्पितैरिव पादपैः ॥१७६७॥
इयतो राजचक्रस्य मध्ये हर्षनृपात्मनः । नावमानस्य मानस्य त्वभूद्विक्षोः परं पदम् ॥१७६८॥
विधाता नित्यविधुरस्तेनान्तेप्यभिमानितः । अकुण्ठेन भृयं चक्रे गृहीतात्मपराजयः ॥१७६९॥
को वराको महर्द्धीनां सोमे पूर्वमहीभृताम् । उदास्तेनान्तकृत्येन ते त्वस्यामे न किंचन ॥१७७०॥
अहोपुरुषिकामर्षैरारोहद्भिर्द्विषद्भटैः । तदवस्थस्तरार्तोपि शय्यायुद्ध कुमारियः ॥१७७१॥
स्फुरन्योद्धव्यमित्येव स प्रहारावशस्तथा । विज्ञाततत्त्वैररिभिर्वितस्य बहुशो हतः ॥१७७२॥
द्विषन्नेस्मिन्हतं मूढाः प्रहारैरिति निन्दिताः । खड्गैः पुनर्बहुशो हते भिक्षौ द्विषद्भटाः ॥१७७३॥
अविधेयायुधस्त्रीव्रणवेदनयाधमैः । कैश्चिन्निर्जीवितप्रायो रक्किकः शस्त्रिभिर्हतः ॥१७७४॥
वयसस्त्रिशतिं वर्षाण्यष्ट मासांश्च भुक्तवान् । स षष्ठाब्दासितज्यैर्त्रयोदश्या नृपतिर्हतः ॥१७७५॥
निदानं विग्रहे दीर्घं सर्वनाशेपि कारणम् । येषा बभूव तेप्येवं तुष्टुवुः सत्त्वविस्मिताः ॥१७७६॥
नेत्रस्पन्दं भ्रुवोः कम्पं स्मेरास्यत्वं च नामुचन् । सजीवमिव तन्मुण्डं कियतीरपि नालिकाः ॥१७७७॥
एकं द्योमन्यविशच्चित्रभानुं भूमौ पुनः परम् । तद्देहमप्सरःसङ्गं धरान्वुं च विदज्जडम् ॥१७७८॥
सचिवा विजयक्षेत्रस्थितस्याथे महीपतेः । तेषां त्रयाणां मुण्डानि ततोन्येयुरुपाहरन् ॥१७७९॥
श्रीसुधारत्नदन्त्यब्धशशाङ्कादिप्रकाशने । दृष्ट्वा चित्रत्वभावेधिर्यथायं पार्थिवस्तथा ॥१७८०॥
तत्र तत्राद्भुतं भावं दर्शयन्भुवनाद्भुतम् । परिच्छेत्तानुभावत्वं न केषामपि गच्छति ॥१७८१॥युग्मम्॥
नाकृत्यज्ञिहतोसाध्यः पितुर्मे योप्यभूदिति । न जहर्ष त्रिनष्टोयं राजकण्टक इत्यपि ॥१७८२॥
नाकुप्यन्मत्पितुर्मुण्डमेष भ्रमितवानिति । वीक्ष्य भिक्षोः शिरोव्याजभावौदार्यस्त्वचिन्तयत् ॥१७८३॥ युग्मम्॥
आकारस्यास्य संभाव्यं सत्त्वं न द्वेषनैकृतम् । वैशद्यं स्फटिकस्येव नार्कालोकोपतप्तता ॥१७८४॥

१७५८ [1]) Emended, A ग्रह° १७६५ [2]) Emended, A पादोपान्तो. १७६६. [1]) Emended with C, A भक्तिकस्तु. १६६८. [1]) Thus A; C °त्मज्ञ —[2]) Perhaps read °ङ्गिषु १७७०. [1]) Thus A, R C °नान्तकृत्येन १७७१ [1]) Emended with C, A क्वेव°. १७७६ [1]) Emended, A सत्त्वविस्मित. १७७८. [1]) Emended, A धरा°. १७८१ [1]) A, २. १७८३. [1]) Emended, A, had first written नाकुप्यत्स्म पितु° and subsequently corrected this to नाकुप्यत्सत्पितु°.—[2]) Emended, A, °भावौ — — त्स्वचि°, writing in margin भावाशय, R G C °भावाशयस्त्व°. Cf. भव्यामौदार्यसत्त्वस्य in 308 —[1]) A, २. १७८४. [1]) Emended, A °तप्तताम.

उत्कर्षात्प्रभृति व्यक्तममुं यावन्मदीभुजम् । हा धिक्त्वमृत्युना दृष्टं नेह देहविसर्जनम् ॥१७८५॥ 1785
प्रसादचिह्ना येष्यासन्पूर्वमस्योर्वराभुजः । तटस्था इव वीक्षन्ते तेन मुण्डावशेषताम् ॥१७८६॥
इति क्षितीशोसामान्यमौजन्योन्तर्विचारयन् । आदिदेश रिपोः शीघ्रं नादृशस्यान्तसत्क्रियाम् ॥१७८७॥
निद्राच्छेदे च निशि चं ध्यायंस्तस्योदयार्थ्यौ । भवस्वभावचैचित्र्यं मुहुर्मुहुरचिन्तयत् ॥१७८८॥
अपि वर्षसहस्रेण देशे दायाददुःस्थितिः । नूनं न भविता भूय इति लोकोप्यमन्यत ॥१७८९॥
दग्ध्वा तृणं ननु घनं प्रतनोति शश्वं वृष्टिं सृजत्युपचितोष्म दिनं प्रदर्श्य ।
वैचित्र्यसंसृष्टि विधेर्नियमेन कृत्ये न प्रत्ययः क्वचन चञ्चलनिश्चयस्य ॥१७९०॥ 1790
कृत्य निर्वर्त्य विश्रान्त्यै धीरस्याबधतो मनः । विधिर्विधत्ते दीर्घान्यकार्यभारसमर्पणम् ॥१७९१ ॥
आरोढुं प्रथमस्य दीर्घदमनप्रत्तक्रमस्याङ्घ्रिणा नो संत्यज्यत एव पादकटको यावद्विसीयोखिलः ।
वाहस्यासनरक्षिणः कलयतो भारावतारात्सुखान्यारोहेण परेण तावदसहाधिष्ठीयते पृष्ठभूः ॥१७९२॥
एवमेव क्षपामात्रं राज्ये निःशत्रुतां गते । शोकमूको नृपस्याभं प्राविशल्लेखहारकः ॥१७९३॥
पृष्टः सभ्यैः स संभ्रान्तैर्यस्मिन्नेवाह्नि भूपतेः । यातो भिक्षाचरः शान्तिमरातिर्दत्तदुःस्थितिः ॥१७९४॥
भ्रातरौ लोहदृगिरौ बद्धौ हैमातुरौ पुरा । न्यस्तौ सुस्सलभूपेन यौ तौ सल्हणलोढनौ ॥१७९५॥ 1795
ज्येष्ठे मृते कोट्टभूत्यैः कनिष्ठं लोठनं हठात् । तमिहाथ त्रियामायामभिषिक्तमभायत ॥१७९६॥
सुतभ्रातृक्षुतैर्दृप्तै राज्यार्हैः सह पञ्चभिः । निर्यातं बन्धनादूचे कोशेषु स तमीश्वरम् ॥१७९७॥
दूयेन मुखेदाक्रन्दन्त्यसारितभुजः पतेत् । स्वप्याद्विसृजो निःस्पन्ददृक्कं गच्छेदय ध्रुवम् ॥१७९८॥
दीर्घदीःस्थशमक्षिप्रमृदुकृतमना नृपः । अली तत्कालनिपतद्वर्वातीवक्वचूर्णितः ॥१७९९॥
इति संभाव्य विक्षप्तैरपि साकूतमीक्षितः । नाकारान्नारचेष्टाभिः प्रागवस्थां जहौ नृपः ॥१८००॥ 1800
न ह्यनन्याभिभूतेन सर्वतोसव्यवर्तिना । तादृशा वैशसेनान्यः सृष्टपूर्वो हि भूपतिः ॥१८०१॥
पित्र्यमथ यद्बलान्नष्टं राज्यं भूयः प्रसाधितम् । अनेनापि हतारातिं विहितं पैतृकं पदम् ॥१८०२॥
हारितैर्व दुर्गकोशौ तौ नष्टनामापि दारकः । दायादशेषो यत्रैको निर्धनो वीतबान्धवः ॥१८०३॥
धनमानान्तकक्रूरैरित्यर्थान्व्यसनमादधे । उपप्लवप्रिये देशे तत्रैकस्मिन्हतेहिते ॥१८०४॥
मित्रदुर्गार्थसंपन्नाः प्रोद्भूताः षड्रिरोधिनः । मित्रप्रकृतिकं कोशभून्यमेतच्च मण्डलम् ॥१८०५॥ 1805
तादृङ्निकषनिस्तीर्णमाहात्म्यस्य महीपतेः । धैर्येण स्पर्धितुं जाने राघवोपि सलाघवः ॥१८०६॥
प्राक्पोषितं हि साम्राज्यदाने निर्वासने च तम् । तुल्यानुभावमस्मार्षीत्सैतैवं गणयन्गुणान् ॥१८०७॥
आहूतस्याभिषेकाय विसृष्टस्य वनाय वा । न मया लक्षितस्तस्य स्वल्पोप्याकारविप्लवः ॥१८०८॥
कान्तेषु काननान्तेषु सकान्तं सानुजं च तम् । भूयः श्रियं प्रतिश्रुत्य स्थातुं सावधि सोभ्यधात् ॥१८०९॥
एकक्षणानुभूतेस्मिन्संघट्टे सुखदुःखयोः । ईदृक्तत्तादृशभेदादनयोरन्तरं महत् ॥१८१०॥ 1810
नियतं निरुपादानां शक्तिं दर्शयितुं जने । नानोपकरणग्रामं संनद्धोस्याच्छिनद्विधिः ॥१८११॥

१७८८ [1]) च omitted in A, supplemented with C —[2]) Emended with C, A °वान्ययौ. १७९०. [1]) Thus corr. by A, from °स्तोष्म स्थिर १७९२. [1]) Emended, A दीर्घमदन° १७९५. [1]) Emended, A सुल्हण°. १८०३ [1]) A °कोषौ. १८०५ [1]) Emended, A °मेत च.

भव्यद्युतानि कृत्यानि वक्ष्यमाणानि भूपतेः । कोमुख्य बहु मन्येत सामर्थ्ये सति संपदाम् ॥१८१२॥
धैर्याब्धिना कार्यशेषं ज्ञातुं राज्ञा सविस्तरम् । पृष्टोथ कोट्टंवृत्तान्तमाचख्यौ लेखहारकः ॥१८१३॥
उत्सृज्य भार्गिकं कोट्टं प्रयाते मण्डलेश्वरः । तुमोद्योगोभवद्भूमौ प्रेमा संपत्समत्तधीः ॥१८१४॥
1815 मण्डनाभ्यवहारस्त्रीभोगैकाग्रो मदोन्मदः । स वृत्त्या भृत्यवैमुख्याधाक्ष्याभव्यं व्यवाहरत् ॥१८१५॥
कुल्यानुकम्पिना दृष्टचुत्पाटनादेः स वारितः । देवेन नादाद्वद्धानां कांचिद्भिक्षाक्षमां क्रियाम् ॥१८१६॥
मायाव्युदयनो नाम कायस्थः स्थूलबाडितः । मात्रिकश्च प्रतीहारो बद्धमूलस्य मन्त्रिणः ॥१८१७॥
पुत्रो भीमाकरस्येन्दाकरश्चान्तरे समम् । बुभुक्षवस्तत्र वर्धं प्रेम्णो व्यचिन्तयन् ॥१८१८॥
अलब्धो हन्तुमप्राप्यावसरैस्तैः कदाचन । कोट्टादट्टालिकां कार्यवशादवरुरोह सः ॥१८१९॥
1820 कृशर्मारिभ्यो नृपेणात्पावशेषप्राणवृत्तिना । त्रैषि शासनमेतादृगिति प्रत्ययसिद्धये ॥१८२०॥
कोट्टोकसामशेषाणां गूढलेखान्विधाय ते । निबद्धसंविदः पूर्वगभिषेक्ष्यस्य भार्यया ॥१८२१॥
दृष्ट्वा दुर्गाद्विनिर्गत्य कृत्वा च निशि लोठनम् । सिंहराजस्वामिविष्णुप्रासादाग्रेभ्यवेषयन् ॥१८२२॥तिलकम् ॥
शारदाख्या वधूरेका कापि सुस्सलभूपतेः । तत्र स्थितापवत्क्षुद्रा तेषामनुमतप्रदा ॥१८२३॥
नदापैतैरयोयन्त्रभङ्गैरर्गलानि ते । कोशाद्विवार्य पर्याप्तं कोशरत्नादि जहिरे ॥१८२४॥
1825 सभृत्यैः सप्तभिस्तत्सहसं क्षुमहत्कृतम् । दानेन त्याजिता या सा चण्डालैः प्रतिकूलता ॥१८२५॥
भेरीतूर्यादिनिर्घोषैर्नागैर्द्राः कोट्टवासिनः । कृता राजोचिताकल्पमपश्यद्भय लोठनम् ॥१८२६॥
अदृष्टपूर्वताक्षोदात्तवेषः स विस्मयम् । निन्ये जनाद्भूपामात्ययोगो दीपैः प्रकाशितः ॥१८२७॥
प्रेम्णः पार्श्वस्थितस्ताभ्यामानयेहारकैन्तिकम् । ससैन्यो स्वभुवश्चर्मपासिकाख्यौ च उकुरौ ॥१८२८॥
नदास्थयाहितास्कन्दभङ्गक्लेशामशेषतः । रात्रिशेषश्च चन्द्रांशुस्पर्शपाण्डुरशीर्यत ॥१८२९॥
1830 प्रातः प्रेमाथ दुर्वार्ताश्रवणेनोष्णदारुणः । सैताप्यमानश्चोष्णांशुकरै रोदुमुपायथौ ॥१८३०॥
तं प्रतोलीतलप्राप्तं निर्यातैर्वैरिसेनिकैः । पराङ्मुखीकृतं वीक्ष्य चलितोस्म्यन्तिकं प्रभोः ॥१८३१॥
भुन्वेति भूभृत्त्वरया लुलुं लोहरमन्विणम् । विससर्जोदयद्वारपतिमानन्दवर्धनम् ॥१८३२॥
भूमिज्ञौ तौ हि कोट्टस्य विदेदानन्यदेशजौ । सोल्पात्पत्वादिरन्ध्राणां लक्षणाद्ग्रहणक्षमौ ॥१८३३॥
प्रविष्टश्च पुरं दृष्ट्वा प्रीतिदायार्थिभिः शिरः । भ्राम्यमाणं भटैर्भिक्षोराक्षिप्यैतानदाहयत् ॥१८३४॥
1835 राजादेशादसंरुद्धैः स्त्रीभूयिष्ठैरसौ जनैः । नग्ना पैतामहं देशं दह्यमानोन्वशोच्यत ॥१८३५॥
काले भीष्मोदयाद्रिक्तभानौ सुविषमे नृपः । सिद्धिमभ्रहधानोपि प्रहिणोति स्म रिल्हणम् ॥१८३६॥
स शौर्यस्वाभिभक्त्यर्थनैस्पृह्यादिगुणोज्ज्वलः । तेन साभोपचारम्भः समभाजि जिगीषुणा ॥१८३७॥
भवितव्यतया दत्तव्यामोहः प्रेरितोथ वा । शाडामात्यैरभूद्भूभृत्स व्यक्तायुक्तमन्त्रितः ॥१८३८॥
हीनोर्थदुर्गामात्यैर्यत्रिर्वैकृत्यस्य वैरिणः । अनुमेने कृतारब्धान्भृत्यान्भीष्मोल्वणे क्षणे ॥१८३९॥
1840 उदयः कल्पनाधीशो राज्ञोथे पर्याशिष्यत । सर्वामात्याः प्रतीहारमन्वगच्छन्पुनः परे ॥१८४०॥

१८१३ 1) A कोट्ट° १८१५ 1) Emended with C, A दृष्ट्युपात्पट° -2) Emended with C, A देवनावाद्ध° with haplography १८१८ 1) Emended, A °चिन्तयत १८२२ 1) Emended, A °चयत् —2) A, B १८२५ 1) Emendation doubtful, A °सायामा १८३७. 1) Emended with C; A चौर्य°

राजात्मजहयारोहडामरामात्यमिश्रया । दैर्घ्ये तत्सेनयावापि सर्वसामप्युदग्रया ॥१८४१॥
सविष्टपव्यङ्गुलिकानिर्विष्टकटको दिशः । संग्रहीतुं प्रवृत्ते सर्वोपायैरिरोधिनः ॥१८४२॥
लुब्धाश्रयः फुल्लपुरं कोट्टोपान्ताश्रये स्थिताः । भयभेदाहवव्यग्रान्यकस्मात्मनयन्निपून् ॥१८४३॥
सुस्सलक्ष्मापतिर्बद्धं लोठनं तन्नुतामदात् । यस्मै प्राक्पद्मलेखाख्या बहुस्थलधराभुजे ॥१८४४॥
साहायकाय प्राप्तस्य तस्य सैन्यैर्द्विषद्गमूः । शूराभिधस्य युद्धेषु प्रत्यग्राहि प्रतिक्षणम् ॥१८४५॥ 1845
तेषूपरुद्धराष्ट्रेषु भयदोलायमानधीः । अङ्गीचक्रे नरपतेर्नतिं दण्डं च लोठनः ॥१८४६॥
एतावत्सिद्धमफलारब्धीनामत्र दुःसहे । काले व्यावृत्तिरस्माकमुचितासिन्नलापवा[1] ॥१८४७॥
शारदारम्भसुभगे क्रमात्काले बलोर्जिताः । अधारयंश्च विधास्यामः सर्वारम्भेण शोभनाम् ॥१८४८॥
इत्यन्यहं लक्ष्मकेण प्रहितं नादधे नृपः । अन्ये च मन्त्रिणो मन्त्रं शाद्यादन्यर्णवार्तिनः ॥१८४९॥ तिलकम् ॥
सर्वाधिकार्युदयनः प्रतिभुत्य धनं बहु । साहायकार्थमानिन्ये सोमपालमपि प्रभोः ॥१८५०॥ 1850
अपाङ्क्तेयः स संबन्धबद्धेपि धनलुब्धधीः । द्रुह्यति स्म महाश्यापन्निमग्नाय महीभुजे ॥१८५१॥
बद्धार्थो लोठनश्चैत्कि मे संबन्ध्यपेक्षया । अन्यथा भवतामस्मीत्यन्यान्वक्ष्यामि कैतवात् ॥१८५२॥
इत्यभिसंधाय सोमपालोभ्युपायवौ । समर्थने हेतुरासीत्सुज्ज्येर्याजे कियानपि ॥१८५३॥ युग्मम् ॥
स हि भिक्षाचरोन्मुख्यान्निवार्यानायितो यदा । सोमपालमुखेनार्वाभुजा राजविसर्जितः ॥१८५४॥
हृतः प्रार्थयमानस्य तस्यार्थान्प्राक्प्रतिश्रुतान् । ऋणिकस्योत्तमर्णेभ्यः प्रदानमनुबध्नतः ॥१८५५॥ 1855
तदा भिक्षाचरं जानन्हतकल्पमनेन नः । व्यसनप्रशमे कोर्थ इत्यवज्ञा प्रकाशयन् ॥१८५६॥
मदेन न ददौ किंचित्सोथ भिक्षाचरं हतम् । श्रुत्वा निरुपयोगं स्वं राज्ञो ज्ञात्वा सशोकताम् ॥१८५७॥
यावदेकाहमभजल्लोहरव्यसने भयम् । तावच्चिरश्म्य संपाप्तोत्सेकी भूयोपि मन्युभाक् ॥१८५८॥
लोठनं बद्धसंधिं वः करिष्यामीति भूभुजः । उक्त्वा दूतं लोठनेन दापयिष्यामि काञ्चनम् ॥१८५९॥
युष्मभ्य कथयित्वेति सोमपालं भिक्षीर्षिनुम् । बलिताममबलस्य च सर्वेषां स्वार्थसिद्धये ॥१८६०॥ 1860
समं सोमेन तत्सैन्यमध्येप्रस्थित्यलक्षितैः । मित्रैरनुगतो भृत्यैर्घोरमूलकमाससाद ॥१८६१॥कुलकम् ॥
यद्वानीचित्यदुष्पांसुवर्षदूषितकीर्तिना । भोगलुब्धतया तेन हता वित्तसत्त्वता ॥१८६२॥
तुषारशर्कराशुक्लजलपानाददुर्नरम् । त्यक्तुं भोज्यं मृदु स्निग्धं काश्मीरं न शशाक सः ॥१८६३॥
सतुषं शुष्कसत्कादि बन्धिभोक्तुमपारयन् । यैस्तैरुपायैः काश्मीरान्यविक्षुरनोभवत् ॥१८६४॥
काश्मीरकाः कार्यशेषमदृष्ट्वा भीष्मशोचिताः । आकर्ण्य च तदापातमाकुलत्वमशिश्रियन् ॥१८६५॥ 1865
भुञ्जानैर्भृष्टमांसानि पिबद्भिः पुष्पगन्धि च । पर्वताहारायतो हारि माईकि लघु शीतलम् ॥१८६६॥
आनेष्यामो जवान्मुञ्जिमाकृष्य इमभु संयुगे । इत्थं विकत्थनैस्तैस्तैराहोपुरुषिकाः कृताः ॥१८६७॥
काश्मीरकैर्मितैर्युक्तं खदोः सैन्धवकैरपि । अभिषेणयितुं शक्तं नैत्युद्यमिनोपि तम् ॥१८६८॥
भ्रातृव्याय च मुख्याय भूभुजां च करार्पणम् । विदध्यां जयसिंहाय वरमित्यभिमानिनम् ॥१८६९॥

१८४१. [1]) Emended with C, A सर्वे १८४२ [1]) Emended, A सर्वोपायावि° १८४४ [1]) Emended, A °बद्धो १८४७. [1]) Emended; A °लापवा, C °लापवा. १८४९ [1]) Emended, A प्रत्य° —[2]) A, 3 १८५२ [1]) Emended with C, A °स्मीत्यान्व°, with haplography १८५३ [1]) A, 2 १८५५ [1]) Emended, A °मान्स्यार्थान्प्रा, omitting two *aksharas*, C °मानस्व तानर्थान्प्र° १८६१ [1]) Emended, A °मन्थप्र° १८६५ [1]) Emended A °शिश्रयन् १८६६ [1]) A पिबद्भि १८६८ [1]) Emended, A तेत्युद्य°.

1870 बद्धमर्थमर्थ्यमानेन लोष्टनेन तिरस्कृतः । सोमपालः प्रियं किंचिद्राजपक्षे न्यदर्शयत् ॥१८७०॥
मयि अभुरसैन्यानां व्यसनाणां वैरिविग्रहे । सज्जे हिताय त्वं रन्धमन्विष्यसि किमाभितः ॥१८७१॥
इति निर्भर्त्सितस्तेन सुज्ञिः स्वाहंकियोचितः । सर्वानुद्यम्य संनद्धो राजसैन्यमहेभवत् ॥१८७२॥
जरठाषाढसंजातशीतज्वरमहाभयः । वरूथिनीमथोत्थाप्य विदर्भो निशि लक्ष्मकः ॥१८७३॥
विसृष्टदूताः कटकं नष्टं वक्तुं प्रभोर्द्रुतम् । केचिदन्वसरन्सुज्ञिं सैनिकास्ते जिघांसवः ॥१८७४॥
1875 पौरैकेन भूपालसैन्यमन्येन वैरिणः । वर्त्मनः अभद्रुर्गस्य तुल्यमेव प्रतस्थिरे ॥१८७५॥
शारम्बरपथं वैरिवृंदस्य त्यक्ता वियामवः । स्वोर्वी कालेनकाख्येन संकटेन तदन्तिके ॥१८७६॥
तस्मिन्नहन्यस्तवलिता वनिकावासनामनि । ग्रामे सैन्या न्यविक्षन्त लोकैरुद्भावनैः समम् ॥१८७७॥युग्मम्॥
अनुप्रस्थायिनोभ्यर्णग्रामकेष्वपि बुबुदुः । भुक्ता पीत्वाथ ते निन्युर्निशार्धमकुतोभयाः ॥१८७८॥
अथापातं विद्विषद्भिः स्वस्य भावयितुं द्रुतम् । क्षोभभृत्सुज्ञिरभ्येत्य तूर्यघोषमकारयत् ॥१८७९॥
1880 क्षणदाशेष एवाभु पलायां चक्रिरे ततः । तैस्तैः शैलपथैः सेना निरवष्टम्भनायकाः ॥१८८०॥
चित्राम्बराणि मुण्डद्भिः प्राङ्नेत्यन्यन्त मन्त्रिणः । भूपकर्षैर्गण्डशैला नानाधातुव्रजैरिव ॥१८८१॥
लुण्ठ्यमानाश्वमुस्त्रातुं नादधे कश्चिदायुधम् । तदा तु येन वा तेन स्वात्मा नान्यस्तु रक्षितः ॥१८८२॥
उत्प्लुत्य लङ्घयन्तोद्रीन्केपि शोणाधरांशुकाः । रक्तस्फिजो गतौ प्रापुर्मर्कटा इव पाटवम् ॥१८८३॥
केप्यम्बरपरित्यागविकचद्वीरविग्रहाः । हरितालशिलाखण्डा इव वातेरिता ययुः ॥१८८४॥
1885 शूलवेणुव्रजाकीर्णैः शैलैरुत्कृशविग्रहाः । केपि श्वासोत्पुत्कारारः करिपोता इवाव्रजन् ॥१८८५॥
किं नामोदीरणैर्मन्त्री स नासीत्तत्र कश्चन । निरश्वेर्वि विपर्यस्तवैर्यैर्वैर्न पलायितम् ॥१८८६॥
भृत्यस्कन्धाधिरूढोथ गच्छन्मूढः प्रधावितुम् । प्रतीहारो द्विषद्योधैर्दुराकैश्चिच्चयलोकयत ॥१८८७॥
निरंशुकः स सूर्यांशुकचत्केयूरकुण्डल. । प्रतिज्ञायानुमस्ते नैः सर्वप्राणप्रधावितैः ॥१८८८॥
अश्मास्त्रेण भृत्येन त्यक्तः स्कन्धाद्पतत्क्षतः । स निस्पन्दवपुस्तिष्ठन्सैन्यैराहि महाजवैः ॥१८८९॥
1890 नवबन्धनशोकार्तशारिकाकृशविग्रहः । स ल्गलिरिव व्यञ्जद्विषः संकुचितेक्षणः ॥१८९०॥
बद्धस्य मे मानधनप्रहर्तुर्वैशसान्तरम् । इतोधिकं ध्रुवं सुज्ञिर्विदध्यादिति चिन्तयन् ॥१८९१॥
स्कन्धेधिरोप्य निःशेषीकृतप्राचारभूषणः । नद्यद्भिः सोपहासं तैः सुज्ञेरयं व्यनीयत ॥१८९२॥ तिलकम्॥
प्रच्छाद्य सत्त्ववान्वक्रं सौंशुकेनैष नोर्वितः । बुबुद्राज इवेत्युक्ता तस्मै स्वान्यंशुकान्यदात् ॥१८९३॥
प्रावारिताम्बरं कृत्वा हयारूढं च तं पुनः । वैरेणायोजयल्लिखैर्वैरचोभिः परिसान्त्वयन् ॥१८९४॥
1895 निर्लुञ्चितनृगंगामिकोशैः परिवृतः खरैः । ततो गृहीत्वा तं श्रीमान्सोमपालान्तिकं ययौ ॥१८९५॥
इमा श्यामाङ्गनाकीर्णा उत्तुङ्गललितभ्रमाः । भाग्यमेघानुयायिन्यः स्थायिन्यः कस्य संपदः ॥१८९६॥
आराधनधिया स्वैरं यस्यायेभोनि भृत्यवत् । गात्राणि कुङ्कुमालेपैरुपाचर्यन्त च स्वयम् ॥१८९७॥

१८७३ [1]) Emended, A जत्रा[2]. १८७६ [1]) नका written by A_1 in space left by A_1 १८७७. [1]) Emended, A न्यविदेश्यन्त — [2]) A, 2 १८८१. [1]) Emended with C, A नानाधातुं° १८८२ [1]) Conjectural reading, A स्वत्मनान्यस्तु १८८५. [1]) Emended, A निरश्वैर्यं १८८७ [1]) A °स्कन्धा° — [2]) Thus corr by A_1 from प्रधायितुम १८९० [1]) A °कुपायि° — [2]) Thus A without indicating the *lacuna*, perhaps read गल्गलिरिव — [3]) Thus A_1, apparently corr. from व्यञ्जन्निषः; doubtful. १८९२ [1]) A_1, 3. १८९७ [1]) Emended with C, A °रुपचर्यन्त.

सोमपालादिभिः प्रद्वैः स मासैरेव पञ्चभिः । तेषामभवे तथाभूत्तिष्ठंल्लोकैर्व्यभाव्यत ॥१८९८॥
लुब्धोपि पलितश्चेतोपान्तदूयामाननः परैः । वनौका इव बद्धोभूच्छोकमुको वनान्तरे ॥१८९९॥
अर्पितं सुज्ञिना सोमपालः स्वीकृत्य लक्ष्मकम् । जानन्गृहीतान्कइमीरान्निजराष्ट्रं न्यवर्तत ॥१९००॥ 1900
लोठनस्यान्तिकादेत्य स भूरैर्मात्रिकादिभिः । प्रतिभुत्य प्रभूतार्थैः प्रतीहारमयाच्यत ॥१९०१॥
कइमीरा हि प्रतीहारशिक्षापक्षानुयायिभिः । तदा न कैरमन्यन्त सैषाप्या डामराण्डजैः ॥१९०२॥
लुब्धेनापि प्रतीहारायत्तं राष्ट्रं जिघृक्षुणा । भूरि चादित्सुना वित्तं राज्ञोकारि न तेन तत् ॥१९०३॥
भ्रममानेष्वमात्येषु प्राग्रेषु नगरं नृपः । हारिते च प्रतीहारे न धैर्यान्पर्यहीयत ॥१९०४॥
यैः सैन्यसारैर्हैराज्यं पुरा भिक्षाचरोकरोत् । यैश्चायुत्कुपिते राष्ट्रे वृत्त्यावार्तिष्ट सुस्सलः ॥१९०५॥ 1905
भूभृता संगृहीतानां शीतज्वररुजा ततः । तेषां दश सहस्राणि योधानां निधनं ययुः ॥१९०६॥
विरराम तदा देशे न मुहूर्तमपि क्वचित् । बान्धवाक्रन्दतुमुल प्रेतवाद्यमहर्निशम् ॥१९०७॥
घोरधर्मघृणिश्रान्तादोषव्यवहतिस्थितिः । सैनुस्साहहतः कालो नष्टराज्य इवाभवत् ॥१९०८॥
नानादिगन्तरायातैः प्राप्तैः कइमीरकैरपि । लोहरेथ प्रवृद्धर्द्धि राजद्वारमजायत ॥१९०९॥
काकतालीयसंप्राप्तलोकोत्तरनृपश्रियः । अकुण्ठा लोठनस्यासीत्स्फूर्तिर्वित्तप्रतेरिव ॥१९१०॥ 1910
तस्याकारपरिक्लेशवैशसाभिज्ञवृत्तयः । भोगेष्वबाधा भ्रातृव्यभृत्यपुत्रादयोभवन् ॥१९११॥
नास्थानवर्षी स्थाने वा बद्धमुष्टिर्विभूतिमान् । स वयःपाकनिष्कर्मव्यवहारो व्यभाव्यत ॥१९१२॥
छाया निरङ्कुशयतिः स्वयमातपस्तु छायान्वितः शतश एव निजप्रसङ्गम् ।
दुःखं सुखेन पृथगेवमनन्तदुःखपीडानुबेधविधुरा तु सुखस्य वृत्तिः ॥१९१३॥
तादृग्भ्युदयावाप्तिप्रमोसे न्यूनेधिके गते । एकसूनोः सुतो दित्सौ लोठनस्य व्यपद्यत ॥१९१४॥
तमेकपुत्रा शोचन्ती शोकशङ्कुहताशया । ततः प्रपेदे पलयं मल्ला लोठनवल्लभा ॥१९१५॥ 1915
पत्न्यामभिन्नभावायां गुणज्येष्ठे तथात्मजे । विपन्ने स तया लक्ष्म्या न कृत्यं किंचिदैक्षत ॥१९१६॥
निःस्नेहत्वस्य भूपालसुलभस्य विजृम्भितम् । मोहनी वा श्रियः शक्तिर्यदज्ञासीत्पुनः सुखम् ॥१९१७॥
अकारयच्चिर्धनोपि तथा वृद्धस्य कालवित् । लक्षैः षट्त्रिंशता मोक्षं लक्ष्मकस्य क्षमापतिः ॥१९१८॥
दिष्टवृद्धिपरिक्षिप्तपुष्पवृष्टौ जनैः पथि । तस्मिन्नग्रे न कोज्ञासीद्राज्ञा प्रत्याहतां श्रियम् ॥१९१९॥
स लक्ष्मीमहिमक्षिप्तविस्मृताभिभवश्रमः । प्रभवन्पुनरेवासीन्नियहानुग्रहक्षमः ॥१९२०॥ 1920
धनपलोभनिर्नष्टसर्वावष्टम्भपाटवः । सुज्ञिः साचिव्यमत्याजं भेजे लोठनभूपतेः ॥१९२१॥
दत्तवान्भागिकसुतामविश्वासमपाहरत् । स तस्याप्रियापायदुःस्थितिन्यथया समम् ॥१९२२॥
अभ्यर्थ्य पार्थिवं पद्मरथं चानीतवान्कृती । तस्य सोमलदेव्याख्यामुद्वाहाय तदात्मजाम् ॥१९२३॥
एवं प्रधानसंबन्धैर्बद्धमूलं विधाय तम् । सोव्याहतस्य साचिव्यग्रहस्यानृण्यमाययौ ॥१९२४॥
अचिन्तयच्च कइमीरप्रवेशं डामरादिभिः । वद्वशः प्रार्थ्यमानेन प्रेरितो नवभूभुजा ॥१९२५॥ 1925
इत्थंभूतं कृतैक्यं च समं सीमान्तभूमिपैः । अथ छलयितुं शत्रुं नीतिं प्रायुङ्क सौस्सलिः ॥१९२६॥

१९०३. [1]) Emended, A लब्धेन १९२१. [2]) व omitted in A, supplied with C.

तत्रोदयद्वारपतिस्तस्यारम्भे गभीरधीः । अलुप्तसत्त्वः स्तुत्यत्वं सारेतरविदामगात् ॥१९२७॥
तत्रत्यः स हि निर्नष्टसर्वस्वोच्चार्यतोहितैः । दानमानादिभिः स्वामिकृत्ये निस्योदितोऽभवत् ॥१९२८॥
वनप्रस्थाभिधे स्थाने लोहादूरगे स्थितः । अखिन्नोच्छिन्नसंग्रामैर्भेदं निन्ये द्विषद्बलम् ॥१९२९॥
कटाक्षितोभिप्रायेस्मिन्मिथ्या तथ्येन वा बधुः । भयं लोठनभूपालान्मात्रिकेन्दारकादयः ॥१९३०॥
हन्तव्यांश्चाक्रिकानस्मान्मुञ्जौ न्यस्ताशयो नृपः । वेत्ति तत्प्रेरणेनासौ तदाशाङ्किषनेति ते ॥१९३१॥
संजाते सहजाख्यायां राज्यां सुस्सलभूपतेः । कुर्मो मल्लार्जुनं भूपं लोहरेस्मिन्हिताय वः ॥१९३२॥
तत्प्रेषमाणमित्याकस्मादभिसंधत्तं लोठनम् । संदिदेशाथ तान्धीमाञ्जयसिंहो महीपतिः ॥१९३३॥
व्याजेन राज्ञा संदिष्टं तत्कोष्ठं स्वीचिकीर्षुणा । प्रतिभुतमविश्वस्तैस्तस्मिंस्तैश्च तथैव तत् ॥१९३४॥
मल्लार्जुनं लोठनोथ ज्ञात्वा प्रारब्धचाक्रिकम् । तदाद्यान्भ्रातृसूनूल्लाश्चाक्रिकानप्यबन्धयत् ॥१९३५॥
अवरुद्धातनूजेन शङ्कां सौस्सलिना भजन् । परं विग्रहराजेन प्रातिहार्यमजिग्रहत् ॥१९३६॥
राज्ञा व्याजाप्तितृष्येण बद्धसंधिरुपायवित् । तत्वरे हारितं राज्यं तैस्तैः स्वीकर्तुमुद्यमैः ॥१९३७॥
विसृज्य शूरं निष्कम्पराज्यः सुज्जैः परिभ्रमात् । मासान्कांश्चिदसंक्षोभो वृत्त्यावार्तिष्ट लोठनः ॥१९३८॥
सुज्जिः पदात्थापत्यं प्राक्तन्यामानिनाय याम् । भनुट्ठाया विवाहाय तस्यां मातरमागताम् ॥१९३९॥
आवार्य्य तेजलादीनां[1] प्रसङ्गेस्मिन्सगौरवाम् । सामान्यो[2] दार्वितपुरं कृतप्रत्युद्गता ययौ ॥१९४०॥
मात्रिकार्यैरथ प्राप्तरन्ध्रैर्निर्गत्य बन्धनात् । मल्लार्जुनः कोङ्कणराज्ये संहतैरभ्यषिच्यत ॥१९४१॥
उत्कुरैः प्राग्वदानीतैः प्रनोलीतलमागतान् । भृत्यांस्ते सिंहभूभर्तुः प्रविविक्षुरुपद्वारयन् ॥१९४२॥
षष्ठेह्नि लोठनः भुक्त्वयोदश्यां स फाल्गुने[3] । यथायुज्यत राज्येन तथैवाभु व्यायुज्यत ॥१९४३॥
अनुढां कन्यकां मूढः संपदं चाव्ययीकृताम् । प्राप्तां परस्य भोग्यत्वं भाग्यहीनः शुशोच सः ॥१९४४॥
अटित्वाद्वालिकादिभ्यो देशेभ्यो नष्टशक्तिना । तेन सुज्जिबलास्कोशशेषः कश्चिदवाप्यत ॥१९४५॥
पूर्वाहूतान्सिंहभूभुङ्नृत्याद्यकृत्य मात्रिकः । निनायाप्रतिमल्लत्वं मल्लार्जुनमहीभुजम् ॥१९४६॥
तेनानिर्व्ययिना नष्टवयसा भूभुजा कृतम् । मौक्तिकैः पूगविच्छेदे ताम्बूलार्पणमेकदा ॥१९४७॥
वर्षतो विषयैत्सुक्याद्घाटके कुट्टनादिषु । त्यागित्वं तस्य तत्त्वज्ञैः सदोषमुदघोष्यत ॥१९४८॥
प्रजोपतापोपचितः कोशः सुस्सलभूपतेः । तेनानिर्व्ययिना स्वैरमनुरूपव्ययः कृतः ॥१९४९॥
गणिकाचारणद्रोग्धृविटचेटादिपेटकम् । साधून्विधूय सोपुण्याङ्कपोर्ण्णः कुर्मनिर्यतः ॥१९५०॥
सपत्नसादहितसाधदि वा वह्निसाद्भवेत् । द्रविणं क्षोणिपालानां जनतोपद्रवार्जितम् ॥१९५१॥
प्रजापीडनजं वित्तं जयापीडमहीभुजः । दास्याः पुत्रैरुत्पलाद्यैर्वितुन्नं नमुरन्तकैः ॥१९५२॥
लोकसंक्रेशनोद्भूतः कोशः शंकरवर्मणः । प्रभाकरादिभिः स्वैरं जायाजारैरभुज्यत ॥१९५३॥

१९२८ [1]) Thus A; perhaps read निस्योदितो° ९९३०. [1]) Thus corr by A_1 from °केन्नाकादय Perhaps read °केन्नाकरा°, cf. vm. 1818 १९३३. [1]) Emended with C, A °सन्धात्त. १९३६ [1]) Emended, A भवरुद्वतनू. १९३९ [1]) Emended with C, A तस्य. १९४०. [1]) Thus A, doubtful.—[2]) Doubtful emendation, A सामान्यो. १९४१ [1]) Emended, A °कोङ्कराधेव. १९४२. [1]) Emended A °चारयत् १९४३. [1]) A फाल्गुणे १९४५ [1]) Thus A_1, A_2 °त्वादिकिका°, cf vm 581 १९५०. [1]) Thus A_1 in margin, in text °ण्णाद्भवेण्ण .—[2]) Thus corr by A_1 from कूपनि° १९५२. [1]) Emended with C, A_1 नमुरन्तकै, the reading नमूनर्नकै, given by A_1 in margin, has been struck out

अनङ्गवशगाः पङ्क्तीरङ्गना वृजिनार्जितम् । ददुः सुगन्धादित्याय धनं संभोगभागिने ॥१९५४॥
राज्ञो यशस्करस्यार्थान्व्ययीचक्रेतिसंचितान् । अङ्गनानङ्गवैवश्यादालिङ्गितजनंगमा ॥१९५५॥ 1955
पूर्वराजार्जितं पार्वगुप्तिः प्राप्य धनं मृतः । हाता जायौपपत्येन तुङ्गादीनामजायत ॥१९५६॥
संग्रामराजः श्रीलेखामुखाब्जमधुपैर्धनी । मुषितो व्यङ्गसूद्राद्यैर्निर्विडोपार्जनस्पृहः ॥१९५७॥
अप्रत्यवेक्षाक्षपितप्रजस्य जगदूर्जिता । अन्तेनन्तमहीभर्तुर्वैभूतिर्भस्मसादभूत् ॥१९५८॥
पुत्रेणापात्रसाच्चार्या जारसाच्चरसा कृतः । कुकलाकौशलोद्भूतः कोशः कलशभूपतेः ॥१९५९॥
सह गेहैः समं स्त्रीभिः सत्रा पुत्रैरभूद्धनम् । अश्रान्ताजैनतर्पस्य हर्षदेवस्य वह्निसात् ॥१९६०॥ 1960
चन्द्रापीडोचलावन्तिवर्माद्यैर्धर्मनिष्ठुरैः । निष्ठा न्याय्यस्य कोशस्य नावाप्यनुचिता क्वचित् ॥१९६१॥
चौरचाक्रिकसीमान्तभूक्षेदव्याविटादयः । तुण्डिं प्रारेभिरे पुष्टां नवे मल्लार्जुनोदये ॥१९६२॥
वञ्चयित्वाप्यरीन्भूभृत्साम्यन्विचटितेक्षितः । अथ चित्ररथं तूर्णमास्कन्दाय व्यसर्जयत् ॥१९६३॥'
द्वारपादाग्रयोस्तुल्याधीकारेण प्रवर्धितः । सोनन्तसामन्तयुतः पदं फुल्लपुरे व्यधात् ॥१९६४॥
उत्सेहिरे न वितता अपि दुर्गसमाश्रयात् । मल्लार्जुनचमूजन्ये जेतुं तदनुजीविनः ॥१९६५॥ 1965
भेदाय कोंढ्रमारूढस्तद्भृत्यो राजसंमतः । मल्लार्जुनानुगे रात्रौ हतः संवर्धनाभिधः ॥१९६६॥
युद्धासाध्येपि तिष्ठन्तः कोंढ्रे भयविषेयताम् । कोंष्ठिश्वरेन्द्रगायाते तत्रामित्राः प्रवेदिरे ॥१९६७॥
प्रतिभुतकरो बद्धसंधिः स व्यसृजत्ततः । सभाजनाय जननीं तेषां मल्लार्जुनोन्तिकम् ॥१९६८॥
सा वैधव्यविविक्तेन वेषेणैश्वर्यशोभिना । कोंष्ठिश्वरादीन्सोत्कण्ठांश्चक्रे चपलचेतसः ॥१९६९॥
तस्यां गृहीतविस्रम्भे व्यावृत्तायां तदन्तिकात् । हरेराय ददावूरीकृतं मल्लार्जुनः करम् ॥१९७०॥ 1970
आकृष्टो राजजननीचक्षूरागेण कोष्ठकः । दिदृक्षाकपटाल्कोढ्ढमारुरोह मितानुगः ॥१९७१॥
अवरूढेन सहितस्तेन चित्ररथस्ततः । संभूतप्राभृतो भूमिमर्तुः सविधमाययौ ॥१९७२॥
राजा तु संमन्त्र्य ततः प्रायुङ्क्तानतिशालिना । उदयद्वारपतिना नीतिं जेतुमरीन्पुनः ॥१९७३॥
वीतास्कन्दो लोठनेपि गते पद्मरथान्तिकम् । लेभेभिनवभूपालः किंचित्पादप्रसारिकाम् ॥१९७४॥
उद्भवान्सोमलाख्यां तां पद्मरथकन्यकाम् । उपयेमे धृतायामो नागपालात्मजामपि ॥१९७५॥ 1975
तस्मादहंक्रियामूढालेभिरे गूढकैतवाः । भूभुजः सोमपालाद्या भृत्यभावेन वेतनम् ॥१९७६॥
कविगायनजल्पाकयोधचारणचेष्टितैः । बहवो मुमुषुर्भूतास्तेपि तं राजबीजिनः ॥१९७७॥
स बाल्यान्निष्परीपाकपङ्को दृष्टो रटन्बहु । जज्ञे वाक्पौढिमात्रेण बालिशैः कुशलाशयः ॥१९७८॥
केतोरित्राभद्रहेतोः प्रदीप्तं वदनं विना । आनिष्ठुराकृतेर्दृष्टं तस्यान्यत्र न सौष्ठवम् ॥१९७९॥
अवान्तरे नृपः सुज्ञि संजग्राहोग्रविक्रमम् । माभून्मल्लार्जुनेनापि श्रितोसाविति चिन्तयन् ॥१९८०॥ 1980
निर्वासने प्रवेशे च प्रभुः सुज्ञेस्ततोधिकम् । तात्कालिकीं प्रतीहारः शक्तिं कांचिद्ददर्शयत् ॥१९८१॥
स कम्पनाद्यधीकारस्रजं राजविसर्जिताम् । वितरन्मुज्जये राजस्थानकार्यस्रजं विना ॥१९८२॥
निस्तोषाय गृहायातसोमपालानुरोधतः । प्रसीदन्वामहस्तेन निजजुटस्रजं मदात् ॥१९८३॥

१९५९ [1]) A कोष १९६१. [2]) Emended, A वैधव्य वि°.—[3]) Emended, A वेषेनैश्व १९७२ [4]) Emended A अपि, वेन. १९७८ [5]) A वालिशै

आकृष्य प्रददौ तस्य तत्प्राप्तिपरितोषिणः । आप्यायसान्द्रया दृष्ट्या यस्संपन्नीरुधो व्यधात् ॥१९८४॥चक्रलकम्॥
भर्त्रे हिताय सौहार्द विधुयोदयधन्ययोः । अभजद्विस्मृहणः सुज्ञः प्रवेशे प्रतिलोमताम् ॥१९८५॥
प्रत्युद्गमेन संमान्य सुस्थिं प्रावेशयन्नृपः । देशान्तिरास्थद्धन्यादीन्मानसान्न तु तद्गिरा ॥१९८६॥
कृतागाः क्षमापतौ लब्धक्षणं तीक्ष्णैर्जिघांसति । कोष्टेश्वरः पलायिष्ट शालोदन्तस्तदन्तिकात् ॥१९८७॥
आस्कन्दायागते राज्ञि गृहीतमनुजेश्वरे । स्वपक्षभेदोपहतः सोथ देशान्तरं ययौ ॥१९८८॥
लोटनस्तु निजग्राह काश्चिदालम्ब्य ठक्कुरान् । बप्पनीलाभिधे स्थाने वसन्मल्लार्जुनं बलात् ॥१९८९॥
तत्र दृष्टमसंभाव्यमेवास्य खलु पौरुषम् । परिभ्रष्टोपि यद्बद्धपदं तमजयत्सदा ॥१९९०॥
जहार तुरगांल्लुण्टि चकाराट्टिलिकापणे । मार्गद्वङ्गादिभङ्गं च – – सर्वत्र सोकरोत् ॥१९९१॥
राजराजाभिधानेन डामरेणार्थितस्ततः । कडमीरराज्यसंप्राप्यै क्रमराज्यमगाहत ॥१९९२॥
तदवेत्य समीपस्थे हते चित्ररथेन सः । तस्मिन्नद्वन्द्वे प्रययौ बप्पनीलभुवं पुनः ॥१९९३॥
तस्मिन्नास्कन्दमसकृदत्यट्टलिकामपि । अवरोद्धुमशक्तोभूत्कोष्टे मल्लार्जुनो वसन् ॥१९९४॥
भ्रातृव्येण पितृव्यस्य दापयित्वा धनं बहु । ततः कोष्टेश्वरो यात्रासन्ज. संधिं न्यबन्धयत् ॥१९९५॥
लोहरे विहितस्थैर्यो गृहीत्वा लोटनं ततः । कडमीरोर्व्या पपातासौ विजिघृक्षुः क्षमाभुजा ॥१९९६॥
गिरीनुल्लङ्घ्य कार्कोटद्वङ्गे विहितवान्पदम् । निपत्य मार्गेनुहाने यावदन्वैश्च डामरैः ॥१९९७॥
नावाप योगं निर्गत्य क्षिप्रकारी क्षमापतिः । सर्वोद्योगेन ते तावदुत्थानोपहतं व्यधात् ॥१९९८॥
अत्रान्तरे प्रतीहारः प्रापासन्नमपीडवां । न संपस्स्वल्पपुण्यानामनपायित्वमायुषः ॥१९९९॥
उत्सारणप्रियतया परिरुद्धसदेहारं गृहे निरनुरोधतया वसन्तः ।
संपल्लघूकृतधियोप्रतिघप्रवृत्तेर्धिग्जानते न रभसाच्चियतेनिपातम् ॥२०००॥
कुर्वाणोत्सारण तस्य गृहजा सततं नृणाम् । नाशासीत्सुखसुप्तस्य पृष्ठे पतितमन्तकम् ॥२००१॥
ज्वरितः स हि निश्चुतज्वरः स्वपिति विज्वरः । विदित्वेति न विज्ञातः स्वपन्नेव मृतस्तदा ॥२००२॥
सलोटने कोष्टकेथ प्रयाते नृपतिः पुनः । न स मल्लार्जुनो नापि कोष्टको न स लोटनः ॥२००३॥
छद्मनोदयनं पार्श्वस्थितं मल्लार्जुनोवधीत् । तस्मै चुकोप माध्यस्थ्ये स्थापितस्तेन कोष्टकः ॥२००४॥
अनुनिन्ये न तं खिन्नं स संभृतबलस्ततः । अभिषेणयितुं क्रोधादधावत्सहलोटनम् ॥२००५॥
कोष्टको मल्लकोष्ठाद्यैर्मिलैर्युक्तोपि सादिभिः । तीर्त्वा परोष्णीं तत्सैन्यां निर्ममाथापमाथिनीम् ॥२००६॥
हतेषु तेषु संग्रामे खशसैन्धवकादिषु । वधं प्राप्तः सिंहभुभृद्वेषाच्च स नृपो हतः ॥२००७॥
आरूढः कोष्टमूर्धानं मानमूर्भः परिच्युतः । भग्नप्रतापो भूयोपि समधत्त स कोष्टकम् ॥२००८॥
विसृज्य लोटनं निष्ठत्रिर्वैरमगमत्पुनः । अनिर्वाहितदेयेन तेन द्वैधं स डामरः ॥२००९॥
बद्धाधिकारिणः शुल्कं गृह्णताकारि राजवत् । तेन स्वनाम्ना भाण्डेषु द्वङ्गे सिन्दूरमुद्रणम् ॥२०१०॥
जतुसंहतयोः काचकलशीदलयोरिव । क्षणे क्षणे सधिभङ्गस्तयोः समुदपद्यत ॥२०११॥

१९८४ [1]) A, ४ १९९१. [1]) A, indicates here a *lacuna* of two *aksharas*, C तत्रा १९९२. [2]) Emended, A °वसन. १९९६. [1]) Emended, A °स्थैर्ये – [2]) Emended with C; A °विजिगृक्षु. १९९९. [1]) Emended with C, A °हारप्रापारसमयपाडया. २००८ [1]) Emended with C, A कोष्टमू°. २०१० [1]) Emended A °मुद्रणाम

निर्व्यूढिभिश्चन्यैर्वाग्मैरुपैर्विरागं लोहरेश्वरः । निर्न्ये लवन्यं सोप्येनं स्पर्धाबन्धैरनङ्गैः ॥२०१२॥
डामरेण ततो दत्त्वास्कन्दं तत्कटकान्तरम् । पराध्यायुधधुर्याश्वहरणात्सु[1]रं कृतम् ॥२०१३॥
दत्त्वा ह[2]रायत्यां विषमैर्हठपौरुषैः । एवं तं कोष्ठको मूढः सुखोच्छेदं व्यधाद्विषाम् ॥२०१४॥
तनयादानसंबन्धान्छ्थुरं मुख्यमन्त्रिणाम् । अवान्तरे नृपो हन्तुं मात्रिकं स व्यचिन्तयत् ॥२०१५॥ 2015
भासीत्कठोरतारुण्यतरङ्गितमनोभवः । सुव्यक्तं स हि तन्मातुरौपपत्येन संमतः ॥२०१६॥
आहारावसरे तीक्ष्णाः कृतसंज्ञाः क्षमाभुजा । दत्तप्रहरणाः प्राणैर्भुञ्जानं तं व्ययोजयन् ॥२०१७॥
धुन्वच्चसिपटं बद्धवीरपट्टो रटन्बहु । निर्लुण्ठयन्स तन्सेनां तां तामारभटीं व्यधात् ॥२०१८॥
श्रवाशिष्यत न द्रोहमध्यादिन्दाकरोप्यहो । राज्ञा विषमितस्तेन रसदानेन स स्वयम् ॥२०१९॥
दैवतोत्सारितारातिस्ततः सिंहमहीपतिः । संदधे कोष्ठकं सुज्ञि प्राहिणोद्विजयाय च ॥२०२०॥ 2020
मार्गस्थ याममात्रेण गम्यस्यान्तिकमाप सः । यावत्तुरंगहरणात्कोष्ठकेनाकुलीकृतः ॥२०२१॥
अन्तर्भेदाकुलस्तावत्प्रत्यवस्थातुमक्षमः । गृहीतकोशः संत्यज्य कोष्टं मल्लार्जुनो ययौ ॥२०२२॥
राज्यभ्रष्टः स निर्लुण्ठ्यमानो मार्गेषु तस्करैः । अवनाद्दीनमुखो रक्षन्कोशशेषं कथंचन ॥२०२३॥
भ्रष्टमष्टादशशरेऽब्यर्धाष्टमवत्सरे । राज्यान्तेन द्वितीयस्यां वैशाखस्यासितेहनि ॥२०२४॥
दाता शिखामृतरुचेरमृतं विलप्य[3]ण्यकूत्समिति लूनशिराः कृतघ्न ।
ईशेन यत्र तदकार्युपकर्तुरस्तु तत्रापरः क इव संनिहितद्विजिह्वः ॥२०२५॥ 2025
मुक्ता हमा इति जलं नलिनेषु लीनं ज्ञातृत्वमेतदिति जाड्यमिनेषु लग्नम् ।
यज्ज्ञायते किमपि हन्त त्रिमोहनी सा शक्तिः श्रियः स्फुरति कापि तदाश्रयायाः ॥२०२६॥
ग्रन्त्यद्रुतप्रहरणा विपिनेषु केपि प्राणेन केचन वृशाथ रसज्ञयान्ये ।
ते केपि सन्ति तु नरेन्द्रगृहेषु हिंसा वाचैव ये विरचयन्ति किलोपघातम् ॥२०२७॥
ज्योतीरसाइमन इवाश्रितमीश्वरस्य निर्दग्धुमिन्धनमिवाग्मगतं न शक्ताः ।
पश्चाद्ववेद्यदि स तत्प्रसृतावकाशाः कुर्युः खला रविकरा इव भस्मशेषम् ॥२०२८॥
कापिलं हर्षटं कोष्टं नीतवान्मण्डलेशिताम् । उदयैः कोटभृत्यानां संपदं कल्पनाधिपः ॥२०२९॥
कुर्वञ्शय्यां पुनर्नैतुं मण्डलं तद्यलम्बत । दिनानि कतिचित्तत्र यावत्प्रकृतिदुर्जनैः ॥२०३०॥ 2030
विटैरसूयाविषमैः प्रसादावसरो नृपः । तावत्कलुषनां तस्मिन्नुपजापैरनीयत ॥२०३१॥ तिलकम् ॥
राजा भयन्परः कोस्तु स्वविचारदृढक्रियः । एषोपि शिशुवद्भूभृत्यत्र पूर्वैः प्रनर्त्यते ॥२०३२॥
शैशवे बालिशप्रायैः संस्तुतैर्जाड्यमर्पितम् । प्रौढावपि न वा यायाद्राज्ञः कार्ष्ण्यं मणेरिव ॥२०३३॥
भृत्यान्तरापरिज्ञानमात्रेण जगतीभुजाम् । निरागसो वधपातः कष्टं राष्ट्रस्य जायते ॥२०३४॥

२०१३ [1]) A, indicates here a *lacuna* of one *akshara*, C सुस्थिरं २०१४ [2]) Thus or स्व— A, C दत्त्वाभय नैरायत्यां २०१५ [1]) Cf. vii. 1813. 1930 २०२२. [2]) Emended, A कोष्ट २०२४. [3]) Thus A, text evidently corrupt, perhaps read हिंदस्याष्टम° —[3]) Thus corr by later hand from A, [1] स्याहितेहनि. २०२५ [1]) Thus A, C विलुप्यकार्पण्यकृ°, perhaps read विलुप्यकारुण्यकृ°. २०३१ [1]) A writes here ४ instead of तिलकम् (?). २०३३. [1]) A बालि° —[1]) Thus corr. by A, from A, काइर्यं.

कृत्ये व्यवसितेसाध्ये हास्यः स्याल्लक्ष्मकादिवत् । सुज्जिः प्रायोजि राजापैर्निर्जेतुमिति लोहरम् ॥२०३५॥
निर्ऋद्धाद्भुतकार्येण तस्मिन्ब्रह्मास्त्रतुल्यया । अमोघया प्रजह्रुस्ते पापाः पैशुनविद्यया ॥२०३६॥
गाम्भीर्यालक्ष्यविकृतैः प्रीत्यालपैर्महीपतेः । प्रत्यायातः कलुषनां नाज्ञासीत्कम्पनापतिः ॥२०३७॥
प्रकृत्या तस्य निर्द्रोहतया शङ्कास्य तादृशम् । प्रियं कृतवतश्च स्यादविश्रासोथ वा कथम् ॥२०३८॥
प्रीतिरासीन्न नृपतेस्तत्कृत्यैरुचितैरपि । अप्रियप्रमदालापैर्विरक्तस्येव कामिनः ॥२०३९॥
जित्वा राष्ट्रद्वयं प्रादाद्धारितं नृपतेरिति । बहुमानेन दर्पाच्च स्वच्छन्दं स व्यवाहरत् ॥२०४०॥
पौरानगारहरणाद्यपकारैरनुद्यताः । तद्बन्धवो बाधमाना विरागमनयञ्जनम् ॥ २०४१॥
नेजाग्रःस्मरणात्कोष्टेश्वरी न व्यश्नुतीक्षणे । न पितृव्येपि भूपालकोपाविष्कृतनिष्क्रिये ॥२०४२॥
कोशं प्रजोपतापेन संचिन्वन्सुज्जिना समम् । सबन्धुकृच्चित्ररथो नाभूदभिमतः प्रभोः ॥२०४३॥
धन्योदयो[1] नृपः सुज्जिदाक्षिण्यालक्ष्यसौहृदः । अपुण्याहविधैर्गूढं राजपुर्यां कृतस्थितौ ॥२०४४॥
तौ चावालगतां[2] शीतज्वरनष्टपरिच्छदौ । महार्जुनस्य साम्राज्यभ्रंशेपि विपुलश्रियः ॥२०४५॥
सुज्जिद्वेषात्पुरा दूनैराहतो लक्ष्मकेण यः । आगच्छन्सञ्चपालः स प्राप राजपुरीं तदा ॥२०४६॥
सुज्जिचित्ररथाभ्यां तं रुद्धचेष्टेन भूभुजा । अविसृष्टप्रवेशाज्ञं दूतैर्महार्जुनोभजत् ॥२०४७॥
तन्निमित्तं स केनापि सामन्तेन सहाध्वनि । सजातकलहे शस्त्रक्षतो लक्ष्म्या व्ययुज्यत ॥२०४८॥
तथाभूतमपि स्वर्णं भूर्युरीकृत्य नाशकत् । यत्तन्महार्जुनो नेतुं कार्यशैस्तदपुज्यत ॥२०४९॥
सोस्वतन्त्रेण राज्ञा च सौजन्याद्विस्मरणेन च । दूतैः प्रच्छन्नमाहूतो रभसादाययौ ततः ॥२०५०॥
न न्यमन्त्रयत वेदन्युर्मामसज्ञेति चिन्तयन् । स्मिन्विषमे मार्गे पुरं साहसिकोविशत् ॥२०५१॥
स कन्यकुब्जगौडादिमण्डलेषु महीभुजाम् । स्पर्धया लब्धसत्कारो भूपतेर्मन्त्रियन्त्रिताम् ॥२०५२॥
अनवाप्य निजे देशे सत्क्रियां दुःखितोभवत् । राजधान्यन्तिकैः पौरैः प्रसृतासु व्यलोक्यत ॥२०५३॥
मूपालोगणयित्वाथ मन्त्रिणो दत्तदर्शन । भेजे स्वहस्तताम्बूलदानप्रक्रिययैव तम् ॥२०५४॥
निष्किंचनोपि सन्मन्त्रयातिमात्रेणानुगतो जनैः । यातायातं नृपगृहे कुर्वञ्शत्रूनकम्पयत् ॥२०५५॥
व्याहारव्यवहारादि व्यालोक्यालौकिकाकृतेः । पुरुषान्तरवित्सुज्जिस्तस्य स्वैरमवेषत ॥२०५६॥
दध्यौ सोथ ध्रुवं राष्ट्रेश्वर्यसर्वकषक्रियम् । नैवमेवाद्भुतं भूतमेतादृक्शान्तिमेष्यति ॥२०५७॥
तांस्तान्देशान्तरे वीरानुत्सिक्तान्दृष्टवान्स च । तं पर्यालोच्य विश्रान्ति सोत्सेकानाममन्यत ॥२०५८॥
भवितव्यतया दर्पेणाथ नीतः स्वतन्त्रताम् । परिवादावहं सुज्जिस्तनां यत्तद्व्यवाहरत् ॥२०५९॥
स्वानुगैर्लुण्ठितं रूक्षमाचक्षाणं रुषा द्विजम् । प्रासैर्मत्तद्विराज्यस्थः स सगालमिवावधीत् ॥२०६०॥
बाह्ये कुक्कुरमेणा तेन विघ्राप्य जनमागतम् । तं प्रत्युपक्रियं लोको विरागं नगरेप्यगात् ॥२०६१॥
अत्रान्तरे बन्धुमेकं व्यधुः क्रमलियादयः । अगण्यप्रायमुत्सेकादुत्तमप्रक्रियासदम् ॥२०६२॥
मयि सत्यपराधेपि स्याद्भिमनुग्रहकः स्वयात् । अकारि चारणप्रायस्तादृक्षोपीति सुज्जिना ॥२०६३॥

२०४४ [1]) Emended; A धन्योदयो. २०४५. [2]) Emended, A राज्यपुर्या २०४५ [1]) Doubtful emendation, A चावालगतौ; G चारालगतौ. २०५१. [2]) स supplied with C, A न्यग्र ॰ ध

संजातयौनसंबन्धबन्धुः कर्मलियादिभिः । अथास्याक्षिगतोत्कर्ष सामर्थ्योद्विल्हणोऽभूत् ॥२०६४॥
अन्येन हेतुनोद्भूतं द्वैतं तेषां च तस्य च । खलपैशुनसेकैस्तत्प्रापाशु शतशाखताम् ॥२०६५॥' 2065
प्रकुर्योत्सिक्तपुत्सेकावहैः समुददीदिपत् । दुर्मन्त्रोर्विषहैकाग्ये साहदेविस्तमुल्हणः ॥२०६६॥
अस्मानां सहासाभिः क्षमंत समशीर्षकाम् । कृतघ्नोयमिति स्वैरं मन्युं राज्यपि सोग्रहीत् ॥२०६७॥
विभ्यत्तु भूपतिस्तस्माद्विल्हणं बाह्यभूत्यवत् । मन्त्रस्वैरकथार्थेषु विस्रम्भेषु व्यवर्जयत् ॥२०६८॥'
स तु धूर्तत्वदुर्लक्ष्यतादुक्षस्वामिवैकृतः । स्वैषां धैर्यं परेषां तु संत्रासं मायायातनोत् ॥२०६९॥
समपशक्तिराकाङ्क्ष्यसंस्तवः पक्षयोर्द्वयोः । तस्य तु प्रययौ मञ्जपालो दानेन मित्रताम् ॥२०७०॥ 2070
संनद्धयोः प्रविशतोरन्योन्यस्पर्धया तयोः । क्षणे क्षणे राजधानी ययौ संभ्रमलोलताम् ॥२०७१॥
सुज्जिः सभूषणाक्षेपुं प्रतिपक्षान्ययुत्सया । मद्रीमानोत्सवास्याने संक्षोभमुदपादयत् ॥२०७२॥
कृकाटिकान्यस्तहस्तो द्वाःस्थेनावेदितो हि सः । तं निर्भर्त्स्य शिलाक्षेपं क्रोधरूक्षाक्षरोरुरोत् ॥२०७३॥
लिखितैरिव तान्सर्वैः सोढुं रक्षणमीशितुः । मिथ्या तथ्यमिवोदीर्य संभयन्द्विः समर्थताम् ॥२०७४॥
उपावेशयदभ्यर्णं भूपतिः परिमान्य्य तम् । सत्यस्मिन्नास्ति नः किंचिदित्यन्तस्तु व्यचिन्तयत् ॥२०७५॥ 2075
चक्रे मद्रराज्यस्यैरथ प्रायो द्विजातिभिः । न सुज्जेः कम्पनेशत्वमिच्छाम इति वादिभिः ॥२०७६॥
आन्वीक्ष्य विद्विषः शङ्कां मन्त्रविस्रिग्धि रिल्हणः । संनद्धसैन्यमानिन्ये पञ्चचन्द्रं तदप्रियम् ॥२०७७॥
शशङ्के सञ्जपालाच्च तस्माच्च बहुसैनिकात् । सुज्जिन्यानगणयच्चवुद्वास्थ च तद्रिपुः ॥२०७८॥
आस्कन्दमीत्या निर्गत्य हयारोहैः समं गृहात् । व्यूढानीको निरुद्धातो जजागाराथ सोध्वनि ॥२०७९॥
भूपतिपातिलोम्येन वर्तमानस्तदाभवत् । कोंष्टेश्वरोपि संनद्धः सुज्जिना बद्धसौहृदः ॥२०८०॥ 2080
स्थितमप्रातिलोम्येन सोनधीन्मनुजेश्वरम । इति द्वेष्योपि नितरां द्वेष्यतां नृपतेरगात् ॥२०८१॥
तथा स्थिते निशीथिन्यामाचख्युस्तस्य विद्विषः । दुष्प्रक्षहेतुतां राज्ञः स्वगुप्त्यै तेन या कृता ॥२०८२॥
अतथ्यं तथ्यवद्वस्तु तथ्यं वातथ्यवन्नृपः । यः पश्येन्मूढवत्सोर्थैस्त्यक्तोनर्थैः कदर्थ्यते ॥२०८३॥
रत्नज्योतिर्हुतवहधिया त्यज्यते दृष्टिपातः हयावाक्षाणामितरविषयः स्वस्य संभाव्यते च ।
वस्त्वेकैकं यदिह न मृषा तन्मृषा यन्मृषा तत्तथ्येनेत्थं किमिव न जनैर्दृश्यते तत्त्वशून्यैः ॥२०८४॥
राजाथ तद्वधादन्यदज्ञानन्दौस्थ्यंमपत्रजम् । न्ययुङ्क्त तस्य तीक्ष्णत्वे सञ्जपालं महौजसः ॥२०८५॥ 2085
स कापुरुषवद्धीरः प्रहर्तुं छद्मनाक्षमः । काङ्क्षन्नाक्षिप्य तं हन्तुं तत्र तत्रैक्षत क्षणम् ॥२०८६॥
मायाप्रयोगानन्योन्यमुद्दिश्य स्पृशतोर्द्वयोः । क्षणे क्षणेभजद्भ्रूं वासोल्लासविलोलताम् ॥२०८७॥
प्रत्याशादुर्ग्रयोर्दर्पं रात्रौ सुज्जौ जागर्ति पूर्ववत् । अन्यमयामिकयामं राजधामाप्यजायत ॥२०८८॥
राष्ट्रान्निर्वासने रिल्हणस्य सुज्जेरभीप्सिते । पार्श्वस्थोप्यनुमन्तामूदनीशः पत्यवांस्तौ ॥२०८९॥
स निर्ययावसुरामन्य तस्खेदात्क्षुभिताः प्रजाः । संदर्श्य द्वारपतिना राज्ञो युक्त्या समर्थितः ॥२०९०॥ 2090
संमन्त्र्य नृपतिं मैत्रीपार्थिना सुज्जिना सभम् । पीत्वा कोशं सञ्जपालः प्रात्रो रात्रौ व्यजिज्ञपत् ॥२०९१॥

२०६५. ¹) Thus corr. by A, from A₁ समुद्दीपित. २०६७. ¹) Emended, A आसम°. २०८२ ¹) Emended with C, A °चाख्यु. २०९०. ¹) Emended with C, A नियोयायु°.

प्रेरणादुल्लङ्घनादीनां स्वोत्सेकाद्येष वर्तते । राजन्सुज्जेरभिप्रायः स्पर्धिनोन्याननिच्छतः ॥२०९२॥
निर्द्वेष्टास्योपकर्तुश्च मते स्याद्यदि मे नृपः । निर्वास्य रिल्हणं चित्रस्थं बद्ध्वा महाधनम् ॥२०९३॥
लोहखरध्वनिर्निर्यातधान्कोशं च भूपतेः । नयेयं संमुतो हन्यां दुर्वृत्तमपि कोष्ठकम् ॥२०९४॥
कार्योपरोधाद्विबन्धः संबन्धेष्वेव नास्ति मे । दाक्षिण्यं स्वामिनः कृत्ये यस्य प्राणास्तृणोपमाः ॥२०९५॥
सत्येथ प्रतिराजादिनिर्जयस्वीकृतोद्यमे । युवाविश्रान्तवित्तोयं नृपश्रीभोगभाग्भवेत् ॥२०९६॥
साहाय्यकाय द्वारेशमुल्हणं रिल्हणाभये । कार्यव्रते च मामीशमाकारयितुमिच्छति ॥२०९७॥
ब्रूते च मामुल्हणश्च त्वं चाहं चाविभेदिनः । मिलिता यत्र तत्रास्ति पण्यः को नु नृपास्पदे ॥२०९८॥
इहस्था नवदायादमेकमानीय कंचन । निर्दग्धोस्य पदे राज्ञो नानुतिष्ठेदिदं यदि ॥२०९९॥
गुणान्यसरणत्रासाद्वन्ध्यायेव गिरा सृजन् । द्विजांशुभद्रचा राजाथ विनिश्वस्याब्रवीद्वचः ॥२१००॥
यथाह स तथैवैतच्च द्रोहो नासमर्थता । नीदासीन्यमथैतस्मिन्संभाव्यमभिमानिनि ॥२१०१॥
निष्पतिद्वन्द्वभावोस्य दुरुच्छेदो भवेदिति । इयमप्यन्यतस्तावदस्त्वपायधियः कथा ॥२१०२॥
किं नु दूये यदाकोपप्रायम्यात्तथ्यनोपि वा । निर्द्वेष्टास्य वधो ध्यातो योस्यासौ कार्य एव तत् ॥२१०३॥
अर्थोयमल्पसत्त्वानामपेक्ष्यमिति मन्त्रितः । नूनं तेनोपलभ्येत तानावर्तयता धनैः ॥२१०४॥
पुण्यैरपरिहार्यैः स्वैर्जातैर्वा मादृशाममी । जानतामपि जायन्ते निर्गुणा भोगभागिनः ॥२१०५॥
बालिशान्गुरुतां प्रायश्चित्तमेतन्महीभुजाम् । तन्मौर्ख्यस्य फलं मूढैरेतैर्यदनुभूयते ॥२१०६॥
दुर्गमो भूमिभृन्मार्गो विटैर्हृद्वृषैरिव । ... ... ॥२१०७॥
तन्वाना व्रतवैमुख्यं रसनालौल्यशालिनः । परपिण्डोपहर्तारः खलाः कौलेयका अपि ॥२१०८॥
इत्थं खलोपतापेन प्रयुक्तं तद्वयात्पुनः । असंहार्यं कुकर्मेदं पश्चात्तापाय नो भवेत् ॥२१०९॥
इत्युदीर्य नृपः सुज्जेः सज्जो व्यापादविद्रुधे । तमजागरयच्छश्वज्जागरं चापहीस्त्वयम् ॥२११०॥
विभ्रमन्त्रसुतेः शङ्कां जिघांसुः सुज्जिरित्यपि । तथ्यं भृत्यवचो जानंस्तस्थौ दौःस्थ्येन पार्थिवः ॥२१११॥
गत्वा स्वयं गृहान्यौनसंबन्धं कुरुतं युवाम् । इत्युक्ता रिल्हणेनाथ स सुज्जिः समयोजयत् ॥२११२॥
विश्वास्यापि तथा हन्तुं तं प्रसङ्गमनामुवन् । उदनाम्यहिवाराव्यं तल्पोपर्यवशं लुठन् ॥२११३॥
सज्जपाले गृहाद्बन्धुनाशदुःखिन्यनागते । आशङ्क्य साहसासिद्धिमधिकं पर्यतप्यत ॥२११४॥
निपत्य वीरशयने सुस्मलक्ष्मापसक्रियाम् । भ्रातरो यस्य कल्याणराजाद्या व्यस्मरन्युधि ॥२११५॥
सेनानीः कुलराजः स ख्यातो व्यायामविद्यया । प्राणैरानृण्यमिच्छंस्तमपृच्छच्छोककारणम् ॥२११६॥ युग्मम्॥
स तस्थापयितुं हन्तुं वाप्यशक्यं न्यवेदयत् । तस्यामतिसमाधेयं कम्पनाधीश्वराद्वयम् ॥२११७॥
कियदेतत्तजप्राणमात्रलभ्यं महीभुजाम् । इत्याभाष्य स जग्राह साहसाध्यव्यवसायताम् ॥२११८॥
दिनद्वयमनायासो गृहेभ्यः कम्पनापतिः । न प्रातिभाव्यमभजत्तस्य मृत्योः श्रियोथ वा ॥२११९॥
विक्रम्भमृत्युः भृङ्गारनामा चाप्यग्रयोत्यभोः । तं दृष्ट्वांस्तुतीयेह्नि शयनेवगणं स्थितम् ॥२१२०॥

२०९२ ¹) Emended, A ²प्रायस्पर्धिनो° २१०० ²) Emended with C, A सज्जन २१०३. ³) Emended, A य आकोप°; G *see manu* यत कों° २१०६ ⁴) A वालि°. २१०७ ⁵) Here two *pādas* are missing, C supplements क स नीतिज्ञविज्ञेय; क च ने खलचुद्धय. २११२ ⁶) Emended, A कुरुता २११६. ⁷) A, २.

शोभोपयोगिनो भर्तुर्नित्यं सतनसेवकाः । कर्तुं साहससाचिव्यं विदुरेण तु पार्श्वतः ॥२१२१॥
करे पिनाको मकराङ्कशत्रोः शोभाविशेषाय सदानुषक्तः ।
पुराहवे कार्मुककर्म तस्य तत्कालमाप्रेन तु मन्दरेण ॥२१२२॥
ताम्बूलहारकव्याजात्ततो राजा व्यसर्जयत् । कुलराजं तमव्याजवैर्यासंलक्ष्यविक्रियम् ॥२१२३॥
ध्रुवं मृत्युः पुनर्नोहमागन्ता तत्ततोस्य कः । आर्द्रयति स निल्ये न ताम्बूलं स्वर्णभाजने ॥२१२४॥
व्यसनप्रशमं राज्ञः स्वदेहत्यागतोनुगाः । एवं कर्तुं धृतन्तेन्ये निर्ययुर्द्वौ स्वलिताः पुनः ॥२१२५॥ 2125
सगणोवगणं वास्तु निहतो नियतं मया । जागर्त्यतः परं देव इत्युदीर्य विनिर्ययौ ॥२१२६॥
गतस्य साहसासिद्धौ शक्यं शत्रुक्षयं पलायनम् । .... ॥२१२७॥
व्रजन्स्वामिहितं कृत्वा पुनः पथ्यानिनाय सः । शस्त्रिणौ द्वौ मिषच्छस्त्रौ बन्धस्थाने परामृशन् ॥२१२८॥
स्वयं गृहीत्वा ताम्बूलं राज्ञा प्रहित इत्यथ । द्वाःस्थेनावेदितः सुज्ञैः पार्श्वं रुद्रानुगोविशत् ॥२१२९॥
ददर्शोचावचैस्तं च मित्रैः परिजनैर्वृतम् । यूथेनाथमिवात्यल्पैर्विररहितान्तिकम् ॥२१३०॥ 2130
गृहीतवन्दितस्वामिताम्बूलः सस्मितं स तम् । पृष्ट्वा कुत्यादि नृपतेः सत्कृत्य व्यसृजत्क्षणात् ॥२१३१॥
जनप्रवेशाशङ्की स त्वरमाणस्तमब्रवीत । कृतागाः कोपि कैवर्तशस्त्वभुग्मत्समाश्रितः ॥२१३२॥
तस्याक्षेपपरान्भृत्यान्स्वाश्रिवार्यो धुना तव । संमान्या वयमित्यधेलक्षयन्प्रकृतिक्षणम् ॥२१३३॥
सौम्येकामिव तां वाचं स दर्पादवधीरयन् । तस्य रूक्षाक्षरं नाहं कुर्यामित्यब्रवीद्वचः ॥२१३४॥
स रोषादिव निर्गच्छन्मान्योसाविति वादिभिः । तं सान्त्वयित्वा तद्वृत्ये रुद्रौ व्यावर्तितः पुनः ॥२१३५॥ 2135
नेतावादि ततः कर्तुं विज्ञप्तिं वस्तुनोमुतः । सज्जयोरादिश द्वारप्रवेशं भृत्ययोर्मम ॥२१३६॥
अवशेनेन नेताथ वीक्ष्य तौ संप्रवेशितौ । सहायलाभाद्दुपुषुः प्रतिज्ञोपुरुवर्तन ॥२१३७॥
यात्राद्य कुर्या प्रातर्वो विश्रमिति तान्ब्रुवन् । दत्तपृष्ठो निद्रिष्वासुस्तल्पे सुज्ञैर्जवौ वपुः ॥२१३८॥
गत्वाथ किंचिच्चापूर्णो निष्कृष्टभृत्तिको जवात् । प्राहरत्कुलराजोस्य वामे पार्श्वे कृतत्वरः ॥२१३९॥
तस्य विकुर्वतो द्रोहम यावत्पृच्छन्तिकां प्रति । यावत्पाणिः प्रहरणं तावत्सर्वेपि ते व्यधुः ॥२१४०॥ 2140
विमर्शः पश्यतां यावदाजघ्ने तत्र नोद्यमौ । स तावदेव सुचिरापेतश्वास इवाभवत् ॥२१४१॥
भयत्यक्ताभिमानेषु विद्रुतेष्वनुजीविषु । चकर्ष शस्त्रं तत्रैकः पिप्लवेदः परं तदा ॥२१४२॥
प्रलयस्तम्बिभिस्तुल्यप्रतिपक्षैतिभिः क्षतः । भ्राम्यन्सुतासूक्तस्मात्स मण्डपाच्चिरत्यास्यत ॥२१४३॥
स्थितान्द्वःस्थांगणे धात्रि रुद्रद्वारतमोरयः । निशांसत्रः सुज्ञिभृत्यास्तत्तस्तान्पर्यवारयन् ॥२१४४॥
तमोरिप्रतिकुर्वाणा भज्यमानेरिभिर्ययुः । ते द्वारे तुलशय्यां तां प्रोत्सार्य शवमुद्धृतम् ॥२१४५॥ 2145
खड्गेषुशूलपरशुस्फिकाभिर्वर्षिणः । तान्समर्थमयन्मार्गैरनेकैस्ते विविक्षवः ॥२१४६॥
नैराश्यद्वैतोर्यशतां तेषां संकटवर्तिभिः । पृष्ठाच्छित्त्वा शिरः सुज्ञैरङ्गनेक्षिप्यनाथ तैः ॥२१४७॥
अस्मनिःसरणाभीक्ष्णशुङ्क्षणपुटभृति । उत्तरीयरुचच्छस्त्रसत्रव्राणपुटद्वयम् ॥२१४८॥

२१२४ [1]) Thus emended in C, A आर्द्रयेति २१२८ [2]) Emended, V °तान्दगा २१२९ [3]) Here two *padas* are missing, C supplements इति चिन्तयतस्तस्य मन आसीदधृङ्मुल २१३८. [4]) Emended, V °प्रपन २१३९. [5]) Emended, A द्वार्स्थेन २१४१ [6]) Emended, A हृद्गु. २१४९. [7]) Emended with C, A कुजरा°. २१४५. [8]) A विमर्ष २१४६ [9]) Emended, V नान्म सम्भ्रम°

अक्ष्णोर्बिम्ब्यमाणस्य लोकस्य प्रतिबिम्बकैः । संभाव्यमानसंस्पन्दस्लोकपक्त्यक्तारकम् ॥२१४९॥
स्थपुटस्याक्रमच्छेदाद्बलमांसस्य संधिषु । हरिद्रार्द्रैरिवाश्यानमेदोग्रन्थिभिरुल्बणम् ॥२१५०॥
भूलिप्तस्तबकप्रख्यमधु तद्देहतिति निश्चयम् । परं भालतलस्थेन दवल्लुकुङ्कुमबिन्दुना ॥२१५१॥
नद्धीक्ष्य निर्यत्पतनव्यक्तसंध्यन्तरङ्गिजम् । उच्चलत्तुमुलाक्रन्दा भृत्याः क्वापि विदुद्रुवुः ॥२१५२॥कुलकम्॥
तीक्ष्णान्प्रयुज्य क्षमापस्तु निष्ठुरव्याकुलधीस्तदा । बहिर्वीक्ष्य जनक्षोभं साहसं निश्चिकाय तम् ॥२१५३॥
मुञ्जौ हते क्षते वापि कार्यमेतदिति द्रुतम् । संनद्ध सैन्यस्यादिक्षत्तन्मन्दिरवेष्टनम् ॥२१५४॥
मिथ्यैव मुञ्जिनिर्मुक्तौ इति श्रुतवना जनात् । स्वयमधाद्भि भूपेन ततः समरसंभ्रमः ॥२१५५॥
निःसहाय हतं ज्ञात्वा मुञ्जि राजोपजीविनः । तत्र स्थित द्विवरयं सर्वद्वेष्यमजन्धयन् ॥२१५६॥
हिल्लाहमजन्मनः मुञ्जिभ्रातृस्यालस्य कौशलम् । कलज्ञास्यांश्च निर्वर्ण्य वाणीयं पुण्यभागिनी ॥२१५७॥
आक्षिप्यमाणैर्भिक्षुवाचैरन्ते वीरोचितं कृतम् । तेन त्वमशयस्थेन सदाचाराज्ञ विच्युतम् ॥२१५८॥
राजौकस्येव तां वार्तां श्रुत्वा स व्यपलायितः । हतस्य स्वामिनोभ्यर्णं निहासुर्जीवितं यथौ ॥२१५९॥
द्वारे पदप्रहतिभिर्भज्यन्तं राजसैनिकाः । अपसार्य कथंचित्तं तीक्ष्णाः कृच्छ्रादरक्षिषुः ॥२१६०॥
पर्विष्टस्मिन्निर्भृदपीडिते मण्डपान्तरम् । लब्धप्राणा नृपाभ्यर्णं कुलराजादयो ययुः ॥२१६१॥
तत्प्रविष्टो हतवान्स तत्रैकं महाभटम् । शरैरेव हतो दूरात्कथंचित्पथिभिः ॥२१६२॥
आयातं श्रुमिते देशे सञ्जपाल मही पतिः । स्निग्धेन चोल्लङ्घ हस्तु प्राहिणोद्विहितत्वरः ॥२१६३॥
यातो मार्गात्पलाय्याथ परिशङ्कयेति स्निग्धेनः । क्षिप्रिप्रकान्तदूर्यन्तमवित्वा यावदायथौ ॥२१६४॥
पूर्वायातः सञ्जपालो गृहद्वारादिनिर्यतः । उल्लङ्घस्य पथो रुन्धन्सुवदन्यत्रणे ॥२१६५॥
नावदेकस्य खड्गेन निकृते दोष्णि दक्षिणे । त्वङ्मात्रशेषे छिन्नाग्रिस्वायुग्रन्थिरजायत ॥२१६६॥तिलकम्॥
अगण्यप्रायतां प्राप्ते व्रणे यत्कौशलादसौ । दिगन्तरेषु स्वामिभ्य देशे प्राप प्रथा पुनः ॥२१६७॥
फलकाले समासन्ने शौर्यपतिभुवाभजत । स तेन दोष्णा वैकल्य विधिच्छा विपुणो विधेः ॥२१६८॥
स प्राग्वदुदयात्राप्तौ भवेदविकलो यदि । फलेन तस्य जानीयादिच्छां लोकोयमद्भुताम् ॥२१६९॥
पीतामृतस्य क्षतविग्रहत्वं न प्रभविष्यदादि नाम ग्राहोः ।
अज्ञास्यदिन्द्रो तदमुष्य लोकः सामर्थ्यभाजः सुचिरप्ररूढाम् ॥२१७०॥
दृष्टः शीलाभि यो वृद्धः पितृव्यः साहदेविना । सम्यङ् निहत- साधु --' जातत्रणार्तिना ॥२१७१॥
तस्यार्या विदितो वेदम ज्वज्वलाख्योयमो हतः । मान्योनृणो भटौ द्वौ च यामिकश्च जनंगमः ॥२१७२॥
बाले तनयमालोक्य निपण्णस्याङ्गनस्थिते- । तस्यानिर्गच्छतो गेहं स्निग्धेनाग्रिमदापयत् ॥२१७३॥
आनीयमानो भूमान्यो वद्वा मुख्यैः स सैनिकैः । गृहद्वारे हतः कैश्चिन्नाकृतैर्व्रणविक्लवः ॥२१७४॥
तस्य प्रधानपकुलिक्षयहेतोर्महीपति. । मुण्डमाप्यवलोक्यासीदशान्तक्रोधविक्रियः ॥२१७५॥
व्यापाद्यमानाः साकोपं भूपतिप्रेरितैर्भटैः । उच्चावचाः सुज्जिभृत्याः कृत्यं सत्त्वोचितं व्यधुः ॥२१७६॥

२१५७ [1]) Encoded with C, A कल ~ स्याद्य. २१५६ [2]) A, 3 २१५१. [3]) Before or after साधु (two *aksharas* are missing, the *lacuna* not indicated in A; C supplements सम्यग्जा°.

अनुजो लक्ष्मकः मुज्जैर्बद्ध्वा नीतः स विक्रियाम् । नृपं वीक्ष्यादयैः कैश्चिद्राजधान्यङ्गने हतः ॥२१७७॥
भ्राता पितुर्व्यलस्तस्य संगटाख्यो नृपाङ्गने । अटचट इव प्राणानौचित्येनामुचत्कृती ॥२१७८॥
प्रविष्टः शरणं बाणवर्षैः पापैः प्रमापितः । उन्मत्तो सुम्मुनिस्तस्य भ्राता कैश्चित्स्वमन्दिरे ॥२१७९॥
मुज्जिस्यालस्तु शूद्रारवृत्त्या भङ्गुरया हतः । महाकुलीनो विचरन्नौचित्येन च चर्चितः ॥२१८०॥ 2180
सान्द्रिकाख्यः प्रतीहारो व्रणितः शनकैर्हतः । अन्येऽपि संश्रिताः मुज्जेस्तत्र तत्र प्रमिप्यिरे ॥२१८१॥
जात्यश्वाजिजवप्राणाः कोंद्रैश्चाश्वान्तिकम् । आसाद्य वीरपालाद्या द्विजा मृत्युभयं जहुः ॥२१८२॥
व्रजज्ज्वरादियो दुष्टोत्थानरुद्धतुरंगमः । प्रपेदे सगटभ्राता बन्धनं सुभटामठे ॥२१८३॥
सूनुश्च मज्जलः सुज्जेः श्वेतिकश्चाश्वजात्यजः । उल्हणस्य तनुजश्च कारागारं प्रपेदिरे ॥२१८४॥
इत्थं राजन्यमात्ये च प्राप्ते पिशुनवश्यताम् । नवमेऽब्दे शुचेः शुक्लपञ्चम्यां विप्लवोऽभवत् ॥२१८५॥ 2185
कार्ये क्वापि विपर्यस्तसत्त्वं संस्मृत्य मन्त्रिणम् । तमप्यापि नृपस्तादृग्भूयोपेतानुतप्यते ॥२१८६॥
चेतालेत्यापनाच्छ्वभ्रकङ्कालाद्विषचर्वणात् । व्यालग्रेभाच्च विषमं सत्यं राजोपसेवनम् ॥२१८७॥
अनात्मायत्तनिस्तीर्णगुणानां चक्रवर्तिनाम् । शकटानामिवायस्थो विभ्रमः को न भज्यते ॥२१८८॥
अयुक्तं नृपतिं सृष्ट्वा युक्तं मेने प्रजाः पुनः । युक्तं ज्ञात्वा तमुद्रिक्तशक्तिनां विविदुः प्रभोः ॥२१८९॥
भेजे राजा सञ्जयपालं कम्पनाधिपतिं दृढम् । कुलराजे च नगरापीकास्तिन्यं समार्पयत् ॥२१९०॥ 2190
न्यक्का महाद्रोन्न धन्योदयौ नगरमागतौ । प्राग्वत्पुनर्जनुम्यानं प्रियौ विभ्रमराभुजः ॥२१९१॥
इत्यनध्यायविच्छेदा वीतपारिप्लवस्थितिः । श्रीः सर्वोत्कर्षकरोत्स्थैर्यं चित्रयेत्पदम ॥२१९२॥
अद्वैतैश्वर्यधर्योपि राष्ट्रं दण्डेन पीडयन् । शम नेतुमशक्योभूत्स भूपस्याग्रनङ्गजः ॥२१९३॥
गन्धर्वानामिवे यामे टिक्के हत्वा व्यसर्जयत् । पौरविद्रोकिं क्रोडेशस्तच्छिरः पार्थिवान्तिकम् ॥२१९४॥
निमग्नहर्षिणा प्राग्वत्तापि नितरां नृपे । तदानीं तत्यमानेन दुर्जनाख्यातिनासकृत् ॥२१९५॥ 2195
क्रोंद्रेश्वरेण रभसादेत्य. परिजनैर्युतः । निशि लोठनदेवः स हार्डियामं तनोतिवद्रात् ॥२१९६॥
महाकथितकन्थोन्थैः सर्वथा राजि सर्वतः । बद्धमंथिर्लवन्यस्त विसस्मर यथागतम ॥२१९७॥
उच्चलादिवदावासु राज्य स रभस भजन । निर्व्युदिभूत्यदोर्योगान्मुहो लोकस्य हास्यताम ॥२१९८॥
तीक्ष्णप्रयुक्तिभि. सैन्यभेदज्ञैश्च क्रोंद्रकम । उपायैर्नृपतिस्तैस्तैस्तेनो हन्तु व्यचिन्तयत् ॥२१९९॥
पतिद्वन्द्वीव तीक्ष्णानां पाटिताक्ष. क्षमाभृताम् । न सभासादयत्कृद्रः पतियोद्धुं त्वचिन्तयत् ॥२२००॥ 2200
स्वैः भ्वैः पदैरादिश्य प्रेषद्रं पृतनापतीन् । स्वयमुच्चावचैः सैन्यैश्चचस्कन्द न पुनः ॥२२०१॥
स भूप रभसायत्त ज्ञात्वान्यपृतनं बली । प्राग्रश्छलयितुं तस्थौ प्रतापैः परिहासितः ॥२२०२॥
लब्ध्वा रणे चित्रयः पृथुसैन्योपि दैवतः । तस्य सैन्यैकदेशेन निन्ये जयविपर्ययम् ॥२२०३॥
भङ्गेनाभङ्गलोकारकल्पनेन किल तेन सः । ततः प्रभृत्यभूद्भयदत्तश्रम्भो दिने दिने ॥२२०४॥
रिल्हणादीन्योधयित्वा व्यूढव्यस्तान्विलानृपः । लब्धन्यो व्यपतत्सायं कम्पनाधिपतेर्बलैः ॥२२०५॥ 2205

२१७३ 1) C शर्मति यो २१७५ 1) Emended with C, A °मान्ये २१८० 1) Conjectural emendation of G (*see manu*) A प्रजा २१९० 1) Emended with C, समर्पयत. २१९१ 2) Emended, A महाजुनो २२०० 1) Emended, A °भुजाम —2) Emended A सप्रसाद २२०४ 1) Doubtful emendation, A भङ्गनामङ्गलो 1, C भङ्गनामङ्गलीङ्गार° २२०५ 1) Emended, A °चैली.

ऊनैः शतादपि भटैर्युतो विद्युत्सैनिकः । सेहे तत्सैन्यरोषं स गजक्षोभमिवाचलः ॥२२०६॥
किं वाच्यः स नरव्याघ्रः प्रवृद्धि याति संगरे । निजवर्मतनुत्राद्रि यस्य मानिं न वर्ष्मणि ॥२२०७॥
मन्दीकृतारिसरम्भमवष्टम्भेन तादृशा । तं त्रिलोकादयः प्रापुर्लवन्याः सैन्यशालिनः ॥२२०८॥
तैः सजातीयदाक्षिण्यात्तटस्थैरपि संकटे । तस्येषदुपयोगोभूत्स्ववीर्यापास्तविद्विषः ॥२२०९॥
काले संनहनं रात्रिजागरः सामतो बलैः । समये ग्रहणत्यागतत्तशुक्तिविकल्पनम् ॥२२१०॥
लब्धभूम्यपरित्यागो जिगीषोरीदृशैर्गुणैः । बलेयुररयोप्यस्य का वैरीकरणे स्तुतिः ॥२२११॥
अविश्वसन्निभृत्यस्ताहक्संरम्भपीडितः । पलायनोन्मुखः शैलात्कोष्टकोथ व्यगाहत ॥२२१२॥
मार्गेष्वकालप्रालेयपातरूढेषु वाजिनाम् । गन्तुं तस्योद्यमं जग्मुः पृथुलप्रा लिखेधिनः ॥२२१३॥
अवमानोपतप्तोथ परिभवपरिच्छदः । स ययौ ज्ञाह्नवीं स्नातुं राजा राष्ट्रादपाकृतः ॥२२१४॥
सोमपालोथ भूपालनाम्ना पुत्रेण खेदितः । दीर्घैरिराज्यदुःस्थार्तः शरणं नृपतिं ययौ ॥२२१५॥
पुत्रौ दत्तवतो नीत्यै नागपालस्य तस्य च । अभयं प्रतिभुग्भार भूभृदाश्रितवत्सलः ॥२२१६॥
वृद्धराजस्य जित्यैव दोस्थ्यस्तेनुरभूदिति । स तदापि नरम्मार्षीत्स्याज्जौदार्यधुर्यधीः ॥२२१७॥
साहाय्यकाय स्वं सैन्यं दत्तवांस्तं महीपतिः । भूयः प्रतिश्रमनयद्यपशमनाद्विषाम् ॥२२१८॥
स्थित्वा युगद्यं व्यावृत्तः कोष्टकोवान्तरे पुनः । महाज्ञैनं पुरीन्द्वाभूद्वैराज्यैस्थापनोद्यतः ॥२२१९॥
अर्कोपरागे प्राप्तः स कुरुक्षेत्रमवाप तम् । लवन्त्य कार्यतस्त्यक्तपूर्ववैरो नृपात्मज ॥२२२०॥
आहूतो लोढनः पूर्वमायातस्तेन डामरम् । निशम्य तं संवलितो विप्रः प्रायाद्यथाक्रमम् ॥२२२१॥
विजयेशाग्रतः पीतकोशोपि नृपतिद्विषः । प्रविविक्षुनृपैर्दिष्ट सोमपालो दुरासदः ॥२२२२॥
आगामनाय भूभर्तुस्तत्पुत्रः कोष्टकं पुनः । प्राप्तं स्वविषयेस्मैस्मै कुर्वैर्नीरुपलक्षयत् ॥२२२३॥
अवान्तरं चिरस्थं सकृद्यायासदुर्वहम् । अनिच्छन्तोवन्तिपुरं प्रायं चक्रुर्हि जातयः ॥२२२४॥
उपेक्ष्यमाणास्ते दर्पात्तिनागणितभूभुजा । ज्वलिते ज्वलने देवान्वहवो हुहुवुः शुचा ॥२२२५॥
चक्रे धर्मे मनुनामुत्तस्थेपि तदाश्रितैः । वह्नि गोपालकोप्येकः कारुण्यपवणोविशत् ॥२२२६॥
भट्टस्योद्भटवंशस्य पृथ्वीराजस्य नन्दनः । युवा विजयराजाख्यः सानुजो गाढदुर्मनः ॥२२२७॥
देशान्तरं जिगमिषुर्विषमं वीक्ष्य तत्र तत् । व्याजहारानुजन्मानं कारुण्यासृक्णान्किरन् ॥२२२८॥
उपेक्ष्यमाणा दाक्षिण्यस्तम्भितेन महीभुजा । विशः सचिवपाठीन विवशाः पश्य नाशिताः ॥२२२९॥
छन्दानुवृत्त्यामात्यानां यत्र क्ष्माभृदुपेक्षते । कस्तत्रान्यस्तु दीनानामापत्त्रमर्थिता विशाम् ॥२२३०॥
यद्वा न्यायेयमन्योन्यस्पर्धया यदुपद्रुतम् । शमिता दण्डयेत्तास्यं शमितारं परोथ वा ॥२२३१॥
विभृद्भुलं नयेच्छय्यां दाहर्चसार विवह्नेः । कदाचिदोहमश्मानमश्मा लोहं कदाचन ॥२२३२॥
दोषेणैकेन न ह्येष्यो राजा सर्वगुणोज्ज्वलः । क्वचित्क्वचित्तस्यान्यद्विधेयं नावभाति मे ॥२२३३॥
धर्मः सर्वोपकार्येकक्षुद्रक्षपणमुच्यते । जघानाजगरं सोपि जन्तूनामन्तकं जिनः ॥२२३४॥

२२०६ 1) Emended, A सह २२२९ 1) Emended; A सङ्कुचितु २२२४ 1) Emended with C, A सङ्कुचासः. २२३० 1) Emended with C, A apparently मान्याना.

दुर्वृत्तदमनेस्माभिः कृते तेजस्विनो जनात् । भूयोप्यधिकृतो ब्रिभ्यन्न कश्चित्पीडयेत्प्रजाः ॥२२३५॥ 2235
कायस्यास्य परित्यागादनन्ता जन्तवो यदि । सुखिनः स्युरसौ भ्रातर्वणिज्या ज्यायसी न किम् ॥२२३६॥
संभुञ्जानं स तथेत्यथ तं कोशपीयिनम् । विधायानुसमारित्य हन्तुं चित्ररथं तदा ॥२२३७॥
कालेस्मिन्धर्मदैर्बल्यकलुषेपि कलेः किल । प्रभावो भूमिदेवानां द्योततेत्थाप्यभङ्गुरः ॥२२३८॥
ब्राह्मणैरपरिक्षीणपूर्णपुण्यो न कश्चन । धैर्यमारभते भ्रष्टदुष्टोत्पाटनपाटवैः ॥२२३९॥
द्विजानुद्वेजयन्मुञ्जिर्हिंसादेवासदद्रुधम् । विप्रणैव हतश्चित्ररथो विप्रावमानकृत् ॥२२४०॥ 2240
द्विजोत्थापितयाक्रान्तचित्तोसौ कृत्यया ध्रुवम् । दध्यौ तस्य वधं प्राणान्विना कारणमुत्सृजन् ॥२२४१॥
कृशानुसादकृपत विप्रा देहान्यदैव ते । तद्वैषम्यतुल्यसंघर्षे तदैवासीद्वितानुगः ॥२२४२॥
अनासादयतश्चित्ररथं पृथुबलान्वितम् । गणरात्रमभूद्धन्तुर्दिवारात्रं प्रजागरः ॥२२४३॥
स ह्यपर्यन्तसामन्तसीमन्तितपथो व्रजन् । अभूद्दृश्यो दृश्यश्च जनसंबाधमध्यगः ॥२२४४॥
तेन साश्वर्यनैश्चल्यनिश्चुरेणैकदा जवात् । सोनुसस्रे व्यतिक्रान्तनिःश्रेणिर्नृपवेश्मनि ॥२२४५॥ 2245
विलम्बितस्य स्तम्भार्थे कृपाण्या मुष्टयश्वास्य सः । सामन्तमध्यगस्यैव प्राहरत्तीव्रसाहसः ॥२२४६॥
मुमुर्षोरिव तत्रास्य वैहत्यगलितस्मृतेः । उद्भ्रान्तचक्षुषो वर्चश्च्यवनं समपद्यत ॥२२४७॥
प्रमापितोयं राज्ञेति ज्ञात्वा सत्त्वबहिष्कृताः । चित्रस्तास्तं तथाभूतमत्यजन्ननुजीविनः ॥२२४८॥
तं क्षीणजीवितं ज्ञात्वा न तीक्ष्णः प्राहरत्पुनः । प्राग्रं हितीयनिःश्रेण्या भ्रातरं निषिषेध च ॥२२४९॥
न पलायिष्ट निर्वैरसर्वमार्गोपि घातितः । राजा चित्ररथः शश्वदिन्दुधीः शोधकारसः ॥२२५०॥ 2250
प्रनष्टे भूटमांसादिराज्यभोगपुरःसरैः । सर्वैः कापुरुषैस्त्रासादय चित्ररथानुगैः ॥२२५१॥
ज्यायांस्त्रोटरथस्तस्य भ्राता भीत्या पलायितः । शरणं नर्तकीमेकां ययौ वक्त्रार्पितस्तनः ॥२२५२॥
नाटक्यवेशिनश्चित्ररथोभ्यर्णं महीभुजा । मा भैषीः प्राहरत्कस्त्वामित्युक्त्वाश्वासितः स्वयम् ॥२२५३॥
नृपाज्ञया को निहन्ता हारेशस्येति वादिभिः । तीक्ष्णोन्विष्टो भटैः सोहमित्युक्त्वा स्वं न्यदर्शयत् ॥२२५४॥
धीरो योधान्स्वधैर्यात्तलङ्घनभाव्यविक्रमः । त्रिंशद्द्वित्रांस्त हत्वाथ प्रहृत्य चरणे हतः ॥२२५५॥ 2255
परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥२२५६॥
लब्धा लिखितनत्कृत्यकारणा पत्रिका करात् । तस्यान्तसमयाशंसा श्लोकेनानेन पावनी ॥२२५७॥
अरुच्युन्मादहीनत्वद्युतश्चित्ररथस्ततः । रूढव्रणोपि लालाटसंविवेशादजायत ॥२२५८॥
स मामान्पञ्चपान्याप्य निराप्यायकृशाकृतिः । विवेष्टमानोर्वारिष्ट शयनीयतलेन्वहम् ॥२२५९॥
मल्लार्जुनं पुरस्कृत्य कोष्टकी विप्रयोन्मुखः । तन्मध्ये तरुसंबाधं गिरिदुर्गमगाहत ॥२२६०॥ 2260
मां मामभ्रमयं भ्राम्यन्स्वयुध्यसनोद्यमात् । अविस्मृतापदं लोकं पुनर्द्वैराज्यशङ्किनम् ॥२२६१॥
अकाण्डाम्बुदजाश्चैन पीडिताङ्ग इवाभजत् । परचक्रोदयेनापु लोकः शिथिलशक्तिताम् ॥२२६२॥
तरुदुर्गं तदकृशक्रोडोड्याप्यथ सर्वतः । व्याप्तोपान्तवनयामैः सचिवैः स न्यरोधयत् ॥२२६३॥

२२३५ [1]) Misread in C दुर्वृत्तहसने°. २२४६. [1]) Lacuna in A स्तम्भार्थे. २२५१ [1]) Emended with C, A प्रनष्ट. २२५३ [1]) Emended with C, A भैषीन्मा° २२५६ [1]) Compare for this verse *Bhagavadgītā* IV 8 २२६२ [1]) The text of the first *pāda* is corrupt, perhaps read स समभ्रमयद्भ्रा°. २२६३ [1]) A °कोप°

सञ्जपाले यवनकैः स्कन्धावारं निबध्नति । अनुचक्रुर्द्विषोत्पन्दाश्चिवातस्तिमितांस्तरून् ॥२२६४॥
धन्योपि शिलिकाकोड्डपर्यस्तकटकोभवत् । गन्धद्विषी गजरिपुः सिन्धुरस्येव वैरिणः ॥२२६५॥
आवासितबलो राज्ञा गोवासे रिल्हणोकरोत् । अटवीं पर्यटन्धूकानिवाकौ बुडितानरीन् ॥२२६६॥
तीव्रशक्तेर्नृपस्यैवमारम्भैः स्तम्भितोभजत् । कोष्ठेभ्यस्तिचतुरान्मासान्संचारभृत्यताम् ॥२२६७॥
क्लिष्टो देशान्तरे राट्टानन्तरैर्न्यकृतो नृपैः । भिन्नस्त्ववर्गो भूमर्तृभृत्यव्यर्थीकृतोश्रमः ॥२२६८॥
बालिशत्वादकुशलो ज्ञातुं वृत्तिं महीभुजाम् । स विस्मृतागाः संधातुमैच्छच्छिन्नपदो नृपम् ॥२२६९॥
उज्जिहीर्षोः प्रभोर्मन्यं वाच्यं तद्भञ्जनाद्दिदन् । भक्त्यैकामः सञ्जपालस्तस्यैच्छां तामपूरयत् ॥२२७०॥
तथानोपि रिपुं राज्ञः संधित्सुर्न्यमहीक्षि सः । पृथ्वीन्द्रप्रसृतानां निर्द्रोहत्वं न कौतुकम् ॥२२७१॥
तेन प्रहिण्वता राजवैरिणं स्वकराङ्कुलिम् । छिन्दतापि महीभर्तुर्मन्युश्छेत्तुं न पारितः ॥२२७२॥
कण्ठबद्धशिरःशाटः शीर्षेणोपानहं वहन् । भुक्तवेलोपि भूपालं कर्तुं नाशकदक्कुधम् ॥२२७३॥
अस्वीकृतद्वित्रभूभुक्षाञ्छनः स हि राजवत् । तत्तत्प्रत्युक्तभूपाज्ञः सर्वं गर्व्याव्यवाहरत् ॥२२७४॥
शुभाव बद्धं तन्मध्ये यातं मल्लार्जुनं नृपः । अनुबध्नाति भव्यानामुदयेभ्युदयान्तरम् ॥२२७५॥
नीयमानः स हि स्कन्धमधिरोप्यानुजीविभिः । अजाङ्किकतया मागोल्लङ्घनायासनिःसहः ॥२२७६॥
ततस्ततो भयस्थानासिस्तीर्णो लोहराशितम् । सार्वाणिकाभिधं यामं प्राप्तो विन्यस्तरक्षिणा ॥२२७७॥
निरुद्धो जग्गिकाख्येन उक्कुरेण महीपतिः । प्रियंकरं तं च भृत्यं शुभावान्तिकमागतम् ॥२२७८॥
बद्धप्रायोरिणा दुर्गान्निर्गतः स कथंचन । बद्धस्तेन पुनः शक्तिः कस्य भाग्यर्थलङ्घने ॥२२७९॥
गङ्गा शुमार्गलुठिता जउरात्कथंचिदेकस्य संहतवतो निसृता महर्षेः ।
यस्तापरेण कृतसागरगर्तपूर्तिः शक्तो न कोपि भवितव्यविलङ्घनायाम् ॥२२८०॥
जग्गिकं बद्धसंप्राप्तिपर्यन्तोपान्तरक्षिणि । राज्ञोदयद्वारपतिः प्रायोज्ञि प्राज्यबुद्धिना ॥२२८१॥
तं विना धैर्यगाम्भीर्यशौर्यधुर्यं महाधियम् । संकटे न ह्यवद्यम्भो राज्ञाज्ञाय्यन्यमन्त्रिणाम् ॥२२८२॥
स ह्यतिक्रम्य साबाधान्मार्गानुभयवेतनैः । तमोरिस्थितमद्राक्षीत्तं क्षमापतिविद्विषन् ॥२२८३॥
निष्ठाभून्येन धैर्येण शौर्यसंभावनावहः । स्तुवन्स तं बहिः प्राप्तं तत्तदुक्त्राव्रवीत्पुनः ॥२२८४॥
सर्वतो ज्यायसीं भर्तृभक्तिं यो बहु मन्यते । भवान्धुर्यो मतिमतामाहतो लोभनातुरैः ॥२२८५॥
कृता रक्षामणिसमं सहायं त्वादृशं विना । हानिर्मे दुर्नरेन्द्रस्य बाल्ये राज्ये बहुच्छलैः ॥२२८६॥
तुष्येक्षणाणां भवत्येव नियमाद्राजभास्वताम् । भाग्यान्तर्हेमन्तदिने जननेत्रविलङ्घता ॥२२८७॥
शोभते रुधिरातास्रमण्डलामो ययोदये । तथा योस्तमये भास्वानिव वन्धः स भूपतिः ॥२२८८॥
धन्योवतारो यस्यासीत्क्षुभ्यत्पौराङ्गनाजनः । उदयेस्तमयेप्युमे रागव्यप्तारोगणः ॥२२८९॥
पदे प्रयोगं लब्ध्वार्थे किंचित्कृत्वा कुलीनवत् । अहं कविरिव प्रौढः प्राप्तो निर्व्यूढिमूढताम् ॥२२९०॥
सत्यंकारोधुना भूत्वा विधत्तां स्वान्तदुःस्थितिम् । साध्यत्वानतिवृत्तेन वरेणैकेन मे भवान् ॥२२९१॥

२२६४. [1]) A. स्कन्वा°. २२६५ [1]) A सिन्धुरस्येव. २२६९. [1]) A बालि°. २२७१ [1]) Emended; A स्कन्धम [2]—[2]) Emended; [3]बद्धनाव स त्रि°. २२७९. [1]) Emended, A शक्ति.—[2]) Emended; A भाग्यर्थ°. २२८१ [1]) Doubtful, A जग्गके; cf. viii. 2278.

इत्युक्त्वा प्रत्ययोत्पत्त्यै संस्पृष्टुं स्फाटिकं ततः । सपीठं पुरतो द्वारपतेर्हस्तमुपानयत् ॥२२९२॥
अच्छलाहृतसंमर्दप्रासभूलेपुवार्षिणः । योधान्योढुं वरं मार्यं मानवाजूनमिच्छति ॥२२९३॥
इति संभाव्य संस्पृष्टशिवलिङ्गः स वाङ्मितम् । वरं तस्योररीचक्रे स च भूयो जगाद तम् ॥२२९४॥
आकृष्टदृष्टिरहतः क्ष्माभुजोन्तिकमक्षतः । यथेदृगेव प्राप्तोपि तथा त्वामर्थयेधुना ॥२२९५॥ 2295
कार्पण्योपहतं तस्य वचः श्रुत्वा ऋषाजडाः । सर्वेप्युर्वीमुखास्तस्थुर्वृष्टचाद्रीः पक्षवा इव ॥२२९६॥
अन्तक्षणस्ततो भिक्षोः स्मर्यमाणः सचेतसाम् । विक्रमसहेतुतां प्राप स्वस्थस्य मनसः पुनः ॥२२९७॥
मनुष्यवाह्यमारूढः पत्तं निन्ये स निस्त्रपः । तेन स्वपालिताल्लोकानपि पश्यन्नविक्रियम् ॥२२९८॥
अहीनाहारनिद्रादिवैवश्यः पशुवत्पथि । कृष्यमाणः स केनापि न विकल्पेन पस्पृशे ॥२२९९॥
पश्यन्नानीयमानं तं गोप्तृभिस्तादृशं जनः । दयार्द्रहृदयश्चासीन्नाभ्यनन्दच्च भूभुजम् ॥२३००॥ 2300
उवाच चानुकम्प्येस्मिन्नन्यैरुद्यस्य भूपतेः । नैतावद्भाति नैर्घृण्यमनुजे पितृवर्जिते ॥२३०१॥
असेचनकमेतस्य मेचकाञ्जनदर्शो वपुः । क्लेशगर्भमनिर्स्विशचेताः कः कर्तुमर्हति ॥२३०२॥
पूर्वापरानुसंधानवन्ध्यस्तं दृष्टवांस्तदा । विस्मृतागा नृपं तत्तद्दिव्युपालभताध्वनि ॥२३०३॥
गणना काप्य वा बालबालिशादौ विधीयते । न चित्तवृत्तेरैकाग्र्यं महतामपि सर्वदा ॥२३०४॥
श्रोतृणां शृतपाल्यालेकिशकृत्यादि शृण्वताम् । पाण्डवेभ्योधिकः क्रोधो धार्तराष्ट्रेषु जायते ॥२३०५॥ 2305
कृष्णां क्षतजापाने भीमोरोर्भूर्धनाडने । श्रुते पाण्डवविद्वेषस्तेषामेव च दृश्यते ॥२३०६॥
परावरज्ञः कार्याणां न कश्चिन्मध्यमं विना । तटस्थेनुभवाभेदस्तत्र तत्र कथं भवेत् ॥२३०७॥
स पौरान्रोदयन्नुच्चै छिन्नाङ्गुल्यङ्गमुद्वहन् । युग्याधिरूढो मृत्पात्रं सायं नगरमासदत् ॥२३०८॥
न्यधत्ताभ्युन्नताभुक्तपञ्चदश्यां महीपतिः । एकादशेऽह्नि तं रक्षियुतं नवमठान्तरे ॥२३०९॥
त्यक्ताहारस्य च निशाः पञ्चषस्तस्य तास्यतः । पार्श्वं जगाम कारुण्याच्चरणस्पर्शनार्थिनः ॥२३१०॥ 2310
अवादीदार्थितं तस्मै प्रतिभुभुवुवेभनम् । द्रोहावेकान्ततो वध्यौ स चित्ररथकोष्टकौ ॥२३११॥
राजा निर्जग्मुषः स्तोर्वी कोष्टकस्यथ बन्धनम् । विधित्सुः पञ्चपानाम्निल्लहणादीनचूचुरत् ॥२३१२॥
सर्वेषु गलितौजःसु स्वयं राज्युपमस्पृशि । अथ तं स्निग्धणो दीर्घ्यां झर्षं प्राह इवायहीत् ॥२३१३॥
हतशत्रुः स बलिनस्तस्य दोष्पञ्चरान्तरे । तस्थावनेष्टो निद्रान्धो भूतेनेवामनीकृतः ॥२३१४॥
भ्रातृभ्यो भिःखरा जाख्यः कुलराजस्य कोपनः । भूभृद्वत्तया कृपाण्यास्य निर्बिभेद कृकाटिकाम् ॥२३१५॥ 2315
परश्वधेन मूर्ध्नेनं पृथ्वीपालश्च ताडयत् । राजवीजी स च क्रोधाज्यधिषत महीभुजा ॥२३१६॥
कृकाटिकास्थिसंजातमर्मवेधोपचेष्टितः । विवेष्टमानोर्वीतिष्ट क्षितौ स रुधिरोक्षितः ॥२३१७॥
महाबलैः कमलियप्रमुखैस्तस्य सोदरः । चतुष्कः पातितोप्युच्चैर्यां गण्डशैल इव द्विषैः ॥२३१८॥
विलोक्य वैकल्यहतौ बद्धौ तौ स्वामिनौ तथा । कृष्टासिधेनुरुत्तस्थौ द्विजन्मा मल्लकाभिधः ॥२३१९॥
उभावचेषु प्रहरन्स भूपालोपजीविषु । अंतर्क्यमाणस्तमुकं राज्ञैवालक्ष्यतापतत् ॥२३२०॥ 2320

२२९३. [1]) A माऽर्यं. २३००. [1]) Emended, A जना २३०४. [1]) A °वालि° २३१५ [1]) A नि×ख°. २३१९. [1]) Emended with C, A स्वामिनो

नृपान्तिकादापतन्तस्तांस्तान्धन्तं महाभटान् । अधावन्सासिधेनुस्तं कुलराजो महौजसम् ॥२३२१॥
प्रतिप्रहर्तृषु क्षिप्रापतत्पाणिमपारयन् । निहन्तुं संरुरोधेव भित्तौ व्यायामविह्वलम् ॥२३२२॥
अपयातुमवस्थातुं प्रहर्तुं वाप्यशक्नुवन् । तस्थौ च बहुसंधानः संस्तम्भैनमविक्षतम् ॥२३२३॥
चरणास्फालनोत्फालदोःशब्दमुखरोन्तिकम् । धाविते पद्मराजेथ मल्लकोक्षिपदीक्षणम् ॥२३२४॥
2325 प्राहरत्कुलराजोस्य लब्धरन्ध्रोथ वक्षसि । प्रहत्य गच्छतः पाणेः स तस्याङ्गुष्ठमक्षिणोत् ॥२३२५॥
तौ विज्जराजे दर्पोष्णनिर्विडे प्रहरत्युभौ । तस्मिन्प्रतिप्रहरति क्षिप्रं प्राहरतां ततः ॥२३२६॥
स त्रीण्यभियोक्तॄंस्तांस्त्यक्त्वा दृक्पथमागतम् । चतुष्किकाद्वारगतं राजानं समुपाद्रवत् ॥२३२७॥
लक्षीभूते नृपे शीघ्रमनुधावन्ससंभ्रमम् । चकार कुलराजस्तं स्फिगग्रस्थिक्षतिनिर्नवम् ॥२३२८॥
ततः सर्वैर्वृतो योधैः क्रीवाक्रीवान्स सत्वरम् । हत्वाभजद्वीरशय्यां रक्तस्यन्दोत्तरच्छदाम् ॥२३२९॥
2330 जीवद्व्यापन्नस्वामिवीक्षितः श्लाघ्यविक्रमः । स एवास्फलणीयान्तक्षणो वीरेष्वगण्यत ॥२३३०॥
बहिः कोष्ठकभृत्येषु विद्वत्तेष्वदरिद्रताम् । परे जनकचन्द्राख्यो धैर्येणोवाह डामरः ॥२३३१॥
निरायुधो राजभृत्याद्धत्वैकस्मात्परश्वरम् । स युयुद्धापदुत्तत्वं नयन्भूरीन्यमान्तिके ॥२३३२॥
वियासोस्तस्य चण्डांशुमण्डलं परभुः करे । सुपुण्यांसविभागार्थी शशिखण्ड इवाविशत् ॥२३३३॥
नाद्राक्षम नाश्रौषम वापि बद्धे भर्तरि यत्तदा । कोष्ठकस्य वधूरन्यतिष्ठन्मानवती सती ॥२३३४॥
2335 जीवन्भर्तर्यपि लभ्येत त्वया स पतिरित्यसौ । बन्धुनामवधीर्यैक्ति प्राविशद्यदुताशनम् ॥२३३५॥
सप्तार्चिर्योपिदाश्लेषपर्यकेल्विषदूषितः । तस्याः सतीलोकगायाः पादाभ्यां पावितोनलः ॥२३३६॥
वमन्तस्य सुता धन्योदयभ्रातुः पुपोष सा । शुचिवंशाभिमानेन न डामरवधूवतम् ॥२३३७॥
लवन्यललनाः कुर्युर्वैधव्येपि धनेच्छया । मामकार्थिकुटुम्ब्यादीन्नित्यम्बाभोगभागिनः ॥२३३८॥
मतिव्यामोहनिर्मुक्तवैकृत्यस्याभिमानिनः । तयानुगाभ्यां च कृतं कोष्ठकस्योचकैः शिरः ॥२३३९॥
2340 रूढव्रणोपि किमिसाद्भूतः कैरपि किल्बिषैः । निष्प्राणो गणराजेन कारायां कोष्टकोभवत् ॥२३४०॥
अथ चित्ररथः शोषकृशः कलुषित नृपम् । श्रुत्या मल्लार्जुनेनाभूद्व्यादत्यन्तदुःखितः ॥२३४१॥
पत्नी तस्यैकभार्यस्य प्रिया सूर्यमती सती । परलोकातिथिः पूर्वं विभवप्रतिभूरभूत ॥२३४२॥
देहे याप्यहताप्याये गेहे गतपरियेहे । पत्यौ वैमत्यकलुषे नेषदप्येष पिप्रिये ॥२३४३॥
तीर्थस्थितस्य न स्यान्मे सागसोप्यप्रियं नृपात् । इति सचिन्त्य स प्रायान्मित्रान्मंतुं सुरद्रुगीम् ॥२३४४॥
2345 अथ नानार्थभूयिष्ठां धनाधीशाधिकश्रियः । स्थानात्तत्तस्तत्तस्यस्य पार्थिवोपाहरच्छ्रियम् ॥२३४५॥
कनकांशुकसंनाहचामिरत्नायुधादिभिः । स्वा स्वा प्रकाशिता लक्ष्मीः स्पर्धयेवाधिकाधिका ॥२३४६॥
लोहदण्डोहयमोप्मशोषितो राजपादपः । तल्लक्ष्मीशैलतटिनीसेकेनाप्यायितोभवत् ॥२३४७॥
विप्रेषे चिरनष्टेपि श्रीकन्याणपुरं न यः । वनवासोचितत्रासः शाल्वः सौभमिवात्यजत ॥२३४८॥
अतल्लक्षांशुपृक्तेच चिन्तापाण्डुरवर्त्मनि । बन्दीकृता नरेन्द्रश्रीर्निर्निद्रा यस्य मन्दिरे ॥२३४९॥

२३२३ ¹) Emended with C, मल्लस्यैनं. २३२६ ¹) Emended; A विज्जराजो २३४८. ²) Emended A साल्व सौभिवा°; C साल्वसंऽभूमिवा°.

राज्ञा प्रयुक्तं विज्ञाय विजयः स भवोद्भवः । तीक्ष्णमानन्दनामानमवधीत्तेन चावधि ॥२३५०॥तिलकम्॥ 2350
इत्थं स पपथे तादृक्प्रजापालनशालिनः । सर्वोत्साहमयोनेहा जयसिंहमहीभुजः ॥२३५१॥
तीर्थस्थिते चित्ररथे पादायमहणैषिणौ । भृङ्गारजनकावास्तां तद्वृत्त्यौ व्यक्तचक्रिकौ ॥२३५२॥
प्रचुरोत्कोचदानेन स्वीकृत्य नृपतिं ययौ । भृङ्गारो भग्नजनकः स्वामिश्रीभोगभागितम् ॥२३५३॥
चिरप्रचलितं द्वारमुदये निदधे पुनः । मेघकालः सरित्पूरं प्रतीर इव पार्थिवः ॥२३५४॥
अवश्यभोग्यदुष्कर्मदत्तमर्मव्यथश्चिरम् । कथाशेषोभवच्चित्ररथो मासैरथाष्टभिः ॥२३५५॥ 2355
हास्यावहोप्यविकृतो विकृतोनपास्यो दुर्गन्धिरप्यतिजडोपि गृहीतवाक्यः ।
पूर्वानुभावजयिनो भवति प्रभावाद्यस्य स्तुमस्तमतिसंस्तवमप्रतर्क्यम् ॥२३५६॥
निर्व्यूढराज्युतनाद्यैर्यथेष्टैः प्रागभीष्टताम् । बाल्ये दुर्ललितस्यागाद्भर्तुश्चित्रचेतसः ॥२३५७॥
विमृज्यमानः संप्राप्तसाम्राज्येन दिवानिशम् । क्रमात्स्वीकृत्य ताम्बूलं तेन चित्ररथात्किल ॥२३५८॥
दूत्यैः कृत्यान्तरज्ञत्वं प्राप्तवानाप्ततां गतः । तदन्ते घटयन्त्राज्ञस्तद्भृत्यान्कोशदर्शकान् ॥२३५९॥
तदा सर्वोन्नताशेषमन्त्रिभृत्ये नृपास्पदे । सज्जकस्यात्मनः प्राप भृङ्गारो मुख्यमन्त्रिताम् ॥२३६०॥चक्रलकम्॥ 2360
तस्य वैधेयताभ्यस्तकुदृष्टेरपि दुष्कृतम् । नागुः पात्रार्पणात्तुच्छव्यागित्वेनापि संपदः ॥२३६१॥
योक्तिकशिपुभोग्येन धन्यमन्योपि सोभवत् । धान्यदानवदान्यत्वं गुरूणामाजगाम यत् ॥२३६२॥
पीतं कृतवतो रूप्यं संयोज्य रजतैर्निजैः । विश्वमानं सुरेश्वर्या सायुज्यं तस्य युज्यते ॥२३६३॥
उर्वीशैरपि नार्वाग्भिर्योनुगन्तुमशक्यत । आषाढचामाद्यसंभारो निचिडद्रविणव्ययः ॥२३६४॥
नन्दिक्षेत्रे स तत्रार्यैः प्रणीतश्चण्डकादिभिः । तेन कालानुसारेण पोषितः पञ्चषाः समाः ॥२३६५॥ 2365
नर्माङ्गतायां निःसारो ज्ञातो यः सोधिकारभाक् । अचिन्त्यकृत्यकार्यामीत्स्यामिक्लेद्यप्रभावतः ॥२३६६॥
केलीसज्जैर्युवतिकरजैः कण्डभृपादशायां यस्याज्ञायि त्रुटनमसकृत्कर्मचारेष्वसकृष्टौ ।
सोप्यादिष्टस्त्रिपुरविपुणा प्राप भङ्गं न भोगी शक्त्याधायी क्वचन न परो भर्तुराज्ञाप्रभावात् ॥२३६७॥
तं च स्निग्धणपन्यौ च समाश्लिष्यन्तरंतरम् । कार्ये जनकभृङ्गारावुत्कोचेनापजह्रतुः ॥२३६८॥
कदाचिज्जनकं बद्ध्वा सार्थं भूषणमोक्तिकैः । सपुत्रदारं भृङ्गारो वाष्पबिन्दुनमोचयत् ॥२३६९॥
स तं च जातु निर्विद्य मानहीनमकारयत् । रूक्षकर्म्यापितोत्कोचधनाभ्यर्थनमैथुनः ॥२३७०॥ 2370
अङ्गुष्ठनखनिर्घर्षनर्तितानामिकोर्मिकः । वदन्वामोत्तरीयाग्रमुद्यच्चैः कुञ्चितेक्षणः ॥२३७१॥
भ्रूभङ्गाक्षेपितवलीनिष्पेषतलललाटभूः । पुनरेकस्तयोर्लक्ष्यकार्यो लोकमहासयत् ॥२३७२॥तिलकम्॥
अव्यक्ताक्षरवाचाल्यमीलिताक्षो रटन्बहु । हसन्सकरतालं च संपद्यन्यो व्यभाव्यत ॥२३७३॥
सोल्लेखप्रतिभोन्नीतनव्यानां हास्यवस्तुनि । कथाशरीरं पर्याप्तं नेहशां किमचेतसाम् ॥२३७४॥
सर्वस्मिन्वस्तुतोवाचि काले विगतयोग्यते । जाने तृणतृणां तुल्ये भृङ्गारोर्हत्यगर्हताम् ॥२३७५॥ 2375
यः सर्वकषनिष्कर्म्यदेशपुषीकः क्षमापतिः । पुर्यतां धर्मचर्याभिर्गतः सुकृतशालिनाम् ॥२३७६॥

२३५० 1) A, B २३६० 1) A, B २३६१ 1) Emended, A दुष्कृतम् —2) Thus A, B, C C नात २३६२ 1) A °वदन्य. २३६३ 1) Emended with C, A रूप्य. २३६९ 1) Emended, A भृङ्गार २३७० 1) Thus A, C emends रूक्षकर्मा २३७१ 1) Emended, A कुञ्चितेक्षण, C कुञ्चे क्षण २३७२ 1) Thus A perhaps read with C °क्षेपित?.— 2) A, B २३७४. 1) Emended; A °ज्ञया —2) Emended, A न दृशा

लब्धबोधिरिवार्येश्चक्रे व्यापद्युपक्रियाम् । दावपदस्य दग्धाङ्गोल्लाघत्वमिव चन्दनः ॥२३७७॥
गुरुसूरिद्विजान्धयमभृत्युचितयापि यः । प्रतिपत्त्या संविभेजे संविभाग्यकुटुम्बकम् ॥२३७८॥
प्रासादान्विजयेशादिदेवव्रातस्य शुद्धधीः । सुधादानेन निन्ये च धन्यः कैलासतुल्यताम् ॥२३७९॥
2380 मठदेवगृहारामह्रदकुल्यादियोजने । जीर्णोद्धृतिन्यसनिनस्तस्य चिन्ता निरन्तरा ॥२३८०॥
सकुलार्यातविद्वेषकार्यः सब्रह्मचारिणाम् । स क्रौर्यधाम पर्यायमीदृग्पुण्यैरुपास्यते जडैः ॥२३८१॥
विश्वाप्यायनसप्तसिन्धुभरणब्रह्मादिसंप्रीणनप्रायं कृत्यमुदात्तमेकसमयोपात्तेन दुष्कर्मणा ।
स्वःसिन्धोर्लवुतां गतं सगरजभ्रेणीचितास्थीना[1]ता येन जनाः श्मशानमिव सा योग्या किलास्तां स्थितौ॥२३८२॥
तदन्तरे शिवरथो द्विजः प्रचुरचक्रिकः । कायस्थपाशः पाशेन गलं बद्ध्वा व्यपद्यत ॥२३८३॥
इत्थं पृथ्वीपतिः कृत्वा तत्तत्कण्टकपाटनम् । अपेतविघ्नं सौजन्यनिधौ व्यधित मण्डलम् ॥ २३८४॥
2385 त्रिपक्षावरणापायपायेन पृथिवीभुजः । तैक्ष्ण्यमायान्ति जीमूतमुक्ता रविकरा इव ॥२३८५॥
परिणाममनोज्ञत्वं राजरत्नं स्वयं नृपः । माधुर्याधिक्यमुत्पाको द्राक्षाङ्गम इवाययौ ॥२३८६॥
प्रावर्तयत सातत्यात्क्रतून्वितनदक्षिणान् । विवाहतीर्थयात्रादीन्महितांश्च महोत्सवान् ॥२३८७॥
संविभेजे स्वसंभारैः स क्रिया धर्मचारिणाम् । तेजोभिः कुलशैलानामोषधीरिव चन्द्रमाः ॥२३८८॥
प्रनिज्ञातं सुतोद्वाहप्रतिष्ठादौ पुरौकसाम् । तेनौपयिकसामग्रीदानमव्यग्रचेतसा ॥२३८९॥
2390 दारूणामाकराः कोशवृद्धये ये धराभुजाम् । नवीचक्रे पुरं सर्वं स्वाधीनान्स विधाय तान् ॥२३९०॥
मज्जतो राजकार्येषु तत्त्वविद्भिरिवार्णवे । विस्मितैर्वीक्ष्यते तस्य निष्ठा काष्ठा मुनेरिव ॥२३९१॥
प्राह्णादारभ्य सायाह्नपर्यन्तं चास्य दृश्यते । न तत्कृत्यं गता यत्र नाध्यक्षत्वं विचक्षणाः ॥२३९२॥
अविचारान्धतमसे विद्या व्यद्योतनान्तरा । जयापीडादिमेघश्रीसौदामन्या विलोलया ॥२३९३॥
तेन श्रियं तु विभाप्य स्यास्तुं रत्नप्रभामिव । गुणवैचित्र्यचित्रस्य प्रकाशोनश्वरः कृतः ॥२३९४॥
2395 सूरयो येन ---[2] विक्षतक्षेत्रसंपदाम् । यामीनामाप्रहार्केन्दुं सान्वयाः स्वामिनः कृताः ॥२३९५॥
विदुषां विततोत्सेधसौधास्तद्विहिता गृहाः । व्याप्ताः समर्पयिभिर्द्रुमुत्कर्षमिव मूर्धसु ॥२३९६॥
प्रतिप्रासप्रबंधे प्रशोप्रशे न पथि पान्थता । सार्थवाहं तमालस्थ निर्दोषा विदुषां स्थिता ॥२३९७॥
आसीद्यथार्थराजस्य शयानस्याप्यतिप्रियः[3] । कामं लिङ्गाभिधेकाम्भःसंस्रोभप्रभवो ध्वनिः ॥२३९८॥
निद्राणस्य तथा वेणुवीणादिपरिहारिणः । दयितं तस्य निर्व्यपविद्वज्जल्पविकल्पनम् ॥२३९९॥
2400 काले श्रीललितादित्यावन्तिवर्मादिभूभुजाम् । सिद्धं न यत्प्रतिष्ठादि निष्ठां तदधुना गतम् ॥२४००॥
मठदेवगृहेष्वेवं स्वकालप्रभवेषु यत् । सर्वेष्वेव कृता तेन निर्व्यपाया व्यवस्थितिः ॥२४०१॥
रत्नादेव्या दृढारूढभर्तृवल्लभतामुवः । सर्वप्रतिष्ठाप्रष्ठत्वं विहारः प्रथमं गतः ॥२४०२॥
रिल्हणोथ गुणग्रामबान्धवो धर्मपद्धतौ । बभूव पूर्वपथिकः समस्तामात्यसंततेः ॥२४०३॥

२३८९. [1]) A °कार्यसब्रह्मचारिणा, evidently corrupt, emendation doubtful २३८२ [1]) Conjectural reading; A सरगज°, C सुरगज° —[2]) Thus A, perhaps read °स्पर्शनास्पृता, C °नात् जाता २३८३. [1]) Emended, A °न्तरं. २३९०. [1]) A कोष°. २३९२. [1]) A सायाङ्क°. २३९५ [1]) A, indicates a *lacuna of three aksharas*, C supplements संघाने.—[2]) Emended with G (*see manu*); A °पहा ×कन्दु २३९८. [1]) Emended; A °प्रतिश्रियः, cf. the passage ii. 126, to which evidently reference is made here. १४०१. [1]) Perhaps read °ध्वनं.

तपोधनांल्लब्धवर्णान्धर्मवृद्धांश्च शुद्धधीः । विलम्भमवनस्योपि शक्तस्यकुं न यः क्वचित् ॥२४०४॥
कृष्णाजिनोभयमुखीदानमुख्यैः सुकर्मभिः । धर्मकन्याविवाहैश्च यस्याभून्यत्वमायुषः ॥२४०५॥ 2405
सर्वेषामाहिताग्नीनां निष्पत्त्यूह्या महात्मना । सर्वयागोपकरणैर्येन विश्राणितैः क्रियाः ॥२४०६॥
भोगान्बुभुजिरे भव्यान्सत्ते सूत्रितविस्मये । यस्य वर्णाश्चतुःषष्टिः कुटुम्बस्पृष्टचेतसः ॥२४०७॥
अग्रहारगणोद्दामैर्वर्तनैर्मठसेतुभिः । पुरे परिष्कृते येन हयोः प्रवरसेनयोः ॥२४०८॥
आद्ये प्रवरभूभर्तुः पत्तने प्रत्तविस्मयः । प्राप्तः प्रतिष्ठाप्रश्नत्वं यत्कृतो रिल्हणेश्वरः ॥२४०९॥
लोकान्तरगतां कान्तां कृतिनोद्दिश्य सुस्सलाम् । भंलेरकप्रपास्थाने विहारस्तेन कारितः ॥२४१०॥ 2410
मार्जारयास्तिर्यगुचितस्नेहविस्मृत्यपोहतः । मृतामनुमृतायास्तन्नाम्ना यः ख्यातिमागतः ॥२४११॥
तद्भर्तुरीर्ष्याकालुष्ये तस्या दूरापगा पुरः । प्रदेशे मानुषीवासीत्प्रिया क्रीडाविडालिका ॥२४१२॥
तीर्थप्रस्थानदिवसादारभ्यास्या विराविणी । उत्सृजन्त्याहृतं भोज्यं सा शुचा जीवितं जहौ ॥२४१३॥
आरोहति परां काष्ठां प्रतिष्ठाविधिधाधना । दिष्ट्या नृपतिपत्नीषु मन्त्रिस्त्रीषु तु सुस्सला ॥२४१४॥
श्रीचक्रुणविहारं या यातं नामावशेषताम् । अदभ्रप्रासादवेदमादिकर्मणा निर्ममेधुना ॥२४१५॥ 2415
अरघट्टप्रबन्धान्पुच्छात्तशालादिकर्मभिः । तस्याः संपूर्णतां पुण्यप्राकारा निखिला गताः ॥२४१६॥
पूर्वराजकुलाखण्डस्थण्डिलव्यापिनाखिलम् । तद्विहारेण नगरं नीतं नेत्राभिरामताम् ॥२४१७॥
प्राप्ति प्रतिष्ठयेवाशु यत्नमक्षपितया तया । विपत्तिः श्रीसुरेश्वर्या प्राज्यसाम्राज्यदूतिका ॥२४१८॥
मठाग्रहारा धन्येन वल्लभाभिधया कृताः । नाभीष्टं लेभिरे नाम ख्यातिः पुण्यैर्विना कुतः ॥२४१९॥
अग्रहारमठांस्तद्वदुदयः कम्पनापतिः । कृत्वापि स्वाभिधामेव तत्संबद्धां सदाभृणोत् ॥२४२०॥ 2420
उदयद्वारपतिना सह ब्रह्मपुरीगणैः । कृते प्रष्ठे मठे शोभां लेभे पद्ममरस्सटः ॥२४२१॥
भृङ्गारतन्त्रपतिना श्रीद्वारेण्यन्यजन्मना । प्रत्यष्ठापि मठोद्यानदीर्घिकाश्चनघात्मना ॥२४२२॥
स्नानकोष्ठमठब्रह्मपुरीसेत्वादिकर्मणा । सोलंचकारालंकारो बृहद्ब्रह्माधिपो धराम् ॥२४२३॥
बुधः सदौषधीशान्तिहेतोर्जातः कलावतः । यः कपिर्दानवत्त्वं च ख्यातस्यागेन योजयत् ॥२४२४॥
नृसिंहसेवी निर्हसद्धिरण्यकशिपुप्रदः । वराहसमये दत्तगौश्च योपूर्ववेण्णवः ॥२४२५॥ 2425
भट्टारकमठाभ्यर्णे पूर्णवापीविचप्रहिः । मठः भृङ्गारभट्टस्य ख्यात्यानौचित्ययोज्झितः ॥२४२६॥
सांधिविग्रहिको दार्वाभिसारोर्वीभुजोकरोत् । अष्टमूर्तेर्ग्रहनामा प्रतिष्ठां पुण्यकर्मठः ॥२४२७॥
पुष्पाकरप्रणयभूः सुभगा त्रिभुतिरेकस्य हन्त करवीरतरोर्दुमेषु ।
पुष्पाणि यस्य सफलीकुरुते स्वयं तत्पादुर्भवत्किमपि लिङ्गमनङ्गशत्रोः ॥२४२८॥
त्रिभूत्या संविभक्तेषु भूभुजाखिलमन्त्रिषु । उत्कर्षकोटिं भुट्टाख्यः परं जल्हानुजोहति ॥२४२९॥
स्वयंभूः प्रकटीभूय पूजां स्वीकुरुते स्वयम् । ज्येष्ठरुद्रो वसिष्ठस्य यस्य वा बालकेश्वरः ॥२४३०॥ 2430
सविहारमठोदग्रवेदमभिः कलुषोज्झितम् । तेन तत्र कृतं भुट्टपुराख्यं पुटभेदनम् ॥२४३१॥

२४०४ 1) Emended with C, A तपोधनाङ्ग°. २४१० 1) Thus A, cf. vii 1239, where बलेरकप्रपा°. २४१३. 1) Emended with C, A उत्सृज्ज° २४१४ 1) Emended, A °ष्णा. २४२५. 1) Doubtful emendation, A °कशिपुप्र , without indicating the *lacuna*; C °कशिपुच्छद २४२९. 1) Emended, A उत्कटकोटिं २४३१ 1) Emended, A °पाज्झित.

नगरेऽपि हरः प्रत्यष्ठापि भुट्टेश्वराभिधः । सरश्च मडवाग्रामे धर्मविभ्रमदर्पणः ॥२४३२॥
नीत्वा प्रतिष्ठां वैकुण्ठमठादि स्वविहारभूः । रत्नादेव्या दृढं चक्रे स्वार्थयथनसुस्थिरा ॥२४३३॥
रत्नापुरं बहुद्वारमहार्घे निरघो मठः । धत्ते सुकृतहंसस्य स्फीतवीतंसविभ्रमम् ॥२४३४॥
मृत्युञ्जयो राजनेस्याः सुधाधौतान्भजन्गृहान् । जनस्यानित्यतोच्छित्त्यै श्वेतद्वीपं सृजन्निव ॥२४३५॥
गोकुलानां विधातारो गोकुले विहिते तया । गणिताः शुल्वमार्गाद्याः सतृणाभ्यवहारिणः ॥२४३६॥
गवामव्याहतस्वैरसंचारचरकाङ्क्षिते । तत्र वैतस्ततोयाढ्ये यदपोढामयं वपुः ॥२४३७॥
मुकुन्दस्तत्र साश्चर्यसौन्दर्यौदार्यमन्दिरम् । अश्वा गोवर्धनधरः सिद्धा ना विश्वकर्मणः ॥२४३८॥
मठ - - - कृत्वा सा नन्दिक्षेत्रकरोत्क्षितिम् । - - जयवनाद्येषु स्थानेषु च मनोरमान् ॥२४३९॥
दार्वाभिसारंपुर्वाशसुन्दरीदार्यमन्दिरम् । स्वनामाङ्कं पुरं चक्रे तया शक्रपुरोपमम् ॥२४४०॥
उद्दिश्योपगतान्मान्यमहत्तरमुखानपि । प्रतिष्ठा विविधाश्चक्रे सा राज्ञ्याश्रितवत्सला ॥२४४१॥
एवं सर्वाङ्गसामुक्तालंकृतेरथ स क्षितेः । विशेषकाभं भूभर्तृवृषा स्वमकरोन्मठम् ॥२४४२॥
अनुत्सिक्तेन यो दत्तभूरिधामो महीभुजा । तज्ज्ञैरारोपितः ख्यातिं मुख्यः सिंहपुराख्यया ॥२४४३॥
व्यधात्कारयथेशस्य दौहित्रः सिन्धुजान्हिजान् । निविडान्द्रविडांश्चात्र प्राक्तिसङ्कच्छन्नमध्यगान् ॥२४४४॥
किं वा मठादिनिर्माणस्तुत्या तस्य व्यधत्त यः । भूयः सप्तार्णवगरं कृत्स्नं कृत्सीरमण्डलम् ॥ २४४५॥
जीर्णारण्यसधर्मायं कालदौरात्म्यतो भवन् । देशो धनजनावासैस्तेन भूयोपि योजितः ॥२४४६॥
आरम्भात्प्रभृति क्ष्मापे दीक्षितेभीष्टदक्षिषु । शिल्पिपार्श्वैरपि प्रायो मठदेवगृहाः कृताः ॥२४४७॥
सत्कोशांश्चुकुरत्नादो निरसूयेन भूभुजा । साधारणीकृते पौरास्तांस्तांश्चक्रुर्महोत्सवान् ॥२४४८॥
अकाण्डदुन्दुहिनापातोदीपाद्यैरप्युपद्रवैः । नष्टेषु शालिषु क्षीणं सुभिक्षं तत्र न क्षणे ॥२४४९॥
अद्भुतं चाभवद्राज्ञः भुजा यज्ञिशि रक्षसाम् । केत्वाद्युत्पातजातं च दृष्टं नष्टाश्च न प्रजाः ॥२४५०॥
कोंष्ठ्यश्वगनुजश्छुद्दनामा विहितविग्रवः । आहवैर्गृद्धदण्डैश्च राज्ञा निन्येन्तकान्तिकम् ॥२४५१॥
चक्रे विक्रमराजादीन्भूपानुन्मथ्य पार्थिवः । प्रशेहं गुल्हणादीनां राज्ञां वल्लापुरादिषु ॥२४५२॥
प्रजेशान्कान्यकुब्जादावजयेन नृपार्यमा । स व्यधाद्भव्यभूभोगवैभवानभिमानिनः ॥२४५३॥
विद्योतमाने निश्शेषैर्यमन्त्रैस्तत्रैवमेकदा । भेजे जीवितदारिद्र्यं दरद्राजो यशोधरः ॥२४५४॥
स भृत्यनन्तरोप्यन्तरजो राज्ञोतिसेवया । विपत्तौ प्रकृतिक्रान्तसंतानश्चिन्त्यतामगात् ॥२४५५॥
निकृत्यास्य निजामात्यो विड्डमीडाभिधो यतः । संभुज्य दयितां राज्यमग्रैदतनयेयहीत् ॥२४५६॥
वशीकृत्य शनैर्देशं नाममात्रनृपं शिशुम् । उच्छेत्तुमैच्छच्चावत्तं स जिघृक्षुः स्वयं क्षितिम् ॥२४५७॥
अन्योमात्यः पुरस्कृत्य यशोधरसुतं परम् । तावत्तेन समं भेजे पर्युत्काख्यो विपर्ययम् ॥२४५८॥युग्मम्॥

२४३८ २४३९ [1]) The last two *pādas* of verse 2438 and the following verse are found in the above, mutilated form in A at the foot of fol 290, having been added subsequently by A_1, C reads मठप्रतिष्ठा कृत्वा सा नन्दिक्षेत्रेऽकरोत क्षितिं । विहारान यवनाद्येषु स्थानेषु च मनोरमान. २४४० [1]) The first two *pādas* of this verse have been subsequently added by A_1 at the top of fol 291—[2]) Emended, A दार्वासारं°, C दार्वागारेष्वजू° २४४८ [1]) Emended, A सद्रुम° २४४९. [1]) Thus A_1 originally, corr. by A_1 to शालिष्वक्षीणं २४५१ [1]) Emended with C A निर्यन्तिका° २४५३ [1]) Emended, A प्रजेशा×का° २४५८ [1]) A_1 २ २४५९ [1]) Emended, A °मात्रशिषु नृपम्.,

कश्मीरान्पृष्ठतः कृत्वा हैराज्यं तत्र कुर्वति । उत्सृज्य सञ्जपालादीन्सर्वकार्यभरक्षमान् ॥२४५९॥
हेवाकप्रतिपस्थान्याभिधमौख्यनिरुद्धधीः । सर्वाधिकाराद्यारोपान्मन्यमानोभिमानिताम् ॥२४६०॥ 2460
पर्युत्कात्मर्यतः साज्जेरमीडमनुजं निजम् । प्रहिण्वनोनुमन्त्रित्वं मन्त्रज्ञोप्यभजन्नृपः ॥२४६१॥तिलकम्॥
अपूर्वमण्डलारब्धावाटोपाडामशालिनः । क्व सर्वैकपनिष्कम्पप्रतिभाः कार्यवेदिनः ॥२४६२॥
क्व बालबालिशप्रायो नष्टव्यवहृतिर्जनः । धिक्परीपाकविषमं स्वाच्छन्द्यं मेदिनीभुजाम् ॥२४६३॥युग्मम्॥
कार्यापेक्षविपक्षैः स्वैरिच्छन्त्युद्रिक्तनाच्छिदाम् । सैन्यक्षमादुर्गकोशादेर्न - शन्त्यन्तरज्ञनाम् ॥२४६४॥
प्रक्रियामात्रतो मन्त्रं गृह्णन्ति क्षित्यनन्तराः । कृतसाहायकैरेव चिन्त्या मिश्रमुखा हिषः ॥२४६५॥ 2465
युक्तयारब्धविधी तत्र वैरिसाहायकग्रहे । क्व वैधेया बकप्रायाः कार्यसंदर्भवेदिनः ॥२४६६॥
दराद्राजद्रुमोन्योन्यभेदकुलक्षयाद्युतः । क्रुद्धं नाशक्यतार्पीढैः स्रोतोभिरिव मध्यगः ॥२४६७॥
पर्युत्कात्संकटे कार्ये तं तमुत्कोचमिच्छतः । स दुरधघातमावातुमप्यासीदलसक्रमः ॥२४६८॥
पर्युत्केन समं विष्णुसीहः संधिं निबद्धवान् । यथागतं गते साज्जौ कश्मीरेन्द्रेप्रहीदुषम् ॥२४६९॥
सर्वाधिकारप्रवणाचिरसंचारभूरुहः । प्रसङ्गे तत्र शृङ्गारो मृत्युसौहित्यकार्यभृत् ॥२४७०॥ 2470
आ लक्ष्मकान्तात्सर्वाधिकारोस्थादहिनीयया । वृत्त्या ततस्तु शतधा निर्झराम्भ इवाभवत् ॥२४७१॥
अन्येप्यमात्याः सांमन्याद्भर्तुर्माहात्म्यभागिनः । प्रमयं समये तस्मिन्नैवात्किमपि लेभिरे ॥२४७२॥
प्रशंसामानृशंस्यस्य किं विदध्मो पराभुजः । मृतामात्यार्भकापत्यं निधत्ते यः पितुः पदे ॥२४७३॥
प्रवर्तिता स्वमात्यानां भृत्यैः पद्धतिरद्भुता । निर्वैलक्ष्याः प्रभोर्लक्ष्मीं जहुः स्वगृहिणीमिव ॥२४७४॥
भुभर्तुः प्राभृतीकृत्य मृतस्य स्वामिनः श्रियम् । संतानस्य विभूत्यर्थं कृत्वा कार्यं हि तेहरन् ॥२४७५॥ 2475
गञ्जाधिपे विभ्रनाधि विपक्षे रक्षिता परम् । एकेन सहजाख्येन सहायानां महार्घता ॥२४७६॥
नाध्यारुरोहाधिकारं पार्थिवेनार्थितोपि यः । स्वामिसूनोष्टिष्टनाम्नो बुद्धौ साहायकं व्यधात् ॥२४७७॥
निष्ठायामप्रतिष्ठत्वं दृष्ट्वापि प्रभविष्णुभिः । धिक्परंपरया भृत्याः प्रावर्धन्तेधिकाधिकम् ॥२४७८॥
आसीदाचमनोपयोगि कलशे स्रष्टुर्जगद्रक्षनक्रान्ताङ्घ्रिकमहार्यथासुररिपोस्त्रैस्रोतसं यत्पयः ।
शंभुस्तच्चिदधे स्वमूर्धनि जडेप्येकप्रयुक्तात्मनौ स्युः सर्वेप्यवशा गतानुगतया गाढादराः स्वामिनः ॥२४७९॥
सुज्ञिनिर्वासनप्राप्तप्ररोहो दुर्नयद्रुमः । साज्ज्ञजाद्यकृताप्यायः क्रमेणासीत्फलोन्मुखः ॥२४८०॥ 2480
हित्वाः समाः समन्युः स विष्णुसीहस्ततोभवत् । अकुण्ठराज्यायुक्तण्डं दूनैरकृत लोठनम् ॥२४८१॥
दुराद्रखण्डिनोत्थानः भूरमाश्रित्य भूपतिम् । जीवंस्कृषिवणिज्यादिकर्मणा स सबान्धवः ॥२४८२॥
दरदां मन्त्रिणां जातज्ञातेयैरभियोगभाक् । चक्रेलंकारचक्राथैर्डामरैः सह चक्रिकाम् ॥२४८३॥युग्मम्॥
सोप्यद्रिदुर्गस्वाम्यस्य प्रथमप्रस्थितौ सुहृत् । क्षुद्रो जनकभद्राख्यः पार्श्व लिप्सोर्व्यपद्यत ॥२४८४॥
कर्णाढकादावभवत्स्थाने स्थाने विलोक्य तम् । प्रस्थितं कस्यचिद्गेहे बुद्धिः कस्यापि साधुता ॥२४८५॥ 2485

२४५९. [1]) Emended; A सञ्जे°.—[2]) A_1 1. २४६१. [1]) A °वालि° —[2]) A_1 2. २४६४. [1]) Thus A, perhaps read विप्रस्वन्म°; C न शसन्त्य°. २४६६. [1]) Emended; A apparently वैधेवान्बकप्रायान्कार्यं°, as read in R C. २४६७ [1]) Emended, A °न्योन्यं भेद°. २४६९. [1]) Emended, A सञ्जौ. २४७१. [1]) Emended with G (*sec. manu*); A निर्झरा. २४७३. [1]) Emended with C; A °मात्यर्भका°. २४८०. [1]) Emended, A सुज्ञिनिं° २४८२ [1]) A दूरा°खण्डि°.—[2]) Emended, A जीवंस्कृषि° २४८३. [1]) A_1 2. २४८४. [1]) Doubtful emendation, A साप्यद्रि°.

तं तथा विपुलारम्भमपि शास्त्रादसंभ्रमम् । प्रविविक्षुमुपैक्षिष्ट कौसीद्यानुगमो नृपः ॥२४८६॥
पोषिते प्रेषितश्रीकैरुत्सिक्ते विग्रवैरिभिः । अथोदयग्रहारपतिः क्रौंचे विश्वंभराभुजा ॥२४८७॥
संगृह्णता चमूस्तेन पुरे शंकरवर्मणः । प्राप्तोत्कारचक्रस्य पार्श्वमभावि लोठनः ॥२४८८॥
अपि विग्रहराजाख्यः सूनुः सुस्सलभूपतेः । भोजः सल्हणजन्मा च भुतौ तेन सहागतौ ॥२४८९॥
अथोपह[-]स्थान एव तेषां स सत्वरः । मार्गं बहुदिनोल्लङ्घ्यमेकेनाह्ना व्यलङ्घयत् ॥२४९०॥
सयूथ्यकन्थामथनासिदेर्यातो विधेयताम् । तदास्कन्दहतस्पन्दः स पलायिष्ट डामरः ॥२४९१॥
सिन्धोर्मधुमतीमुक्ताश्रिया अन्तःस्थितं ततः । शिरःशिलाभिधं कोट्टमथ तैरधिशिश्रिये ॥२४९२॥
गहने वृडितः कोट्टे स्थितः किं वा स हत्यसौ । न निश्चिकाय द्वारेशो श्राम्यन्दीर्घासु भूमिषु ॥२४९३॥
अथोपालब्धतद्दुर्गारोहणेस्मिन्नशङ्क्यत । दैवेनापि न भूभर्तुः प्रभावो निष्पराभवः ॥२४९४॥
उत्थानोन्मुखतां सर्वेष्युत्सिक्ते तत्र दस्यवः । पाल्वलास्तिमथो वर्षपृथकृत इवाभजन् ॥२४९५॥
तैस्त्रिलक्कादिभिर्गुंदवैकृतैरथ लोठनः । पार्श्वाद्धरिः पुनश्चक्रे मायाचतुरचाक्रिकः ॥२४९६॥
पुरयामादिदग्धारमसाध्यमथ धन्वताम् । पदे पदे कृच्छ्रगतं स्वपक्ष्यास्तमरक्षिषुः ॥२४९७॥
दिक्चक्रे नियतेर्भ्राम्यन्दयादृश्यः स सर्वतः । कल्पान्त्ययोदयी ब्रह्मपुत्रः केतुरिवाभवत् ॥२४९८॥
श्रान्तैरमात्यैर्निर्बन्धे संधौ कालानुरोधतः । मेने मडवराज्योर्वी हारितेवाखिला जनैः ॥२४९९॥
असंवृत्तपतीकारतयारोहस्तु वैरिषु । तदन्तरेण संमन्त्र्य धन्यं प्रास्थापयन्नृपः ॥२५००॥
तस्स्कन्धारोपिते कार्ये व्रीडां गच्छेत्तटस्थताम् । विपर्यासमथ द्वाराधीश इत्यभ्यधाज्जनः ॥२५०१॥
भिक्षुर्मल्लार्जुनस्त्वासीदेक एव त्रयस्त्वमी । संहता हन्त दुःसाधा दध्युश्चेत्यखिलाः प्रजाः ॥२५०२॥
द्वाराधिपस्त्वहेवाकव्यवहारो महीपतेः । सिद्धिं स्वस्यापसिद्धिं च श्राद्धन्नहशोत्समोभवत् ॥२५०३॥
एकाकी यः किल न भजते मृदृतां भर्तृकार्ये नौदासीन्यं भयति च रुषा बद्धधीने च तस्मिन् ।
निर्हेवाकव्यवहृतितया साध्यसिद्धिं किलेच्छंस्तादृङ्मन्त्री प्रभवति परं नाल्पपुण्यस्य राज्ञः ॥२५०४॥
पञ्चचन्द्रे मृते तस्यानुजं राजोपवेशने । न्यधात्यं पट्टचन्द्राख्यं सोप्यारब्धै विनिर्ययौ ॥२५०५॥
विवाहादयो मुख्य[-]: सह गायकैः । धन्यमेवान्वयुर्बाह्याभ्यन्तरे राजोपजीविनः ॥२५०६॥
धन्यादिषु तिलग्रामं कोटसिन्धुतटाश्रयम् । श्रय[-]द्वारेशो द्रङ्गस्थः पृष्ठपद्धतीः ॥२५०७॥
हठप्रवेशाद्योग्याजिमुख्यहेवाकवर्जितः । शोषयन्हिषतो धैर्यगम्भीरं सव्यवाहरत् ॥२५०८॥
कुठारिकादिभिः कारुवृन्दैर्मन्दिरपद्धतीः । धन्यो मधुमतीतीरे नगरस्पर्धिनीरधात् ॥२५०९॥
निर्घ्वान्तं द्रुमसंबाधं सनिकेता वनस्थलीः । कटकं सर्वभोगाढ्यं शक्तः परिवृढोकरोत् ॥२५१०॥
देशे भूरितुषारोग्रहिमर्तौ भाग्यसंपदा । भूभर्तुरभियोग्यैव भूरभुङ्गानुभूविता ॥२५११॥
भुवनाद्भुतसंभारप्रेषणं विजयैषिणः । द्वैराज्यमीलिताशेषि काले राज्ञो न खण्डितम् ॥२५१२॥

२४८८. [1]) Emended, A च मूर्तेन २४८९. [2]) Emended, A सुल्हण°.—[3]) Emended with C, A °शाला. २४९०. [1]) Thus A, perhaps read अथोपह्रस्या उत्थान, cf. viii. 2513; C अथोपाचित उत्थान. २४९२. [1]) Conjectural reading, A °श्रियस्त्वस्थितं, G (*sec. manu*) °श्रिय अन्ते स्थितं. २४९५. [1]) Doubtful emendation; A °भवन २४९६ [1]) Comp. for this name viii. 2799 2912. 3313.—[2]) Emended; A पाहरि-, cf. viii 2748 2759, 2793, 2837 —[1]) Emended, A °क्रिके २५०१. [1]) A नरस्कन्दा°. २५०६.[1]) A does not indicate the *lacuna*, C मुख्याधारणैः २५०७.[1]) Thus A, perhaps read with C श्रयस्त्वगच्छद्दा°.

उत्थान एवोपहतिं भये यास्यत्यगात्परम् । भारोद्विपीडितापाश्याक्रन्द· क्षान्तिचरूपमाम् ॥२५१३॥
दीर्घप्रवासनिर्वेदाच्चलितान्दर्शयचुचुम् । स्थास्नुंश्च तोषयन्दाप्यैः स्थैर्यं निन्ये नृपश्रमूः ॥२५१४॥
इत्थं चिरतुरान्मासांश्चिन्नद्विरपि निर्जुरैः । नैत्रादातुमशक्यन्त कटकैः कोट्टसंश्रयाः ॥२५१५॥ 2515
नेषां हि वीरधासारनिरोधादीनि दृश्यताम् । अप्रियाणि न जानानि दैन्यदायीनि कानि चित् ॥२५१६॥
चिकीर्षवस्तुषाराद्रे स्वविभूतिप्रकाशनम् । तस्थुरुद्भूरिनोल्लासाः पर्वता इव डामराः ॥२५१७॥
कृषिं कृषीवलैर्वेदपाठमुत्सृज्य च द्विजैः । उत्पिच्छसज्जैर्ग्रामेषु सर्वतः शस्त्रमादधे ॥२५१८॥
प्रतीक्षमाणाः प्रालेयप्रलयं मार्गभूभृताम् । दारदास्तुरगानीकैः सज्जैस्तस्थुर्जिगीषवः ॥२५१९॥
सिंहिकासंहनैः कालतुलातत्पाकुनेर्दधन् । पातभीति जनो राजसेना शब्दवेधत ॥२५२०॥ 2520
इत्थं प्रत्यर्थसामर्थ्यपरमार्थपरीक्षणात् । क्ष्माभृन्मिथ्यैवमारेभे संदेहं च जयेभजत् ॥२५२१॥
वैदग्ध्यदिग्धमनसामयमेक एव कोप्यन्ति वञ्चनविधेरुचितः प्रकारः ।
येनात्मना किल विशङ्कितशक्तयस्ते मुग्धेपि वैरिणि विचारहतोद्यमाः स्युः ॥२५२२॥
पद्यादमात्रसाराद्यस्त्रसेत्परिकरादरैः । स्वयैव तस्य विश्लेष सिद्धिश्चिन्तान्धया धिया ॥२५२३॥
विश्लेषाशु शिलीमुखैः प्रविनरेत्पत्त्रैरवस्कन्दनं बध्नीयात्तदिदं गुणैः परिकरैर्मिथ्या प्रसिद्धैरिति ।
स्याच्चेदम्बुरुहं द्विपस्य भयकृच्चिन्तासहैः साहसं प्रत्यूहेत ततो निजैरपघनैरप्येतदुन्मूलने ॥२५२४॥
लोठनाद्यैर्हि कर्णाहालिस्तीर्णैस्तैः कथंचन । प्राप्तेलंकारचक्रेपे राज्यमज्ञायि निर्जितम् ॥२५२५॥ 2525
मिथ्यैव यथिना कन्था स्वयूथ्यैः कथमन्यथा । तस्मिन्नन्दमास्कन्द धावन्द्वारापिधो ददौ ॥२५२६॥
प्रत्यवस्थित्यसामर्थ्यात्ततः कोट्टं व्यसर्जयत् । स राजबीजिनस्तांश्च परेद्युः स्वयमन्वगात् ॥२५२७॥
कोट्टाद्रिः सलिलस्यान्तः कृशोर्धः पृष्ठदैर्घ्यभाक् । स तैर्वैसारिणीप्रासव्यग्रो वक्र इवैक्षत ॥२५२८॥
निःसामर्थ्यं तद्विलोक्य गजागारमिवागजम् । तत्यजुर्धिजयाशंसां भयं चोदवहन्हृदि ॥२५२९॥
ततः शरैर्दूषद्दूर्षैर्बाध्याश्चेतो विरोधिनः । अर्णसो रक्षणमितो रक्ष्या यन्त्रोपला इतः ॥२५३०॥ 2530
इत्थं स तैरभिदधद्धैर्याधानाय डामरः । मेने स्वगुप्तिमात्रार्थी न युद्धे बद्धनिश्चयः ॥२५३१॥युग्मम् ॥
ततः कन्दलितास्कन्दे तिलग्रामे द्विषद्बले । प्रतीकाराक्षमे दस्यौ ते चिन्ताक्षामतां ययुः ॥२५३२॥
विस्रवाविस्रुतपक्षासौ ज्वो लोठनः पुनः । डामरं कृत्यसंपूर्णमगूढं तमगर्हत ॥२५३३॥
भोजंस्तुद्विजितं यस्ते द्रोहो रोहेदिति ब्रुवन् । रुद्ध्वा पितृव्यं तं व्याजस्तुत्या नित्यमुपाचरत् ॥२५३४॥
विमुखे लोठनेकुण्ठशाद्यस्तस्य तु सान्त्वनैः । मेने मन्त्रज्ञतां किंचित्संभावितेष्टं च संविदि ॥२५३५॥ 2535
हन्यान्मां भूमृदित्येष यातेष्वेतेषु संत्यजेत् । नास्मानुत्क्वेत्यरौत्सीत्स पितृव्यं गमनार्थनात् ॥२५३६॥'
स्वव्यस्मात्तु च सर्वेषु वेटितेषूत्कटा द्विषः । पृष्ठकोपमसंभाव्य कुतश्चित्रश्रलोद्यमाः ॥२५३७॥

२५१३ [1]) Doubtful emendation, A एवोपहन्भय, C एवोपतनभये.—[2]) Emended, A °क्रन्द क्षान्ति° (the letter क्ष is of unusual shape and resembles द्दय), C क्षान्तिचरू°. २५१४ [1]) Emended, A चलितां, another possible emendation would be चलिता दर्शयचुपम् । स्थास्नूश्च २५१५. [1]) Emended, A रुशया. २५२०. [1]) Emended with G (*sec. manu*), A हिमिका°. २५२५ [1]) Thus A, cf कर्णावकर्ता° VIII 2485. २५२८ [1]) Emended, A कृशोर्ध.—[2]) Emended with C, A तैर्वैसारण° २५३०. [1]) Emended, A शरैर्द्विषद्बल°. २५३१ [1]) Emended, A तैरभिदधद्धैर्या°, C तैरभिरुद्धैर्व्या°.—[1]) A, २ २५३४. [1]) Emended, A भोजं, R भोजो २५३५. [1]) Emended, A सान्त्वने, C सान्त्वने.—[2]) Doubtful emendation, A °त्सवर्तिष्ट च, C °त्समवर्तिष्ट स°

यद्यद्विदध्युः सिध्येत्तत्तदेकं त्यज मामितः । अन्यांस्त्रवन्यानानीय दरदो वा जवेन वः ॥२५३८॥
बन्धनं त्वपनेष्यामि युक्तमित्युक्तवांश्च तम् । डामरं विदधे किंचिदिव सांमत्यमाश्रितम् ॥२५३९॥
2540 विमोक्ष्यामि क्षपायां त्वामश्व श्वो वेति तं ब्रुवन् । स त्वसंक्षीणदाक्षिण्यो विप्रलेभे प्रतिक्षणम् ॥२५४०॥
अध्वरोपं सुदूरस्थैर्यथावदकृतेरिभिः । बाह्यमामाहतैरश्वैस्ते त्वहान्यत्यवाहयन् ॥२५४१॥
दुरुदर्कमथाशङ्क्य समयं ते व्यजिज्ञपन् । धन्यादयोऽहितैः संधिर्विधेय इति भूपतिम् ॥२५४२॥
तैस्तैर्निमित्तैः संधानमविधेयं विदन्नृपः । तानादिदेश कर्तव्यं कोट्टाट्टालकवेष्टनम् ॥ २५४३ ॥
संदिदेश च दायादा वञ्चेरन्ध्यातिमागताः । निजास्पदे ताञ्जहति दत्तोत्कोचेव डामरे ॥ २५४४ ॥
2545 भूत्वा कठोरैरप्यारम्भानिष्ठा निःसौष्ठवा ध्रुवम् । क्रियातिपरुषुपालम्भैर्वास्यामोनुशयं विशाम् ॥२५४५॥॥
नात्यक्षद्रूर्षदेवञ्चत्सप्राहान्युद्यमं ततः । दुरुधप्रवाहं प्राप्स्यत्सं भुक्त्वेत्यन्योपि तप्यते ॥२५४६॥
प्राप्तव्यं प्राप्तवान्सर्वो निजैः कृत्यैः शुभाशुभैः । क्रियातिपत्तिर्लोकेर्त्रैलोक्यं तु मुखेर्ष्यते ॥२५४७॥
पादेषु पक्षेषु च सन्तु नोर्व्यां न व्योम्नि वा पक्षपिपीलकस्य ।
पतन्पवच्चङ्क्रमणं तु गर्ते किं संपदा स्याच्चियमे गतीनाम् ॥२५४८॥
सहस्रपादस्य गतेर्निमित्तमनुरुभावेप्यरूणः प्रजातः ।
तस्याभविष्यद्यदि पादयुग्मं ततोधिकं तत्किमिवाकरिष्यत् ॥२५४९॥
2550 उपेक्ष्य साक्षितां तस्मात्कृत्स्नं कोट्टं विवेष्टयताम् । प्रयातु तत्रैवास्माकं तेषां च पुरुषायुषम् ॥२५५०॥
अविश्रान्तो वातो दहन इव सोयं जनयति प्रसक्तिं सातत्याज्जलयति कुलाद्रीनपि जलम् ।
प्रसूते कृत्येषु व्यवसितिरनिर्व्यूढदृढा फलावाप्तिं लोके प्रतिकलमसंभाव्यविभवाम् ॥२५५१॥
क्रूरां नरपतेराज्ञां श्रुत्वा धन्यादयस्ततः । कोट्टप्रतोलीं कूलं तं त्यक्त्वाप्यारुरुहुर्जवात् ॥२५५२॥
कथं युद्धं विधास्यन्ति कथं स्थास्यन्ति वेति तान् । शरान्किरन्तः कोट्टस्था यावत्पश्यन्त कौतुकात् ॥२५५३॥
अधः सोप्यूर्ध्वगान्युद्धैर्नाप्नोद्य निर्विडैर्व्यधात् । धन्यः प्रदेशं तावत्तं निकैतैः पत्तनोपमम् ॥२५५४॥युग्मम्॥
2555 अविश्रान्तैस्ततः संख्यैरसंख्येयश्रमूक्षयः । प्रतिक्षणं प्रवर्तन्ते सैन्ययोरुभयोरपि ॥२५५५॥
परेद्युः शारदां दृष्ट्वा संप्राप्तो गर्गनन्दनः । संक्रन्दनपुरीपौरवृद्धिं योधैर्हतैर्व्यधात् ॥२५५६॥
अलंकाराभिधो वाग्मिराजस्थानाधिकारभाक् । अधृष्योमानुषैर्युद्धैर्विरुद्धान्बहुधात्रधीत् ॥२५५७॥
क्व भूधरचरैः स्पर्धा वसुधातलचारिणाम् । तथापि पृतनायन्त्रानन्त्यं चिन्त्यमचिन्त्यकृत् ॥२५५८॥
अल्पीयांसः कोट्टनिष्ठा भूयिष्ठाः कटकाश्रयाः । अतः पूर्वं बहून्म्रन्तोप्यासन्कृत्याल्पया क्षताः ॥२५५९॥
2560 श्लिष्टद्वाराररिपटं द्विषैः पीडितमाहवैः । मीलिताक्षमिव त्रासात्ततो दुर्गमजायत ॥२५६०॥
गोप्रभेदान्तरद्वैधमुखच्छिद्रानुसारिणः । धन्यादीन्वीक्ष्य विश्रामं कोट्टस्था नोपलेभिरे ॥२५६१॥
निद्राच्छेदार्थमन्योन्यं क्रोशन्तो नास्वपन्निशि । स्वपन्तोह्नि तु निःशब्दभून्यं कोट्टमदीदृशन् ॥२५६२॥

२५३८ [1]) Emended with G (*sec. manu*), A वाञ्चेन, C जवेन. २५४० [1]) Emended with C, A ह्यो.—[2]) Emended with C, सत्त्वसहीं° २५४५ [1]) A कठो°ष्या°, C कठोरोऽप्या°—[2]) Could be read in A also °निहाम्नि°—[3]) A °स्यामोऽशयं C °स्यामोऽसशयं २५४६. [1]) Emended, A प्राप्स्यन्त २५४७ [1]) Emended, A °लोक त्रैलो°, C °लोकेऽपि. २५४८. [1]) Emended with G (*sec manu*); A गर्ते. २५५१. [1]) Emended, A °स्त्रैश्वन्त. २५५४. [1]) Thus A, perhaps read अध स्थो —[2]) A_1 २ २५५६. [1]) Emended with G (*sec. manu*), A °पौरवोपैर्वृद्धिं हतै°

निशासु तत्सैन्यतना यामनूर्यरवैरपि । चटकाः कोटरगता मेघशब्दैरिवात्रसन् ॥२५६३॥
अहर्निशं भ्रमन्तीभिर्नौभिः संरुद्धपाथसः । तान्समभ्रमयन्सर्वप्रकारं राजसैनिकाः ॥२५६४॥
ते रुद्धपाथसस्तर्षशोषं[1] कंचिद्विषेहिरे । निःसंचारास्तु संक्षीणे भोक्तव्ये क्लैब्यमाययुः ॥२५६५॥ 2565
बुभुक्षवः क्षमायोग्यान्भोगान्भाग्योर्जितांस्ततः । कदन्नैर्नृपदायादा अशनार्थं व्यधुः ॥२५६६॥
दूरे स्पर्धास्तु निर्लीर्णाः क्षुधितास्तेधिकं व्यधुः । भूभर्तुर्भोगभागिभ्यो भृत्येभ्योप्यन्वहं स्पृहाम् ॥२५६७॥
व्यूहेष्वस्माच्च पर्याप्तमकार्यमिति भाषिणम् । भोजं व्यधान्मध्यभृङ्गे दुर्गस्थाथ स तं पृथक् ॥२५६८॥
एकस्य वार्द्धकाद्देहयापुवत्त्वादपरस्य च । ज्ञानन्नयोग्यतां मेने हैराज्याहं तमेव सः ॥२५६९॥
विनामुं चानयोः सम्यक्सरम्भेरन्न वैरिणः । इति मिथ्या प्रयां निन्ये तद्दिनिःसरणं बहिः ॥२५७०॥ 2570
कान्तालंकारचक्रस्य काङ्क्षन्ती क्षयमित्वरी । चक्षुरागास्त्यक्षचन्द्रे सान्द्रक्लेहार्द्रतां गता ॥२५७१॥
बहिराभ्यन्तरं भेदं नयन्ती मन्त्रमाययौ । सान्त्वणेः कर्णसरणिं सर्वमन्विष्यतोन्वहम् ॥२५७२॥ युग्मम्॥
रागध्वान्तान्वितधियः प्रतिभेदभयेन सः । तस्य प्रकाशयत्नेनां गन्तुं तु प्रार्थनां व्यधात् ॥२५७३॥
क्षमाद्याडिशक्षितीपेक्षो मैत्रीस्थैर्यै मुदं भजन् । नागः सागस्यपि दधे बोधिसत्त्व इव क्रुधम् ॥२५७४॥
प्रियामन्युः सरागेण मृत्युहेतुर्महानपि । हृदि विस्मर्यते पृष्ठे शरभेणेव वारणः ॥२५७५॥ 2575
अथ प्रस्थापितो भोजः क्षुप्रारिशिबिरान्तरात् । यानप्रायोप्यलंकारतनयेनानुयायिना ॥२५७६॥
द्रोहेच्छया भयाद्वापि ध्वस्तसत्त्वेन सत्वरम् । व्यावृत्यारोपितो भूयः कोट्टस्यस्यान्तिकं पितुः ॥२५७७॥ युग्मम्॥
निर्भर्त्स्यं पुत्रं गन्तासि श्वो निशीत्यभिधाय तम् । क्षत्रमस्थापयत्सोद्धि यात इत्यखिलान्वदन् ॥२५७८॥
प्रोच्चल्यानिश्यथैकः प्रायाद्वो श्वः प्रयास्यतः । बोधिसैरथ धन्यार्थैरजागार्यखिलैर्निशि ॥२५७९॥
प्रस्थास्नुः स निशीथेथ कोट्टालाद्यलोकयत् । जायतः कटके सर्वान्परितो दीपितानले ॥२५८०॥ 2580
प्रकाश्य वह्निना दुर्गं प्रतोलीनिर्गतो यथा । पिपीलकोप्यलक्ष्यत्वं नोन्मुखानां द्विषां व्रजेत् ॥२५८१॥
ज्वालाप्रकाशचाञ्चल्याद्विलोला इव रक्षिताः । न्यषेधन्मूर्धकम्पेन साल्हणिं साहसाद्वृहाः ॥२५८२॥
तद्धन्तुमक्षमं क्षिप्रं क्षपाप्राङ्गे स डामरः । अधोवातीतरच्छुभ्रमालिङ्गितवटाकरम् ॥२५८३॥
क्षेमराजाभिधानेन डामरेशेन सोन्वितः । शिलां वितर्दिकातुल्यामध्यास्त भ्रमध्यगाम् ॥२५८४॥
आरुह्यासनमात्रे तां पर्याप्तां पातभीतितः । निर्निद्रौ पञ्चरात्रीस्तावत्यवाहयतामुभौ ॥२५८५॥ 2585
निर्वर्तितप्राणयात्रौ करस्थैः सक्तुपिण्डकैः । तत एव व्यजहतां विष्टां नीडादिवाण्डजौ ॥२५८६॥
अव्यक्तव्याकृती चित्रासृत्रिताविव तौ स्थितौ । वीक्ष्याकिटके लक्ष्मीं पृष्ठाद्विस्मयमीयतुः ॥२५८७॥
तयोराभीयत स्फीतशीतविस्मृतिकारिणा । जयसिंहप्रतापाग्निसंतापेनोपकारिता ॥२५८८॥
पक्षेह्नि तत्र निःशेषभुक्तभोक्तव्ययोरथ । क्षतक्षार इवाराग्नि तुषारं वर्षितुं घनैः ॥२५८९॥
अगृह्णतोत्रिते दन्तवीणावाद्यार्थमे तथा । शीतासादितसादेन पाणिपादेन क्षुप्रता ॥२५९०॥ 2590

२५६४. [1]) Emended with C, A तान्त्सस्म्भ्रम°. २५६५. [1]) The letter ष is indistinctly written, C °शंषं, R °शोष. २५६६. [1]) Emended; A °सर्नेर्व्यधुः. २५७२. [1]) A, R. २५७३. [1]) Emended with C; A प्राका°. २५७६. [1]) A °शिविरा°. २५७७. [1]) A, R. २५७८. [1]) Emended with C, A निभर्स्स्यं २५८२. [1]) Emended, A °प्रकाश चाञ्च° २५८३ [1]) Emended; A °क्षम°. २५९०. [1]) Emended with C, A पाणिपादेन.

तावचिन्तयतामत्र क्षुच्छीताभिहतौ ध्रुवम् । पतिष्यावोरिकटके पाशबद्धाविवाण्डजौ ॥२५९१॥
क पुनर्वः कस्य वावां विदितौ यो विनिर्हरेत् । ततः पङ्क्तान्तरामग्रौ यूथपः कलभाविव ॥२५९२॥
विषमस्थावथेत्थं तौ नक्तमभ्यर्थ्य डामरः । आरोप्य रज्ज्वावसथे भृत्ये स्थापयति स्म सः ॥२५९३॥
कृतशीतप्रतीकारौ पलालानलसेवनैः । दुःखं व्यस्मरतां तत्र निद्रया चिरलब्धया ॥२५९४॥
ततोऽभ्यधिका व्यापद्भेजे लोठनविग्रहौ । अचक्षुष्यौ जनास्तिग्धां गिरमप्यापतुर्न यौ ॥२५९५॥
यवकोद्रवपूपादि तयोः सतुषमभ्रतोः । गात्रैर्वस्त्रैश्च वैवर्ण्यं शुद्धैवस्थतया दधे ॥२५९६॥
धन्योलंकारचक्रस्य क्षीणभोज्यस्य सर्वतः । स्त्रीचकारान्नदानेन तुल्यौ हेलयशास्करौ ॥२५९७॥
ततः स दूतैर्विकेतुमङ्गीचक्रे नृपद्विषः । बुभुक्षाक्षुभितो भृत्यभेदभीतश्च डामरः ॥२५९८॥
दुस्तरव्यापदुद्रेकद्रुतसत्त्वतयात्यजत् । पापोपलिप्तचित्तमधर्मार्कीर्तिसाधसम् ॥२५९९॥
भूपतेर्विद्विषच्छेपस्थापनात्स्वस्य रक्षणम् । ख्यातिभुजौ चिकीर्षुश्च कुशकाशावलम्बनम् ॥२६००॥
भृत्यस्योदयनाख्यस्य धिया प्रच्छादितं तथा । ररक्ष साल्हणिं भोज्यं हा तु दातुं स तत्वरे ॥२६०१॥
तं विना च तयोर्भूपाण्डं जानन्नसांप्रतम् । अबार्धं स्वस्य चाशेषकृत्य युक्तममन्यत ॥२६०२॥
भोज्याभावकृतां तस्य व्यापदं तच्च मन्त्रितम् । तदा नाज्ञासिषुर्धन्याद्यः संधिं विधित्सवः ॥२६०३॥
मिषाच्चिलिपा तेषां कस्माच्चिदभवत्ततः । किं पुनस्तेन दायादद्वये दातुं प्रतिश्रुते ॥२६०४॥
देयविश्राणनानीकोत्थानादिपणसिद्धये । भ्रातृव्यमनयद्धन्यः कल्याणमवकल्यताम् ॥२६०५॥
प्रबन्धं निर्बन्धरिमुपचरञ्छादितहर्षं सहार्हिं संगुरुन्नयकुटिलचेष्टं व्यवहरन् ।
स भूमिः सिद्धीनां दधदुचितकर्तव्यपरतां भवेद्योनिर्व्यूढावपि सुदृढसंरम्भरभसः ॥२६०६॥
दुःखैर्दीर्घप्रवासोत्थैरपसारितसौष्ठवाः । तदा संरम्भशैथिल्यं भृभृद्भ्यः प्रेषिदिरे ॥२६०७॥
स सत्यं सचिवोप्राप्यः संपत्तीतुं प्रगल्भते । कथाशरीरमिव यो निर्व्यूढौ कार्यमाकुलम् ॥२६०८॥
संधिं निबद्धं विज्ञाय सैनिकाः स्वगृहोन्मुखाः । उपेक्ष्य स्वामिदाक्षिण्यं क्षणादेवप्रतस्थिरे ॥२६०९॥
तद्विक्रीतमवाप्याद्यं लवन्यः कार्यमन्थरः । धन्यायाः स्वल्पपैन्यन्वादासन्कृच्छ्रगतासवः ॥२६१०॥
प्रतोलीकीर्तितदृशः प्रार्थितागमनाशया । तदहः सोभियोक्तृंस्तानदत्तावतापयत् ॥२६११॥
रथाङ्गाक्रन्दिनी रात्रिसेनेषां कृच्छ्रेण सागमत् । विना नीवितसंन्यासमन्यत्कार्यमपश्यताम् ॥२६१२॥
प्रयत्नसंभृते कृत्ये नष्टे मन्दतया धियः । अस्मत्संभावनादूरीकृतवाक्यादरं प्रभुम् ॥२६१३॥
नष्टानुशोचनव्याजात्तत्त्वयुक्त्युपहासिनः । सदयं नो ध्रुवं दुःस्थीकरिष्यन्त्यन्यमन्त्रिणः ॥२६१४॥
सद्यो यात्रातारतम्यात्तान्यन्तो नस्त्वपार्षणम् । कार्यनिष्ठामपश्यन्तः कुर्युर्वैन्यपरेऽब्रुवन् ॥२६१५॥
मायामेनां विहितवांस्तैः संमन्त्र्य नृपाहितैः । सिद्धसाध्योधुना दस्युर्हसन्नस्मान्ध्रुवं स्थितः ॥२६१६॥
अल्पेतरांस्तु संकल्पानेवं तेषां वितन्वताम् । दत्तानन्ततनुज्यानिः प्रभाता सा विभावरी ॥२६१७॥ कुलकम् ॥
प्राक्तेय राजस्थानीयोलंकारः साहसोत्सुकः । डामरं कोद्वमारुह्य निन्ये नयभयैर्वशम् ॥२६१८॥
एकाहं गमने सोढविलम्बस्तत्र वासरे । लोठनं क्षीणदाक्षिण्यः स गच्छेत्यब्रवीत्स्फुटम् ॥२६१९॥

२५९५. [1]) Emended, A जनास्तिग्धां. २५९७. [1]) Emended, A °भोजस्य २६०३ [1]) Emended, A भोज्यभाव°. २६११ [1]) Emended with G (*sec. manu*), A °कैलित° २६१५ [1]) Emended with C; A °पश्यन्त. २६१९. [1]) Emended, A लोठने

उपन्यास्येत्ततस्तस्य म्लानिप्रक्षालनक्षमम् । मानिनः केपि कर्तव्यं कीर्तिव्ययनिबर्हणम् ॥२६२०॥ 2620
कालः सोयं सकलजननालोचनध्वान्तदायी नित्यालोकप्रकटनपटुः किंतु सत्क्षत्रियाणाम् ।
अभ्रश्यामाद्भुतमसिलता स्वर्वधूसंगतापि व्यक्तं सक्तिं दिशति रभसान्मण्डलेनोष्णभानोः ॥२६२१॥
संग्रामध्वन्ति ननु मण्डलमेकमेव क्ष्मापा जये समरसीधि वपुस्तु हित्वा ।
चण्डांशुमण्डलमथाभिमतानि कामं प्रेमार्द्रनिर्जरवधूकुचमण्डलानि ॥२६२२॥
नास्मिन्संततवेष्टनोल्बणतलैस्तन्पैरुदेति व्यथा मन्थिभ्यश्चलितैर्न चालमसुभिर्मर्मभ्यथा जन्यते ।
क्रन्दद्बन्धुजनार्तनादचकितस्वान्तं न वा स्थीयते नन्वेतन्मरणं सुखस्य सुभगा काप्येव संग्राप्तिभूः ॥२६२३॥
मार्गैः खेङ्गलनाविमानगहनैर्यातः पिता ते दिवं भ्रातृभ्यामसिधेनुकण्टकवने भ्रान्त्वार्जिता सद्गतिः ।
वंशक्षुण्णमिमं निषेव्य रभसादत्रानमुन्नद्धया वृत्त्या द्योश्चि विशार्कमण्डलमिह स्वान्तं च तेजस्विनाम्॥२६२४॥
साम्राज्यं विधिनोपनीतमसकृत्क्लैब्येन यद्वारितं तत्रापि प्रशमोचिते वयसि यत्संनेष्टितं बालवत् ।
प्रायश्चित्तममुष्य लब्धमधुना तद्देहसापादितं मा भूद्राज्यमिवैतदप्यसुलभं कर्तव्यमुत्कस्य ते ॥२६२५॥ 2625
राज्यं प्राप्तमपि प्रनष्टमसमोच्छिष्टाशनैर्यापितः कालः सर्वजनक्षयस्य विषये याता स्थितिर्हेतुताम् ।
हन्यासीत्किमिवोचितं प्रभवतो भिक्षाचरक्ष्मापतेर्निर्व्यूढं तु तदस्य देहविरतौ यत्नेष सर्वोचितः ॥२६२६॥
स तथोज्जेजितात्योजो नादत्ते तेजसोज्झितः । न ज्वलत्यग्निसद्भेपि निर्वीर्ये वानरेन्धनम् ॥२६२७॥
शान्ताङ्गेनस्तु संवृत्तनिद्राभङ्ग इवार्भकः । ऐच्छदुत्थङ्गयोद्वेगो रोदितुं प्रसृताधरम् ॥२६२८॥
डामरेणार्पितं नेतुं प्रवृत्तास्तं नृपाभिताः । नादृशं वीक्ष्य कारुण्यादैर्याधानार्थमभ्यधुः ॥२६२९॥
मा विषीद न देवस्य दयाचन्द्रोदयोज्ज्वले । हृदि प्ररोहति स्वैरं विकारतिमिरान्धता ॥२६३०॥ 2630
स सौजन्यसुधासिन्धुः स स्थिरत्वसुराचलः । स प्रपन्नार्तिसंतापच्छेदचन्दनपादपः ॥२६३१॥
पुण्यां शुद्धां च संलक्ष्य शरदीव शुचाहिनीम् । मूर्तिं तस्योल्वणं चेतः समाधास्यत एव ते ॥२६३२॥
निष्कलङ्कैर्वंशपूर्वैर्निर्विशेषं समाजयन् । चारित्रं लाघवभुवो ह्रियस्त्वां सोपनेष्यति ॥२६३३॥
अपकर्तृन्विपन्मग्नान्दयमानः परानपि । क्षमापरीक्षाहेतुत्वात्स वेत्ति शुपकारिणः ॥२६३४॥
उल्लेखेति हृष्टस्मेलोलस्थूलकुचौ गृहात्ततः । व्यालम्बकम्बलो गोष्ठाद्वृद्धेक्ष इव निर्ययौ ॥२६३५॥ 2635
निर्भूषणं म्लानजीर्णवस्त्रशस्त्रं निरीक्ष्य तम् । युग्याधिरूढमाद्यान्तं धन्यो हीनस्त्रतां दधे ॥२६३६॥
दीर्घास्पन्देक्षणं रूक्षघनकूर्चासंविपद्दम् । व्यलोकयदयोलूकमिव नष्टं गुहागृहात् ॥२६३७॥
रेजे शैलश्चलद्भिस्तैः शिबिरोद्दीपितानलः । भूपप्रतापस्तवर्णस्य कषादमत्वमिवागतः ॥२६३८॥
स्कन्धावारे गते वर्षत्तुशरं प्रसभं नभः । अमर्त्यपाशवे भुभुर्तुर्विशां चिच्छेद संशयम् ॥२६३९॥
प्राक्तेपनेद्धिमं तावन्म्रियेरन्बुडिताः क्षणात् । पिष्टातकान्तर्गलीटाः प्रविष्टा इव सैनिकाः ॥२६४०॥ 2640
एवमेकादशविशेष्वे दशग्यां शुक्लफाल्गुने । न्यूनाब्दषष्टिदेशीयो निवद्धो लोठनः पुनः ॥२६४१॥
दीर्घप्रत्रासादायातं सत्कर्तुं कटकं पुनः । निर्ममौ दर्म्यमुत्तुङ्गमारुरोह महीपतिः ॥२६४२॥

२६२०ᵃ ¹) Emended, A उपन्यस्यस्त°. २६२८. ¹) A, gloss शान्ता अङ्गन्ता अङ्गभावो यस्य २६३० ¹) Emended; A वैक्लव्य २६३७. ¹) Emended, A °कूर्च सं°. २६३८. ¹) A °शिविरो° २६३९ ¹) A स्कन्धावारे. २६४० ¹) Emended with G (*see manu*); A प्राम्रेप°. २६४१. ¹) A °फाल्गुणे.

यथोचितं दानमानसभाषणविलोकनैः । संतोष्य व्यसृजत्सैन्यं धन्यादीन्प्रैक्षतागतान् ॥२६४३॥
तेषां पुनश्च दोर्दण्डमूले क्षिप्रकरं भटैः । न्यस्तेनानासिकं वासःप्रान्तेनाच्छादिताननम् ॥२६४४॥
निर्भुग्नशोत्रपालिप्रविष्टैः श्मश्रुलोमभिः । बलक्षलक्ष्यैः प्रव्यक्तकार्श्यक्लेशं कपोलयोः ॥२६४५॥
उच्चावचोक्तिमुखरे पौरलोकेन्तरान्तरा । व्यापारबन्धे नेत्रान्ते दीनस्तिमिततारके ॥२६४६॥
कातर्यदैन्यभीरुक्रान्तिक्षुदलक्ष्मीकटाक्षितम् । वेपमानविनिद्राङ्गं गां शीतेनार्दितामिव ॥२६४७॥
भ्रान्तामिव क्ष्मां पर्यस्तानिवाब्रीन्पतितामिव । विदन्तं च दिवं शोष ----रदच्छदम् ॥२६४८॥
दैविको वान्तरायोस्तु ध्वान्तं वोपं प्रवर्तताम् । राजीकोभ्यर्णतां यातं वाता वा जरयन्त्विदम् ॥२६४९॥
सर्वोपकारकृद्राज्ञः स्थास्यामि पुरतः कथम् । पदानि संनिरुन्धानं निर्ध्यायेति पदे पदे ॥२६५०॥अन्तर्युगलम्॥
बहुलोकावृततया स्तोकसंलक्ष्यमैक्षत । प्रतीहारैरथावेश्यमानं लोठनमङ्गने ॥२६५१॥कुलकम्॥
भूसंज्ञया वितीर्णाज्ञो राज्ञा तामारुरोह सः । सभां पारिप्लवाम्भोजामिव प्रेक्षकलोचनैः ॥२६५२॥
दृष्ट्वा निर्दिष्टपार्श्वोर्वीस्थितिः पृथ्वीभुजस्ततः । अस्याक्षीत्तिनिनिक्षिप्तजानुर्भूर्ध्राङ्घ्रिपङ्कजे ॥२६५३॥
हस्ताम्बुजाभ्यामालम्ब्य ललाटतटमानतम् । सम्राट्संभ्रमनम्रस्य तस्योदनमयच्छिरः ॥२६५४॥
रत्नौषधीजुषोः स्पर्शः पाण्योस्तापं स चेतसः । दौर्भाग्यमहरद्देहाच्चास्य श्रीखण्डशीतलः ॥२६५५॥
पुण्यानुभावात्कारुण्यभाजो भूभर्तुरुच्चसा । विस्रम्भसंभावनया स क्षणात्पस्पृशे हृदि ॥२६५६॥
मा भैषीरिति हृन्नोक्तिः सुखं संप्राप्यसीति वाक् । अगाम्भीर्येण भवेत्र मन्युर्न त्वयि सोधुना ॥२६५७॥
हत्युक्ते पूर्ववैराणां भवेदुद्घाटनं कृतम् । बान्धवो नस्त्वमित्यस्मिन्परीहास इव क्षणे ॥२६५८॥
क्लिष्टोमीति स्वप्रतापप्रभावाभाषणं भवेत् । ध्यात्वेति भूभृद्भूस्तस्य नाप्यायं तु गिराकरोत् ॥२६५९॥तिलकम्॥
अभयार्थनया पादौ स्प्रष्टुं नमयतः शिरः । संस्पर्शं मौलिषु पुनर्वित्रस्याङ्घ्रिणाकरोत् ॥२६६०॥
का योग्यता सत्क्रियायां ममेति वदता बलात् । अजिघ्रहत्पितृव्येण ताम्बूलं स्वकरार्पितम् ॥२६६१॥
नम्रं द्वारेशमुच्चैर्भुज्छमो व इति सस्मितम् । धन्यं पृष्ठं च परपर्श प्रष्ठं सव्येन बाहुना ॥२६६२॥
दाक्ष्यदाक्षिण्यगाम्भीर्यविनयाद्यैर्विभाव्य तम् । भूभृद्भुणैः परीतं स्वं लोठनोमन्यतावरम् ॥२६६३॥
आदिश्य सान्त्वनं धन्यमुपवेनाय वपानतम् । पितृव्यं प्राहिणोद्वेदम भ्राजिष्णु विनयाञ्जलिः ॥२६६४॥
अभियोगे य एवास्य नीतौ विन्यस्यतो दृशम् । मुखरागः स एवाभूत्फलावाप्तावविप्लुतः ॥२६६५॥
नायाति वाडवशिखिकथनेन तापं शैत्यं हिमाद्रिपयसा विशता न चाब्धिः ।
कश्चिद्गभीरमनसां सततं विषादकाले प्रमोदसमये च समोनुभावः ॥२६६६॥
पीनिस्थैर्यैर्ज्ञातियोग्यैश्चोपचारैरकृत्रिमैः । क्रमाद्राजाहरल्लज्जां पौरुषभ्रंशजीवयोः ॥२६६७॥
दायादोष्टद्वयादेव राष्ट्रे कृष्टेपि मन्त्रवित् । भोजनोत्पिञ्जसर्पस्य दन्तं सोन्तरचिन्तयत् ॥२६६८॥
प्रवासायासभीत्या स्वैस्त्यक्तसंरम्भसंभ्रमैः । जिगीर्षुर्विद्विषच्छैथ्यक्लेशं यश्चिध्यजागरः ॥२६६९॥
सान्ह्नणिः स तु निस्तीर्णः भ्रभाच्छून्यगृहे वसन् । पितृव्यविग्रहोदन्तमुपलेभे न कंचन ॥२६७०॥

२६४५ [1]) A वलक्ष°. २६४८ [1]) Emended with C, A °पतितानिव.—[2]) Thus A; C supplements शोषवहुपुष्करद°. २६४९ [1]) Emended with C, A दैविकोन्तरा°. २६५५ [1]) Emended, A °हेरभास्य, C °हेरभास्य. २६५७ [1]) Emended with G (*acc. manu*), A मन्युना त्वयि साधुना. २६६४. [1]) Emended, A धन्य पु°. २६६७. [1]) Emended, A °कृत्रिमः. २६६८. [1]) Conjectural reading. A भोजनोत्पिञ्ज° २६७०. [1]) Emended; A सन्हण.—[2]) Emended, A विस्तीर्ण.

राजगृधं स्वलंकारं डामराग्निक्रमागतम् । पृथ्वद्वीक्ष्याभवद्रोहद्रोहसंभावनस्तदा ॥२६७१॥
ददर्श च क्रमाद्गुरुतया दुर्लक्ष्यविस्मृतिं । स्कन्धावारं बद्धनालं मार्गे नगरगामिनि ॥२६७२॥
अज्ञातेन विदुरत्वात्पितृव्येणाश्रितं ततः । युग्यं चासौ धन्यपष्ठयुग्ययोरन्तरैक्षत ॥२६७३॥
अचिन्तयच्च को हेतुः कटकप्रस्थितेरितः । गुग्याऽऽरूढश्च कोऽथ स्याज्जनीयो धन्यपष्ठयोः ॥२६७४॥
पृष्टस्तेनावदत्कक्षित्यामरोऽथ प्रमोदभाक् । संधिर्निबद्धो नगरं गतौ लोटनविग्रहौ ॥२६७५॥ 2675
संदेहोऽजनद्रोहो[1] भयमुन्मुखतां भजेत् । ज्ञातिस्नेहेन तस्यासीन्मुहूर्तमपहस्तितम् ॥२६७६॥
सैन्ये गते शून्यतया मिलितैर्विहगैः सरित् । रुद्धाङ्गस्नेन[2] नौ नीतौ क्रन्दन्तीव व्यकल्प्यत ॥२६७७॥
लवन्त्य एव मे दध्याद्यात्वेहस्थमवेत्य ते । पुनर्नयेयुर्धन्याद्याः क्रमाद्भ्यायेति सः ॥२६७८॥
स्वं नेतुं पार्थिवचमूं प्रत्यावृत्तां निनादिनीम् । श्रुत्वान्तरान्तरा घोषे निर्झराणामशङ्कत ॥२६७९॥
अथाजायत जीमूतविनीर्णतिमरं जगत् । चन्द्यं मध्यंदिनेनेव निशीथव्यथितश्रिया ॥२६८०॥ 2680
राधमासावधि दधुस्ततः प्रभृति वारिदाः । दीक्षां क्षेण्यां तृणाग्रोषसत्त्वासुरणकर्मणि ॥२६८१॥
विलब्धघात्यभव्योहं निर्व्रीड्यो ह्रियोज्झितः । निन्दन्स्वमिति भोजाप्ये ततो दस्युरुपाविशत् ॥२६८२॥
समयापेक्षयाक्षोभो मन्युं संस्तभ्य मालहृणिः । सान्त्वयन्निव नास्त्यागस्तवेति जगाद तम् ॥२६८३॥
ऊचे च संश्रितापत्यज्ञान्याद्यापद्गतं त्वया । त्रातुमेतत्कृतं तत्र गर्हां नार्हसि कस्यचित् ॥२६८४॥
नव द्रोहस्पृहा स्याद्वेक्षानृशंस्यं भवेन्मयि । परवत्तामवत्तस्मादिर्यं कालानुरोधतः ॥२६८५॥ 2685
राज्ञश्च हर्षभूमर्नृवंद्या इव न वा वयम् । उच्छेद्याः किं तु संयम्या राजधर्मानुरोधिनः ॥२६८६॥
स्वस्याख्यातिस्तयोर्बाधा राज्ञश्चामार्गगामिता । शेषं मां रक्षता हन्त निषिद्धा धीमता त्वया ॥२६८७॥
इत्युक्तवन्तं सं त्यक्तलज्जाभार इवावदन् । साक्षी त्वमर्च[3] सर्वत्र ममेति सततं स्तुवन् ॥२६८८॥
क्षणेन च प्रहिणु मामुन्त्यभिधायिनम् । नमेव लिंगवृत्त्यन्ते कर्तास्मीत्युक्तवान्ययौ ॥२६८९॥
त्वयि दस्युर्विपर्यस्येन्मन्युं जानन्नभोजनम् । भोजस्त्रेति केनापि कथितो व्यधिताशनम् ॥२६९०॥ 2690
स्पृशांश्चान्न चिरात्प्राप्तमिदं विक्रीय तावितं[4] । ध्यायञ्ज्ञात्वोर्दहमांसं तयेभुक्तममन्यत ॥२६९१॥
दस्युस्तु हिमवृष्टयन्ते त्वां प्रहेष्यामि निश्चयात् । श्वो वाद्य वेति[5] रुथयन्ही मासौ न मुमोच तम् ॥२६९२॥
मां ज्ञात्वेह स्थितं राज्ञः[6] कृतारघैर्मात्सर्यये । विक्रीणात्येष मत्वेति भोज्यान्नमेव त्वराम ॥२६९३॥
मिषं यं यं निषेधाय गमनायोदपादयत् । दस्युस्तं तं समुच्छेद्य सापराध व्यधत्त तम् ॥२६९४॥
तेजोनाम्नो बलद्वारासंजातो[7] भाद्रशातुरः । अभ्यधाद्यात्यमाशास्य लम्बकम्बलकावृतः ॥२६९५॥ 2695
तेजोविस्फुर्जितां तज्जहीरोत्कर्षकोपले । हैराज्ये सौस्सले सैन्ये पङ्क्तिपावनतां गतः ॥२६९६॥
पितुरावतया राज्ञा वर्धितस्तदनन्तरम् । एवेनकादिविषयाधीकारित्वं क्रमाद्ययौ ॥२६९७॥

२६७१. [1]) Emended, A राजा गृह्य स्वलङ्कारं डामरा; cf. vss. 2625, 2638. २६७२. [2]) Emended, A °विस्मृति —. [3]) A स्कन्धा°. २६७५. [4]) Emended, A पृष्टस्तां°. २६७६. [5]) Thus A, the text of this *pāda* appears to be corrupt, perhaps read संदेह जनतो द्रोहभयमु° —. [6]) भजेत् is by A from भजेत्. २६७७. [7]) Emended, A व्यकल्पत. २६८३. [8]) Emended with C, A संस्तभ्य. २६८७. [9]) Emended, A शेष मा; C रक्षता मां. २६८८. [10]) Emended with G; A संमर्च. २६९०. [11]) Emended, A दस्युर्विप°. २६९२. [12]) Conjectural reading, A विक्रीयतामिति, cf. for the context vss. 2508 ffg. २६९३. [13]) Emended with C, A देवि. २६९३. [14]) Emended, A राज्ञा. २६९५. [15]) Emended, A ओजो°, cf. vss. 2862 and the read. तेजो, ओजो vss. 1084–5. [16]) Emended, A°ज्ञात.—. [17]) The text of this *pāda* is corrupt. २६९६. [18]) Emended with G, A °मिनामतन्

विमुखे राज्ञि नागेन खूयाश्रमभुवा कृते । तं राजवदनो नाम विजिघृक्षू रराक्ष तम् ॥२६९८॥चक्रकम्॥
आनृशंस्यं भृत्यभावादलवन्यतयास्य च । सत्यवस्थित्यसामर्थ्यं राज्ञि सर्वे शशङ्किरे ॥२६९९॥
अनालंकारचक्रेण कुर्वतोऽत्यर्थमर्थनाम् । द्वैराज्येच्छो राजबीजी तदा न स समर्पयत ॥२७००॥ युगलकम्॥
नीतः प्रत्यक्षतां दूरस्थितेऽप्युदयने स तम् । विमृष्टवति दुष्प्रक्षस्त्यक्तुमेनं न सोशकत् ॥२७०१॥
राज्ञा कर्तुं विनियमं भोजस्य प्रहितो धनैः । प्राप्तं द्रङ्गामलंकारो विषयाधिकृतस्ततः ॥२७०२॥
तत्पार्श्वमुद्यतं गन्तुं मां समुत्सृज्य यासि चेत् । त्यक्ष्यामि तदसूनेवमूचे भोजस्तु डामरम् ॥२७०३॥
श्वस्त्यां प्रभाते द्रक्ष्यामीत्येतावत्तत्र जल्पति । कोद्दादनुल्कैव निशस्तुर्यंयामे विनिर्ययौ ॥२७०४॥
घावर्षेण्यमर्षेण मार्गान्वेषी गवेषणम् । यावच्चक्रे क्षपान्ते तं तावच्छुश्राव निर्गतम् ॥२७०५॥
असाध्यप्रतिषेधोद्य तमद्वयनुजगाम सः । प्रस्थितं शारदादेवीस्थानं यावन्मितानुगः ॥२७०६॥
एकसार्थगतौ ज्ञाती विना तौ ज्ञातियोषिताम् । दाक्षिण्यादक्षमः स्थातुमपे सागा भवन्निव ॥२७०७॥
प्रवयाः पञ्चषान्वारान्व्यधादारब्धिमेष तु । युवाप्यकल्यः कौलीनमिति स्वस्य च चिन्तयन् ॥२७०८॥
दुराण्डगमने खण्डितेनच्छः संभित्य दारदान् । संयुयुत्सुर्मधुमतीरोधसा मार्गमग्रहीत् ॥२७०९॥ तिलकम्॥
क्वापि श्यानाद्गमसून्यभ्रिमृत्युदंष्ट्राङ्कुरोत्कटान् । क्वचिदुद्धकाशाभ्रकालपाशान्धकारितान् ॥२७१०॥
प्रभ्रश्यद्धिमसंघातगजव्यूहोल्बणान्क्वचित् । क्वापि निर्झरफूत्कारनाराचक्षतविग्रहान् ॥२७११॥
क्वचित्सुस्पर्शपवनस्पष्टस्फुटदसृग्धरान् । क्वाप्यातपक्षतहिमज्योतिर्मिहतदृक्पथान् ॥२७१२॥
दुरारोहं प्रसूते स्फुटमप्रसूते विदन् । ऊर्ध्वावरोहमसकृन्मन्यमानोऽध्वगेनः ॥२७१३॥
तुषारकालविषमान्षट्सप्तान्पथि वासरान् । उल्लङ्घ्य स दरद्राष्ट्रसीमान्तग्राममासदत् ॥२७१४॥कुलकम्॥
गृहार्पितात्मसामग्रीहानाकिंचन्यलाघवम् । तं दुग्धपार्ष्टकोद्देशः प्रणम्यानयदन्वेतम् ॥२७१५॥
दुरस्थितो विदूषीहस्तहृतोक्तदागसः । प्रक्रियां प्राहिणोच्छत्रवारिवाराणां नृपोचिताम् ॥२७१६॥
भादिष्टदिष्टवृद्धिश्च राष्ट्रे कोट्टाधिपेन सः । भवारयन्स्वकोशस्य स्वामित्वं राजकीजिनः ॥२७१७॥
राजायमानो भोजोथ राजवासगतोचितुम् । आनिन्ये राजवदनापत्येनाभ्येत्य पक्षयताम् ॥२७१८॥
स पित्रैकान्ततो राज्ञो भिक्षेन प्रहितोन्तिकम् । तेनाज्ञाप्यरिनीत्युपपाशायस्थापनेपमः ॥२७१९॥
कार्यगौरवविश्रासाभावव्यतिकरोचितम् । संदिश्य प्राहिणोत्तं स न स्वीकुर्वञ्च चोत्सृजन् ॥२७२०॥
किमाप्तोहं किमेकान्तभिन्नो राज्ञः शनैरिति । मां ज्ञास्यसीति तं दुर्नैः स राजवदनोवदत् ॥२७२१॥
तस्य दार्ढ्यं दर्शयितुं गोत्रिवैरिमिषान्नृपे । ब्रुवाणेव विदोषत्वं नागाद्यैरग्रहीद्रणम् ॥२७२२॥
सामग्र्यूनैः शनैः स्थैर्यं ततः साम्यमथ क्रमात् । आधिक्यं चादधे तेषां लिप्सैर्धैर्यनिधुरः ॥२७२३॥
तथा प्रतिष्ठो स प्राप तस्यापूर्वस्य भूमिजाः । दास्यमेत्य यथा व्रीडो नागुर्नागस्य बान्धवाः ॥२७२४॥
स हि त्यागक्षमास्मम्भालोभादिगुणभूषितः । अभिगम्योभवन्नित्याभ्यस्तभूतिरिवोन्मिषन् ॥२७२५॥

२७०० [1]) Emended, A कुर्वतात्य° २७०२ [1]) Emended, A प्राप्य २७०३ [1]) Conjectural reading, A गन्तुं मामुत्सृज्य, C मामसुत्सृज्य. २७१२ [1]) Emended, A °निहित° २७१३ [1]) Emended, A °राज्ञे २७१५ [1]) Thus A, cf. दुरुपपातम् viii 2168 २७१६ [1]) Emended with C, A °गमम —[2]) Emended, A °वादिवाचालूपां २७१८ [1]) Emended, A °गनोचितुम C °गनोचितं, G °गनोचिनाम २७२२. [1]) Emended, A °द्रणं २७२३ [1]) Conjectural reading, A सामग्री न

स्थैर्यं पृथ्वीहरादीनां साश्रयाणां न कौतुकम् । आडम्बरो निरालम्बस्याम्य स्तुत्यस्तु विस्मृतः ॥२७२६॥
मथयन्पृथुलान्व्युहांश्चाराटविकघोषिकैः । क्रान्तमामोथ तस्थौ स भोजादीन्यनिपालयन् ॥२७२७॥
जहुरन्योन्यसंघर्षसेर्ष्यामात्यमनेन वा । ततो लुण्डिप्रियत्वाद्वा नीतिमन्येपि डामराः ॥२७२८॥
उद्गतश्वसितां विप्रवेच्छा लोठनबन्धने । याधात्तेषां तदानीं सा जगाम शतशाखताम् ॥२७२९॥
त्रिलकों जयराजश्च राज्ञा संवर्धितावपि । अकार्टा नैव तपसा विवशौ चक्रमीलनात् ॥२७३०॥ 2730
यो धूकानामिव श्वभ्रमामयानामिव क्षयः । दैन्यानामिव पातालं यादसामिव सागरः ॥२७३१॥
आश्रयः सर्वदस्यूनां त्रिलको मायया ऽन्वगात् । स देवसरसाधीशं संबभ्रन्त्रिप्रवं व्यधात् ॥२७३२॥युग्मम॥
काङ्क्षन्तोथ तदाक्षेपं क्षोणीत्राणार्थिनो द्विजाः । प्रायं नृपनिमुद्दिश्य चक्रिरे विजयेश्वरे ॥२७३३॥
अकालदस्युनिर्मार्थं जाननोभ्यर्थनां न ते । राज्ञोगृह्णंस्ततः सोभूद्दाक्षिण्यात्तत्सभानुगः ॥२७३४॥
प्रस्थातुं पार्थिवे सज्जे ज्यायान्यो विप्रुतेऽभूत् । स जातोत्पातपिटको जयराजो व्यषद्यत ॥२७३५॥ 2735
भाग्यवानेकतोजातदस्युवैवित्त्यमीशिता । ततो मडवराज्यं स विप्रपीत्यै विनिर्ययौ ॥२७३६॥
अमात्यदत्तवैमत्यैः स्वशाद्यर्मडवैरथ । द्विजैर्नैषिद्धोलंकारो मन्त्री राज्ञोज्झितोन्तिकात् ॥२७३७॥
स व्यवस्थापने दुःस्थदस्यूनां सोद्यमः सदा । सेर्ष्याणां प्रत्यभात्तेषां तोषपरिपोषकः ॥२७३८॥
त्रिलकोन्मूलनं कुर्या कृत्वा हैराज्यभञ्जनम् । प्रतिज्ञायेति नृपतिर्विपान्यायाद्व्यवीवरत् ॥२७३९॥
त्रस्तोथ त्रिलकस्तैस्तैरप्रियैरुद्वेजयत् । अनुद्विग्नमुखो गूढामयो रोगान्तरैरिव ॥२७४०॥ 2740
जयराजानुजं राज्ञा यशोराजं निवेशितम् । तन्मतेनावचस्कन्द भ्रातृत्यं राजकाभिधः ॥२७४१॥
ज्ञातुं तं देवसरसं दूमारात्याभिनं गतः । सञ्जपालोल्पसैन्यत्वात्संदिग्धविजयोभवत् ॥२७४२॥
ज्ञातोदन्तस्ततोभ्येत्य स्निह्णो रणमुन्वणम् । जयलक्ष्मीकटाक्षाणां प्रथमातिथितामगात् ॥२७४३॥
मन्दरेणाथ तेनारिवारिराशौ विलोडिते । कल्योभूत्सञ्जपालाश्वंस्तुच्छारातिजलाहवौ ॥२७४४॥
जितेपि राजके स्वोर्व्यां विनानुग्राहकं क्षमः । न बभूव यशोराजः शून्ये बाल इवासितुम् ॥२७४५॥ 2745
प्रतीक्षमाणो हैराज्यपर्यायं क्षमाभुजेकरोत् । त्रिलकः कालहरणं तैस्तैर्मायानतिक्रमैः ॥२७४६॥
यथाकालं ततो गूढोपाहान्मण्डलकण्डकान् । स्वपक्षसूचीविशिखान्दिक्षु श्राविदिवाक्षिपत् ॥२७४७॥
अथ पार्थीहरियोंभुञ्चनुत्को लोष्टकानुजः । राज्ञा भ्रात्रा समं बद्धः कारागारात्पलायितः ॥२७४८॥
स तेन निजजामात्रा रक्षितः स्वोपवेशने । असंख्यडामरयुतः डामालां संप्रवेशित· ॥२७४९॥ युग्मम् ॥
आकर्ण्य कुररस्येत्थं निनादं तस्य भेजिरे । व्यक्ततां दस्यवो गूढा हृदस्थाः शफरा इव ॥२७५०॥ 2750
वृष्यन्तं राजवदनं षष्ठचन्द्रोथ गर्गजः । रुरोध प्रलयोद्भूत्तं वेलाद्रिरिव वारिधिम् ॥२७५१॥
वर्धमानक्षीयमाणसंहतौ तौ स्वजायताम् । घर्मे सजम्बालहिमौ तुषाराद्रितटाविव ॥२७५२॥
षष्ठस्य जयचन्द्रश्च श्रीचन्द्रश्चानुजौ ततः । दूरविप्रकृतौ राजमन्दिराद्वाप्रवेतनौ ॥२७५३॥
ज्ञातनिवृत्त्यपर्यायौ धुर्यकार्यवशप्रियात् । प्रतीक्ष्यादयजाद्राज्ञः शङ्कितावशुभागमम् ॥२७५४॥

२७२८ 1) Emended, A व. २७३४ 1) Emended, A जानते' २७३७ 1) Doubtful emendation; A स्वशाद्य मड'. २७४४ 1) Emended. A °पात्ताद्विप्रमुच्छा'. २७४६ 1) Emended A प्रतीक्ष्यमाणो २७४८. 1) Emended, A °क्क कोष्टका'. comp. for the name of Prithvihari's elder son, viii 2912 2790, 2496 3313. २७५०. 1) A_2 gloss कुररस्येति कुरर नद हूर इति भाषया कश्मीरेषु प्रसिद्ध. २७५१ 1) Thus corr. by A_2 from गर्गज.

2755 कटकाद्विद्रुतौ राजवदनान्तिकमागतौ । श्रुत्वुर्यावपि भूभर्तुरागतौ प्रतियोगिताम् ॥२७५५॥
शैलप्रस्थानपथिकैरसंख्यैरथ खाशकैः । स पूर्वैराजकोशार्थी भूतेश्चरमलुण्ठयत् ॥२७५६॥
तस्कराक्रान्त्यशरणं बलवन्निहतावलम् । अराजकमिवाशेषं राष्ट्रं कष्टां दशामगात् ॥२७५७॥
उदयं कम्पनाधीशं रिल्हणं च ततो नृपः । चतुष्कयुद्दमादिश्य नगरं विवशोविशत् ॥२७५८॥
पार्श्वद्वारिस्तु दुःसाधो महाव्यापारिवौषधैः । स्तम्भितोभूत्तयोः सैन्यैः संहन्तुं न स्वशक्तयत ॥२७५९॥
2760 कालापेक्षां स्वपक्ष्याणां दुर्बुद्धिं वानुरुन्धतः । आसीन्मन्दप्रतापत्वं रिल्हणस्यापि तत्क्षणम् ॥२७६०॥
विद्रुसीद्रस्तु विज्ञानभोजोदन्तो व्यसर्जयत् । द्रुतानानेतुमुर्वीशान्छ्रुबहुत्तरापथे ॥२७६१॥
अपि विश्वेशवनितारक्षैवैयान्यवेदिभिः । अपि किंमानुषपुरीगीतोद्गारिदरीगृहैः ॥२७६२॥
अत्यौष्ण्याद्गानुकाम्भोभिः शीतावेदिभिरेकतः । अपि भृङ्गानिलैः प्रीतान्कुर्वाणैरुत्तरान्कुरून् ॥२७६३॥
हिमाद्रिकक्षैर्म्लेच्छैशाः प्रधावन्तोधिशिश्रियुः । दिशस्तुरंगैः रुन्धन्तः स्कन्धावारं दरत्पतेः ॥२७६४॥ तिलकम् ॥
2765 राज्ञां संघटनं यावद्व्यधादेवं दरत्नृपः । दिग्म्यो भोजान्तिकं तावत्तत्सामन्ताः प्रयेदिरे ॥२७६५॥
स पिप्रिये तानज्ञातालापान्वीक्ष्य गिरिव्रजात् । प्रीतिप्ररूढप्रणयानवरूढान्कपीनिव ॥२७६६॥
जयचन्द्रादयो राजवदनप्रहिता अपि । कीराः काश्मीरकाः पार्श्वमभजन्नजबीजिनः ॥२७६७॥
अभ्यर्णस्थान्बलहरयमुखांश्च विदूरगान् । अपुण्यात्साल्हणिः स्वर्णैः परां कोशेशतां भजन् ॥२७६८॥
ततः सुजनितोत्पिञ्जतया निश्चोद्यचक्रिकः । भोजेन राजवदनः समगंस्तापसाश्रमम् ॥२७६९॥
2770 तयोरकृतकर्तव्यविदोषेणेतरेतरम् । जातसौश्रवयोः क्षिप्रमविश्वासो व्यदीर्यत ॥२७७०॥
अभ्यमित्रीणतां तस्यानिच्छतो दरदं विना । मदान्साहायकार्थेच्छन्मित्रानेव स तान्हयान् ॥२७७१॥
स्युश्चेत्साढाभिमाटोपाः कटकस्याग्य नो द्विषः । तत्साम्यमुन्मिषेद्यच्च भद्रो भूयेऽपि योगभित् ॥२७७२॥
तस्मात्सर्वाभिसारेण रणमेकं ममेच्छतः । विजयावजयावाप्तिरेकाहान्तरिता मता ॥२७७३॥
व्याजहारेति यद्भोजस्तदयोथ हसन्स्मयात् । निन्ये तद्दारदं सैन्यमुपेक्ष्यागामिनीश्रमूः ॥२७७४॥ तिलकम् ॥
2775 संकटान्ते विनीर्णानुयात्रस्तेषां प्रसर्पताम् । स राजबीजी शुश्राव दरद्राजमथागतम् ॥२७७५॥
तत्संगमाय व्यावृत्ते तस्मिन्कोद्वान्तिकं पुनः । प्रावेशयद्बलहरीं मातृग्रामं स तद्बलम् ॥२७७६॥
दिशस्ततो वीक्ष्य वहैर्भ्रान्तवातमृगा इव । निसर्गधीरधीर्गार्गिर्न धैर्यात्पर्यहीयत ॥२७७७॥
तस्य सर्वेपि नीलाश्वडामराः स्वे च सैनिकाः । विपक्षैः सह बद्वैक्याः सैन्यान्दुध्रुक्षवो ययुः ॥२७७८॥
स तथा विप्लवस्यापि प्रस्थित्यै प्रार्थितो निजैः । म्लाननानः प्रभुं द्रष्टुं न क्षमोस्मीत्यभाषत ॥२७७९॥
2780 स सूर्यवर्मचन्द्रस्य न जातः कश्चिदन्वये । उपयोगाय यो नागान्सह्याभिजनजन्मनाम् ॥२७८०॥
भोजं सभाजयित्वाथ विद्रुसीद्रः सपार्थिवः । सारैः समं स्वसामन्तैर्विजयाय व्यसर्जयत् ॥२७८१॥
तत्रे म्लेच्छगणाकीर्णा व्रजन्सबाहयंश्चमूः । प्रयाणमात्रान्तरितः पृष्ठे तस्य बभूव च ॥२७८२॥
प्रादुष्कृतजगत्क्षोभे बले तत्रानुयायिनि । उत्साहात्साल्हणिर्मेने कृत्स्नां हस्तगतां महीम् ॥२७८३॥

२७५५ 1) Emended, A प्रतियाग्यताम्. २७५८) Emended, A कम्पनार्धीशं. २७५९) A स्कन्वा° २७६० 1) Emended, A काश्मीरिका २७६४. 1) Emended, A 'गमिनीं'. २७८०. 1) Emended, A कंचि°

वाजिभिस्तर्जितं म्लेच्छराजैश्च बलमूर्जितम् । स्थाने समुद्रधाराख्ये निबबन्धाथ तत्पदम् ॥२७८४॥
स राजवदनस्तादृग्दुर्नयाप्यबलोज्ज्वलः । मृत्युदन्तान्तरे दिष्टं षष्ठचन्द्रममन्यत ॥२७८५॥ 2785
ततः प्रावृट्पयोवाहकृतोदीपपरिप्लुता । संजायते स्म वसुधा समीभूतजलस्थला ॥२७८६॥
धरित्रीपानपात्रेभ्यः सीधुपूर्णे दधुर्द्रुमाः । मग्ना लक्ष्यशिखामात्रा वल्मीलोत्पलोपमाम् ॥२७८७॥
षष्ठस्य संकटं जानन्भूभृच्चैर्बलैः समम् । अथोदयद्वारपतिं न च धन्यं व्यसर्जयत् ॥२७८८॥
वाहिनीरुद्धमार्गौ तौ पदवीमनुसस्रतुः । मार्गे धनंजयस्येव शैनेयपवनात्मजौ ॥२७८९॥
लम्बाम्बुदंबरे दूरं वारिपूर्णे च भूतले । स्यूतेव विद्युद्रज्जुभिन्नद्योतननिःस्वना ॥२७९०॥ 2790
शोभामात्रोदितागर्हपरिवर्हबहिष्कृतः । तत्राविभक्तकटकः पार्थिवः समजायत ॥२७९१॥
अनास्थो राजवदने सत्त्वावष्टम्भयोः पुरा । अत्रापरो न निक्षेप्यो राजबीजीति दारदान् ॥२७९२॥
त्रिलिङ्गः संदिशन्दुर्वैर्वृद्धि पार्थिवहरिं नयन् । तयोरेकस्य सामर्थ्यादैच्छत्तं हस्तपातिनम् ॥२७९३॥युग्मम्॥
अभित्तिलिखितालेख्यकल्पं बलद्वयस्य तत् । तादृग्विलोक्य सामर्थ्यमथ राजश्च सर्वतः ॥२७९४॥
विभक्ताशेषसैन्यस्य तत्र तत्रारिसंकटे । ज्ञात्वापतिसमाधेयच्छिद्रमुन्मुद्रदुर्नयः ॥२७९५॥ 2795
अकृशश्चाविदाचारश्चिरं स्वाद्यैः स गोपितम् । बहिर्दुर्धर्षमत्याक्षीद्वितीयमपि कण्टकम् ॥२७९६॥ तिलकम् ॥
ध्वान्तेम्बुधरजालान्धमहावातं रजोभरः । स्वपक्षभेदयोर्ज्ञातकर्णेजपमहोद्यमः ॥२७९७॥
कुलच्छेदकृतो राज्ञस्तत्र तत्रासिसंकटे । अशान्तजागरोत्यर्थमनर्थपरिपोषकः ॥२७९८॥
सोथ भ्रुपुरैकस्माद्बहुभिः सह डामरैः । तेन संपूरितः पृथ्वीद्वारजो लोष्टकोऽपतत् ॥२७९९॥ तिलकम् ॥
तस्य संघटतः कन्थां प्रयातं वैकृतं चिरात् । पालीभङ्गे तटस्येव प्रावृट्पूर्णस्य लक्ष्यताम् ॥२८००॥ 2800
निद्राणोपेन्द्रजठरप्रसादनिसृतं जगत् । समेतमिव तत्सैन्यं प्रत्यभाज्जलदागमे ॥२८०१॥
यावद्भिः पायेते नेदृक्संख्यातुमपि तद्बलम् । भर्तव्यकल्पैः सुस्वल्पयेयमध्यगतैरपि ॥२८०२॥
तावद्भिरनुगैः पिच्छंदवत्रद्वाधिपो युधि । तद्बोधान्याम्यहरितः सरितश्चातिथीन्व्यधात् ॥२८०३॥ युग्मम् ॥
तटोज्ज्वलैश्चितावक्त्रैर्बिम्बितैस्तटिनीजले । मृतानामपि संस्कारः क्रियमाण इवाभवत् ॥२८०४॥
इति विस्मृतमृत्युः स कुर्वन्नेकाहमाहवम् । कथंचित्प्रैरन्यैयुर्गमप्रसारोपसारितः ॥२८०५॥ 2805
पुरे स शून्ये सैन्यानि संगृह्यस्तत्र सर्वतः । त्रिभिरहोभिर्नगरं सुखयाद्यममन्यत ॥२८०६॥
इच्छां पद्मपुरास्कन्दे मन्दत्वं त्रिलिङ्गोनयत् । पृष्ठस्थयोर्यशोराजकम्पनाधीशयोर्भयात् ॥२८०७॥
न भूत्वैस्तद्विषः सिद्धश्चास्यैकस्मिन्नसंमते । विक्रेयान्यलवन्यस्य डामरे हालडौकसि ॥२८०८॥
द्वैराज्ये सुस्मलस्यापि नैवादृश्यत तादृशः । अनर्थो यादृगुत्तस्थौ तत्सुतस्य समन्ततः ॥२८०९॥
चतुष्कमवधीर्याथ राजा पादगदोपमम् । रिल्हणः प्रैषि तं वीरागण्डूलुत्यं व्यपोहितुम् ॥२८१०॥ 2810
प्रस्थितस्तत्प्रमाथाय ग्रामालैः सोन्वबध्यत । व्रजन्प्राग्ज्योतिषं हन्तुं पार्थः संशप्तकैरिव ॥२८११॥
अधावच्चाभ्यमित्रीणस्तान्व्यावृत्य निपातयन् । पद्माकरोन्मुखः पृष्ठलग्नान्मुद्गानिव द्विपः ॥२८१२॥

२७८४ [1]) Doubtful emendation; A °स्तर्जितां २७८५. [1]) Emended with C, A प्रावृड्दृपयो° २७८७ [1]) A °सीधुं. २७९९. [1]) Thus A, comp. for this name viii. 2496 2742, 2912 3313, २८०३. [1]) Emended with C, A °हरित २८०८. [1]) A हालळौकसि. २८१०. [1]) Emended with C, A रिल्हणप्रेषिनं

रणभ्रान्तेन गमिता त्रियामा तेन रामशौ[1] । गर्जत्कुल्यार्पितारातिपृतनानादसंक्रिये ॥२८१३॥
तं कल्याणपुरं प्राह्णे विशन्तं सोममागतः । रुरोधाभ्येत्य भूयोपि बलैर्भरितदिङ्मुखः ॥२८१४॥
2815 आपतन्तेव चारातिपदातीन्संमुखागतान् । दृष्टनष्टान्व्यधाच्छागानिवायेजगलो गिलन् ॥२८१५॥
उद्वृत्तमारुतस्येव तस्यापाते पदातिभिः । तत्यजे रिल्हणः पर्णैर्हैमन्त इव पादपः ॥२८१६॥
पश्यतस्तस्य ते विद्रवन्तो जिह्मा न जिह्रियुः । देहस्पृहापारमित्यै कस्यौन्नित्यमनत्ययम् ॥२८१७॥
आश्वैरापसृत्य स्वैरार्थितो रिल्हणोब्रवीत् । नयन्प्रजासृजा साम्यं स्वामिभक्तिस्मृतेः स्मितम् ॥२८१८॥
ह्रीं---वाविशेषेपि जन्तोर्जैन्तोर्यदीशिता । भृत्यभावेपि यो लुप्तकृत्यो धिक्तस्य जीवितम् ॥२८१९॥
2820 जातं वक्त्रसरः श्मश्रुराजिनीलाब्जभांजनम् । जरा[2]रैरवगौरं च राज्ञः पादान्यपद्य यान् ॥२८२०॥
म्लायत्सु तेषु भूभृद्भृभ्राजिष्णुभिर्भवेत् । कथं लक्ष्मीविलासैस्तदखण्डैरविडम्बितम् ॥२८२१॥युग्मम्॥
एषा कापुरुषासेव्या धीराणां नैव पद्धतिः । यदायासलवत्रासास्त्रीख्यवैमुख्यभागिता ॥२८२२॥
वृत्त्वापासन एव शीतजनितस्त्रासोथ तीर्थाम्बुभिः स्नाने ह्लादसुखोपलब्धिरसमब्रह्मानुभावोपमा ।
वैह्वल्ये समरे वपुर्विजहतामेवं किलोपक्रमे कैवल्याख्यसुखोपलम्भपरमा पश्चात्पुनर्निर्वृतिः ॥२८२३॥
एवमुक्त्वा परानीकमेकाकी स व्यगाहत । भृङ्गश्शरान्हरिश्रोत्र्यश्वासंदिग्धभूकृतान् ॥२८२४॥
2825 स्वर्णेसरुपभांजालहरितालोज्ज्वलोभजत् । खड्गपट्टनटस्तस्य रणरङ्गोत्तरङ्गताम् ॥२८२५॥
तत्खड्गस्य व्रतः खड्गान्वैजालच्छलाद्भुवम् । उत्थाय लग्नं शत्रूणां तृणैस्तृणमणेरिव ॥२८२६॥
भाजौ तमनुजग्मुस्ते वैरगण्यन्त वैरिणः । तिर्यग्लोलक्ष्यतां यातास्तेषां प्राणास्तृणान्यपि ॥२८२७॥
संप्रविष्टो मुखान्मृत्योः कैश्चिन्मर्मैः स निर्गतः । तिमेः संमीलितास्यस्य श्रोत्रर्न्ध्रैरिवोदकम् ॥२८२८॥
शश्वत्कुर्वन्परावृत्तीः श्रमशान्त्यै विनिर्गतः । प्रक्षीणभूयिष्ठबलो लब्धोत्सेको रिपावभूत् ॥२८२९॥
2830 पृष्ठतोथ पपाताय चतुष्कः पुष्कलैर्बलैः । साहाय्यकागतं प्राक्स यं स्वं कंचिदमन्यत ॥२८३०॥
तस्योभयमुखस्यारिमैन्यस्याहरिवेक्षणात् । न संरम्भः शिखण्डीव पर ताण्डवितोभवत् ॥२८३१॥
तौ व्यूहाथ पर्यायैर्मुखपृष्ठं प्रदर्शयन् । सोक्षिणोर्युधि मन्थाद्रिमथनेभ्यिनटाविव ॥२८३२॥
कीलनिश्चलयोर्भ्राम्यच्चसकृद्वान्तरे द्वयोः । कुविन्द इव [3]तुरंगमत्वरांन्वितः ॥२८३३॥
भामः प्रत्यग्रहीत्तस्य तमेकपृतनारयम् । एकतोम्भोभरं द्वीपस्येव कूलविलोद्गमः ॥२८३४॥
2835 तेन वैरिचमूश्चक्रे लुलितायुधकुण्डला । क्रीडता चण्डवेगेन पुरुषायितुमक्षमा ॥२८३५॥
त्रासपाण्डुन्द्विपां वक्त्रकुम्भान्स्वेदाम्भसाविलान् । स कुर्वन्भूभुजं जाने भूयो राज्येभ्यषेचयत् ॥२८३६॥
स च पार्श्वद्विरिश्चिनामन्योन्यस्य क्षणाक्षणे । सज्जौ मान्त्रिकवेतालाविव रन्ध्रगवेषिणौ ॥२८३७॥
साहाय्यकागतान्साक्षीकृत्य क्ष्मापतिसैनिकान् । अन्येद्युः सोकरोच्चकुं वनमार्गावगाहिनम् ॥२८३८॥
पर्यस्तशौचान्संचिन्त्य विद्रुकादीनथायथौ । सज्जपालस्तृतीयस्मिन्दिवसे रिल्हणान्तिकम् ॥२८३९॥

२८१३ [1]) Should probably be रामशौ, cf. n. 55.—[2]) Emended, A गर्जत्कुल्या° २८१४. [3]) Emended, A तत्कल्या° २८१८. [1]) Thus A, perhaps read with G (*re manu*) प्रजासृजाश्रास्य. २८१९. [2]) Thus A, C हीप्रभावांविशेषं २८२०. [1]) Emended, A °भांजनम. २८२३. [1]) Thus corr. by a later hand from A, वैह्वल्ये —[2]) Conjectural reading A वैकल्या° २८२५. [3]) Emended with C, A प्रजाजाल° २८३१. [1]) Emended, A सरम्भे २८३३. [1]) Thus A, C supplements पूर्यायैस्तुरग°—[2]) Emended, A °गमत्वरान्वित २८३४. [2]) Emended with C, A पृतनावयम. २८३६. [1]) Emended with C, A भुजाम २८३८. [1]) Emended, A साक्षीकृतस्मा°.

नृपपतापग्लपितः स नाभ्यां पर्यशोष्यत । वनान्तः शुचिशुक्राभ्यां पुण्यक्षीण इव द्रुमः ॥२८४०॥ 2840
चितानल इवासंख्यैर्युद्धैः शममनाश्रितः । उदयेन शनैर्विन्ये चतुष्कोपि मितोष्मताम् ॥२८४१॥
दारदं बलं दृष्यद्धमसंनाहवाहिभिः । हयैरवरुरोधाद्रिकुहरादाह शोनुखम् ॥२८४२॥
तुरुष्कलोकेनाक्रान्तान्देशांस्तद्वशमीयुषः । शङ्कमानैर्ननैर्जाता कूरता म्लेच्छावृतेव भूः ॥२८४३॥
प्रयाणमात्रान्तरिते धन्ये द्वारपतावपि । साहस निःसहायस्य तस्यैवैरयनोभवत् ॥२८४४॥
ज्वलत्कनकसंनाहं तत्सैन्यं स द्विषोरुधत् । कनद्भवालावलिं दावं सनिर्झर इवाचलः ॥२८४५॥ 2845
विधुय जयचन्द्रादिनृपप्रस्थानरोधिनः । बलबाहुल्यदृप्तांस्ते व्यगाहन्ताहवावनिम् ॥२८४६॥
तेषां हयसहस्राणि त्रिंशद्विंशत्युरुगमैः । रंहसा प्रतिजग्राह निजवाह च गर्गजः ॥२८४७॥
तस्यासुरद्विदंदृशे पौरुषं तदमानुषम् । एकैकस्यामतो यत्स वैश्वरूप्यमिवादधे ॥२८४८॥
अभवद्भायविन्यस्तवक्त्रास्ते विद्रुताः क्षणात् । जगाहिरे कापुरुषा गिरिर्न्किपुरुषा इव ॥२८४९॥
अभूमिज्ञतया शाद्यैव जातः पराभवः । भ्रस्तदम्भान्पुरस्कृत्य जयं प्रत्याहरिष्यथ ॥२८५०॥ 2850
इत्युक्ता राजवदनजयचन्द्रादिभिर्नृपैः । तथेति मिथ्याकथयन्दारदा विद्रवैर्मुखाः ॥२८५१॥ युग्मम् ॥
प्रवेश्य धन्यक्षोणीं दुरं बलहरेर्गा बली । ऐच्छत्सचमिसंधातुं रुद्धा पाश्चात्यपद्धतीः ॥२८५२॥
स्कन्धावारेण सार्धं च दरदां राजवीथिनम् । विधातु विदधे बुद्धिं तं ततस्तारमूलके ॥२८५३॥
चिकीर्षति ततस्तस्मिन्मत्तेष्वन्येषु दस्युषु । उत्सेहे साल्लणिः कृत्स्नं राज्यं निश्चित्य निर्जितम् ॥२८५४॥
जयाभावेप्यनन्तेदृक्सामन्तसहितस्ततः । भव्योस्मि भवितव्येव विचिन्त्येत्यसिषिचे च सः ॥२८५५॥ 2855
पद्मोन्माथाद्विरदरदनैरप्रियैः पद्मबन्धोरिन्दौ स्पर्धिन्युदयति वपुः खण्डशः स्वं श्रियेव ।
तापस्यज्येन च रुचिरतामागमिः सूर्यकान्तैर्भद्राभद्रं व्यसनसमये संभवेदपतर्कयम् ॥२८५६॥
यो डामरतया भिक्षोः शश्वत्कुक्षेरयुपक्षणम् । टिट्टिभीनां च कौटुम्ब्याद्भर्तुर्द्रोण्युमुर्धनि ॥२८५७॥
अलक्ष्यन्यतयानन्यसामान्याश्चर्यवर्धनात् । ततः कुक्षेपयोगाच्च विश्वासस्येव मूर्धनि ॥२८५८॥
तौ नागराजवदनौ व्यसनावसरे तदा । चित्रं स्वकार्यतात्पर्यादद्रुतादरनतौ ॥२८५९॥ तिलकम् ॥
स्वस्य विधाय नागोत्कर्षं तं वीक्ष्य विश्वस्तम् । अदूरमर्थमन्येन कृत कविरिवाब्रुवन् ॥२८६०॥ 2860
क्ष्माभृद्विपक्ष स्व पक्षीकर्तुं कृपानस तत । संत्यज्य राजवदनं मां भजस्वेत्यभाषत ॥२८६१॥
नपात्र वः प्रतीक्षध्वं तेजोबलहरान्मजम् । युग्मापिरूढ किं नार्गमेवता यामिको यथा ॥२८६२॥
इति ने संदिशन्त च व्यसनस्य विहाय तम् । कामेनुसर्म नागं छायाश्रेषादिवि यत ॥२८६३॥
सर्वः स्वकार्यतात्पर्यवर्तेन प्रियाप्रिये । ज्ञलवैरेन्यतीये तु न किंचिदविगच्छति ॥२८६४॥
ज्योतिरनर्तितकान्ति दन्तयुगल बाध्यं क्षुधादीपतेर्नागस्यान्धिया प्रिया मधुलिहां कुरुमस्थली कांक्षिन. ।
वामरयैर्य विरोधभाजसरभि लक्ष्येत्यत्र नन्दी रतिस्तस्यापायकृतो हितोयमिति नाप्यस्य द्विरेफा द्विषः ॥२८६५॥ 2865

२८४२ 1) Thus A. C तद्रुद्ध — 2) Emended with C. A द्रुरद्रुद्ध 2844 3) Doubtful emendation of C, A तस्याल्लाभैरव 2845. 4) A स्कन्दा — 5) Emended. A तारस्कन्धक 2846 2854 3) Emended with C (see *mana*), A निश्चिनति 2855 4) Emended, A सहितांस्तत 2857 5) Emended, A रविरमाभा° 2858 6) Emended with C, A साल्यास्य 2862 7) Emended with C, A प्रतीक्षध्वम — 8) C अ ब ताभी बलहरात्सजातो see 2045 and note — 9) Thus A, perhaps read नार्तासं 2863 10) The text of these verses is very clearly corrupt, A as above. C reads व्यसन सविस्राय त । कामधेनुसम नाग छायाश्रेषा विधिर्न यत 2865 11) Doubtful, A नान्धैव, C सूरयैव

प्रतिष्ठालोडन कर्तुं ततो बलहरस्य सः । आजन्म वैरं संरेभे तेन भूभृद्धितेच्छया ॥२८६६॥
स तथा दारदान्भ्रानभिज्ञो भुभुजैष वः । सभोजान्राजवदनो हन्यादित्यभ्यधाच्चिजैः ॥२८६७॥
दरद्राजानकानीतनेतारौ कम्पनापनी । प्रख्यातक्षेमवदनमक्षा- -भिधाबुभौ ॥२८६८॥
त्रस्यन्नोजसनामा च कोङ्केशो मन्त्रितं रहः । वुवाणास्तद्व्यहरयन्त भोजेनान्तरवेदिना ॥२८६९॥
2870 स्फाटिकेनेव सैन्येन तेनाऽो रुद्धमध्यथ । दिधक्षुं राजार्कमहो विद्रुसैंहेन्धनेपतत् ॥२८७०॥
पार्थिवानर्थदुश्चिन्तामयपक्षपरिक्षतः । स यत्कृष्णक्षपाक्षीणसोमसाम्यं समाययौ ॥२८७१॥
रोगयस्ते रणप्रष्ठे पृष्ठगोप्तरि भर्तरि । तथाभियोज्ये स्थाने च भयजर्जरतां गते ॥२८७२॥
आहारस्थं बलहरं विहाय निखिलास्ततः । पलायिषत तेन्येर्युर्विगाह्य हरिभिर्गिरीन् ॥२८७३॥ युग्मम् ॥
दृष्ट्वा बहुमतं प्रातरागन्तारः पुनर्वयम् । कथयित्वेति संपार्थ्य सात्हणिं सह तेनयन् ॥२८७४॥
2875 प्राक्पीनकोद्यो वैवश्यात्स तेषामनुगोभवत् । भ्रष्टकार्यस्तु वैहल्यं भ्रष्टे मज्जन्निवाबधे ॥२८७५॥
मुहुः सर्वेशिरोद्रिक्तैररक्तपूर्णमिव ज्वलत् । अवरोहदनच्छाम्बुसोपानाइमनिभं मुहुः ॥२८७६॥
ज्ञातेन पतिनेनेव मुहुर्व्योम्ना महीसमम् । व्रजतस्तस्य वैलक्ष्यादलक्ष्याक्षमभून्मुखम् ॥२८७७॥
दृश्यैं च विद्रुते ये शश्वत्यभावं वयमीदृशम । राज्ञो वृद्ध्यनात्मज्ञा जानीमो मर्त्यधर्मताम् ॥२८७८॥
प्रतिभाग्रौढनिर्भातत्त्वानां नान्यथा शिरः । महाकवीनामेतादृक्पतापानलवर्णने ॥२८७९॥
2880 राज्ञः प्रतापशिखिनः कणाः क्षोणौ न सन्ति चेत् । तत्कस्माद्दाह्यमायाताः पदन्यासेष्यधीरताम् ॥२८८०॥
अनेकशौद्रिवीराणां पीतधाराम्बुडम्बरे । शौपः प्रादुष्कृतो न स्याच्छज्वालासंज्वरं विना ॥२८८१॥
किमन्तरेण तद्भूममालान्ध्यं प्रोन्मिषद्दृशः । मार्गामार्गविभागस्य परिज्ञाने विमूढता ॥२८८२॥
मधुमत्यास्तटेन्यस्मिन्विवर्ज्य दरदः स्थितान् । वीचीजवनिकाच्छन्नः सोवाप्याथ तटेवसत् ॥२८८३॥
क्रमादुत्खातखेदस्तैर्नीत्वा स्वशिविरान्तरम् । तत्रैष्यतेति संधातुं रोहद्रोहस्पृहानुरैः ॥२८८४॥
2885 नृपं तेषां ह्यगण्यार्थवर्षणं नयनैपुणात् । उपजीवितुमिच्छाभूत्तद्रक्षणवणिज्यया ॥२८८५॥
नानेहा विग्रहस्यायं प्रत्यासन्नो हिमागमः । मधुमासि विधास्यामः पुनरारब्धिमुत्तमाम् ॥२८८६॥
कालक्षेपेक्षमत्वं चेद्वृद्धराष्ट्रार्थनाधुना । त्यान्तर्भेदधी बलिनम्लिच्छकस्योपवेशने ॥२८८७॥
राजानं राजवदनः श्रितस्तैरित्यसावतः । उल्लेख्यत स्वराष्ट्रान्तर्युक्तया बन्तुं नराधमैः ॥२८८८॥तिलकम्॥
अपि राजपुरीयाणां कौटिल्यं तैर्हि जीयते । दैन्यं निदाघपत्राणां वियोगदिवसैरिव ॥२८८९॥
2890 तथा यातमुपालेभे दूतैर्बलहरोथ तम् । प्रहो निहितवांस्त्वय्यमीति चोटितवटाकरः ॥२८९०॥
उत्साहाद्राहवस्थोपि स तथा गार्गिमन्त्रिमम् । आयान्तं न नृपानीकमुत्साहाच्चै व्यचिन्तयत् ॥२८९१॥
अकस्माद्विद्रुतदरद्राजभोजादिवार्तया । न व्यदीर्यत यद्धैर्यपर्यायैस्तत्किलाङ्कनम् ॥२८९२॥
आडम्बरालम्बनस्य भेदेप्यच्छिन्नविग्रहः । यदयुद्धोद्धतं सिध्येत्तत्कस्यामानुषं विना ॥२८९३॥

२८६८. [1]) Thus A, the *akshara* before the *lacuna* could be read also भु, C °चवनमधुभद्राभिधा° २८७०. [1]) Emended with C, A विवक्षु.—[2]) Emended; A विद्रुसूद्रेन्धने. २८७३ [1]) Emended; A पलायिषतनेन्येर्. २८७५. [1]) A °कोपो. २८७६. [1]) Doubtful emendation, A सर्वेशिरोद्रुक्° —[2]) Emended; A °द्वलम् २८८४ [1]) A स्वशिविरा° —[2]) Emended, A रोहद्रोह स्पृहा°. २८८७ [1]) Emended, A °ह्मणा. २८९१ [1]) Emended with C, A गर्गिम°.—[2]) Doubtful emendation, A °कमु - ह्मत्र, C °नीकं दृष्ट्वापि नष्ट्व°.

कालानुरोधात्संधित्सू धन्यद्वारादिपावथ । सोयोजयद्विलम्बेन भोजपत्यागमाशया ॥२८९४॥
ततोलंकारचक्रः स नेतुं मान्द्रणिमाययौ । ज्ञातेयाद्वारदानेत्थं प्रार्थिता परिपन्थिनीः ॥२८९५॥ 2895
बुद्ध्वा तदनुबन्धेपि द्रोहनिर्बन्धिनीः सभाः । अयहीन्मार्गसेत्वर्थे निधनाध्यवसायिताम् ॥२८९६॥
भृत्यैः सह युवप्रायैर्वीक्ष्य तं मर्तुमुद्यतम् । दरात्पुरं दरन्नाजसैन्यं तद्वैन्यमाययौ ॥२८९७॥
व्यपोहन्ती बलद्वारी बाहुभिः कलहं सरित् । कल्लोलास्फालनोल्लापैर्जिनिन्देव दरद्वलम् ॥२८९८॥
क्षपितः स्वावरोधैश्च सेर्ष्यैश्च म्लेच्छपार्थिवैः । सैन्यैः कदनभीतैश्च विड्डमीहोथ तं जही ॥२८९९॥
पुरःसरैर्भयसेनुपालैः पारं परं ततः । विद्राव्य तानि[1] सं प्राप भिन्दंस्तूर्यरवैर्दिशः ॥२९००॥ 2900
असामर्थ्ये वरूथिन्याः स्वस्य चार्थितसंधिना । आनीतो विड्डमीहेन दूतः प्रोक्तोथ भूपतेः ॥२९०१॥
अमानुषानुभावेन तावत्त्वत्स्वामिना भवेत् । प्रातिसीमिकसामन्तबुद्ध्या स्पर्धासु धीवरः ॥२९०२॥
अश्रद्धेयानुसंधान एव यान्ती[2] यमान्तिकम् । जयराजोसि वामुष्य प्रभावावेदकी दिवि ॥२९०३॥
तेन दिव्यानुभावेन निर्जेयोपि जयो मम । पान्थस्य कुलविभ्रंशात्तीर्थे पतनमुन्नतिः ॥२९०४॥
अथायातः पुरे स्थित्वा कंचित्कालं निजैर्विशत् । यमराष्ट्रमसत्कीर्तिलसद्वन्दनमालिकम् ॥२९०५॥ 2905
अबुद्ध्वा भोजमायान्तं संधिं तत्रैव धामरे । सार्धं हारेशधन्याभ्यां स राजवदनोत्यगात् ॥२९०६॥
अश्रागतं तं व्यावृत्य षष्ठं प्रष्ठं मनस्विनाम् । आदाय तावथाभ्येणं प्राविक्षत्तां क्षमापतेः ॥२९०७॥
अहंकारादिमोहाद्यविमर्शेनं बहिष्कृतौ । उपेक्षामक्षते भोजेभजनां[3] राजबीजिनि ॥२९०८॥
आहूतस्तु हठोत्कण्ठाभाजापि प्रभुणासकृत् । अनिःशेषीकृतारातिर्न व्यावर्तत रिल्हणः ॥२९०९॥
प्रभोः पुरस्तात्कार्यान्ते तेन स्थातुमशक्यत । प्रसादाकाङ्क्षिणा सद्देनेव भोक्तुं न हि क्वचित् ॥२९१०॥ 2910
द्विधा कृता येन युद्धे पृथ्वीहरसुतश्रयी । मगधेन्द्राकृतिर्भीमेनेव कार्यक्षमाभवत् ॥२९११॥
मानूकुक्षिगिव स्त्रोर्वी तेनाजौ लोष्टकैः कृतः । खाण्डवं खण्डितः सर्प इव गाण्डीविनाविशत् ॥२९१२॥
भजंश्चतुष्कः संकोचं दुर्भेदं त्रिष्टकालयम् । स्वकायकर्परं दर्पोज्झितः कूर्म इवाविशत् ॥२९१३॥
निःशेषीकृतकार्यः स शौर्येणैव महीपतेः । पार्श्वं पादनखज्योतिःपट्टबन्धात्प्रये ययौ ॥२९१४॥
प्रतापैर्नृपतेरित्थं विप्रवः शोषितोप्यभूत् । अमात्यमतिदोषेण भूयः प्रादुष्कृताङ्कुरः ॥२९१५॥ 2915
दण्डार्हो राजवदनो दानेनाप्यायितो यतः । निर्भयं भोजमायान्तं प्रतिजग्राह तं पुनः ॥२९१६॥
उत्कोचपरिणामात्तं सोथ स्थापयति स्म तम् । दिन्नाग्रामाभिधे स्थाने खाशकानां निवेशने ॥२९१७॥
इत्येनमब्रवीच्छ्वेश्रायास्यो नानुगामिनः । मितानुयायी हारेशः प्रायास्यद्दोचरान्मम ॥२९१८॥
सोरुकम्पः साहसस्रोतःपातेनीयत नौरिव । त्रिष्टकेनापि स स्थैर्यं नीतिरज्जुप्रसारणात् ॥२९१९॥
व्यसनोल्लासवैवश्यं विशां पत्युर्व्यचिन्तयत् । येनाव्यवस्थाप्रायम्यं स जात्मः पुनरग्रहीत् ॥२९२०॥ 2920
अलंकारादिभिः स्वास्थ्ये स्थाप्यमानोपि मन्त्रिभिः । अत्यजच्चैव कौटिल्यमजितात्मेव दुर्ग्रहम् ॥२९२१॥

२८९५ [1]) Emended, A °हारदानेत्थ the text is corrupt २९०० [1]) Emended, A विद्रावितानि २९०१ [1]) Emended, A वरूथिन्या २९०२. [2]) Emended, A तावत्त्वत्स्वामिना २९०३ [1]) Emended with C, A यान्तो २९०५. [2]) Emended, A °मालिकाम्. २९०७ [1]) The letter corresponding to य् cannot be read with certainty in A, C तावताभ्यर्णं. २९०८ [1]) A °विमर्षेण —[2]) Emended, A भजते २९१२ [1]) Comp note to लोडन vm 2196 २९१३ [1]) Emended with C, A भजच्च°. २९१९ [1]) Emended with C, A °स्रोतपति° २९२१. [1]) Emended, A अत्यजज्जैव and °जितात्मैव.

गदं वैद्य इवापाकं तमवज्ञाय पार्थिवः । पक्कगण्डानिवारेभे रिपून्पाटयितुं परान् ॥२९२२॥
आगन्तव्यं त्वया पश्चात्त्वत्सकाशे प्रकम्पताम् । भोजमुक्त्वेत्यलंकारचक्रोणाहिन्नवोद्यतः ॥२९२३॥
तं जयानन्दवाडाख्यो दस्युरानन्दवाडजः । अन्वयुर्विक्रमोदग्राः परेपि क्रमराज्यजाः ॥२९२४॥
2925 अपस्थितो राजगृधोलंकारः स्वल्पसैनिकः । वालुकासेतुकल्पस्तैर्जज्ञे सिन्धुरयैरिव ॥२९२५॥
स तु रामचराचाजिक्षोभसंभावनां विशाम् । उदपादयदेकाकी कुर्वन्बहुविराहवम् ॥२९२६॥
आपानरभसक्षुभ्यद्रक्षःसंभ्रमदक्षिणम् । रणं जगाम गज्झात्वमज्झसाल्लपरिप्लुतः ॥२९२७॥
स तूलकूटमिव तत्कटकं विकटं द्विषाम् । किमन्यत्तैरयत्कापि प्रभञ्जन इवाञ्जसा ॥२९२८॥
मांसाय गृध्रकङ्कादिपक्षिचक्रातस्य तत्यजे । आनन्दवाडसूनुः स हत्वा तेनेषुणा रणे ॥२९२९॥
2930 भोजस्योत्थातुकामस्य जिघृक्षोः क्ष्माभुजश्च तत् । पङ्गुप्रधावत्कक्करव्याधन्यायो व्यवर्धत ॥२९३०॥
अनुद्रयनसामर्थ्यः भ्राम्यति क्रकरो यथा । धावन्पङ्गे पतन्व्याधोप्यनुधावत्यथान्वहम् ॥२९३१॥
प्रमङ्क्षे साहसस्यैवं भोजः क्लैब्यमगात्सदा । तं प्रायुंक्ष्मुर्भुवोपि मतिमोहं मुहुर्मुहुः ॥२९३२॥ युग्मम् ॥
दिन्नाग्रामस्थिते भोजे स राजवदनोप्यगात् । पुनः किं चौरचण्डालाः श्रेयसीत्युक्तिमीशितुः ॥२९३३॥
डामरा भटसंघाता भूयः पूर्वाधिकां ततः । कन्थां ते मन्यथामासुर्मुहुर्यौ शौर्यशालिनः ॥२९३४॥
2935 ते द्वारपतिमायातं सोढुं शोकेन केवलम् । अशक्यैराहवैर्यावत्तावत्पर्यादुदवेजयन् ॥२९३५॥
तेषां त्राणार्थमन्येषामुत्थानार्थमथायथौ । कूटोलंकारचक्रेण नीर्वि दत्त्वा स माल्हणिः ॥२९३६॥
तेषां परेद्युः पार्श्वे स वियासुरसकृत्यदा । हायाश्रमं भ्रान्तसैन्यो द्वारेशोबुद्ध तं तदा ॥२९३७॥
अजानन्निव तेषां स व्याजसंधिं निबद्धवान् । मिथान्कुतोत्थगात्तिर्यक्स्थितं सत्तारमूलकम् ॥२९३८॥
तस्मिंस्तत्र स्थिते दूरात्कुतस्थामपि पृक्कृतिम् । श्रुत्वा भोजोवदत्सायं किमपि व्याकुलीभवन् ॥२९३९॥
2940 निर्जैर्विहस्यमानोपि त्रासात्तस्मादहेतुकात् । व्यरंसीत्संभ्रमात्रासौ चक्रे सज्जांस्तु वाजिनः ॥२९४०॥
वस्तोलंकारचक्रोय दशाग्राम्यपतो द्रुतम् । क्व राजपुत्र इत्येवं कथयित्वा पलायितः ॥२९४१॥
उदतिष्ठत्ततो मामध्यात्तुर्यध्वनिर्महान् । आस्कन्दावेदकः सेनानिनादश्च क्षणामुखे ॥२९४२॥
अलक्षितो ध्वान्तमध्ये भेजे भोजः पलायनम् । श्वः कर्तव्येष्वलंकारचक्रो युद्धाय संदधे ॥२९४३॥
दत्तो द्वाराधिपनाम्निर्गगिरिवर्त्म प्रकाशयन् । ध्वान्तध्वस्तात्मनां[1] तेषां तदाभूदुपकारकः ॥२९४४॥
2945 द्वाराधिपस्य क्षाम्यन्तः संधिं भोजप्रतीक्षया । श्रुत्वा तमथ वृत्तान्तं भङ्गं ते डामरा ययुः ॥२९४५॥
असंख्यजज्ञपत्न्यादिबन्धं धीरोज्ज्वलाभयात् । आजि स भोजोलंकारचक्रेणामङ्गलावहम् ॥२९४६॥
....[1] । भोजस्तत्राप्यभूत्तर्षात्राद्वाराद्विसुखान्वितः ॥२९४७॥
बाणाग्निजस्त्रिपुरनिर्दहने प्रतापः पाथोनिधेः प्रमथने वडवाग्निजन्मा ।
आसाद्य मन्दरनगेन समागमं हि न क्वापि पन्नगपतेः सुखसख्यमासीत् ॥२९४८॥

२९२३ [1]) Emended with C, A °चक्रेणादि° २९२४ [1]) A °वाळाख्यो and °वाळज २९२५ [1]) Emended with G (*sec. manu*), A कल्पस्त जज्ञे. २९२६ [1]) Conjectural reading, A रामराचा°, C शत्रुविराचा°. २९२९ [1]) Emended A °पतित्रात्मस्य, C °पतित्रा°.—[1]) A आनन्दवाळ°. २९३२. [1]) Emended. A तत्प्राभु° २९३८. [1]) Emended, A सन्ता°. २९४४. [1]) Emended, A °स्मना. २९४५. [1]) Emended with C, A °क्ष्मन्त. २९४७ [1]) Two or more *pādas* seem to be lost here, A does not indicate the *lacuna*; C supplements संरम्भात्कलंमारेभे सामर्थ्याच्च पक्षमे

क्षुत्पिपासाश्रमं हन्तुं प्राप्तः स्वविषयावनौ । अलंकारात्मनैर्भूयो बन्दुं भोजोऽभ्यलष्यत ॥२९४९॥
पितुर्मतेन बुद्ध्या वा स्वया तत्रद्विधित्सतः । सोऽभिसधाय निर्यातः प्रापाथ विषयान्तरम् ॥२९५०॥ 2950
ततो बल्लहरणैव कृत्यं निश्चित्य कार्यवित् । अनास्थेन्यलवन्येषु दिन्नाग्रामं पुनर्ययौ ॥२९५१॥
द्वाराधिपोदितोद्वारधीरोप्यन्तरेक्षमः । चक्षुरोगेण भग्नाभियोगोऽस्माद्व्यधीयत ॥२९५२॥
भोजाय दातुमैच्छद्यो डामरस्ते सुते ददौ । पर्माण्डये गुल्हणाय राजजाय च निर्जितः ॥२९५३॥
रंगोच्चण्डतया दण्डप्रयोगावसरे कृते । तत्र साम प्रयुञ्जैव द्वारेशो विवशोविशत् ॥२९५४॥
अभियोगक्षणे तस्मिन्यथा भारसहः क्षयम् । दुर्नामकामयक्ष्मामः षष्ठचन्द्रोपि गर्गनः ॥२९५५॥ 2955
तत्रामयाविनेयेवात्तोद्रेकौ तदनुजौ निजौ । चक्राते वसुधां दुःस्थामास्कन्दाद्यैरुपद्रवैः ॥२९५६॥
विद्विक्कः प्रबलैरन्यैः सहाभेदं प्रवर्तयन् । नापहीद्विषहैकाग्र्यः सान्त्वनानपि भूपतेः ॥२९५७॥
षष्ठे निर्यां गते रोगमग्ने द्वारपतावपि । नियुक्तः क्ष्माभुजा धन्यो निरगात्तारमूलकम् ॥२९५८॥
भोजश्युतोमुतोन्येषां बलिनां गोचरे पतेत् । प्राप्तप्रतिष्ठो निस्तीर्णो देशाद्वासाध्यता व्रजेत् ॥२९५९॥
इति संचिन्त्य सामाद्यैरुपायैस्ते निवृक्षणा । क्ष्माभुजामन्दमरम्भो विक्रमे सोभियोगभाक् ॥२९६०॥ युग्मम्॥ 2960
अज्ञानोदर्कवैषम्या दुर्नीतिः सा महीभुजम् । व्याबृण्वत्याबाधताच्छिन्नपुच्छाकृष्टेव पन्नगी ॥२९६१॥
बलिनं राजवदनं नृपं चावेत्य निर्बलम् । आभ्यन्तराश्च बाह्याश्च विक्रियां यत्क्रमाययुः ॥२९६२॥
छिद्रान्तराणि छलभानि सदैव हन्त पातालरन्ध्रसरणेरिव दण्डनीतेः ।
बहीभवन्त्यसरमन्तरसंपविष्टो यात्यप्रतर्क्यनियमात्पतनं भजेद्वा ॥२९६३॥
भोजत्यागोर्थितो राजा क्षीणार्थोसौ व्रजेदिति । उक्त्वेत्यमुं बल्लहरस्तस्य वृत्तिमकारयत् ॥२९६४॥
ता लब्धप्रसरां मायां राजपक्षे विलोक्य सः । युक्तयन्तरागि संलेभे प्रयोक्तुं नीतिकोविदात् ॥२९६५॥ 2965
संधिं पदे पदे बद्ध्वा सार्धं बल्लहरादिभिः । कुर्वन्गतागतं धन्यो जनस्यावाप हास्यताम् ॥२९६६॥
शश्वद्यावर्तमानस्य राजकार्यस्य नावधिम् । अरघट्टघटीयन्त्रगुणस्येवाससाद सः ॥२९६७॥
तस्य चक्रं इवोद्भान्ते कर्तव्ये नैष्ण्यभागपि । भेत्तुं प्रारेढु वाप्यासीद्यो बाणं इवाक्षमः ॥२९६८॥
नीतराजद्दयो व्यग्रः शेषस्यैकस्य विग्रहे । चतुरङ्ग इव क्रीडन्विजयोभूद्दिशां पतिः ॥२९६९॥
बल्लहरयः प्रदानार्थं ततश्च छद्मना परान् । भञ्जतो वानिवृत्त्यादि नाप्यासीद्व्यग्रतागणत ॥२९७०॥ 2970
दस्युषु स्यूतसङ्घेषु शीतापायपरीक्षिषु । नागाद्बल्लहरः स्वेषामुन्मूलनमशङ्कत ॥२९७१॥
सामर्थ्यशिथिलाभित्रभावे सुव्रतविग्रिये । तस्मिन्धावति धन्ये च शश्वत्सोत्रेपताकुलः ॥२९७२॥
संमन्त्र्य सार्धं भोजेन धन्यं समदिशत्ततः । बल्लर्षियत नागं मे भोजं दास्यामि वस्तत ॥२९७३॥
[illegible] ॥२९७४॥

२९४२. [1]) A बन्धु. २९५६ [1]) Emended, A तमनुज निजम्. cf. षष्ठस्य जयचन्द्रश्च श्रीचन्द्रश्चानुजौ viii 2753. २९५८ [1]) Emended, A धन्ये २१६९. [1]) Emended, A °नुजाम् २९६७. [1]) Emended, A 'द्वयवर्ती° २९७१ [1]) A has written first स्यूतसङ्घेषु and subsequently indicated the reading स्यूत°. २९७४. [1]) Emended, A 'वह २९७६. [1]) Emended with C, A काकुस्थोपि.

संहृत्य सत्यनित्यत्वं राज्यगर्वाविशुद्धधीः । आचार्यं पाण्डवो राजा धर्मनिज्ञोपयाचयत् ॥२९७७॥
आ भिक्षुविषयाच्चित्यद्रोग्धुर्नागस्य विग्रहः । स्वार्थापेक्षी तटस्थस्य तत्काले न विगर्हितः ॥२९७८॥
अगृहीत्वा तु भुमर्वा कंचिद्दोषं जार्यणे पणम् । सोवाष्टर्म्मीत्यभुक्तस्मिन्मन्यूर्मतिमतां मनाक् ॥२९७९॥
2980 यथा तत्कृत्यमायत्यां हितं जातं तथैव चेत् । विचार्याकारि राज्ञा तच्छेमुषीयममानुषी ॥२९८०॥
विभिन्न इव भोजस्तु नागं समदिशद्यथा । दित्सुर्बलहरो राज्ञे त्वदर्पणपणेन माम् ॥२९८१॥
बन्धमभ्यधानोस्य राज्ञस्त्रासादसौ श्रयेत् । स विदन्नथ माध्यस्थ्यमिति तं हि तथाऽवदत् ॥२९८२॥
षष्ठचन्द्रे गते निष्ठां जयचन्द्रेण पार्थिवः । संगृहीतेन तं नागं पार्श्व प्रावेशयत्ततः ॥२९८३॥
पक्षीकृतः क्षमाभृत्यायं हन्यादस्मान्भयादिति । चलन्तमपि तं भोजस्तन्मन्त्रिणमबोधयत् ॥२९८४॥
2985 तथेति जानन्नपि तं कृष्टोस्म्येतैरनीशताम् । यातः किमपि हन्तेति दुर्नैर्नागोप्यभाषत ॥२९८५॥
नियतं नियतिस्रोतोगर्भे जन्तोर्निमज्जतः । कथ्यमाने तटस्थेन श्रोतुं न श्रवणौ क्षमौ ॥२९८६॥
नागे बद्धे तत्कुटुम्बैर्भीतैरेत्य समाश्रितः । मायाशाली बलहरो दुर्दशः समपद्यत ॥२९८७॥
भोजनिष्क्रयविक्रेयं तमादाय ययौ ततः । रिल्हणेन समं धन्यो धावन्बलहरान्तिकम् ॥२९८८॥
सान्तर्हासोमोहयत्तौ प्राद्रागं दत्त मे ततः । भोजं दास्यामि व इति ब्रुवन्भ्रामयति स्म सः ॥२९८९॥
2990 बद्धमूलतया दूरं दुर्धर्षो योजुमागतम् । सर्वं तच्च तयोः सैन्यं निन्ये कृत्यविधेयताम् ॥२९९०॥
वर्षयुद्धापकर्षादि खिन्नौ तौ ततोभ्यधात् । इतोपसृतयोः कुर्या युवयोर्मैतमित्यमौ ॥२९९१॥
एकपत्याणान्तरिते स्थितयोः पथि चाकरोत् । कार्यान्तःपातवैवश्ये तयोर्मतिविमोहनम् ॥२९९२॥
काचिद्बुलहरस्यासीत्पर्यायैर्यैस्सच्चयोः । निर्श्रेयाद्यायने काले वीराणां विरलैव या ॥२९९३॥
तथा हारितमार्गाय साहसात्पार्श्वमीयुषे । द्रुह्यति स्म न धन्याय लोभाद्भोजाय नापि यः ॥२९९४॥
2995 मतिमोहेन नागं चेक्षयुर्मे सचिवास्ततः । कुर्या तं स्वपदेभ्यर्थं चकारेति च चेतसि ॥२९९५॥
नागासांनिध्यलब्धार्द्रादार्द्रीयं गुदवैकृतः । भ्रातृव्योपायतन्नागं धन्यायिल्लोष्ठकाभिधः ॥२९९६॥
सचिवैर्मन्त्रिते नागे निर्हेत्वहितमोहितैः । दुर्मन्त्रित नरपतेः स्वैः परैश्च व्यगर्धत ॥२९९७॥
स्वजातीयत्वधक्रोधाद्विरुद्धैः सर्वडामरैः । नागानुगैश्चाश्रितोभूत्तेा बलहरो बली ॥२९९८॥
देहिनो व्यसनापातवैवश्याद्भ्रमतोपथि । अकार्यं कुर्वतः कार्ये सिद्धः संसार्यहेर्यिः ॥२९९९॥
उद्यद्सहवित्ततानवतया बद्धावधाने मनस्युन्मार्गध्रमणेवशस्य रभसाच्छ्रेभ्रे पतिभ्राम्यतः ।
3000 अन्योपाहितकोशपृश्चलुडनात्सदार्द्रीशाद्भक्षतेर्जन्तोरिन्त तनोति दुर्गतिशमं रम्यानुलोम्यो विधिः ॥३०००॥
तथा निरनुसंधानं नागं धीसचिवैर्हृतम् । नायुद्ध भोजः संजातत्रासस्त्वेवं व्यकल्पयत् ॥३००१॥
लब्धवर्णस्य नावर्णावहं कर्मेदमीशितुः । अलब्धपणबन्धस्य वाञ्छितार्थै विशङ्कते ॥३००२॥
'यश्च युद्धमिति व्यर्थं हर्षादाशामवापि यः । भोजमन्यकरस्थोयमशक्यो ह्यन्यथा मम ॥३००३॥

२९७९ [1]) Emended, A सोवष्टर्म्मी° २९८१ [1]) Emended, A °बलहरे २९८४ [1]) Thus A, perhaps read °न्मन्त्रिणमबो°. २९८५ [1]) Emended, A स्मात्यर्थैर° २९८८ [1]) Emended with C, A भोजांनि°.—[2]) Emended with C, A °न्बलहरान्तिकम् २९८९. [1]) Emended, A मोहयन्तौ. २९९१. [1]) Thus A, C °कर्षादिसखिनौ —[2]) Thus corr. by A, from °व्यधात. २९९५. [1]) A has written मनिमोहे, n supplied apparently by A. ३००३. [1]) The text of this verse is evidently corrupt, emendation doubtful.—[2]) Perhaps read युद्धमतिव्यग्र.

उक्तेति मोहयन्धन्यमुख्या - - स्मिं संदिशेत्[1] । इति मां राजवदनः स्थितस्तन्नूनमन्यथा ॥३००४॥युग्मम॥
आ भिक्षुव्रतवाङ्मोहसुभिक्षस्यानुबन्धिनः । किं राजवदनोप्येष लोभात्संभाव्यते न भूः ॥३००५॥ 3005
अथाविशङ्किनस्त्रासव्युदासायास्य खाशकाः । रक्ताद्रेकृत्तिन्नस्ताङ्गि कोशपानं प्रचक्रिरे ॥३००६॥
प्रादुष्कृतभियः क्षिप्ररक्षिणोमुष्य तिष्ठतः । विश्वासार्थं बलहरो विरलः पार्श्वमाययौ ॥३००७॥
अमात्यमतिनाद्येन नष्टे कृत्येथ कृत्यवित् । स्वयमुत्तम्भने नीतः संरेभेसंभ्रमो नृपः ॥३००८॥
चैत्रः पादपमण्डलस्य तटिनीतोयस्य वर्षागमः सत्कारो गुणगौरवस्य नयनप्रेम्णोन्तिकासेवनम् ।
ऐश्वर्यस्य महोत्सवो जयविधेर्गाढाविषादग्रहः कर्तव्यस्य च सिद्धदेवनृपतिर्म्लानौ न तत्त्वावहः ॥३००९॥
प्रत्याहृणेव कृत्यस्य हडेन हरतोन्तरे । प्रातिलोम्यं श्रितवता पारं गन्तुं न पार्यते ॥३०१०॥ 3010
अतो धूर्तो नृपो मुग्ध इति ज्ञातोरिभिर्मुधा । मौग्ध्यं पदर्शयंस्तेषां यततेस्माभिसंधये ॥३०११॥
स हि यत्तत्प्रदानेन भजन्भोजान्तिकस्थितान् । तस्याविश्वासपात्रत्वं मन्त्रस्तस्याभितोनयत् ॥३०१२॥
गन्धेन वासितोत्सङ्गाः कुरङ्गार्थङ्गजन्मना । प्रज्वलन्त्यो विभाव्यन्ते तटिन्योपि कवाटिभिः ॥३०१३॥
नीडस्थान्तः सरन्ध्रस्य सर्वतो हि भयं स्फुरन् । जाले द्वारमबद्धे च निर्गमे पतनं विदन् ॥३०१४॥
ताम्येद्यथा स्वगो भोजस्तथान्त म्येष्वविश्रमन् । बहिर्गूपेन रुद्धाध्वा प्रस्थानेप्यभजद्भयम् ॥३०१५॥ युग्मम्॥ 3015
तदा स दौस्थ्यातिथितां प्राप्तः प्रेक्षत न क्षणम् । मनोविनोदनं किंचित्कृत्यं लोकद्वयोचितम् ॥३०१६॥
उत्पाभिषङ्गमनुषङ्गि परस्य दुःखं हन्ताश्रयं व्यथयति प्रसभाद्रभावम् ।
बद्धः सरोजकुहरे विरहार्तनादैर्धक्काभिधस्य मधुपोपिकमेति दैन्यम् ॥३०१७॥
रणे पूर्णवणादयानदोणितो लूनकुन्तलः । फेणोद्गारार्णनः क्रन्दंस्तनैकः प्रैक्षत द्विजः ॥३०१८॥
स पृष्टो विप्रुतेर्नीतं सर्वस्वं विक्षतं तथा । स्वं डामरैर्निवेद्यैनं निनिन्द त्रातुमक्षमम् ॥३०१९॥
स्वदीस्थ्यार्तमनास्तस्य दुःखेन व्यथितोब्रवहम् । पक्षिताद्रव्रण इव प्राह स्मेति स सान्त्वयन् ॥३०२०॥ 3020
गर्ह्योस्मि न ते ब्रह्मन्योनुयाद्योहमीदृशः । त्विषमे वर्तमानश्चेत्यथ सोपि तमब्रवीत् ॥३०२१॥
दुर्धर्षेणामुना ब्रूहि कोर्थः पार्थिवपुत्र ते । सारासारविदो यूनः कुले जातस्य मानिनः ॥३०२२॥
प्राणान्संदेहमारोप्य प्रणम्य प्राकृताशयान् । पीडयित्वा विशः क्लेशैः कार्यं किमिव पश्यसि ॥३०२३॥
यश्च ते प्रतिभास्येव जेतव्यो विदितो न किम् । अभिद्रोचः स सारङ्गः परशौर्याभिमज्जने ॥३०२४॥
यत्र शस्त्रशलाकापि विकला तद्विधीयते । इन्दीवरदलद्रोण्या घटनं स्फाटिकाश्मनः ॥३०२५॥ 3025
पृथ्वीद्वारावतारादिप्रत्ययनीकिंचितः परे । के नामात्र न संघर्षं क्षुद्रायां दरिद्रति ॥३०२६॥
किं कृष्णा एव वृद्धापि कृत्यं हैरात्र्यजीविनाम् । भृत्याशयाः फणिग्राहिगृहीता इव भोगिनः ॥३०२७॥
जातैः क्ष्मावलयोद्दहे फणिकुले धिग्भोगिडिम्भैर्मुधा व्यालग्राहिविकासितास्यकुहरैर्यासस्य हा गृध्यते ।
एतान्भिक्षयितुं न तु प्रथयितु ते जीविकायै जनचासार्थं ननु कारयन्ति हि हरेर्नर्मज्ञनोन्मज्जनम् ॥३०२८॥
इत्युक्तवन्तं तं सान्त्वयित्वा भोजो व्यसर्जयत् । तदैव चाभु व्याकोशविवेकः समपद्यत ॥३०२९॥

३००४ [1]) Thus A, C °मुख्यान्मुग्धोऽस्मि सन्दिशेत् —[2]) Perhaps read संदिशन ३०१९ [1]) Emended with C, A °र्नीत ३०२२. [1]) सारसा no longer legible in A, found in R G C ३०२७. [1]) Emended, A दृष्ट्व ३०२८ [1]) Emended with G (*sec. manu*), A °कुलैर्धिभोगि° —[2]) Emended, A बुधा —[3]) Emended with G (*sec. manu*), A °कासितस्य कुहरैर्यासस्य ३०२९ [1]) Emended, A तंत्रव

भव्यात्मत्वं प्रशममहिमोद्भासने ऽन्त हेतुर्भावानां तु ध्रुवमपरथा मार्दवं क्रूरता वा ।
3030 स्पृष्टं पादैरमृतमहसः स्यात्कठोरं हिमांशोर्याति यावाप्यहह रभसादार्द्रतां चन्द्रकान्तः ॥३०३०॥
राजन्याभिजने जातोप्यलज्जत्वमशिक्षितः । सोन्तरं स्वस्य राज्ञश्च मुहुर्महदचिन्तयत् ॥३०३१॥
गुणै ौर्यनयत्यागसत्यसत्त्वादिभिः प्रभोः । पूर्वेप्युर्वीभुजः खर्वाः क्षुद्राः स्पर्धासु के वयम् ॥३०३२॥
तस्य प्रभावदीप्तेपि समये क्षान्तिशीतला । शक्तिः क्षयजडत्वेपि सुधानां नो महोष्मता ॥३०३३॥
क्लेडाग्नितापनिर्विडोरगसंगमेपि तुङ्गस्य चन्दनतरोरपि शीतलत्वम् ।
काले हिमर्तुपरिपिञ्जरसंज्वरेपि निम्नस्य कूपकुहरस्य महोष्मयोगः ॥३०३४॥
3035 कुतोपि पर्ययात्कार्यं सुप्रं नृपममुं विना । प्राप्य कस्य पुनः प्राप्यमप्यभुद्धा न बाधितम् ॥३०३५॥
भ्रष्टं निर्झरवारि शुभ्रमनघैः स्वीयेन भूयः क्वचिल्लभ्यं लभ्यमथाभ्रतः कलुषतादुष्टं प्रकृष्टं न तत् ।
निर्यद्भिरनिम्नगाम्बु नभसः प्राप्येत नित्यं दधत्पालेयत्वमुपेत्य शुद्धिमधिकां नार्द्रोह्मिाद्रेर्नगैः ॥३०३६॥
तदर्थमेत्र मथितो योनर्थोपथितात्मनः । स तेन स्वस्थतां नेतुमर्थितो न स्पृशेदुषम् ॥३०३७॥
द्रोषाय योस्य दवदह्निमदादमुष्मिन्स्वस्थे स तेन शिखिना ग्लपितः समीपम् ।
अभ्येति चन्दनतरोर्दवदह्निदाहशान्त्यै यदि प्रियकृदेष न तस्य किं स्यात् ॥३०३८॥
समर्थदुर्गतावहदपकर्तेव भूपतिम् । लोकनाथं तमुद्धर्तुं धीरं धन्यः पुनः पुनः ॥३०३९॥
3040 राजपमादनोपायान्वेषी बलहृान्तिकम् । राजदूतमथायान्तमेकदैकं व्यलोकयत् ॥३०४०॥
दर्दशं व्रजन्दृष्टवान्प्राक्प्रज्ञातमन्तिकम् । स नमन्तं तमानीय ततः स्मेर इवाब्रवीत् ॥३०४१॥
राज्ञः किमन्यमंधनैः संधिं बध्नात्वसौ मया । प्राज्ञैर्हि भिषजा भोज्यमातुराय समर्प्यते ॥३०४२॥
ततस्याथहसानस्य नर्मस्मेरस्य जानतः । प्रत्ययोत्पादनं तैस्तैरालपैः किंचन व्यधात् ॥३०४३॥
निर्दम्भमाविर्भवद्विस्रम्भः स कथान्तरे । अथाभिगम्य राजानं स्तुवन्भोजमभाषत ॥३०४४॥
3045 राजपुत्राभिजातस्य पादच्छायास्य लभ्यते । स्वर्णाद्रेरिव कल्याणप्रकृतेः पुण्यभागिभिः ॥३०४५॥
अनुवृत्त्यातिमृद्व्यापि तस्यापोषेतं वैकृतम् । ज्योत्स्नयेव शरद्भानुपरिवापीष्यमम्भसः ॥३०४६॥
अपि स्मरसि चारत्वे नियुक्तोसि मदीभुना । त्रिशतस्ते दर्दशमभूवं पुरतः पुरा ॥३०४७॥
ततो निवृत्तो वृत्तान्तं मुख्यमाख्याय तावकम् । कालं क्षेपुं कथां दैर्घ्यं नयन्मध्ये तमभ्यधाम् ॥३०४८॥
क्षुनृट्श्रवक्लमभ्रान्तान्देव त्वामवलोक्य माम् । निन्दतः स्वानुगान्भोजो निर्भर्त्स्यैवं तदाब्रवीत् ॥३०४९॥
3050 स दैवतमिवास्माकं कुलालंकरणं प्रभोः । वयं त्वसुकृतो यस्य नामुमः पादसेवनम् ॥३०५०॥
गण्याः पर्यन्तनिःसारास्तत्संबन्धादिमे वयम् । चन्दनभ्रान्तिकृत्काष्ठं यत्स्यात्तद्वन्ध्यवासितम् ॥३०५१॥
तच्छ्रुत्वैव दयार्द्रस्त्वं यातः स लक्षितः । पृच्छन्निवेव किं गर्भरूपो वक्तीति मां पुनः ॥३०५२॥
तन्निशम्यैव भोजस्य ह्रीभूतमभूनमनः । सोन्तर्बाष्पोप्यपदयत्तं सान्त्वयन्तमिवायतः ॥३०५३॥

३०३० ') Emended with C, A स्पृष्ट ३०३५. ') Emended, A बाधितम्. ३०३९ ') Emended with G (*sec. manu*), A समर्पोद्गु° ३०४०. ') Emended with G (*sec. manu*), A °मेकमेक. ३०४१. ') Emended, A °दृष्टवाक्प्रज्ञान्तम्, C °वाक्प्रज्ञातुमं. ३०४२ ') Emended with C, A सन्धिबन्धात्वसौ ३०४६. ') Emended, A °पोषेत. ३०४७ ') Emended, A चारत्वे ३०४८ ') Emended; A कथार्द्धं.—') Emended, A तमभ्यधात. ३०४९. ') Doubtful emendation of C; A क्षुत्रक्षव° ') Emended, A भोज. ३०५३ ') ष्प omitted in A, supplied with C.

सत्य मात्रासंबोधमुग्धत्वेन विहीयते । तस्यविस्कारणाज्ञानादन्तःकरणवेदनम् ॥३०५४॥
अप्रबोधनस्तामिच्छां भोजस्याकूच्छ्रवर्तिनः । प्रतिदूतीकृते तस्मिन्धन्यो न प्रत्ययं दधे ॥३०५५॥ 3055
दयिताभुगथा नागवृत्तान्ते न भवेत्तथा । महीभुजं मोहयितु मायया दीव्यते मया ॥३०५६॥
मा भूद्भोग्यमित्येवमुक्ता बलहर रहः । व्याजाजिवेन भोजस्तु संधिबन्धाय तत्वरे ॥३०५७॥युग्मम्॥
तत्का[1]योग्यसाचिव्यश्चक्रिकाचतुरस्तथा । तेनाशु दैशिकाप्यमेकां दूत्ये न्ययोज्यत ॥३०५८॥
स बालकतया नित्यस्वतन्त्रश्चक्रिकां स्वयम् । आचरेदिति नाशङ्कां भोजे बलहरोभजत् ॥३०५९॥
पार्थिव[2] प्रार्थितः संधिदूतमात्रं प्रतीक्षते । प्रत्यागतेन तेनेति ततो भोजोभ्यधीयत ॥३०६०॥ 3060
तत्रासंनिहितान्याप्रः स्त्रीत्वादप्रतिभामपि । धात्रीं नोनाभिधानां स्वां राज्ञोभ्यर्णं व्यसर्जयत् ॥३०६१॥
मृतेन पित्रा मात्रा च हीन[3] तमनुयातया । मातृकृत्यं ययात्रासीच्छैशवे माननीयया ॥३०६२॥
पत्युः प्रेत्यै विसंधानध्वंसाकल्पादिकल्पनात् । सखीकृत्यं सपत्नीनां यया शान्तेर्ष्यया कृतम् ॥३०६३॥
हासोल्लासं हि कार्याणां योग्यकृत्यानिषेधयात् । न यां सुरक्षत्रियां क्षमाभृत्संभ्रान्तां जातु वीक्षते ॥३०६४॥
श्वशुरेण प्रजाभिश्च कृत राज्ञोभिषेचने । आशास्यं यां मेहादेवीपट्टबन्धं समादधे ॥३०६५॥ 3065
अपत्याप्रथनाभोगलोभभर्तृप्रसादनैः । प्रेर्यमाणाप्यकार्येषु बुद्धिर्यस्या न धावति ॥३०६६॥
स्वचान्यत्र च संधाने जाते भर्तुरभिप्रधीः । भाग्योदयेष्वनुत्सिक्ता या चाखण्डितसद्व्रता ॥३०६७॥
आ मृत्याद्भावविद्रुतुं कृमृत्यनुसृतौ न सा । कार्यमध्यं विगाहित मानाभिजनरक्षिणी ॥३०६८॥
इति कल्हणिकादेव्या माध्यस्थ्ये सचिवव्यधात्[4]प्रस्थानपदयात्रां सासीमान्तप्रापणावधि॥३०६९॥कुलकम॥
गुप्त्यै छत्रकवित्तादि परार्थ्य मन्यपातिनाम्[5] । पाथेयार्थ पृथुस्वर्णभाजि कोशादि चात्मनः ॥३०७०॥ 3070
प्रापयामास किं चाष्टौ प्रकृष्टाभिजनोद्भवान् । पालनार्थ राजपुत्रान्देवी यत्सर्वसविदम् ॥३०७१॥युगलकम्॥
वाचक तद्गृहीत्वा तामागमत्पार्थिवेन सः । धात्रीं स कारयन्धन्यो बद्धेच्छासिद्धिनिश्चयाम् ॥३०७२॥
चिन्तितप्रत्ययस्तस्याः सद्यः स्यात्तु महीपतिः । राजधर्मस्य च वसत्रासीद्दोलाकुलाशयः ॥३०७३॥
स हि दध्यौ निर्विरोधा वैराग्येणाथ मायया । संकटान्मोचितव्योसौ[6] यायात्कालेन विक्रियाम् ॥३०७४॥
अनिःशोषितनीमूतजालमाविर्भवन्निवः । अनूनक्लेशशेषं च विवेकी न स्फुरेद्धिरम् ॥३०७५॥ 3075
मुग्धाद्भिरनुमधानागबाधादवेत्य नः । स्वार्थस्य सिद्धये माया तेनेयं निरमायि वा ॥३०७६॥
लब्धलक्षेपरिक्षीणे शक्ते युनि गणाश्रिते । क्षत्रधर्मस्थिते नेदृग्विवेकः कापि लक्ष्यते ॥३०७७॥
अवलि कुड्मं पुष्पमपुष्पं क्षीरिणः फलम् । अकालपर्ययापेक्ष वैराग्यं वा महात्मनाम् ॥३०७८॥
न स्याद्यो राजपुत्रोसावेव मायानिधिर्यदि । एवंविधर्तवश्चित्तस्मिन्नदृष्टे किं दृशोः फलम् ॥३०७९॥
राज्ञी राजात्मजश्चेत प्रतिष्ठाभङ्गशंसिनः । ऋजुप्रभावात्सुस्पष्टमन्यत्कार्यं न मन्यते ॥३०८०॥ 3080
भटन्ती[7] कुटिलं स्पष्टं सरित्सैवेन लक्ष्यते । कान्ताकुन्तलविच्यन्दी तोयबिन्दुरिव क्रमः ॥३०८१॥

३०५४ [1]) Emended with G (*see marg.*), A °कारणज्ञा°. ३०५२ [1]) Emended, A हीने ३०६४ [1]) Emended, A °ज्ञासौ ३०६५ [1]) Emended, A मा. ३०६९ [1]) Emended, A सामन्तात्रां ३०७० [1]) Emended, A °पातिनम ३०७१ [1]) Emended with C, A प्रापयामास —[2]) Emended with G (*sec. manu*), A °त्रेर्वांवत्स° ३०७४. [1]) Doubtful emendation, A °वस्यासौ ३०७५ [1]) Emended, A मुग्धानिर°. ३०७७ [1]) Emended A शक्तो ३०८१. [1]) Emended with C, A_1 has first written अन्तं and then supplied ति over the *lacuna*.—[2]) Emended with C, A शरस्त°.

इति ध्यात्वा राजधर्मं सत्यव्रतोचितं व्यधात् । धन्यरिल्हणयोः कार्यं श्रुतावन्यान्विसर्जयन् ॥३०८२॥
स्वस्यैवार्थस्य दाढर्चाय साल्हणिस्त्वां विवक्षते । समागमायेत्युक्त्वाथ धन्यो दूतैरनीयत ॥३०८३॥
मा मैवंदेव सधिस्तुः सैन्यादिति मितानुगः । अवार्षीष्ट तटिन्याः स द्वीपान्तस्तन्वतीक्षया ॥३०८४॥
3085 सरित्सा जानुदघ्नाम्भा भूत्वा घर्मद्रुते हिमे । गगनालिङ्गिभिर्भीमा तरङ्गैः समपद्यत ॥३०८५॥
अवाप्ता चैश्वर्यालङ्घ्यभावं यान्त्यपि दन्तिनाम् । रुद्धः सिन्धाभवत्सोथ द्विषां रन्ध्रैषिणां वशे ॥३०८६॥
सिन्धोरुभयतस्तोयैर्व्याप्तीरभुवोन्तरे । ते दिण्डीरोपमाः प्रापुः पिण्डिताः पाण्डुवाससः ॥३०८७॥
स्वाशंकानां सहस्राणि भोजस्य पतितं बले । स्थितवन्ति निहन्तुं तं तथास्थितमचिन्तयन् ॥३०८८॥
हृच्यां संभ्रमदीनाभ्यामघशान्त्यै स्पृशन्निव । कर्णे सल्हणसूनुस्तान्सतर्व्यावृजिनेंब्रवीत् ॥३०८९॥
3090 निर्दम्भमस्य विस्रम्भाद्भावतो विहिते वधे[1] । निरत्ययो निपातः स्याद्भियंते निरये पुनः ॥३०९०॥
वर्तस्मिन्बहुभृत्यस्य न न शक्तिक्षयः प्रभोः । नैकपक्षक्षये तार्क्ष्यरेहः संहारमर्हति ॥३०९१॥
अपि वा वाच्यता राज्ञामेवं विस्रब्धबाधनात् । तुल्यस्तुल्येन कर्तव्यं किमनुष्याय बध्यते ॥३०९२॥
यथायं वृत्तयेनन्यकर्मा भूपं[1] निषेवते । तथा ममापि यत्नोयं तत्सेवासादने यतः ॥३०९३॥
युक्तमित्यादि तेनोक्ता अपि निश्चलनिश्चयाः । ते न्यषिध्यन्त निर्बन्धात्प्रतिज्ञायात्मनो वधम् ॥३०९४॥
3095 रात्रौ तथैवादब्धिच्छद्रं तद्रक्षितुं ततः । कारिताः कोशपानं ते तमर्थं सोपि बोधितः ॥३०९५॥
तेनाविदितनिर्व्याजतया धीरो महीपतिः । अनुध्यायाथ संदिग्धं संधिसिद्धिमुपर्धाः ॥३०९६॥
अज्ञाननिश्चयः सिद्धेर्विनान्तःकरणं परैः । अथ प्रास्थापयद्देवीं सामात्यां तारमूलकम् ॥३०९७॥
राजधर्मविधेयत्वादवार्यकुरुशङ्किनी । प्रस्थानप्रार्थनां भर्तुः सा स्वीकृत्य ततोब्रवीत् ॥३०९८॥
असामान्येष्वमात्येषु कृमृत्यालोकनात्मकृत् । आर्यपुत्र विचार्योसि विस्रम्भः किं विरोधिनाम् ॥३०९९॥
3100 यद्वा निर्मानुषोन्मर्षः शोभुषीत्वं विगाहितुम् । प्रयते नु कथंकारं मूर्खत्वं मर्त्यधर्मिणाम् ॥३१००॥
देहोपकरणत्वं ते प्राणैर्मम विचिन्त्यते । सतीधर्मस्तु सहते राजधर्मस्य नोचितम् ॥३१०१॥
व्यक्तिनास्यसदाचारं कलिकृत्यं द्विषि त्वयि । प्रारब्धो देव भोजेन हिमाद्रौ हिमविक्रयः ॥३१०२॥
न गृह्णाति शमं वेत्ति स्वस्यान्यस्य न चान्तरम् । निर्व्यूढमत्सरोषोथ प्रायेण प्राकृतो जनः ॥३१०३॥
पुत्रमन्त्र्यविरोधादिचुद्यशुद्धा प्रधावति । साध्वाचारोपि भूपालः क्रुध्यन्विस्रब्धवाधने ॥३१०४॥
3105 समयालङ्घनामोघगिरा देवेन पीयते । लोकत्रयैकपात्रेस्मिन्यशो नूनं मया सह ॥३१०५॥
ज्ञातव्यसंक्षयोपेक्ष्यप्राणायास्त्वन्यदाशयः । ममैवास्वादयन्त्यादादात्मभरिपुराधिताः[1] ॥३१०६॥
इत्युक्ता विरतां सत्यसंधः साध्वीं धरापतिः । शान्तशङ्कामकृत्वा तां समामन्त्र्य न्ययोजयत् ॥३१०७॥
भद्रं सर्वानयं त्रातुं प्रयोक्तुं वेतनं नृपः । संरम्भे किमयं ध्यायत्यन्तः सर्वोप्यचिन्तयत् ॥३१०८॥

३०८३ [1]) Emended, A °स्सां ३०८४. [1]) Emended, A मैवंदेव सन्धिरस्त्व. ३०८७. [1]) Emended with C. A °रोपमता ३०८८ [1]) Emended, A खशं° —[2]) Emended, A पतिते. —[3]) Emended; A° चिन्तयत. ३०८९ [1]) Emended, A °नन्यं वृत्तिनो°. ३०९० [1]) Emended, A त्रिषेः. ४०९२ [1]) Emended, A °बोधनात. ३०९३. [1]) Emended. A रूप ३०९१ [1]) The *akshara* स्वा could also be read न्यां, thus C. ३०९९. [1]) Doubtful emendation, A विचार्योसि ३१०० [1]) Conjectural reading, A °न्मापा ३१०४ [1]) Emended with C, A क्रुध्य वि°. ३१०६ [1]) Thus A, the text of this verse requires emendation. ३१०७ [1]) Conjectural reading, A has written originally ---- न्ययो° and subsequently filled up the *lacuna* with माता मन्त्र्या, G (*see manu*) सोनामन्त्र्य.

उपायेषु प्रयुक्तेषु देवीसंप्रेषणावधि । नान्यदस्य प्रयोक्तव्यं यदवाशिष्यत क्वचित् ॥३११९॥
स्वपक्षभेदाद्भुमुर्तुः सबलत्वाबलत्वयोः । परीक्षकत्वाद्ये केचिन्माध्यस्थ्येनावसन्क्वचित् ॥३११०॥ 3110
तेष्वल्पे वा महान्तो वा क्षीणशक्षिण्यभूद्बलाः । भोजगृहैः महाबधनकन्थां सर्वेपि डामराः ॥३११९॥
ते ह्यच्छिन्नतटस्थत्वाद्वैराज्येसमामिरीदृशः । भोजः संजात इत्याशु माध्यस्थ्यं परिजह्रिरे ॥३११२॥
त्रिलङ्कां भोजसचिवं तनूजं प्राहिणोद्धनम् । प्रावेशयच्छमालां च चतुष्कं पुष्कलैर्बलैः ॥३११३॥
ये भिक्षुत्रिप्रवेष्यासन्राजदाक्षिण्यरक्षिणः । विरोधिसचिवं प्रापुस्तेपि नीलाश्वडामराः ॥३११४॥
लहरांदवसरमाद्दोलडातंश्च डामराः । त्रयो नीलाश्वतश्चैका डामरी पर्यशिष्यत ॥३११५॥ 3115
न व्यरंसीद्दिमं तत्तद्भवन्ये माल्हणैर्बलैः । पतत्प्रावृट्प्रमत्तौघघोषोन्मोधाविवोद्गतः ॥३११६॥
भोजस्तु देवीमाख्यान्तीं श्रुत्वा बलहरं ततः । ध्रुवं संधित्सया बद्ध इति सुव्यक्तमभ्यधात् ॥३११७॥
एतावन्ति दिनान्यासीत्पुंसो भ्रमयिता पुमान् । संबन्धिनीनां माध्यस्थ्ये स्वकुलन्यात्कोन्यथा भवेत् ॥३११८॥
कुलचूडामणिः प्रेम्णा स यत्रैवं प्रवर्तते । किं स्यादगण्यप्रायाणां कार्कश्यं तत्र मादृशाम् ॥३११९॥
यद्म मायामिमां ब्रूथ तत्तथास्त्वस्मि वञ्चितः । विश्वासयैव भविष्यामि नाकीर्तीनां निकेतनम् ॥३१२०॥ 3120
मा च भूद्विजयाशा वः समेता निखिला इति । अद्राक्ष्म चेदृशान्व्यूहानवारुक्षाम[1] वोक्षतेः ।३१२१॥
युक्तियुक्तमिदं चान्यद्योक्तवान्बहु निश्चयात् । नाशक्यतान्यथा कर्तुं भोजो बलहरादिभिः ॥३१२२॥
द्वित्राहान्तरितैमित्रप्रमाथेपरथा कथम् । फलकालेसि संवृत्तमिति तं चावदन्नृपः ॥३१२३॥
नारमूलस्थितौ[1] राज्यां समैन्यौ धन्यैरिल्हणौ । राजपुत्रैः सह ततः पाञ्चिग्रामममवापतुः ॥३१२४॥
प्राप्तावेत्य नौ नद्यास्तीरेवाचि कृतस्थिती । परस्मिन्कूलगहने भोजोप्येनावुपाविशत् ॥३१२५॥ 3125
अश्रान्तं विशतो दिङ्मुखेभ्यस्तत्कटकं भटान् । पश्यन्तः केपि संधिं न श्रद्दधुर्नृपतेर्बले ॥३१२६॥
हठग्रविष्टांस्तिर्यातृमक्षमानल्पसैनिकान् । धन्यादीन्राजवदनो हन्तुं शश्वदचिन्तयत् ॥३१२७॥
छित्त्वा मुख्यपुरान्सेतुं राज्ञः सैन्यं जिघांसवः । महापद्मसरोनौषु निभृतं केचनावसन् ॥३१२८॥
अन्ये तत्साहसोदन्तान्वेषिणः पतनोन्मुखाः । स्वैः स्वैर्मार्गैस्तत्र तत्र तस्थुर्भूभृदसंमताः ॥३१२९॥
आस्कन्दं भाद्विलेयाद्याः पुरे शंकरवर्मणः । शमालाक्षिप्तिकाद्यापि डामराः समचिन्तयन् ॥३१३०॥ 3130
प्राप्यं महासरिन्कूलं त्रिलङ्काद्यैरणप्यत । नीलाश्वडामरैर्वाशां कार्या न नगरान्तरे ॥३१३१॥
किमन्यद्राजगृह्याणां समं सर्वे जिघांसवः । कारण्डवानां नीयान्तर्वेष्टितानामिवाभवन् ॥३१३२॥
संदिग्धशिक्षितं कार्यं सर्वतः समतां तदा । प्राप वृष्टेरवग्रहयोगान्तरस्थितेः ॥३१३३॥
पदे पदे राजनमुपथायोत्थानमिच्छतः । छिन्दन्बलहरस्येच्छां भोजो व्यग्रत्वमग्रहीत् ॥३१३४॥
क्षणे क्षणे विसंधानध्यायिना तेन कश्चन । बध्यमानास्वन्तरायः संविधासु व्यधीयत ॥३१३५॥ 3135
घटनामुद्यतौ यो यो विरोधः कटकद्वयात् । सत्त्वैकाग्र्यः स्वयं भोजस्तं तं त्वरितमच्छिनत् ॥३१३६॥

३११५ [1]) A °ज्झोलठातश्च ३११६ [1]) Emended, A माल्हणे बले —°) Emended with C [2]) A °प्रमत्तोघ°. ३११७. [1]) Doubtful emendation, A वीरीमाख्यान्ती —°) Emended A ब्रस्तन ३११९ [1]) Doubtful emendation, A चेदृशा व्यूहान वरुक्षयाम, C चेदृश व्यूहमवरोक्ष्यामि. ३१२४ [1]) Doubtful emendation, A °स्थिते राज्ञा, C °स्थिते राजि —°) Emended with C, A धन्य°. ३१३०. [1]) A, gloss भाल ३१३१ [1]) Thus A, C °रिर्याः ३१३२. [1]) Emended with C, A भवन ३१३५ [1]) Emended A बध्यमानस्वान्त°

दुःखे च कल्यकल्पे वा येरुवत्राजरञ्जकाः । भयेन प्रययुस्ते यद्वैकल्यं कार्यसंकटे ॥३१३७॥
कर्णे तत्कथयन्ति दुन्दुभिरवैः राष्ट्रे यदुद्घोषितं तन्नश्राद्धतया वदन्ति करुणं यस्माच्चपावान्भवेत् ।
शाम्यन्ते तदुदीर्यते यदरिणाप्युर्यं न मर्मान्तकृत्ये केचिन्नु शाद्यमौख्यनिधयस्ते भूभुजो रञ्जकाः ॥३१३८॥
भग्नस्तण्डवमण्डपे कटुकथावीथीषु कन्थाकविर्गोष्ठभ्रा स्वगृहाङ्गने शिखरिभुगर्ते चटाकुः स्फुटम् ।
पिण्डीशूरतया विटश्च पटुनां भूभृद्गृहे गाहते गच्छन्ति ह्रदकुट्टकच्छपटुतां चित्रं तनोन्यत्र ते ॥३१३९॥
3140 पूर्गोद्रेकविपर्यासाच्छान्तोत्पन्नमाभूतस्तदः । वासरः शरणीचक्रे तुङ्गस्योत्तुङ्गमञ्जसा ॥३१४०॥
भानुर्वेलपदानुरोधितुरगीवल्गयान्तरे । क्ष्माभृच्छिखरोपितकरो रक्तमण्डलतां दधे ॥३१४१॥
अह्नस्त्रियामामुषयो[1] मध्यस्थया दधे । संध्यया वन्दनीयत्वं जनस्य व्यञ्जितात्मनः ॥३१४२॥
कवाटिदन्तैर्विस्फोटाश्चन्द्रकान्तैः सिरोद्गमः । श्रयथुः पयसां पत्या दधे राज्युदयोन्मुखे ॥३१४३॥
सदैन्येष्वरविन्देषु हीनद्वन्द्वोपजीविनः । कवाटिनां घटेष्वेव षट्पदैर्वेटित पदम् ॥३१४४॥
3145 अदृष्टकार्यपर्यन्तास्तदम्ते विषमस्थिताः । सरित्तटे सकटकाः पर्यवस्यन्त मन्त्रिणः ॥३१४५॥
न किंचित्प्रत्यभात्सर्वं लघु भ्रान्तं च जानताम् । ओघेन ह्रियमाणानामिवेषामवलम्बनम् ॥३१४६॥
तीरे परस्मिन्सरितो वसन्त्वलहरः पुनः । रुद्धः कन्दलितास्कन्दबुद्धिः सालर्हाणानासकृत् ॥३१४७॥
कार्यानिपातादायातं मन्त्रिणां तन्मितं बलम् । तस्य प्रवर्धमानस्य क्षुब्धोच्छेदं बभूव यत् ॥३१४८॥
वितस्तामिन्दुसंभेदयात्रायां नगरे यथा । तथा तथापतन्त्रीवौ लोकोभ्रान्तो व्यवर्तत ॥३१४९॥
3150 लेखैर्डामरसहारखण्डनाय विसर्जितैः । सान्तैरर्थिता बाह्वैर्नाथै राजबीजिनः ॥३१५०॥
शाद्यान्विवैरनुसरैस्तुमुलोत्पादनैरपि । धीरो धैर्याच्चिश्चयाद्वा स्वैः स क्षुद्धं न पारितः ॥३१५१॥
सामन्तानामागतानामविसम्भादसंभ्रमम् । न्यकृतोयं निपत्याशु कुर्यादन्यादृशं रुषा ॥३१५२॥
कृते च कदनेकार्मेनेन [2]समुन्मिषत् । द्विजानामिव दस्युनां समूहस्तेन सर्वतः ॥३१५३॥
इति निर्धार्य दृष्टक्षुरिव भोजः क्षपात्यये । कुर्मः साहस्रमित्युक्ता निन्ये बलहरं समम् ॥३१५४॥तिलकम्॥
3155 एषां मदर्थयातानां सामन्तानां सभोजनः । दाक्षिण्यादिति नाभोजि तेनान्यभिजनस्पृशा ॥३१५५॥
तथा स्वमत्यावैमत्यं तमज्ञात्वा तु मन्त्रिणः । निष्प्रत्ययायास्तेन जातममन्यन्त नयात्ययम ॥३१५६॥
पक्षिपक्षस्फुटाटोपशफरस्फुरितेष्यधात् । तेषामसविधाश्चस्कन्दः प्रधावदलितभ्रमम् ॥३१५७॥
कूले परस्मिन्कलिन्याः स्वाभिसंधानर्निवृतैः । समभाव्यत तैर्नान्यो रथाङ्गेभ्योभिपङ्गभाक् ॥३१५८॥
मरुत्काकुत्स्थदूतस्य कपेस्तीर्णाम्बुधेः पिता । ततान तेषां दूतानां सरित्पारगतौ [3] ॥३१५९॥

३१३७ [1]) This verse and the following are found in *Vallabhadeva's Subhāshitāvali*, 462 463 (ed Peterson and Durgaprasāda) —[2]) ज्ञश्राद्धतया supplied by A, in space left by A, —) Thus corr by A, from करुणा —[1]) Thus corr by A, from त्वपाद्भाम[0] —[1]) Thus in *Subhāshitāvali*, A [0]व्युषण —[2]) Thus corr. by A, from A, कर्मा —[2]) ज्ञनु supplied by A in space left by A, ३१३९ [1]) Emended A कटुकथावीर्थीषु; *Subhāsh.* चटुकथावीथीषु —[2]) Thus A, in margin and *Subhāsh.*, A, in text भुगर्ते. ३१४० [1]) नुङ्ग supplied by A, in space left by A, ३१४२ [1]) Thus A, C supplements योरपि —[2]) Emended with C, A जनयन्व्यञ्जि[0] ३१४६. [1]) Emended, A भात्स्व. ३१४७. [1]) Emended with C A [0]स्कन्दांबुद्धि —[2]) Emended with C, A सालहणना[0]. ३१५१ [1]) Emended A [0]पमत्राभो. ३१५३ [1]) नेन supplied by A,, A, indicated originally a *lacuna* of four *aksharas*, C supplements सर्वं ३१५४. [1]) A दुङ्ग. ३१५५ [1]) Doubtful emendation, A ज्ञना मदर्थया —[1])Doubtful emendation, A सभोजनि ; C सामन्तानामभोजने ३१५६ [1]) Doubtful emendation, A समत्यावै[0] ३१५७ [1]) Emended, A [0]स्कन्दप्र[0] ३१५९ [1]) Emended with C, A काकुत्स्य[0] —[2]) Thus A, C fills up the *lacuna* with बलम्

कीर्णकर्णज्वरांभारीन्पीत्कृतैर्स्तीरभूरुहाम् । आधिन्योश्चिद्रकेणेत्थं निन्युस्ते तां निशीथिनीम् ॥३१६०॥ 3160
क्षपान्ते क्षमाधरोत्तंसदेवतामरमश्रमम् । उद्गच्छतो रवेर्यावच्चिच्छिदुर्न करच्छटाः ॥३१६१॥
चक्राह्वचिरहालोकमशोकानामिवागलत् । कुट्मलाक्षिपुटाद्यावद्वैशं नाम्नश्च वीरुधाम् ॥३१६२॥
मितपत्तियुतस्तावत्तरुकच्छाद्विनिर्गतः । [illegible]स्त्वरयन्युद्धवाहान्मुर्ध्वक्रिया स्पृशन ॥३१६३॥
गोदुकामाण्डमार्गाय्यान्वीरान्तूर्टैर्विलोकितैः । सर्वतो यावतः कुर्वन्योधान्प्रतिहतौजसः ॥३१६४॥
पारश्वधी चारुवेषो युवा समुखमापतत् । युग्याधिरूढस्तैः प्रैक्षि संप्राप्तः सरितस्तटम् ॥३१६५॥कुलकम्॥ 3165
अदृष्टपूर्वं तं दृष्ट्वा श्रीखण्डालिप्तविग्रहम् । कुङ्कुमालेपित शैले भोजोर्यमिति मेनिरे ॥३१६६॥
अतिक्रान्ते निशां राजवदनं तं विमोहयन् । प्रातश्च तरसामन्त्र्य स तथा संमुखोऽभवत् ॥३१६७॥
प्रविष्टयुग्य तोयान्तः पाराद्वाविनवाजिनः । धन्यादयस्तमभ्येत्य मुदिताः पर्यवारयन् ॥३१६८॥
उद्भूचुमुखः शब्दस्तत्र कटकयोर्द्वयोः । एकवाक्यन्दनिर्भरः परत्रानन्दनिर्भरः ॥३१६९॥
भादमाकर्ण्य सयामवृद्धचा दिग्भ्यः प्रयायिनैः । तं परैर्मिलित वीक्ष्य मुन्यैतादात डामरैः ॥३१७०॥ 3170
तस्यामिनन्दनालापप्रमुखा प्रक्रियाभवत् । अदैन्यशुद्धधन्याद्यैवनुज्ञितनिजक्रमा ॥३१७१॥
प्रवमान मनोहर्ष वेगात्मस्तभ्य सर्यतः । अथैन्यं स्तुवता तत्तत्स धन्येनाभ्यधीयत ॥३१७२॥
राजपुत्र पवित्रेय पृथिवी स्वैर्यशालिना । त्वया धात्रा सुमनसां मेरुणा वा महीभृता ॥३१७३॥
गवां जयति सर्वासां निर्विकारतया वमन । विक्रियोपहतं गौरीं क्षीरं — क्षीरवारिधे. ॥३१७४॥
कस्य पुंस्कोकिलस्येव त्वां विनाधममभ्यतः । निर्गत्य निजकुल्यानां सिद्धं मध्यावगाहनम् ॥३१७५॥ 3175
सदाचारस्य भवना प्रथम प्रहते पथि । न तच्चित्रं संचरामश्चरम चेत्तनोचिकम् ॥३१७६॥
इत्याद्यिप्रसृतालापदत्तोत्तापोपिरोधं स । जयोत्तरङ्ग तुरगं स्तुवद्भिस्तैरनीयत ॥३१७७॥
लब्धन्याः कतिचित्क्रोशान्धिक्रोशन्वत्सदा ययु । स्वकुल्यैर्नीयमानं तं काका इव पिकान्तिकम् ॥३१७८॥
स एवमेकविंशेऽह्नि त्र्यैश्वर्यं दशमेऽहनि । त्रयस्त्रिंशङ्गवेदेश्यः समगृह्णत भूभुजा ॥३१७९॥
राज्ञा कृतप्रणाम तं प्रिय पुत्रमिवागतम् । अभ्यनन्दच्छ्रान्तभुग्यमभ्याहारमकल्पयत् ॥३१८०॥ 3180
इन्दुर्वेशाविमर्वादिगुणग्राममवेक्ष्य तम । प्रागदृष्टवती मेने वल्लिते सा विलोचने ॥३१८१॥
गुणैरशाद्यदाक्षिण्यमाधुर्यैरुत्रिभिः । तस्या विशदशीले स क्षमापतिममन्यत ॥३१८२॥
मुखरागो मनोवृत्तेर्गिरश्चल्यं गृहश्रियः । भर्तुस्वभावस्याचारो योषितामनुमापकः ॥३१८३॥
दिनक्षयव्यञ्जिताब्जकर्मे प्रस्थानमुत्सुकम् । राज्ञोभ्यर्ण विशेत्येनं दाक्षिण्यात्कोपि नाब्रवीत् ॥३१८४॥
कथंचिद्बुद्धमाश्वस्यवैमत्यैः सचिवैरथ । स त्वादिक्षद्वरपतिराशान्तेष्वोभ्यधीयत ॥३१८५॥ 3185
राज्ञोभ्यर्ण विशेत्युक्तरुपोद्घातोपमं वचः । तत्तस्य श्रोत्रशष्कुल्यां [illegible]शङ्कुक्रियां व्यधात् ॥३१८६॥

३१६३ [1]) Thus A, C स वीरस्त्रा°. —[2]) Emended with C, A °न्युद्गधवा°.—[3]) The letter न cannot be read with certainty, C °स्पृशत ३१६९ [1]) Emended, A क्रान्ति ३१७० [1]) Thus corr. by A, from डामर्समैः ३१७१ [1]) Emended with G (*sec. manu*), A °मुख्यापक्रि ३१७२ [1]) Emended with C, A °स्तम्भ्य ३१७४ [1]) Thus A, C supplements न ३१७७ [1]) Emended; A °न्नोद्घातोपोपिरोद्ध. ३१७८. [1]) Emended, A °क्रोशाद्धि° ३१७९ [1]) Emended with C, A °त्रेयैश्वर्यम्य ३१८१. [1]) Emended, A इन्द्रवद्या°. ३१८३ [1]) Emended A मुखरागमनो ३१८४ [1]) Emended with C, A °क्रमा — [2]) Emended, A विशत्यन. ३१८५ [1]) Doubtful emendation A स त्वादिक्षुनरपतिराशान्तेष्वोभ्य°. ३१८६. [1]) Emended, A विशत्यु° —[2]) Thus A, C supplements तत्तत्

चिरात्ताडितमर्मेव समाश्वास्यैक्षताथ सः । मध्यस्थानां स्थितं स्थैर्यं दाक्षिण्यादोष्ठयोः परम् ॥३१८७॥
प्राणान्मुमुक्षोस्ते रूक्षभाषिणस्तस्य सान्त्वनैः । मन्दत्वं विक्रियां निर्युर्विनयानतमौलयः ॥३१८८॥
आचारं चैनमस्निग्धमपि न्याय्यं वचस्विनम् । न कोपि प्रतिवाक्येन शक्यं जेतुममन्यत ॥३१८९॥
अथ स्वान्तस्थितस्वामिवैवश्यं दर्शयन्निव । दशनांशुवनैर्धर्म्यो वीरः स्निग्धमभाषत ॥३१९०॥
पठ्यते राजधर्माणां सदाचारे स्थितो च ते । जानतोपि कथं मोहः क्रमायातेषु वस्तुषु ॥३१९१॥
किं संधिः सोभिधीयेत यत्र संधेयदर्शनम् । अकृत्वा गम्यत इति प्राज्ञो कथमजीगणः ॥३१९२॥
अनद्यतनमुभूर्तुमुलभं भुभुजं तव । ज्ञात्वा सत्त्वोज्ज्वलं ज्ञातिधर्मजातपवर्तनम् ॥३१९३॥
नाम्य दम्भस्मयस्तस्माद्रीतिस्थैर्यखलोक्त्यः । आदरादर्शवैशद्ये निःश्वासस्यापि काः श्रियः ॥३१९४॥
अस्योपजीवनाशा श्रीः साम्राज्यासादनान्न सा । प्रकाशो विम्बितो योर्कादीपात्स्याज्ज्वलतः स किम् ॥३१९५॥
निर्वाणगोष्ठीनिष्ठत्वं शमिनामाभयेषु यत् । तत्पर्यवस्यत राजर्षेः - - - वृन्दानुबन्धिनः ॥३१९६॥
एवं स्वगृहसंप्राप्त्यप्रायोनि श्रेयसस्य ते । स्थानैः श्रियः समाप्याथ किं स्यादन्यैर्महीधरैः ॥३१९७॥
मुक्ता न ठेचन परे गणिताः फणिभ्यः कालानुकूलनिकुण्डजलल्यजो ये ।
श्लिष्यन्ति चन्दनतरूच्छिशिरांशिदाघे मार्वेप्यशीतमनवं विवरं विशन्ति ॥३१९८॥
प्राणोपकरणं राज्ञो राज्ञी राज्ञात्मजाश्च ये । तद्धिते यदनौचित्यं तेषामौचित्यमेव तत् ॥३१९९॥
त्यक्तोष्मवैकृतं पाथ इव कथितशीतलम् । अनुतापेन ते कृत्यं भूयो वैरस्यमेष्यति ॥३२००॥
तथा समर्था सामर्थ्यादप्रत्याख्याय भारतीम् । कुण्डशाद्यलवस्तस्थौ प्रस्थानार्थ स मन्यरः ॥३२०१॥
पथि संमथितस्तोत्रान्वास्तव्यान्वीक्ष्य सर्वतः । अजायताथ संरूढकृत्यसाधुत्वदार्ढ्यधीः ॥३२०२॥
पदातिचरणक्षुण्णरेणुव्याजादृदृश्यत । वसुंधरातलं बद्धसंधीव नभसा समम् ॥३२०३॥
दध्यौ - - - भोजः कचिन्मंप्राप्तुयां नृपम् । कचिदमुष्य विश्वेन दर्शनं विप्रलम्बकैः ॥३२०४॥
आराधन - - धात्रि नान्तरान्तरितो विटैः । स्वामिनां क इवाप्नोति गुणाविष्करणक्षणम् ॥३२०५॥
शीतोपचारकरणाद्दयितो भवेयमौर्वार्दितस्य जलधेः प्रसृतं धियेति ।
स्रोतो हिमाद्रिपयसो विनिपात एव प्रामीकृतं निमिभिराहत - - - स्यात् ॥३२०६॥
इत्यादिचिन्तास्तैमित्यान्पुरक्षोभाद्यलक्षयन् । सैन्यस्य रुद्धाश्वतयाबुद्धामत्रं नृपास्पदम् ॥३२०७॥
नातिप्रांशु नातिकृशं सूर्याशुदयामलाननम् । सरोजकर्णिकागौरं शिथिलश्लथविग्रहम् ॥३२०८॥
ककुभ्यल्ककुदोत्सेधिस्कन्धमायतवक्षसम् । दमभृणानतिदीर्घेण व्यक्तगण्डगलोन्नतिम् ॥३२०९॥
उन्नस पक्वबिम्बोष्ठं विस्तीर्णानुन्नवनालिकम् । निर्वर्णिवेप्रेक्ष्य - - - धीरमन्थरगामिनम् ॥३२१०॥
समाहितांशुकोष्णीष - - श्रीखण्डव - - म् । सीमन्त - - चुम्बिन्या रेखया चन्द्रगौरया ॥३२११॥

३१८७ [1]) Emended with C, A स्थैर्यं ३१९३ [1]) Emended, A सुलभं —[2]) Emended, A भुभुजा ३१९४) Emended with G (see *mum*), A °स्तम्भयी" ३१९५ [1]) Emended with C, A न —[2]) Emended with C, A बिम्बतो ३१९६ [1]) Thus A, perhaps read राजर्षिवृन्दा°, C °वैजनान वृन्दा° ३१९८ [1]) Emended with C, A °ज्ञल-जो. —[2]) Emended with C, A °शीतमन्व ३२०१ [1]) Doubtful emendation, A समर्थासामर्थ्यात्प्रत्या°, C °सामर्थ्यान्न प्रत्या°. ३२०४ [1]) Thus A, C supplements विज्ञनगं. ३२०५. [1]) Thus A, C आराधयन प्रभु धात्रि. ३२०६. [1]) Thus A, C °ज्ञनमेव तत स्यात् ३२०७. [1]) Emended, A °सन्ननृपास्पदम ३२१० [1]) Thus A, C °प्रेक्ष्यमणास्य. ३२११ [1]) Thus A, C °ष्णीषमौलि —[2]) Thus A, C श्रीखण्डवर्जुन —[3]) Thus A, C सीमन्तस्थानचु°

अश्वावरूढं हर्म्यस्थसचिवैः परिवारितः[1] । ----[2]मायान्तं तमवैक्षत पार्थिवः ॥३२१२॥ कुलकम् ॥
प्रीतिविस्फारितदृशा राज्ञा दृष्टस्ततः सभाम् । सोध्यारुरोह संबाधां कौतुकोत्कन्धरैर्जनैः ॥३२१३॥
स्पृष्ट्वा पादौ निषण्णोऽथे नृपस्यानीय पाणिना । खड्गपेनुं पाणिबद्धामासनाग्रे समार्पयत् ॥३२१४॥
पाणिं सफणिवल्लीकं विवृतामाकुलिङ्गयम् । ततोस्य चिबुकोपान्ते विन्यस्यन्पार्थिवोऽब्रवीत् ॥३२१५॥ 3215
न विगृह्य गृहीतोसि नाधुनापि निबध्यसे । तदङ्ग कस्माद्भीमः शस्त्रमेतत्त्वयार्पितम् ॥३२१६॥
व्यजिज्ञपत्स भूपालं देव शास्त्रस्य धारणम् । स्वामिसंरक्षणं स्वस्य परित्राणस्य कारणम् ॥३२१७॥
देवे निजप्रतापाग्निगुप्तसप्तसरित्पतौ । सेवावकाशो विरलः स्वशस्त्रस्यापि दृश्यते ॥३२१८॥
लोकान्तरेपि शरणं चरणाश्रयणं प्रभोः । तत्रात्र लोके किं कार्यं त्राणोपकरणैः परैः ॥३२१९॥
राजा जगाद ते सत्त्वस्पर्धाबन्धेधुना भवान् । निर्व्यूढकृत्यो वादीव कृत्यं नो वर्तते परम् ॥३२२०॥ 3220
भोजो बभाषे दाक्षिण्यजननायाधुना प्रभोः । दृष्टान्तेते मया किंचिन्नोपचारार्थमुच्यते ॥३२२१॥
किं ते न चिन्तितं दुष्टं किं किं न कृतमप्रियम् । यदसिद्धं न तद्यक्तिमगादित्यवधार्यताम् ॥३२२२॥
किं न मल्लान्वये कश्चित्कारणेषूदितो भवान् । विद्मः स्मानन्यकुल्यं प्राग्यं वयं चर्मचक्षुषः ॥३२२३॥
यदा यदा देव वाञ्छामकार्ष्म भवदप्रिये । भूमिस्तदा तदा भूम्ना भूप ---[1] भूयसः ॥३२२४॥
यावत्कवीनां निर्भाति प्रतिभानेन भास्वरः । देवाभवसः प्रत्यक्षः प्रतापस्तावदाश्रस्तव ॥३२२५॥ 3225
न शेखरे न प्रदरे न दरेष्वुज्झितो[1] मया । प्रालेये भूभृतः कुक्षे संज्वरस्त्वत्प्रतापजः ॥३२२६॥
ततः प्रभृत्यवनतिप्रणयः शरणैषिणः । सिद्धः संध्यादिवन्ध्यत्वाद्देव दूरस्थितेर्न मे[2] ॥३२२७॥
अथाभेदाभिलाषेण पापाद्यत्किल चेष्टितम् । स्फुरत्सामाकव्यक्त्यै न तु तद्विग्रहायहात् ॥३२२८॥
त्वत्संबन्धादिमे दिक्षु प्रतीक्ष्याः क्ष्माभुजां[1] वयम् । सङ्गादृङ्गाम्भसः काचकुम्भसंभावना भुवि ॥३२२९॥
अथापि द्योतते ज्ञाहेर्हृदयेन दिगन्तरे । तत्संतानभवोनन्तः समूहः क्षत्रजन्मनाम् ॥३२३०॥ 3230
त्वय्यर्पिते पार्वतीयभूभृत्सङ्ग्रेन्यदादिं[1] नः । कदन्नाशनवु--[2]मुखैः खेदोन्मुखैरभूत् ॥३२३१॥
इतीदृशीभिः ---[2] प्रमाणमथ वा प्रभुः । इत्युक्ता भूपतेर्भूम्ना सोगृह्णाद्यरणौ पुनः ॥३२३२॥
प्रणामसंभ्रमस्रस्तोष्णीषशीर्षे ततो नृपः । तस्योत्थितस्य स्वशिरोवाससा समवस्त्रयत् ॥३२३३॥
स्वां तां च शस्त्रीं तद्यस्तामुत्सङ्गे सान्त्वयन्व्यधात् । तस्यासंक्षेपभगम्भीर्यैस्तमूचे च निषेधिनम् ॥३२३४॥
दत्ते[1] मया विभूहि वा त्वमेते पूजयाथ वा । न शस्त्रपहर्वैमुख्यं कार्यं मच्छासनं त्वया ॥३२३५॥ 3235
अवन्ध्यशासने --[1]त्यनुबध्नति[2] ते व्यधात् । शस्त्रीं राजानुगत्यैव वन्दित्वाङ्के स कालवित् ॥३२३६॥
ततो निर्यन्त्रणत्वस्य नर्मणः सान्त्वनस्य च । चिरसेवीव तत्काले राज्ञोजायत भाजनम् ॥३२३७॥

३२१२ [1]) Emended , A °रितम —[2]) Thus A, C अनङ्गतुल्यमायान्त.—[2]) Emended with C, A पार्थिवम ३२१४ [1]) Emended with C, A समर्पयत ३२१६. [1]) Emended, A न बध्यसे. ३२१७. [1]) Emended with C, A त्रिप स्मा . ३२२४ [1]) Thus A ; C तत्रा भूमा पात्र कस्यस्य भूयसः ; perhaps read भूम्ना भूः प्रकल्पस्य भूयसः ३२२६ [1]) Emended, A °च्छिते ३२२७ [1]) Emended, A सन्धायिव —[2]) Emended; A दूरस्थिते न ३२२८ [1]) Emended with C, A पार्वात्किल ३२२९ [1]) Emended, A क्ष्माभुजा. ३२३०. [1]) Emended, A शास्त्रेद्वाह्° ३२३१ [1]) Thus A, doubtful.—[2]) Thus A, C कदन्नाशनदुर्भोगामुखैः खे°. ३२३२. [1]) Emended with C, A ईदृग्.—[2]) Thus A, C supplements स्तुतिभि. ३२३५ [1]) Emended; A दत्त. ३२३६. [1]) Emended, A °शासनं—; perhaps read अवन्ध्यशासने राज्ञीत्यनु°, C °शासनोमार्ना-त्यु°.—[2]) Emended A °त्यनुबध्नति ते; the *lacuna* not indicated.—[1]) Emended, शस्त्रीं.

अन्यत्प्रविष्टो धन्योऽथ स्वार्थोम - [1]यन्कृती । कृतप्रणामो भूपाल त्वद्गुणाकर्णनं विना ॥३२३८॥
न प्राणा ब्रुविणं नाथ गण्यं निर्विक्रिया पुनः । सत्क्रिया स्वामिनोऽप्यर्थे तस्मात्पार्थिव चिन्त्यताम् ॥३२३९॥
तथापि कथ्यमानं तन्न स्यात्संभावनाभुवि । यदस्मिंश्चिन्त्यतेस्माभिरिति भूपो व्यभाषत ॥३२४०॥
क्षणमुच्चावचां चर्चां विरचय्य विशां पतिः । भोजेन सार्धं शुद्धान्तं रङ्गदेव्यास्ततो ययौ ॥३२४१॥
कृतप्रणामस्तां वीक्ष्य सौजन्याद्गिगुणोज्ज्वलाम् । स राजपारिजातं तं मेने कल्पलतायुतम् ॥३२४२॥
मान्योयं देवि सौजन्यज्ञानेयाभ्यामिहागतः । विशिष्यतेसौ पुत्रेषु क्ष्माभृद्योपेत्यभाषत ॥३२४३॥
सभाजनाय सौजन्यनिधिर्भोजान्वितस्ततः । उद्गढकार्यभाराणां दाराणामप्यगाद्गृहान् ॥३२४४॥
भभाणीद्विगुणा राज्ञी भोजं राज्ञा सहागतम् । अधुनैव नृपस्याग्रः संवृत्तोसीति[1] सस्मितम् ॥३२४५॥
लज्जास्मितमुखी पत्युः प्रणत्या स्वागतोक्तिषु । ददत्येवोत्तरं भोजं निर्दिशन्त्यप्यभाषत ॥३२४६॥
आर्यपुत्र न विस्मार्यं प्रत्याख्यातामनिन्दितम् । मानैकशरणस्यास्य ज्ञातिप्रीतिप्रवर्तनम् ॥३२४७॥
पूर्वोपकर्तुं सलिलं वृद्धावस्पृशतोन्वहम् । पद्मान्स्वकुलपद्मानां युक्तं जेतुं भवादृशाम् ॥३२४८॥
कार्यकृच्छ्रेवसन्नानाममुष्यागमनं विना । सिध्येद्दौस्थित्यसंरक्षा नेह प्रत्यागमश्च नः ॥३२४९॥
उदीपे[1] रक्षतस्तीरं शरीराभ्रयिणी भवेत् । ध्रुवं वनस्पतेर्वीरुत्तन्निपातानुपातिनी ॥३२५०॥
पतिगत्यनुगामित्वं प्राणानां परिचिन्तितम् । तथा कार्यं यथा न स्याज्ज्ञातव्यस्यान्यथात्मनः ॥३२५१॥
राजा जगाद तां देवि सर्वकर्तव्यसाक्षिणी । अन्यथाप्रतिपत्तिं मे त्वमप्यस्यं न मन्यसे ॥३२५२॥
निगृहीतवतो दुष्टौ सुज्जिमल्हार्जुनावपि । निस्तापं मम नाद्यापि प्राप्तानुशयमाशयम् ॥३२५३॥
अथ राज्ञार्थितः स्थातुं पराधे धासि मानुग. । भोजो नामन्यतान्यत्र राजधान्यां स्थिरां स्थितिम् ॥३२५४॥
विदूराभ्रयनिर्मोघभावाप्तचुरदर्शनैः । आराधनं धराभर्तुरसाध्यं ध्यानवह्निं सः ॥३२५५॥
रक्षितृनयवीक्ष्यामात्यैर्य च समकल्पयत् । [2]अनया - नृपं कार्या न सुराराधनागमे ॥३२५६॥
विज्ञाय भावं प्रीतेन राज्ञा दत्तं ततो गृहम् । सर्वोपकरणापूर्णं राजधान्यन्तरेभजत् ॥३२५७॥
राजापि ममतास्फीतप्रीतिभिः स्वैः परैस्तथा । उपासितस्तत्र रतिं विराश्रित इवायया ॥३२५८॥
भोगवेलोचिताश्वर्यदर्शनादौ नृपोपि तम् । प्रियं पुत्रमिवास्मार्षीद्दूरे पार्श्वे निनाय च ॥३२५९॥
जयाह दक्षिणे पार्श्वे भुञ्जानं ज्ञातिगौरवात् । स्पर्शास्वादितभोज्यादिदाने नैव व्यवर्जयत् ॥३२६०॥
अकृत्रिमं तथा स्नेहमुवाह - - - [1] यथा । लडितं ज्ञातिवत्तस्मिंस्तद्बालापत्यकैः समम् ॥३२६१॥
तामेवालम्बत व्यक्तां सोपि वृत्तिं यथा यथा । राजा सपत्निर्द्वोपि विस्रम्भमविगर्हितम् ॥३२६२॥
आसन्नाभ्यन्तरा भिन्ना ये द्वेधे तानदर्शयत् । राज्ञां विरक्तिं स्वस्यारिबाहुल्यं च व्यसर्जयत् ॥३२६३॥

३२३८. [1]) Thus A; C स्वार्थोमलयन्कृती. ३२३९. [1]) Emended with C, A स्वामिनोर्थे. ३२४०. [1]) Emended A यशस्मिं°. ३२४३. [1]) Emended with C, A क्ष्माभृद्योपेत्य°. ३२४५ [1]) Emended, A संवृत्तोसीति. C संवृत्तोऽस्मीति ३२५० [1]) A, gloss उदीपे अतिवृष्ट्या अत्युद्रिक्तजलागम —[2]) Emended with C, A °वीरुत्तन्नि° ३२५२ [1]) Emended, A प्रतिपत्त्य —[2]) Emended with C, A त्वमप्य°. ३२५४ [1]) Emended, A °धान्यां. ३२५६ [1]) Emended, A °क्ष्मापान्स्थिर — [2]) Thus A, the text is here evidently corrupt, C अनयात्त नृपं, G (*sec manu*) अदृश्यान्त नृप कार्याजुसुराराधनागमे. ३२५७. [1]) Emended with C, A शनु ३२६०. [1])—[1]) Written by A, on new paper. ३२६१ [1])—[1]) Written by A, on new paper.—[2]) Thus A, C supplements जनकों —[3]) Emended, A° स्तद्बलापत्यकैः ३२६२. [1]) Conjectural reading, A तमेवालम्बत व्यक्तिं ३२६३. [1]) Emended, A राज्ञां.

अकृत्रिमात्मसमाधानास्करणानां सभान्तरे । न प्रत्यभाज्जडो नापि धृष्टो नापि वकव्रतः ॥३२६४॥
प्रमादस्खलिते हीनातिरिक्तत्वे च भूपतेः । कार्ये नावदधे क्षुद्रः कविरेव महाकवेः ॥३२६५॥ 3265
न विक्रमकथासङ्ग ----[1]व्यकत्थन । प्राग्वृत्तमन्तरा पृष्टः सोपस्कारं च नाभ्यधात् ॥३२६६॥
वि--कार्यभोः साम्यमकुल्यत्वादिचादुभिः । धीरावृष्टैर्हठिपातैरपुनर्भावितो व्यधात् ॥३२६७॥
तथा स्पृष्टोप्यनृत्तानाशयोभूदवगाहितुम् । न शेकुस्तं यथा जाल्मनर्मविस्पिशुनादयः ॥३२६८॥
क्षणेष्ववसितालोकक्षोभादिविशरारुषु । प्रा--[2]वसथं गच्छञ्छङ्कां[3] कामपि नानयत् ॥३२६९॥
यथा यथास्य विस्रम्भाद्भूपोभुच्छिथिलायहः । तथा तथैव सिद्धोश्च इव नाधावदुद्धतम् ॥३२७०॥ 3270
सदैवायेसरोन्यत्र पश्चाद्रुद्धपदोभवत् । अनिषिद्धोपि भुङ्क्तान्तमन्त्रागारावगाहने ॥३२७१॥
विज्ञप्त्योपयिकावाप्रिप्रार्थनमादरात्स्वयम् । दूरांचक्रे परापेक्षां शश्वत्संशयिताशयः ॥३२७२॥
अना---समये तस्या---[4] रक्षिणः । न स्वप्रवृत्तमप्यासीदनवेद्यं महीभुजे ॥३२७३॥
मन्त्र्यान्तःपुरिकादीनां परस्परविगर्हणम् । नावर्णयद्विस्मृतिं च दुष्टस्वप्नमिवानयत् ॥३२७४॥
सचेतनोपि दुर्नर्मगोष्ठीष्वनुरणन्वचः । अवदत्स्फुरदप्यन्तर्विटानां नाम लाघवम् ॥३२७५॥ 3275
एवं मुहूर्तानुभावस्य तस्य कृत्येन कृत्यवित् । पुत्रेभ्योप्यधिकां प्रीतिं स्निग्धभेजे क्रमाद्भृपः ॥३२७६॥
कलिकालमहीपालदुस्तरः सिंहभूभुजा । सोयं गोत्रपरित्राणे नवः सेतुः प्रवर्तितः ॥३२७७॥
इत्थं विज्ञापितोशेषोपद्रवस्निग्धकुस्तनः । अग्रि---[5]मपि स्वास्थ्य---[6] भूभृदचिन्तयत् ॥३२७८॥
असौ हि निर्हिमोर्वीभृन्मार्गे काले पलायनम् । शाठेयं सत्त्वस्य दुःसाध्य वद्धं ध्यायन्व्यलम्बत ॥३२७९॥
अतः सुमेधा यात्रायां यावत्क्षणमपेक्षत । सङ्ग्रामपालनाविचारात्तावत्पारम्भि धावनम् ॥३२८०॥ 3280
अल्पाधिष्ठानसुभटः स देवसरसोद्भटैः । बहुभिः सहितः सैन्यैर्मार्तण्डं विदधे पदम ॥३२८१॥
निर्निरोधप्रवेशः स प्रदेशः परिपन्थिनाम् । लाघाश्च योधा निःसारा दर्पाक्षेति विवेद सः ॥३२८२॥
विच्छकानुचरा युद्धमसंनिहितमायकाः । तेन सार्धं विदधिरे न चाहीयन्त पौरुषम् ॥३२८३॥
निःसीमसैन्यसहितो लवन्योन्यत्र डामरे । तत्र सर्वाभिसारेण धावतो युयुधे क्रुधा ॥३२८४॥
लुण्ठितद्रविणापूर्णास्ते देवसरसौकसः । सर्वे ततः सङ्ग्रामपालं विदुनाः परिजहिरे[7] ॥३२८५॥ 3285
द्विषत्संवर्तवर्षार्त्या सर्वत्र बुडितेभवत् । अधिष्ठानभटा एव कुलशैला इवोद्धताः ॥३२८६॥
ते तीक्ष्णतीक्ष्णतरणौ सोदारातिरुषश्चिरम् । बहुनिहतवन्तोन्यांस्तत्र तत्राहवे हताः ॥३२८७॥
[8]क्षतेषु युधि सर्वेषु विन्दानैर्मण्डलं निजैः । शूरेषु तत्र मार्तण्डोप्यासीदविरलव्रणः[9] ॥३२८८॥
रराजाजौ साङ्ग्रामपालिर्गयापालो हतेषु यः । त्रिषु वाजिषु चातुर्यात्पदातिर्नोपलक्षितः ॥३२८९॥

३२६६ [1]) Thus A, C supplements °सच्चरानार्थे स्व व्यं. ३२६९ [2]) Thus A, possible emendations would be विडम्ब-कान्प्रभो or विगर्हकान्प्रभोः, C विचारकान्प्रभो ३२६९. [3]) Thus A, C प्राप्तोऽस्यावं(—2) Emended, A गच्छत्रुङ्का ३२७१ [1]) Emended with C, A °गहने. ३२७२ [2]) Conjectural reading, A प्रार्थन°दरत्स्वयम्, C प्रार्थन स दरत्स्वयम ३२७३ [3]) Thus A, C अनासमसमये तस्य न ययु पथि रक्षिण ३२७४ [4])—[5]) Written by A, on new paper. ३३७५ [1]) Emended with C, A नीजें. ३२७८. [2]) Thus A, C °मप्रेप्यमपि स्वास्थ्यहेतुभू ३२८१ [3]) Emended with C, A नि सीम सै°. ३२८५ [4]) Emended, A °जर्षिरे ३२८६. [5]) Thus corr. by a later hand from A, °धिष्ठाने भटा —[6]) Emended with C, A हवेद्धता ३२८९ [1]) Emended with C, A बहूनिह° ३२८८. [1])—[2]) Written by A, on new paper ३२८९ [1]) Emended, A सङ्ग्रपालि°—[2]) Emended; A गयपाल, cf. viii 3322—[3]) Emended, A वाजिष्वचा°; C वाजित्वचा°

तत्प्राग्भ्योपलब्धाजिर्जर्जरतरतनुजः शिशुः । निनाय विस्मयं वीरान्वृष्टांसंख्यमहाहवान् ॥३२९०॥
दक्षिणं दोर्न तच्चक्रे यद्ग्रामं कम्पनापतेः । महेभांस्तापयत्यर्कः कुर्याद्भग्नरदान्विधुः ॥३२९१॥
स धावन्वाजिनाराजदेकदोःस्फुरितायुधः । सधूमदण्डो दावाग्निः सपक्षेद्रात्रिवं स्थितः ॥३२९२॥
तं वैरिनुमुखे बाणव्रणभङ्गेष्वसौ पुनः । पृष्ठादलोठ्यद्वाजी - - ग्रावबद्धपद्धतिः ॥३२९३॥
वर्मगैरवभूपृष्ठकाठिन्याघातपीडितः । स विसंज्ञो द्विषन्मध्यात्तनयाभ्यां विनिर्हृतः ॥३२९४॥
कटके सर्वतो नष्टे मार्तण्डप्राङ्मुहूर्तान्तरे । विरोध्यसाक्षि क्षिप्ता तं तावपासरतां ततः ॥३२९५॥
तत्रस्थं - - ना क्ष्मामृत्प्रस्थितः पृथुलैर्बलैः । तावद्भिः प्राप्यमप्याशु डामरं पिण्डितं व्यधात् ॥३२९६॥
क्ष्मापाले विजयक्षेत्रं प्राप्ते चोटितवेष्टनः । सज्जपालो लवन्यस्य वसतीर्निरदाहयत् ॥३२९७॥
स तादृगपि भूपाले कुद्धे वक्रीकृतभ्रुवि । अदरिद्रो गिरिद्रोणीश्रेणिभूसुरभाजनः ॥३२९८॥
संवृत्तो निःसहायश्च परिग्रहबहिष्कृतः । आपत्सुलभपाण्डित्यभृत्योपालम्भभाजनम् ॥३२९९॥
निकृत्तकरणग्रामोऽथ क्ष्मापकोपकथेष्वथात् । निरालम्बतया - - स स्वशीर्षकलार्थनाम् ॥३३००॥
रङ्गदेवीतनूजानां ज्यायांसं गुन्द्रणाभिधम् । श्रीमांल्लोहरराज्येश क्ष्मावृषा सोऽभ्यषेचयत् ॥३३०१॥
षट्सप्तहायनो[1] राजतनयः स वयोधिकान् । चूताङ्कुरो जीर्णतरूनिवेशानजयद्गुणैः ॥३३०२॥
अभिषेक्तुं सुतं देव्या यातायाः क्ष्माभुजो व्यधुः । शिरःशोणाश्मकिरणैश्चरणौ यावत्कारुणौ ॥३३०३॥
तत्राभिषिक्ते वसुधाभुजावग्रहशोषिताम् । देवीभावाभिषेकार्थमिवासिञ्चन्पयोमुचः ॥३३०४॥
भूयोऽपि राजवदनो विप्रवेत्पादनोत्सुकः । अमन्दमवचस्कन्द जयचन्द्रं नृपाज्ञया ॥३३०५॥
नागभातृव्यसहिता गार्गेरनुपवेशिनः । पश्चात्पर्षापीणीः सेनाः सोवधीत्संकटेष्वनि ॥३३०६॥
गार्गीः परिभवम्लानानना तिष्ठद्भिरेनस्ततः । नागभ्रातृसुतायण्यमध्यालोठ्यर्कं मृधे ॥३३०७॥
दुर्गमत्वादनाक्रान्तमन्यैर्वेगात्पविश्य च । दग्ध्वा चैं दिन्नाग्रामं स निरगाद्रुविक्रमः ॥३३०८॥
तथापि राजवदनो न शौर्यात्पर्यहीयत । न संदधे न चुक्रोध शक्यमस्य विनिर्गमम् ॥३३०९॥
अहन्यहनि हीनाभिः सेनाभिर्न्यपतन्नृपे । जयचन्द्रमुखाच्छश्वदसुखान्यवधीभवत् ॥३३१०॥
क्ष्मानायकोथ निःसीमनयवाद्भ्रसारणः । रणान्तरेण न तीक्ष्णैर्गुरुन्यस्तैरघातयत् ॥३३११॥
तन्मुण्डगण्डलेखेन लुठता खण्डशः कृतः । झटिति त्रुटितः स्वास्थ्यविटप्यंकुरणोन्मुखः ॥३३१२॥
पृथ्वीहरकुलाच्छेदम्वच्छद्मा मेदिनीपतिः[1] । अवधील्लोहटनमपि छलखण्डपयुक्तिभिः ॥३३१३॥
एकवारं वेष्टितोपि रक्षितस्त्रिलङ्केन सः । भूमिभृन्नीतिशास्त्रेण निपातेनाभ्यवर्तत[1] ॥३३१४॥
मल्लकाष्ठक्षुरज्यग्रमङ्गचन्द्रादयोभवन् । जीवन्मृताश्च शान्ताश्च दारिद्र्योपद्रवार्दिताः ॥३३१५॥

३२९० [1]) Emended with C, A °न्द्रदसङ्ख्य° ३२९२ [1]) Emended with C, A °दण्ड —[2]) Emended with C, A [1]द्राविव ३२९३ [1]) Thus A, C तत्रन्वाचक्षु° ३२९६ [1]) Thus A, C कम्पनाक्ष्मा° ३२९८. [1]) Emended with C, A क्रुद्धे —[2]) Emended with C, A °श्रेण-सुल° ३३०० [1]) Thus A, C supplements तस्य ३३०१ [1]) Emended, A श्रीमाल्लो —[2])— [1]) Written by A_2 on new paper. ३३०२ [1])—[1]Written by A, on new paper ३३०३ [1]) Emended with C, A °सुतामध्यामक° —[1]) Comp. vss. 2296 ३३०४ [1]) Emended, A स ३३१०. [1]) Doubtful, thus C, A °त्यान्यवधीभवत ३३१२ [1]) Conjectural reading, A त्रिशाम्य हरा C त्रिवाम्यकुरणो° ३३१३ [1]) Emended with C, A °पते —[2]) Comp. regarding this name the note to vss. 2196. [1]) Emended; A च्छत्रक° ३३१४. [1]) Emended with C, A °भ्यवर्तिना. ३३१५ [1]) Thus A, misread °मङ्गचन्द्रा in R C, C सङ्गचन्द्रस्य vss. 643

अविचिन्त्योच्चलक्ष्मोणिभृतः प्राणान्विनश्वरान् । ऐश्वर्यरूढिमूढत्वादनिर्व्यूढव्यवस्थिती ॥३३१६॥
मडेनुमितकोशत्वं तत्त्वज्ञाजाश्रयाद्गते । कुलोद्वहो विहितवांस्सिंहदेवो व्यवस्थितिम् ॥३३१७॥युग्मम्॥
सुखाविहारं पैतृक्यं[3] पितुर्देवगृहत्रयम् । तथार्धसिद्धप्रासादं परिपूर्णं व्यधापयत् ॥३३१८॥
स एव यामान्साम्यमीमहापणसमर्पणैः । निर्दोषपारिषद्यादिहयाद्यश्रीश्चधीर्व्यधात् ॥३३१९॥
अवरोधेन्दुवदनां मृगामुद्दिश्य चन्द्रलाम् । प्रत्यब्दापि मडेनूनश्रीर्हारेवारितातिथिः ॥३३२०॥ 3320
स्पृष्टो नगरनिर्दाहैः सोपि सूर्यमतीमठः । पूर्वाधिकोपगर्वेण तेनैव निरमीयत ॥३३२१॥
संजाते सज्जपालस्य ततो लोकान्तराश्रये । कम्पने निदधे राज्ञा गयापालस्तदात्मजः ॥३३२२॥
विपाकसुकुमारोपि दुःसहः सूनुनाभवत् । विस्मारितः स सौम्येन शरद्भानुरिवेन्दुना ॥३३२३॥
यौष्मोष्मदोषविषमेष्वविशेषवृत्तेर्मैवोदये तटतरोस्तटिनीप्रवाहः ।
पश्यन्नकाण्डनडिदापतनेन नाशं नाशंसति स्वसलिलस्य विभूतिलाभम् ॥३३२४॥
आ भिक्षुक्षपणाद्वैराजभञ्जनादपि भुग्नजः । विधुरे कार्यभाराणां योभूद्दृढधुरः परम् ॥३३२५॥ 3325
तस्य तस्मिन्नृपरते क्षीणप्रक्षीणकण्टके । स धन्योनन्यसामान्यप्रेमा प्रमयमायया ॥३३२६॥
ताम्बूलमायाविकृतां नीत्वाभुनामयाविव । आर्षिपन्मधुरावद्य जीवं यस्य निजः सुतः ॥३३२७॥
स जगज्जीविनेनापि रक्षणीयः क्षमापतिः । पदे पदे विपन्मग्नः प्रत्योद्धरणधीरधीः ॥३३२८॥
व्याधितस्य विनिद्रोपि समङ्गान्मङ्गलेच्छुभिः । नान्तक्षणे तस्य पार्श्वात्कृतज्ञोवाचलनृपः ॥३३२९॥
प्रियप्रजस्यासामान्यस्य स्वरूपविपरीतता । तस्य कंचित्क्षण जाता जनंजीवितदा भवेत् ॥३३३०॥ 3330
भूभुजामपि मान्धातृमुखानां निधनेन याः । दुःखं ययुः प्रजास्तासां समभावि तदा सुखम् ॥३३३१॥
वैराज्योपप्लुते राष्ट्रे नवस्य नृपतेरभूत् । अभ्यर्हतं यन्मात्सित्यं तस्य सर्वाभिषङ्गभित् ॥३३३२॥
कालो बली व्यवर्तेतनु तद्वशेन पूर्वापराचरणविस्मरणे न कस्य ।
शक्तिः क्षितेर्वहनकर्मणि योग्यतायां निर्दीरणे सुरजितस्तु वराहतायाम् ॥३३३३॥
नगराधिकृतो भुक्त्वा सुरज्ञानिर्वापिते पुरा । चिरपरूढां यो देशस्थाव्यवस्थां न्यवारयत् ॥३३३४॥
भ्रष्टः क्रयेषु दीनारव्यवहारोव्यवस्थया । निगृह्य तं भ्रंशकार्यनिर्वितण्डः पर्वानैतः ॥३३३५॥ 3335
परिणीताङ्गनाशीलभ्रंशे गृहपतेरभूत् । दण्डपवृत्तिर्या तेन सा विचार्य निवारिता ॥३३३६॥
एकान्ततो हितो भुक्त्वा विशामेव पुनर्व्यधात् । नगराधिकियां लब्ध्वा स एव परिपीडनम् ॥३३३७॥
बद्धाभिर्नतैर्कीभिश्च परिणीतगृहस्थितौ । संपयुक्तान्कथ्यमानान्हडेनादण्डयद्बहून् ॥३३३८॥

३३१६ [1])—[1]) Written by A, on new paper — [2]) Emended with C A ऐश्वर्य रू ३३१७ [1])—[1]) Written by A_2 on new paper.—[2]) Emended, A स्थितम ३३१८ [1])—[1]) Written by A, on new paper —[2]) Emended with C, A स्वल्पा°, cf viii 248.—[3]) Emended with C, A पैतृक्य — [1]) Emended with C, A ॰नृप ३३१९ [1]) Emended with G (*see manu*), A यामसा°. ३३२०. [1]) Emended with C, A वदन —[2]) Thus A, B, A, कन्दलाम् C चन्दलाम् ३३२१. [1]) Emended with G (*see manu*); A पृष्टो नगरनिर्मोह (पृष्टो written by A), cf viii 1103 1528 ३३२३ [1]) Emended, A सौम्येन ३३२६ [1]) Emended, A धन्यो नान्यसा ३३२७ [1]) Thus A, perhaps read नीत्वासुना — [2]) Emended with C, A आर्षिपामधु°. ३३२९ [1]) —[1]) Written by A, on new paper ३३३० [1])—[1]) Written by A, on new paper ३३३२ [1]) Emended with C, A अभ्यर्हत ३३३३ [1]) Emended with G (*see manu*), A निर्मारणे ३३३५. [1]) Doubtful emendation, A प्रवर्तेत, C प्रवर्त्तेन ३३३७ [1]) Emended, A पीडयन ३३३८ [1]) Emended with C, A बद्धाभि॰॰कीभिश्च.—[2]) Conjectural reading, A परि॰॰तगृ°, C परिणीतगृ°.

किंवो ---[1]लेशानां तुषाणामिव चिन्तनैः । अद्रोहालोभयोर्भूमिर्न तादृगपरोभवत् ॥३३३९॥
भिक्षुमल्लार्जुनो कालानुवृत्त्याश्रितवानपि । नासौ जहौ स्वामिहितं[2] न तौ ---[3] नावधीत् ॥३३४०॥
अक्षीणत्यागहीनस्य विभूतिसमयेष्वभूत् । संस्कारौपयिकं नास्य पर्याप्तं निधने धनम् ॥३३४१॥
कृतज्ञतायां राज्ञोन्यत्पर्याप्तं किमुदीर्यताम् । यो जीवित इवानीतान्संविभेजेनुजीविनः ॥३३४२॥
लोकान्तरातिथिं बिज्ञाभिधामुद्दिश्य वल्लभाम् । धन्यस्य विज्ञनामाढ्यविहारारम्भकारिणः ॥३३४३॥
परलोकं प्रयातस्य निर्माणप्रतिपूरणम् । स्थितं व्यवस्थितेः कं न विनियोगं चकार सः ॥३३४४॥ युग्मम् ॥
भूमुद्धार्मिकतावाप्तकृतोत्सेकवासवैः । युद्धैकवृत्तिभिरपि प्रवृत्तैः पुण्यकर्मणि ॥३३४५॥
विपक्षाणां सुभिक्षेण तुरुष्कविषयाभयात् । जन्मभूमेर्मृत्तये यैः कौर्यादन्यत्र शिक्षितम् ॥३३४६॥
यैरपि वृत्तिं विरोध्याजिव्यये सुस्सलभूभुजि । कलहावसरेष्वेवं कङ्कमीरेषु प्रपेदिरे ॥३३४७॥
गोत्रे तेषां क्षत्रियाणां जातः कर्मलियानुजः । राजबीजी सद्विद्याख्यः प्रतिष्ठां स्वाख्ययाकरोत् ॥३३४८॥
वितस्तापुलिने बाणलिङ्गे तेन निवेदिते । जायते स्वर्धुनीरोधःसंपरूढविमुक्तधीः ॥३३४९॥
तदीयं च मठं चैव तपोधनविभूषितम् । दृष्ट्वा निवर्तते रुद्रलोकालोकनकौतुकम् ॥३३५०॥
लोडनेन्यप्रतिष्ठानामधन्यद्रविणार्पणे । न तेनायतने काले संरुरुधे शुद्धबुद्धिना ॥३३५१॥
उदयस्य प्रिया चिन्ताभिधाना कम्पनापतेः । पुलिनोर्वी वितस्ताया विहारेण व्यभूषयत् ॥३३५२॥
प्रासादपञ्चकव्याजात्तद्विहारस्थितः करः । उदस्त इव धर्मेण प्रोत्तुङ्गाङ्गुलिपञ्चकः ॥३३५३॥
सांधिविग्रहिको मङ्खकाख्योलंकारसोदरः । समस्तस्याभवत्पश्चः श्रीकण्ठस्य प्रतिश्रया ॥३३५४॥
मठाग्रहारदेवौकोजीर्णोद्धारादिकर्मभिः । अनुजैः सुमना नाम रिल्हणस्यामदन्नुताम् ॥३३५५॥
भूतेश्वरे मठं कृत्वा त्रिग्राम्यामध्यपाययत् । तोयं कनकवाहिन्या वितस्तायाश्च यः पितृन् ॥३३५६॥
प्रदेशे कङ्कयपागाराभिधाने नीलभूः सरित् । जीर्णीयेव जाह्नव्या यत्र पूर्वा दिशं गता ॥३३५७॥
उत्तारार्थं गवादीनां यः सेतुं तत्र बन्धयन् । निर्ममे निर्मलं कर्म संसारोत्तरणक्षमम् ॥३३५८॥
नगरेपि स्वनामाढ्यवृषाङ्कागारकारिणा । मठो येन कृतोभ्रङ्लिहाधरधराश्रयः ॥३३५९॥
मम्मेश्वरं स सौवर्णामलसारं चकार यः । सोमतीर्थं तथा तोयोद्यानादुद्द्योतिनान्तिकम् ॥३३६०॥
अत्र क्षमाभुजो[1] वंशे वंशौघ्नत्यधनादिषु । सासूयत्वादमार्त्यानां धनप्राणादिहारिणः ॥३३६१॥
क्रुध्यद्भवासनाध्यासासूयया वासवोपि वा । प्राभ्रंशयद्दिवो देवो[2] मान्धातारं धराभुजम् ॥३३६२॥
अविश्रुतमतिर्भृत्यान्कृत्यौचित्यवतोन्वहम् । दृष्ट्वा ध्यातस्वमाहात्म्यवृद्धिस्तु प्रीयते नृपः ॥३३६३॥
कलशक्ष्मापतेः प्राज्ञैः पञ्च भृत्यस्य रिल्हणः । कुर्वन्स्वर्णातपत्राणां प्रतिष्ठां प्रीतिकार्यभूत् ॥३३६४॥

३३३९ [1]) Thus A C वो भवद्बलशाना ३३४० [1]) Thus R C, A, भिक्षुमल्ला°.—[2]) —[3]) Written by A, on new paper. — [1]) Thus A, C °वृत्त्या श्रुत°.—[2]) Emended, A स्वामिहत —[3]) Thus A, C supplements तावपि ३३४३ [1]) Doubtful emendation, A °नामाख्य°. ३३४४ [1]) Emended with G (*sec. manu*). A निर्वाप ° ३३४६ [1]) Emended with C, A तुरुष्कामिषया°. ३३४७ [1])—[1]) Written by A, on new paper ३३४८ [1])-[1]) Written by A, on new paper ३३५१. [1]) Emended, A सरुरुधे. ३३५५. [1]) Emended, A अनुजा ३३५६ [1]) Emended, A चिमाम्यमध्यपाययत्, cf. वामेन सिन्धुस्त्रिग्राम्या वितस्ता शक्तिभेन तु ४७ ३३५७ [1]) Emended, A प्रदेश्य —[2]) These two *pādas* and the following three verses are written by A, on new paper ३३६० [1]) Emended with C, A, R °मलशारं.—[2]) Emended; A, R °द्योतानुद्योति°. ३३६१ [1]) Doubtful emendation, A क्ष्माभूभुजो.—[2]) Emended, A °स्वमामात्यानां —[1]) Emended, °पिशाग्नि ३३६२ [1]) Emended with C, A देवो ३३६४ [1]) Thus corr. by A, from °पति.—[2]) Thus A, cf. VII 528 ffg.

स्वर्णपत्त्रं[1] सुरेश्वर्या शिवयोः समवेतयोः । सदीपारात्रिकामत्रमैत्रीमेति सघण्टिकम् ॥३३६५॥ 3365
बन्धोर्हिमाद्रेर्दयितः सुताजामातरौ शिवौ । स्वर्णच्छत्रच्छलान्मेरुर्न्यायात्वमुपागतः ॥३३६६॥
उद्दिश्य यद्विदधदुद्यममात्मयोनिर्दग्धो मयाङ्गघटनं दयितेन गौर्याः ।
सिद्धं तदत्र --[1]मुमर्यति हेमच्छत्रच्छलाद्धरशशधरितोग्निरूर्ध्वम् ॥३३६७॥
छत्त्रं तत्र च रिल्हणेन विहितं रौक्मं महद्रुक्मिणीप्रियोमन्दिरमूर्ध्नि नद्धमधुनावभ्रं परिभ्राजते ।
क्षैण्येन क्षतजातपानजनुषा नष्टं ततः स्वामिना प्राप्तं चक्रमवेक्षितुं स्वरुचिरं भास्वानिवाभ्यागतः ॥३३६८॥
तीर्थे मन्मथजिह्मगध्वजवृढाजयोंजिनाचार्यके साधारामभरणं क्रियापरिणति स्वर्णातपत्त्रं प्रभोः ।
भास्येकस्य शिखाहिफूत्कृतिवलद्वह्वाग्जरेणूपगं[2] केशान्तस्थितमेघपार्श्वगतडिप्पिण्डाभमन्यस्य च ॥३३६९॥
सौवर्णद्रुहिणाण्डकर्परपुरे संसूत्रिना छत्त्रकव्याकोशस्य समुद्गकप्रतिकृतौ दीर्घार्घित[3] घने ।
सङ्क्रेनेन्दुकिरीटकैटभरिपुदयामासितालंक्रिया सद्रत्नाकरयोः पिधानकरणिं स्वर्णातपत्त्रं गतम् ॥३३७०॥ 3370
तं लोहरमणीपालमन्वजायन्त भूभुजः । रङ्गदेव्या गुणोदाराश्चत्वारश्चतुरः सुताः ॥३३७१॥
गुल्हणेनापराहिण्यो रामवर्णेन लक्ष्मणः । अभिन्नभावः संवृद्धिं वर्तते लोहरे श्रयन् ॥३३७२॥
ललितादित्यदेवेन जयापीडो हि बालकः । भरतेनेव शत्रुघ्नः पाल्यमानः प्रवर्तते ॥३३७३॥
पार्थिवान्मस्कराज्ञारुनमस्काराज्यशस्करः[4] । पञ्चमः क्षितिभृद्वर्य्यो बालातप इवोदितः ॥३३७४॥
चपलैः शैशवाच्छन्दानुभावत्वात्समीक्षणैः । लडितैर्ललितादित्यो भित्तीरप्यार्द्रयत्यहो ॥३३७५॥ 3375
दत्तरक्षाञ्जनं नाम्नाधरं गौरं तदाननम् । सबालातपभृङ्गाङ्कस्वर्णपङ्केरुहायते ॥३३७६॥
आलापास्तस्य माहात्म्यगर्भा बाल्यास्फुटा अपि । अमृतार्द्रा इवोच्चारा मथ्यमानस्य वारिधेः ॥३३७७॥
महाभिजनसंज्ञानो राजसूनुः स शैशवे । अभिधत्तेनुभावेन भव्येनागामि जृम्भितम् ॥३३७८॥
अत्यक्तमण्डनशिखण्डिशिखोपि तोयस्पर्शासहान्वितकलापिकलापभङ्ग्या ।
वार्षी निपीतसलिलो वलितं प्रयाति चेष्टोक्तभावमहिमा वरवर्णभावः ॥३३७९॥
चतस्रो मौनिलां[1] राजलक्ष्मीः पद्माश्रिया समम् । संजाताः कमला चास्य कन्याः सत्कृत्यवृत्तयः ॥३३८०॥ 3380
विनोदलीलोद्यानैस्तैर्नित्यकान्तैरपत्यकैः । त्रिशोतिनेतनवधौ तौ प्रावृट्पुष्पाकराविव ॥३३८१॥
तीर्थायतनपूतेस्मिन्मण्डलेखण्डितैर्दयैः । रङ्गदेव्या एव याता भाग्यभावं त्रिभूतयः ॥३३८२॥
कृतानुयात्रा सा दैवयात्रासु[1] क्षितिपाङ्गना । राजलक्ष्मीरिवाभाति राजसामन्तमन्त्रिभिः ॥३३८३॥
सतीदेशे तीर्थसार्थास्त्यजन्त्यस्या निमज्जने । स्नानासक्तसतीमूर्तिस्पर्शनौत्सुक्यमज्जसा ॥३३८४॥
चित्रे कालेत्र यात्रासु द्रष्टुं वृष्टचुत्तरैः सदा । यत्प्रावृडिव --[1]यं जीमूतैरनुगम्यते ॥३३८५॥ 3385

३३६५ [1]) Emended, A पत्रा ३३६७ [1]) Thus A, C करुणामुमर्यति' —[1]) The last *pāda* and the following verse written by A, ३३६८ [1]) Emended with C, A, R चक्रमिव ३३६९ [1]) Thus A, C पम ३३७०. [1]) Thus A, C °र्घिनार्घे घने ३३७१ [1]) Emended with C, A धनुरम्सुता ३३७३ [1]) Emended with C, A ललितालित्य —) Emended with C, A पालमान ३३७४. [1]) The last two *pādas* and the following verse written by A, on new paper. ३३७६ [1]) Emended with C A °भृङ्गाङ्कास्वर्ण° ३३७७. [1]) Emended A बालास्फुटा ३३८० [1]) Emended with C, A मैनिला, cf. VIII 3384, 3397 —[1]) Emended, A सजाता ३३८१ [1]) Doubtful emendation A विद्यानयात्रवधौ, C योनितावनवधौ ३३८३ [1]) Emended with C A यात्रास्वधि' —[1]) These two *pādas* and the first *pada* of the following verse are written by A, on new paper ३३८५ [1]) Thus A, C supplements तैश्चेय

सा पार्थिवेषु तीर्थेषु स्नानाय प्रस्थिता ध्रुवम् । दिव्यैर्वर्षमिषात्तीर्थैः प्रावृश्येत तदीर्ष्यया ॥३३८६॥
अभ्रंलिहान्न च गिरीन्न च कूलंकषा नदीः । मृद्वङ्गी दुर्गमा मार्गे तीर्थीत्सुक्येन वेत्स्यसौ ॥३३८७॥
सुवर्णाभिः प्रतिष्ठाभिर्जीर्णोद्धारैश्च धीरया । तया चित्रं चतुरया पद्धतिर्दिज्ञा विलङ्घिता ॥३३८८॥
अथापि विक्षरत्क्षीरार्णवकान्तिच्छटाच्छलात् । यो भातीव सुधासूतिसितश्चेताद्रिमनिर्गतः ॥३३८९॥
उपमन्योरुदन्याया दारिद्र्योपद्रवापहः । रुद्रो रुद्रेश्वरो नाम्ना श्रीमान्कुद्मीरभूषणम् ॥३३९०॥
जगत्सौन्दर्यसारं स सस्वर्णामलसारकः । शान्तावसादप्रासादोद्धारश्च विहितस्तया ॥३३९१॥
सत्त्वानामिव भृत्यानां कोपैर्वैविक्ते नृपे । उदन्वतीव शरणं सिन्धुर्हैमवतीव सा ॥३३९२॥
स्थिरप्रसादे भूपाले निषद्यानुपहौ क्षणात् । भुभुजामपि संवृत्तावविच्छिन्नौ तदिच्छया ॥३३९३॥
सोमपालात्मजो भूभृद्भूपालः प्रापितस्तया । मानिन्या मनिलादेव्या विवाहेन महाहताम् ॥३३९४॥
उत्पत्तिर्भूमिसुलभानुभवो न भूम्ना कस्याप्यहो व्यभिचरत्यनुभावभावः ।
तेजस्तमोविधुतनयतमुष्णभानोर्भेदे तदुत्थमकरोत्तमसोपि चक्रम् ॥३३९५॥
भुवनाद्भुतसाम्राज्यमार्जने भुभुजाभवत् । प्रातिभाव्यं दृढं रत्नाक्रान्तसन्मण्डलावनिः ॥३३९६॥
ऊढायां मनिलादेव्यां परिणेतुरभूदपि । पिता वैमत्यमुत्सृज्य निर्व्याजं राज्यदायकः ॥३३९७॥
राज्ञः प्राक्तिधरस्यापि तरसा भूभुजोनुजः । वैरिभिर्निहतस्याथ वैरसंशोधनोद्यतः ॥३३९८॥
रङ्कां शरणमभ्येत्य चमत्कारोत्कटोत्कचः । भेजे राज्यश्रियं प्राप्य चिरं राज्यश्रियं पराम् ॥३३९९॥कुलकम॥
कृतसाहायकोमात्यै राज्ञः सप्रज्ञिमद्रुदम् । राज्यान्ताभ्रंशयद्भानुर्दुर्द पञ्चवट नृपम् ॥३४००॥
अलङ्कृयन्तत्प्रभावात्स्फारधनाम्बुनिभैरहात् । सरित खड्गवर्द्धी च कृष्णां विद्वेषिणोचराम ॥३४०१॥
द्वितीयस्यारशाभर्तुरकीर्ति निर्जयासृजत् । देवप्रभावाद्योधाममत्युग्रपुरमर्हताम् ॥३४०२॥
शीतोष्णवारणशशिद्योतकल्लोलितास्ततः । वहत्रे त्रस्निनीनाथाः प्रथामित्थं प्रपेदिरे ॥३४०३॥
समाद्दाविंशती राज्यात्राज्ञः प्राग्भुभुजो गता । तावत्येवाग्रराज्यस्य पञ्चत्रिंशतिवत्सरे ॥३४०४॥
इयद्वृद्धमनन्यत्र प्रजापुण्यैर्महीभुजः । परिपाकमनोज्ञत्वं स्थेयाः कल्पातिगाः समाः ॥३४०५॥
अस्मोपि प्रवहत्स्वभावमशनैराद्यानमद्यमायते यावाम्भः स्रवति द्रवत्वमुदितेद्रिकेषु चावेयुषः ।
कालस्यास्खलितप्रभावरभसं भाति प्रभुत्वेद्भुते कस्यामुत्र विधातृशक्तिघटिते मार्गे निसर्गः स्थिरः ॥३४०६॥
प्रयाते व्यधिकेष्वर्षसमाषट्कशते कलेः । कश्मीरेष्वास्त गोनन्दः पार्थानां सेवया नृपः ॥३४०७॥
सुनुर्दामोदरोस्याथ तस्य पत्नी यशोमती । गोनन्दोन्यस्तत्सुतोपि ततोतीत्य मही पतीन् ॥३४०८॥
पञ्चत्रिंशतमज्ञातानुपद्माभिजनाभिधाम् । राजाभवल्लवो नाम सुनुस्तस्य कुशस्ततः ॥३४०९॥

३३८६ 1) Emended, A परिथित ३३९२ 1) Emended with C, A सरण —2) The last *pada* and the following two verses written by A, on new paper ३३९३ 1) Emended, A, R C त्रिलङ्घसति. ३३९५ 1) Emended with C, A उत्पत्तिर्भू ३३९६ 1) Emended, A °मार्जनो ३३९७ 1) Emended, A °त्याच मानोत्क ३४०० 1) Emended A राज्य प्रा° —2) Doubtful emendation, A °वटो. ३४०१ 1) The last *pada* and the following verse written by A, on new paper. ३४०२. 1) Doubtful emendation of G (*sec. manu*), A °कीर्तिर्निज ३४०५ 1) Emended with C, A °विंशतु व ३४०६. 1) Emended with C, A यावाम्भ ३४०८ 1) Emended with C, A रामाकरस्याथ —2) Comp यशोवती 1 70 —3) Emended with C, A °पत्नी ३४०९. 1) Emended with C, A राज्ञा वल्लभको, cf अथाभवल्लवो नाम 1 84

द्वौ खगेन्द्रसुरेन्द्राख्यौ पुत्रपौत्रावमुष्य तु । गोधरोयान्यकुलजः सुवर्णाख्यस्तदात्मजः ॥३४१०॥ 3410

तज्जन्मा जनकोप्यासीत्सूनुः शच्याः शचीनरः । अथाशोकोभवद्भूभृताशोस्य प्रपितृव्यजः ॥३४११॥

तज्जो जलौकाः संदिग्धवंशो दामोदरस्ततः । तुल्यं त्रयोथ हुष्काद्यास्तुरुष्काभिजनोद्भवाः ॥३४१२॥

अभिमन्युस्तृतीयोथ गोनन्दोस्य विभीषणः । राजेन्द्रजिद्रावणश्च [illegible]यः क्रमशोभवत् ॥३४१३॥

अन्यो विभीषणः सिद्ध उत्पलाक्षश्च तद्वयुः । पश्चात्ततो हिरण्याक्षहिरण्यकुलयोरभूत् ॥३४१४॥

राजा वसुकुलस्तस्य सूनुः ख्यातस्त्रिकोटिहा । क्षितिनन्दो वक्राक्षज्ञाद्वसुनन्दस्तदात्मजः ॥३४१५॥ 3415

नरेन्योक्षस्ततस्तस्माद्रोमा गोकर्णको नृपात् । तस्मान्नरेन्द्रादित्योभूत्सूनुरन्धयुधिष्ठिरः ॥३४१६॥

तस्य प्राश्नशितो भृत्यैरन्याभिजनसंभवः । भूपः प्रतापादित्योभुञ्जलौकोपि तदात्मजः ॥३४१७॥

तुर्ज्ञानि निःसुते तज्जे विजयेन्यकुलोद्भवः । जयेन्द्रस्य सुतेपुत्रे सचिवः संधिमानभूत् ॥३४१८॥

युधिष्ठिरस्य पैत्रेण भूपादित्यात्मजन्मना । श्रीमघवाहनेनाथ गौनन्देभ्युदितं कुलं ॥३४१९॥

..... | ..... ॥

ततः प्रवरसेनोन्यस्तोरमाणात्मजः क्षितिम् । लेभे हिरण्यभ्रातृव्यस्तस्य पुत्रो युधिष्ठिरः ॥३४२०॥ 3420

ततो नरेन्द्रादित्यश्च रणादित्यश्च भूपतिः । क्रमादभूतां तत्पुत्रो विक्रमादित्यभूपतिः ॥३४२१॥

बालादित्यश्चोदभवत्रणादित्यस्य नन्दनः । बालादित्यस्य जामाता ततो दुर्लभवर्धनः ॥३४२२॥

सुतुर्दुर्लभकस्तस्य चन्द्रापीडोभवत्ततः । तारापीडोनुजन्मा च मुक्तापीडस्य चानुजः ॥३४२३॥

भूपावास्तां कुवलयापीडो हैमातुरोस्य च । वज्रादित्यः सुतो राज्ञो मुक्तापीडस्य तत्सुतौ ॥३४२४॥

पृथिव्यापीडसंग्रामापीडावनु नृपोभवत् । जयापीडोस्य मन्त्री च जज्ञेः पुत्रावपि क्रमात् ॥३४२५॥ 3425

ललितापीडसंग्रामापीडौ ज्येष्ठात्मजस्ततः । श्रीचिप्पटजयापीडः कल्यपाल्युद्भवोभवत् ॥३४२६॥

अभिचारेण तं हत्वा सोमत्यांदितरेतरम् । उत्पलाद्यैरसंग्राह्यराज्यैस्तन्मातुलैः कृतः ॥३४२७॥

भ्रातुः पुत्रोजिनापीडो जयापीडस्य तत्पदे । अनङ्गापीडनामा च संग्रामापीडजस्ततः ॥३४२८॥

तमुत्पाटयोत्पलापीडोस्याजितापीडनन्दनः । अवन्तिवर्मा भूरेण तं निवार्याथ मन्त्रिणा ॥३४२९॥

३४१० [1]) The last three *pādas* and the following verse are no longer found in A as the upper portion of fol. 327 has broken off, the text is given from R G —[2]) Emended with C, R G (*prima manu*) सुवर्णाकूक्षजा°, G r. 47 ३४१२ [1]) Emended, R C °वंशे, the upper strokes of the letters are not legible in A ३४१३. [1]) Thus A, C त्रिसानुर्चा क्रमात्पूर्वा ३४१४ [1]) Here the name of NARA is omitted —[2]) Emended, A उत्पलाख्यश्च —[3]) Thus A, doubtful.—[4]) Emended, A हिरण्याख्येहिरण्यकुशयोः°. ३४१५ [1]) C inserts here two *pādas* श्रीमिहिरकुलो राजा वक्राक्षस्तत्तनन्दन —[2]) Emended, A क्षितिनन्दा वक्रात्मजाद्वसु°. ३४१८. [1]) Emended, A तुज्ञने; cf. n. 11.—[3]) Emended, A जयेन्द्रस्य -पुत्रे, C जयेन्द्रस्तस्यसुतोऽपुत्र ३४१९ [1])Thus A, but compare n 145 ffg.—[2]) Emended with C, A गानन्दाभ्युदितं.—[3]) After this verse C inserts the following तत प्रवरसेनोभूद्रूप काश्मीरमण्डले ॥ तत्सुतुश्च हिरण्योऽभूत पालयन्क्षितिमण्डलं । मातृगुप्तोऽवहत्तस्माच्चत्वस्तेन शकारिणा ॥ One verse containing the names of PRAVARASENA I, HIRANYA and MĀTRIGUPTA appears to have been omitted here by A. ३४२० [1])The remaining portion of this verse, the following verse and the first *pada* of verse 3422 are no longer found in A, as the upper portion of fol 327 has broken off, the text is given from R G.—[2]) Thus C, R पुत्रो °धिष्ठिरात्, corr. *sec. manu* as above, G पुत्रायुधिष्ठिरात् ३४२१. [1]) Thus C R; G तद्वच विक्रमादित्य उदीरितम् ३४२२. [1]) Thus C R; G °त्यश्चोदवहद्रणा°.—[2]) Emended with R G; A °दित्यश्च मैं°. ३४२३ [1]) Thus C, R G °पीडस्य, in A three *aksharas* after मुक्ता have become illegible ३४२५. [1]) Emended with C, A जज्ञजपुत्रावपि. ३४२६. [1]) Emended with C, A °पीडश्चेष्ठा ° ३४२७ [1]) Emended with C, A सम्मत्या°. ३४२९. [1]) Here ends the text of A at the foot of fol. 327 *rec.*, the last leaf of the MS. being lost. The text of the remaining verses is given from R G.

नप्तोत्पलस्य विदधे साम्राज्ये सुखवर्मजः । भूरः शंकरवर्मा स गोपालस्तस्य चात्मजः ॥३४३०॥
रथ्यागृहीतः प्राभुञ्च तद्भ्राता संकटाभिधः । सुगन्धाख्या तयोर्माता तां विनार्हयाथ भूभुजम् ॥३४३१॥
भूरवर्मप्रणप्तारं पार्थं तन्निपदातयः । चक्रुर्निर्जितवर्माणं ततस्तस्य च तत्क्रमात् ॥३४३२॥
चक्रवर्मा भूरवर्मा चेति निर्जितवर्मजः । विहिता बहुशो राज्ये तस्तम्भे शंभुवर्धनः ॥३४३३॥
तदन्तरे लब्धराज्ये मन्त्री व्यापाद्य तं नृपम् । चक्रवर्मण्यतीतेथ पापी पार्थात्मजः क्रमात् ॥३४३४॥
उन्मत्तावन्तिवर्मासीत्तत्पुत्रे भूरवर्मणि । राज्याद्भ्रष्टे द्विजैश्चक्रे राज्ये मन्त्री यशस्करः ॥३४३५॥
प्रपितृव्यात्मजस्तस्य वर्णटस्तनयोनु तम् । राज्ये दुष्काङ्क्षिसंग्रामस्तस्थौ निष्पाट्य तं ततः ॥३४३६॥
अमात्यः पर्वगुप्ताख्यो राज्यं द्रोहेण लब्धवान् । क्षेमगुप्तः सुतोस्यासीदभिमन्यौ तदात्मजे ॥३४३७॥
शान्ते मात्रा पाल्यमाने नन्दिगुप्ते च तत्सुते । तनस्त्रिभुवने भीमगुप्ते च क्रूरचेष्टया ॥३४३८॥
पौत्रे तयैव निहते स्वयं दिद्दाख्यया कृतम् । राज्यं संग्रामराजोपि भ्रातृव्योन्ते नृपः कृतः ॥३४३९॥
हरिराजानन्तदेवावास्तां तस्यात्मजौ ततः । कलशोनन्ततनयः क्रमाद्भूतौ तदात्मजौ ॥३४४०॥
उभावुत्कर्षहर्षाख्यावपि निष्पाट्य भूपतिम् । हर्षदेवं तमुद्दामविक्रमोनन्यवंशजः ॥३४४१॥
भ्रातुः पुत्रस्य दिद्दाया जस्सराजस्य नप्तृतः । सल्लाभिधानादुद्भूतो भूपतामुच्चलोभजत् ॥३४४२॥
द्रोहेण तं हतवतां भृत्यानामग्रतस्ततः । शङ्खराजान्यनामाभूद्भ्रुख्यः क्षणिको नृपः ॥३४४३॥
गर्गेण निहते तस्मिन्सल्हो द्वैमातुरोल्यभुत् । तस्योच्चलमहीभर्तुर्भ्राता निर्वेद्य तं बली ॥३४४४॥
सुस्सलाख्योयहीद्राज्यं माल्हिरुच्चलसोदरः । विरक्तैः पाटिते तस्मिन्राज्याद्दुर्वैर्नृपः कृतः ॥३४४५॥
वर्षमासान्हर्षभूभर्तृनप्ता भिक्षाचराभिधः । पुनर्निर्यास्य तं प्रावराज्ये सुस्सलभूभृति ॥३४४६॥
क्रमाच्छवन्यैर्विश्वसैन्यैराज्योद्देजिते हते । लवन्यान्निखिलांस्तं च हत्वा भिक्षाचरं नृपः ॥३४४७॥
सुतः सुस्सलभूभर्तुः संप्रत्यप्रतिमक्षमः । नन्दयन्मेदिनीमास्ते जयसिंहो महीपतिः ॥३४४८॥
गोदावरी सरिदियेातुमुत्सैस्तरङ्गैर्वक्त्रैः स्फुटं सपदि सप्तभिरापतन्ती ।
श्रीकान्तिराजविपुलाभिजनाब्धिमध्यं विश्रान्तये विशति राजतरङ्गिणीयम् ॥३४४९॥

[1] इति श्रीमहाकविश्रीकल्हणकृतायां राजतरङ्गिण्यामष्टमस्तरङ्गः ॥

समाप्तेयं राजतरङ्गिणी

कृतिः श्रीमहामात्यचम्पकप्रभुसूनोर्महाकवेः कल्हणस्य ॥

३४३० [1]) The last two *pâdas* are found in the above form in C, in R G they are added *sec. manu*, being probably copied from C ३४३२ [2]) Emended with C, R G निनादय°. ३४३२. [3]) Thus R G, cf. v. 287 ffg., C ततः पार्थस्ततः क्रमात ३४३३. [4]) These two *pâdas* and the first half of the following verse are omitted in C.—[5]) Thus R; G ---म्भे. ३४३७ [6]) Thus C R (*sec manu*), G R (*prima manu*) सोमगुप्त. ३४३९. [7]) Emended, R G C निर्हते.—[8]) Emended; R G राज्ये, C कृतं। राज्ये ३४४५. [9]) Emended, R G C माल्ही, R (*sec. manu*) सल्हो. ३४४७. [10]) Thus R, G °लांस्ते च, C °लांस्ताश्च ३४४९. [11]) Emended, R G C श्रीकान्त', comp vn. 1285. *Colophon.* [1])—[1]) This part of the Colophon is not found in G

Canto Verse

१ ६०. *For* स्कन्दावारं *read* स्कन्धावारं, *adding note* [1]) Emended. A स्कन्दावारं.

१. १७३.[1]) *For* A_2 भूम्बेश्वरी *read* A_1 भूम्बेश्वरी.

१ २१७. *For* स्वादुभीक्तस्य° *read* स्वादु भीक्तम्ब°.

२. १. *For* ललनार्यु° *read* लटभार्यु°

३ ४४ *For* वीक्षमाणाय *read* वीक्षमाणाय

२ ११५. *For* संवाहिनिखिला *read* संवाहि निखिला°.

२ १७०. *For* जरद° *read* जरद°[2], *adding note:* [2]) A जरद°

३. १०२. *To* पुरुषाधम *add note* Subhâshitâvali, 361, reads पुरुषोधम.

३. ४१३. *To* विदधस्थिर्यं *add note:* Subhâshitâvali, 579, reads विदधस्थिय

To जगतस्तिन्मां° *add note* Subhâshitâvali, 579, reads जगतां तिन्मां°.

४ १३५ *For* योय *read* यो यं

To परापकरणाय *add note:* Subhâshitâvali, 3133, reads जनापकरणाय.

४. १४८. *For* अशिश्रयन्न *read* अशिश्रियंस.

४ २३४. *To* °न्कालेतिबालो° *add note* Subhâshitâvali, 3028, reads °न्कालेपि बालो°.

४. ४९८[1]) *For* A_1 देशे, A_2 देशे *read* A_1 देशे, A_2 देशं.

४ ७१२ *For* °नुत्तम्ब्य *read* °नुत्तम्य[1], *adding note* [1]) Emended. A°नुत्तम्ब्य.

५ १२५. *For* सत्कर्मजन्मसु *read* सत्कर्म जन्मसु

५ १२६ *For* वर्षे एकोनषष्ठे *read* वर्षे एकोनषष्टे.

५ १३२ *For* °शिश्रयन *read* °शिश्रियन

५ १४९. *For* °भुसूज् *read* °भुभुज.

५ १९९.[1]) *For* वराहमल° *read* वरसहमल

५ २३३ *To* क्रमलुकानिधाम् *add note*. Comp. the name of the Shâhiya King *Kamalú*, Alberûnî's *Indica* (transl by Sachau) n. 13.

५. २६७. *For* °पहका *read* °पाहका

५ २९५. *For* व्यधुतान्वि° *read* व्यधुस्तन्वि°

५ ३२६. *For* श्रीवङ्क° *read* श्रीवङ्क°

Canto Verse

६. ९८. *For* समर्पयन् *read* समार्पयन्, *adding note* [2]) Emended, A समर्पयन.

६ १४९. *For* तद्दल *read* तद्दलम्.

६. ३४९. *For* काश्मीरिकबल°*read* काश्मीरकबल°.

७. ३१७. *For* स्वल्पानुगोभवन *read* स्वल्पानुगो भवन.

७. ४६६. *For* °स्कन्दानां[1] *read* °स्कन्धानां[1], *adding note:* [1]) Emended; A °स्कन्दाना.

७. ५६०. *For* वेशमशिश्रयन् *read* वेशमशिश्रियन्.

७. ५८७. *For* °खिपष्टेऽहं° *read* °स्त्रिपष्टेऽहं°.

७. ५८८. *To* कीर्तिन्यस्वपुरा° *add note* [1]) Thus A; perhaps read कीर्तिर्यस्वापुरा°, comp. viii. 538.

७. ५२०. *For* काष्टवाट° *read* काष्ठवाट°.

७. ५९२. *For* °व्यसक्षीणं *read* °व्यसक्षीण.

७. ६०३.[1]) *For* A प्रत्यास्ने *read* A_1 प्रत्यास्मे.

७. ७६२. *For* पक्षमशिश्रयन् *read* पक्षमशिश्रियन्.

७. ८०४. *To* स्वशिरम् *add note* Subhâshitâvali, 3132, reads निजाशिर.

To विध्या स्वैव *add note* Subhâshitâvali, 3132, reads देव्या सेव.

७. ८४९. *For* जरद *read* जरठं, *adding note* [1]) A जरद°.

७. ८८२. *For* कोपाच्छले *read* कोपाच्छुले

७ ८९२. *For* तुहुभु° *read* तुभुभु°.

७. ९५०. *For* विरलामु° *read* विरलोमु°

७ ९७२. *For* काश्मीरिकाणां[1] *read* काश्मीरकाणा, *omitting note.*

७ १००८ *For* काश्मीरिकाणा *read* काश्मीरकाणा, *omitting note.*

७. १०१३. *For* तुहुभु° *read* तुभुभु°

७. ११२३ *For* संप्रस्थमुष्टिमन्थन *read* सप्रस्थमुष्टिमन्थल.

७. ११८९. *For* काश्मीरिका[1]. *read* काश्मीरका *omitting note.*

७. ११८७. *For* स्कन्दावारं *read* स्कन्धावारे[1], *adding note:* [1]) Emended, A स्कन्दावारे.

CORRIGENDA AND ADDENDA.

Canto Verse

७. २४६७. *For* मङ्गलातीय° *read* मङ्गलातेय°[1], *adding note:* [1]) Emended, A °ङ्गातीय°.

७. २६५८ *For* शार्दूलायु लोविशत् *read* शार्दूलायुधलोविशत्.

७. २६९५. *For* भूतिनिश्चा° *read* भूतनिश्चा°.

८. २८४. *For* °स्कन्धावारेषु *read* °स्कन्धावारेषु[1], *adding note:* [1]) Emended, A° स्कन्धा°.

८. ४८९. *For* वेशाशी *read* वेशाशौ[1], *adding note.* [1]) Emended; A वेशाशौ.

८. ६७७. *For* हम्ब *read* हम्बं

८. ७४५ *For* तैर्जयो मोचिया° *read* तैर्जयोमोचि वा°.

८. ८८७ *For* काश्मीरिक°[1] *read* काश्मीरक°, *omitting note.*

For °पाटव *read* °पाटव.

९. ९०२. *For* °तालाशीवाद्य° *read* °तालादिवाद्य°

९.९२३.९२३ *For* काश्मीरिका°[1] *read* काश्मीरका°, *omitting note.*

९. १००८. *For* °कान्दमुखरे *read* °कन्दमुखरे.

९. १०५५. *For* स्कन्शावारं *read* स्कन्धावार[1], *adding note* [1]) Emended; A स्कन्शावारं

Canto. Verse.

९. १०८४. *For* °भिक्षिकास्थान *read* °भिक्षुकास्थान°

९. ११४८. *For* काश्मीरके[1] *read* काश्मीरिके, *omitting note.*

९. ११२८. *For* राजात्मजभमात् *read* राजात्मजभमात्.

९. १४४५ *For* निजप्रभा *read* निजप्रभो

९. २०१८. *For* ज्योतीरसा° *read* ज्योती रसा°.

९ २०४३ *For* °स्कोडेश्वरी *read* °स्कोडेश्वरो

९. २३३३. *For* सस्तम्भेन°[1] *read* सस्तम्भेन°, *omitting note*

९. २७४८.[1]). *For* PRITHVIHARI'S *read* PRITHVIHARA'S.

९ २७५७. *For* काश्मीरका[1] *read* काश्मीरिका, *omitting note.*

९ ३०२३.[1]). *For* सारसा *read* सारासा

९ ३१७२. *For* °स्संस्तम्भ्य[1] *read* °स्तम्भ्य, *omitting note*

९. ३१८१. *For* इन्दुवशा° *read* इन्दुवशा°.

N.B.—Some letters, especially ृ *and* ि, *have occasionally broken in the printing*